GL SANS 891.21
VYA
125543
LBSNAA

। राष्ट्रीय प्रशासन अकादमी
cademy of Administration
मसूरी
MUSSOORIE
पुस्तकालय
LIBRARY


अवाप्ति संख्या 125543
Accession No. 4621
वर्ग संख्या GL Sans 891.21
Class No.
पुस्तक संख्या VYA व्यास
Book No.

श्रीः

महाकवि-श्रीमदम्बिकादत्तव्यास-प्रणीतः

शिवराज-विजयः

(द्वादशनिश्वासात्मकः, सम्पूर्णः)




व्याकरण-साहित्य-मीमांसाद्याचार्येण

पं० श्रीरामजीपाण्डेयशास्त्रिणा

विरचितया

वैजयन्त्या विभूषितः



संशोधकः—

पं० श्रीजितेन्द्रियाचार्यः



प्रकाशकः—

प्रणेतृ-पौत्रः—

स्वर्गीय-श्रीराधाकुमार-व्यास-तनयः

श्रीकृष्णकुमारव्यासः

प्राप्तिस्थानम्—
व्यास-पुस्तकालयः,
मानमन्दिरम्, काशी ।

All Rights Reserved by the Publisher.

पञ्चमं संस्करणम्
जून १९४०

रूप्यकद्वयम्

मुद्रकः—
बी० के० शास्त्री;
ज्योतिष प्रकाश प्रेस, काशी ।

॥ श्रीः ॥

निर्माणहेतुः

"गद्यं कवीनां निकषं वदन्ति"

श्लोक एकस्याप्यंशस्य चमत्कार-विशेषाधायकत्वे सर्वोऽपि श्लोकः प्रशस्यते, न च गद्ये तथा सुलभं सौष्ठवम्, गद्ये तु सर्वाङ्गीण-सौन्दर्यमुपलभ्येत चेत्; तदैव तत् प्रशंसा-भाजनं भवेद् भव्यानाम्। पद्ये छन्दःपारवश्यात् स्वच्छन्दः पद-प्रयोगो न भवतीत्यनिच्छताऽपि कविता-प्रसङ्ग-प्राप्तं स्वाभाविकं स्वल्पमपि वचनीयं क्वचिद् विस्तार्यते, क्वचिद् बह्वपि नियताक्षरैः सङ्क्षिप्य क्षोदिष्ठं विधीयते, क्वचिच्च द्वित्र-स्वाभाविक-पद-प्रयोग-समापनीयान्यपि पारस्परिकालाप-संसक्त-प्राप्त-वाक्यानि जटिलीक्रियन्ते। गद्ये तु यदि किमपि तादृशमस्वाभाविकं स्यात्; तत् कवेरेव निर्वक्ति महदवद्यम्—इत्यादिकारणैः पद्यापेक्षया गद्यमेव महामान्यं भवति, भवति च दुष्करमपि गद्य-काव्यमेव। अत एव शुद्ध-पद्यात्मकेषु बहुषु महाकाव्येषु खण्डकाव्येष्वपि च प्राप्येष्वपि, गद्यपद्यात्मकेषु चम्पू-नाटकादिषु चानेकेषूपलभ्यमानेष्वपि, शुद्धगद्य-काव्यानि तथा नाऽऽसाद्यन्ते। अस्माकं महामान्या धन्याः सुबन्धु-बाण-दण्डिनो महाकवयो ये वासवदत्ता-कादम्बरी-दशकुमारचरितानि सुधामधुराणि सदा सदनुभाव्यानि गद्यकाव्यानि विरचय्य भारतवर्षं सबहु-प्रमोद-वर्षं व्यधिषत; येषां चोक्ति-पर्य्यालोचन-प्राप्त-

पर्य्याप्त-व्युत्पत्तयोऽसङ्ख्याश्छात्रा अद्यापि वर्तन्ते, वर्तिष्यन्ते च चिराय। पूर्वैर्भट्टार-हरिचन्द्र-प्रभृतिभिरेतैर्महाकविभिश्च प्रचारितोऽपि महाकाव्य-सञ्चारो न चिराय स्थितिमकलयत्। भारताभिजनभाषा-कविभिरपि च प्रायः पद्य-प्रकृतिकैरेव समभावि-इति जगत्प्रसिद्धैः सूरदास-प्रभृतिभिरपि पद्यान्येव निबद्धानि। साम्प्रतन्तु समय-महिम्ना भारतीय-वर्तमान-भाषासु बहुधा गद्यकाव्यानि विरच्यन्ते। वङ्ग-गुर्जरादि-भाषासूपन्यासैरेव व्याप्ता विपणयः। हिन्दीभाषाऽपि च प्रत्यहमतिशयमासादयति गद्य-सोपानेष्वेव पदाधाने। परं न केवलं प्राकृतिक-गिरां गुरवो गीर्वाण-गिरि व्युत्पत्तिगरीयांस उपलभ्यन्ते, न वा कांश्चिद् धन्य-धन्यान् विहाय, संस्कृतसाहित्य-व्युत्पन्ना एव, इतर-भाषानुरक्ता विशेषतोऽवलोक्यन्ते; अत एव भारताभिजन-भाषा-कवयः प्रायः स्वभ्रमान् साक्षात्संस्कृतसाहाय्येन शोधयितुं न पारयन्ति, न वा भाषाकवि-समादृतान नवान् नवान् मनोरमान् चमत्कारविशेषाधायकान् पथोऽनुसर्तुं संस्कृत-साहित्य-वैभवेषु च निधीन् वर्द्धयितुं संस्कृतज्ञा एव प्रायशः पारयन्ति। कदाचिद् वृन्दारक-वृन्द-वाण्यां गद्यकाव्यप्रचार-दौर्बल्यस्येदमेव प्रधानं कारणं स्यात्। महदिदमुपहासास्पदं विडम्बनं यद्—मण्डूक इव महापारावार-पारमासादयितुं यतमानस्तादृशं कवि-कौशल-निकषायितं गद्यकाव्यं मादृक्षः क्षोदीयान् जनो रिरचयिषुः संवृत्तः-इति। काव्यमिदं मा स्म भूत् तादृग-भाव-विघट्टकम्, मा स्म वा पुपत् कस्यापि मोद-विशेषम्, परं मया तु सनातनधर्म-धूर्वह-शिवराज-वर्णनेन रसना पावितैव, प्रसङ्गतः

सदुपदेश-निर्देशैः स्व-ब्राह्मण्यं सफलितमेव, ऐतिहासिककाव्य-रुचीनि स्वमित्राणि रञ्जितान्येव, चिरमस्मत्पूर्वजैः पराशरपाराशरादिभिरुपासिता संस्कृत-भाषा सेवितैव, चक्षुषी निमील्य सविशेषं साक्षात्कृता पीयूष-पूर-पूर्णैरिव दृक्पातैरुज्जीवयन्तो पारिजात-कुसुम-वर्षिभिरिव वचनैरुपदिशन्ती जननी सरस्वती समाराधितैव, सद्यः परनिर्वृतिश्च समासादितैव। भवभूतिजगन्नाथादीनां राजमान्यानां कवि-मण्डल-चक्रवर्तिनान्तु द्वेषविशेषैर्वा स्वग्रन्थ-मार्मिक-जनालाभेन वा कारणान्तर-कलापैर्वा महानेव शोक-सङ्घात आसीत्। "कोऽस्मद्ग्रन्थानवलोकयिष्यति ? को वाऽस्माकं गूढ-तात्पर्यं भोत्स्यतीति ?"—चिन्तासन्तान-वितान-झञ्झावातोद्भूत-संशय-घनघनाडम्बर एव तथा समरौत्सीद्धृदयाकाशम्; यथा ध्रुवं सद्यः-परनिर्वृति-रूप-चन्द्रिकाप्रसरेणापि न रञ्जितमेव तदन्तःकरण-कुमुद-वनम्।

तथा च तैरेवोक्तम्—

"ये नाम केचिदिह नः प्रथयन्त्यवज्ञां
जानन्ति ते किमपि तान् प्रति नैष यत्नः।
उत्पत्स्यतेऽस्ति मम कोऽपि समानधर्मा
कालो ह्ययं निरवधिर्विपुला च पृथ्वी॥"

"विद्वांसो वसुधातले परवचःश्लाघासु वाचंयमाः
भूपालाः कमलाविलासमदिरोन्मीलन्मदाघूर्णिताः।
आस्ये धास्यति कस्य लास्यमधुना धन्यस्य कामालस-
स्वर्वामाधर-माधुरीं विधुरयन् वाचां विलासो मम ?॥"

अहन्तु तादृक्षाणां महाकवीनां चरण-रजो-विमर्श-भाजनमपि तदपेक्षयाऽधिकं भाग्यवत्तरोऽस्मीति निश्चिनोमि। यतो मद्ग्रन्थ-मार्मिकस्तु मिथिला-मही-महेन्द्रः, भारत-साम्राज्य-व्यवस्थापक-समाज-सञ्जीवनः, महामान्यः, वदान्यः, धन्य-धन्यः, विविध-बिरुदावली-विराजमानः, राजमानोन्नतः, नतोन्नतिदायकः, महा-राजश्रीरमेश्वरसिंहवीरवर एवास्ति। माद्यन्ति च परःशता वारा-गस्यादि-पण्डित-मण्डली-मण्डना रसास्वादानुकूल-वासना-बासि-तान्तःकरणा विबुध-जनाः।

सोऽयं स्वलेखनी-कण्डूमुपशमयितुं लिखितः प्रकाण्ड-लेखो यदि केषाञ्चित् पण्डित-प्रकाण्डानां कर्ण-कण्डूं खण्डयेत्; तत् कृत-कृत्यः संवर्त्तेय। ये तु पुरोभागिनो निगीर्यापि प्रबन्धममुं तुण्ड-मुण्ड-गण्ड-कण्डूयनैः, ताण्डव-करण्डीकृत-भ्रूभङ्गैश्चास्मानास्मा-कांश्च हासयिष्यन्ति; तेऽप्यसङ्कुच-प्रणति-पात्राण्येवास्माकम्। ये तु जोषं जोषमालोक्यापि काव्यानि, समासाद्यापि च तोषम्, सरोष-मुज्जृम्भिताभिर्जाठरज्वालाभिरेव तं जारयन्ति; जारयन्ति ते श्रावणोऽपि लौहमपि विषमपि दाधीचास्थीन्यपि चेति विलक्षण-कुक्षयस्ते न कस्य नमस्याः ?

—अम्बिकादत्तव्यासः।

॥ श्रीः ॥

॥ शिवराजविजयः ॥

गद्यकाव्यम्

"विष्णोर्माया भगवती यया सम्मोहितञ्जगत्" ।

"हिंस्रः स्वपापेन विहिंसितः खलः साधुः समत्वेन भयाद्विमुच्यते"।

—भागवतम् ।

वागीश्वर्यै नमः ।

शिवाङ्के खेलन्ती शिवशिरसि गङ्गालहरिकां
समुद्यद्दुन्दुभीरध्वनिभरसमुद्दीपितमदाम् ।
निरीक्ष्योत्का वामा सरलहृदयाऽऽघूर्णितवती
यमासेव्यं देवं तमिह कलये चित्तनिलये ॥

तत्रभवान् कविकुलचूडामणिः सिद्धसरस्वतीकोऽम्बिकादत्तव्यासो वीररस-प्रधानं गद्यकाव्यं चिकीर्षुर्महनीययशसो भारतभागधेयस्य दुर्दान्तोरगजिह्व-जिह्वोत्पाटनकुशलस्य शिववीरस्य चरितचयेनैव भारती कृतार्थयितव्येति विहित-मनोरथ उपक्षिपति वेदव्यासोक्तिं श्रीमद्भागवतोद्धृताम्-**विष्णोर्मायेति** । वेवेष्टि व्याप्नोति चराचरात्मकं प्रपञ्चमिति विष्णुर्ब्रह्म, तस्य, **माया**=शक्तिः, सदसद्व्यामनिर्वाच्या । सा **चैषा भगवती**=समग्रैश्वर्यशालिनी ।

ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ॥

अरुण एष प्रकाशः पूर्वस्यां भगवतो मरीचिमालिनः। एष भगवान् मणिराकाशमण्डलस्य,

---

इति प्रसिद्धो भगपदार्थः–तद्वत्त्वञ्च भगवत्त्वम्। यया=देव्या, गच्छतीति जगत्=स्थावरस्याप्युपलक्षणम्। सम्यग्रूपेण मोहितम्।

हिंस्रः=घातुकः। **खलः**=दुष्टः। स्वस्यैव पापेन विहिंसितो भवति, नतु तत्र निमित्तान्तरापेक्षा। साध्नोति परकार्यमिति साधुः, तथाभूतश्च **समत्वेन**=विवेचकत्वेन **भयाद्विमुच्यते**=अपगतभयो भवति, तत्रापि तस्य समत्वमेव हेतुर्न-बीजान्तरापेक्षा–तदुक्तम् "न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः" इति। एतेनाऽऽद्यनिश्वासे पापिनामशोभनाः साधूनाञ्च शोभना आचाराः प्रदर्शिता भवेयुरित्युपक्षिप्तम्। सर्वञ्चेदं सर्वतन्त्रस्वतन्त्रस्य भगवतो मायया त्रिगुणात्मिकया निबद्धैरेव समास्थीयत इति, काचन हिन्दुकन्या केनचन दुष्टेन हृता रक्षिता च सा साधुना, दुष्टनाशश्च **स्वपापेनैव संवृत्त इति** कथाभागश्च। विष्णुनामग्रहणेन मङ्गलमपि शिष्टाचारानुमितश्रुतिबोधितेति कर्त्तव्यताकं सूचितम्।

कथाभागं प्रारभमाणो भगवदादित्यप्रकाशात्मवस्तुनिर्देशरूपं मङ्गलमपि समाचरति–**अरुण एष इति**। पूर्वस्यामिति–"दिशि"इति विशेष्यम्। मरीचीनां मालाऽस्यास्तीति **मरीचिमाली**=दीधितिपतिः। "न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकर"इति तु न सार्वत्रिकम् "असुब्वत"इति भाष्यप्रयोगादिति ध्येयम्। **अरुणः**=ईषल्लोहितः। "ज्योतिषां रविरंशुमान्" इति भगवद्विभूतिसमूहपातित्वेन भगवत्त्वञ्च सर्वथा स्फुटम्। अथाऽऽदित्यं विशिनष्टि–**एष भगवानिति**। "दिनस्य" इत्यन्तं मालारूपकेण रूपयति वैदर्भ्या रीत्या प्रसादेन च गुणेन। **मणिः**=रत्नम्, यथा हीरकादिरन्धकारं वारयति प्रकाशयति च पदार्थसार्थं तथाऽयमपि बाह्याभ्यन्तरतमोऽपवार्य प्रकाशयति सकलानर्थानिति

चक्रवर्त्ती खेचर-चक्रस्य, कुण्डलमाखण्डलदिशः, दीपको ब्रह्माण्ड-भाण्डस्य, प्रेयान्पुण्डरीक-पटलस्य, शोक-विमोकः कोक-लोकस्य, अवलम्बो रोलम्ब-कदम्बस्य, सूत्रधारः सर्वव्यवहारस्य, इनश्च दिनस्य। अयमेवाहोरात्रं जनयति, अयमेव वत्सरं द्वादशसु भागेषु विभनक्ति, अयमेव कारणं षण्णामृतूनाम्, एष एवाङ्गी-

रूपणम्। खे नभसि चरन्ति गच्छन्तीति खेचराः=भगणास्तेषां चक्रस्य=समूहस्य चक्रवर्त्ती=सम्राट्। सैन्यं प्रवर्त्तयतीति सम्राट्, दिनाधिपोऽपि च सर्वं ग्रहगणमिति रूपणम्। आखण्डलदिशः=इन्द्रसम्बन्धिन्याः प्राच्या नायिकायमानायाः कुण्डलम्=कर्णाभरणविशेषः। वर्त्तुलत्वमारोपबीजम्। ब्रह्माण्डमेव भाण्डं=सदनं तस्य दीपकः। प्रकाशकत्वमत्रारोपहेतुः। पुण्डरीकाणां=कमलानाम्। "पुण्डरीकं सिताम्भोजम्" इति तु नात्र, श्वेतत्वस्याविवक्षितत्वात्। पटलस्य=समूहस्य। प्रेयान्=अतिशयेन प्रियः। कोकानां लोकस्य=समुदायस्य। शोकस्य विमोकः=मोक्षः। अत्र बहुव्रीहिप्रदर्शनं टीकाकृतामनपेक्षितमसाम्प्रदायिकञ्च, बहुव्रीहिसंग्राह्यसमभिधेयस्य समारोपणादप्युपपत्तेः। रोलम्बानां=भ्रमराणां कदम्बस्य=समूहस्य, अवलम्बः=आश्रयः। सर्वश्चासौ व्यवहारः=ऐहिकामुष्मिकलक्षणस्तस्य, सूत्रधारः प्रवर्त्तयिता। दिनस्य इनः=स्वामी। स्वामिसूर्योभयवाचित्वेऽप्यत्राऽऽद्यपर्यायत्वमेवेति ध्येयम्।

अथ स्वभावोक्त्या भूषयति तमेव भगवन्तम्-अयमेवेति। अहश्च रात्रिश्चाहोरात्रस्तम्। शशधरेऽपि किरणानुप्रवेशद्वारा विकाशकत्वमेतदीयमेवेति भवति द्वितयजनकत्वमेवकारसार्थक्यञ्चेति विवेचनापटवः। जनयति=प्रादुर्भावयति। वत्सरं=हायनम्। द्वादशसु भागेषु=मेषादिमासरूपेषु। विभनक्ति=विभजते। "भञ्जो आमर्दने" इत्यस्य रूपम्। भवति चात्र मानवं शासनम्-"अहोरात्रे विभजते सूर्यो मानुषदैविके" इति। षण्णामृतूनाम्=हेमन्त-शिशिर-वसन्त-ग्रीष्म-वर्षा-शर-

करोत्युत्तरं दक्षिणञ्चायनम्, एनेनैव सम्पादिता युगभेदाः, एनेनैव कृताः कल्पभेदाः, एनमेवाऽऽश्रित्य भवति परमेष्ठिनः परार्द्धसङ्ख्या, असावेव चर्कर्त्ति बर्भर्त्ति जर्हर्त्ति च जगत्, वेदा एतस्यैव वन्दिनः, गायत्र्यमुमेव गायति, ब्रह्मनिष्ठा ब्राह्मणा अमुमेवाहरहरुपतिष्ठन्ते, धन्य एष कुलमूलं श्रीरामचन्द्रस्य, प्रणम्य एष विश्वेषामित्युदेष्यन्तं भास्वन्तं प्रणमन् निजपर्णकुटीरान्निश्चक्राम कश्चिद्गुरुसेवन-पटुर्विप्रवटुः।

दाम् कारणम्=हेतुः। अयनम्=सूर्यमार्गः। युगानाम्=कलि-द्वापर-त्रेता-सत्यानां भेदाः=विभागाः। एनेनैव=अन्वादेशत्वादेनादेशः। कल्पभेदाः=षष्ठीतत्पुरुषः। कल्पश्चैकसप्ततिमहायुगात्मकः ख्यातः कालविदाम्। परमेष्ठिनः=विधातुः। परार्द्धसङ्ख्या=अन्तिमा परार्द्धनाम्ना ख्याता संख्या। चर्कर्त्ति=पुनः पुनः करोति। यङ्लुगन्तम्। यङ्लुकश्छान्दसत्वं तु न वैयाकरणसम्प्रदायसिद्धं न वा महाकविजनानुमोदितमिति भूयो भूयः प्रयोगान् प्रदर्श्य प्रदर्शयति। यङ्लुगन्तत्रितयेनोत्पत्ति-स्थिति-लयकर्तृत्वं निवेदितम्। वन्दिनः=स्तुतिपाठकाः। वेदाः=ऋग्-यजुः-सामाथर्वाभिधाः। एतेन सूर्ये ब्रह्मदृष्टिरिति सूचितम्। "अन्तस्तद्धर्मोपदेशात्" इत्यधिकरणे हि निर्णीतमादित्योपाधिब्रह्मस्तूयमानत्वम्। अत एव च "गायत्र्यमुमेव गायती"त्येवकारसहितं वाक्यं स्वरसतः संगच्छते। अन्यथा तस्याप्यर्थकताश्रीयमाणतापत्तिः। गायत्र्याश्च मुख्यं वाच्यं ब्रह्मैवेति छान्दोग्यादिषु सुनिरूपितम्। "गायन्तं त्रायत" इति तद्व्युत्पत्तिरित्यप्यत एवोपपद्यते। ब्रह्मणि निष्ठा येषां ते=वेदपारगाः। ब्राह्मणा इति विशेष्यमुपादाय "ब्रह्म जानाति ब्राह्मण" इति साम्प्रतिककल्पितवचनस्याश्रद्धेयत्वं सूचितम्। उपतिष्ठन्ते=उपासते। "उपादेवपूजासङ्गतिकरणमित्रकरणपथिष्वि"त्यात्मनेपदम्। भास्वन्तम्=सूर्यम्। "भास्वद्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्मय"इत्य

"अहो ! चिररात्राय सुप्तोऽहम्, स्वप्नजालपरतन्त्रेणैव महान् पुण्यमयः समयोऽतिवाहितः, सन्ध्योपासनसमयोऽयमस्मद्गुरुचरणानाम्, तत्सपद्यवचिनोमि कुसुमानीति" चिन्तयन् कदलीदलमेकमाकुञ्च्य, तृणशकलैः सन्धाय, पुटकं विधाय, पुष्पावचयं कर्त्तुमारेभे।

बटुरसावाकृत्या सुन्दरः, वर्णेन गौरः, जटाभिर्ब्रह्मचारी,

मरः। भास्वत्त्वं प्रणतिहेतुः। प्रणामो हि स्वापकृष्टत्वबोधनं, तच्च प्रणम्ये गुणेषु सत्स्वेवेति न तिरोहितम्। हस्वा कुटी कुटीरः। "कुटीशमीशुण्डाभ्यो रः"। गुरुसेवने पटुः = कुशलः। विप्रश्चासौ बटुर्विप्रबटुः=ब्राह्मणब्रह्मचारी।

अहो=आश्चर्यखेदे नैत्यिककर्मानुष्ठानकाललोपोत्थे।

नोपतिष्ठति यः पूर्वां नोपास्ते यश्च पश्चिमाम्।
स शूद्रवद्बहिष्कार्यः सर्वस्माद्द्विजकर्मणः॥

इत्यादिभिः सन्ध्यावन्दनादिनित्यकर्मानुष्ठाने प्रत्यवाय-श्रवणेन शयनादिना तदतिवाहने स्वाभाविको हि क्षोभः सताम्। **चिररात्राय**=चिरम्। "चिराय चिररात्राय चिरस्याद्याश्चिरार्थका" इत्यमरः। **स्वप्नः**=निद्रा, स एव **जालम्**=आनायः, **तत्परतन्त्रेण**=तदायत्तेन। **पुण्यमयः**"ब्राह्मे मुहूर्त्ते बुध्येत धर्मार्थौ चानुचिन्तये"दि"ति मनूक्त्या तत्वमत एव महत्वञ्च। **सपदि**=सत्वरम्। **अवचिनोमि**=एकत्रीकरोमि। **कदली**=रम्भा, तस्या **दलं**=पत्रम्। **आकुञ्च्य**=भुग्नं विधाय। **तृणानां शकलैः**=खण्डैः। **सन्धाय** संमेल्य। **पुटकं**=पुटमेव पुटकं समुद्रः, "दोना" इति हिन्दी। **पुष्पाणामवचयः**=एकत्रीकरणम्।

आकृत्या=आकारेण। "प्रकृत्यादिभ्य उपसंख्यानमि"ति तृतीया। आकृतिः सुन्दर इति वाच्योऽर्थः। **वर्णेन**त्यत्रापि। जटाभिः=सटाभिः। "इत्थं भूत-

वयसा षोडशवर्षदेशीयः, कम्बुकण्ठः, आयतललाटः, सुबाहुर्विशाललोचनश्चाऽऽसीत्।

कदलीदलकुञ्जायितस्यैतत्कुटीरस्य समन्तात् पुष्पवाटिका, पूर्वतः परम-पवित्र-पानीयं परःसहस्रपुण्डरीक-पटल-परिलसितं पतत्रि-कुल-कूजित-पूजितं पयःपूरपूरितं सर आसीत्। दक्षिणतश्चैको निर्झर-झर्झर-ध्वनि-ध्वनित-दिगन्तरः, फल-पटलाऽऽस्वादचपलित-चञ्चु-

---

लक्षण" इति तृतीया। जटाज्ञाप्यब्रह्मचारित्वसंवलित इत्यर्थः। **षोडशवर्षदेशीयः**= ईषदसमाप्तषोडशवर्षः। "ईषदसमाप्तौ कल्पब्देश्यदेशीयरः"। **कम्बुरिव कण्ठो** यस्य सः शङ्खगलः।

कुञ्ज इव लतादिपिहितोदर इवाऽऽचारीदित्यकुञ्जायिष्ट। "कर्तुः क्यङ् सलोपश्चे"ति क्यङन्तात् क्ते **कुञ्जायितम्**। कदलीदलैः कुञ्जायितस्येति समासः। लुप्तोपमालङ्कारः। **समन्तात्**=परितः। **पूर्वतः**=पूर्वस्याम्। "तसिलादिष्वाकृत्वसुच" इति पुंवत्वम्। **परःसहस्राणाम्**=सहस्राधिकानां पुण्डरी**काणाम्**=सिताम्भोजानां **पटलेन**=समूहेन **परितः**=सर्वतो **लसितम्**=शोभितम्। **पतत्रिणाम्**=पक्षिणां **कुलस्य**=गणस्य **कूजितेन**=शब्देन **पूजितम्**=विराजमानम् **पयसां पूरेण**= प्रवाहेण **पूरितम्**=भरितम्। विशेषणानीमानि चत्वारि सरसो विशेष्यभूतस्य। **दक्षिणतः**=दक्षिणस्यां दिशि। पर्वतखण्ड आसीदित्यन्वयः। **पर्वतखण्डः**=प्रत्यन्तपर्वतः। "टेकरी" इति हिन्दी। विशिनष्टि विशेषणत्रयेण। **निर्झरस्य**=प्रवाहस्य, "वारिप्रवाहो निर्झरो झर" इत्यमरः। **झर्झरध्वनिना ध्वनितं**=नादितं **दिगन्तरम्**= दिक्प्रान्तभागो यस्य सः। झर्झर इति जलशब्दानुकृतिः। "अभ्यन्तरं त्वन्तरालमि"त्यमरः। **फलानां पटलस्य**=समूहस्य **आस्वादेन**=भक्षणेन, **चपलिताः**= चञ्चलाः, **चञ्चवः**=त्रोटयः, "चञ्चुस्त्रोट्यां स्त्रियामि"त्यमरः, येषां, ते च ते **पत-**

पतङ्ग-कुलाऽऽक्रमणाधिक-विनत-शाख-शाखि-समूह-व्याप्तः सुन्दर-कन्दरः पर्वतखण्ड आसीत् ।

यावदेष ब्रह्मचारी बदरलिपुञ्जमुद्धृय कुसुम-कोरकानवचिनोति; तावत् तस्यैव सतीर्थ्योऽपरस्तत्समानवयाः कस्तूरिका-रेणु-रूषित इव श्यामः, चन्दन-चर्चित-भालः, कर्पूरागुरुक्षोदच्छुरित-वक्षो-

---

त्रिणः = पक्षिणः-"पतत्रिपत्रिपतगपतत्पत्ररथाण्डजा" इत्यमरः, तेषां कुलं=समूहः तस्याक्रमणेन, अधिकम्=अत्यन्तम्, विनताः=नम्रीभूताः, शाखाः=शिखाः, "शिखा शाखा शिफा लतेत्य"मरः, येषां ते च ते शाखिनः=वृक्षाः, "वृक्षो महीरुहः शाखी विटपी पादपस्तरुरि"त्यमरः, तेषां समूहेन व्याप्तः=लसितः । सुन्दराः=शोभनाः, कन्दराः=गुहाः, यस्य सः । "दरी गुहा कन्दरोऽस्त्री"ति वैजयन्ती । अत्रानुप्रासः शब्दालङ्कारो गौडी च रीतिः ।

ब्रह्मचारी=ब्रह्म-वेदः, तदध्ययनार्थं व्रतमपि ब्रह्म, तच्चरतीति ब्रह्मचारी । "ब्रह्मचर्यमहिंसा चे"त्यादौ तु यमभेदविशेषस्य मैथुनत्यागस्यैव ब्रह्मचर्यपदवाच्यता । अलीनाम्=भ्रमराणाम्, पुञ्जो=राशिः, "स्यान्निकायः पुञ्जराशी" इत्यमरः, तम् । अवधूय=निवार्य । कुसुमानां कोरकाः=कलिकाः, "कलिका कोरकः पुमानि"त्यमरः, तान् । अवचिनोति=एकत्रयति । सतीर्थ्यः=सहाध्यायी । "समानतीर्थे वासी"ति ये "तीर्थे य" इति सादेशः । "सतीर्थ्यास्त्वेकगुरव"इत्यमरः । समानं वयः=अवस्था यस्य सः । सतीर्थ्यं विशिनष्टि चतुर्भिर्विशेषणैः । श्याम इत्याद्यं विशेषणम् । स्वभावतः कृष्णवर्णं तमुत्प्रेक्षते-कस्तूरिकायाः=मृगनाभेः, रेणुभिः=रजोभिः, रूषित इव=क्षुरित इव । चन्दनेन=गन्धसारेण, चर्चितं=लिप्तं, भालं=ललाटं, यस्य सः । कर्पूरस्य=घनसारस्य, अगुरोः=नृपार्हकस्य ("अगर" इति हिन्दी) च क्षोदेन=चूर्णेन, च्छुरितं=व्याप्तं, वक्षोबाहुदण्डम् = उरःस्थलभुजद्वयं यस्य सः । सुगन्धपटलैः = सौरभसमूहैः ।

बाहुदण्डः सुगन्ध–पटलैरुन्निद्रयन्निव निद्रा–मन्थराणि कोरक–निकुरम्बकान्तराल–सुप्तानि मिलिन्द–वृन्दानि झटिति समुपसृत्य निवारयन गौरबटुमेवमवादीत्।

अलं भो ! अलं, मयैव पूर्वमवचितानि कुसुमानि, त्वन्तु चिरं रात्रावजागरीरिति क्षिप्रं नोत्थापितः, गुरुचरणा अत्र तडागतटे सन्ध्यामुपासते, संस्थापिता मया निखिला सामग्री तेषां समीपे, यां च सप्तवर्षकल्पाम्, यावनत्रासेन निःशब्दं रुदतीम्, परम-

समुदायवाचिशब्देभ्य उद्भूतावयवभेदविवक्षया बहुत्वस्य साधुत्वं वनादिशब्देषु प्रसिद्धम्। निद्रया मन्थराणि=अलसानि। कोरकाणाम्=कलिकानाम्, निकुरम्बकानि=वृन्दानि, तेषाम्–"निकुरम्बं कदम्बकम्" इत्यमरः, अन्तराले=अभ्यन्तरे, सुप्तानि=शयानानि, मिलिन्दानाम्=भ्रमराणाम् वृन्दानि=तानि। उन्निद्रयन्निव=जागरयन्निव। अन्वयमनुश्रित्यात्र व्याख्यातम्। सुगन्धलोलुपा द्विरेफाः श्यामबटुशरीरानुलिप्त-चन्दनघनसार-कस्तूरिकापरिमलमाघ्राय पुष्पेभ्य उड्डीय तच्छरीरनिपतनोत्सुकाः सञ्जाता इति स्वाभाविकवार्त्तया जागरणमुखेनात्रोत्प्रेक्षणम्।

अलं भो अलम्=पुष्पावचयं निषेधति। इतः परं कांश्चित्स्थलविशेषानपहाय वृत्तकं नाम गद्यम्। "अकठोराक्षरं स्वल्पसमासं वृत्तकं मतम्"इति तल्लक्षणात्, एतदेव "अनाविद्धपदं चूर्णम्" इति वामनसूत्रे चूर्णकनाम्नाऽभिहितम्। अजागरीः="जागृ" धातोर्लुङि सिपि रूपम्। सप्तवर्षकल्पाम्=असमाप्तसप्तवर्षाम्। यवनेभ्य आगतो यवनानां वाऽयं यावनः=सचासौ त्रासस्तेन। यवनजवनशब्दो संस्कृतसाहित्ये समायातौ। आद्यो वशिष्ठविश्वामित्रसङ्गामे धेनुस्तनसमुत्पन्नेषु रूढः, परश्च सगरसङ्गामे वशिष्ठपरित्याजिताऽऽर्यधर्म–सागरपारस्थक्षत्रि-

सुन्दरीम् , कलित-मानव-देहामिव सरस्वतीं सान्त्वयन् , मरन्द-मधुरा अपः पाययन् , कन्दखण्डानि भोजन् , त्वं त्रियामाया यामत्रयमनैषीः ; सेयमधुना स्वपिति, उद्बुद्धय च पुनस्तथैव रोदिष्यति, तत्परिमार्गणीयावेतस्याः पितरौ गृहञ्च ।"

इति संश्रुत्य, उष्णन्निःश्वस्य च यावत् सोऽपि किञ्चिद्वक्तुमियेष तावदकस्मात् पर्वतशिखरे निपपातोभयोर्दृष्टिः ।

तस्मिन् पर्वते आसीदेको महान्कन्दरः, तस्मिन्नेव महामुनिरेकः समाधौ तिष्ठति स्म । कदा स समाधिमङ्गीकृतवानिति कोऽपि

येष्विति त्यक्तमहामहोपाध्यायपदाः श्रीपञ्चाननतर्करत्नभट्टाचार्याः । तन्मतानुसरणे भारतसमागतेष्वेषु जवनशब्दप्रयोग एवोचित इति सम्प्रदायः । **कलितः**=धारितः, **मानवो देहो**, यया सा ताम्, मानवरूपेणावतीर्णां सरस्वतीमिवेत्युत्प्रेक्षा । **मरन्देन**=पुष्परसेन, **मधुराः**, अपां विशेषणम् । "अयि दलदरविन्द ! स्यन्दमानं मरन्दं, तव किमपि लिहन्तो मञ्जु गुञ्जन्तु भृङ्गा" इति पण्डितराजपद्ये प्रयुक्तोऽयं मरन्दशब्दः। **मरम्**=भ्रमरमरणम्,**द्यति**=खण्डयतीति,मरन्दः,भ्रमरजीवनम्मकरन्द इति व्युत्पत्तिलभ्यत्वमर्थस्य । **पाययन्**= णिजन्ताच्छतरि । **कन्दाः**=ऋषीणां खाद्यविशेषाः । "शालूकं कन्दमौत्पलम्"इति, "कन्दमस्त्री मूलसस्यम्"इति च वैजयन्ती । **त्रियामायाः**=रात्रेः । "रात्रित्रियामा क्षणदा क्षपे"त्यमरेण रूढत्वम् । अत एव **यामत्रय**मिति प्रहरत्रयार्थकं संगच्छते । **परिमार्गणीयौ**–अन्वेषणीयौ । **गृहं च**=भवनञ्च । अत्रान्वेषणीयमिति लिङ्गवचनविपरिणामेन सम्बध्यते ।

वक्तुमियेष=कथयितुमिच्छति स्म ।

कन्दरम्=दरी । "दरी तु कन्दरो वा स्त्री"त्यमरः । **समाधौ**=चित्तवृत्तिनिरो-

न वेत्ति। ग्रामणी–ग्रामीण–ग्रामाः समागत्य मध्ये मध्ये तं पूजयन्ति प्रणमन्ति स्तुवन्ति च। तं केचित् कपिल इति, अपरे लोमश इति, इतरे जैगीषव्य इति, अन्ये च मार्कण्डेय इति विश्वसन्ति स्म। स एवायमधुना शिखरादवतरन् ब्रह्मचारिबटुभ्यामदर्शि।

अहो ! प्रबुद्धो मुनिः ! प्रबुद्धो मुनिः ! इत एवाऽऽगच्छति, इत एवाऽऽगच्छति,सत्कार्योऽयं सत्कार्योऽयमिति तौ सम्भ्रान्तौ बभूवतुः।

अथ समापित–सन्ध्यावन्दनादिक्रिये समायाते गुरौ, तदाज्ञया नित्यनियम–सम्पादनाय प्रयाते गौरबटौ, छात्रगण–सहकारेण प्रस्तुतासु च स्वागत–सामग्रीषु, इत आगम्यतां सनाथ्यतामेष आश्रम इति सप्रणाममभिगम्य वदत्सु निखिलेषु, योगिराज आगत्य तन्नि-

---

धात्मके योगे। **ग्रामण्यः**=ग्रामाधिपाः, (लम्बरदार, जमीदार इति हिन्दी), ग्रामे भवाः ग्रामीणाः ग्रामवासिनस्तेषां ग्रामाः समूहाः। श्रुत्यनुप्रास-प्रदर्शन-मात्र-फलकोऽयम्। सरसे रौद्रादिरसाभाववति प्रकृते दोषत्वमेतस्येति केचित्। **तम्**=समाधिनिरतम्। कपिल-लोमश-जैगीषव्य-मार्कण्डेयाः, चिरञ्जीविनो महर्षयः। गृहीतृभेदादेकस्यैवानेकधोल्लेखादुल्लेखालङ्कारः। **अदर्शि**=दृष्टः। कर्मणि लुङि।

सम्भ्रान्तौ=बहोः कालात् कन्दरायां निवसन् मुनिरकस्माद्बहिरायात इति हर्षोद्रेकेण व्याकुलौ बभूवतुः। अत एव च तदुक्तिषु साम्रेडता।

समापिता सन्ध्यावन्दनादिक्रिया येन सः, तथाभूते। आदिना-स्वेष्टदेवतापूजन–स्वेष्टगुरुमन्त्रजपादिः। **नित्या ये नियमाः**=सन्ध्यावन्दनादयः, तेषां **सम्पादनाय। छात्रगणस्य, सहकारेण**=साहाय्येन। **स्वागत-सामग्रीषु**=उपचारद्रव्येषु। "यस्य च भावेन भावलक्षणमि"ति भावाधिकरणे सप्तमी। **निखिलेषु**=समुपस्थितेषु, जनेष्विति शेषः।

दिष्टकाष्ठ-पीठं भास्वानिवोदयगिरिमारुरोह, उपाविशच्च ।

तस्मिन् पूज्यमाने, योगिराडुत्थित इति, आयात इति चाऽऽकर्ण्य कर्णपरम्परया, बहवो जनाः परितः स्थिताः, सुघटितं शरीरम्, मान्द्रां जटां विशालान्यङ्गानि, अङ्गारप्रतिमे नयने, मधुरां गम्भीराञ्च वाचं वर्णयन्तश्चकिता इव सञ्जाताः ।

अथ योगिराजं सम्पूज्य यावदीहितं किमप्यालपितुम्, तावत् कुटीरादश्रूयत तस्या एव बालिकायाः सकरुण-रोदनम् ।

ततः किमिति ? कुत इति ? केयमिति ? कथमिति ? प्रच्छा-परवशे योगिराजे ब्रह्मचारिगुरुणा बालिकां सान्त्वयितुं श्यामबटु-मादिश्य कथितम् ।

"भगवन् ! श्रूयतां यदि कुतूहलम् । ह्यः सम्पादित-सायन्तन-

काष्ठपीठम्=दारुनिर्मितां चतुष्पादिकाम्, "चौकी" इति हिन्दी । **उदयगिरिमिव**=उदयाचलमिव । **आरुरोह**=अधिशिश्रिये । **उपाविशत्**=स्थितिमकरोत् । न सूर्य इवाधिश्रित्य दूरं गतोऽपि तु तत्रैव स्थित इति क्रियाद्वयमनुपातम् । उपमालङ्कारः ।

सुघटितं=यथावस्थित-सुन्दर-सुदृढावयवम् । **सान्द्राम्**=घनीभूताम् । **अङ्गारप्रतिमे**=अङ्गारवद्रागेण देदीप्यमाने । प्रतिमाशब्दोऽत्रोपमावाचकः, दृष्टश्च तादृशेऽर्थे । "न तस्य प्रतिमा अस्ति" इति वेदे "गतः सुखान्यप्रतिमानि हित्वे"ति वाल्मीकीये च । **प्रच्छा**=प्रश्नः । **तत्परवशे**=तत्परतन्त्रे ।

कुतूहलम्=कौतुकम् । वृत्तान्त-ज्ञानोत्कण्ठेति यावत् । **ह्यः**=गतदिवसे । **सम्पादितं**=विहितं, सायं भवं **सायन्तनं कृत्यं**=सन्ध्यादि येन तादृशे ।

कृत्ये, अत्रैव कुशाऽऽस्तरणमधिष्ठिते मयि, परितः समासीनेषु छात्रवर्गेषु, धीर-समीर-स्पर्शेन मन्दमन्दमान्दोल्यमानासु व्रततिषु, समुदिते यामिनी-कामिनी-चन्दनबिन्दाविवेन्दौ, कौमुदी-कपटेन सुधाधारामिव वर्षति गगने, अस्मन्नीतिवार्तां शुश्रूषुष्विव मौनमाकलयत्सु पतग-कुलेषु, कैरव-विकाश-हर्ष-प्रकाश-मुखरेषु चञ्चरीकेष्वस्पष्टाक्षरङ्कम्पमान-निश्वासम्, श्लथत्कण्ठम्, घर्घरितस्वनम्, चीत्कारमात्रम्, दीनतामयम्, अत्यवधानश्रव्यत्वादनुमितदविष्ठतं

कुशास्तरणम्=कुशासनम्। "कुश की चटाई" इति हिन्दी। "अधिशीङ्"इति कर्मसंज्ञा। धीरः=मन्दगतिः, समीरः=वायुः, तस्य स्पर्शेन। आन्दोल्यमानासु=सञ्चाल्यमानासु। व्रततिषु=लतासु। 'वल्ली तु व्रततिर्लता' इत्यमरः।

इन्दौ=चन्द्रमसि। समुदिते=उदयं प्राप्नुवति। चन्द्रमसं रूपयति-यामिनी=निशीथिनी, सैव कामिनी=ललना, तस्याः चन्दनबिन्दौ=ललाट-तिलक इव। "कौमुदी=चान्द्रिका, ज्योत्स्ने"त्यमरः, तस्याः कपटेन=व्याजेन। वर्षतीवेत्युत्प्रेक्षा। पतगकुलेषु=पक्षिसमूहेषु। मौनमाकलयत्सु=निःशब्दतामाश्रयत्सु। किमिति मौनावलम्बनमित्युत्प्रेक्षते-अस्मन्नीतीति। कैरवाणां=सिताम्भोजानां, यो विकाशः=प्रफुल्लनं, तेन यो हर्षप्रकाशः=मोदाऽऽविर्भावः, तेन मुखरेषु=शब्दायमानेषु। चञ्चरीकेषु=द्विरेफेषु। "इन्दिन्दिरो मधुकरश्चञ्चरीकोमधुव्रत" इति वैजयन्ती। क्रन्दनं=रोदनम्। अश्रौषम्=श्रुतवान्। सप्तभिर्विशेषणैः स्वभावोक्त्या क्रन्दनं विशिनष्टि-अस्पष्टानि अक्षराणि, यस्मिंस्तत्। कम्पमाना निःश्वासाः=यस्मिंस्तत्। श्लथन्=शिथिलः, कण्ठो=यस्मिंस्तत्। अत्यवधानेन=विशेषध्यानेन, श्रव्यम्=श्रवणार्हम्, तस्य भावः, तस्मात्। अतिशयेन दूरं दविष्ठम्, तस्य भावो दविष्ठता, अनुमिता=विज्ञाता, दविष्ठता=दूरता यस्य तत्।

क्रन्दनमश्रौषम्। तत्क्षणमेव च कुत इदम्? किमिदमिति दृश्यताम्? ज्ञायतामित्यादिश्य छात्रेषु विसृष्टेषु, क्षणानन्तरं छात्रेणैकेन भय-भीता सवेगमत्युष्णं दीर्घं निश्वसती, मृगीव व्याघ्राऽऽघ्राता, अश्रु-प्रवाहैः स्नाता, सवेपथुः, कन्यकैकाऽङ्के निधाय समानीता। चिरा-न्वेषणेनापि च तस्याः सहचरी सहचरो वा न प्राप्तः। तां च चन्द्र-कलयेव निर्मिताम्, नवनीतेनेव रचिताम्, मृणाल-गौरीम्, कुन्द-कोरकाग्रदतीम्, सक्षोभं रुदतीमवलोक्यास्माभिरपि न पारितं निरोद्धुं नयन-बाष्पाणि। अथ "कन्यके! मा भैषीः, पुत्रि! त्वां मातुः समीपे प्रापयिष्यामः, दुहितः! खेदं मा वह, भगवति! भुङ्क्ष्व किञ्चित्, पिब पयः, एते तव भ्रातरः, यत् कथयिष्यसि

आदिश्य=आज्ञाप्य। व्याघ्रेण=हिंस्रजन्तुविशेषेण, आघ्राता=आक्रान्ता। उपमालङ्कारः। सवेपथुः=सकम्पा। एकेनाङ्के निधाय कन्यका समानीतेति स्थले क्रियापदद्वयम्। प्रधानक्रियानिरूपितकर्मत्वाभिधानेऽप्रधानक्रियानिरूपित-कर्मत्वमनभिहितमप्यभिहितवत्प्रकाशत इति महाभाष्ये ध्वनितम्,

प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते।
यदा गुणे तदा तद्वदनुक्ताऽपि प्रतीयते॥

इत्यादिना वाक्यपदीये स्पष्टीकृतञ्च। नवनीतेनेव=हैयङ्गवीनेनेव। "मक्खन" इति हिन्दी। मृणालम्=कमलदण्डमिव, गौरीम्=श्वेताम्, "लुप्तोपमा"। कुन्दकोरकः=माध्यकलिकाः, तस्याग्राणीव दन्ता यस्याः सा ताम्। "अग्रान्तशुद्ध-शुभ्रवृषवराहेभ्यश्चे"ति दत्रादेशे, उगिदन्तत्वाङ्ङीपि। सक्षोभम्=ससाध्वसम्।

मा भैषीः, "माङि लुङ्"। "न माङ्योगे" इत्यण्निषेधः मा वह=

तदेव करिष्यामः, मा स्म रोदनैः प्राणान्संशयपदवीमारोपयः, मा म्म कोमलमिदं शरीरं शोकज्वालावलीढं कार्षी" रिति सहस्रधा बोधनेन कथमपि सम्बुद्धा किञ्चिद्दुग्धं पीतवती। ततश्च मया क्रोड उपवेश्य, "बालिके! कथय क्व ते पितरौ? कथमेतस्मिन्नाश्रमप्रान्ते समायाता?किं ते कष्टं? कथमरोदीः? किं वाञ्छसि? किं कुर्मः?" इति पृष्टा मुग्धतयाऽपरिकलित-वाक्पाटवा, भयेन विशिथिलवचन-विन्यासा, लज्जयाऽतिमन्दस्वरा, शोकेन रुद्धकण्ठा, चकितचकितेव कथं कथमप्यबोधयदस्मान् यत्, "एषाऽस्मिन्नेदीयस्येव ग्रामे वसतः कस्यापि ब्राह्मणस्य तनयाऽस्ति। एनां च सुन्दरीमाकलय्य कोऽपि यवन-तनयो नदीतटान्मातुर्हस्तादाच्छिद्य क्रन्दन्तीं नीत्वाऽपससार। ततः कञ्चिदद्ध्वानमतिक्रम्य यावदसिधेनुकां सन्दर्श्य विभी-

निषेधार्थकोऽत्र माशब्दो न तु माङ्, अत एव लोट्। **प्राणान्**=असून्। "पुंसि भूम्न्यसवः प्राणा" इत्यमरः। **आरोपयः**="स्मोत्तरे लङ् च"ति लङ्। **शोकज्वालया**=शोकाग्निधारया, अवलीढं=व्याप्तम्। **क्रोडे**=अङ्के। **मुग्धतया**=बालस्वभावादज्ञतया। **अपरिकलितं**=अविज्ञातं, **वाक्पाटवं**=भाषणचातुर्यं यया सा। **भयेन**=हेतुना। **विशिथिलः**=अस्तव्यस्तः, **वचनविन्यासो**=भाषणं यस्याः सा। **चकित-चकितेव**=अतिचकिता। **नेदीयसि**=अतिनिकटे। "अन्तिकबाढयोर्नेदसाधा"वित्यन्तिकस्य नेदादेशः, **आकलय्य**=निश्चित्य। इयं न ब्राह्मणतनया किन्तु क्षत्रियतनया स्नातुं च गता न मात्रा सह, अपि तु दास्या, पुरोहितं पितरं दासीं च मातरमनुमेन इत्यग्रेतनकथया स्पष्टीभविष्यति। **असिधेनुकां**=छुरिकाम्। "छुरिका चासिधेनुके"त्यमरः। **विभीषिकया**=भयप्रदर्शनेन, कालश्चासौ कम्बल इति कर्मधारयः, कृष्णवाची

पिकयाऽस्याः क्रन्दन-कोलाहलं शमयितुमियेष; तावदकस्मात्कोऽपि काल-कम्बल इव भल्लूको वनान्तादुपाऽऽजगाम। दृष्ट्वैव यवन-तनयोऽसौ तत्रैव त्यक्त्वा कन्यकामिमां शाल्मलितरुमेकमारुरोह। विप्रतनया चेयं पलाश-पलाशिश्रेण्यां प्रविश्य, घुणाक्षरन्यायेन इत एव समायाता, यावद्भयेन पुना रोदितुमारब्धवती, तावदस्मच्छात्रेणैवाऽऽनीते"ति।

तदाकर्ण्य कोपज्वालाज्वलित इव योगी प्रोवाच-"विक्रमराज्येऽपि कथमेष पातकमयो दुराचाराणामुपद्रवः"? ततः स उवाच—

"महात्मन्! काधुना विक्रमराज्यम्? वीरविक्रमस्य तु भारतभुवं विरहय्य गतस्य वर्षाणां सप्तदश-शतकानि व्यतीतानि। काधुना मन्दिरे मन्दिरे जयजयध्वनिः? क्व सम्प्रति तीर्थे तीर्थे घण्टानादः? काद्यापि मठे मठे वेदघोषः? अद्य हि वेदा विच्छिद्य वीथीषु विक्षिप्यन्ते, धर्मशास्त्राण्युद्धूय धूमध्वजेषु ध्मायन्ते, पुरा-

---

कालशब्दः। **कालस्य**=यमस्य कम्बल इवेति वा। शाल्मलितरुलोके "सेंमर" इति निगद्यते। **पलाशाः**=किंशुकाश्च ते **पलाशिनः**=तरवः तेषां श्रेण्यां पङ्क्तौ। **घुणाक्षरन्यायेन**=काष्ठवेधकैः कृमिभिः काष्ठानुवेधे क्रियमाणे यथाऽकस्मादक्षरमिव प्रतीयते, तथा यत्रावितर्कित-कार्य-सिद्धिस्तत्रेत्थमभिधीयते। **पुना रोदितुम**, "रोरि" लोपे "ढ्रलोपे पूर्वस्य दीर्घोऽण" इति दीर्घे।

विरहय्य=परित्यज्य। **सप्तदश-शतकानि**=शिवराजसमयसूचनार्थमिदम्। शिवराजकालिकयवनदुराचारान्वर्णयति-**केत्यादि**। **मठे मठे**=प्रतिपाठालयम्, "मठश्छात्रादिनिलय" इत्यमरः। **विच्छिद्य**=द्वैधयित्वा। **वीथीषु**=पथिषु। **उद्धूय**=उर्ध्वीकृत्य। **धूम एव ध्वजो=येषां ते तेषु**=वह्निषु। **ध्मायन्ते**=ज्वाल्यन्ते।

णानि पिष्ट्वा पार्नीयेषु पात्यन्ते, भाष्याणि भ्रंशयित्वा भ्राष्ट्रेषु भर्ज्यन्ते। क्वचिन्मन्दिराणि भिद्यन्ते, क्वचित्तुलसीवनानि छिद्यन्ते, क्वचिद्दारा अपह्रियन्ते, क्वचिद्धनानि लुण्ठ्यन्ते, क्वचिदार्त्तनादाः, क्वचिद्रुधिरधाराः, क्वचिदग्निदाहः, क्वचिद् गृहनिपात इत्येव श्रूयतेऽवलोक्यते च परितः।

तदाकर्ण्य दुःखितश्चकितश्च योगिराडुवाच—

"कथमेतत्! ह्य एव पर्वतीयाञ्छकान्विनिर्जित्य, महता जयघोषेण स्वराजधानीमायातः श्रीमानादित्य-पदलाञ्छनो वीरविक्रमः। अद्यापि तद्विजयपताका मम चक्षुषोरग्रत इव समुद्धूयन्ते,

---

पुराणानि=ब्रह्मवैवर्त्तादीनि। ब्राह्मणानां पुराणसंज्ञेति साम्प्रतिकाः। **पिष्ट्वा**=चूर्णीकृत्य। **भाष्याणि**=सूत्रव्याख्यानानि वात्स्यायनादिनिर्मितानि। भ्राष्ट्रेषु=भर्जनपात्रेषु। "क्लीबेऽम्बरीषं भ्राष्ट्रो ने"त्यमरः। "भाड" इति हिन्दी। **दाराः**=भार्याः। दृ-विदारण-इत्यस्माण्णिजन्तात् "दारजारौ कर्त्तरि णि लुक् चे"ति घञ्। "दाराक्षतलाजासूनां बहुत्वम्"।

क्रोडा हारा तथा दारा त्रय एते यथाक्रमम्।
क्रोडे हारे च दारेषु शब्दाः प्रोक्ता मनीषिभिः॥

इति हेमचन्द्रानुसारेण टाबन्तोऽप्ययम्। यथा च "दारा त्रय"इति पद्ये दृश्यते तथा टाबन्तस्यैकवचनादिष्वपि प्रयोगस्तदिष्टोऽवधार्यते। क्राधुनेत्यारभ्य परित इत्यन्तं समतानामगुणो दण्डिमते। प्रसादस्तु सर्वसम्मतः। रीतिर्वैदर्भी।

पर्वतीयान्=पर्वतप्रान्तस्थान्। **स्वराजधानीम्**=उज्जयिनीम्। **आदित्य-पदलाञ्छनः**=आदित्यपदविभूषितः। लक्ष्मवाची लाञ्छनशब्दः, "कलङ्काङ्कौ लाञ्छनं च चिह्नं लक्ष्म च लक्षण"मित्यमरः। **समुद्धूयन्ते**=कम्पमाना विराज-

अधुनाऽपि तेषां पटह-गोमुखादीनां निनादः कर्णशष्कुलीम्पूरयतीव, तत्कथमद्य वर्षाणां सप्तदश-शतकानि व्यतीतानीति ?"

ततः सर्वेषु स्तब्धेषु चकितेषु च ब्रह्मचारिगुरुणा प्रणम्य कथितम्—

"भगवन् ! बद्ध-सिद्धासनैर्निरुद्ध-निश्वासैः प्रबोधितकुण्डलिनी-कैर्विजित-दशेन्द्रियैरनाहत-नाद-तन्तुमवलम्ब्याऽऽज्ञाचक्रं संस्पृश्य, चन्द्रमण्डलं भित्वा, तेजःपुञ्जमविगणय्य, सहस्रदलकमलस्यान्तः प्रविश्य, परमात्मानं साक्षात्कृत्य, तत्रैव रममाणैर्मृत्युञ्जयैरानन्दमा-

---

न्ते । पटह-गोमुखादीनाम्=वाद्यानाम् । पटह=नगारा, गोमुख=तुरही इति हिन्दी । भाविकालङ्कारोऽतीतस्य प्रत्यक्षायमाणत्वात् ।

भवादृशैः=योगनिरतैः, कालस्य वेगो=गतिर्न ज्ञायत इत्यन्वयः । भवादृशान् विशिनष्टि-बद्धं सिद्धासनम्=योगशास्त्रीय आसनविशेषो यैस्तैः । निरुद्धाः=अन्तर्नियमिताः, निश्वासाः=प्राणा यैस्तैः । प्रबोधिता=उद्योतिता, कुण्डलिनी=पराशक्त्यभिधेया नाडीरूपा ब्रह्मणो मूर्त्तिः, यैस्तैः । विजितानि=वशीकृतानि, दशेन्द्रियाणि यैस्तैः । वाक्-पाणि-पाद-पायूपस्थानि पञ्च कर्मेन्द्रियाणि, चक्षुः-श्रोत्र-घ्राण-रसन-त्वगाख्यानि पञ्च ज्ञानेन्द्रियाणि । अनाहतश्चासौ नादः, तस्य तन्तुं=तन्ततुल्यां सूक्ष्मावस्थालतिकाम् । सुषुम्णामध्ये स्थितं तुरीयं पद्ममनाहतनाम्ना योगशास्त्रे प्रसिद्धम्, तदुत्थो नादोऽनाहतनादः । आज्ञाचक्रम्=भ्रुवोर्मध्ये द्विदलात्मकं चक्रम् । संस्पृश्य=ध्यानावलम्बनं कृत्वा । चन्द्रमण्डलम्=ततः परवर्तिं षोडशदलात्मकं चक्रम् । तेजःपुञ्जम्=सोमचक्रवर्त्तिनं महाप्रकाशम् । सहस्रदलकमलस्य=ब्रह्मरन्ध्रवर्त्तिनः सहस्रारचक्रस्य । परमात्मानम्=परं ब्रह्म । तत्रैव=ब्रह्मणि । रममाणैः=क्रीडद्भिः । अनिर्वचनीयमानन्दमुपभुञ्जद्भिरिति यावत् । मृत्युञ्जयैः=स्वायत्तीकृतकालवृत्तिभिः । आन-

त्रस्वरूपैर्ध्यानावस्थितैर्भवादृशैर्न ज्ञायते कालवेगः। तस्मिन् समये भवता ये पुरुषा अवलोकितास्तेषां पञ्चाशत्तमोऽपि पुरुषो नावलोक्यते। अद्य न तानि स्रोतांसि नदीनाम्, न सा संस्था नगराणाम्, न साऽऽकृतिर्गिरीणाम्, न सा सान्द्रता विपिनानाम्। किमधिकं कथयामो भारतवर्षमधुनाऽन्यादृशमेव सम्पन्नमस्ति"।

इदमाकर्ण्य किञ्चित्स्मित्वेव परितोऽवलोक्य च योगी जगाद–

"सत्यं न लक्षितो मया समय-वेगः। यौधिष्ठिरे समये कलितसमाधिरहं वैक्रम-समय उदस्थाम। पुनश्च वैक्रम-समये समाधिमाकलय्य, अस्मिन् दुराचारमये समयेऽहमुत्थितोऽस्मि, अहं पुनर्गत्वा समाधिमेव कलयिष्यामि, किन्तु तावत्सङ्क्षिप्य कथ्यतां का दशा भारतवर्षस्येति"।

तत्संश्रुत्य भारतवर्षीय-दशा-संस्मरण-सञ्जात-शोको हृदयस्थ-

न्दमात्रस्वरूपैः=आनन्दमये ब्रह्मणि लीनत्वात्तत्स्वरूपैः। कालवेगः=कालगतिः। यत्तु योगशास्त्रमात्रप्रसिद्धानां शब्दानामुपादानं तच्छास्त्रानभिज्ञस्य बोधाजनकमित्यप्रतीतत्वदोषदुष्टमिदमिति, तन्न, अत्रत्यगद्यस्य योगशास्त्रोक्त-ध्यानप्रकारे व्युत्पत्त्याधायकत्वादेतदर्थमेव समुल्लिखितत्वाच्च। अत एव "न सा विद्या न तच्छास्त्रमि"त्यादिना साहित्यस्य व्युत्पत्त्यापि तदर्थस्य सर्वमयत्वं सूचितम्। कथमन्यथा "बहिर्विकारं प्रकृतेः पृथगि"त्यादीनां "वागर्थाविव संपृक्तावि"त्यादीनाञ्च न तद्दोषदुष्टत्वमित्यलमसदावेशेन।

पञ्चाशत्तमः=पञ्चाशत्संख्यापूरकः। कैमुतिकन्याय-सूचकोऽपिः। **यौधिष्ठिरे**=युधिष्ठिरस्यायं समयो यौधिष्ठिरस्तस्मिन्। भारतवर्ष-सम्बन्धिन्या दशायाः संस्मरणेन सञ्जातः शोको यस्य सः। **हृदयस्थो यः प्रसादः**=प्रसन्नता, तस्य

प्रसाद-सम्भारोद्गिरण-श्रमेणेवातिमन्थरेण स्वरेण "मा स्म धर्मध्वंसन-घोषणैर्योगिराजस्य धैर्यमवधीरय"इति कण्ठं रुन्धतो बाष्पान-विगणय्य, नेत्रे प्रमृज्य, उष्णं निश्वस्य, कातराभ्यामिव नयनाभ्यां परितोऽवलोक्य, ब्रह्मचारिगुरुः प्रवक्तुमारभत ।

"भगवन् ! दम्भोलिघटितेयं रसना या दारुण-दानवोदन्तोदीरणैर्न दीर्य्यते, लोहसारमयं हृदयं यत्संस्मृत्य यावनान्परःसहस्रान्दुराचाराञ्छतधा न भिद्यते, भस्मसाच्च न भवति । धिग्मान्, येऽद्यापि जीवामः, श्वसिमः, विचरामः, आत्मन आर्य्यवंश्यांश्चाभिमन्यामहे"—

उपक्रममुमाकर्ण्यावलोक्य च मुनेर्विमनायमानं हरिद्राद्रवक्षालितमिव वदनं, निपतद्वारिबिन्दुनी नयने, अञ्चित-रोमकञ्चुकं शरीरम्, कम्पमानमधरम्, भज्यमानं च स्वरम्, अवागच्छन्

सम्भारः=अतिशयः, तस्योद्गिरणे=वमने यः श्रमः, तेनेवेत्युत्प्रेक्षा । धर्मस्य=श्रुतिप्रतिपाद्यस्य, यद् ध्वंसनम्=उन्मूलनम्, तस्य घोषणैः=कथनैः ।

दम्भोलिघटिता=वज्रमयी । "दम्भोलिरशनिर्द्वयोरि"त्यमरः । दारुणानाम्=भयङ्कराणाम्,दानवानाम्=म्लेच्छानाम्, उदन्तस्य=वृत्तान्तस्य । "वार्त्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यादि"त्यमरः । लोहसारमयम्=अयोनिर्मितम् । सहस्रात् पराः परःसहस्रास्तान् । राजदन्तादित्वात्सहस्रशब्दस्य परनिपातः । पारस्करादित्वात्सुट् । विशेष्यनिघ्नत्वाद्वाच्यलिङ्गता । नास्मज्जीवनं जीवनम्, अपि तु भस्त्रेव श्वसनमिति सूचयन् जीवाम इत्यभिधाय श्वसिम इति ।

विमनायमानम्=दुर्मनायमानम् । हरिद्रा=महारजनं, तद्द्रवेण=रसेन, क्षालितमिव=धौतमिव । उत्प्रेक्षा । निपतन्तः=स्खलन्तः, वारिबिन्दवः=

"सकलानर्थमयः, सकल-वञ्चनामयः, सकलपापमयः, सकलोपद्रवमयश्चायं वृत्तान्तः" इति। "अत एव तत्स्मरणमात्रेणापि खिद्यत एष हृदये, तन्नाहमेनं निरर्थं जिग्लापयिषामि, न वा चिखेदयिषामि" इति च विचिन्त्य,—

"मुने! विलक्षणोऽयं भगवान् सकल-कला-कलाप-कलनः, सकल-कालनः, करालः कालः। स एव कदाचित् पयः-पूर-पूरितान्यकूपार-तलानि मरूकरोति। सिंह-व्याघ्र-भल्लूक-गण्डक-फेरु-शश-सहस्रव्याप्तान्यरण्यानि जनपदीकरोति, मन्दिर-प्रासाद-हर्म्य-शृङ्गाटक-चत्वरोद्यान-तडाग-गोष्ठमयानि नगराणि च कान-

अस्रकणा याभ्यां ते। अञ्चितरोमकञ्चुकम्=सरोमाञ्चम्। जिग्लापयिषामि=ग्लपयितुमिच्छामि। चिखेदयिषामि=खेदयितुमिच्छामि। सकलानां कलानां यः कलापः=समूहः, तत्कलनः=तन्निर्माता। सकलान् कालयतीति सकलकालनः=सकलजरयिता। कालः=महाकालः। "कालो मृत्यौ महाकाले समये यमकृष्णयोरि"ति मेदिनी। अकूपारतलानि=समुद्रतलानि। "समुद्रोऽब्धिरकूपार"इत्यमरः। मरूकरोति=मरुतुल्यानि करोति। अभूततद्भावे च्विः। गण्डकः=खड्गी। लोके "गैंडा" इति। फेरवः=शृगालाः। "शृगालवञ्चकक्रोष्टु-फेरुफेरवजम्बुका" इत्यमरः। मन्दिराणि=देवनिवासाः। प्रासादाः=भूभृन्निवासाः। यद्यपि "प्रासादो देवभूभुजाम्"इत्यमरेण देवनिवासस्य प्रासादपदवाच्यता, तथापि विशिष्टवाचकपदविशेष्यपरत्वन्यायेन प्रकृते नोभयपरत्वमिति ध्येयम्। हर्म्यम्=धनिकावासः। "हर्म्यादि धनिनां वास"इत्यमरः। शृङ्गाटकम्=चतुष्पथम्। "चौराहा" इति हिन्दी। चत्वरम्=अङ्गणम्। "अङ्गणं चत्वराजिरे"-इत्यमरः। उद्यानम्=वाटिका। "पुमानाक्रीड उद्यानम्"इत्यमरः। "गोष्ठं गोस्थानक-

नीकरोति। निरीक्ष्यतां कदाचिदस्मिन्नेव भारते वर्षे यायजूकै राजसूयादियज्ञा व्ययाजिषत,कदाचिदिहैव वर्ष–वाताऽऽतपहिम–सहानि तपांस्यतापिषत। सम्प्रति तु म्लेच्छैर्गावो हन्यन्ते, वेदा विदीर्यन्ते, स्मृतयः सम्मृद्यन्ते, मन्दिराणि मन्दुरीक्रियन्ते, सत्यः पात्यन्ते, सन्तश्च सन्ताप्यन्ते। सर्वमेतन्माहात्म्यं तस्यैव महाकालस्येति कथं धीरधौरेयोऽपि धैर्यं विधुरयसि ? शान्तिमाकलय्यातिसंक्षेपेण कथय यवनराज्य–वृत्तान्तम्। न जाने किमित्यनावश्यकमपि शुश्रूषते मे हृदयम्" इति कथयित्वा तूष्णीमवतस्थे।

अथ स मुनिः—"भगवन्! धैर्येण, प्रसादेन, प्रतापेन, तेजसा, वीर्येण, विक्रमेण, शान्त्या, श्रिया, सौख्येन, धर्मेण, विद्यया, च सममेव परलोकं सनाथितवति तत्र भवति वीरविक्रमादित्ये, पारस्परिक–विरोध–विशिथिलीकृत–स्नेहबन्धनेषु राजसु, भामिनी–

मि"त्यमरः। "गोशाला" इति हिन्दी। प्राचुर्यार्थे मयट्। एतत्प्रचुराणीत्यर्थः। कानीकरोति=जङ्गलीकरोति। यायजूकैः=इज्याशीलैः। "इज्याशीलो यायजूक" इत्यमरः। व्ययाजिषत=कृताः। व्युपसृष्टाद् यजेर्लुङि। अतापिषत=तप्तानि। मन्दुरीक्रियन्ते=वाजिशालीक्रियन्ते। "वाजिशाला तु मन्दुरे"त्यमरः। पात्यन्ते, पातित्रत्यात्। व्यभिचार्यन्त इत्यर्थः। धीरधौरेयः=धीरधुरन्धरः। विधुरयसि=विकलयसि। "वैकल्येऽपि च विश्लेषे विधुरं विकले त्रिष्वि"ति मेदिनी। शुश्रूषते=श्रोतुमिच्छति। "ज्ञाश्रुस्मृदृशां सन" इत्यात्मनेपदम्।

सनाथितवति=सनाथं क्रियमाणे। धैर्यादिना साकं सनाथीकरणमिति सहोक्तिरलङ्कारः। सौकुमार्यं नाम गुणः, अमङ्गलस्य विस्पष्टमनभिधानात्। तत्र भवति=श्रेष्ठे। "तत्र च भावेने"ति सप्तमी। पारस्परिकविरोधेन विशिथिलीकृतानि=शिथिलतामापाद्यमानानि स्नेहबन्धनानि यैस्तेषु। भामिनीनाम्=

भ्रूभङ्ग–भूरिभाव–प्रभाव–पराभूत-वैभवेषु प्रशंसामात्र-प्रियेषु प्रभुषु, इन्द्रस्त्वं वरुणस्त्वं कुबेरस्त्वमिति वर्णनामात्रसक्तेषु बुधजनेषु, कश्चन गजिनी-स्थाननिवासी महामदो यवनः ससेनः प्राविशद् भारते वर्षे। स च प्रजा विलुण्ठ्य, मन्दिराणि निपात्य, प्रतिमा विभिद्य, परः-शताञ्जनांश्च दासीकृत्य, शतश उष्ट्रेषु रत्नान्यारोप्य स्वदेशम-नैषीत्। एवं स ज्ञातास्वादः पौनःपुन्येन द्वादशवारमागत्य भारत-मलुलुण्ठत्। तस्मिन्नेव च स्वसंरम्भ एकदा गुर्जरदेश–चूडायितं सोमनाथतीर्थमपि धूलीचकार। अद्य तु तत्तीर्थस्य नामापि केनापि न स्मर्यते; परं तत्समये तु लोकोत्तरं तस्य वैभवमासीत्। तत्र हि महार्ह–वैदूर्य–पद्मराग–माणिक्य–मुक्ताफलादि–जटितानि, कपा-टानि, स्तम्भान्, गृहावग्रहणीः, भित्तीः, वलभीः, विटङ्कानि च निर्मथ्य, रत्ननिचयमादाय, शतद्वय–मणसुवर्ण–शृङ्खलावलम्बिनीं

मानिनीनाम्, ये भ्रूभङ्गाः=सकटाक्षेक्षणानि, भूरिभावाः=हावाद्याश्चेष्टाः, तेषां *प्रभावेण पराभूतानि=तिरस्कृतानि, वैभवानि=धनानि येषां तादृशेषु*। गजि-नी="ग़ज़नी" इति लोके प्रसिद्धा। संस्कृतशब्दापभ्रंशीभूता एव सर्वे भाषाशब्दा इत्यभिप्रायेण प्रायः सार्थकसंस्कृतशब्दानामेव नामादिष्वपि प्रयोगः। महामदः= महमूद इति लोकप्रसिद्धं तन्नाम, देशनाम्ना "महमूद ग़ज़नवी" इति वृत्तेषु समुल्लिखितम्। अलुलुण्ठत्=लुण्ठितवान्। गुर्जरदेशचूडायितम्=गुर्जरदेश-भूषणतुल्यम्। धूलीचकार=नाशयामास। जटितानि, 'जट झट सङ्घात' इत्यस्य प्रयोगः। "जडे हुवे" इति हिन्दी। गृहावग्रहणीः=देहलीः। भित्तीः=कुड्यानि। वलभीः=गोपानसीः। "गोपानसी तु वलभिच्छादने वक्रदारुणी"त्यमरः। "छज्जा" इति हिन्दी "धरन" इति वा। मणशब्दो लोके "मन"इति ख्यातः।

चञ्चच्चाकचक्य-चकितीकृतावलोचक-लोचन-निचयां महाघण्टां प्रसह्य, सङ्गृह्य, महादेवमूर्तावपि गदामुदतूतुलत्।

अथ "वीर! गृहीतमखिलं वित्तम्, पराजिता आर्यसेनाः, बन्दीकृता वयम्, सञ्चितममलं यशः, इतोऽपि न शाम्यति ते क्रोधश्चेदस्मांस्ताडय, मारय, छिन्धि, भिन्धि, पातय, मज्जय, खण्डय, कर्तय, ज्वलय, किन्तु त्यजेमामकिञ्चित्करीं जडां महादेव-प्रतिमाम्। यद्येवं न स्वीकरोषि तद् गृहाणास्मत्तोऽन्यदपि सुवर्णकोटिद्वयम्, त्रायस्व, मैनां भगवन्मूर्तिं स्प्राक्षीः" इति साम्रेडं कथयत्सु, रुदत्सु, पतत्सु, विलुण्ठत्सु, प्रणमत्सु, च पूजकवर्गेषु "नाहं मूर्त्तीर्विक्रीणे किन्तु भिनद्मि" इति संगर्ज्य, जनताया हाहाकार-कलकलमाकर्णयन् घोरगदया मूर्तिमतुत्रुटत्। गदापातसमकालमेव चानेकार्बुदपद्ममुद्रामूल्यानि रत्नानि मूर्तिमध्यादुच्छलितानि परितोऽवाकीर्यन्त। स च दग्धमुखस्तानि रत्नानि मूर्तिखण्डानि च क्रमेलकपृष्ठेष्वारोप्य सिन्धुनदमुत्तीर्य, स्वकीयां विजयध्वजिनीं गजिनीं नाम राजधानीं प्राविशत्।

चञ्चता=समुच्छलता, चाकचक्येन, चकितीकृताः=विस्मेरीकृताः, अवलोचकलोचनानाम्=द्रष्टृजननयनानाम्, निचयः=समूहो यया ताम्। उदतूतुलत्=प्राहिणोत्। उत्पूर्वकादुन्मानार्थकाच्चौरादिकात्तुलधातोः कर्त्तरि लुङि। "अकिञ्चित्करीं जडामि"ति तदीयबोधमादाय तत्प्रीतये वा, न वस्तुगत्येति बोध्यम्। स्प्राक्षीः, माङ्योगे लुङ्, अत एव नाट्। स्पार्क्षीः, स्पृक्ष इत्यपि रूपे। जनतायाः=जनसमूहस्य। अतुत्रुटत्=अभिनत्। उच्छलितानि=उत्पतितानि। दग्धमुखः=दुष्टः। "मुँहजरा" इति हिन्दी। क्रमेलकाः=उष्ट्राः, "उष्ट्रे क्रमेलकमयमहाङ्गा" इत्यमरः। विजयध्वजिनीम्=विजयध्वजवतीम्। "न कर्मधारयादि"ति निषेधस्यासार्वत्रिकत्वमुक्तम्।

"अथ कालक्रमेण सप्ताशीत्युत्तरसहस्रतमे (१०८७) वैक्रमाब्दे, मशोकं सकष्टं च प्राणांस्त्यक्तवति महामदे, गोरदेशवासी कश्चिद् "शहावुद्दीन"नामा प्रथमं गाजिनीदेशमाक्रम्य, महामदकुलं धर्मराजलोकाध्वन्यद्धुनीनं विधाय, सर्वाः प्रजाश्च पशुमारं मारयित्वा, तद्रुधिरार्द्रमृदा गोरदेशे बहून् गृहान् निर्माय चतुरङ्गिण्याऽनीकिन्या भारतवर्षं प्रविश्य, शीतलशोणितानप्यसयन् पञ्चाशदुत्तर-द्वादश-शतमितेऽब्दे (१२५०) दिल्लीमध्वयाम्बभूव।

ततो दिल्लीश्वरं पृथ्वीराजं कान्यकुब्जेश्वरं जयचन्द्रं च पारस्परिक-विरोध-ज्वर-ग्रस्तं विस्मृत-राजनीतिं भारतवर्ष-दुर्भाग्यायमानमाकलय्यानायासेनोभावपि विशस्य, वाराणसीपर्य्यन्तमखण्डमण्डलमकण्टकमकीटकिट्टं महारत्नमिव महाराज्यमङ्गीचकार। तेन वाराणस्यामपि बहवोऽस्थिगिरयः प्रचिताः, रिङ्गत्तरङ्ग-भङ्गा

गोरदेशः=सिन्धुनद्याः पश्चिमदिशि यवनप्रधानो देशविशेषः। शहावुद्दीनमपि देशनाम्ना "शहावुद्दीन गोरी"ति कथयन्ति। अध्वनीनम्=पान्थम्। चतुर्भिरङ्गैः समेता चतुरङ्गिणी। "हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुष्टयमि"त्यमरः। अनीकिन्या=सेनया। शीतलशोणितान=युद्धेच्छाविरहितान्। असयन्=उपतापयन्। अध्वयाम्बभूव=अध्वैरतिचक्राम। "तेनातिक्रामती"ति णिच्। विस्मृता राजनीतिः="वयं पञ्च वयं पञ्च वयं पञ्च शतञ्च ते। परैः साकं विवादे तु वयं पञ्चोत्तरं शतमि" त्येवं यौधिष्ठिरनीतिः, येन तम्। विशस्य=घातयित्वा, अकीटकिट्टम्=कीटकिट्टविरहितम्। कीटाः=कृमयः, किट्टम्=मलम्। अस्थिगिरयः=कीकसपर्वताः। गिरिशब्दप्रयोगो महतो हत्याकाण्डस्य ध्वननाय। रिङ्गन्तः=चलन्तः, तरङ्गभङ्गाः=ऊर्मिभेदा यस्यां सा। शोणितेन शोणा=

गङ्गाऽपि शोणित-शोणा शोणीकृता, परःसहस्राणि देवमन्दिराणि भूमिसात्कृतानि ।

स एव प्राधान्येन भारते यावनराज्याङ्कुराऽऽरोपकोऽभूत् । तस्यैव च कश्चित् क्रीतदासः "कुतुबुद्दीन"नामा प्रथमो भारतसम्राट् संजातः ।

तमारभ्याद्यावधि राक्षसा एव राज्यमकार्षुः । दानवा एव च दीनानदीदलन् । अभूत् केवलम् "अकबरशाह"नामा यद्यपि गूढशत्रुर्भारतवर्षस्य ; तथापि शान्तिप्रियो विद्वत्प्रियश्च । अस्यैव प्रपौत्रो मूर्तिमदिव कलियुगं गृहीत-विग्रह इव चाधर्मः, आलमगीरोपाधिधारी "अवरङ्गजीवः" सम्प्रति दिल्लीवल्लभतां कलङ्कयति, अस्यैव पताकाः केकयेषु, मत्स्येषु, मगधेषु, अङ्गेषु, वङ्गेषु, च दोधूयन्ते, केवलं दक्षिणदेशेऽधुनाऽप्यस्य परिपूर्णो नाधिकारः संवृत्तः ।

रक्ता । शोणीकृता=शोणतामापादिता । मेकलगिरिसमुद्भूतो विहारविहारी महानदः शोणः । भूमिसात्कृतानि=धूलिसात्कृतानि । भारतसम्राट्=सम्राट्सदृशो लाक्षणिकोऽयं शब्दः ।

राक्षसाः=निर्दयाः हिंसाप्रियाश्च । अदीदलन्=अजीघतन् । गूढशत्रुः=गुप्तरिपुः । राजपुत्रवंश्यैः सहोद्वाहादिसम्बन्धं प्राचारयदिति मुद्रान्तरेण सर्वान् म्लेच्छान् विधित्सुरासीदिति तत्त्वम् । अवरङ्गजीवः="औरङ्गजेब" इतिनामा ।

वितस्ताया-(झेलम) श्चन्द्रभागाया-(चनाव) श्चान्तरालवर्त्ती केकयदेशः रामायणसमये "गिरिव्रज" नाम्ना ख्याता नगर्येतदीयराजधान्यासीत् । भरतजनन्याः केकय्या जन्मभूरियमेवेति रामायणे व्यक्तम् । गिरिव्रजस्य (गिरञ्जक) जवनसाम्राज्यकाले "जलालपुर" इति नामकरणमभूत् ।

दक्षिणदेशो हि पर्वत-बहुलोऽस्त्यरण्यानी-सङ्कुलश्चास्तीति चिरोद्योगेनापि नायमशकन्महाराष्ट्रकेसरिणो हस्तयितुम्। साम्प्रतमस्यैवाऽऽत्मीयो दक्षिणदेश-शासकत्वेन "शास्तिखाननामा" प्रेष्यत इति श्रूयते। महाराष्ट्रदेशरत्नम्, यवन-शोणित-पिपासाऽऽकुल-कृपाणः, वीरता-सीमन्तिनी-सीमन्त-सुन्दर-सान्द्र-सिन्दूर-दान-देदीप्यमान-दोर्दण्डः, मुकुटमणिर्महाराष्ट्राणाम्, भूषणं भटानाम्, निधिर्नीतीनाम्, कुलभवनं कौशलानाम्, पारावारः परमोत्साहानाम्, कश्चन प्रातःस्मरणीयः, स्वधर्माऽऽग्रह-ग्रह-ग्रहिलः, शिव इव धृतावतारः शिववीरश्चास्मिन् पुण्यनगरान्नेदीयस्येव सिंहदुर्गे

इन्द्रप्रस्थात्पश्चिमस्थो दृषद्वत्याश्च दक्षिणस्थो मरुभूमेः पूर्वस्थो भूखण्डो मत्स्यदेशः।

मगधदेशः=कीकटापरनामा वर्त्तमान-दक्षिणविहारो गया-राजगृहादिसमवेतः।

अङ्गदेशः=वर्त्तमान-भागलपुरसम्वलितो भूखण्डविशेषः।

अङ्गदेशात्पूर्वस्थितोऽधुना बङ्गालनाम्ना ख्यातो वङ्गदेशः।

अरण्यानी=महदरण्यम्, तया सङ्कुलः=व्याप्तः। हस्तयितुम्=हस्ते कर्त्तुम्। वशीकर्त्तुमिति यावत्। शास्तिखानः="शाइस्ता खां" इति प्रसिद्धं नाम। रत्नशब्दस्य नित्यक्लीबत्वम्। यवनानां=मोहमदानां, शोणितस्य पिपासायामाकुलः कृपाणो यस्य सः। वीरस्य भावो वीरता=शूरता, सैव सीमन्तिनी=ललना, तस्याः सीमन्ते=केशवेशे, सुन्दरं सान्द्रं=घनीभूतं, यत्सिन्दूरदानं=नागकेशरचर्चनं, तेन देदीप्यमानो दोर्दण्डो=बाहुदण्डो यस्य सः। श्रुत्यनुप्रासः। स्वधर्मस्य=सनातनधर्मस्य, य आग्रहग्रहः=हठादपि पालनम्, तत्र ग्रहिलः=दृढतरः। शिव इवेत्युत्प्रेक्षा। शिववीरः="शिवाजी" इति विख्यातः। पुण्य-

ससेनो निवसति । विजयपुराधीश्वरेण साम्प्रतमस्य प्रवृद्धं वैरम् । "कार्यं वा साधयेयं देहं वा पातयेयम्"इत्यस्य सारगर्भा महती प्रतिज्ञा । सतीनाम्, सताम्, त्रैवर्णिकस्याऽऽर्यकुलस्य, धर्मस्य, भारतवर्षस्य चाऽऽशा-सन्तान-वितानस्यायमेवाऽऽश्रयः । इयमेव वर्तमाना दशा भारतवर्षस्य । किमधिकं विनिवेदयामो योग-बलावगत-सकल-गोप्यतम-वृत्तान्तेषु ?"इति कथयित्वा विरराम ।

तदाकर्ण्य विविध-भाव-भङ्ग-भासुर-वदनो योगिराजो मुनिराजं तत्सहचरांश्च निपुणं निरीक्ष्य, तेषामपि शिववीरान्तरङ्गतामङ्गीकृत्य, मुनिवेषव्याजेन स्वधर्मरक्षात्रतिनश्चोररीकृत्य, "विजयतां शिववीरः, सिद्ध्यन्तु भवतां मनोरथाः" इति मन्दं व्याहार्षीत् ।

अथ किमपि पिपृच्छिषामीति शनैरभिधाय बद्धकरसम्पुटे सोत्कण्ठे जटिलमुनौ "अवगतम्, यवनयुद्धे विजय एव, दैवादापद्ग्रस्तोऽपि च सखिसाहाय्येनाऽऽत्मानमुद्धरिष्यति" इति समभाणीत् । मुनिश्च गृहीतमित्युदीर्य, पुनः किञ्चिद्विचार्य्येव, स्मृत्वेव च, दीर्घमुष्णं निःश्वस्य, रोरुध्यमानैरपि किञ्चिदुद्गतैर्बाष्पबिन्दुभिराकुलनयनो "भगवन् ! प्रायो दुर्लभो युष्मादृक्षाणां साक्षात्कार इत्यपराऽपि पृच्छाऽऽच्छादयति माम्" इति न्यवेदीत् । स च "आम् ! ऊरीकृतम्, जीवति सः, सुखेनैवाऽऽस्ते" इत्युदतीतरत् । अथ तं

नगरात्="पूना" इति ख्यातात् । नेदीयसि=अतिशयेनान्तिक इति नेदीयान् तस्मिन् । "अन्तिकबाढयोर्नेदसाधावि"ति नेदादेशः । आशायाः, सन्तानम्=परम्परा, तस्य वितानम्=विस्तारः, तस्य । योगबलेन=योगसामर्थ्येन, अवगतः=विज्ञातः, सकलो गोप्यतमः=रहस्यात्मको वृतान्तो यैस्तेषु ।

कदा द्रक्ष्यामीति पुनः पृष्टवति "तद्विवाहसमये द्रक्ष्यसि" इत्यभिधाय, बहूनि सान्त्वना-वचनानि च गम्भीरस्वरेणोक्त्वा, सपत्युपत्यकाम्, गण्डशैलान्, अधित्यकाञ्चाऽऽरुह्य, पुनस्तस्मिन्नेव पर्वतकन्दरे तपस्तप्तुं जगाम।

ततः शनैः शनैर्निर्यातेष्वपरिचितजनेषु, संवृत्ते च निर्मक्षिके, मुनिर्गौरवटुमाहूय, विजयपुराधीशाऽऽज्ञया शिववीरेण सह योद्धुं ससेनं प्रस्थितस्य "अपजलखानस्य" विषये यावत्किमपि प्रष्टुमियेष, तावत्पादचारध्वनिमिव कस्याप्यश्रौषीत्। तमवधार्यान्यमनस्क इव मुनौ, गौरवटुरपि तेनैव ध्वनिना कर्णयोः कृष्ट इव समुत्थाय, निपुणं परितो निरीक्ष्य, पर्य्यस्य, "कोऽयम्?" इति च साम्रेडं व्याहृत्य, कमप्यनवलोक्य, पुनर्निवृत्य, "मन्ये मार्जारः कोऽपि" इति मन्दं गुरवे निवेद्य, पुनस्तथैवोपविवेश। मुनिश्च मा स्म कश्चिदितरः श्रौषीदिति सशङ्कः क्षणं विरम्य पुनरुपन्यस्तुमारेभे—

"वत्स गौरसिंह! अहमत्यन्तं तुष्यामि त्वयि, यत्त्वमेकाकी "अपजलखानस्य" त्रीनश्वान्, तेन दासीकृतान् पञ्च ब्राह्मणतनयांश्च

उररीकृत्य=स्वीकृत्य। उदतीतरत्=उत्तरयाञ्चकार। सान्त्वनावचनानि=सामवाक्यानि। उपत्यकाम्=अद्रेरधः सन्निहितां भूमिम्। गण्डशैलान्=पर्वतात् पतितान् स्थूलपाषाणान्। "गण्डशैलास्तु च्युताः स्थूलोपला गिरेरि"त्यमरः। अधित्यकाम्=अद्रेरूर्ध्वां भूमिम्। "उपाधिभ्यां त्यकन्नासन्नारूढयोरि"त्युभयत्रापि त्यकन्। "उपत्यकाऽद्रेरासन्ना भूमिरूर्ध्वमधित्यके"त्यमरः। निर्मक्षिके=मक्षिकाणामभावो निर्मक्षिकं तस्मिन्, एकान्ते। मानवसञ्चारदेशे सर्वत्र मक्षिकास्तिष्ठन्तीति तदभावेन जनसंचाराभावो लक्ष्यते। उपन्यस्तुम्=

मोचयित्वाऽऽनीतवानसीति। कथं न भवेरीदृशः ?, कुलमेवेदृशं राजपुत्रदेशीयक्षत्रियाणाम्"। तावत् पुनरश्रूयत मर्मरः पादक्षेपश्च। ततो विरम्य, मुनिः स्वयमुत्थाय, प्रोन्नतं शिलापीठमेकमारुह्य, निपुणतया परितः पश्यन्नपि कारणं किमपि नावलोकयामास चरणाक्षेपशब्दस्य। अथ पुनरेकतानेन निपुणं निरीक्षमाणेन गौर-सिंहेन दृष्टं, यत् कुटीर-निकटस्थ-निष्कुटक-कदलीकूटे द्वित्रास्तर-वोऽतितरां कम्पन्त इति। तदेव संशयस्थानमित्यङ्गुल्या निर्दिश्य, कुटीर-बलीके गोपयित्वा स्थापितानामसीनामेकमाकृष्य, रिक्त-हस्तेनैव मुनिना पृष्ठतोऽनुगम्यमानः कपोल-तल-विलम्बमानान्, चक्षुश्चुम्बिनः, कुटिल-कचान् वामकराङ्गुलिभिरपसारयन्, मुनि-वेषोऽपि किञ्चित्कोप-कषायित-नयनः, कर-कम्पित-कृपा-कृपण-कृपाणो महादेवमाराधयिषुस्तपस्विवेषोऽर्जुन इव शान्तवीररस-

---

कथयितुम्। **राजपुत्रदेशः**=राजपुत्रस्थानापभ्रंशीभूतो लोके सम्प्रति "राजपूताना"इति प्रसिद्धः। **मर्मरः**=शुष्कपर्णध्वनिः। "अथ मर्मरः। स्वनिते वस्त्रपर्णानामि"त्यमरः। **एकतानेन**=एकचित्तेन। निष्कुटा एव **निष्कुटकाः**=गृहारामाः, "गृहारामास्तु निष्कुटा" इत्यमरः। कुटीरनिकटस्थाश्च ते गृहारामास्तेषु, **कदलीनाम्**=रम्भाणाम्, **कूटे**=समूहे। **वलीके**=पटले। "वलीकनीध्रे पटलप्रान्त"इत्यमरः। "छप्पर की ओरी" इति हिन्दी।

रिक्तहस्तेन=शून्यकरेण। **कपोलस्थलविलम्बमानान्**=कटस्थितान्। **किञ्चित्कोपेन**=ईषत्क्रोधेन, **कषायिते**=कलुषिते, **नयने**=नेत्रे यस्य सः। **करे कम्पितः कृपाकृपणः**=दयाशून्यः, **कृपाणः**=असिर्यस्य सः। **आराधयिषुः**=सेवितुमिच्छुः। शङ्करसमाराधनाय करकलितचापो मध्यमपाण्डवस्तपश्चचारेति

द्वयस्नातः सपदि समागतवांस्तन्निकटे, अपश्यच्च लता-प्रतान-वितान-वेष्टित-रम्भा-स्तम्भ-त्रितयस्य मध्ये नीलवस्त्र-खण्ड-वेष्टित-मूर्द्धानं, हरित-कञ्चुकं, श्याम-वसनानद्ध-कटितट-कर्बुरा-धोवसनं काकासनेनोपविष्टं, रम्भालवाल-लग्नाधोमुख-खड्गत्सरु-न्यस्त-विपर्य्यस्त-हस्त-युगलम्, लशुनगन्धिभिर्निश्वासैः कदली-किसलयानि मलिनयन्तम्, नवाङ्कुरित-श्मश्रु-श्रेणिच्छलेन कन्य-

---

महाभारतीया कथा किरातार्जुनीय-महाकाव्यमूलभूता। पूर्णोपमा। **लतानाम्**=वल्लीनाम्, "वल्ली तु व्रततिर्लते"त्यमरः, **प्रतानानि**=सूक्ष्मतन्तवस्तेषां, **वितानम्**=विस्तारः, तेन **वेष्टितम्**=वलयितम्, **रम्भास्तम्भानां त्रितयम्**=कदली-स्तम्भत्रयं तस्य। यवनयुवकमपश्यदित्यन्वयः। तमेव विशिनष्टि। नील्या रक्तं **नीलं**, तच्च **वस्त्रखण्डम्**, तेन वेष्टितो मूर्धा यस्य तम्। **हरितः**=हरिद्वर्णः, **कञ्चुकः**=चोलको यस्य तम्। "अङ्गरखा, चोंगा" इति हिन्दी। **श्यामवसनेन**=कृष्णवस्त्रेण, "वस्त्रमाच्छादनं वासश्चैलं वसनमंशुकम्"त्यमरः, **आनद्धम्**=आच्छादितम्, **कटितटे कर्बुरम्**=अनेकवर्णम्, "चित्रं किर्मीर-कल्माषशबलैताश्च कर्बुर" इत्यमरः, **अधोवसनम्**=नाभ्यूरुजङ्घाच्छादनम् "तहमत, लुंगी" इति हिन्दी, यस्य तम्। **काकासनेन**=चिबुकार्पितजानुयुगलासनेन। **रम्भाया आलवाले**=आवापे, "स्यादालवालमावाप" इत्यमरः, वृक्षादिमूले समन्ततोऽम्भसां धारणार्थं वेष्टनमालवालम्, "आटा" इति हिन्दी, **अधोमुखस्य**=निम्राननस्य, **खड्गस्य त्सरौ**=मुष्टौ, "तलवार की मूठ" इति हिन्दी, "त्सरुः खड्गादिमुष्टौ स्यादि"त्यमरः, **न्यस्तम्**=स्थापितम्, **विपर्यस्तम्**=न्युब्जीभूतम्, **हस्तयुगलम्**=करद्वयं यस्य तम्। लशुनस्य गन्ध इव गन्धो येषां तैः। लुप्तोपमा। **किसलयानि**=नवपल्लवानि। **नवाङ्कुरितायाः**=नवस्फुरितायाः, **श्मश्रुश्रेण्याः**

कापहरणपङ्क-कलङ्कपङ्क-कलङ्कितानानम्, विंशतिवर्ष-कल्पं यवनयुवकमेकम्। ततः परस्परं चाक्षुषे सम्पन्ने दृष्टोऽहमिति निश्चित्य, उत्प्लुत्य, कोशात् कृपाणमाकृष्य, युयुत्सुः सोऽपि सम्मुखमवतस्थे। ततस्तयोरेवं संजाताः परस्परमालापाः।

गौरसिंहः—कुतो रे यवन-कुल-कलङ्क!

यवनयुवकः—आः! वयमपि कुत इति प्रष्टव्याः? भारतीय-कन्दरिकन्दरेष्वपि वयं विचरामः, शृङ्ग-लाङ्गूल-विहीनानां हिन्दु-पद-व्यवहार्याणां च युष्मादृक्षाणां पशूनामाखेटक्रीडया रमामहे।

गौरसिंहः—[सक्रोधं विहस्य] वयमपि तु स्वाङ्कागतसत्त्ववृत्तयः शिवस्य गणा अत्रैव निवसामः, तत्सुप्रभातमद्य, स्वयमेव त्वं दीर्घ-दावदहने पतङ्गायितोऽसि।

यवनयुवकः—अरे रे वाचालाः! ह्यो रात्रौ युष्मत्कुटीरे रुदतीं समायातां ब्राह्मण-तनयां सपदि प्रयच्छत, तत्कदाचिदयया जीव-

छलेन=व्याजेन। कन्यकाया अपहरणरूपं यत् पङ्कम्=पापम् "अस्त्री पङ्कं पुमान् पाप्मे"त्यमरः, तस्य यः कलङ्कः=दुर्यशः, स एव पङ्कः=कर्दमः "पङ्कोऽस्त्री शादकर्दमावि"त्यमरः, तेन कलङ्कितम्=भ्रष्टम्, आननं यस्य तम्। मुखसमुद्भूतश्मश्रूणां कलङ्कपङ्कत्वेनोत्प्रेक्षा। विंशतिवर्षकल्पम्=प्रायो विंशति-वर्षवयस्कम्। चाक्षुषे=चक्षुरिन्द्रियजन्यप्रत्यक्षे। उत्प्लुत्य=उत्पत्य। "कूद कर" इति हिन्दी। युयुत्सुः=योद्धुमिच्छुः। अवतस्थे=स्थितः, "समवप्रविभ्यः स्थ" इत्यात्मनेपदम्। भारतीयाः=भारतभवाः, ये कन्दरिणः=शैलास्तेषां कन्द-रेषु। आखेटक्रीडया=मृगयारमणेन। स्वाङ्क आगताः सत्त्वाः=प्राणिन एव वृत्तयः=जीवनसाधनानि येषां ते। दीर्घश्चासौ दावदहनः=वनाग्निस्तस्मिन्।

तोऽपि त्यजेयम्, अन्यथा मदसिभुजङ्गिन्या दष्टाः क्षणात् कथावशेषाः संवर्त्स्यथ ।

कलकलमेतमाकर्ण्य श्यामबटुरपि कन्यासमीपादुत्थाय दृष्ट्वा च हन्तुमेतं यवनवराकं पर्य्यायोऽयं गौरसिंह इति मा स्म गमदन्योऽपि कश्चित् कन्यकामपजिहीर्षुरिति वलीकादेकं विकटखड्गमाकृष्य त्वरौ गृहीत्वा कन्यकां रक्षन्, तदध्युषितकुटीर-निकट एव तस्थौ ।

गौरसिंहस्तु "कुटीरान्तः कन्यकाऽस्ति, सा च यवन-वध-व्यसनिनि मयि जीवति न शक्या द्रष्टुमपि, किं नाम स्प्रष्टुम् ? तद् यावत्तव कवोष्ण-शोणित-तृषित एष चन्द्रहासो न चलति, तावत् क्रूर्दनं वा, उत्फालं वा यच्चिकीर्षसि तद्विधेहि" इत्युक्त्वा व्यालीढमर्य्यादया सज्जः समतिष्ठत ।

ततो गौरसिंहो दक्षिणान् वामांश्च परःशतान् कृपाणमार्गान-

"दवदावौ वनानिल" इत्यमरः । मदसिरेव भुजङ्गिनी=सर्पिणी, तया। रूपकम् । संवर्त्स्यथ, "वृद्धयः स्यसनोरि"ति परस्मैपदम्, "न वृद्धयश्चतुर्भ्य"इतीण्निषेधः।

कलकलम्=कोलाहलम् । वलीकात्=पटलप्रान्तात् तया=कन्यकया, अध्युषितस्य=सेवितस्य, कुटीरस्य निकटे । यवनानां वध एव व्यसनं यस्य तादृशे । कवोष्णस्य=ईषदुष्णस्य, "कोष्णं कवोष्णं मन्दोष्णं कदुष्णं त्रिषु तद्वती"त्यमरः, शोणितस्य=लोहितस्य, तृषितः=पिपासितः । चन्द्रहासः=खड्गः । "खड्गे तु निस्त्रिंशचन्द्रहासासिरिष्टय"इत्यमरः । क्रूर्दनं वा उत्फालं वा="कूदना, उछलना, मचा लो"इति हिन्दी । व्यालीढम्=युद्धावस्थानविशेषस्तन्मर्यादया । कोदण्डमण्डनादिषु प्रसिद्धमिदम् । "पैंतरा"

ङ्गीकृतवतः, दिनकर-कर-स्पर्श-चतुर्गुणीकृत-चाकचक्यैश्चञ्चन्द्र-हासचमत्कारैश्चक्षूंषि मुष्णतः, यवन-युवक-हतकस्य, केनाप्यनुप-लक्षितोद्योगः, अकस्मादेव स्वासिना कलितक्लेद-संजात-स्वेद-जल-जालम्, विशिथिल-कच-कुल-मालम्, भग्न-भ्रू-भयानक-भालं शिरश्चिच्छेद । अथ मुनिरपि दाडिम-कुसुमास्तरणाच्छन्ना-यामिव गाढ-रुधिर-दिग्धायां ज्वलदङ्गारचितायां चिताया-मिव वसुधायां शयानम्, वियुज्यमान-भातरभुवमालिङ्गन्तमिव

इति हिन्दी । दिनकरकराणाम्=सूर्यकिरणानाम्, स्पर्शेन चतुर्गुणीकृतम्=वर्धि-तम्, चाकचक्यम्=प्रतिभासविशेषो यैस्तैः । चञ्चच्चन्द्रहासचमत्कारैः= सञ्चरत्खड्गचमत्कारैः । मुष्णतः=चोरयतः । हतकस्य=दुष्टस्य । केनापीत्यनुप-लक्षितविशेषणम् । "सविशेषणानां वृत्तिर्ने"ति तु न नित्यसापेक्षस्थल इति सुव्यक्त-मेव । स्वासिना शिरश्चिच्छेदेत्यन्वयः । शिरो विशिनष्टि—कलितेन=व्याप्तेन क्लेदेन=श्रमेण, सञ्जातस्य=उत्पन्नस्य, स्वेदजलस्य=घर्मजलस्य, "घर्मो निदाघः स्वेद"इत्यमरः, जालं=समूहो यस्मिंस्तत् । विशिथिला=इतस्ततः परिभ्रष्टा, कचानाम्=केशानाम्, कुलस्य=समूहस्य, माला=पङ्क्तिः, यस्मिंस्तत् । भग्नया=छिन्नया भ्रुवा=दृशामूर्ध्वभागेन, "ऊर्ध्वे दृग्भ्यां भ्रुवौ स्त्रियावि"त्यमरः, भयानकम्=भीषणम्, भालम्=ललाटम्, यस्मिंस्तत् । जालम्, मालम् भाल-मित्यत्र यमकम् । वसुधायाम्=पृथिव्याम् । शयानम्=पतितम् । वसुधां विशिनष्टि—गाढेन=घनीभूतेन रुधिरेण=लोहितेन दिग्धायाम्=लिप्तायाम् । "दिग्धो विषाक्तबाणे स्यात्पुंसि लिप्तेऽन्यलिङ्गक"इति मेदिनी । उत्प्रेक्षते—दाडि-मस्य=करकस्य, "दाडिमस्तु त्रिलिङ्गः स्यादेलायां करके त्रिष्वि"ति मेदिनी, कुसुमानाम्, आस्तरणेन=विष्टरेण, आच्छन्नायाम्=आवृतायामिव । पुनर-प्युत्प्रेक्षते—ज्वलदङ्गारैश्चितायाम्=व्याप्तायाम् । चितायाम्=चितौ । भस्मीभ-

निर्जीवीभवदङ्ग-बन्ध-चालन-परम्, शोणित-सङ्घात-व्याजेनान्तः-स्थित-रजोराशिमिवोद्गिरन्तम्, कलित-सायन्तन-घनाऽऽडम्बर-विभ्रमम्, सततताम्रचूड-भक्षण-पातकेनेव ताम्रीकृतम्, छिन्न-कन्धरम्, यवनहतकमवलोक्य सहर्षं, ससाधुवादं, सरोमोद्गमं, च गौरसिंहमाश्लिष्य, भ्रूभङ्गमात्राऽऽज्ञप्तेन भृत्येन मृतक-कञ्चुक-कटिबन्धोष्णीषादिकमन्विष्याऽऽनीतं पत्रमेकमादाय सगणः स्वकुटीरं प्रविवेश।

इति प्रथमो निश्वासः।

वनाय न यावनैश्चिता प्राप्तव्येति हिन्दुकरान्मृत्युमवाप्य कियतः कालस्य कृते लब्धाऽनेनेति ध्वनिः। यवनहतकं विशिनष्टि-**निर्जीवीभवताम्**=निष्प्राणतां गच्छताम्, **अङ्गबन्धानाम्**=शरीरसन्धीनाम्, **चालने परम्**=निरतम्। **शोणितसङ्घातव्याजेन**=रुधिरप्रवाहच्छलेन। **अन्तः स्थितो यो रजोराशिः**=रजोगुणसमूहः, तमिवेत्युत्प्रेक्षा। **उद्गिरन्तम्**=वमन्तम्। **कलितः**=धारितः, **सायन्तनस्य**=सायंभवस्य, **घनाऽऽडम्बरस्य**=मेघविडम्बनायाः, **विभ्रमः**=विलासो येन तम्। **सततम्**=सर्वदा यत् **ताम्रचूडस्य**=कुक्कुटस्य, "कृकवाकुस्ताम्रचूडः कुक्कुटश्चरणायुध" इत्यमरः, **भक्षणम्**=अशनम्, तदेव **पातकम्**=पापं तेनेव। **ताम्रीकृतम्**=रक्तीकृतम्। सायङ्कालिकसूर्यवर्णीकृतमिति यावत्। **कटिबन्धः**=जघनपट्टिका। "पेटी" इति हिन्दी। **उष्णीषम्**=शिरस्त्राणम्।

निश्वास इति,-वाक्यविकासरूपे गद्यकाव्ये निश्वासप्रश्वासा एव परिच्छेदका भवन्तीति परिच्छेदकानामङ्कसर्गाध्यायादिसंज्ञाः समुपेक्ष्य निश्वाससंज्ञामेवादरयाञ्चकार ग्रन्थकारः। यद्यपि बाणादिभिरुच्छ्वासा गृहीताः, किन्तु ते शोकक्रोधादावेवापेक्षिता इति तानपि तत्याज। भवति चात्र प्राचीनं पद्यम्-

"प्रौढिप्रकर्षेण पुराणरीति-व्यतिक्रमः श्लाघ्यतमः कवीनाम्" इति टिप्पणी।

इति शिवविजयवजयन्त्यामाद्यनिश्वासविवरणम्।

"रात्रिर्गमिष्यति भविष्यति सुप्रभातम्
भास्वानुदेष्यति हसिष्यति पङ्कजश्रीः ॥
इत्थं विचिन्तयति कोशगते द्विरेफे
हा हन्त! हन्त!! नलिनीं गज उज्जहार"

स्फुटम् ।

इतस्तु स्वतन्त्र-यवनकुल-भुज्यमान-विजयपुराधीश-प्रेषितः, पुण्यनगरस्य समीप एव प्रक्षालित-गण्डशैल-मण्डलायाः, निर्झर-

कपटपटुरपजलखानः शिवं निग्रहीतुं कीर्त्तिमर्जयितुञ्च विहितविविधमनोरथः श्रीमता शिवेनैव निगृहीतो मृत्युवशगश्च कृत इति द्वितीयनिश्वासकथाभागोपक्षेपायाऽऽदौ "रात्रिर्गमिष्यती"ति पद्यं समुल्लिखति। व्याख्या चास्य नितान्तसरला। द्विरेफपदञ्च द्वौ रेफौ यस्येति व्युत्पत्त्या रेफद्वयवत्त्वेन भ्रमरवाचकं योगरूढञ्चेति नेतरतादृशशब्दसङ्ग्रहानुचिन्ता । भवति चात्र कोशः "द्विरेफपुष्पलिङ्-भृङ्ग-पट्पद-भ्रमरालय"इति । अद्यतनानद्यतनोभयविधभविष्यत्स्थले लुट्प्रयोगस्यैवेष्टव्यत्वेऽपि पूर्वं विशेषाविवक्षायां लृटि ततो विशेषणान्वेषणमिति स्थलेष्वीदृशेषु नासाधुत्वविषयकभ्रान्तिरवलम्बनीयेति शम्। अपजलखानः प्रतापदुर्गाविदूर एव तिष्ठति स्मेति सम्बन्धः। अपजलखानं विशिनष्टि-स्वतन्त्रम्=स्वच्छन्दम्, यद् यवनकुलं तेन भुज्यमानस्य=अधीनीकृतस्य, विजयपुरस्य=तन्नामकनगरस्य, अधीश्वरेण, प्रेषितः=प्रहितः। इदं तात्कालिकस्थितिप्रदर्शनमात्रफलकन्न तु साहित्यकविवेचनया समुपयोगि विशेषणमिति वेदितव्यम्।

भीमाया नीरं कट्टकुर्वन्निति सम्बन्धः। नदीं विशिनष्टि-प्रक्षालितानि=धौतानि, गण्डशैलानाम्=गिरिच्युतस्थूलपर्वतखण्डानाम्-मण्डलानि यया तस्याः।

वारिधारा-पूर-पूरित-प्रबल-प्रवाहायाः, पश्चिम-पारावार-प्रान्त-प्रसृत-गिरिग्राम-गुहा-गर्भ-निर्गतायाः अपि प्राच्य-पयोनिधि-चुम्बन-चञ्चुरायाः, रिङ्गत्तरङ्ग-भङ्गोद्भूतावर्त्त-शत-भीमायाः, भीमाया नद्याः, अनवरत-निपतद्बकुल-कुल-कुसुम-कदम्ब-सुरभीकृतमपि नीरं वगाहमान-मत्त-मतङ्गजमदधाराभिः कटूकुर्वन, हय-हेषा-

निर्झराणाम्=जलनिर्गमस्रोतोबिलानाम्, वारि-धारा-पूरैः=जलधारासमूहैः। पूरितः=भरितः प्रबलः=वेगवान् प्रवाहो यस्यास्तस्याः। पश्चिमश्चासौ पारावारः=समुद्रः "समुद्रोऽब्धिरकूपारः पारावारः सरित्पतिरि"त्यमरः, तस्य, प्रान्ते=निकटप्रदेशे, यो गिरीणां ग्रामः=समूहः तस्य गुहाः=गह्वराणि, तासां गर्भतः=मध्यात्, निर्गतायाः=समुत्पन्नायाः। प्राच्यः=प्राचीभवः, यः पयोनिधिस्तच्चुम्बने चञ्चुरायाः=चपलायाः। पश्चिमसमुद्रान्निःसृत्यपूर्वसमुद्रं विवेशेति वाच्योर्थः। एवमुक्तिः पाश्चात्यरमणीनां प्राच्यसंपर्करूपसाम्प्रतिकव्यवहारोपहासाय। रिङ्गताम्=सञ्चलताम्, तरङ्गाणाम्=ऊर्मीणाम् भङ्गैः=छेदैः, उद्भूताः=उत्पन्नाः, य आवर्ताः=अम्भसां भ्रमास्तैः, भीमायाः=भयदायिन्याः। "घोरं भीमं भयानकमि"त्यमरः। भीमायाः="भीमा"नामवत्याः। अनवरतम्=सततम्, निपतताम्=प्रच्यवताम्, बकुलकुलकुसुमानाम्=वञ्जुलसमूहसुमानाम्, कदम्बेन=समूहेन, सुरभीकृतम्=सुगन्धितामापादितम्। वगाहमानानाम्=जलक्रीडां कुर्वताम्-"वष्टिभागुरिरल्लोपमवाप्योरुपसर्गयोरि"त्यल्लोपः, मत्तानाम्=दानभरितानाम्, मतङ्गजानाम्=करिणाम्, मदधाराभिः=दानजलैः। कटूकरणे हेतुः। हयानाम्=अश्वानाम्, हेषा=ध्वनिः, यद्यपि हेषा-शब्दोऽश्वशब्दे, "अश्वानां हेषा हेषा च निःस्वन"इत्यमरात्तथा चाश्वशब्दोच्चारणमनपेक्षितम्, तथापि विशिष्टवाचकपदानां सति विशेषणवाचक-पदान्तर-प्रयोगे विशेष्यमात्र-

ध्वनि-प्रतिध्वनि-वधिरीकृत-गव्यूति-मध्यगाध्वनीन-वर्गः, पट-कुटीर-कूट-विहित-शारदाम्भोधर-विडम्बनः, निरपराध-भारताभिजन-जन-पीडन-पातक-पटलैरिव समुद्भूयमान-नीलध्वजैरुपलक्षितः, विजयपुरेश्वरस्यान्यतमः सेनानीः "अपजलखानः", प्रतापदुर्गादविदूर एव शिववीरेण सहाऽऽहवद्यूतेन चिक्रीडिषुः ससेनस्तिष्ठति स्म।

अथ जगतः प्रभाजालमाकृष्य, कमलानि सम्मुद्य, कोकान् सशोकीकृत्य, सकलचराचर-चक्षुःसञ्चार-शक्तिं शिथिलीकृत्य,

परत्वमित्याश्रयणेन केवलं निःस्वनवाचकत्वेन नाश्वशब्दवैयर्थ्यमिति वेदितव्यम्।

तद्ध्वनिप्रतिध्वनिभिर्बधिरीकृतः = श्रुतिसामर्थ्यविकलीकृतः गव्यूति-मध्यगः=क्रोशद्वयान्तरालवर्त्ती, "गव्यूति स्त्री क्रोशयुगमि"त्यमरः। अध्वनीनवर्गः=यात्रिसमूहो येन सः। पटकुटीराणाम्=उपकारिकाणाम्। "उपकार्योपकारिके:"त्यमर. कूटैः=समूहैः, विहिता शारदाम्भोधराणाम्=निर्जलमेघानाम्, विडम्बना=अनुकृतिर्येन सः। समुद्भूयमानैः=कम्पमानैः, नीलध्वजैः=नीलपताकाभिः, उपलक्षितः=युक्तः। उत्प्रेक्षते-निरपराधानाम्=अघविरहितानाम्, भारताभिजनानाम्=भारतीयानाम्। यत्र पूर्वैरुषितं तदभिजनात्मनाऽऽख्यायते। तिष्ठतिस्म=अतिष्टिपदित्यर्थः। "लट्स्म"इति स्मयोगे लट्। अन्यतमः=अनेकेष्वेकः। आहवद्यूतेन=युद्धक्रीडया।

अथ भगवान् भास्वान् चक्षुषामगोचर एव यात इति सम्बन्धः। जगतः संसारस्य। प्रभाजालम्=दीप्तिसमूहम्। आकृष्य=आकुञ्च्य। सम्मुद्य=सङ्कोचयित्वा। कोकान्=चक्रवाकान्। "कोकश्चक्रश्चक्रवाक"इत्यमरः। सशोकीकृत्य=दुःखिनो विधाय। दम्पत्योः परस्परं वियोगेन शोकः। सकलस्य चराचरस्य=स्थावरजङ्गमात्मकस्य। चक्षुषाम्=नेत्राणाम्, सञ्चारस्य=दर्शनस्य,

कुण्डलेनेव निज-मण्डलेन पश्चिमामाशां भूषयन्, वारुणी-सेवनेनैव माञ्जिष्ठ-मञ्जिम-रञ्जितः, अनवरत-भ्रमण-परिश्रम-श्रान्त इव सुषुप्सुः, म्लेच्छगण-दुराचार-दुःखाऽऽक्रान्त-वसुमती-वेदनामिव समुद्रशायिनि निविवेदयिषुः, वैदिकधर्म-ध्वंस-दर्शन-संजात-निर्वेद इव गिरिगहनेषु प्रविश्य तपश्चिकीर्षुः, घर्म-ताप-तप्त इव समुद्रजले सिस्नासुः, सायं समयमवगत्य सन्ध्योपासनमिव विधित्सुः, नास्ति कोऽपि मत्कुले यः सकण्ठग्राहं धर्म-ध्वंसिनो यवनहतकान्

शक्तिम्=सामर्थ्यम् कुण्डलेन=कर्णभूषणेन। "कुण्डलं कर्णभूषणमि"त्यमरः। तेनेवेत्युत्प्रेक्षा, मण्डले कुण्डलत्वारोपपूर्वकत्वाद्रूपकानुप्राणिता। पश्चिमा चासौ, आशा=काष्ठा। "दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ता"इत्यमरः, वरुणस्येयं वारुणी=पश्चिमा दिक् मद्यञ्च, "सुरा प्रत्यक् च वारुणी"त्यमरः। माञ्जिष्ठाया:, मण्डूकपर्ण्याः, "मजीठ"इति हिन्दी; अयं माञ्जिष्ठः, स चासौ मञ्जिमा=रक्तिमा तेन रञ्जितः=रक्तः। यथा जनो वारुणी-(सुरा) पानानन्तरं शोणवर्णो भवति तथा भास्करोऽपि वारुणी-(पश्चिमा) संसर्गोत्तरं शोणः संजात इत्युत्प्रेक्षा। अनवरत-भ्रमण-परिश्रम-श्रान्तः=सततचलनखेदखिन्नः। सुषुप्सुः=स्वप्तुमिच्छुः। स्वाभाविकी चरमाचलप्राप्तिः खेदकारणकशयनेच्छावत्वेनोत्प्रेक्षिता। म्लेच्छगणस्य=यवनसमूहस्य, दुराचारैः=असदाचरणैः, गोहननमन्दिरध्वंसनादिभिः, दुःखाक्रान्तायाः=कष्टपीडितायाः, वसुमत्याः=पृथिव्याः, वेदनाम्=पीडाम्। निविवेदयिषुः=निवेदयितुमिच्छुः। स इवेत्युत्प्रेक्षा। वैदिकधर्मस्य=सनातनधर्मस्य, ध्वंसदर्शनेन=विनाशावलोकनेन सञ्जातः=समुत्पन्नः, निर्वेदः=वैराग्यं यस्य स इव। गिरिगहनेषु=पर्वतदुर्गमेषु। चिकीर्षुः=कर्तुमिच्छुः। सिस्नासुः=स्नातुमिच्छुः। सर्वो हि तप्तः स्नातुमिच्छति। अवगत्य=ज्ञात्वा।

यज्ञियादस्माद् भारत-गर्भान्निस्सारयेदिति चिन्ताऽऽक्रान्त इव कन्दरि-कन्दरेषु प्रविविक्षुर्भगवान् भास्वान्, क्रमशः क्रूर-करान-पहाय, दृश्य-परिपूर्ण-मण्डलः, संवृत्य, श्वेतीभूय, पीतीभूय, रक्तीभूय च गगनधरातलाभ्यामुभयत आक्रम्यमाण इवाण्डाकृतिमङ्गीकृत्य, कलिकौतुक-कवलीकृतं सदाचार-प्रचारं, पातक-पुञ्ज-पिञ्जरितं धर्मम्, यवन-गणग्रस्तं भारतवर्षं च स्मारयन्, अन्धतमसे च जगत् पातयन्, चक्षुषामगोचर एव संजातः।

ततः संवृत्ते किञ्चिदन्धकारे धूप-धूमेनेव व्याप्तासु हरित्सु, भुशुण्डीं स्कन्धे निधाय निपुणं निरीक्षमाणः, आगत-प्रत्यागतं च विदधानः, प्रताप-दुर्ग-दौवारिकः, कस्यापि पादक्षेप-ध्वनिमिवा-

विधित्सुः=चिकीर्षुः। सकण्ठग्राहम्=कण्ठं गृहीत्वा। अर्धचन्द्रं दत्वेत्यर्थः। यज्ञियात्=यज्ञकरणयोग्यात्। "यज्ञर्त्विग्भ्यां घखञावि"ति घः। प्रविविक्षुः=प्रवेष्टुमिच्छुः। क्रूरकरान्=तीव्रकिरणान्। दृश्यम्=अवलोकयितुमर्हम्, सम्पूर्णम्=समस्तम्, मण्डलम्=विम्बं यस्य सः। श्वेतीभूयेत्यादिः। स्वभावोक्तिः। अण्डाकृतिम्=सूर्योऽण्डाकृतिरेवोदेत्यस्तमेति चेति वेदिनः। अत्र सर्वत्रोत्प्रेक्षा। कलिकौतुकेन=कलियुगकौतूहलेन, कवलीकृतम्=विनष्टम्, पातकपुञ्जेन=अघौघेन, पिञ्जरितम्=पीतवर्णम्। जर्जरीकृतमिति भावः। अन्धतमसे=गाढध्वान्ते। "ध्वान्ते गाढेऽन्धतमसमि"त्यमरः। चक्षुषामगोचरः=अदृश्यः। सूर्यास्तमनवेलाऽभूदित्यर्थः।

हरित्सु=दिक्षु। भुशुण्डीम्=आयुधविशेषम्। "बन्दूक" इति हिन्दी। आगतप्रत्यागतम्=गमागमिम्। विदधानः=कुर्वाणः। प्रतापदुर्गस्य=तन्नाम्ना ख्यातदुर्गस्य, "किला" इति हिन्दी। दौवारिकः=द्वारपालः। पाद-

श्रौषीत्। ततः स्थिरीभूय पुरतः पश्यन्, सत्यपि दीप-प्रकाशेऽवतमसवशादागन्तारं कमप्यनवलोकयन्, गम्भीरस्वरेणैवमवादीत्—"कः कोऽत्र भोः ?" ! "कः कोऽत्र भोः ?" इति ।

अथ क्षणानन्तरं पुनः स एव पादध्वनिरश्रावीति भूयः साक्षेपमवोचत्—"क एष मामनुत्तरयन मुमूर्षुः समायाति बधिरः ?" ततो "दौवारिक ! शान्तो भव, किमिति व्यर्थं मुमूर्षुरिति, बधिर इति च वदसि ? " इति वक्तारमपश्यतैवाऽऽकर्णि मन्द्रस्वरमेदुरा वाणी, अथ "तत्किं नाज्ञाय्यद्यापि भवता प्रभुवर्य्याणामादेशो यद् दौवारिकेण प्रहरिणा वा त्रिः प्रष्टोऽपि प्रत्युत्तरमददद्धन्तव्य इति" इत्येवं भाषमाणेन द्वास्थेन "क्षम्यतामेष आगच्छाम्यागत्य च निखिलं निवेदयामि" इति कथयन, द्वादशवर्षेण केनापि भिक्षुवटुनाऽनुगम्यमानः, कोऽपि कापाय-वासाः,धृत-तुम्बी-पात्रः, भस्म-च्छुरित-ललाटः, रुद्राक्ष-मालिका-सनाथित-कण्ठः, भव्यमूर्त्तिः सन्यासी दृष्टः। ततस्तयोरेवमभूदालापः।

सन्यासी—कथमस्मान् सन्यासिनोऽपि कठोरभाषणैस्तिरस्करोषि ?

दौवारिकः—भगवन् ! भवान् सन्यासी तुरीयाश्रमसेवीति

क्षेप-ध्वनिम्=चरणचङ्क्रमणशब्दम्। अवतमसम्=क्षीणध्वान्तम्। "अवसमन्धेभ्यस्तमस" इति सूत्रेण समासान्तोऽच्। मुमूर्षुः=मर्तुमिच्छुः। मन्द्रस्वरैः=गम्भीरस्वरैः, मेदुरा=सान्द्रस्निग्धा। "सान्द्रस्निग्धस्तु मेदुर"इत्यमरः। द्वारि तिष्ठतीति द्वा:स्थः=द्वारपालस्तेन। "प्रतीहारो द्वारपालद्वाःस्थद्वाःस्थितदर्शका"इत्यमरः। कषायेण रक्तं काषायं=वासो यस्य सः। सनाथितः=

प्रणम्यते; परन्तु प्रभूणामाज्ञामुल्लङ्घ्य निजपरिचयमददेवाऽऽयाती-त्याक्रुश्यते ।

सन्यासी–सत्यं क्षान्तोऽयमपराधः; परमद्यावधि सन्यासिनः, ब्रह्मचारिणः, पण्डिताः, स्त्रियः, बालाश्च न किमपि प्रष्टव्याः, आत्मानमपरिचाययन्तोऽपि च प्रवेष्टव्याः ।

दौवारिकः—सन्यासिन ! सन्यासिन् ! बहूक्तम् , विरम , न वयं दौवारिका ब्रह्मणोऽप्याज्ञां प्रतीक्षामहे । किन्तु यो वैदिकधर्म-रक्षा–व्रती, यश्च सन्यासिनां ब्रह्मचारिणां तपस्विनां च सन्यासस्य ब्रह्मचर्यस्य तपसश्चान्तरायाणां हन्ता , येन च वीरप्रसविनीय-मुच्यते कोङ्कणदेश-भूमिः, तस्यैव महाराज–शिववीरस्याऽऽज्ञां वयं शिरसा वहामः ।

सन्यासी—अथ किमप्यस्तु, पन्थानं निर्दिश , आवां शिववीर-निकटे जिगमिषावः ।

सहितः, **आलापः**=अन्योन्यसम्बोधनपूर्वकभाषणम् । **तुरीयाश्रमसेवी**=चतु-र्थाश्रमवासी । "स सन्यासी च योगी च न निरग्निर्न चाक्रिय" इति भगवद्वचनेन सन्यासिपदस्य न चतुर्थाश्रमि–गैरिकधारिमात्ररूढतेति ध्वनयता पदद्वयं विशेष्य-विशेषणभावेनोपात्तमिति विज्ञाः। **सन्न्यासिना**मित्यादित्रिकस्य **सन्न्यासस्ये**-त्यादित्रिकेण यथासङ्ख्यमन्वयः । अत एव चालङ्कारता । **अन्तरायाणाम्**= विघ्नानाम् । "विघ्नोऽन्तरायः प्रत्यूहः" इत्यमरः । **हन्ता**=निवारयिता । **अल-मालप्यापि**=इदमालपनीयमपि नास्तीत्यर्थः । "अलं खल्वोः प्रतिषेधयोः प्राचां क्त्वे"ति क्त्वाप्रत्ययः । शाकुन्तले "अलं रुदित्वा, ननु भवतीभ्यामेव स्थिरीकर्त्तव्या, शकुन्तले"त्यत्र, शिशुपालवधे "आलप्यालमिदं बभ्रोर्यत्सदारान-

दौवारिकः—अलमालप्यापि तत्। प्राह्णे महाराजस्य सन्ध्योपासनसमये भवादृशानां प्रवेश-समयो भवति ; न तु रात्रौ।

सन्यासी—तत्किं कोऽपि न प्रविशति रात्रौ ?

दौवारिकः—(साक्षेपम्) कोऽपि कथं न प्रविशति ? परिचिता वा, प्राप्त-परिचय-पत्रा वा, आहूता वा, प्रविशन्ति, न तु भवादृशाः, ये तुम्वीं गृहीत्वा द्वाराद् द्वारम् ,-इति कथयन्नेव तत्तेजसेव धर्षितो मध्य एव विरराम।

सन्यासी—(स्वगतम्) राजनीति-निष्णातः शिववीरः। सर्वथा दौवारिकता-योग्य एवायं द्वारपालः स्थापितोऽस्ति। परीक्षितमप्येनमेकस्मिन् विषये पुनः परीक्षिष्ये तावत् (प्रकटम्) दौवारिक ! इत आयाहि, किमपि कर्णे कथयिष्यामि।

दौवारिकः—(तथा कृत्वा) कथ्यताम्।

सन्यासी—निरीक्षस्व त्वमधुना, दौवारिकोऽसि, प्राणानगण्यजीविकां निर्वहसि, त्वं सहस्रं वाऽयुतं वा मुद्रा राशीकृताः कदापि प्राप्स्यसीति न कथमपि संभाव्यते।

दौवारिकः—आम् , अग्रे कथ्यताम्।

सन्न्यासी—वयं च सन्न्यासिनो वनेषु गिरिकन्दरेषु च विचरामः, सर्वं रसायन-तत्त्वं विद्मः।

दौवारिकः—स्यादेवम् , अग्रे अग्रे ?

सन्न्यासी—तद् यदि त्वं मां प्रविशन्तं न प्रतिरुन्धेस्तदधुनैव

पाहरदि"त्यत्र च प्रसिद्धोऽयम्। प्राह्णे=पूर्वाह्णे। राजनीतौ निष्णातः=निपुणः। "प्रवीणे निपुणाभिज्ञविज्ञनिष्णातशिक्षिता"इत्यमरः। दौवारिकता=द्वारपाल-

परिष्कृतं पारद-भस्म तुभ्यं दद्याम् ; यथा त्वं गुञ्जा-मात्रेणापि द्वापञ्चाशत्सङ्ख्याक-तुलापरिमितं ताम्रं जाम्बूनदं विधातुं शक्नुयाः ।

दौवारिकः—हंहो ! कपटसन्न्यासिन् !! कथं विश्वासघातं स्वामिवञ्चनं च शिक्षयसि ? ते केचनान्ये भवन्ति जार-जाताः, य उत्कोच-लोभेन स्वामिनं वञ्चयित्वाऽऽत्मानमन्धतमसे पातयन्ति, न वयं शिवगणास्तादृशाः । (सन्यासिनो हस्तं धृत्वा) इतस्तु सत्यं कथय, कस्त्वं ? कुत आयातः ? केन वा प्रेषितः ?

सन्न्यासी—(स्मित्वेव) अथ त्वं मां कं मन्यसे ?

दौवारिकः—अहं तु त्वामस्यैव ससेनस्याऽऽयातस्य "अपजल-खानस्य"—

सन्यासी—(विनिवार्य मध्य एव) धिग् धिक् !

दौवारिकः—कस्याप्यन्यस्य वा गूढ़चरं मन्ये । तदादेशं पालयिष्यामि प्रभुवर्यस्य । (हस्तमाकृष्य) आगच्छ दुर्ग्गाध्यक्ष-समीपे, स एवाभिज्ञाय त्वया यथोचितं व्यवहरिष्यति ।

ततः सन्न्यासी तु—"त्यज, नाहं पुनरायास्यामि, नाहं कथयिष्यामि, महाशयोऽसि, दयस्व, दयस्व"-इति सहस्रधा समकथयत् ; तथाऽपि दौवारिकस्तु तमाकृष्य नयन्नेव प्रचलितः ।

कर्म । निरीक्षस्व=अवलोकय । प्रतिरुन्धेः=प्रतिहस्तयेः । 'रुधिर् आवरणे' इत्यस्य विधौ सिपि रूपम् । परिष्कृतम्=सुसाधितम् । तुला=पलानां शतम् । "तुला स्त्रियां पलशतमि"त्यमरः । ताम्रम् = धातुनाम । जाम्बूनदम् =सुवर्णम् । "ताम्र एवास्तमेतिचे"त्यादौ प्रसिद्धस्य लोहितार्थस्य ताम्रपदस्य ग्रहणे सुवर्णविशेषणं तदित्यपि वक्तुं शक्यम् । पत्यौ जीवति परपुरुषेण समुत्पादिता जार-

अथ यावद् द्वारस्थ-स्तम्भोपरि संस्थापितायां काच-मञ्जूषायां जाज्वल्यमानस्य प्रबल-प्रकाशस्य दीपस्य समीपे समायातस्तावत्सन्न्यासिनोक्तं-"दौवारिक ! अपि मां पूर्वमपि कदाप्यद्राक्षीः ?" ततो दौवारिकः पुनस्तं निपुणं निरीक्षमाणो मन्द्रेण स्वरेण, अरुणापाङ्गाभ्याम् लोचनाभ्याम्, गौरतरेण वर्णेन, चुम्बितयौवनेन वयसा, निर्भीकेण हारिणा च मुख-मण्डलेन पर्यचिनोत्। भुशुण्डी-समुत्तोलन-किण-कर्कश-करग्रहमपहाय, सलज्ज इव च नम्रीभूय, प्रणमन्नुवाच-"आः ! कथं श्रीमान् गौरसिंह आर्यः ? क्षम्यतामनुचितव्यवहार एतस्य ग्राम्य-वराकस्य"। तदवधार्य तस्य पृष्ठे हस्तं विन्यस्यन्, सन्न्यासिरूपो गौरसिंहः समवोचत् "दौवारिक ! मया बहुशः परीक्षितोऽसि, ज्ञातोऽसि, यथायोग्य एव पदे नियुक्तोऽसि च"-इति। त्वादृक्षा एव प्रभूणां पुरस्कारभाजनानि भवन्ति, लोकद्वयं च विजयन्ते। तव प्रामाणिकतां जानीत एवात्रभवान् प्रभुवर्य्यः, परमहमपि विशिष्य कीर्तयिष्यामि, निर्दिश तावत्, कुत्र श्रीमान् ? किं चानुतिष्ठति ?

ततः पुनर्बद्धाञ्जलेर्दौवारिकस्य किमपि कर्णे कथितमाकर्ण्य,

जाता इत्युच्यन्ते, अत्र निन्दार्थकम्। उत्कोचो हिन्द्यां "घूस" इति, "रिशवत" इति चोच्यते। काचघटिता मञ्जूषा **काचमञ्जूषा**=रक्तवर्तिका। "लालटेन" इति हिन्दी। **अपाङ्गः**=नेत्रप्रान्तभागः। "अपाङ्गौ नेत्रयोरन्ताविति"त्यमरः। **चुम्बितम्**=स्पृष्टम्, **यौवनम्**=नवं वयो येन तेन। **निर्भीकेण**=भयशून्येन। **हारिणा**=मनोहरेण। **भुशुण्ड्याः समुत्तोलनेन**=उत्थापनेन यः **किणः**=
ः, तेन **कर्कशस्य**=कठोरस्य, **करस्य ग्रहः**=ग्रहणम्। गौरसिंहः

प्रधानद्वारमुल्लङ्घ्य, नेदीयस्यामेकस्यां निम्बतरु-तल-वेदिकायां सह-चरं समुपवेश्य, तुम्बीमेकतः संस्थाप्य, स्वाङ्ग-रक्षिकावरणकाषाय-वसनं चैकतो निम्बशाखायामवलम्ब्य, पट-खण्डेन पक्ष्मणोः कपो-लयोः कर्णयोर्भ्रुवोश्चिबुके नासायां केशप्रान्तेषु च छुरितामिव विभूतिं प्रोञ्छ्य, स्कन्धयोः पृष्ठे च लम्बमानान् मेचकान् कुञ्चितान् कचानाबध्य, सहचर-पोटलिकात उष्णीषमादाय, शिरसि चाऽऽ-धाय, सुन्दरमुत्तरीयं चैकं स्कन्धयोर्निक्षिप्य, दौवारिक-निर्देशानु-सारं श्रीशिववीरालङ्कृतामट्टालिकां प्रति प्रातिष्ठत ।

शिववीरस्तु कस्याञ्चिच्चन्द्रचुम्बिन्याम्, सान्द्र-सुधासार-संलिप्त-भित्तिकायाम्, धूपधूपितायाम्, गजदन्तिकावलम्बित-विविध-च्छु-रिका-खड्ग-रिष्टिकायाम्, सुवर्ण-पिञ्जर-परिलम्बमान-शुक-पिक-

कथाभागे पूर्वं गौरबटुनाम्ना समायातोऽयमेवेति न विस्मर्तव्यम् । **अङ्गरक्षिका**=कञ्चुकस्यैव संक्षेपः । "अंगरखी" इति हिन्दी । **पक्ष्मणोः**=अक्षिलोम्नोः "पक्ष्माक्षिलोम्नी"त्यमरः । "पलक" इति हिन्दी । चिबुकं "ठोढ़ी" इति हिन्दीप्रसिद्धम् प्रोञ्छ्य=दूरीकृत्य । "पोंछ कर"इति हिन्दी । **मेचकान्**=कृष्णवर्णान् । "कृष्णे नीलासितश्यामकालश्यामलमेचका"इत्यमरः । **उष्णीषम्**=शिरस्त्राणम् "पगड़ी" इति हिन्दी ।

शिववीरोऽट्टालिकायामुपविष्ट आसीदिति सम्बन्धः । अट्टालिकां विशिनष्टि-**चन्द्रचुम्बिन्याम्**=अत्युच्छ्रायाम् । असम्बन्धे सम्बन्धवर्णनादतिशयोक्तिः ।

सान्द्रेण=घनेन, **सुधासारेण**=चूर्णद्रव्येण, **संलिप्ताः**=रूषिताः, भित्तिकाः कुड्यानि यस्यां तस्याम् । स्वल्पो गजदन्तो **गजदन्तिका**=भित्तिशङ्कुः "खूंटी"इति हिन्दी, तस्यामवलम्बिता **विविधाः**=अनेकप्रकाराः छुरिकाखड्गरिष्टिकाः यस्यां तस्याम् । छुरिकाऽसिधेनुका, खड्गोऽसिः, रिष्टिका तद्विशेषः। **सुवर्णपिञ्जरेषु परि-**

चकोर-सारिका-कलकूजित-पूजितायामट्टालिकायाम्, सन्ध्यामुपास्योपविष्ट आसीत्, परितश्च तस्यैव खर्वामप्यखर्व-पराक्रमाम्, श्यामामपि यशःसमूह-श्वेतीकृत-त्रिभुवनाम्, कुशासनाश्रयामपि सुशासनाश्रयाम्, पठन-पाठनादि-परिश्रमानभिज्ञामपि नीति-निष्णाताम्, स्थूलदर्शनामपि सूक्ष्म-दर्शनाम्, हत्याकाण्डव्यस-

---

लम्बमानानां शुकपिकचकोरसारिकाणां कलकूजितैः=मधुरभाषणैः पूजितायाम् भूषितायाम्। शुकाः=कीराः, पिकाः=कोकिलाः, चकोराः=जीवञ्जीवाः, सारिकाः=शारिकाः, "मैना" इति हिन्दी। परितश्च तस्यैव मूर्तिं दर्शं दर्शं वयस्याः कटानध्यवस्यन्निति सम्बन्धः। मूर्त्तिं विशिनष्टि खर्वाम्=ह्रस्वाम्। शिववीरः खर्वः स्थूलोऽपठितश्चाऽऽसीदितिवृत्तवेदिनो वदन्ति। अखर्वः अनल्पः पराक्रमो यस्यास्ताम्। अखर्वस्य पराक्रमो यस्यामिति विगृह्यते यः खर्वस्तस्मिन्नखर्वस्य पराक्रमः कुत आयात इति विरोध इवाऽऽभासते। परिहारोपायश्च वास्तविकविग्रहाश्रयणेन। तथा च विरोधो न वास्तव इति विरोधाभासोऽत्रालङ्कारः। कलितगौरवामपि कलितलाघवामि"त्यन्तं सर्वत्रैवमेव। सोऽपि च स्वभावोक्त्योत्प्रेक्षया चानुप्राणित इति विपुलां शोभामाश्रयति। श्यामाम्=कृष्णाम्। यशःसमूहेन=कीर्त्तिकूटेन, श्वेतीकृतं=धवलितम्, त्रिभुवनं यया ताम्। श्यामया धवलीकरणं विरोधविषयः, परिहारश्च कीर्त्तेर्व्यापिनीत्वाभिधानद्वारेण। कुशानाम्, आसनं=विष्टरम्, आश्रयः=अवस्थितिः, यस्यास्ताम्। सुशासनम्=शोभनराष्ट्रस्थितिः, आश्रयो यस्यास्ताम्। कुत्सितं शासनं कुशासनमाश्रयो यस्या इति विग्रहे या कुशासनाश्रया सा कथं सुशासनाश्रयेति विरोधः। स्थूलं दर्शनं यस्यास्ताम्। स्थूलो ह्यासीदसौ शरीरेण। सूक्ष्मं दर्शनाम्=कर्त्तव्याकर्त्तव्यविचारो यस्यास्ताम्। या स्थूलदर्शना सा कथं सूक्ष्मदर्शनेति विरोधः सामान्यतोऽर्थाश्रयणे। सूक्ष्मबुद्धित्वरूपवास्तविकार्थे परि-

निनीमपि धर्म-धौरेयीम्, कठिनामपि कोमलाम्, उग्रामपि शान्ताम्, शोभित-विग्रहामपि दृढ-सन्धि-बन्धाम्, कलित-गौरवामपि कलित-लाघवाम्, विशाल-ललाटाम्, प्रचण्ड-बाहुदण्डाम्, शोणापाङ्गाम्, कम्बुग्रीवाम्, सुनद्ध-स्नायुम्, वर्त्तुल-श्याम-श्मश्रुम्, धारिताकृतिमिव वीरताम्, विग्रहिणीमिव धीरतां, समासादित-समर-स्फूर्त्ति मूर्त्तिं दर्शं दर्शं परं प्रसादमासादयन्तश्च वयस्याः कटानध्यवसन्। तेषु चापजलस्खान-दमन-विषयक-वार्तामारिप्सुष्वेव कञ्चिद् वेत्रहस्तः प्रतीहारः प्रविश्य, वेत्रं कक्षे संस्थाप्य, शिरो नमयित्वा, अञ्जलिं बद्ध्वा न्यवीविदत्, "प्रभो! श्रीमान् गौरसिंहो दिदृक्षतेऽत्र भवन्तम्"। तदाकर्ण्य "आं प्रवेशय प्रवेशय"

हार्यश्च। हत्याकाण्डस्य=विधर्मिविशसनस्य व्यसनमस्ति यस्यां तादृशीमपि। धर्मधौरेयीम्=धर्मभारधारिणीम्। या हत्याव्यसनवती सा कथं धर्मं पालयेदिति विरोधः, विधर्मिवधेन सनातनधर्मपालकश्चेति विरोधपरिहारः। उग्रशान्तयोर्विरोधः स्पष्ट एव, उग्रत्वं दुर्धषत्वाच्छान्तत्वञ्च दयाविभूषितत्वादिति परिहारः। कठिनामित्यस्य कठोरामित्यर्थाश्रयणे विरोधः। सङ्ग्रामादिभारसहामिति तदर्थे च परिहारः। शोभितः=सुन्दरः, विग्रहः=सङ्ग्रामो यस्यास्ताम्, दृढः=स्थिरः सन्धिबन्धः=सन्धिप्रस्तावो यस्यास्तामिति विरोधः, परिहारस्तु विग्रहशब्दस्य शरीररूपार्थाश्रयणेन। कलितगौरवलाघवयोर्विरोधः स्फुट एव, गौरवमित्यस्य गाम्भीर्यमित्यर्थाश्रयणे लाघवशब्दस्य चातुर्यार्थकत्वे च परिहारः। सुनद्धाः=शोभनतया स्थिताः स्नायवो यस्यास्ताम्। वर्तुला श्यामा च श्मश्रुर्यस्यास्ताम्। उत्प्रेक्षते-धारिता=गृहीता, आकृतिर्यया ताम्। समासादिता=लब्धा समरे स्फूर्तिर्यया ताम्। दर्शंदर्शम्=दृष्ट्वा दृष्ट्वा। कटान्=तृणनिर्मितोपवेशनानि। आरिप्सुषु=प्रारब्धं कुर्वत्सु। न्यवीविदत्=निवेदितवान्। दिदृक्षते=द्रष्टुमिच्छति।

इति सानन्दं सोत्साहं च कथितवति महाराष्ट्र-मण्डलाऽऽखण्डले, प्रतीहारो निवृत्य, सपद्येव तं प्राविविशत्।

तमवलोक्यैव "इत इतो गौरसिंह! उपविश, उपविश, चिराय दृष्टोऽसि, अपि कुशलं कलयसि? अपि कुशलिनस्तव सहवासिनः? अप्यङ्गीकृत-महाव्रतं निर्वहथ यूयम्? अपि कश्चिन्नूतनो वृत्तान्तः?" इति कुसुमानीव वर्षता, पीयूष-प्रवाहेणेव सिञ्चता, मृदुना वचन-जातेन तत्रभवता शिववीरेणाऽऽद्रियमाणः, आपृच्छ्यमानश्च, त्रिः प्रणम्य, अन्तरङ्ग-मण्डली-जुष्ट-कटे समुपविश्य, करौ सम्पुटीकृत्य, "भगवन! अखिलं कुशलं प्रभूणामनुग्रहेणास्माकमखिलानाम्, अङ्गीकृत-महाव्रते च मा स्म पदं धात कश्चनान्तराय इत्येव सदा प्रार्थ्यते भगवान् भूतनाथः। नूतनः प्रत्नश्च को नामाद्यतनसमये वक्तव्यः श्रोतव्यश्च वृत्तान्तः, ऋते दुराचारात् स्वच्छन्दानामुच्छृङ्खलानामुच्छिन्नसच्छीलानां म्लेच्छ-हतकानाम्" इति कथयामास। ततश्च तेषामेवमभूदालापः।

"ज्ञाश्रुस्मृदृशां सन" इत्यात्मनेपदम्। त्रिः=वारत्रयम्। क्रियाविशेषणम् सुबन्तम्। जुष्टम्=सेवितम्। अध्युषितमिति यावत्, प्रत्नः=पुरातनः 'पुराणे प्रत्नप्रतनपुरातन-चिरन्तना" इत्यमरः। अद्यतनसमये=सम्प्रति। "आजकल" इति हिन्दी। अद्यतनसमयः परिभाषितो यस्मिन्नर्थेऽतीतरात्र्यर्धाव्यागामिरात्र्यर्धचरमावयवकरूपे न, तदभिप्रायेण प्रयोग इति वेदितव्यम्। स्वच्छन्दामित्यत्रेत्यन्तेऽनुप्रासः। महाव्रतम्=सनातनधर्मरक्षा। उञ्छः=आपणादौ पतितकणानामेकैकशो ग्रहणम्। शिलम्=क्षेत्रादौ स्वामित्यक्तग्रहणम्। "उञ्छः कणश आदानं कणिशाद्यर्जनं शिलमि"त्यमरः

शिववीरः—अथ कथ्यतां को वृत्तान्तः ? का च व्यवस्थाऽस्मन्महाव्रताश्रम-परम्परायाः ?

गौरसिंहः—भगवन् ! सर्वं सुसिद्धम् , प्रतिगव्यूत्यन्तराल-मङ्कोकृत-सनातनधर्म-रक्षा-महाव्रतानां धारित-मुनिवेषाणां वीरवराणामाश्रमाः सन्ति, प्रत्याश्रमं च बलीकेषु गोपयित्वा स्थापिताः परःशताः खड्गाः, पटलेषु तिरोभाविताः शक्तयः, कुशपुञ्जान्तःस्थापिता भुशुण्डयश्च समुल्लसन्ति । उच्छस्य, शिलस्य, समिदाहरणस्य, इङ्गुदी-पर्य्यन्वेषणस्य, भूर्जपत्र-परिमार्गणस्य, कुसुमावचयनस्य, तीर्थाटनस्य, सत्सङ्गस्य च व्याजेन, केचन जटिलाः, परे मुण्डिनः, इतरे कापायिणः, अन्ये मौनिनः, अपरे ब्रह्मचारिणश्च, बहवः पटवो बटवश्चराः सञ्चरन्ति । विजयपुरादुड्डीयात्राऽऽगच्छन्त्या मक्षिकाया अप्यन्तःस्थितं वयं विद्मः, किं नामैषां यवनहतकानाम् ?

शिववीरः—साधु, साधु, कथं न स्यादेवम् ? भारतवर्षीया यूयम् , तत्रापि महोच्चकुलजाताः, अस्ति चेदं भारतं वर्षम् , भवति च स्वाभाविक एवानुरागः सर्वस्यापि स्वदेशे, पवित्रतमश्च यौष्माकीणः सनातनो धर्मः, तमेते जाल्माः समूलमुच्छिन्दन्ति, महान्तो हि धर्मस्य कृते लुण्ठ्यन्ते, पात्यन्ते, हन्यन्ते, न च धर्मं त्यजन्ति, किन्तु धर्मस्य रक्षायै सर्वसुखान्यपि त्यक्त्वा, निशीथेष्वपि, वर्षास्वपि, ग्रीष्म-घर्म्मेष्वपि, महारण्येष्वपि, कन्दरिकन्दरेष्वपि, व्याल-

जाल्मः=अविवेकी, "जाल्मोऽसमीक्ष्यकारी स्यादि"त्यमरः । "जालिम" इति हिन्दी । वारणवारेषु=हस्तिसमूहेषु । "समूहे निवहव्यूहसंदोहविसरव्रजाः ।

वृन्देष्वपि, सिंह-सङ्घेष्वपि, वारण-वारेष्वपि, चन्द्रहास-चमत्कारेष्वपि च निर्भया विचरन्ति। तद् धन्याः स्थ यूयं वस्तुत आर्यवंशीयाः, वस्तुतश्च भारतवर्षीयाः।

अथ कथ्यतां कोऽपि विशेषोऽवगतो वा "अपजलखानस्य" विषये ?

गौरसिंहः—"अवगतः, तत्पत्रमेव दर्शयामि"-इति व्याहृत्य, उष्णीष-सन्धौ स्थापितं कन्यापहारक-यवन-युवक-मृतशरीर-वस्त्रान्तःप्राप्तं पत्रं बहिश्चकार।

सर्वे च विजयपुराधीशमुद्रामवलोक्य, "किमेतत्? कुत एतत्? कथमेतत्? कस्मादेतत्? इति जिज्ञासमानाः सोत्कण्ठा वितस्थिरे। गौरसिंहस्तु शिववीरस्यापि तत्प्राप्तिचरित-शुश्रूषामवगत्य, संक्षिप्य, सर्वं वृत्तान्तमवोचत्। ततस्तु दर्श्यताम्, प्रसार्यताम्, पठ्यताम्, कथ्यताम्, किमिदमिति पृच्छति शिववीरे, गौरसिंहो व्याजहार।

"भगवन्! सर्पाकारैरक्षरैः पारस्य-भाषायां लिखितं पत्रमेतदस्ति। एतस्य सारांशोऽयमस्ति। विजयपुराधीशः स्वप्रेषितमपजलखानं सेनापतिं सम्बोध्य, लिखति यत् "वीरवर! महाराष्ट्र-राजेन सह योद्धुं प्रस्थितोऽसीति मा स्म भूत्कश्चनान्तरायस्तव विजये। शिवं

स्तोमौघ-निकर-व्रात-वार-संघात-सञ्चया"इत्यमरः। **कन्यापहारकस्य**= बालिकाचोरस्य, **यवनयुवकस्य मृतस्य**=शवताङ्गतस्य, **शरीरस्य वस्त्रान्तः**= वसनान्तराले, **प्राप्तम्** =लब्धम्।

वितस्थिरे=स्थिताः। "समवप्रविभ्यः स्थ"इत्यात्मनेपदम्। **शुश्रूषाम्** = श्रोतुमिच्छाम्।

युद्धे जेष्यसि चेत् पद्भ्यां सिंहं जितवानसीति मंस्ये, किन्तु सिंह-हननापेक्षया जीवतः सिंहस्य वशीकार एवाधिकं प्रशस्यः । तद् यदि छलेन जीवन्तं शिवमानयेस्तद् वीरपुङ्गवोपाधि-दान-सहकारेण तव महतीं पद-वृद्धिं कुर्य्याम् । गोपीनाथपण्डितोऽपि मया तव निकटे प्रस्थापितोऽस्ति, स मम तात्पर्यं विशदीकृत्य, तव निकटे कथयिष्यति । प्रयोजनवशेन शिवमपि साक्षात्करिष्यति" इति ।

इत्याकर्णयत एव शिववीरस्यारुण-कौशेय-जाल-निबद्धौ मीनाविव नयने संजाते, मुखं च बालभास्कर-बिम्ब-विडम्बनामालालम्बे, अधरश्च धीरता-धुरमधरीकृतवान् ।

अथ स दक्षिण-कर-पल्लवेन श्मश्रु परामृशन्नाकाशे दृष्टिं बद्ध्वा "अरे रे विजयपुर-कलङ्क ! स्वयमेव जीवन "शिवः" तव राजधानीमाक्रम्य, वीरपुंगवोपाधिसहकारेण तव महतीं पदवृद्धिमङ्गीकरिष्यति, तत्किं प्रेषयसि मृत्योः क्रीडनकानेतान् कदर्य्य-हतकान् ?" । इति साम्रेडमवोचत् । अपृच्छच्च, "ज्ञायते वा कश्चिद् वृत्तान्तो गोपीनाथपण्डितस्य ?"

यावद् गौरसिंहः किमपि विवक्षति तावत्प्रतीहारः प्रविश्य, "विजयतां महाराजः"इति त्रिर्व्याहृत्य, करौ संपुटीकृत्य, शिरो नम-

---

शिवं युद्धे जेष्यसि चेत् पद्भ्यां सिंहं जितवानसीति निदर्शनम् । अरुणम् = लोहितम्, यत्, कौशेयस्य=पट्टवस्त्रस्य। जालम्=आनायः, तेन निबद्धौ=समाच्छादितौ। मीनाविवेत्युत्प्रेक्षानुप्राणितं पर्यायोक्तम्। क्रोधान्नयने लोहिते अभूतामिति वाच्योऽर्थः । बालभास्करस्य=नवोदितसूर्यस्य, यद्विम्बं, नितान्तलोहितं, तद्विडम्बनाम्=तदनुकृतिम् । आललम्बे=धृतवत् । धीरताधुरम्=धैर्यभारम्। अधरीचकार=निम्नीकृतवान्। अनुप्रासः । चूर्णकं गद्यम् वैदर्भी रीतिः प्रसादश्च

यित्वा, कथितवान्–"भगवन्! दुर्गद्वारि कश्चन गोपीनाथनामा पण्डितः श्रीमन्तं दिदृक्षुरुपतिष्ठते। नायं समयः प्रभूणां दर्शनस्य, पुनरागम्यताम्" इति बहुशः कथ्यमानोऽपि "किंचनात्यावश्यककार्यम्" इति प्रतिजानाति। तदत्र प्रभुचरणा एव प्रमाणम्" इति।

तदवगत्य "सोऽयं गोपीनाथः, सोऽयं गोपीनाथः" इति साम्रेडं सतर्कं सोत्साहं च व्याहृतवत्सु निखिलेषु, शिववीरेण निजबाल्यप्रियो माल्यश्रीकनामा संबोध्य, कथितो यद् "गम्यतां दुर्गान्तर एव महावीर–मन्दिरे तस्मै वासस्थानं दीयताम्, भोज्यपर्यङ्कादि–सुखद–सामग्रीजातेन च सत्क्रियताम्, ततोऽहमपि साक्षात्करिष्यामि" इति।

ततो बाढमित्युक्त्वा प्रयाते माल्यश्रीके, "महाराज! आज्ञा चेदहमद्यैव "अपजलखानं" कथमपि साक्षात्कृत्य, तस्याखिलं व्यवसितं विज्ञाय, प्रभुचरणेषु विनिवेदयामि। नाधुना मम क्षान्तिः, शान्तिश्च, यतः संन्यासिवेषोऽहं समागच्छन् द्वयोर्यवनभटयोर्वार्तयाऽवागच्छम्, यच्छ्व एवैते युयुत्सन्ते" इति गौरसिंहो मन्दं कर्णान्तिकं व्याहार्षीत्।

ततो "वीर! कुशलोऽसि, सर्वं करिष्यसि, जाने तव चातुरीम्, तद् यथेच्छं गच्छ, नाहं व्याहन्मि तवोत्साहम्, नीतिमार्गान वेत्सि, किन्तु परिपन्थिन एतेऽत्यन्तनिर्दयाः, अतिकदर्य्याः, अतिकूटनीतयश्च सन्ति। एतैः सह परम–सावधानतया व्यवहरणी-

गुण इति तत्र तत्र न विस्मरणीयम्। व्यवसितम्=कृतं कृत्यम्। क्षान्तिः=क्षमा। व्याहन्मि=नाशयामि। परिपन्थिनः=शत्रवः। अत्यन्तं निर्दयाः=दयाशून्याः। अतिकदर्याः=परमनीचाः। कूटनीतयः=कपटाचारचतुराः।

यम्"–इति कथयित्वा शिववीरस्तं विससर्ज।

गौरसिंहस्तु त्रिः प्रणम्य, उत्थाय, निवृत्य, निर्गत्य, अवतीर्य, सपदि तस्या एव निम्ब–तरु–तल–वेदिकायाः समीप आगत्य, स्वसहचरं कुमारमिङ्गितेनाऽऽहूय कस्मिंश्चित् स्वसंकेतित–भवने प्रविश्य, आत्मनः कुमारस्यापि च केशान् प्रसाधनिकया प्रसाध्य, मुखमार्द्रपटेन प्रोञ्छ्य, ललाटे सिन्दूर–बिन्दु–तिलकं विरचय्य, उष्णीषमपहाय, शिरसि सूचिस्यूतां सौवर्ण–कुसुमलतादि–चित्र–विचित्रितामुष्णीषिकां संधार्य, शरीरे हरितकौशेय–कञ्चुकिकामायोज्य, पादयोः शोण–पट्ट–निर्मितमधोवसनमाकलय्य, दिल्लीनिर्मिते महार्हे उपानहौ धारयित्वा, लघीयसीं तानपूरिकामेकां सह नेतुं सहचर-हस्ते समर्प्य, गुप्तच्छुरिकां दन्तावल–दन्त–मुष्टिकां यष्टिकां मुष्टौ गृहीत्वा

"माया निश्चलयन्त्रेषु कैतवानृतराशिषु। अर्योघने शैलशृङ्गे सीराङ्गे कूटमस्त्रियामि"त्यमरः। इङ्गितेन=सङ्केतेन। प्रसाधनिकया=कङ्कतिकया। "प्रसाधनी कङ्कतिके"त्यमरः। "कंघी"इति हिन्दी। सौवर्णेन=सुवर्णविरचितेन, कुसुमलतादीनां चित्रेण विचित्रिताम्=संवलिताम्। लघूष्णीषमुष्णीषिका। "टोपी"इति हिन्दी। शोणपट्टनिर्मितम्=रक्तकौशेयरचितम्। अधोवसनम्=अधोमार्गेण चरणेन धारणीयं वसनम्। "पायजामा"इति हिन्दी। दिल्लीशब्दो "दिल्लीवल्लभपाणिपल्लवतले नीतं नवीनं वय"इत्यादौ पण्डितराजेनापि व्यवहृतः। तानपूर एव तानपूरिका। "तानपूरा"इति हिन्दी। सहेत्यस्य "आत्मने"ति शेषः। तानपूरिकाशब्दस्य तु न सहशब्देन विशेष्यविशेषणभाव एवेति न तत्र तृतीयाऽऽशङ्का। दन्तावलस्य=करिणः, दन्तः=दन्तनिर्मितः, मुष्टिका यस्यां ताम्। "हाथी दाँत की मूठवाली गुप्ती छड़ी"इति हिन्दी।

पटवासैर्दिगन्तं दन्तुरयन्, करस्थपटखण्डेन च मुहुर्मुहुराननं प्रोञ्छन् गायकवेषेण "अपजलखान"-शिबिराभिमुखं प्रतस्थे।

अथ तौ त्वरितं गच्छन्तौ, सपद्येव परःशत-श्वेतपट-कुटीरैः शारद-मेघ-मण्डलायितम्, दीपमाला-विहित-बहुल-चाकचक्यम्, "अपजलखान-" शिबिरं दूरत एव पश्यन्तौ, यावत्समीपमागच्छतस्तावत् कश्चन कोकनदच्छवि-वस्त्रखण्ड-वेष्टितमूर्द्धा, कटिपर्यन्त-सुनद्धकाक-श्यामाङ्गरक्षिकः, कर्बुराधोवसनः, शोण-श्मश्रुः, विजयपुराधीश-नामाङ्कित-वर्त्तुल-पित्तल-पट्टिका-परिकलित-वाम-वक्षःस्थलः, स्कन्धे भुशुण्डीं निधाय, इतस्ततो गतागतं कुर्वन् सावष्टम्भमुर्दूभाषयोवाच, "कोऽयमिति ?" ततो गौरसिंहेनापि "गायकोऽहं श्रीमन्तं दिदृक्षे" इति समार्दवं व्याख्यायि। ततो "गम्यता-

पटवासैः=सुगन्धितद्रव्यैः। "इत्र"इति हिन्दी। **दन्तुरयन्**=उन्नतयन्। सुगन्धयन्निति तात्पर्यम्। **करस्थपटखण्डेन**="दस्ती रुमाल"इति लौकिके वाच्ये प्रसिद्धिमभिवाञ्छति शब्दस्यास्य। **शारदमेघमण्डलायितम्**=शरत्समयमेघमण्डलमिवाचरितम्। **कोकनदच्छविना**=रक्तकमलकान्तिना, **वस्त्रखण्डेन** वेष्टितो मूर्धा यस्य सः। कटिपर्यन्ता सुनद्धा **काकश्यामा**=अतिश्यामला, अङ्गरक्षिका यस्य सः। **कर्बुरम्**=अनेकवर्णम्। **शोणश्मश्रुः**=रक्तमुखकेशः। **विजयपुराधीशनाम्नाऽङ्कितया**=तदभिधेयचिह्नितया, **वर्तुलया पित्तलपट्टिकया**=लोके "चपरास"इति ख्यातया, **परिकलितम्**=भूषितम्, **वामं वक्षःस्थलं** यस्य सः। **सावष्टम्भम्**=सप्रतिरोधम्। **समार्दवम्**=सकोमलतम्। **व्याख्यायि**=कथितम्। "घृतेन स्नातु भवद्दसने"ति "आपके मुँह में घी चीनी" इत्यर्थकलोकप्रवादानुकरणम्। अत एव लोकोक्तिरलङ्कारः।

मन्येऽपि गायका वादकाश्च सम्प्रत्येव गताः सन्ति" इति कथयति प्रहरिणि, "घृतेन स्नातु भवद्रसना" इति व्याहरन् शिबिर-मण्डलं प्रविवेश ।

तत्र च क्वचिन् खट्वासु पर्यङ्केषु चोपविष्टान्, सगड्गडाशब्दं ताम्रक-धूममाकृष्य, मुखात् कालसर्पानिव श्यामल-निश्वासानुद्विरतः, स्वहृदय-कालिमानमिव प्रकटयतः, स्वपूर्वपुरुषोपार्जित-पुण्यलोकानिव फूत्कारैरग्निसात् कुर्वतः, मरणोत्तरमप्यतिदुर्लभं मुखाग्निसंयोगं जीवन-दशायामेवाऽऽकलयतः, प्राप्ताधिकारकलिताखर्व-गर्वान्, "क्वचिद्-हरिद्रा, हरिद्रा, लशुनं लशुनम्, मरिचम् मरिचम्, चुक्रं चुक्रम्, वितुन्नकं वितुन्नकम्, शृङ्गवेरं शृङ्गवेरम्, रामठं

तत्र चेत्यारभ्य प्रधानपटकुटीद्वारमाससादेत्येकान्वयि । ताम्रकम्="तमाखू" इति हिन्दी । ताम्रकधूमनिश्वासस्य स्वत एव श्यामलस्य मुखादुद्गमितस्य कालसर्पत्वेनोत्प्रेक्षा । यथैन्द्रजालिका जनान्मोहयितुमाननात् कृष्णा सर्पानुद्गमन्ति तथैवैते शिववीरमोहनाय स्थिता इत्युपमालङ्कारस्य व्यङ्ग्यत्वेन वस्त्वलङ्कारध्वनिः । अन्यथोत्प्रेक्षते-**स्वहृदयस्य कालिमानमिव** । पुनरप्युत्प्रेक्षते-**स्वपूर्वपुरुषैः**=अन्वयमूलभूतैः, **उपार्जितान्**=संचितान्, **पुण्यलोकान्**=स्वर्गादिकान् **अग्निसात्**=वह्नयधीनीभूतान् । यवनशवानामग्निसंस्काराभावस्य प्रसिद्धस्योत्प्रेक्षणम्-**मरणादुत्तरम्**=देहत्यागानन्तरम् । **प्राप्तेन**=लब्धेन, **अधिकारेण**=स्वाम्येन, **अखर्वः**=बहुलीभूतः, **गर्वः**=अभिमानो येषां तान् । **हरिद्रा**=महारजनम्, "निशाह्वा काञ्चनी पीता हरिद्रा वरवर्णिनी"त्यमरः । संभ्रमे द्विरुक्तिः । **चुक्रम्**=वृक्षाम्लम् । "तिन्तिडीकञ्च चुक्रञ्च वृक्षाम्लमि"त्यमरः । "चूक"इति हिन्दी । **वितुन्नकम्**=छत्रा । "अथ छत्रा वितुन्नकमि"त्यमरः । "सौंफ"इति हिन्दी । **शृङ्ग-**

रामठम्, मत्स्यण्डी मत्स्यण्डी, मत्स्या मत्स्याः, कुक्कुटाण्डं कुक्कुटाण्डम्, पललं पललम्" इति कल-कलैर्बालानां निद्रां विद्रावयतः, समीप-संस्थापित-कुतू-कुतुप-कर्करी-कण्डोल-कट-कटाह-कम्बि-कडम्बान्, उग्र-गन्धानि मांसानि शूलाकुर्वतः, नखम्पचा यवागूः स्थालिकासु प्रसारयतः, हिङ्गुगन्धीनि तेमनानि तिन्तिडीरसैर्मिश्रयतः, परिपिष्टेषु कलम्बेषु जम्बीर-नीरं निश्च्योतयतः, मध्ये मध्ये समागच्छतस्ताम्रचूडान् व्यजन-ताडनैः पराकुर्वतः, त्रपु-

वेरम्=आर्द्रकम्। "आर्द्रकं शृङ्गवेरं स्यादि"त्यमरः। "आदी"इति हिन्दी। रामठम्=हिङ्गु। मत्स्यण्डी=फाणितम्। "राब"इति हिन्दी। कुक्कुट्या अण्डं कुक्कुटाण्डम्। "कुक्कुट्यादीनामण्डादिष्वि"ति पुंवत्त्वम्। पललम्=मांसम्। विद्रावयतः=दूरयतः। कुतूः=चर्मनिर्मितं तैलाद्याधारपात्रम्। कुतुपः=सैव लघुः। "कुतूः कुत्तेः स्नेहपात्रं ह्रस्वा सा कुतुपः पुमानि"त्यमरः। कर्करी=हस्तप्रक्षालनादियोग्यं पात्रम्। "कर्कर्यालुर्गलन्तिके"त्यमरः। "झारी"इति हिन्दी। यवनानां "बंधना"इति। कण्डोलः=पिटः। वेणुदलादिरचितो भाण्डविशेषः। "बांसकी पिटारी"इति हिन्दी। कटः=किलिञ्जकः। कटाहः=शष्कुल्यादिपाकपात्रम्। कम्बिः=दर्विः। "कलछी" इति हिन्दी। कडम्बः=कलम्बः। शूलेन=लोहशलाकया संस्कुर्वतः शूलाकुर्वतः। नखम्पचन्ति यास्ता नखम्पचाः। यवागूः=तरलाः। "यावगूरुष्णिका धाना विलेपी तरला च से"त्यमरः। हिङ्गुना गन्धो येषु तानि हिङ्गुगन्धीनि। "अल्पाख्यायामि"ति गन्धस्येकारः। "गन्धो गन्धक आमोदे लेशे सम्बन्धगर्वयोरि"त्यमरः। तेमनानि=व्यञ्जनानि। अत्र विशेष्यविशेषणोभयपदेन "कढी"इति ख्यातस्य ग्रहणम्। तिन्तिडीरसैः=चुकरसैः। मिश्रयतः=संयोजयतः। निश्च्योतयतः=क्षारयतः। ताम्रचूडान्=

लिप्रेषु ताम्र-भाजनेष्वारनालं परिवेषयतः सूदान्, क्वचिद्वक्र-प्रसाधित-काकपक्षान्, मद-व्याघूर्णित-शोणनयनान्, सपारस्परिक-कण्ठग्रहं पर्य्यटतः, यौवन-चुम्बित-शरीरान्, स्वसौन्दर्य-गर्व-भारेणेव मन्दगतीन्, अनवरताऽऽक्षिप्त-कुसुमेषुबाणैरिव कुसुमैर्भूषितान्, वसनातिरोहिताङ्गच्छटान्, विविधपटवास-वासितानपि चिरास्नान-महामलिन-महोत्कट-स्वेद-पूतिगन्धप्रकटीकृताम्पृश्यतान् यवन-युवकान्,—

कुक्कुटान्। त्रपुलिप्रेषु="कलई किए हुवे"इति हिन्दी। आरनालम्=काञ्जिकम्। "आरनालकसौवीरकुल्माषाभिषुतानि च। अवन्तिसोमधान्याम्लकुक्कुलानि च काञ्जिक"इत्यमरः। सूदान्=पाचकान्। वक्रम् यथा तथा, प्रसाधिताः=स्फालिताः, काकपक्षाः, "काकुल"इति हिन्दी, यैस्तान्। मदेन व्याघूर्णितानि शोणानि नयनानि येषां तान्। पारस्परिकेन=आन्योन्येन, कण्ठग्रहेण=गलधारणेन सहितं यथा स्यात्तथेति क्रियाविशेषणम्। यौवनेन=नववयसा, चुम्बितानि=सम्बद्धानि शरीराणि येषां तान्। चुम्बितपदं लक्षणया सम्बद्धबोधकम्। वक्त्रसंयुक्तरूपस्य मुख्यार्थस्य बाधात्। स्वभावतो मन्दाया गतेर्निमित्तमुत्प्रेक्षते-स्वसौन्दर्यस्य गर्वभारेणेवेति। कुसुमभूषितेषु तेषु कुसुमानि कुसुमेषुधनुर्निपतितानीत्युत्प्रेक्षते-अनवरतम्=सततम्, आक्षिप्ताः=पतिताः, कुसुमेषुबाणा येषु तान्। वसनैः=वस्त्रैः, अतिरोहिता अङ्गच्छटा येषां तान्। विविधैः पटवासैर्वासितानपि। चिरास्नानेन=अत्यधिककालतो देहशुद्ध्यकरणेन, महामलिनस्य=अत्यन्तं मलीमसस्य, महोत्कटस्य=अत्युग्रस्य, स्वेदस्य=देहवारिणः, पूतिगन्धेन=दौर्गन्ध्येन, प्रकटीकृता=व्यक्तीकृता, अस्पृश्यता=स्पर्शायोग्यता, यैस्तान्। क्वचिदिति व्याहरत इति सम्बन्धः। व्याहरणं कथयति-

क्वचिद् "अहो ! दुर्गमता महाराष्ट्रदेशस्य, अहो ! दुराधर्षता महाराष्ट्राणाम्, अहो ! वीरता शिववीरस्य, अहो ! निर्भयतैतत्सेनानीनाम्, अहो ! त्वरितगतिरेतद्धोटकानाम्, आः ! किं कथयामो दृष्ट्वैव चमत्कारं शिववीर-चन्द्रहासस्य ? न वयं पारयामो धैर्यं धर्त्तुम्, न च शक्नुमो युद्ध-स्थाने स्थातुम्, को नाम द्विशिरा यः शिवेन योद्धुं गच्छेत् ?, कश्च नाम द्विपृष्ठो यस्तद्भटैरपि छलालापं विदध्यात् ?, वयं बलिनः, आस्माकीना महती सेना, तथाऽपि न जानीमः, किमिति कम्पत इव क्षुभ्यतीव च हृदयम् ? यवनानां पराजयो भविष्यति, अपजलखानो विनङ्क्ष्यतीति न विद्मः को जपतीव कर्णे ?, लिखतीव सम्मुखे, क्षिपतीव चान्तःकरणे, मा स्म भोः ! मैवं स्यात्, रक्ष भो रक्ष, जगदीश्वर ! अथवा सम्बोभवीतितमामेवमपि योऽयमपजलखानः सेनापति-पद-विडम्बनोऽपि शिवेन योत्स्ये, हनिष्यामि, ग्रहीष्यामि, वेति सप्रौढि विजयपुराधीशमहासभायां प्रतिज्ञाय समायातोऽपि, शिवप्रतापं च विदन्नपि, अद्य नृत्यम्, अद्य गानम्, अद्य लास्यम्, अद्य मद्यम्, अद्य वाराङ्गना, अद्य भ्रूकुंसकः, अद्य वीणावादनमिति स्वच्छन्दैरुच्छृङ्खलाऽऽचरणैर्दिनानि गमयति। न च यः कदापि विचारयति, यत् कदाचित् परिपन्थिभिः प्रेषिता काचन वार-वधूरेव मामासवेन सह विषं पाययेत्, कोऽपि नट एव ताम्बूलेन सह गरलं ग्रासयेत्,

---

अहो इति। पुनः पुनः सम्भवति सम्बोभवीति, अतिशयेन सम्बोभवीति सम्बोभवीतितमाम्। "वर्त्तमानसामीप्ये वर्त्तमानवद्वे"ति लट्। भ्रूकुंसकः= स्त्रीवेषधारी नर्त्तकः। भ्रुवोः कुंसो भाषणम्, भ्रुवा कुंसः शोभा वा यस्य सः।

कोऽपि गायक एव वा वीणया सह खड्गमानीय खण्डयेदित्यादि; ध्रुव एव तस्य विनाशः, ध्रुवमेव पतनम्, ध्रुवमेव च पशुमारैर्मरणम्। तन्न वयं तेन सह जीवन-रत्नं हारयिष्यामः"

—इति व्याहरतः, इतरांश्च—

"मैवं भोः ! श्व एवाऽऽहव-क्रीडाऽस्माकं भविष्यति, तच्छ्रूयते सन्धि-वार्त्ता-व्याजेन शिव एकत आकारयिष्यते, यावच्च स स्वसेनामपहायैकाक्यस्मत्स्वामिना सहाऽऽलपितुमेकान्तस्थाने यास्यति; तावद्वयं श्येना इव शकुनिमण्डले, महाराष्ट्र-सेनायाम्, छिन्धि भिन्धि-इति कृत्वा युगपदेव पतिष्यामः, वसन्त-वाताहत-नीरसच्छदानिव च क्षणेन विद्रावयिष्यामः। इतस्तु छलेनास्मत्स्वामिसहचराः शिवं पाशैर्बद्ध्वा पिञ्जरे स्थापयित्वा तं जीवन्तमेव वशंवदं करिष्यन्ति। परन्तु गोप्यतमोऽयं विषयो मा स्म भूत् कस्यापि कर्णगतः"—

इति कर्णान्तिकं मुखमानीयोत्तरयतः साङ्ग्रामिकभटानवलोकयन्, "धन्या भवन्तो येषां गोप्यतमा अपि विषया एवं वीथिषु विकीर्यन्ते, महाराष्ट्रा धूर्ताचार्याः, नैतेषु भवतां धूर्तता सफला भवति" इत्यात्मन्येवाऽऽत्मना कथयन्, स्व-प्रभा-धर्षित-सकल-रक्षकगणः, स्वसौन्दर्येणाऽऽकर्षयन्निव विश्वेषां मनांसि, सपद्येव प्रधान-पटकुटीर-द्वारमाससाद। तत्र च प्रहरिणमालोकयदुक्तवांश्च

आसवेन=मद्येन। **जीवनरत्नम्**=श्रेष्ठं जीवनम्। रत्नशब्दः श्रेष्ठवाची। इतरांश्च कर्णान्तिकं मुखमानीयेत्युत्तरयत इति सम्बन्धः। उत्तरं प्रदर्शयति मैवमिति। **आहवः**=सङ्ग्रामः, स एव क्रीडा। वसन्तवातेन, आहतान्, अत एव **नीरसान्**=रसरहितान्, छदानिवेत्युत्प्रेक्षा। वशं वदतीति वशम्वदस्तम्। "प्रियवशे वदः

यन् "पुण्यनगर"-निवासी गायकोऽहमत्रभवन्तं गान-रस-रसायनैरमन्दमानन्दयितुमिच्छामीति। तदवगत्य स भ्रूसंचारेण कञ्चिद् निवेदकं सूचितवान्, स चान्तः प्रविश्य, क्षणानन्तरं पुनर्बहिर्निर्गत्य, गायकमप्रच्छत्-"किं नाम भवतः? पूर्वं च कदापि समायातो न वा?" अथ स आह "तानरङ्गनामाऽहं कदाचन युष्मत्कर्णमस्पृशम्। न पूर्वं कदापि ममात्रोपस्थातुं संयोगोऽभूत्, अद्य भाग्यान्यनुकूलानि चेच्छ्रीमन्तमवलोकयिष्यामि" इति। स च "आम्" इत्युदीर्य, पुनः प्रविश्य, क्षणानन्तरं निर्गत्य च, विचित्र-गायकमसुं सह निनाय।

तानरङ्गस्तु तेनैव तानपूरिका-हस्तेन बालकेनानुगम्यमानः, शनैः शनैः प्रविश्य, प्रथमं द्वितीयं तृतीयं च द्वारमतिक्रम्य, कांश्चिन् मृदङ्ग-स्वरान् सन्दधतः, कांश्चिद्वीणावरणमुन्मुच्य, प्रवालं प्रोञ्छय, कोणं कलयतः, कांश्चिदविचलोऽयमेतेनैव सह योज्यन्तामपरवाद्यानीति वंशीरवं साक्षीकुर्वतः, कांश्चित् कलित-नेपथ्यान्, पादयोर्नूपुरं बध्नतः, कांश्चिन् स्कन्धावलम्बिगुटिकातः करतालिकामुत्तोलयतः, कांश्चिच्च कर्णे दक्षकरं निधाय, चक्षुषी सम्मील्य, नासामाकुञ्च्य, पातितोभयजानूपविश्य, वामहस्तं प्रसार्य, तन्त्रीस्वरेण स्व-काकलीं मेलयतः, सम्मुखे च पृष्ठतः पार्श्वतश्चोपविष्टैः, कैश्चित् ताम्बूलवाहकैरपरैर्निष्ठ्यूतादान-भाजन-हस्तैः, अन्यैरनवरत-चालित-चा-

---

खजि"ति खच्। **अपकर्षयन्**=अधरयन्। वीणाया आवरणम्=आच्छादनवस्त्रम्। प्रवालम्=वीणादण्डम्। "वीणादण्डः प्रवालः स्यादि"त्यमरः। कोणम्=वादनोपयोगिनमुपकरणविशेषम्। "मिजराफ" इति हिन्दी। काकलीम्=सूक्ष्मं कलम्। "काकली तु कले सूक्ष्म"इत्यमरः। निष्ठ्यूतादानम्=

मरैः, इतरैर्बद्धाञ्जलिभिर्लालाटिकैः परिवृतम्, रत्नजटितोष्णीषिका-मस्तकम्, सुवर्ण-सूत्र-रचित-विविध-कुसुम-कुड्मल-लताप्रताना-ङ्कित-कञ्चुकं महोपबर्हमेकं क्रोडे संस्थाप्य, तदुपरि सन्धारितभुज-द्वयम्, रजत-पर्य्यङ्के विविधफेन-फेनिल-क्षीरधि-जल-तलच्छ-विमङ्गीकुर्वत्यान्तूलिकायामुपविष्टमपजलखानं च ददर्श।

ततस्तु तानरंग-प्रभा-वशीभूतेषु सर्वेष्वागम्यतामागम्यतामा-स्यतामिति कथयत्सु, तानरङ्गोऽपि सादरं दक्षिण-हस्तेनाऽऽदर-सूचक-सङ्केत-सहकारेण यथा निर्दिष्टस्थानमलञ्चकार।

ततस्त्वितरगायकेषु सगर्वं सासूयं सक्षोभं साक्षेपं सचक्षुर्वि-स्फारणं सशिरःपरिवर्तनं च तमालोकयत्सु "अपजलखानेन" सह तस्यैवमभूदालापः।

पतद्ग्रहः। "पीकदान" इति हिन्दी। **लालाटिकैः**=अधिपतिभालमात्रावलोकन-क्षमैर्न तु कार्यसम्पादकैः। "लालाटिकः प्रभोर्भालदर्शी कार्याक्षमश्च य"इत्यमरः। **सुवर्णसूत्रेण**=सूक्ष्मतमसुवर्णतन्तुना, "कलाबत्तू" इति हिन्दी, रचिता या **विविधाः**=अनेकप्रकाराः, **कुसुमकुड्मललताः**=पुष्पकलिकावल्ल्यः, तासां **प्रतानैः**=वितननैः, **अङ्कितः**=अञ्चितः, **कञ्चुकः**=निचोलो यस्य तम्। **महोप-बर्हम्**=महोपधानम्। "मसनन्द" इति हिन्दी। **विविधफेनेन**=प्रचुरडिण्डी-रेण, **फेनिलस्य**=फेनसंवलितस्य, **क्षीरधेः**=वारिधेः, जलतलस्य **छविम्**=शोभाम् **अङ्गीकुर्वत्याम्**=धारयन्त्याम्। तूलमस्ति यस्यां सा तूला=तूलवती, तूलैव तूलिका=तूलमयं विष्टरम् तस्याम्। "रुई की गद्दी तोसक"इति हिन्दी। कूर्ची-पर्यायत्वमनुचिन्तयन्तस्तु चिन्तनीयबुद्धय एवेति शम्। **आदरसूचकसंकेतः**= "सलाम" इति हिन्दी।

अपजलखानः—किन्देशवास्तव्यो भवान् ?

तानरंगः—श्रीमन् ! राजपुत्रदेशीयोऽहमस्मि।

अपजल०—ओ ! राजपुत्रदेशीयः !!

तान०—आम् ! श्रीमन् !

अप०—तत् कथमत्र महाराष्ट्र-देशे ?

तान०—सेनापते ! मम देशाटन-व्यसनं मां देशादेशं पर्याटयति।

अप०—आ ! एवम् ! तत्किं प्रायः पर्य्यटति भवान् ?

तान०—एवं चमूपते ! नव्यान् नव्यान् देशानवलोकितुम्, नवा नवा भाषा अवगन्तुम्, नूतना नूतना गान-परिपाटीश्च कलयितुम्, एधमान-महाभिलाष एष जनः।

अप०—अहो ! ततस्तु बहुदर्शी बहुज्ञश्च भवान्। अथ वङ्ग-देशे गतो भवान् ? श्रूयतेऽतिवैलक्षण्यं तद्देशस्य।

तान०—सेनापते ! वर्षत्रयात्पूर्वमहं काश्यां गङ्गायां संस्नाय, उज्जयिनी-देशीय-क्षत्रिय-कुलालङ्कृतं भोजपुर-देशमालोक्य, गङ्गा-गण्डक-तटोपविष्टं हरिहरनाथं प्रणम्य, विलासिकुल-विलसितं पाटलिपुत्र-पुरमुल्लङ्घ्य, सीताकुण्ड-विक्रम-चण्डिकादि-पीठ-पटल-पूजितं विक्रम-यशःसूचक-दुर्ग्गावशेष-शोभितम्, देवधुनी-तरङ्ग-क्षालित-प्रान्तं मुद्गलपुरं निरीक्ष्य, कर्ण-दुर्ग-स्थानेन तद्यशो-

वास्तव्यः=निवासी। "वसेस्तव्यत् कर्त्तरि णिच्चे"ति तव्यत्। उज्जयिनी-देशीय-क्षत्रियकुलालङ्कृतम्=अत एव भोजपुरमिति तन्नाम। भोजो हि बभूवोज्जयिन्या नातिदूरे धारानगरे। देवधुन्याः=जह्नुतनयायाः, तरङ्गैः क्षालितं

महामुद्रयेवाङ्कितमङ्गदेशं दिनत्रयमध्युष्य, अतिवर्द्धमानवैभवं वर्द्धमान-नगरं च सम्यक् समालोक्य, यथोचित-सम्भारैस्तारकेश्वरमुपस्थाय, ततोऽपि पूर्वं वङ्ग-देशे, पूर्व-वङ्गेऽपि च चिरमहमटाट्यामकार्षम्।

अप०—किं किं किं पूर्ववङ्गेऽपि ?

तान०—आम् श्रीमन्! पूर्ववङ्गमपि सम्यगवालुलोकदेष जनः, यत्र प्रान्त-प्ररूढां पद्मावलीं परिमर्दयन्ती, पद्मेव द्रवीभूता, पयःपूर-प्रवाह-परम्पराभिः पद्मा प्रवहति, यत्र ब्रह्मपुत्र इव शत्रु-सेना-नाशन-कुशलः, ब्रह्म-देशं विभजन्, ब्रह्मपुत्रो नाम नदो भू-भागं क्षालयति, यत्र सामु-सुमधुर-रस-पूरितानि, फूत्कारोद्भूत-भूति-ज्वलदङ्गार-विजित्वर-वर्णानि, जगत्प्रसिद्धानि, नारङ्गाण्युद्भवन्ति, यद्देशीयानां जम्बीराणाम्, रसालानाम्, तालानाम्, नारिकेलानाम्, खर्जूराणाञ्च महिमा, सर्वदेश-रसज्ञानां साम्रेडं कर्णं स्पृशति, यत्र च भयङ्करा ऽऽवर्त-सहस्राऽऽकुलासु स्रोतस्वतीषु

प्रान्तम्। मुद्गलपुरम्="मुङ्गेर" इति ख्यातम्। वर्द्धमाननगरम्=अद्यत्वे "बर्दवान" इति ख्यातम्। अटाट्याम्=पर्यटनम्। अवालुलोकत्=अवलोकयाञ्चकार। एवमेव युक्तः पाठः। प्रान्तयोः=तटोपान्तयोः, प्ररूढाम्=समुद्भूताम्, ब्रह्मपुत्रः=गरलविशेषः। "ब्रह्मपुत्रः प्रदीपन" इत्यमरः। फूत्कारेण=मुखवायुना, उद्भूता=उड्डायिता, भूतिः=भस्म, येषां तादृशा ये ज्वलदङ्गाराः=प्रकाशमानाङ्गाराः, तेषां विजित्वराः=जयनशीलाः, वर्णा येषां तानि। नारङ्गाणि=नागरङ्गाणि। "नारङ्गी" इति हिन्दी। भयङ्करैः=भीतिजनकैः, आवर्त्तसहस्रैः=बहुसंख्याम्भसां भ्रमैः, "स्यादावर्त्तोऽम्भसां भ्रम" इत्यमरः, आकुलासु। स्रोतस्वतीषु=नदीषु। सहोहोकारम्=नौकादण्डप्रक्षेपावसरे तद्देशीयाः "हो हो" शब्दं

सहोहोकारं क्षेपणीः क्षिपन्तः, अरित्रं चालयन्तः, बडिशं योजयन्तः, कुवेणीस्थ-म्रियमाणमत्स्य-परीवर्त्तानालोकमालोकमानन्दन्तः, अदृष्टतटेष्वपि महा-प्रवाहेषु, स्वल्पया कूष्माण्ड-फक्किकाकारया नौकया, भिन्नाञ्जन-लिप्ता इव, मसि-स्नाता इव, साकारा अन्धकारा इव, काला धीवर-बाला निर्भयाः क्रीडन्ति।

अप०—[स्वयं हसन्, सर्वांश्च हसतः पश्यन्] सत्यं सत्यं, धन्यो भवान्, योऽल्पेनैव वयसैवं विदेश-भ्रमणैश्चातुरीं कलयति।

तान०—धन्य एव यदि युष्माद्दृशैरभिनन्द्ये!

अप०—(क्षणानन्तरम्) अथ भवान् मूर्छना-प्रधानं गायति, तान-प्रधानं वा?

कुर्वन्ति। **क्षेपणी**=नौकादण्डः। "नौकादण्डः क्षेपणी स्यादि"त्यमरः। "डांडा" इति हिन्दी। **अरित्रम्**="अरित्रं के निपातक" इत्यमरः। "पतवार" इति हिन्दी। **बडिशम्**="बडिशं मत्स्यभेदनमि"त्यमरः। **कुवेण्यां**=मत्स्याधान्यां तिष्ठन्ति ये ते कुवेणीस्थाः, **म्रियमाणाः**=आसन्नमरणाः, मत्स्यास्तेषां **परीवर्त्तान्**=कक्ष्यपरिवर्त्तितानि। **आलोकमालोकम्**=समवलोक्येत्यर्थः। फक्किका="फांक, फांकी" इति हिन्दी। धीवरबालानां कालत्वमुत्प्रेक्षते-भिन्नाञ्जनलिप्ता इव, मसिस्नाता इव साकारा अन्धकारा इवेति।

अभिनन्द्ये, कर्मणि तङ्। **मूर्छनाप्रधानम्**=अविच्छेदं स्वरात्स्वरान्तरप्राप्तिः **मूर्छना**, सविच्छेदं स्वरात्स्वरान्तरप्राप्तिस्तानः। "स्फुटीभवद्ग्रामविशेषमूर्छनामवेक्षमाणं महतीं मुहुर्मुहुरि"ति वायुसम्पर्केण मूर्छना कथमिवोद्भाव्यत इति माघ एव जानातु, परिसमाप्नोतु वा वीणावैलक्षण्यं सर्वमिति मूलकृच्छिष्यकृत-टिप्पणी। महत्यास्तत्तत्स्वरानुगासु तन्त्रीषु क्रमिकेण पवनाघट्टनेन निर्दिष्टमूर्छ-

तान०—ईदृक्षं तादृक्षं च ।

अप०—(क्षणानन्तरम्) अस्तु, आलप्यतां कश्चन रागः ।

तान०—(किञ्चिद् विचार्य) आज्ञा चेदेकां राग-माला-गीतिं गायामि, यत्र प्रत्याभोगं नवीन एव रागो भवेदेकेनैव च ध्रुवेण सङ्गच्छेत, तत्तद्राग-नामानि च तत्रैव प्राप्येरन् ।

अप०—आः! किमेवम्? ईदृशं तु गानं न प्रायः श्रूयते,तद् गीयताम् ।

ततस्तानपूरिकायाः स्वरान् संमेल्य, पातित-वाम-जानुः, तानपूरिका-तुम्बं क्रोडे निधाय, दक्षपादस्योत्थितजानुनि च दक्षहस्त-कूर्पर-स्थापन-पुरःसरं तेनैव हस्तेन तर्जन्यङ्गुल्या तानपूरिकां रण-

---

नाया अव्याघातान्माघाक्षेपो निरर्थक इति दार्शनिकसार्वभौमा गोस्वामिदामोदरशास्त्रिचरणाः । "आरोहावरोहक्रमयुक्तः स्वरसमुदायो मूर्छनेत्युच्यते , तानस्त्वारोहक्रमेण भवती"ति मतङ्गः । भवति चात्र सङ्गीतशास्त्रपद्यम्—

आरोहेणावरोहेण क्रमेण स्वरसप्तकम् ।
मूर्छनाशब्दवाच्यं हि विज्ञेयं तद्विचक्षणैः ॥

आलप्यताम्=आलापः क्रियताम् । विशकलय्य रागोदीरणमालापः । रागः=रञ्जकस्वरसंदर्भः ।

"योऽसौ ध्वनिविशेषस्तु स्वरवर्णविभूषितः ।
रञ्जको जनचित्तानां स रागः कथितो बुधैः ॥"

सङ्गच्छेत="समो गम्यृच्छिभ्याम्" । स्वरान=निषादप्रभृतीन् ।

"निषादर्षभगान्धारषड्जमध्यमधैवताः ।
पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः" ॥ इत्यमरः ।

पातितो वामजानुर्येन सः । गायकानामवस्थानरीतिः । दक्षहस्तस्य=वामेतरकरस्य, यः कूर्परः=कफोणिः, "स्यात्कफोणिस्तु कूर्पर"इत्यमरः, भुजमध्य-

यन्, स्वकण्ठेनापि त्रीन् ग्रामान्, सप्त स्वरांश्च समधात्। तन्मात्र-श्रवणेनैव मुग्धेष्विवाखिलेष्विमां राग-माला-गीतिमगायत्।

"सखि हे! नन्द-तनय आगच्छति। सखि०॥
मन्दं मन्दं मुरली-रणनैः समधिक-सुखं प्रयच्छति।
भैरव-रूपः पापिजनानां सतां सुख-करो देवः।
कलित-ललित-मालती-मालिकः सुरवर-वाञ्छित-सेवः॥
सारङ्गैः सारङ्ग-सुन्दरो दृग्भिर्निपीयमानः।
चपला-चपल-चमत्कृति-वसनो विहित-मनोहर-गानः॥

ग्रन्थिरिति यावत्, तत्स्थापनपुरस्सरम्। त्रीन् ग्रामान्=

यथा कुटुम्बिनः सर्वेऽप्येकीभूता भवन्ति हि।
तथा स्वराणां सन्दोहो ग्राम इत्यभिधीयते॥
षड्जग्रामो भवेदादौ मध्यमग्राम एव च।
गान्धारग्राम इत्येतद्ग्रामत्रयमुदाहृतम्॥

समधात्=समयोजयत्। **सखि!**=आलि! **मुरलीरणनैः**=वंशीस्वनैः। **समधिकम्**=ब्रह्मानन्दलक्षणम्। कीदृशोऽसौ नन्दसुतस्तत्राह-**पापिजनानाम्**=अधिनराणाम्। **भैरवरूपः**=भयङ्करः। तमःप्रकृतीनां राक्षसायमानानामपज-लखानप्रभृतीनामपि पापित्वात्तेषामपि भैरव एवेति ध्वनिः। **सताम्**=सत्त्ववतां सज्जनानाम्, शिवादीनाम्। **कलिता** ललिता मालतीमालिका येन सः। **सुरवरैः**=इन्द्रादिभिः, वाञ्छिता सेवा यस्य सः। **सारङ्ग इव सुन्दरः**। "सारङ्गो मृगप-क्षिणोः"। **सारङ्गैः, दृग्भिः**=नयनैः, **निपीयमानः**=चाक्षुषीक्रियमाणः। **चप-लेव**=विद्युदिव, **चपला चमत्कृतिर्यस्य तादृशम्**=चञ्चलचाकचक्यम्, वसनं यस्य सः। **विहितं मनोहरम्**=श्रोतृचित्ताकर्षकम्, **गानम्**=गीतिर्येन सः।

श्रीवत्सेन लाञ्छितो हृदये श्रीलः श्रीदः श्रीशः।
सर्वश्रीभिर्युतः श्रीपतिः श्री-मोहनो गवीशः ॥
गौरी-पतिना सदा भावितो बर्हिण-बर्ह-किरीटः।
कनक-कशिपु-कदनो बलि-मथनो विहत-दशानन-कीटः ॥

श्रीवत्सेन=भृगुपदेन। लाञ्छितः=चिह्नितः। श्रियं लाति, ददाति, इति श्रीलः, श्रीदः। श्रियाः=लक्ष्म्या ईशः। सर्वश्रीभिः=सर्वाभिः शोभाभिः। गवाम्=वाणीनाम्, ईशः=प्रादुर्भावकः, वेदाविष्कारकर्त्तेति यावत्। गवाम्=इन्द्रियाणाम्, ईशः, इन्द्रियजिदिति वा। गवाम्=वृन्दावनपशूनां, स्वामी वा। गौर्याः=हिमतनयायाः, पत्या=भगवता शिवेन। बर्हिणबर्हकिरीटः=मयूरपिच्छमुकुटः। कनककशिपुकदनः=हिरण्यकशिपुसंहारकः, वराहः। बलिमथनः=बलिध्वंसी, वामनः। विहतः=नाशितः, दशानन एव कीटः=क्षुद्रजन्तुः, येन सः, श्रीरामः। समये समये गृहीतजन्मा साधुसंरक्षणासाधुजनविघातकात्मकं कृत्यं स्वयं सम्पादयत्यजन्मेत्यन्तिमविशेषणत्रयेण ध्वनितम्। अत्र भैरव-ललित-सारङ्ग-श्री-गौरीनामानि रागाणाम्। तत्र भैरवः प्रथमः प्रातःकालिकश्च। अत्र सप्त स्वरा अपेक्ष्यन्त इत्ययं सम्पूर्ण इत्युच्यते। ऋषभ-मध्यम-धैवता निम्नका लगन्ति गान्धार-निषादौ चोच्चकाः। गान्धारमध्यमपञ्चमा अत्र प्रधानानि। ललिते ऋषभधैवतौ निम्नकौ गान्धारनिषादौ चोच्चकौ। अत्र पञ्चमो नापेक्ष्यत इति वैशिष्ट्यम्। सारङ्गे मध्यमनिषादौ निम्नकौ; ऋषभधैवतौ चोच्चकौ। गान्धारोऽत्र नितरां वर्जितः। धैवतोऽपि केवलमवरोहेऽपेक्षितः। श्रीरागोऽपि सम्पूर्णः। ऋषभधैवतौ निम्नकौ, गान्धारनिषादावुच्चकौ, मध्यमश्चोभयथा लगन्ति। निम्नमध्यमयोजनं चातुर्यकृत्यम्। यद्यप्यत्रारोहे गान्धारधैवतौ वर्जितौ तथापि विज्ञाः संलगयन्त्येव क्वचित्। गौरी सम्पूर्णा रागिणी। ऋषभधैवतौ निम्नकौ गान्धारमध्यमनिषादाश्चोच्चकाः। आरो-

अथैतावदेव श्रुत्वाऽतितरां प्रसन्नेषु पारिषदेषु, ससाधुवादं वितीर्णकङ्कणे च "अपजलखाने" तानरङ्गोऽपि सप्रसादं तानपूरिकां भूमौ संस्थाप्य, अपजलखानस्य गुणग्राहितां प्रशशंस।

अथ "अपजलखानः" क्रमशो मैरेय-मद-परवशतां वहन्, उवाच—यत् कथ्यतामस्मिन् प्रान्ते भवादृशानां गुण-ग्राहकाः के सन्ति? के वा कवितायाः संगीतस्य च मर्मावगच्छन्ति?-इति।

ततस्तानरङ्गोऽचकथत्-को नामापरः शिववीरात्? स एव राजनीतौ निष्णातः, स एव सैन्धवाऽऽरोह-विद्या-सिन्धुः, स एव चन्द्रहास-चालने चतुरः, स एव मल्ल-विद्या-मर्म्मज्ञः, स एव पण्डित-मण्डल-मण्डनः, स एव बाण-विद्या-वारिधिः, स एव धैर्य-धारि-धौरेयः, स एव वीर-वार-वरः, स एव पुरुष-पौरुष-परीक्षकः, स एव दीन-दुःख-दाव-दहनः, स एव स्वधर्म-रक्षण-सक्षणः, स एव विलक्षण-विचक्षणः, स एव च मादृश-गुणि-गण-

---

हेऽत्र नियमेन चर्षभं त्यजन्ति कदाचिच्च पञ्चमं धैवतञ्चेत्यादिकं बहुतरमूहनीयम्। सङ्गीतशास्त्रविदां मोदाय तु कियन्मात्रमत्र सङ्गृहीतमिति शम्। **पारिषदेषु**=परिषदि=सभायां साधवः पारिषदास्तेषु। "परिषदो ण्य"इत्यत्र योगविभागाण्णोऽपि। **गुणग्राहिताम्**=गुणज्ञताम्।

मैरेयम्=मद्यम्, तस्य यो मदः, **तत्परवशताम्**=तदधीनताम्। **शिववीरा**दित्यत्रापरशब्दयोगे "अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्त" इति पञ्चमी। **सैन्धवारोहविद्यायाः**=अश्वारोहणकर्मज्ञानस्य, सिन्धुः=सागर इति रूपणम्। **वीरवारवरः**=वीराणां वारः=समूहः, तत्र वरः=श्रेष्ठः, **दीनानाम्**=अनाथानाम्, **दुःखदावस्य**=क्लेशविपिनस्य, दहनतुल्यः। **स्वधर्मरक्षणे सक्षणः**=

गुण-ग्रहणाऽऽग्रही वर्तते ।

अथ "अपजखाने"-"तत् किं शिव एष एवं गुण-गण-विशिष्टोऽस्ति ? एवं वा वीर-वरोऽस्ति ?" इति सचकितम्, सभयम्, सतर्कम्, सरोमोद्गमं च कथयति, किञ्चिद् विचार्येव नीति-कौशल-पुरःसरं गौरः पुनरवादीत् ।

"भगवन् ! सामान्य-राजभृत्यस्य पुत्रः शिववीरो यदि नाम नाभविष्यत्स्वयमीदृश ऊर्जस्वलः, तत्कथं स्वर्णदेव-सदृशं सहचरं प्राप्स्यत् ? तद्द्वारा समस्तं कल्याण-प्रदेशं कल्याण-दुर्गं च स्वहस्त-गतमकरिष्यत् ? कथं तोरण-दुर्ग-भोग-भाजनतामकलयिष्यत् ? कथं तोरण-दुर्गाद् दक्षिण-पूर्वस्यां पर्वतस्य शिखरे महेन्द्र-मन्दिर-खण्डमिव धर्षितारि-वर्गम्, डमरु-हुडुक्कार-तोषित-भर्गम्, रायगढ़-नामकं महादुर्गं व्यरचयिष्यत् ? कथं वा तपनीय-भित्तिका-जटित-महारत्न-किरणावली-वितन्यमान-महा-

---

सोत्साहः । हर्षवाची क्षणशब्दः । **विलक्षणविचक्षणः**=विशिष्टविद्वान् । **गुणिनां** गणस्य गुणग्रहणे, आग्रही । अनुप्रास एषु ।

ऊर्जस्वलः=बलशाली । **दक्षिणपूर्वस्याम्**=दक्षिणस्याः पूर्वस्याश्च दिशोर्यदन्तरालं सा दक्षिणपूर्वा, तस्याम् । **महेन्द्रमन्दिरस्य**=देवेन्द्रसदनस्य, **खण्डमिव**=अंशमिव । **धर्षितः**=भयं प्रापितः, अरिवर्गो येन तम् । उपमयाऽरिवर्गाजेयत्वं व्यनक्ति । **डमरुहुडुक्कारेण** तोषितः **भर्गः**=शिवो यस्मिंस्तम् । कथं वा प्रतापदुर्गं निरमापयिष्यदिति सम्बन्धः । प्रतापदुर्गं विशिनष्टि-**तपनीयस्य**=हिरण्यस्य, **भित्तिकासु**=कुड्येषु, **जटितानाम्**=खचितानाम्, **महारत्नानाम्**=हीरकादीनाम्, **किरणावलीभिः**=मयूखसमूहैः, **वितन्यमानस्य**=

वितान-विततिं-विरोचित-प्रताप-तापित-परिपन्थि-निवहम्, चन्द्र चुम्बन-चतुर-चारु-शिखर-निकरम्, भुशुण्डिका-किणाङ्कित-प्रचण्ड-भुजदण्ड-रक्षक-कुल-विधीयमान-परःसहस्र-परिक्रमम्, धमद्धमद्दोधूयमानानेक-ध्वज-पटल-निर्मथित-महाकाशम्, प्रताप-दुर्गं निरमापयिष्यत्? कथं वाऽऽगत एष शिववीरः—इति भ्रमे-णापि सम्भाव्य, अस्य विरोधिषु केचन मूर्च्छिता निपतन्ति, अन्ये विस्मृत-शस्त्रास्त्राः पलायन्ते, इतरे महात्रासाऽऽकुञ्चितोदराः विशिथिल-वाससो नग्ना भवन्ति, अपरे च शुष्क-मुखा दशनेषु तृणं सन्धाय, साग्रेङं प्रणिपात-परम्परा रचयन्तो जीवनं याचन्ते"।

ततस्तस्य महाप्रतापमवगत्य, किञ्चिद्भीत इव, तच्छत्रृणां चावहेलामाकलय्य, किञ्चिदरुण-नयन इव, दक्षिण-हस्ताङ्गुष्ठ-

---

विस्तार्यमाणस्य, **महावितानस्य**=महोल्लोचस्य, **विततया**=विस्तारेण, **विरो-चितेन**=शोभितेन, **प्रतापेन**=तेजसा, **तापितः**=ज्वालितः, **परिपन्थिनिवहः**=शत्रुसमूहो येन तम्। शिवविभूतिवर्णनादुदात्तालङ्कारः। **चन्द्रचुम्बने**=इन्दुस्पर्शे, **चतुरः**=बुद्धिमान्, **चारुः**=शोभनः, **शिखरनिकरः**=ऊर्ध्वभागसमूहो यस्य तम्। उच्छ्रायवर्णनपरमिदम्। चन्द्रासम्बन्धेऽपि सम्बन्धाभिधानादतिशयोक्तिः। अनु-प्रासश्च स्पष्ट एव। भुशुण्डिकानां **किणैः**=आघातैः, **अङ्किताः**=चिह्नितः, भुजा एव दण्डा येषां तेषाम्। **रक्षकाणाम्**=रक्षानिरतानाम्, **कुलेन**=समूहेन, विधीयमानाः **परःसहस्राः परिक्रमाः**=मण्डलानि यस्य तम्। धमद्धमदिति शब्देन **दोधूय-मानानाम्**=संचलताम्, अनेकेषां ध्वजानां पटलेन **निर्मथितः**=विलोडितः, महाकाशो येन तम्। **महात्रासेन**=महाभयेन, **आकुञ्चितानि**=कृशिमानमा-यान्ति, उदराणि येषां ते। अत एव विशेषतः शिथिलानि वासांसि येषां ते।

तर्जनीभ्यां श्मश्रुवग्रं परिमृजति यवन-सेनापतौ, तान-रङ्गः पुनर्न्यवेदयत्--

"परन्त्वद्य सिंहेन सह शिवस्य साम्मुख्यमस्ति, तन्मन्ये, इयमस्तमनवेला तत्प्रतापसूर्यस्य" ।

तत् कर्णे कृत्वा सन्तुष्ट इव सकन्धरकम्पं सेनापतिरुवाच-"अथात्र संग्रामे कस्य विजयः सम्भाव्यते ?"

स उवाच-"श्रीमन् ! यदि शिवस्य साहाय्यं साक्षाच्छिव एव न कुर्य्यात्, तद् विजयपुरस्यैव विजयः" ।

अथ सहासं सोऽब्रवीत्-"को नाम खपुष्पायितः, शश-शृङ्गायितः, कमठी-स्तन्यायितः, सरीसृप-श्रवणायितः, भेक-रसनायितः, वन्ध्या-पुत्रायितश्च शिवोऽस्ति ? य एनं रक्षिष्यति, दृश्यतां श्व एवैषोऽस्माभिः पाशैर्बद्धा, चपेटैस्ताड्यमानो विजयपुरं नीयते"

-इति, सकष्टमाकर्ण्य, "स्यादेवं भगवन् !" इति कथयति तान-रङ्गे, अभिमान-परवशः स्वसहचरान् सम्बोध्य, पुनरादिशत्-"भो भो योद्धारः ! सूर्योदयात् प्रागेव भवन्तः पञ्चापि सहस्राणि सादी-

---

याचन्ते=प्रार्थयन्ते । अस्तमनवेला=तत्प्रतापरूपसूर्यस्य समाप्तिवेलेत्यर्थः । सूर्यास्तोदयौ तु न भवतः, केवलं तत्खण्डवासिभिस्तदनवलोकनेन तादृशशब्द-व्यवहार एवास्थीयते । तदुक्तम् "नैवास्तमनमर्कस्य नोदयः सर्वदा सत" इति । खपुष्पमिवाचरितः खपुष्पायितः । खपुष्पम्, शशशृङ्गम् कमठी-(कच्छपी) दुग्धम्, सरीसृपश्रवणम्, भेकरसना, वन्ध्यापुत्रश्चेत्यसम्भवालीढवस्तूनि । यथैतानि न सन्त्येवं शिवोऽपि नास्तीत्यर्थः । सादीनाम्=अश्वारोहिणाम् ।

नाम्, दशापि च सहस्राणि पत्तीनाम्, सज्जीकृत्य, युद्धाय तिष्ठत। गोपीनाथ-पण्डित-द्वाराऽऽहूतोऽस्ति मया शिव-वराकः, तद् यदि विश्वस्य, स समागच्छेत्, ततस्तु बद्ध्वा जीवन्तं नेष्यामः, अन्यथा तु सदुर्गमेनं धूलीकरिष्यामः, यद्यप्येवं स्पष्टमुदीरणं राजनीति-विरुद्धम्; तथाऽपि मदावेशस्तु न प्रतीक्षते विवेकम्"

तदवधार्य समस्तक-कूर्चान्दोलनम् "यदाज्ञाप्यते, यदाज्ञाप्यते" इति वाचां धारा-संपातैरिव स्नापयत्सु पारिपदेषु गोपनीयोऽयं वृत्तान्तः, कथं स्पष्टं कथ्यते? इति दुर्मनायमानेष्विव चाकस्मादेव प्रविश्य, सूदेनोक्तम्-"श्रीमन्! व्यत्येति भोजनसमयः" तच्छ्रुत्वा "आ! एवं किलैतत्" इति सोत्रासं सविस्मयं सकूर्चोद्धूननं सोपबर्हताडनमुच्चार्य, सपद्युत्थाय, "पुनरागम्यताम्" इति तानरङ्गं विसृज्य, सेनापतिरन्तः प्रविवेश। तानरङ्गश्च यथाऽऽगतं निवृत्ते।

इतस्तु प्रतापदुर्गे विहिताहार-व्यापारे, रजत-पर्य्यङ्किकामेकामधिष्ठिते, किञ्चित् तन्द्रा-परवश इव गोपीनाथे, शिववीरः शनैरुपसृत्य, प्रणम्य, उपाविशदवोचच्च-

"अहो! भाग्यमस्माकं यदालयं युष्मादृशा भूदेवाः स्वचरण-रजोभिः पावयन्ति"-इति।

"अश्वारोहास्तु सादिन" इत्यमरः। पत्तीनाम्=पदातीनाम्। "पदातिपत्तिपतगपादातिकपदाजय" इत्यमरः। विश्वस्य=विश्वासं कृत्वा। समस्तककूर्चान्दोलनम्=सशिरोदाढिकासञ्चालनम्। क्रियाविशेषणम्। अदुर्मनसो दुर्मनसो भवन्तीति दुर्मनायमानास्तेषु। "भृशादिभ्यो भुव्यच्वेर्लोपश्च हल" इति सूत्रेणाभूततद्भावविषये क्यङि शानच्। भावसप्तमी।

अथ तयोरेवमभूवन्नालापाः।

गोपीनाथः-"राजन्! कोऽत्र सन्देहः? सर्वथा भाग्यवानसि, परं साम्प्रतं नाहं पण्डितत्वेन, कवित्वेन वा समायातोऽस्मि, किन्तु यवनराज-दूतत्वेन। तच्छ्रूयतां यदहं निवेदयामि"।

शिववीरः-"शिव! शिव! खलु खलु खल्विदमुक्त्वा, येषां श्रीमतां चरणेनाङ्कितं विष्णोरपि वक्षःस्थलमैश्वर्य-मुद्रयेव मुद्रितं विभाति, न तेषां ब्राह्मण-कुल-कमल-दिवाकराणां यवनकैङ्कर्य-कलङ्क-पङ्को युज्यते, यं शृण्वतोऽपि मम स्फुटत इव कर्णौ, तथाऽपि कुलीना निरभिमाना भवन्ति-इत्यानीतश्चेत् कश्चित् सन्देशः, तदेष आज्ञाप्यतां श्रीमच्चरण-कमल-चञ्चरीकः"।

गोपीनाथः-"वीर! कलिरेष कालः, यवनाऽऽक्रान्तोऽयं भारत-भूभागः, तन्नास्माकं तथा तानि तेजांसि यथा वर्णयसि। साम्प्रतं तु विजयपुराधीश-वितीर्णां भृतिं भुञ्जे-इति तदाज्ञामेव परिपालयामि। तच्छ्रूयतां तदादेशः"।

शिववीरः-"आर्य! अवदधामि"।

गोपीनाथः-कथयति विजयपुरेश्वरो यद् "वीर! परित्यज नवामिमां चञ्चलतामस्माभिः सह युद्धस्य, त्वदपेक्षयाऽत्यन्तमधिकं बलिनो वयम्, प्रवृद्धोऽत्र कोषः, महती सेना, बहूनि दुर्गाणि, बहवश्च वीराः सन्ति। तच्छुभमात्मन इच्छसि चेत् त्यक्त्वा निखिलां चञ्चलताम्, शस्त्रं दूरतः परित्यज्य, करप्रदतामङ्गीकृत्य,

---

खल्विदमुक्त्वा=निषेधार्थकः खलुशब्दः। "अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा"। यवनानां कैङ्कर्यम्=किङ्करस्य भावः-दासता, तदेव कलङ्कपङ्कः।

समागच्छ मत्सभायाम्। मत्तः प्राप्तपदश्चिरं जीविष्यसि, अन्यथा तु सदुर्दशं निहतः कथावशेषः संवर्त्स्यसि, तत् केवलं त्वयि दययैव संदेशं प्रेषयामि, अङ्गीकुरु। मास्म वृद्धायाः प्रसविन्या रजत-श्वेतां पक्ष्म-पङ्क्तिमश्रु-प्रवाह-दुर्दिने पातय"-इति।

शिववीरः-"भगवन्! कथयेदेवं कश्चिद् यवनराजः, परं किं भवानपि मामनुमन्यते? यद् येऽस्मदिष्टदेवमूर्तीर्भङ्क्त्वा, मन्दिराणि समुन्मूल्य, तीर्थस्थानानि पक्कणीकृत्य, पुराणानि पिष्ट्वा, वेदपुस्तकानि विदार्य च, आर्यवंशीयान् बलाद् यवनीकुर्वन्ति, तेषामेव चरणयोरञ्जलिं बद्ध्वा, लालाटिकतामङ्गीकुर्याम्? एवं चेद् धिङ्मां कुल-कलङ्कं क्लीबम्, यः प्राणभयेन सनातनधर्मद्वेषिणां दासेरकतां वहेत्। यदि चाहमाहवे म्रियेय, वध्येय, ताड्येय, वा तदैव धन्योऽहम्, धन्यौ च मम पितरौ। कथ्यतां भवादृशां विदुषामत्र का सम्मतिः?"

गोपीनाथः-(विचार्य) "राजन्! धर्मस्य तत्त्वं जानासि, तन्नाहं स्वसम्मतिं कामपि दिदर्शयिषामि। महती ते प्रतिज्ञा, महत्त्वोद्देश्यमिति प्रसीदामितमाम्। नारायणस्तव साहाय्यं विदधातु"।

शिववीरः-"करुणानिधान! नारायणः स्वयं प्रकटीभूय न प्रायेण साहाय्यं विदधाति, किन्तु भवादृश-महाशय-द्वारैव। तत् प्रतिज्ञायतां कापि सहायता"।

भृतिम्=जीविकाम्। प्रसविन्याः=जनन्याः। पक्कणीकृत्य=शबरसदनीकृत्य। "पक्कणः शबरालय"इत्यमरः। दासेरकताम्=भृत्यताम्। "भृत्ये दासेरदासेयदासगोप्यकचेटका"इत्यमरः। म्रियेय, वध्येय, ताड्येय वा=क्रियादीपकम्।

गोपीनाथः–"राजन्! कथ्यतां किमहं कुर्याम्, परं यथा न मामधर्मः स्पृशेत्, तथैव विधास्यामि"।

शिववीरः–"शान्तं पापम्! कोऽत्राधर्मः? केवलं श्वोऽस्मिन्नुद्यान-प्रान्तस्थ-पट-कुटीरे यवन-सेनापतिरपजलखान आनेयो यथा तेनैकाकिनाऽहमेकाकी मिलित्वा किमप्यालपामि"।

गोपीनाथः–"तत् सम्भवति"!

ततः परं गोपीनाथेन सह शिववीरस्य बहुविधा आलापा अभूवन, यैः शिववीरस्योदारहृदयताम्, धार्मिकताम्, शूरताञ्चावगत्य, गोपीनाथोऽतितरां पर्य्यतुष्यत्।

अथ स तमाशीर्भिरनुयोज्य यावत्प्रतिष्ठते; तावदुपातिष्ठत ससहचरस्तानरङ्गः। गोपीनाथस्तु तमनवलोकयन्निव तस्मिन्नेव निशीथे दुर्ग्गादवातरत्। कपट-गायको गौरसिंहस्तु शिववीरेण सह बहुश आलप्य, सेनाऽभिनिवेश-विषये च सम्मन्त्र्य, तदाज्ञातः स्ववासस्थानं जगाम।

शिववीरोऽप्यन्य-सेनापतीन् यथोचितमादिश्य, स्वशयनागारं प्रविश्य, होरात्रयं यावत्किञ्चन निद्रा-सुखमनुभूय, अल्पशेषायामेव रजन्यामुदतिष्ठत्।

शिववीर-सेनास्तु यथासङ्केतं प्रथममेवेतस्ततो दुर्ग-प्राचीरान्तरालेषु, गहन-लता-जालेषु, उच्चावच-भूभाग-व्यवधानेषु; सज्जाः पर्यवातिष्ठन्त। बहवोऽश्वारोहाः, यवन-पट-कुटीर-कदम्बकं परिक्रम्य, ततः पश्चादागत्य, अवसरं प्रतिपालयन्ति स्म।

"प्राचीरं प्रान्ततो वृतिरि"त्यमरः। उदक् चावाक् च, उच्चावचम्, "मयूरव्यंसकादयश्च"।

इतश्च सूर्यप्रभाभिररुणीक्रियमाणे भूभागे, अरुण-श्मश्रवोऽपि सेनाः सज्जीकृतवन्तः।

"बहवो वयमद्य शिवमवश्यमेव विजेष्यामहे, परं तथाऽपि न जानीमहे, किमिति कम्पत इव हृदयम्, अहो! विलक्षणः प्रताप एतस्य, पवनेऽपि प्रवहति, पतत्रेऽपि पतति, पत्रेऽपि मर्मरीभवति, स एवाऽऽगत इत्यभिशङ्क्यतेऽस्माभिः। अहह!! विचित्रोऽयं वीरो यो दुर्ग-प्राचीरमुल्लङ्घ्य, प्रहरि-परीवारमविगणय्य, लोहार्गल-शृङ्खला-सहस्र-नद्धानि, करि-कुम्भाघात-सहानि, द्वाराणि प्रविश्य, विकोश-चन्द्रहासासिधेनुका-रिष्टि-तोमर-शक्ति-त्रिशूल-मुद्गर-भुशुण्डी-कराणां रक्षकाणां मण्डलमवहेल्य, प्रियाभिः सह पर्य्यङ्केषु सुप्तानामपि प्रत्यर्थिनां वक्षःस्थलमारोहति, निद्रास्वपि तान् न जहाति, स्वप्नेष्वपि च विदारयति। कथमेतस्य चञ्चच्चन्द्रहास-चमत्कार-चाकचक्य-चिल्लीभूत-चक्षुष्काः समराङ्गणे स्थास्यामः?"-इति चिन्ता-चक्रमारूढा अपि कथं कथमपि कैश्चिद् वीरवरैर्वर्द्धितोत्साहाः समर-भूमिमवातरन्।

अथ कथंचित् प्रकाश-बहुले संवृत्ते नभःस्थले, परस्परं परिचीयमानास्वाकृतिषु, कमलेष्विव विकचतामासादयत्सु वीरवदनेषु

अरुणश्मश्रवः=यवनाः। विजेष्यामहे="विपराभ्यां जेः"। प्रहरिपरीवारम्=दौवारिकसंघम्। विकोशः=कोशान्निःसारितः। नग्न इति यावत्। "नंगी तलवार" इति हिन्दी। निद्रा=सुषुप्तिबोधकम्। स्वप्नः=तत्पूर्वावस्था। चञ्चतश्चन्द्रहासस्य चमत्कारेण यच्चाकचक्यं तेन चिल्लीभूतानि=क्लिन्नीभूतानि, चक्षूंषि=नेत्राणि येषां ते। विकचताम्=विकाशभावम्। विकचताऽऽसादनकि-

भ्रमरालिष्विव परितः प्रस्फुरन्तीष्वसि-पङ्क्तिषु, चाटकैर-चकचकायितेषु कवच-चकत्कारेषु, गोपीनाथ-पण्डितो वारमेकं शिववीर-दिशि, परतश्च यवन-सेनापति-दिशि गतागतं विधाय, सेनाद्वयस्य मध्य एव कस्मिंश्चित् पट-कुटीरेऽपजलखानमानेतुं प्रबबन्ध।

शिववीरोऽपि कौशेय-कञ्चुकस्यान्तर्लोह-वर्म्म परिधाय, सुवर्णसूत्र-ग्रथितोष्णीषस्याप्यधस्तादायसं शिरस्त्राणं संस्थाप्य, सिंहनख-नामकं शस्त्रविशेषं करयोरारोप्य, दृढबद्ध-कटिरपजलखान-साक्षात्काराय सज्जस्तिष्ठति स्म।

अपजलखानोऽपि च—

"यदाऽहमेनं साक्षात्कृत्य, करताडनमेकं कुर्य्यां, तदैव तालिकाध्वनि-समकालमेवामुकामुकैः श्येनैरिवाभिपत्य, पाशैरेष बन्धनीयः, सेनया च क्षणात् तत्सेना, झञ्झया घनघटेवापनेया"

—इति सङ्कल्प्य, सूक्ष्म-वसन-परिधानः, वज्रक-जटितोष्णीषिकः, गल-विलुलित-पद्मराग-मालः, मुक्ता-गुच्छ-चोचुम्ब्यमान-भालः, निश्वास-प्रश्वास-परिमथित-मद्य-गन्ध-परिपूरित-पार्श्व-देशान्तरालः, शोण-श्मश्रु-कूर्च-विजित-नूतन-प्रवालः, कञ्चुक-

---

यायां कमलवीरवदनयोः सहैव कर्तृत्वात्सहोक्तिरलङ्कारः। एवं परत्र। चटकाया अपत्यानि पुमांसः, **चाटकैराः**, तेषां **चकचकायितेषु**=चकचकमिवाचरितेषु। **कवचानाम्**=उरश्छदानाम्, **चकत्कारेषु**=तादृशशब्देषु। **झञ्झया**=झञ्झावातेन। "झञ्झावातः सवृष्टिके" इत्यमरः। **वज्रकेण**=हीरकेण, **जटिता**=खचिता, उष्णीषिका यस्य सः। निश्वासप्रश्वासाभ्यां परिमथितो यो **मद्यगन्धः**=मैरेयामोदः, तेन **परिपूरितम्**=भरितम्, पार्श्वदेशान्तरालं येन सः। **शोणाभ्याम्**=

स्यूत-काञ्चन-कुसुम-जालः, विविध-वर्ण-वर्णनीय-शिबिकामारुह्य, निर्दिष्ट-पटकुटीराभिमुखं प्रतस्थे। इतस्तु कुरङ्गमिव तुरङ्गं नर्त्तयन्, रश्मि-ग्राह-वेषेण गौरसिंहेनानुगम्यमानः, माल्यश्रीक-प्रभृतिभिर्वीरवर्युद्ध सज्जैः सतर्कं निरीक्ष्यमाणः, शिववीरोऽपि तस्यैव सङ्केतितस्य समागमस्थानस्य निकट एव सव्य-करेण वल्गामाकृष्याश्वमवारुधत्।

ततस्त्वितोऽश्वात्-शिववीरः, ततस्तु शिबिकातोऽपजलखानः, अपि युगपदेवावातरताम्, परस्परं साक्षात्कृत्य च, उभावप्युत्सुकाभ्यां नयनाभ्याम्, सत्वराभ्यां पादाभ्याम्, स्वागताऽऽम्रेडनतत्परेण वदनेन, आश्लेषाय प्रसारिताभ्यां च हस्ताभ्याम्, कौशेयास्तरण-विरोचितायां बहिर्वेदिकायां धावमानौ, परस्परमालिलिङ्गतुः।

शिववीरस्वालिङ्गनच्छलेनैव स्वहस्ताभ्यां तस्य स्कन्धौ दृढं गृहीत्वा, सिंह-नखैर्जत्रुणी कन्धरञ्च व्यपाटयत्। रुधिरदिग्धं च तच्छरीरं कटि-प्रदेशे समुत्तोल्य, भूपृष्ठेऽपोथयत्।

तत्क्षणादेव च शिववीर-ध्वजिन्यां महाध्वज एकः समुच्छ्रितः। तत्समकालमेव यवन-शिबिरस्य पृष्ठस्थिता शिववीर-सेना शिबि-

---

लोहिताभ्याम्, श्मश्रुकूर्चाभ्यां विजितो नूतनः प्रवालः=नवपल्लवं येन सः। कञ्चुके स्यूतानि=खचितानि, काञ्चनानि=हैरण्यानि, कुसुमजालानि यस्य सः। कुरङ्गमिवेति तुरङ्गस्य शीघ्रगामिताज्ञननाय। रश्मिग्राहः=प्रग्रहधारी। "सईस" इति हिन्दी। वल्गाम्=कविकाम्। "लगाम" इति हिन्दी। स्वागताम्रेडनम्=वारं वारं स्वागतनिवेदनम्। आश्लेषाय=आलिङ्गनाय। धावमानौ=शीघ्रं गच्छन्तौ। अन्योन्यं हर्षप्रदर्शनाय। जत्रुणी=स्कन्धस्य सन्धी।

रमग्निसात्कृतवती, पुरःस्थित-सेनासु चाकस्मादेव महाराष्ट्र-केसरिणः समपतन् । तेषां 'हरहर-महादेव'-गर्ज्जनपुरस्सरं छिन्धि, भिन्धि, मारय, विपोथय-इति कोलाहलः प्रत्यर्थिनाञ्च 'खुदा-तोबा-अल्लादि'-पारस्य-पदमयः कलकलो रोदसी समपूरयत् ।

ततो यवन-सेनासु शतशः सादिनः, गगनं चोचुम्ब्यमानाः, कृत-दिगन्त-प्रकाशाः, कडकडा-ध्वनि-धर्षित-प्रान्त-प्रजाः, उड्डीयमान-दन्दह्यमान-परःसहस्र-पटखण्ड-विहित-हैम-विहङ्गम-विभ्रमाः, ज्योतिरिङ्गणायित-परःकोटि-स्फुलिङ्ग-रिङ्गित-पिङ्गीकृत-प्रान्ताः, दोधूयमान-धूम-घटा-पटल-परिपात्यमान-भसित-सितीकृतानोकहाः, सकलकल-ध्वनि पलायमानैः, पतत्रि-पटलैरिव सोसूच्यमानाः, शिबिर-घस्मरा ज्वालमाला अवलोक्य, स-हाहा-

---

रोदसी=द्यावापृथिव्यौ । शतशः सादिनो ज्वालमाला अवलोक्य तदभिमुखं प्रयाता इति सम्बन्धः । ज्वालमाला विशिनष्टि-गगनं चोचुम्ब्यमाना इत्यादिभिः । कृतो दिगन्तस्य=दिक्प्रान्तभागस्य, प्रकाशो याभिस्ताः । कडकडाध्वनिभिर्धर्षिताः प्रान्तप्रजा याभिस्ताः । उड्डीयमानैः दन्दह्यमानैः=नितरां ज्वलद्भिः, परःसहस्रैः पटखण्डैर्विहितो हैमानाम्=सौवर्णानाम्, विहङ्गमानाम्=पतत्रिणाम्, विभ्रमो याभिस्ताः । ज्योतिरिङ्गणायितानाम्=खद्योतायितानाम्, परःकोटीनां, स्फुलिङ्गानाम्=अग्निकणानाम्, रिङ्गितैः=उड्डयनैः, पिङ्गीकृताः=पिङ्गरीकृताः, प्रान्ताः=परिसरभूमयो याभिस्ताः । दोधूयमानानाम्=नितान्तं वृद्धिं गच्छन्तीनाम्, धूमघटानाम्=धूमलेखानाम्, पटलेन=समूहेन, परिपात्यमानैः=समन्ततो विकीर्यमाणैः, भसितैः=भस्मभिः, सितीकृताः=स्वच्छीकृताः, अनोकहाः=वृक्षा याभिस्ताः । सकलकलध्वनिभिः=कलकलशब्दयुक्तैः । पलायमानैः, पतत्रिपटलैः=पक्षिसमूहैः । सोसूच्यमानाः=बोबुध्यमानाः ।

कारं तदभिमुखं प्रयाताः। अपरे च महाराष्ट्रासि भुजङ्गिनीभिर्द-न्दश्यमानाः, केचन त्रायस्व त्रायस्वेति साम्रेडं व्याहरमाणाः, पलायमानाः, अन्ये धीरा वीराश्च-

"तिष्ठत रे तिष्ठत धूर्त-धुरीणाः! महाराष्ट्र-हतकाः! किमिति चौरा इव, लुण्ठका इव, दस्यव इव च, यवन-सेनापतीनाक्राम्यथ? समागच्छत सम्मुखम्, यथा शाम्येदस्मच्चन्द्रहासानां चिरप्रवृद्धा महाराष्ट्र-रुधिराऽऽस्वाद-तृषा"

-इति सक्ष्वेडं संगर्ज्य, युद्धाय सज्जाः समतिष्ठन्त।

तेषां चाश्वानां सव्यापसव्य-मार्गैः खुर-क्षुण्णा इव व्यदीर्यत वसुधा। खड्ग-खटखटा-शब्दैः सह च प्रादुरभूवन् स्फुलिङ्गाः। रुधिर-धाराभिर्जपा-सुमनस्समाच्छन्नमिवाभूद्रणाङ्गणम्।

तदवलोक्य, गौरसिंहो मृतस्यापजलखानस्य शोणित-शोणं शोणं शरीरं प्रलम्ब-वेणु-दण्डाग्रेषु बद्ध्वा, समुत्तोल्य, सर्वान् सन्दर्श्य, सभेरीनादं घोषितवान् यद्-

"दृश्यतां दृश्यतामितो हतोऽयं यवन-सेनापतिः, ततश्चाग्निसात् कृतानि सकल-सामग्री-जातानि, शिबिराणि, परितश्च बहूनि विनाशितानि यवन-वीर-कदम्बकानि, तत् किमित्यवशिष्टा यूयं मुधा बक-गृध्र-शृगालानां भोज्याः संवर्तध्वे? शस्त्राणि त्यक्त्वा पलायध्वम् पलायध्वम्, यथा नेयं भूः कदुष्णैर्भवतां सद्यश्छिन्न-

---

उड्डीना भयात्कलकलं कुर्वन्ति विहगाः, इह च स एव सूचनमुखेनोत्प्रेक्षितः। साम्रेडम्=वारं वारम्। सक्ष्वेडम्=ससिंहनादम्।

प्रलम्बानाम्=लम्बायमानानाम्, वेणूनाम्=वंशानाम्, दण्डाग्रेषु। कदु-

कन्धर-गलद्रुधिर-प्रवाहैर्भवद्रमणीनां च कज्जलमलिनैर्बाष्प-पूरैरार्द्रा भवेदू"-इति ।

तदवधार्य, दृष्ट्वा च रुधिर-दिग्धं क्रीडापुत्तलायितं स्वस्वामि-शरीरम्, सर्वेऽपि हतोत्साहा विसृज्य शस्त्राणि, कांदिशीका दिशो भेजुः ।

ससेनः शिववीरश्च विजय-शङ्ख-नादै रोदसी संपूर्य, रणाङ्गण-शोधनाधिकारं माल्यश्रीकाय समर्प्य, प्रताप-दुर्गं प्रविश्य, मातु-श्चरणौ प्रणनाम ।

इति द्वितीयो निश्वासः ।

ष्णैः=ईषदुष्णैः । क्रीडापुत्तलायितम्=क्रीडापुत्तलीकृतम् । कांदिशीकाः भीताः । "कांदिशीको भयद्रुतं" इत्यमरः । मातुः=जनन्याः ।

इति श्रीशिवराजविजयवैजयन्त्यां द्वितीयानिश्वासविवरणम् ।



"जीवन् नरो भद्रशतानि पश्येत्"

—स्फुटकम्

"संसारेऽपि सतीन्द्रजालमपरं यद्यस्ति तेनापि किम् ?"

—भर्तृहरिः

तत्र पर्ण-कुटीरे तु कथं कथमपि दाडिमाद्यास्वादन-तत्परां कुसुम-गुच्छैर्मनो विनोदयन्तीं बालिकां गुरोः समीपे परित्यज्य, तदाज्ञया तत्पितरौ समन्वेष्टुम्, अन्तर्गोपित-क्षुरप्रच्छुरिकां यष्टिकामेकां हस्तेन धृत्वा, तैरेव श्याम-श्यामैः, गुच्छ-गुच्छैः, लोल-लोलैः, कुञ्चित-कुञ्चितैः, कचैः, ब्रह्मचारि-बटु-वेष एव श्यामबटुरासन्न-ग्रामटिका-दिशि समगात्।

ततो हन्त ! कथमद्यापि शूली त्रिशूलेन नैतान् शूलाकरोति ?

गौरबटुश्यामबटुनाम्ना। प्रसिद्धयोरुदयपुरराज्यैकभागभूभागस्वामिश्रीखड्गसिंह-तनययोः समागमश्चिराद्विमुक्तया सौवर्णीनामिकया भगिन्या पुरोहितेन च काकतालीयन्यायेन जात इति तृतीयपरिच्छेदकथामुपक्षिपति—**"जीवन्नरो भद्रशतानि पश्येदि"**ति।

अघटितघटनापटीयस्या मायया घटयितं प्रपञ्चजातमेवेन्द्रजालम् न तु ततोऽन्य-त्किञ्चिदित्यपि स्मारयति भर्तृहरिपद्यखण्डेन—**"संसारेऽपी"**ति।

कुसुमगुच्छैः=पुष्पस्तबकैः। **श्यामश्यामैः**=अतिश्यामैः। एवमग्रेऽपि। "नित्यवीप्सयोरि"त्यभीक्ष्ण्ये द्वित्वम्। **आसन्ना**=समीपवर्त्तिनी, **ग्रामटिका**=लघुग्रामः। "स्वर्गग्रामटिकावलुण्ठनवृथोच्छूनै"रित्यादिषु महाकविभिः प्रयुक्तोऽयं शब्दः।

कथं खड्गिनी खड्गेन न खण्डयति ? कथं चक्री चक्रेण न चूर्णयति ? कथं पाशी पाशैर्न पाशयति ? कथं हली हलेन नावहेलयति ? कथं वा जम्भारातिर्दम्भोलिघातैर्दम्भिन एतानम्भोधि-जल-स्तम्भारम्भेषु न पातयति ? अहह ! क इतोऽप्यधिकोऽनर्थो भविता यद् भगवानवतरिष्यति। शिव ! शिव !! न शक्यते द्रष्टुमपि यदेतैर्निर्दय-हृदयैः, परमपूजनीयानां ब्राह्मणानामप्यत्यल्पवयस्का अपि बालिका अपहियन्ते। धिगेतान् ! धर्म्मादपि निर्भीकानभीकान्-इति चिन्ता-सन्तान-वितानैकतान एव ब्रह्मचारि-गुरौ, सपद्येव न्यविशत श्यामवटुः सह देवशर्म्मणा वर्षीयसा ब्राह्मणेन। स तु बाष्प-क्षालितोपनयनः, शोकाधिक-कम्पित-गात्रयष्टिः, प्रविश्यैव,

---

शूली=शिवः। शूलाकरोति=शूलेन पचति। "शूलात्पाके"। खड्गिनी=दुर्गा। चक्री=विष्णुः। पाशी=वरुणः,"प्रचेता वरुणः पाशी"त्यमरः। पाशैः=बन्धनसाधनैर्वरुणास्त्रैः। हली=बलः। अवहेलयति=तिरस्करोति। जम्भस्य=तन्नाम्नोऽसुरविशेषस्य,अरातिः=रिपुः,इन्द्रः। दम्भोलीनाम्=वज्राणाम्,"दम्भोलिरशनिर्द्वयोरि"त्यमरः। घातैः=ताडनैः। अम्भोधेः=क्षीरनिधेः, जलस्तम्भानां, आरम्भेषु=प्रारब्धिषु। क्वचिज्जलधिमारभ्य मेघपर्यन्तं जलस्तम्भा आविर्भवन्तीति पदार्थ-विद्या-वेदिनां नाविदितचरम्। अनुप्रासः। धर्मादपि निर्भीकान्=धार्मिकभयशून्यान्। अभीकान्=अनिन्द्रियजितः। "अभीके कामुके निर्भयं त्रिषु"। चिन्तायाः सन्तानस्य=समूहस्य, वितानेे=विस्तारीकरणे, एकतानः=स्थिरचित्तः। न्यविशत=प्रविष्टः। वर्षीयसा=वृद्धेन। बाष्पेण=रोदनजलेन, क्षालितम्=धौतम्, उपनयनम्=उपनेत्रं (चश्मा) यस्य सः। शोकेन, अधिकम्, कम्पिता=वेपमाना, गात्रयष्टिः=शरीरं यस्य सः।

दृष्ट्वैव तां बालिकां "कुतः कुतः कोशले !" इत्युदीर्य, तामङ्के जग्राह।

साऽपि प्रक्षिप्य दाडिम-खण्डम्, निरस्य च कोरक-स्तबक-क्रीडनकम्, तं कराभ्यां कण्ठे गृहीत्वा, मुक्तकण्ठं रुरोद।

वृद्धोऽपि चैकं करं तत्पृष्ठे विन्यस्य, अन्येन च तस्याः शिरः परिमृशन्, "कोशले ! कानि पातकानि पूर्वजन्मनि कृतवत्यसि ?, यद्बाल्य एव त्वत्पिता सङ्ग्रामे म्लेच्छ-हतकैर्धर्मराज-नगराद्धन्यद्धन्यः कृतः। माता च तव ततोऽपि पूर्वमेव कथावशेषा संवृत्ता, यमलौ भ्रातरौ च तव द्वादशवर्षदेश्यावेवाऽऽखेट-व्यसनिनौ, महार्ह-भूषण-भूषितौ, तुरगावारुह्य वनं गतौ, दस्युभिरपहृताविति न श्रूयते तयोर्वार्ताऽपि, त्वं तु मम यजमानस्य पुत्रीति स्वपुत्रीव मयैव सह नीता, वद्धर्यसे च। अहह ! कथं वारं वारं बालैव सुन्दर-कन्या-विक्रय-व्यसनिभिर्यवन-वराकैरपह्रियसे ? भगवदनुग्रहेण च कथं कथमपि मत्कर-मुक्ता, पुनः प्राप्यसे। परमात्मन् ! त्वमेव रक्षैनामनाथां दीनां क्षत्रिय-कुमारीम्"-इति सकरुणं विललाप।

तदाकर्ण्य, सर्वेऽपि चकिताः, स्तब्धाः, अश्रुमुखाश्च संवृत्ताः। कुटीराध्यक्षो ब्रह्मचारी च निजमपि किञ्चिद् बन्धु-वियोगदुःखं

मुक्तः=अप्रतिहतः, कण्ठो यस्यां क्रियायां तदिति क्रियाविशेषणमिदम्। क्रियाविशेषणानामेकत्वं कर्मत्वञ्च स्वाभाविकप्रायम्।

धर्मराजस्य=वैवस्वतस्य, नगरस्य, अध्वनि=मार्गे। अध्वन्यः=पान्थः। मरणं न वाच्यमितीत्थं कथयति। आखेटे=मृगयायाम्, व्यसनं ययोस्तौ। महार्हैः=बहुमूल्यैः, भूषणैः=अलङ्करणैः, भूषितौ।

बन्धुवियोगदुःखं स्मारित इव=अजानानोऽपि जनः पूर्वजन्मादिपरि-

स्मारित इव, बाष्प-व्रजोद्गम-दुर्दिन-ग्लपित-मुखः, कथं कथमपि धैयमाधाय, वदनं पटेन परिमृज्य, पुनरवदधे।

तावत्कुटीराद् बहिः कस्मिंश्चित् कार्ये व्यासक्तो गौरबटुर्विलापे-नैतेन कर्णयोराकृष्यमाण इव त्वरितमन्तः प्रविवेश। पौनःपुन्येन दृष्ट्वा च तां कन्यकां देवशर्म्माणं वृद्धं ब्राह्मणं च, परिपक्व-तालीदली-भूत-कपोल-पालीकः, उदञ्चितरोममाली, त्वरित-कोष्ण-श्वास-प्रश्वास-शाली, शारदशर्वरी-शर्वरी सार्वभौम-किरण-किरणोद्भू-तोद्भूत-कीलालाली-व्यालीढ-चन्द्रकान्त-जालीभूत-लोचनः, बा-

---

चितेन मिलितोऽकस्मादेव दुःखसुखोभयोत्तरवर्त्तिनं कमप्यनुभवं प्राप्नोतीति तादृश-परिस्थितिकजनवेद्यम्। तदुक्तम्महाकविना कालिदासेन "भावस्थिराणि जननान्तर-सौहृदानी"ति, "मनो हि जन्मान्तरसङ्गतिज्ञमि"ति च। **बाष्पाणाम्**=अश्रूणाम्, **व्रजस्य**=समूहस्य, **उद्गमेन**=प्रादुर्भावेण, यद्दुर्दिनम्, तत्तुल्यम्, "मेघच्छन्नेऽह्नि दुर्दिनमि"त्यमरः, तेन **ग्लपितम्**=ग्लानम्, **मुखम्**=आननम्, यस्य सः। **अवदधे**=सावधानोऽभूत्।

परिपक्वं यत्तालीदलं तद्भूता **कपोलपाली**=गण्डस्थलं यस्य सः। यद्यपि परिपक्वपदस्य तालीविशेषणत्वेऽधिकस्वारस्यं, तथापि तादृशेऽर्थे न तत्पदोच्चारण-फलं समनुचिन्तयितुमवधारयामहे। **उदञ्चिता**=प्रोद्गता, **रोममाला**=रोमावली यस्य सः। इनिः। **त्वरिताभ्याम्**=शैघ्र्ययुताभ्याम्, **कोष्णाभ्याम्**=ईषदु-ष्णाभ्याम्, श्वासप्रश्वासाभ्यां **शालते**=शोभते। इनिरत्रापि। शरदि भवा **शारदी**, सा चासौ **शर्वरी**=निशीथिनी, तस्याः **शर्वरी सार्वभौमस्य**=शशाङ्कस्य, **किरणानाम्**=दीधितीनाम्, **किरणेन**=क्षेपणेन, **उद्भूतोद्भूतम्**=अत्यन्तं निर्या-तम्, यत् **कीलालम्**=पानीयम्, "पयः कीलालममृतमि"त्यमरः, तस्य **आली**=

प्यावरुद्ध-कण्ठः कमपि वृत्तान्तं स्मारित इव, कमपि चिरविनष्टं प्रेयांसं प्रापित इव, किमपि चिरानुभूतं दुःखं पुनरनुभावित इव च, स्मारं स्मारमिव किमपि, स्वसमानदशं श्यामबटुं सम्बोध्य, कातरेण, भज्यमानेन, कम्पमानेन च स्वरेणाचकथत्—

"श्याम ! श्याम ! शृणोपि ?"

अथ श्यामबटुरपि, अश्रुभिः स्नातो गौरस्य करं गृहीत्वा, "तात ! शृणोमि, सेयं "सौवर्णी"अस्मद्भगिनी, स चायं पूज्यपादः पुरोहितः" इति कथयन्, गौरमपि प्रकटं रोदयन्, रुरोद ।

तदाकर्ण्य, क्षणं सर्वेऽपि कुटीरस्थाः काष्ठ-विग्रहा इव, चित्र-लिखिता इव च संवृत्ताः ।

देवशर्माऽपि च स्तब्धीभूतामिव कन्यकां तस्मिन्नेव कुशविष्टर उपवेश्य, चक्षुषी स्थिरीकृत्य, "वत्सौ ! किं वीरस्य खड्गसिंहस्य तनयौ युवाम् ?" इति कथयन्, वली-पलितौ, वार्द्धक्य-वेपमानौ बाहू प्रससार । तौ चाऽऽत्मनः पित्रोरपि पूजनीयं पुरोहितं साष्टाङ्गं प्रणेमतुः । स च कथमप्युत्थाय, उत्थाप्य च तौ, समाश्लिष्य, स्वनयन-वारिधाराभिस्तावभ्यषिञ्चत् ।

पङ्क्तिः, तया व्यालीढः=भूषितः, यश्चन्द्रकान्तः=तन्नामा मणिविशेषः, तत्तुल्ये जालीभूते लोचने यस्य सः । शर्वरी-शर्वरी, किरण-किरणेत्यत्र यमकम् , अनुप्रासस्तु सर्वत्र । प्रसादो गुणः, गौडी रीतिः । **प्रेयांसम्**=अतिशयप्रियम् । **स्वेन समाना दशा**=अवस्था यस्य तम् । **भज्यमानेन**=त्रुट्यता । **कम्पमानेन**=सवेपथुना । **तात !**=भ्रातः ! , । **वलीपलितौ**=जरसा शौक्ल्ययुतकेशौ । **अभ्यषिञ्चत्**="प्राक्सितादड्व्यवायेऽपी"ति षत्वम् ।

ततो मुहूर्त्तं यावत्तु परितः प्रसर्पिभिः करुणोद्गार-प्रवाहैरेव पर्यपूर्यत सा कुटी ।

अथ कथमपि रिङ्गत्तुङ्ग-तिमिङ्गिलगिल-परिवर्त्त-प्रसङ्गसङ्ग-सभङ्ग-तरङ्ग-रङ्ग-प्राङ्गण-सोदरीभूतं हृदयं वशीकृत्य, अनुजां सुवर्ण-वर्णां सौवर्णीनाम्ना बाल्य एव प्रसिद्धां कोशलामङ्के संस्थाप्य, समुपविष्टे गौरे, श्यामेऽपि च, तस्या एव समीपे समुपविश्य, तस्या एव पृष्ठं परिमृजति पूज्यपादे पुरोहिते क्रियासमभिहारेणोद्गच्छतो बाष्पान् पटान्तेन परिहरति, कुटीराध्यक्षः कुतुक-परवशः संबोध्य गौर-श्यामौ, समुवाच—

"वत्सौ गौर-श्यामौ ! जानेऽहं वां क्षत्रियोचिताचारेषु चातन्द्रितौ, सनातनधर्म-विप्लवासहनौ, नीतिकुशलौ, परोपकारव्यस-

---

करुणोद्गारस्य=करुणरसोद्भूतेः, प्रवाहैः=धाराभिः। उत्प्रेक्षा। पर्यपूर्यत=पूरिताऽभूत् ।

अथ कुटीराध्यक्षो गौरश्यामौ समुवाचेति सम्बन्धः। रिङ्गन्=सञ्चलन्, यः-तुङ्गः=सुमहान्, तिमिङ्गिलगिलः=तन्नामा मत्स्यविशेषः। "अस्ति मत्स्यस्तिमिर्नामशतयोजनविस्तरः । तिमिङ्गिलगिलोऽप्यस्ति तद्गिलोऽप्यस्ति राघवः" इति हनुमद्वचनम्। तस्य परिवर्तः=पार्श्वपरिवर्त्तनम्, तस्य प्रसङ्गस्य=अवसरस्य, सङ्गेन=संसर्गेण, सभङ्गानाम्=समुच्छलितानाम्, तरङ्गाणाम्=वीचीनाम्, रङ्गप्राङ्गणस्य=नर्त्तनचत्वरस्य, सोदरीभूतम्=समानोदरशयितीभूतम्, तुल्यमित्यर्थः। हृदयम्="हृदयं स्वान्तं हृन्मानसं मन' इत्यमरः। अनुप्रासः। प्रौढिरर्थगुणः। परिमृजति=हस्तस्पर्शं कुर्वति। क्रियासमभिहारेण=मृशं पौनःपुन्येन च। कुतुकपरिवशः=सकौतूहलः। सनातनधर्मस्य विप्लवम्=

निनौ, दुर्बलात्कार-परायण-तुच्छ-यवनच्छेदेच्छोच्छलच्छटाच्छन्नौ, बालावप्यबाल पराक्रमौ, सकल-कला-कलाप-कोविदौ, गुणिगण-गणनीयौ च, किन्तु नाद्यावधि कदाऽपि भवतोर्जन्मस्थानादिप्रश्न-प्रसङ्गोऽभूत्, आकर्ण्य च भवतोर्दुःखमयमपि विलापमयमपि चाऽऽलापं, महत् कुतूहलमस्माकं वर्वर्ति । तत्समाश्वस्य, धैर्यमाधाय, संक्षेपेण कथ्यतां का भवतोर्जन्मभूः? कथमत्राऽऽगतौ? किमेपा सहोदरा स्वसा? सत्यमेव किं भुवं विरहय्य लोकान्तरं सनाथितवन्तौ युष्मत्पितरौ? क्व यौष्माकीण-पैतृपितामहिक-सम्पत्तिः? को भवतोरुद्देशः? इत्यादि।"

तदाकर्ण्य, चक्षुषी विमृज्य, मुखं प्रोञ्छ्य, कण्ठं रुन्धतो बाष्पान् कथमपि संरुध्य, इन्दीवरयोरुपरि भ्रमतो भ्रमरानिव,

---

विनाशं प्रलयं वा; असहमानौ। दुर्बलात्कारे=प्रसह्य कार्यकरणे, परायणानाम्=निरतानाम्, तुच्छानाम्=नीचानाम्, यवनानाम्, छेदस्य=खण्डनस्य, इच्छया=अभिलाषेण, उच्छलन्त्या=उद्गच्छन्त्या, छटया=हार्दावस्थाविशेषेण, आच्छन्नौ=व्याप्तौ। अनुप्रासः। अबालपराक्रमौ=महाबलौ। विरोधाभासः। सकलस्य=भेदोपभेदसहितस्य, कलाकलापस्य=कलासमूहस्य, कोविदौ=विज्ञातारौ। धैर्यमादाय=धीरतामानीय। यौष्माकीणा=युष्मत्स्वामिका, पैतृपितामहिकी=वंशपरम्पराप्राप्ता, सम्पत्तिः। अयमेव युक्तः पाठः, उभयत्र वृद्धिघटितस्त्वगतिकगत्यनुशतिकादित्वकल्पनापत्त्या न शोभत इति वैयाकरणाः।

लोचनयोरश्वितान् केशानपसार्येति सम्बन्धः। उत्प्रेक्षते-इन्दीवरयोः=कमलयोः उपरि भ्रमतः=ऊर्ध्वं चलतः।

लोचनयोरञ्चितान्, कुञ्चित-कुञ्चितान्, मेचकान्, कचानपसार्य, निस्तन्द्रेण मन्द्रेण स्वरेण, गौरसिंहो वक्तुमारभत—

"अस्ति कश्चन धैर्य-धारि-धुरन्धरैः, धर्मोद्धार-धौरेयैः, सोत्साह-साहस-चञ्चच्चन्द्रहासैः, सुशक्ति-सुशक्तिभिः, सद्यश्छिन्न-परिपन्थि-गल-गलच्छोणित-च्छुरित-च्छन्न-च्छुरिकैः, भयोद्भेदन-भिन्दिपालैः, स्व-प्रतिकूल-कुलोन्मूलनानुकूल-व्यापारव्यासक्त-शूलैः, घन-विघ्न-विघट्टक-घर्घरा-घोष-घोर-शतघ्नीकैः, प्रत्यर्थि-

---

निस्तन्द्रेण=तन्द्राशून्येन, मन्द्रेण=गम्भीरेण ।

अस्ति कश्चन क्षत्रियवर्यैरार्यवर्यैरैर्व्याप्तो राजपुत्रदेश इति सम्बन्धः । विशिनष्टि-**धैर्यधारिधुरन्धरैः**=विशालधीरताशालिभिः । धर्मोद्धारे **धौरेयैः**=अग्रेसरैः । **सोत्साहेन**=साध्यवसायेन, **साहसेन**=बलोद्भूतिशीघ्रप्रवृत्त्या, **चञ्चन्तः**=चमत्कुर्वन्तः, **चन्द्रहासाः**=असयो येषां तैः । **सुशोभनायाः**=अकुण्ठितायाः, **शक्तेः**=कृपाण्याः, **सुशक्तिः**=शोभनसामर्थ्यं येषां तैः । **सद्यश्छिन्नेभ्यः**=तत्कालभिन्नेभ्यः, **परिपन्थिनाम्**=शत्रूणाम्, **गलेभ्यः**=कण्ठेभ्यः, **गलताम्**=स्रवताम्, शोणितानाम्, **छुरितैः**=बिन्दुभिः, **छन्नाः**=लिप्ताः, **छुरिकाः**=असिधेनवो येषां तैः । **भयोद्भेदनौ भिन्दिपालौ**=येषां तैः । उद्भेदनपदमर्शआद्यजन्तम् । भीतिच्छेदनकारणीभूता इत्यर्थः । **भिन्दिपालाः**=नालिकास्त्राणि, 'पिस्तौल' इति हिन्दी । वीरेष्वेव वा भिन्दिपालत्वमारोप्य भयोद्भेदने भिन्दिपालतुल्यैरिति व्याख्येयम् । **स्वप्रतिकूलानाम्**=शत्रूणाम्, **कुलानाम्**=अन्वयानाम्, **उन्मूलनानुकूलव्यापारेषु**=विध्वंसनोचितकर्तव्येषु, **व्यासक्तानि**=संलग्नानि, **शूलानि**=कुन्ता येषां तैः । **घनानाम्**=विपुलानाम्, **विघ्नानाम्**=शत्रुकृतोपद्रवाणाम्, **विघट्टकाः**=विमर्दकाः । **घर्घराघोषेण**=घर्घरध्वनिना, **घोराः**=भयावहाः, **शतघ्न्यः**=

शुण्डि-शुण्डाखण्डनोद्दण्ड-भुशुण्डीकैः, प्रचण्ड-दोर्दण्ड-वैदग्ध्य-भाण्ड-प्रकाण्ड-काण्डैः, क्षत्रिय-वर्यैरार्य-वर्यैरर्य-वर्यैश्च व्याप्तो राजपुत्र-देशः । यत्र कोष-पूरिताः काञ्चनमया इव सानुमन्तः, महार्हमणिगण-जटित-जाम्बूनद-भूषण-भूषिता गन्धर्वा इव जनाः, विचित्र-गवाक्ष-जालाट्टालिकाङ्गण-कपोतपालिका-चत्वर-गोष्ठ-

---

शतमारिकाः, येषां तैः । शतघ्नी लोके "तोप" इति कथ्यते । णभ-तुभ-हिंसायामित्यस्मान्निष्पन्न "तोभ" शब्दापभ्रंशोऽसौ "तोप" शब्द इति "सप्तद्वीपा वसुमती"-त्यादिभाष्यतत्त्ववेदिनः । **प्रत्यर्थिशुण्डिनाम्**=शत्रुकरिणाम्, **शुण्डानाम्**=कराणाम्, **आखण्डनेन**=कर्त्तनेन, उद्दण्डा भुशुण्ड्यो येषां तैः । **प्रचण्ड-दोर्दण्ड-वैदग्ध्य-भाण्डे**=प्रबलबाहुदण्ड-पाण्डित्य-सदने । **प्रकाण्डानि**=प्रशस्तफलदाः प्रशस्तफलाश्च, **काण्डाः**=बाणा येषां तैः । **आर्येषु वर्यैः**=ब्राह्मणैः । क्षत्रियाणां प्रथमोच्चारणं तु तेषामेव तत्राधिक्यप्रदर्शनार्थम् । सङ्ग्रामे तेषामेव प्राबल्यबोधनार्थञ्च । ब्राह्मणा अपि देशरक्षणार्थं सन्नद्धा एवासन्निति तत्त्वम् । **अर्याः**=वैश्याः । "अर्यः स्वामिवैश्ययोः" ।

कोशपूरिताः=निधानपूर्णाः । **काञ्चनमया इव**=हिरण्मया इव । **सानुमन्तः**=शिखरिणः । **महार्हाणाम्**=बहुमूल्यानाम्, **मणीनाम्**=हीरकादीनाम्, **गणेन**=समूहेन, **जटितैः**=मिलितैः, **जाम्बूनदभूषणैः**=सुवर्णालङ्करणैः, **भूषिताः**=शोभिताः । **गन्धर्वा इव**=देवयोनिविशेषा इव । **विचित्राः**=शोभना गवाक्षाद्या येषु तादृशाः । **गवाक्षः**=वातायनम् । "झरोखा"इति हिन्दी । **जालम्**=वायुप्रवेशार्थमार्गः, "जाली" इति हिन्दी । **अट्टालिकाः**=प्रस्तरादिनिर्मितं महासदनम् । **अङ्गणम्**=अजिरम् । **कपोतपालिका**=काष्ठरचितं पक्षिवासस्थानं विटङ्कम् । **चत्वरम्**=चतुष्पथम् । अङ्गणस्य पृथगुच्चारणेन नात्र

भित्तिकाः, विश्वकर्म-रचिता इव गृहाः, सादिकरस्थ-कशाग्र-चालन-सङ्केत-सञ्चलित-सप्तिसमूह-शफसम्मर्द-समुद्भूत-धूलिधूसरिताश्च मार्गाः। अस्ति तस्मिन्नेव राजपुत्रदेशे, उदयपुरनाम्नी काचन राजधानी, यत्रत्याः क्षत्रिय-कुल-तिलकाः, यवनराज-वंश-वदता-कर्दम-सम्मर्देन कदाऽप्यात्मानं कलङ्कयामासुः" इति कथयत्येव गौरसिंहे, ब्रह्मचारिगुरुरपि कोष्णं निःश्वस्य,—

"को न जानीत उदयपुर-राज्यम्? यदीय-चित्रपूर-दुर्गे परः-सहस्राः क्षत्रिय-कुलाङ्गनाः, कमला इव विमलाः, शारदा इव विशारदाः, अनसूया इवानसूयाः, यशोदा इव यशोदाः, सत्या इव

तद्वाचकतेति वेदितव्यम्। **गोष्ठम्**=गोशाला। **भित्तिः**=कुड्यम्। **विश्वकर्मणा**=देवशिल्पिना, **रचिता इव**=स्वयं निर्मिता इव। **सादिकरस्थानाम्**=अश्ववारहस्त-स्थितानाम्, **कशानाम्**=अश्वताडनीनाम्, **अग्रस्य**=प्रान्तस्य, **चालनसङ्के-तेन**=धावनप्रकारेण, **सञ्चलितस्य**=गच्छतः, **सप्तिसमूहस्य**=वाजिनिवहस्य, **शफसम्मर्दैः**=खुराक्षेपैः, **समुद्भूताभिः**=उच्छलिताभिः, **धूलिभिः**=रजोभिः, **धूसरिताः**=मृन्मिभाः। यवनराजवंशवदतैव कर्दमः, तत्सम्मर्दैः=तत्क्षेपैः। **न कलङ्कयामासुः**=न कलङ्कितं चक्रुः। **चित्रपूरदुर्गे**="चित्तौड़ गढ़"इति नितरां प्रसिद्धे! केचित् "चित्रकूट" शब्दापभ्रंशं मन्यन्ते "चित्तौड़" शब्दम्। भग वद्रामभद्रतनयलववंशीया हि भूमिपाला उदयपुरीया इति रामविपिनचित्रकूट-नाम्ना तत्प्रसिद्धतायामनुकूलस्तर्कः। अमरमङ्गले तर्करत्नभट्टाचार्यास्तु चितं=व्यू-ढम्, उरो यस्येति व्याख्याय "चितोरः" शब्दमेवाजीग्रहन्निति वेदितव्यम्। "कमला श्रीर्हरिप्रिये" त्यमरः। **शारदा**=सरस्वती। **विशारदाः**=पण्डिताः। विरोधाभासः। **अनसूया**=अगस्त्यपत्नी। **अनसूयाः**=असूयारहिताः। असूया=

सत्याः, रुक्मिण्य इव रुक्मिण्यः, सुवर्णा इव च सुवर्णाः, सत्य इव सत्यः. सम्भाव्यमान-यवन-बलात्कार-धिक्कारोर्ज्जस्वल-तेजस्काः, योगाग्निनेव, पतिविरहाग्निनेव, स्वक्रोधाग्निनेव च, सन्दीपितासु, ज्वाला-जालाञ्चितासु, चितासु, स्मारं स्मारं स्वपतीन्, पश्यतामेव स्वकीयानां परकीयाणां च क्षणात् पतङ्गतामङ्गीकृत्य, गङ्गाधरस्याङ्ग-भूषणतामगमन्"—इति मन्दं व्याजहार।

गुणेषु दोषाविष्करणम्। स्वस्मिन् स्वभेदाभावाद्भेदाश्रयोपमानोपमेयभावानुपपत्ति-लक्षणोऽत्रापि विरोध उत्थाप्यो वारणीयश्च प्रदर्शितार्थकत्वेनेति विरोधाभासः। **यशोदा**=कृष्णमाता। **यशोदाः**=यशोदायिन्यः। न केवलं पतिव्रताभिस्तासामेव कीर्त्तिरेधतेऽपि तु तत्पतीनामपि। "व्यालग्राहो यथा व्यालं बिलादुद्धरते बलादि"ति मानवश्च शासनमत्र भवति। **सत्या**=सत्यभामाभिधाना श्रीकृष्णपत्नी, नामैकदेश-ग्रहणन्यायात्। **सत्याः**=सत्यभाषिण्यः। "अर्श आद्यजन्तम्"। **रुक्मिणी**=कृष्ण-पत्नी। **रुक्मिण्यः**=सुवर्णवत्यः। सुशोभना वर्णा यासां ताः सुवर्णाः=क्षत्रियाद्याः। **सुवर्णाः**=शोभनवर्णवत्यः। सुन्दर्य इति यावत्। **सती**=शङ्करगेहिनी। **सत्यः**= पतिव्रताः। यशोदादिषु व्यक्तिमात्रवाचकेषु बहुत्वं गौरवप्रदर्शनाय, तन्मुखेनोप-मानोपमेयभावनिर्वाहाय च। अनसूयास्थलीयदिशा सर्वेष्वेषु विरोधाभासः। **सम्भाव्यमानस्य**=समनुचिन्त्यमानस्य, यवनबलात्कारस्य, **धिक्कारे**=तिरस्करणे, **ऊर्जस्वलम्**=बलवत्, तेजो यासां ताः। **सन्दीपितासु**=सुप्रज्वलितासु। कीदृशाग्निहेतुकं प्रज्वलनमित्युत्प्रेक्षते-**योगाग्निनेव**=योगसामर्थ्यात्समुत्पन्नेना-ग्निनेव। पत्युर्विरहाज्जायमानेन वह्निनेव। स्वक्रोधादुद्भूतदहननेनेव। **ज्वाल-जालाञ्चितासु**=कीलसमूहसमवेतासु। **पतङ्गताम्**=शलभताम्। **गङ्गाधरस्या-ङ्गभूषणम्**=भस्म, तद्भावम्, भस्मताम्। "पतिलोकमभीप्सन्ती"त्यादिभिः

तदाकर्ण्य, करुणया, दुःखेन, कोपेन, आश्चर्येण, वैमनस्येन, ग्लान्या च, क्षालित-हृदयेषु निखिलेषु, गौरसिंहः पुनः स्व-वृत्तान्तं वक्तुमुपचक्रमे—

"तद्राज्यस्यैवान्यतमो भू-स्वामी खड्गसिंहो नामास्मत्तात-चरण आसीत्।"

खड्गसिंहनाम्ना परिचित इव ब्रह्मचारी समधिकमबाधित। स च पूर्ववदेव वक्तुं प्रावृतत्।

"अस्मज्जननी तु बालावेवाऽऽवां स्तनन्धयामेव चास्मत्सहोदरां सौवर्णीं परित्यज्य, भुवं विरहयाम्बभूव। अस्मत्तातचरणश्च कैश्चित्तुरुष्कैर्लुण्ठकप्रायैर्युद्ध-क्रीडां कुर्वन्, पृष्ठतः केनापि विशाल-भल्लेनाऽऽहतो वीरगतिमगमत्। ततः पुरोहितेनैव पाल्यमानावावामपि यमलौ भ्रातरौ, गौर-श्यामौ, एकदा मित्रैः सहाऽऽखेटार्थं

पतिलोकप्राप्तेः फलस्य प्रदर्शितत्वेन शिवधामप्राप्त्याद्यर्थो मन्दबुद्धिसंवेद्य एवेति वेद्यम्। सौकुमार्यं गुणः।

करुणया क्षालितहृदयेष्वित्यादिरूपेण तृतीयान्तषड्कस्य क्षालनेऽन्वयः, क्षालनञ्चात्रोपचारेण व्यापनार्थकम्, करुणाद्यतिशयव्यञ्जनाय च तदाश्रयणम्, दीपकालङ्कारः।

अबाधित=पीडामन्वभूत्।

स्तनन्धयाम्=पयःपानरताम्। विरहयाम्बभूव=परितत्याज। तुरुष्कैः= "तुर्क" इति हिन्दी। वीराणां गतिम्=मोक्षम्।

"द्वावेव पुरुषौ लोके सूर्यमण्डलभेदिनौ।
परिव्राड् योगयुक्तश्च रणे चाभिमुखो हतः॥" इति स्मृतिः।

निःसृतौ, तुरगौ चालयन्तौ, मार्ग-भ्रष्टौ, अकस्मात् काम्बोजीय-दस्युवारेणाऽऽवृतौ, तेनैव विहृत-महार्ह-भूषणौ, गृहीताश्वौ, बद्धौ च, सहैव वनाद्वनमनायिष्वहि । "यद्यपि शत्रुसन्ताना निर्दयं हन्तव्या एव; तथापि नासा-भूषण-मौक्तिके इव, वीणा-तुम्बाविव, श्यामकर्ण-हयाविव च, मनोहर-रूपौ, समानाकारौ, समान-वयस्कौ, समान-परिणाहौ, समान-स्वभावौ, समान-स्वरौ, समान-गुणौ, केवलं वर्णमात्रतो भिन्नौ, रामकृष्णाविवामू गौर-श्यामौ, बालकौ। तदवश्यं बहुमूल्याविति कुत्रापि कस्यचिदपि महा-धनस्य हस्ते विक्रयणीयौ" इति तेषां घोरतरान सँल्लापान् शृण्वन्तौ, कथं पलायावहे ? कथं वा मुच्यावहे ?" इत्यनवरतं चिन्तयन्तौ, कथं कथञ्चित् कञ्चित् समयमत्ययापयाव।

"अथैकदा कञ्चित्पान्थ-सार्थमवलोक्य, तल्लुण्ठयिषया सर्वप्वपि तस्य पन्थानमेवानुसृतेष्वावाभ्यामपि पलायनावसरो लब्धः। यावच्चाऽऽवां वस्त्राणि परिधाय, परिकरेऽसिधेनुकां बद्ध्वा, बाहुमूले निस्त्रिंशं चर्म्म च लम्बयित्वा, तद्भशुण्डिकानामेवैकामेकामल्पीयसीमात्मोत्तोलन-योग्यां सज्जां करे धृत्वा, उपकारिकाया

यमलौ=सहजौ। "जुड़वाँ" इति हिन्दी। काम्बोजीयदस्युवारेण=कम्बोजदेशीयतस्करसमूहेन। शत्रुसन्तानाः=रिपुवंशाः। "वंशोऽन्ववायः सन्तान"इत्यमरः। समानपरिणाहौ=समविशालतौ।

पान्थसार्थम्=पथिकव्रजम्। परिकरे=गात्रबन्धे। "भवेत्परिकरो व्राते पर्यङ्कपरिवारयोः। प्रगाढगात्रिकाबन्धे विवेकारम्भयोरपी"ति विश्वः। असिधेनुकाम्=छुरिकाम्, "छुरिका चासिधेनुके"त्यमरः, निस्त्रिंशम्=खड्गम्।

बहिर्निर्गतौ तावद् दृष्टम्, यदेको रक्षकः, खड्गहस्तो नौ बहिर्गमनाद्परयतीति ।"

"अथाऽऽवाभ्यां भुशुण्डिकां सन्धायोक्तम्-"अलमलं कदर्य ! किमप्यधिकं वक्ष्यसि, तत्स्थानात्पादमेकमपि च प्रचलिष्यसि चेत् क्षणेन परेतपति-पालित-पुरी-पान्थं विधास्यावः" इत्याकलय्य, भयेन काष्ठभूते तस्मिन् मूढ-रक्षके, मयि च तथैव बद्ध-लक्ष्ये स्थिते, मदिङ्गितानुसारेण श्यामसिंहस्तस्या एवोपकार्य्यायाः प्रान्ते बद्धानां फेन-वर्षिणामश्वानां कौचिच्चण्डवेगौ श्यामकर्णावाजानेयावुन्मुच्य, वल्गामायोज्य, सर्वतः सज्जीकृत्य चैकमारुह्य, रक्षकोपरि भुशुण्डिकां सज्जीकृतवान्। ततश्चाहमप्यपरं हयमारुह्य, तस्य ग्रीवामास्फोट्य, नर्तयन्, रक्षकं साम्रेडं तर्ज्जनैर्हतोत्साहं मृतप्रायं च विधाय, श्यामसिंहमिङ्गितवान्।"

"अथाऽऽवां द्वावपि वायुवेगाभ्यामश्वाभ्यामज्ञातेनैव पथा, उपत्यकात उपत्यकाम्, वनाद् वनं, प्रान्तराच्च प्रान्तरमुल्लङ्घमानौ

आत्मोत्तोलनयोग्याम्=स्वोत्थापनार्हाम्। सज्जाम्=गोलिकापूर्णाम्।

उपकारिकायाः=पटभवनात्। "उपकार्योपकारिके"त्यमरः। "तम्बू" इति हिन्दी। परेतपतिना=यमेन, पालितायाः=रक्षितायाः, पुर्याः पान्थम्। मूढश्चासौ रक्षकः, तस्मिन्। किञ्चिदकुर्वाणः कोलाहलमपि नाकार्षीदिति मूढत्वम्। फेनवर्षिणाम्=भोजनकालोपरिष्टात् सुखोपविष्टाः फेनं वमन्त्यश्वा इति स्वभावः। आजानेयौ=कुलीनौ। तर्ज्जनैः=रूक्षभाषणैः। इङ्गितवान्=चेष्टया बोधितवान्, गन्तुम्।

प्रान्तरम्=दूरशून्यो मार्गः। "प्रान्तरं दूरशून्योऽध्वे"त्यमरः। "पांतर" इति हिन्दी।

तेनैव दिनेन गव्यूति-पञ्चकं प्रयातौ । सायं समये च कामपि ग्रामटिकामासाद्य, अन्यतमस्य गृहस्य द्वारं गतौ । तच्च हनुमन्मन्दिरमवगत्य, तस्मिन् प्रविष्टौ, तदध्यक्षेण केनचित् साधुना च सस्वागतमाग्रहेण वासितौ, तत्रैव निवासमकृष्वहि ।"

"अथ तत्प्रदत्तमेव हनूमत्प्रसादीभूतं मोदकादि समास्वाद्य, तस्यैव भृत्येनाऽऽनीतं यवस-भारं वाजिनोरग्रे पातयित्वा, मन्दिरस्यैव बहिर्वेदिकायामितस्ततः पर्यटन्तौ, मुहूर्त्तमावामवास्थिष्वहि ।"

"ततश्च दुग्धधाराभिरिव प्रथमं प्राचीं संक्षाल्य, भसितच्छुरितामिव विधाय, चन्दनैरिव संचर्च्य, कुन्द-कुसुमैरिवाऽऽकीर्य, गगन-सागर-मीन इव, मनोज-मनोज्ञ-हंस इव, विरहिनिकृन्तन-रौप्य-कुन्त-प्रान्त इव, पुण्डरीकाक्ष-पत्नी-कर-पुण्डरीकपत्र इव,

---

यवसभारम्=घासभारम् । अवास्थिष्वहि, "समवप्रविभ्यः स्थ" इत्यात्मनेपदम् ।

ततश्च समुदिते चैत्रचन्द्रखण्डे परितो दृक्पातमकार्षमिति सम्बन्धः । सुधादीधितिदीधितिभिर्भासितत्वमुत्प्रेक्षते-दुग्धधाराभिरिवेति । भसितम्=भस्म, "भूति र्भसितभस्मनी"त्यमरः । तच्छुरितामिव=तद्भूषितामिवेत्युत्प्रेक्षा । संचर्च्य=अनुलिप्य । देवीं विधिवत्संपूज्य जना उदयं प्राप्नुवन्ति यथा तथा सुधादीधितिः प्राचीं संपूज्योदयं लेभ इति ध्वनयति । चन्द्रखण्डं विशिनष्टि-गगनम्=नभः, तदेव सागरः=समुद्रः, तस्य मीने=मत्स्य इवेति रूपकानुविद्धोत्प्रेक्षा । मनोजस्य=मनसिजस्य, मनोज्ञे=चेतोहरे, हंस इव । विरहिणाम्=वियोगिनाम्, निकृन्तनाय=कर्त्तनाय, रौप्यस्य=रजतवदवभासमानस्य, कुन्तस्य=भल्लस्य, प्रान्त इव । रौप्यनिर्मितस्य कुन्तस्य त्वप्रसिद्धिः समुचितकार्योकारिता चेति

शारदाभ्र–सार इव, सप्तसप्ति–सप्ति–पाद–च्युते राजत–खुरत्र इव, मनोहरता–महिला–ललाट इव, कन्दर्प–कीर्तिलताङ्कुर इव, प्रजा–जन–नयन–कर्पूरखण्ड इव,तमी–तिमिर–कर्त्तन–शाणोल्लीढ–निस्त्रिंश इव च, समुदिते चैत्र–चन्द्र–खण्डे, तत्प्रकाशेन स्फुटं प्रतीयमानासु सर्वासु दिक्षु, अहं परितो दृक्पातमकार्षम् , अद्राक्षञ्च यदुत्तराभिमुखं, तद् विशालं मन्दिरमस्ति, तद्द्वारस्योभयतः सुधालिप्त–भित्तिकायां विशालैः सिन्दूराक्षरैः, 'जयति हनुमान्', 'रामदूतो विजयतेतराम्', 'विजयतामक्षक्षयकारी'–इति बहूनि वाक्यानि गदादिचिह्नानि च लिखितानि सन्ति । तत उत्तरस्यामेकः स्वल्पः शैल–खण्डः, पूर्वस्यां गहनं वनम् , पश्चिमायां च स्वल्पमेकं पल्वलमासीत् । यद्यप्यसौ पर्वत–खण्डो नात्यन्तं भयानक इव, तथाऽपि

स्पष्टमेव । पुण्डरीकाक्षपत्न्याः=विष्णुस्त्रियाः, लक्ष्म्याः, करपुण्डरीकपत्रे=हस्तस्थकमलदले । शरदि भवं शारदम् ,अभ्रम्=मेघः,तत्सारे=तत्तत्त्वांशे । सप्तसप्तिः=सूर्यः, तस्य सप्तिः=अश्वः, तत्पादच्युते=तत्पादपतिते । राजते=रौप्ये च तस्मिन् खुरत्रे="नाल"इति लोके ख्याते । मनोहरस्य भावो मनोहरता=सुन्दरता, सैव महिला=वनितेति रूपकम्, ललाटे । सुन्दर्याः स्त्रिया ललाटं चन्द्रार्धखण्डसदृशमिति सुप्रसिद्धमुपमानोपमेयविदाम् । कन्दर्पकीर्त्तिरेव लता=व्रततिः, तदङ्कुरतुल्ये । शशाङ्केन हि कन्दर्पकीर्तिर्वर्ध्यते । प्रजाजननयनानाम्, कर्पूरखण्डे=हिमवालुकाखण्डे । तमीतिमिरकर्त्तनाय=रात्र्यन्धकारनाशनाय, शाणेन=कषेण, उल्लीढे=तेजिते, । निस्त्रिंशे=खड्गे । यद्यपि खड्गधाराश्यामतावर्णनमेव कविसमयख्यात्यनुकूलम्, तथापि शाणोल्लीढत्वस्य चमत्कृतिविशेषाधायकत्वेनेह तदतिक्रम्य तथाभिहितमिति वेदितव्यम् । सुधया=चूर्णेन "चूना"इति

विविधगण्डशैलावृतः, झर-झर्झर-ध्वनि-पूरित-दिगन्तरालः, महीरुह-समूह-समावृतः, उच्चावच-सानुप्रचय-सूचित-विविधकन्दरश्चाऽऽसीत्। चन्द्र-चन्द्रिका-चाकचक्यात् स्फुटमवालोक्यन्तैतस्योपत्यकाः।

"ततश्च झिल्ली-झङ्कारेणेव, केनचिद् विलक्षणेनानाहतध्वनिनेव पर्य्यपूर्यत वसुधा, विचित्र एष कश्चन परःसहस्र-तानपूर-षड्जस्वर-सोदरो वन-रात्रि-ध्वनिः, तमेव स्वरं गम्भीरं विशकलय्य, आकर्णयता, समश्रावि कीचकध्वनिरपि। तत्राप्यवदधता, साक्षादकारि मधुकर-निकर-झङ्कारः। पुनरेकाग्रतामङ्गीकुर्वता, समाकर्णि स्रोतस्संसरण-सरत्कारः। तस्मिन्नपि च लयमिवाऽऽकलयता,

हिन्दी, लिप्तायां भित्तिकायाम्। **पल्वलम्**=अल्पोदकं सरः। **झरस्य**=वारिप्रवाहस्य, "वारिप्रवाहो निर्झरो झर" इत्यमरः। झर्झरध्वनिना पूरितानि दिगन्तरालानि यस्य सः। **महीरुहाणाम्**=वृक्षाणाम्, समूहेन समावृतः, अतिघनीभूतवृक्षकः। **उच्चावचानाम्**=निम्नोन्नतानाम्, **सानूनाम्**=शृङ्गाणाम्, **प्रचयेन**=समूहेन, **सूचिताः**=प्रकटीकृताः, **विविधाः**=अनेकाः, कन्दरा यस्य सः। **चन्द्रचन्द्रिकाचाकचक्यात्**=शशाङ्कातपद्युतेः।

झिल्ली=झङ्कारी, तस्या **झङ्कारेण**, रात्रावदृश्या स्वनति झिल्ली प्रावृड्काले। **अनाहतध्वनिना**=अव्यक्तशब्देन। **परस्सहस्राणां**, तानपूराणां यः षड्जस्वरः, तत्सोदरः=तत्तुल्यः। **कीचकध्वनिः**=वेणुविशेषशब्दः। "वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धता" इत्यमरः। **अवदधता**=ध्यानं ददता। **साक्षादकारि**=प्रत्यक्षीकृतः। **मधुकर-निकर-झङ्कारः**=द्विरेफव्रातगुञ्जनम्। **एकाग्रताम्**=एकचित्तताम्। **अङ्गीकुर्वता**=स्वीकुर्वाणेन। **स्रोतसां संसरणस्य**=वहनस्य, **सर-**

समन्वभावि समीरण–समीरित–किशलय-पारिप्लवता–प्रभूत–स्वनः, तत्रापि च स्थिरतां बिभ्रता, प्रत्यक्षीकृतं सुधा–धारामप्यधरीकुर्वत्, वीणा–रणनमपि विगणयत्, मधु विधुरयत्, मरन्दं मन्दयत्, कल–काकली–कलन–पूजितं कोकिल–कुल–कूजितम्। ततश्च बहूनामेव मधुर–कण्ठानां वन्य–पतत्रिणां स्थगित–मन्थराऽऽरावाः समाकर्णिषत। अथानुभवन् धीर–समीर–स्पर्श–सुखं, साम्रेडमवलोकयंश्च तारकितं नभः, स्मारं स्मारं स्वगृहस्य, महाचिन्ता–पारावार इवाहं न्यमाङ्क्षम्। ततः पृष्ठतो भित्तिकामाश्रित्य, करौ कटि–प्रदेशे संस्थाप्य, साम्मुखीन–शिखरि–शिखरे चक्षुषी स्थिरयित्वा, आत्मानमपि विस्मृत्य, व्यचारयम्—

त्कारः=सरदित्यनुक्रियमाणः शब्दः। आकलयता=सम्मेलयता। समीरणेन=पवनेन, समीरितानाम्=सञ्चालितानाम्, किशलयानाम्=पल्लवानाम्, पारिप्लवनायाः=स्फुरमाणतायाः, प्रभूतः=प्रचुरः, स्वनः। तत्रापि स्थिरतां बिभ्रता प्रत्यक्षीकृतं कोकिलकुलकूजितमिति सम्बन्धः। कूजितं विशिनष्टि–सुधाधारामिति। अधरीकुर्वत्=निम्नांशे स्थापयत्। विगणयत्=विगीतं गणयत्। मधु=क्षौद्रम्। विधुरयत्=अनग्रेसरतामापादयत्। कला=मधुरा, या काकली=सूक्ष्मोऽव्यक्तध्वनिः, "काकली तु कले सूक्ष्मे ध्वनौ तु मधुरास्फुटे" इत्यमरः, तस्याः कलनेन=अनुरणनेन, पूजितम्=सत्कृतम्। स्थगितमन्थराः=मान्थर्यशून्याः। ताराः शीघ्राश्चेत्यर्थः। समाकर्णिषत=श्रुताः। कर्मणि ज्ञे। तारकाः संजाता अस्मिन्निति तारकितम्=उडुगणसमेतम्। "तदस्य संजातं तारकादिभ्य इतच्"। पारावारे=समुद्रे। न्यमाङ्क्षम्=अन्वुडिषि। करयोः कटिप्रदेशे संस्थापनं चिन्तामुद्रा। साम्मुखीनशिखरिशिखरे=पुरोवर्त्तिपर्वतश्रृङ्गे। आत्मानमपि विस्मृत्य=विचारैकतानताध्याननायेदम्। लोकोक्तिरेषा।

"अहह ! दुरदृष्टोऽस्मि !! धन्यावावयोः पितरौ, यौ सुखिनावेवाऽऽवां परित्यज्य दिवं सनाथितवन्तौ, न तयोरदृष्टे पुत्र-विश्लेष-दुःखं व्यलेखि धात्रा, नितान्तं पापिनौ चाऽऽवाम्, यौ बाल्य एवेदृशीषु दुरवस्थासु पतितौ। का दशा भवेत् साम्प्रतमावयोरनुजायाः सौवर्ण्याः ? हन्त !! हतभाग्या सा बालिका, याऽस्मिन्नेव वयसि पितृभ्यां परित्यक्ता, आवयोरप्यदर्शनेन क्रन्दनैः कण्ठं कदर्थयति। अहह ! सततमस्मत्क्रोडैक-क्रीडनिकाम्, सततमस्मन्मुखचन्द्र-चकोरीम्, सततमस्मत्कण्ठ-रत्नमालाम्, सततमस्मत्सह-भोजिनीम्, बाल्य-लुलितैः, मधुर-मधुरैः, सुधा-स्यन्दनैः, दाद-दादेति-भाषणैः, आवयोर्हृदयं हरन्तीम्, क्षणमात्रमस्मदनवलोकनेनापि बाष्प-प्रवाहैः कपोलौ मलिनयन्तीम्, कथमेनां वृद्धः पुरोहितः सान्त्वयिष्यति ? अस्मज्जनकाविशेषः पुरोहित एव वा कथं नौ विना जीविष्यति ? परमेश्वर ! तथा विधेहि, यथा जीवन्तं वृद्धं पुरोहितं सौवर्णीं साक्षात् कुर्वः"—

"इति चिन्ता-चक्रमारूढ एवाऽऽत्मानं विस्मृत्य, भित्तिका-संसक्त एव शनैरस्खलम्। प्राप्तसंज्ञश्च समपश्यम्, यत्-श्यामसिंहो मन्दिर-पूजकाश्च मामुत्थापयन्ति"—इति।

क्रन्दनैः=रोदनैः। "क्रन्दने रोदनाह्वाने" इत्यमरः। अस्मत्क्रोडमेवैकं क्रीडनकम्=खेलसाधनम्, "खिलौना" इति हिन्दी, यस्यास्ताम्। अस्मन्मुखचन्द्रस्य चकोरीम्, चकोरी यथा चन्द्रमसं निभालयति तथैव साऽस्मन्मुखम्। दाद दादेति="तात तात" इति संस्कृतं, तदपभ्रंशः। प्राकृते ताद तादेति। सौवर्णीम्,=चं विनाऽपि समुच्चयः "गौरश्वः पुरुषो हस्ती शकुनिर्मृगो ब्राह्मण इती" ति भाष्यादनुमीयते।

अथाऽऽवां तेन साधुना मन्दिरस्यान्तर्नीतौ महावीर-मूर्ति-समीपे चोपवेशितौ।

ततोऽवलोक्य तां वज्रेणेव निर्मिताम्, साकारामिव वीरताम्, गदामुद्यम्य दुष्ट-दल-दलनार्थमुच्छलन्तीमिव, केशरि-किशोर-मूर्तिम्, न जाने, कथं वा, कुतो वा, किमिति वा, प्रातरन्धकार इव, वसन्ते हिम इव, बोधोदयेऽबोध इव, ब्रह्मसाक्षात्कारे भ्रम इव च, झटित्यपससाराऽऽवयोः शोकः। प्राकाशि च हृदये यद्—

"अलं बहुल-चिन्ताभिः! कश्चन पुरुषार्थः स्वीक्रियताम्, न खलु बुद्ध्यतां यदावामेव दुरदृष्टवशात् त्यक्त-कुटुम्बौ वने पर्य्यटाव-इति। किन्तु कोशलेश्वर-तनयौ राम-लक्ष्मणावपि चतुर्दश-वर्षाणि यावद् दण्डकारण्ये भ्रान्तवन्तौ"।

ततः साधोश्चरणयोः प्रणम्य, मयोक्तम्-"भगवन्! नास्त्यविदितं किमपि भवादृशानां सदाचार-दृढव्रतिनाम्। तत्कथ्यतां किमावां करवाव? कुतो गच्छाव? कथमावयोः श्रेयः-सम्पत्तिः स्याद्?" इति।

ततो हनुमत्पूजकेन सर्वमस्मद्वृत्तान्तं पृष्ट्वा, ज्ञात्वा च, काष्ठ-पट्टिकायां घृतोन्मथित-सिन्दूरेण किमपि यन्त्रमिवोल्लिख्य, चन्दनैः

वज्रेण=इन्द्रायुधेन। साकाराम्=शरीरधारिणीम्। केशरि-किशोरस्य=केशरितनयस्य, मूर्त्तिम्। झटित्यपससार शोकः=इदमेव मूर्त्तिपूजारहस्यम्। हनुमद्दर्शनेन रामलक्ष्मणस्मरणं तयोश्च स्मरणेन तद्वनवासादीनाम्।

घृतेन=सर्पिषा, उन्मथितम्=मेलितम्, सिन्दूरं तेन "महावीरी"

संचर्च्य, कुसुमैराकीर्य, धूपेन धूपयित्वा, किमपि क्षणं ध्यात्वेव च, मम हस्ते पूगीफलमेकं दत्त्वा, "वत्स ! अस्मिन् यन्त्रे कस्मिन्नपि कोष्ठे यथारुचि क्रमुकफलमिदं स्थापय" इत्यवाचि। तत एकतमस्मिन् कोष्ठे निहित-क्रमुके मयि मुहूर्त्तं कररुहाग्रेषु किमपि गणयित्वेव स मामवादीत्—

"वत्स ! कदापि मा स्म गमो गृहं प्रति, यतो मार्गे पर्वततटीषु, अरण्यानीषु च बहवः काम्बोजीया यवन-दस्यवो भवतोर्ग्रहणाय विचरन्ति। दस्युभिः क्रियासमभिहारेण चङ्क्रम्यमाणं देशमवलोक्य, भवद्ग्रामवासिनः सर्वेऽपि स्वं स्वमालयं परित्यज्य, इतस्ततो गताः"।

"ततः सौवर्णि ! सौवर्णि ! पुरोहित ! पुरोहित ! इति सक्षोभं व्याहृतवतोरावयोः" पुनः स साधुरवोचद्, यत्—

"पुरोहितोऽपि युष्मद्रत्नादिनिधिं कचन सङ्केतित-भूमिकुहरे स्थापयित्वा, एकां धात्रीं दास-चतुष्टयमेकं चाश्वं सह नीत्वा, महाराष्ट्र-पञ्चानन-परिपूरितां कोङ्कण-भूमिं प्रति प्रस्थितः"।

तदाकलय्य, सत्यं सत्यमेवमेवमिति समस्तकान्दोलनं स्वीकृतवति पुरोहिते, ततस्तत इति मुखरीभूतेषु च कुटीरस्थ-सकल-

इति हिन्दी। क्रमुकम् = पूगीफलम्। कररुहाग्रेषु = नखाग्रेषु। "पुनर्भवः कररुहो नखोऽस्त्री नखरोऽस्त्रियामि"त्यमरः।

सङ्केतितभूमेः कुहरे = विवरे। "कुहरं गह्वरे छिद्रे क्लीबं नागान्तरे पुमानि" ति कोषः। धात्रीम् = उपमातरं "धात्री स्यादुपमाताऽपि क्षितिरप्यामलक्यपी" त्यमरः।

जनेषु, भूयस्तदुक्तिं व्याजहार गौरसिंहो यद्—

"न शोचनीयं भवद्भ्यां किमपि तयोर्विषये, गन्तव्यं च तस्मिन्नेव शिववीराधिष्ठिते, गिरि–गरिष्ठे, कोङ्कणदेशे, कियत्समयानन्तरं तत्रैव भगिन्या पुरोहितेन च सह साक्षात्कारोऽपि भविष्यतीति प्रावोचत्"।

ततस्तु भ्रमर–झङ्कारेणेव "अहो ! अहो ! आश्चर्यमाश्चर्यम्, धन्यो मन्त्राणां प्रभावः, धन्यमिष्टबलम्, चित्रा धर्मनिष्ठा, अवितर्क्यस्तपःप्रतापः, विलक्षणा नैष्ठिकी वृत्तिः"इति मन्द्र–स्वर–मेदुरेण, श्रोतृजन–वचन–कलापेन, झङ्कृते तस्मिन् निकुञ्जे, "ततः कथं प्रचलितौ ? कथमत्राऽऽयातौ ? का घटना घटिता ? क उपायः कृतः ? किमाचरितम् ?" इति कुतूहल–परवशे, विस्फारितनयने, उद्ग्रीवे, समनुकूलितकर्णे, विस्मृतान्यकथे, कृतावधाने, परिकर–वर्गे, श्यामसिंहस्याङ्के दत्तदृष्टिं सौवर्णीं तदङ्के संस्थाप्य, पातितोभयजानु समुपविश्य, राजत–राजिका इव, कपोलयोरुत्तरोष्ठे च समुद्भूताः स्वेद–कणिका उत्तरीय-प्रान्तेन परिमृज्य, पुनरात्म–वृत्तान्तं वक्तुं प्रारभत, यद्—

"भगवन् ! श्रूयते सुदूरमस्मात्स्थानात् कोङ्कणदेशः, मध्ये च विकटा अटव्यः, शतशः शैल–श्रेणयः, त्वरितधारा धुन्यः, पदे पदे

तदुक्तिम् = हनूमत्पूजकोक्तिम्।

अतिशयेन गुरुर्गरिष्ठः, गिरिभिर्गरिष्ठस्तस्मिन्।

अहो अहो="ओत्" इति प्रगृह्यसंज्ञा। पातितोभयजानु=क्रियाविशेषणम्।

त्वरिता धारा यासां ताः। धुन्यः=नद्यः। भयानकानाम्=भीतिजन-

च भयानक-भल्लूकानामम्बूकृत-सङ्कुलानाम् मुस्ता-मूलोत्खननघुर्घुरायित-घोर-घोणानां घोणिनाम्, पङ्क-परीवर्त्तोन्मथित-कासाराणां कासराणाम्, नरमांसं बुभुक्षणां, तरक्षूणाम्, विकट-करटि-कट-विपाटन-पाटव-पूरित-संहननानां सिंहानाम्, नासाग्र-विषाण-शाणन-च्छल-विहित-गण्डशैल-खण्डानां खड्गिनाम्, दोदुल्यमान-द्विरेफ-दल-पेपीयमान-दानधारा-धुरन्धराणां सिन्धुराणाम्, कृपा-कृपण-कृपाण-च्छिन्न-दीनाङ्गीनन-गल-तल-

कानाम्, भल्लूकानाम्=ऋक्षाणाम्। अम्बूकृतैः = निष्ठीवसहितशब्दैः, "अम्बूकृतं सनिष्ठीवमि" त्यमरः, सङ्कुलानाम्=व्याप्तानाम्। सर्वथा साक्षात्कारसम्भव इत्यनेनान्वयः। एवमितरषष्ठ्यन्तानामपि। मुस्तामूलोत्खननेन= कुरुविन्दमूलोत्पाटने, घुर्घुरायिता घोणा=नासा, येषां तेषाम्। "कुरुविन्दो मेघनामा मुस्ता मुस्तकमस्त्रियामि"त्यमरः। घोणिनाम्=शूकराणाम्। पङ्कपरीवर्त्तन=कीचोल्लनेन, उन्मथिताः=विलोडिताः, कासाराः=सरांसि, "कासारः सरसी सर" इत्यमरः, यैस्तेषाम्। कासराणाम्=जाङ्गलमहिषाणाम्, "लुलायो महिषो वाहद्विषत्कासरसैरिभा" इत्यमरः। नरमांसं बुभुक्षूणाम्= खादितुमिच्छूनाम्। "न लोकाव्ययनिष्ठाखलर्थतृनामि"ति षष्ठीनिषेधः। तरक्षूणाम्, "स्यात्तरक्षुर्मृगादन" इत्यमरः। "चीता" इति हिन्दी। नासाग्रे= घोणाग्रे, विद्यमानस्य, विषाणस्य=शृङ्गस्य, शाणनच्छलेन = तेजनव्याजेन, विहिता गण्डशैलखण्डा यैस्तेषाम्। खड्गिनाम् = गण्डकानाम्। "गैंडा" इति हिन्दी। दोदुल्यमानानाम्=अतिशयेन पुनः पुनर्वा समुत्क्षिप्यमाणानाम्, "दुल उत्क्षेप" इत्यस्य रूपम्, द्विरेफाणां दलेन पेपीयमानया=पुनःपुनरास्वाद्यमानया, धुरन्धराणाम्=अग्रेसराणाम्। सिन्धुराणाम्=गजानाम्। "इभो

गलत्पीनधार-शोणित-बिन्दु-वृन्द-रञ्जित - वारवाण - सारसनोष्णीष-धारणाकलिताखर्व-गर्व-बर्बराणां , लुण्ठक-निकराणाञ्च , सर्वथा साक्षात्कार-सम्भवः। बालावावाम् , अविज्ञातोऽद्धा, भोग-समयो दुर्ग्रहाणाम् , अश्वावेव सहायौ, जनपद-शून्यमेतत् प्रान्तरम् , तत्कथं गच्छेव ? कथं धैर्यं धारयेव ? कथं वा कोङ्कण-देशं प्राप्स्यावः ? इति कथं विश्वसेव ?" इति सचिन्तं विनिवेदितवति मयि, स साधुरावयोः पृष्ठे हस्तं विन्यस्य,—

"हनूमान् सर्वं साधयिष्यति, मा स्म चिन्ता-सन्तान-वितानैरात्मानं दुःखाकुरुतम्। यथा सरलेनोपायेन कोङ्कणदेशं प्राप्स्यथस्तथा प्रभाते निर्देक्ष्यामि, साम्प्रतमित आगम्यताम्, पीयताभिदमेला-गोस्तनी-केसर-शर्करा-सम्पर्क-सुधा - विस्पर्द्धि महिषी-दुग्धम्, दासा इमे पाद-संवाहनैस्तैल-सम्मर्दैर्व्यजन-

मतङ्गजो हस्ती सामजः सिन्धुरः कपिरि" ति वैजयन्ती। कृपाकृपणैः=दयादरिद्रैः, कृपाणैः=असिभिः, छिन्नेभ्यः = कृत्तेभ्यः, दीनानामध्वनीनानाम्= पथिकानाम्, गलतलेभ्यः=कण्ठस्थानेभ्यः, गलत्पीनधारस्य = निपतत्स्थूलप्रवाहस्य, शोणितस्य बिन्दुवृन्देन=पृषत्समूहेन, रञ्जितानाम्, वारवाण-सारसनोष्णीषाणाम्=कञ्चुक-तनुत्रि-मेखला-शिरस्त्राणानाम्, धारणेन, आकलितः=लब्धः, अखर्वः=विपुलः, गर्वः=अहङ्कारः, येषां ते च ते बर्बराः= मूर्खास्तेषाम्। दुर्ग्रहाणाम्=दुष्टखेचराणाम्, शून्यादीनाम्।

दुःखाकुरुतम्=दुःखिनं विधत्तम्। "सुखप्रियादानुलोम्य" इत्यत्रत्य-"दुःखाच्चेति वक्तव्यमि" ति डाच्। एला=चन्द्रबाला, गोस्तनी=द्राक्षा, केसरम्= कादमीरजम्, शर्करा=सिता, एतत्संपर्केण=सम्मेलनेन, सुधाविस्पर्धि=

चालनैश्च भवन्तौ विगतक्लमौ विधास्यन्ति। न किमपि भयं वां हनूमतश्चरणयोः शरणमायातयोः। सुखेन सुप्यताम्, असंशयमेव प्रातरेव हनूमत्पूजन-समये सर्वं कार्यं सेत्स्यति"-इति समाश्वासयत्।

"आवां च तन्निर्दिष्टेनैव सोपानेनाट्टालिकामारुह्यैकस्मिन् गृहे प्रविष्टौ, तत्र च राजकुमार-योग्यां पर्यङ्कादि-सामग्रीमवलोक्य, नितान्तं चकितौ, प्रसन्नौ च, अभवाव"।

"अथ भूयस्तत्प्रदत्तं मोदकादि किञ्चिद् भुक्त्वा, पयः पीत्वा, ताम्बूलं चर्वन्तौ, दासैः पादयोः पीड्यमानौ, व्यजनैर्वीज्यमानौ, स्वभाग्योदय-सोपानं साधोः साधुतां मनस्येव प्रशंसमानौ, चाशयिष्वहि"।

'अयं चिरकालानन्तरमावाभ्यां निःशङ्क-शयन-समयो लब्धः' -इत्येकयैवाऽऽनन्दमय्या, वितर्क-विचारादि-सम्पर्क-शून्यया,

अमृततुल्यम्। **समाश्वासयत्**=धैर्यमापादयत्।

स्वभाग्योदयस्य=स्वदिष्टप्रादुर्भावस्य, **सोपानम्**="सीढो" इति हिन्दी। नित्यक्लीबम्। अत एव नित्यस्त्रीलिङ्ग-साधुता-शब्द-विशेषणत्वेऽपि न तल्लिङ्गता। **अशयिष्वहि**=अस्वाप्स्व।

आनन्दमय्या=आनन्दसंवलितया। गाढनिद्रायामानन्दानुभवाभावेऽपि समुत्थितौ "सुखमहमस्वाप्समि"ति समुल्लेखेन वृत्त्यन्तरशून्यायामेव तस्यामानन्दमयत्वं कल्प्यते। असंप्रज्ञातयोगस्य तु भूमानन्दमयता स्पष्टा योगशास्त्रे। **वितर्कः**=विविध ऊहः, **विचारः**=कर्त्तव्याकर्त्तव्यत्वविवेकः, **आदिना** कामादिः, तेषां **संपर्केण**=संसर्गेण, **शून्यया**=विरहितया। निद्रयेति विशेष्यम्। उत्प्रेक्षते-

असम्प्रज्ञात-समाधि-सोदरयेव निद्रया, समस्तां रजनीमजीगमाव ।

ततः केनापि धमद्धमद्ध्वनिनेव बोधितौ, दक्षतो वामतश्च परिवृत्य, चक्षुषी परिमृज्य, साङ्गुलि-ग्रथन-हस्त-प्रसारणं सस्नायु-पीडनं च विजृम्भ्य, भूमिं प्रणम्य, पर्य्यङ्कादुत्तीर्य, कोष्ठाद् बहि-

असंप्रज्ञातसमाधिसोदरयेव । "वितर्कविचारानन्दास्मितानुगमात्संप्रज्ञात" इति योगसूत्रानुसारेण वितर्कादिचतुष्टयविशिष्टः संप्रज्ञातः, इतरथा तु "विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्य"इति सूत्रानुसारेणासंप्रज्ञात इत्यसंप्रज्ञाते वितर्कादिसंपर्कशून्यता । सूत्रे वितर्कादीनां प्रत्येकमनुगमेऽन्वयः । तथा च सवितर्क-सविचार सानन्द-सास्मिताभिध भेदचतुष्टयसहितः, "संप्रज्ञायते=सम्यग् ज्ञायते येन स"इति विग्रहार्थकः संप्रज्ञातः । विरामप्रत्ययस्य=वृत्युपरमप्रत्यायकस्य हेतोः, अभ्यासः=पौनःपुन्येन, सम्पादनम्, तत्पूर्वः=तत्कारणकः संस्कारमात्रावशिष्टोऽसंप्रज्ञात इति द्वितीयसूत्रार्थः । तदुक्तम्—

मनसो वृत्तिशून्यस्य ब्रह्माकारतया स्थितिः ।
असंप्रज्ञातनामासौ समाधिरभिधीयते ॥ इति ।

परिवृत्य=परिवर्त्तनं कृत्वा । स्वभावोक्तिः । **साङ्गुलिग्रथनहस्तप्रसारणम्**=करयोरङ्गुलीः परस्परं संयोज्य हस्तौ प्रसारयन्ति त्यक्तनिद्रा जना इति स्वभावः । **भूमिं प्रणम्य**=

समुद्रवसने ! चोर्वि ! पर्वतस्तनमण्डले ! ।
विष्णुपत्नि ! नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥

इति नैत्यिकविधानम् ॥ भूमेर्मातृत्वकल्पनायां प्रतिप्रातःस्मारितायां तद्दुःखव्रातवारणायोत्सुका भवेयुर्लोका इति तत्प्रचारकाणां सुमनीषा । **कोष्ठम्**=

रागत्य, साञ्जलि मारुति–ध्वजमवलोक्य, करतले निरीक्ष्य, भित्तिकावलम्बित–मुकुरेष्वात्मानं साक्षात्कृत्य, भगवन्नामानि जपन्तौ, कांश्चित्प्रातःस्मरण–श्लोकांश्च रटन्तौ, परस्परं "सुखमावामस्वाप्स्व, प्रसन्नं नौ चेतः"–इति शनैरालपन्तौ च, तस्मिन्नेव मन्दिरस्योर्ध्वे खण्डे शतपदीमकरवाव। तावदश्रूयत स एव बहुलीभूतो ध्वनिः। ततो गवाक्षतो निकुब्जीभूय दृष्टं यत् पञ्चषाः साधवो वस्त्र–वेष्टित–मस्तकाः समीपस्थापित–जलपूर्ण–पात्राः, पाषाण–खण्डैर्दन्तधावन–मुखं मृदूकरणाय कुट्टन्ति।

"अवलोकितं च यदस्मिन्नपि समये शर्वरी-तमांसि नाम्बरं साकल्येन जहति। स्वच्छाऽपि प्राची, नाधुनाऽप्यरुणिमानमङ्गीकरोति। विराव–बहुलान्यपि वयांसि, न सम्प्रत्यपि विहाय नीडाधिष्ठान–कुटानुड्डीयन्ते। गिरि–ग्रामटिका–गृहेभ्यो व्यावर्तमाना अपि विटपिनः, न स्वफल–पुष्प–पत्राऽऽकार–परिचय–प्रदानै-

---

"कोठरी" इति हिन्दी। करतले निरीक्ष्य=प्रभाते करतलदर्शनं श्रेयस्करमिति धर्मशास्त्रानुशासनम्। शतं पदानि शतपदी=भ्रमणम्। "भुक्त्वा शतपदं गच्छेदि"त्यत्रापि तदेव तात्पर्यम्। पञ्च वा षड्वा पञ्चषाः="संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येय" इति बहुव्रीहिः। समासान्तोऽच्।

शर्वरीतमांसि=रात्र्यन्धकाराः। अम्बरम्=नभः। अरुणिमानम्=लौहित्यम्। अरुणिमाङ्गीकरणकारणस्य स्वच्छत्वस्य सत्त्वेऽपि तदनुत्पत्तेर्विशेषोक्तिः। नीडस्य=कुलायस्य, अधिष्ठानानि=निवासभूमितां गतानि च ते कुटाः=वृक्षाः, तान्। "अनोकहः कुटः शाल" इत्यमरः। व्यावर्त्तमानाः=भिन्नत्वेन प्रतीयमानाः। जातेर्व्यावर्त्तकत्वं स्वभावः। अत्र व्यावर्त्तमाना अपि जात्यपरिच्छेदका इति विशेषः।

125543

र्जातीः प्रकटयन्ति । उत्तरोत्तरतस्तार-तार-तरै रुतै रतार्त्तिमीरयन्त्यपि तरुण-तित्तिरी न तरोरवतरति । आलोकाऽऽलोककृत-किञ्चिञ्छोक-मोकोऽपि च कोकः, न वराकीं कोकीमुपसर्पति ।

अथेदृशीमेव मनोहारिणीं शोभामवलोकयन्तौ, कम्पितकुन्द-कलापस्य, उन्मीलन्मालती-मुकुल-मकरन्द-चौरस्य, पाटलि-पटल-पराग-पुञ्ज-पिञ्जरितस्य, शनैः शनैः फरफरायमाण-शुक-पिकादि-पतगोन्मथ्यमानस्य, पलाशि-पलाशाग्रविलुलत्तुषार-कणिकापहरण-शीतलस्य, समीरस्य, स्पर्शसुखमनुभवन्तौ, तत्रैव पूर्वस्या अट्टालिकाया दक्षिणस्याम् , दक्षिणस्याश्च पश्चिमायाम् , पश्चिमाया

उत्तरोत्तरतः=अधिकाधिकम् । तारतारतरैः=अत्युच्चैः । रुतैः=आरावैः । रतार्त्तिम् =कामपीडाम् । ईरयन्ती=कथयन्ती, तरुणतित्तिरी=नवयौवना तित्तिरिवधूः । स्वभावोक्तिः, अनुप्रासः । आलोकस्य = प्रकाशस्य आलोकेन= विलोकनेन, कृतः=उत्पन्नः, कस्यचित् शोकस्य मोको यस्य सः कोकः=चक्रवाकः । वराकीम् =दुःखिनीम् । "बेचारी" इति हिन्दी ।

अथ समीरस्य स्पर्शसुखमनुभवन्तौ पर्यटन्तौ मुहूर्त्तमयापयावेति सम्बन्धः । समीरं विशिनष्टि-कम्पितः=दोलितः, कुन्दकलापः=माध्यसमूहो येन तस्य । उन्मीलन्तीनाम् =विकाशमभ्यागच्छन्तीनाम् , मालतीनाम् =जातीनाम् , मुकुलानाम् =कलिकानाम् । मकरन्दस्य=रसस्य, चौरस्य=अपहर्तुः । पाटलिः="गुलाब" इति ख्यातः, तत्पटलस्य=तत्समूहस्य, परागपुञ्जेन=धूलिव्रजेन, पिञ्जरितस्य=पीतवर्णस्य, फरफरायमाणानाम् =पक्षास्फोटनं कुर्वताम् , शुकपिकादीनां पतत्रैः=पक्षैः, उन्मथ्यमानस्य=वृद्धिं गमितस्येति यावत् । पलाशिपलाशाग्रेषु=वृक्षपत्राग्रेषु, विलुलताम्=विलुठताम्, तुषाराणाम =

अप्युत्तरस्याम्, ततश्च पुनः पूर्वस्यामिति पौनःपुन्येन पर्य्यटन्तौ, मुहूर्त्तमयापयाव।

तस्मिन्नेव समय एकेन ब्रह्मचारिबटुनाऽऽगत्य निवेदितम्, यत्-"सपदि प्रभात-क्रिया निर्वहणीयेत्यादिशति तत्रभवान् साधु-शिरोमणिः", तदाकर्ण्य, बाढमित्यङ्गीकृत्य, षष्टिसहस्र-वालखिल्य-काषायवसन-विधूतायामिव, मन्देह-देह-शोणित-शोणितायामिव, अरुणारुणिम-रञ्जितायामिव, मोमुद्यमान-नरीनृत्यमान-परःकोटि-ताम्रचूड-चूडा-प्रतिबिम्ब-सम्वलितायामिव, पोस्फुट्यमान-स्वर्ग-

अवश्यायानाम्, कणिकानाम्=बिन्दूनाम्, अपहरणेन शीतलस्य। अयापयाव=अगमयाव।

प्रभातकालिकां प्रार्चां विशिनष्टि-षष्टिसहस्रस्य=तादृशसंख्यापरिमितानाम्, वालखिल्यानाम्=तदाख्यऋषिविशेषाणाम्, कापायैः=कषायराग-रक्तैः, वसनैः=वस्त्रैः, विधूतायामिव=उत्कम्पितायामिवेत्युत्प्रेक्षा। मन्देहानाम्=राक्षसविशेषाणाम, देहस्य शोणितेन शोणितायामिव=रक्तीकृतायामिव। स्वाभाविकं शोणत्वं मन्देह-देह-शोणित संपर्कजातत्वेनोत्प्रेक्षितम्। सायंकाले 'प्रत्यहं मरणं शरीराणामक्षयत्वञ्चे'ति विधिशापयन्त्रिता मन्देहाभिधा राक्षसाः सूर्यं खादितुमिच्छन्ति, तैश्च सङ्क्रामं करोति भास्करः, तत्कालक्षिप्तानि च गायत्र्यभिमन्त्रितानि वारीणि वज्रीभूतानि तान् घ्नन्तीत्यर्थवादः सूर्योद्देश्यकजलदानस्य ब्राह्मणेषु पुराणेषु च दृश्यते। एतदीयं वास्तविकत्वं पुराणमतदीपिकायां समवलोकनीयम्। अरुणस्य=सूर्यसारथेः, "सूरसूनोऽरुणोऽनूरुरि"त्यमरः, अरुणिम्ना=लौहित्येन, रञ्जितायाम्। मोमुद्यमानानाम्=परमं प्रसादमधिगच्छताम्, अत एव नरीनृत्यमानानाम्=अतिशयेन पुनः पुनर्वा नृत्यताम्, परःकोटीनाम्=कोट्यधिकानाम्, ताम्रचूडानाम्=कुक्कुटानाम्, चूडानाम्=शिखानाम्,

ङ्गा-कोकनद-पटल-व्याप्तायामिव, भक्तजन-भक्तिप्रभाव-भावितविर्भाव-च्छिन्नमस्ता-कन्धरोच्छलच्छोणित-स्नातायामिव, वसन्तोत्सवोच्छालित-सिन्दूरान्धकारान्धीकृतायामिव, तातप्यमान-ताम्रद्युति-चौर्य्यां प्राच्याम्, तत्प्रभया शोण-शोणैः सोपानैरवतीर्य, मारुतिमन्दिर-द्वारि मस्तकमवनमय्य, झटित्येव स्नान-पूर्वाः क्रियाः समाप्य, तेनैव ब्रह्मचारि-बटुना निर्देश्यमान-मार्गौ, पूर्वावलोकित-वेशन्तादारादेव, पश्चिमतः किञ्चिदभ्रतोदं नाम महासरः समासादितवन्तौ ।

तत्र वरटाभिरनुगम्यमानानां राजहंसानाम्, पक्षतिकण्डूति-

प्रतिबिम्बेन सम्वलितायाम्=प्रावृतायाम् । पोस्फुट्यमानानाम्=अत्यन्तं विकाशमधिगच्छताम्, स्वर्गङ्गायाः=सुरदीर्घिकायाः, कोकनदानाम्=रक्तोत्पलानाम्, पटलेन व्याप्तायाम्=छन्नायाम् । भक्तजनानाम्=भागवतानाम्, भक्तेः=सेवायाः, प्रभावेण=सामर्थ्येन, भावितः=सम्पादितः, आविर्भावः=प्रकटीभवनम्, यया सा चासौ छिन्नमस्ता=तन्नाम्ना तन्त्रेषु प्रसिद्धा महाविद्यान्यतमा, तस्याः कन्धरायाः=ग्रीवायाः, उच्छलता=उद्गच्छता, शोणितेन स्नातायामिव । वसन्तोत्सवे=होलोत्सवे, उच्छालितेन=उत्फालितेन, सिन्दूरेण, अन्धकारेण=अन्धकारतामिव गतेन, अन्धीकृतायामिव । तातप्यमानस्य=सुतप्तस्य, ताम्रस्य द्युतेः=शोभायाः, चौर्याम्=अपहारिकायाम् । ताच्छीले णेऽण्कृतत्ववचनान् ङीप् । पूर्वम्=प्राक्, अवलोकितात्, वेशन्तात्=अल्पसरसः । "अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्त" इति पञ्चम्याराच्छब्दयोगे ।

वरटाभिः=हंसीभिः । "हंसस्य योषिद् वरटा"इत्यमरः । राजहंसा-

कषण-चञ्चल-चञ्चुपुटानां मल्लिकाक्षाणाम्, लक्ष्मणाकण्ठ-स्पर्श-हर्ष-वर्ष-प्रफुल्लाङ्गरुहाणां सारसानाम्, भ्रमद्भ्रमर-झङ्कार-भार-विद्रावित-निद्राणां कारण्डवानाञ्च तास्ताः शोभाः पश्यन्तौ, तडाग-तट एव पम्फुल्यमानानां मकरन्दतुन्दिलानामिन्दीवराणां समीपत एव मसृण-पाषाणपट्टिकासु कुशासनानि, मृगचर्मासनानि, ऊर्णा-सनानि च, विस्तीर्योपविष्टानाम्, गायत्री-जप-पराधीन-दशन-वसनानाम्, कलित-ललित-तिलकालकानाम्, दर्भाङ्गुलीयकालङ्कृता-नाम्, मूर्तिमतामिव ब्रह्म-तेजसाम्, साकाराणामिव तप-

नाम्, "राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः। मलिनैर्मल्लिकाक्षास्त" इत्यमरः। पक्षस्य मूलं पक्षतिः, "पक्षात्तिः," तत्र या **कण्डूतिः**=खर्जूः, तया कर्तृभूतया यत् **कषणम्**=घर्षणम्, तेन **चञ्चलाः**=चपलाः, चञ्चुपुटा येषां तेषाम्। **मल्लिका-क्षाणाम्**=मलिनचञ्चुचरणहंसानाम्। **लक्ष्मणायाः**=सारसयोषितः, "सारसस्य तु लक्ष्मणे"त्यमरः, कण्ठस्पर्शेन यो हर्ष**वर्षः**=आनन्दवृष्टिः, तेन **प्रफुल्लानि**=विकसितानि, **अङ्गरुहाणि**=लोमानि येषां तेषाम्। **भ्रमताम्**=सञ्चरताम्, भ्रमराणाम्, **झङ्कारभारेण**=समधिकझङ्कारशब्देन, **विद्राविता**=उत्सारिता, निद्रा येषां तेषाम्। **पम्फुल्यमानानाम्**=विशरारूणाम्। विशरणार्थकाद् ञि फलाधातोर्यङन्तात् शानच्। तुन्दमस्त्येषामिति तुन्दिलाः, "तुन्दादिभ्य इलच्", **मकरन्देन**=पुष्परसेन, **तुन्दिलानाम्**=तुन्दवताम्, तत्प्राचुर्यवतामिति यावत्। **मसृणपाषाणपट्टिकासु** = चिक्कणप्रस्थरपट्टिकासु। **गायत्रीजपपराधीने दशनवसने**=ओष्ठौ येषां तेषाम्। **कलिताः**=धारिताः, **ललिताः**=शोभनाः, **तिलकालकाः**==तिलकाः, यैस्तेषाम्। "तिलकस्तिलकालक"इत्यमरः। **दर्भाङ्गुलीयकैः**=कुशनिर्मिताङ्गुलिधारणीयैः, पवित्रैरिति यावत्, **अलङ्कृताः**=

साम्, धृतावताराणामिव च ब्रह्मचर्य्याणाम्, मुनीनाम्, दर्शनं कुर्वन्तौ, कृतनित्यक्रियम्, परिपुष्ट-तुलसी-मालिकाङ्कित-कण्ठम्, सिन्दूरोर्द्ध्व-पुण्ड्र-मण्डित-ललाटम्, रामचरण-चिह्न-मुद्रा-मुद्रित-बाहुदण्ड-वक्षःस्थलम्, हनूमन्मन्दिराध्यक्षं प्रणतवन्तौ।

तेन चाऽऽज्ञप्तम्-"यद्यायुष्मन्तौ, सपदि महाराष्ट्रदेशं जिगमिषथश्चेदचिरेणैव मस्तके सम्मर्द्यतद् राम-रजः, तडागे निमज्जतम्" इत्यवधार्य्य, आवां तथैव व्यधिष्वहि।

तदाज्ञया वस्त्राणि परिधाय च, तत्समीपे समुपविश्य, तेन च समन्त्र-जपं कुश-जलेनाभ्युक्षितौ, हनुमदङ्ग-रञ्जित-सिन्दूरेण विहित-तिलकौ, स्वकीयौ सैन्धवौ समारुक्ष्व। ततः पञ्चषान्, व्यूढ-वयस्कान्, जटिलान्, सुपरिणाहान्, वाहानारूढान्, आवाभ्यां सह गन्तुमाज्ञाप्य, मन्दिराध्यक्षोऽभाषिष्ट।

"कुमारौ! इतः पुण्यनगर-पर्य्यन्तं प्रतिगव्यूत्यन्तरालम महाव्रताश्रम-परम्पराः सन्ति। सर्वत्र कुटीरेषु संन्यासिनो भक्ता विरक्ताश्च निवसन्ति। कियद्दूरपर्यन्तं पञ्चषाः सहाया युवयोः सहचरा भविष्यन्ति, परस्ताच्छिथिलिते लुण्ठक-भये, एकेनैव केनचिदश्वारोहेण प्रदर्शित-मार्गौ, सुखेन यथाऽभिलषितं देशं यास्यथः। सहायक-परिवर्त्तनं स्थाने स्थाने स्वयमेव भविष्यति, न तत्र युवयोः

भूषिताः, अङ्गुलयो येषां तेषाम्। मन्दिराध्यक्षं विशिनष्टि-कृतनित्यक्रियमित्यादि। रामचरणचिह्नमेव मुद्रा=मुद्रणसाधनम्, तया मुद्रितम्=लाञ्छितम्, बाहुदण्डवक्षःस्थलं यस्य तम्।

व्यूढम्=पृथुलम्, वयो येषां तान्। सुष्ठु परिणाहो=विशालता येषां तान्।

कयाऽपि विचिकित्सया भाव्यम्, श्रान्तैः श्रान्तैराश्रमेषु विश्रमणीयम्, निदिद्रासद्भिः कुटीरेष्वेव निद्रा द्राघणीया, विलेपनाभ्यङ्ग-स्नान-पानाशन-संवाहनादिसौकर्यं सर्वत्र सहायकाः साधयिष्यन्ति"-इति।

ततस्तं प्रणम्य, तथैव ससहायौ, आवां प्रचलितौ। सहचर-निर्दिष्टेनैव, सर्वैरविज्ञेयेन, वन्य-द्रुम-जाल-रुद्धेन, गण्डशैल-परिक्रमणाधित्यकाधिरोहणोपत्यका-परिलङ्घन-तटिनीतरणाद्यायास-दीक्षा-दक्षेण पथा प्रचलन्तौ, मध्ये मध्ये कुटीरेषु विरमन्तौ, तत्र तत्र सुस्वादु-भोजनैः, सकल-समुचित-सामग्रीसाहाय्यैः, सुखेन विश्रान्ति-सुखमनुभवन्तौ, तत्र तत्र परिवर्तितसहायकौ, दिनकतिपयैरेकस्या नद्यास्तटमयासिष्व। तत्रैकस्य चिञ्चा-वृक्षस्य स्कन्धे प्रलम्ब-रज्ज्वा निजाजानेयावाबध्य, निकटस्थ-यूप-तरु-शाखायां च वस्त्रादीनि संलम्बय्य, स्नातुं जलमवागाहिष्वहि। अस्मत्सहचरश्च निजाश्वस्य पृष्ठमार्द्रयन्निव तं वल्गायां गृहीत्वा, पर्य्यटयितुमारब्ध।

ततो जलाद् बहिरागत्य, तिन्तिडी-शाखातः शुष्क-वस्त्रे परिधाय, इतस्ततः पर्यट्यापि च कां भूमिमायातौ-इति निश्चेतुं नापारयाव।

विचिकित्सया=संशयेन। "विचिकित्सा तु संशय" इत्यमरः। निदिद्रासद्भिः=निद्रानुमिच्छद्भिः। द्राघणीया=दीर्घयितव्या। यापनीयेति यावत्।

दिनकतिपयैः=कियद्भिश्चनदिवसैः "पोटायुवतिस्तोककतिपये"ति कतिपयस्य परनिपातः। चिञ्चावृक्षस्य=तिन्तिडीवृक्षस्य। "तिन्तिडी चिञ्चे"त्यमरः। "इमली" इति भाषा।

तावदकस्माद् दृष्टं यदुत्तरतः खुर-धूलिभिः पार्श्वपरिवर्त्ति-लता-कुसुम-परागान् द्विगुणयन्तम्, लाङ्गूल-चामरेण वीजय-न्तम्, मुख-फेनैः पुष्पाणीव वर्षन्तम्, कञ्चित् श्यामकर्णम्, शारदाभ्र-श्वेतम्, वाजिनमारुह्य, लोलत्खड्ग-चर्म्माच्छन्न-पृष्ठ-देशः, कवच-शिञ्जित-विजित-कोकिल-शावक-निकर-कूजितः, वीर-वेषः, कञ्चिच्छ्यामो युवा समायातीति।

स च क्षणेनैवाऽऽगत्य, नौ सकलं वृत्तान्तं पृष्ट्वा, विज्ञाय च, प्रावोचत्-"अवगतम्, भवतोरेव विषये दृष्ट-स्वप्नः शिववीरो भवन्तौ स्मरति, तत्सपद्यश्वावारुह्य, आगम्यताम्, न वां भयं किमपि, व्यतीतो भवतोर्दुःस्वमयः समयः"—इति।

ततः साश्चर्यं सपदि वस्त्राणि परिधाय, सहचरमाकार्य, तेन सहाश्वावारुह्य, तमनुसृत्य, तत्प्रदिष्टं वासादि-सौकर्यमङ्गीकृत्य, सपद्येव निविवृत्सन्तं जटिल-सहचरं साश्लेषमनुज्ञाप्य, यथासमयं शिववीरं साक्षात्कृत्यावगतम्-यदेष एव महात्मा भटवेषेणास्मन्नि-कटे भीमा-नद्यास्तटं गत आसीदिति।

उत्तरतो वाजिनमारुह्य श्यामो युवा समायातीति सम्बन्धः। लाङ्गूलमेव **चामरम्**=प्रकीर्णकम्, तेन। श्यामं विशिनष्टि-**लोलत्खाम्**=सञ्चलत्खाम्, **खड्गचर्मभ्याम्**=असि-तत्प्रहाररक्षकाभ्याम्, **छन्नः** पृष्ठदेशो यस्य सः। **कवचशिञ्जितेन**=वारबाणशब्देन, "भूषणानाञ्च शिञ्जितमि"त्यमरः। विजितं **कोकिल-शावक-निकर-कूजितम्**=परभृत-सुत-समूह-वचनम्, येन सः।

निविवृत्सन्तम्=निवर्त्तितुमिच्छन्तम्। **साश्लेषम्**=सालिङ्गनम्। क्रिया-विशेषणम्।

"तत्कालमारभ्याद्यावधि तस्यैव करकमलच्छायायां वसावः, भगिनी-वियोग-तापश्चिरादासीत्, सोऽप्यद्य निवृत्तः, पुरोहितचरणावपि दृष्टौ, इति सर्वं शुभमेव परस्तात् सम्भाव्यते, इत्येष आवयोर्वृत्तान्तः"।

ततो मुहूर्त्तं सर्वेऽप्येतद्वृत्तान्तस्यैव पौर्वापर्य-स्मरण-पराधीना इवाऽऽसिषत। परिशेषे च पुटपाकवदन्तरेव दन्दह्यमानेन, बाष्पव्रातेनाऽऽविलस्यापि, अप्रकटित-बहिश्चेष्टस्य, ब्रह्मचारिगुरोः प्रार्थनया देवशर्म्मणा तोरण-दुर्ग-समीपे हनूमन्मन्दिर एव निवासः स्वीकृतः। तदेव च प्रबन्धुं सर्वेऽपि कुटीरादुत्थिताः।

* *इति तृतीयो निश्वासः* *



आविलस्य=क्षुभितस्य। शोकः किंमूल इत्यग्रे स्फुटीभविष्यति।

इति शिवराजविजयवैजयन्त्यां तृतीयनिश्वासविवरणम्॥

"कार्यं वा साधयेयम्, देहं वा पातयेयम्"

स्फुटकम्

मासोऽयमाषाढः, अस्ति च सायं समयः, अस्तं जिगमिषुर्भगवान् भास्करः, सिन्दूर-द्रव-स्नातानामिव वरुण-दिगवलम्बिनामरुण-वारिवाहानामभ्यन्तरं प्रविष्टः। कलविङ्काश्चाटकैररुतैः परिपूर्णेषु नीडेषु प्रतिनिवर्तन्ते। वनानि प्रतिक्षणमधिकाधिकां श्यामतां कलयन्ति। अथाकस्मात् परितो मेघ-माला पर्वतश्रेणीव प्रादुरभूत्। क्षणं सूक्ष्म-विस्तारा, परतः प्रकटित-शिखरि-शिखर-विडम्बना, अथ दर्शित-दीर्घशुण्ड-मण्डित-दिगन्तदन्तावल-भयानकाकारा, ततः पारस्परिक-संश्लेष-विहितमहान्धकारा च, समस्तं गगनतलं पर्यच्छदीत्।

आषाढर्क्षसंवलिता पूर्णमासी यस्मिन्मासे स आषाढः=शुचिः। सिन्दूर-द्रवेण=नागोद्भवरसेन, स्नातामिव=कृतस्नानामिवेत्युत्प्रेक्षा। वरुणदिक्=पश्चिमा, तदवलम्बिनाम्=तदाश्रितानाम्। कलविङ्काः=चटकाः। "गौरैया" इति हिन्दी। चटकाया अपत्यानि चाटकैराः, "चटकाया ऐरगि"त्यपत्ये प्रत्ययः, तेषां रुतैः=शब्दैः। कलयन्ति=धारयन्ति। मेघमाला=वारिदराजिः। पर्वतश्रेणीव=भूधरपङ्क्तिरिवेत्युपमा। प्रकटितम्=प्रदर्शितम्, शिखरिशिखराणाम्=महीधराग्रभागानाम्, विडम्बनम्=अनुकृतिः, यया सा। दर्शितः=प्रकटीकृतः, दीर्घेण=लम्बायमानेन, शुण्डेन=करेण, मण्डितस्य=भूषितस्य, दिगन्तदन्तावलस्य=दिक्करिणः, "दन्ती दन्तावलो हस्ती"त्यमरः, भयानकः=भीतिप्रदः, आकारः=आकृतिः, यया सा। पारस्परिकसंश्लेषेण=इतरेतरमिलनेन, विहितः=उत्पादितः, महान्, अन्धकारः=अन्धतमसं यया सा।

अस्मिन् समय एकः षोडशवर्षदेशीयो गौरो युवा, हयेन पर्वत-श्रेणीरुपर्युपरि गच्छति स्म। एष सुघटित-दृढ-शरीरः, श्याम-श्यामैः, गुच्छ-गुच्छैः, कुञ्चित-कुञ्चितैः कच-कलापैः, कमनीय-कपोलपालिः, दूरागमनायास-वशेन सूक्ष्ममौक्तिक-पटलेनेव स्वेद-बिन्दु-व्रजेन, समाच्छादित-ललाट-कपोल-नासाग्रोत्तरोष्ठः, प्रसन्न-वदनाम्भोज-प्रदर्शित-दृढसिद्धान्त-महोत्साहः, राजतसूत्रशिल्पकृत-बहुल-चाकचक्य-वक्र-हरितोष्णीष-शोभितः, हरितेनैव च कञ्चु-केन प्रकटीकृत-व्यूढ-गूढचरता-कार्यः, कोऽपि शिववीरस्य विश्वास-पात्रं सिंहदुर्गात् तस्यैव पत्रमादाय, तोरणदुर्गं प्रयाति।

उपर्युपरि-"उपर्यध्यधसः सामीप्ये" इति द्वित्वम्। तद्योगे द्वितीया।

"उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु।
द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते" ॥ इति।

गौरं युवानं विशिनष्टि-**सुघटितदृढशरीरः**=सुसम्पन्नपुष्टाङ्गः। **कमनीय-कपोलपालिः**=मनोहरगण्डस्थलः। **दूरागमनायासवशेन**=दवीयःप्राप्ति-श्रमकारणेन। **सूक्ष्ममौक्तिकपटलेनेव**=लघुमुक्तानिचयेनेवेत्युत्प्रेक्षा। **स्वेदबिन्दुव्रजेन**=घर्मजलकणसमूहेन। "घर्मो निदाघः स्वेदः स्यादि"त्यमरः। **समाच्छादितम्**=व्याप्तम्, ललाटकपोलनासाग्रोत्तरोष्ठं यस्य सः। **प्रसन्नेन**=विकसितेन, **वदनाम्भोजेन**=मुखकमलेन, अभेदमध्यवसितेन, प्रदर्शितः, दृढः, **सिद्धान्तमहोत्साहः**=कर्तव्यपरायणतामहाहर्षो येन सः। **राजतसूत्रस्य**=रौप्यतन्तोः, शिल्पेन, कृतम्, **बहुलम्**=प्रचुरम्, चाकचक्यं यस्यैवम्भूतं यद् **वक्रम्**=अनृजु, **हरितम्**=हरिद्वर्णम्, यत्, **उष्णीषम्**=शिरोवेष्टनं, तेन शोभितः। प्रकटीकृतं, **व्यूढम्**=स्खलितम्, **गूढचरताकार्यम्**=गुप्तचरताकृत्यं, येन सः। गूढ-

तावदकस्मादुत्थितो महान् झञ्झावातः, एकः सायं समय-प्रयुक्तः स्वभाव-वृत्तोऽन्धकारः, स च द्विगुणितो मेघमालाभिः । झञ्झावातोद्भूतै रेणुभिः, शीर्णपत्रैः, कुसुम-परागैः, शुष्कपुष्पैश्च पुनरेष द्वैगुण्यं प्राप्तः । इह पर्वत-श्रेणीतः, पर्वतश्रेणीः, वनाद् वनानि, शिखराच्छिखराणि, प्रपातात् प्रपाताः, अधित्यकातोऽधित्यकाः, उपत्यकात उपत्काः, न कोऽपि सरलो मार्गः, नानुद्वेदिनी भूमिः, पन्था अपि च नावलोक्यते, क्षणे क्षणे हयस्य खुराश्चिक्कण-पाषाण-खण्डेषु प्रस्खलन्ति, पदे पदे दोधूयमाना वृक्ष-शाखाः सम्मुखमाघ्नन्ति, परं दृढ-संकल्पोऽयं सादी, न स्वकार्याद् विरमति । परितः स-हडहडा-शब्दं दोधूयमानानां परःसहस्र-वृक्षाणाम्, वाताघात-संजात-पाषाण-पातानां प्रपातानाम्, महान्धतमसेन ग्रस्यमानानामिव सत्त्वानां

चरता कार्यात्मना रूपिता । परिकरालङ्कारो विशेषणानां साभिप्रायत्वादत्र गद्ये द्रष्टव्यः ।

झञ्झावातः="सवृष्टिको महावातो झञ्झावातः प्रकीर्त्तितः" । प्रपतन्त्यस्मिन्निति **प्रपातः**=जलोत्पतनस्थानम्, "प्रपातस्त्वतटो भृगुरि"त्यमरः । **अनुद्वेदिनी**=दुःखादायिनी, सरलेति यावत् । **चिक्कणपाषाणखण्डेषु**=स्निग्धाश्मशकलेषु । **दोधूयमानाः**=वारं वारं चाल्यमानाः । **आघ्नन्ति**=ताडयन्ति । "आङो यमहन" इत्यात्मनेपदस्य तु नात्र विषयता, अकर्मकात्स्वाङ्गकर्मकादेव च तद्विधानात् । **सादी**=अश्वारोहः । **विरमति**, "व्याङ्परिभ्यो रम"इति परस्मैपदम् । अर्थस्यौजस्विताविधानाय वाक्यस्यैतस्यावृत्तिरिति न पुनरुक्तिशङ्काकलङ्किता समाश्रयणीया । वाताघातेन सञ्जातः पाषाणपातो येषां. तेषाम् । **सत्त्वानाम्**=प्राणिनाम् । अन्धकारे स्थितानां महान्धतमसग्रस्यमानत्वेनोत्प्रेक्षा,

क्रन्दनस्य च, भयानकेन स्वनेन कवलीकृतमिव गगन-तलम्। परं नैष वीरः स्वकार्याद् विरमति। कदाचित् किञ्चिद् भीत इव घोटकः, पादाभ्यामुत्तिष्ठति, कदाचिच्चलन्नकस्मात् परिवर्त्तते, कदाचिदुत्प्लुत्य च गच्छति। परमेष वीरो वल्गां संयच्छन्, मध्ये मध्ये सैन्धवस्य स्कन्धौ कन्धरां च करतलेनाऽऽस्फोटयन्, चुचुत्कारेण सान्त्वयंश्च, न स्वकार्याद् विरमति। तावदारब्धश्चञ्चच्चञ्चलचामीकररेखाकाराभिश्चञ्चलाभिरपि स्वचमत्कारः। यावदेकस्यां दिशि नयने विक्षिपन्ती, कर्णौ स्फोटयन्ती, अवलोचकान् कम्पयन्ती, वन्यांस्त्रासयन्ती, गगनं कर्त्तयन्ती, मेघान् सौवर्ण-कपयेव घनती, अन्धकारमग्निनेव दहन्ती, चपला चमत्करोति, तावदन्यस्यामपि ज्वाला-जालेनेव बलाहकानावृणोति, स्फुरणोत्तरं स्फुरणं गर्ज्जनोत्तरं गर्ज्जनमिति परःशत-शतघ्नी-प्रचार-जन्येनेव, कन्दरिकन्दर-प्रतिध्वनिभिश्चतुर्गुणितेन महाशब्देन, पर्यपूर्यत साऽरण्यानी। परमधुनाऽपि-"देहं वा पातयेयं कार्यं वा साधयेयम्"-इति कृतप्रतिज्ञोऽसौ शिववीर-चरो न निजकार्यान्निवर्त्तते।

स्वतः सिद्धायाश्च शब्दव्याप्तेराकाशकवलीकरणत्वेन। **सैन्धवस्य**=घोटकस्य। **चञ्चच्चञ्चलस्य**=विशिष्टचाकचक्ययुतस्य, **चामीकरस्य**=सुवर्णस्य, **रेखाणामिवाकारो** यासां ताभिः। **चञ्चलाभिः**=विद्युद्भिः। "तडित् सौदामिनी विद्युच्चञ्चला चपला अपी"त्यमरः। अनुप्रासो वर्णसाम्यात्। **अवलोचकान्**=दर्शकान्। **कर्त्तयन्ती**=विदारयन्ती। अतिशयोक्तिरसम्बन्धे सम्बन्धाभिधानात्। **सौवर्णकपयेव**=हैरण्यशाणेनेवेत्युत्प्रेक्षा। **बलाहकान्**=मेघान्। **पर्यपूर्यत**=परितः पूर्णाऽजायत।

यस्याध्यक्षः स्वयं परिश्रमी, कथं स न स्यात् स्वयं परिश्रमी ? यस्य प्रभुः स्वयं साहसी, कथं स न भवेत् स्वयं साहसी ? यस्य स्वामी स्वयमापदो न गणयति, कथं स गणयेदापदः ? यस्य च महाराजः स्वयं सङ्कल्पितं निश्चयेन साधयति, कथं स न साधयेत् स्व-संकल्पितम् ? अस्त्येष महाराज-शिववीरस्य दयापात्रं चरः, तत्कथमेष झंझा-बिभीषिकाभिर्बिभीषितः, प्रभु-कार्यं विगणयेत् ? तदितोऽप्येष तथैव त्वरितमश्वं चालयंश्चलति ।

अथ किञ्चित् स्रोतस्समुल्लङ्घमानोऽस्य तुरङ्गः, कस्यापि दोधूयमानतरोः शाखया तथाऽभिहतो यथोच्छलन् भूमौ पपात, सादिनं चैकतः समपीपतत् । किन्तु तत्क्षणादेव सादी समुत्थितो वाजिनो वल्गां गृहीत्वा, सचुचुत्कारं ग्रीवां पृष्ठं चाऽऽस्फोट्य, अज्ञासीद्-यदश्वः स्वेदैः स्नातोऽस्तीति । तच्चक्षुषी विस्फार्य, पार्श्वस्थ-पलाशिनं निपुणं निरीक्ष्य, तच्छाखायामेव कानिचिन्निजवस्तून्यासज्य, दक्षिणकर-धृत-रश्मिरश्वं शनैः शनैः परिभ्रमयितुमारेभे । अश्वश्च फेनान् पातयन्, कन्धरामुद्धूनयन्, हेषा-रवैश्चिरपरिश्रमं प्रकटयन्, प्रस्यन्द-जल-सिक्त-भूभागः, समुत्सृष्ट-पुरीषः, शुष्क-स्वेदः, मुहूर्तार्द्धेनैव विस्मृत-परिश्रमः, सगति-स्तम्भं खुराग्रैर्भूमिमुत्खनन्, कर्णावुत्तम्भयन्, लाङ्गूलं लोलयन्, सादिनो दक्षि-

---

समपीपतत्=पातयामास । णिजन्तात् सम्पूर्वकात्पतेर्लुङि । पार्श्वस्थं **पलाशिनम्**=वृक्षम् । "पलाशी द्रुद्रुमागमा" इत्यमरः । **फेनान्**=डिण्डीरान् । **उद्धूनयन्**=कम्पयन् । **प्रस्यन्दजलेन**=स्वेदाम्भसा, **सिक्तः**=क्लिन्नतां नीतः, भूभागो येन सः । **समुत्सृष्टम्**=त्यक्तम्, **पुरीषम्**=गूथं, येन सः । **सगति-**

णदेशे पृष्ठं निकटयन्, पुनरेनं वोढुम्, परतो धावितुं च, समीहां सममूसुचत्।

तावदकस्मात् पूर्वस्यामतिरक्ताऽतिप्रलम्बाऽतिभयानका सकडकडाशब्दं सौदामिनी समदेदीप्यत, तच्चमत्कार-चकितं चाश्वमेष यावत्स्थिरयति, तावत्स-तडतडा-शब्दं पूग-स्थूलैर्बिन्दुभिर्वर्षितुमारब्ध मघवा, परं राम-कार्यार्थं प्रतिष्ठमानेन मारुतिनेव न सह्यते कार्यहानिः शिववीर-चरेण। तत्क्षणमेवासौ, पुनः सज्जीभूय समुत्पत्य, घोटक-पृष्ठमारुरोह। घोटकश्च पुनस्त्वरितगत्या प्रचलितः। यदा यदा विद्युद् विद्योतते, तदा तदा पन्था अवलोक्यते, तदनुसन्धानेनैव वाहोऽयं शिलातलानि परिक्राम्यन्, लता-प्रतानानि त्यजन्, स्रोतांस्युल्लङ्घमानः, गर्ताश्च परिजहदुच्चचाल। तावद् दूरत एवाऽऽलोक्यत तोरण-दुर्ग-दीपः, इतश्च चरस्यैतस्य दृढ-प्रतिज्ञताम्, निर्भीकताम्, सोत्साहताम्, स्वामिकार्य-साधन-सत्य-सङ्कल्पतां च, परीक्ष्येव, प्रशशाम वृष्टिः। अम्ल-बलेन

स्तम्भम्=सचलनावरोधम्। उन्खनन्=उत्पाटयन्। उत्तम्भयन्=ऊर्ध्वीकुर्वन्। लाङ्गूलम्=पुच्छम्। "लाङ्गूलं पुच्छशेफयोरि" ति हैमः। अश्वस्वभाववर्णनम्।

समदेदीप्यत=अत्यन्तं चमदकरोत्। पूगस्थूलैः=क्रमुकफलमहत्तरैः। मघवा=इन्द्रः। मारुतिना=मरुत्तनयेन हनूमता। मारुतिरूपोपमानस्य, शिववीरचरस्योपमेयस्य, कार्यहान्यसहत्वस्य साधारणधर्मस्य, वाचकस्य चेवशब्दस्योपादानेन पूर्णोपमा। वाहः=अश्वः। परिजहत्, "नाभ्यस्ताच्छतु"रिति नुम्निषेधः। अलोक्यत=दृष्टः। प्रशशाम=शान्ताऽभूत्। वृष्टौ

दुग्धमिव च खण्डशोऽभून्मेघमाला, ददृशे च पूर्वस्यां कलानाथः।

अथ क्षणेनैव पार्वत-नदी-वेग इव निर्जगाम झञ्झावातोत्पातः। ततो नूतन-वारिधारा-क्षालन-प्रकटित-परम-हारित्यानाम्, परःकोटि-कीरपटल-परीतानामिव, समवालोक्यत लोचन-रोचिका शोभा पलाशिनाम्। सादी, चञ्चच्चन्द्रचमत्कारेण द्विगुणितोत्साहः, "मा भूद्भार-रोधो मद्गमनात् पूर्वमेव" इति सत्वर-सत्वरः, झिल्ली-रव-मिश्रित-कवच-शिञ्जितः, वार्ष-वारि-व्रज-विधूत-स्वेद-बिन्दु-सन्दोहः, साधुवाद-संवर्द्धित-हेषमाण-हयो-

सत्यामपि कार्यं नावारुणच्चर इति तस्यास्तत्परीक्षात्वेनोत्प्रेक्षणम्। **अम्लवलेन** दुग्धमिवेत्युत्प्रेक्षा। ददृशे=दृष्टः। कर्मणि तङ्। **कलानाथः**=चन्द्रः।

क्षणेनैव झञ्झावातोत्पातो निर्जगामेति सम्बन्धः। उपमिनोति-**पार्वत-नदीवेग इवेति**। ततो **लोचनरोचिका**=नेत्रानन्ददायिनी, पलाशिनां शोभा समवालोक्यतेति सम्बन्धः। पलाशिनो विशिनष्टि-**नूतनया**=अभिनवया, **वारिधारया**=पानीयासारपातेन, **क्षालनेन**=निर्णेजनेन, प्रकटितं परमं **हारित्यम्**=हरिद्वर्णता, यैस्तेषाम्। उत्प्रेक्षते-परःकोटिना कीरपटलेन **परीतानामिव**=व्याप्तानामिव। **झिल्लीरवेण**=भृङ्गारीशब्देन, "भृङ्गारी चीरुका चीरी झिल्लिका च समा इमा" इत्यमरः। **मिश्रितम्**=संपृक्तम्, वृद्धिं गतमिति यावत्, **कवचशिञ्जितम्**=तनुत्राणध्वनिः, यस्य सः। कवचानां वीरभूषणत्वेन "भूषणानान्तु शिञ्जितमि"त्यनेन न विरोध इति ध्येयम्। **वार्षेण**=वर्षभवेन, **वारिव्रजेन**=जलनिचयेन, **विधूतः**=विगतः, **स्वेदबिन्दूनाम्**=श्रमपृषताम्, **सन्दोहः**=समूहो यस्य सः। **साधुवादेन**=शोभनप्रभृतिकथनेन, **संवर्धितः**=सम्यग् वृद्धिं नीतः, **हेषमाणस्य**=हेषानिरतस्य, हयस्योत्साहो येन सः।

त्साहः, सपद्येव तोरण-दुर्ग-यामिक-पादचार-परिमर्दितायां भुवि समाजगाम।

अथ "को भवान्? कुतो भवान्?"—इति यामिकेन पृष्टः, दत्त-निज-परिचयः, द्वारपालेनापि—"साधु! साधु! महता परिश्रमेण समायातोऽसि, उच्चैर्निश्वसिति तेऽध्वः, स्विन्नानि तव गात्राणि, आर्द्राणि तव वस्त्राणि, धन्योऽसि, तथापि खेदं नावहसि, समये समागतोऽसि, अवेक्षते तवैव पन्थानं दुर्ग्गाधीशः, प्रविश्यताम्, अश्व उन्मुच्यताम्, सत्वरमेव च तेनापि साक्षात्कारो विधीयताम्"—इति सादरमालप्यमानः, दुर्गं प्रविवेश।

अश्वमुन्मुच्य, परःसहस्र-पतग-पटल-कलकलोन्निद्रस्य सुदूर-वितत-काण्ड-प्रकाण्डस्य चैकस्य पनश-वृक्षस्य शाखायामावध्य, अविश्रान्त एव दुर्ग्गाध्यक्ष-समीपमगमत्।

तत्र तयोरेवमभूदालापः,—

दुर्ग्गाध्यक्षः—[दूरत एव] एहि, एहि, समये समायातोऽसि,

तोरणदुर्गस्य=तन्नामख्यातदुर्गस्य, **यामिकानाम्**=प्रहरिणाम्, **पादचारैः**=भ्रमणैः, **परिमर्दितायाम्**=अतिक्षुण्णायाम्।

परःसहस्रपतगानाम्=असंख्यातपक्षिणाम्, **पटलस्य**=समूहस्य, **कलकलेन**=कोलाहलेन, **उन्निद्रस्य**=जाग्रतः। जागृताः शब्दं कुर्वन्तीत्युन्निद्रपदेन सशब्दत्वं लक्षितम्, तच्च सार्वकालिकशब्दवत्त्वव्यञ्जनद्वारा पक्षिणामसङ्ख्यातत्वपर्यवसायि। सुदूरं **विततः**=विस्तृताः, **काण्डाः**=शाखाः, **प्रकाण्डाः**=स्कन्धाः, यस्य तस्य। "अस्त्री प्रकाण्डः स्कन्धः स्यान्मूलाच्छाखाविधिस्तरोरि"त्यमरः। **पनसवृक्षस्य**=कंटकितरोः। "कटहर" इति हिन्दी।

मुहूर्तं नायास्यश्चेद् द्वारेषु रुद्धेषु, बहिरेव समस्तां रजनीमवत्स्यः ।

सादी–विघ्नास्त्वभूवन्, परं माहात्म्यमेतत् प्रभु–प्रतापस्य, यत् तदीया विघ्नैर्न व्याहन्यन्ते ।

दुर्ग्गाध्यक्षः–(तं शिरो नमयन्तं जीवेत्युक्त्वा) उपविश, उपविश ।

ततो दुर्ग्गाध्यक्षस्तु चुम्बित-यौवनामप्यत्यक्त–बालभावां तस्य मधुरामाकृतिं पश्यन् , स–चकितं विचारयितुमारेभे, यत्–"कथं बाल एष प्रेषितः श्रीमता महाराष्ट्र–राजेन गुप्त–विषय–सन्धानेषु" क्षणमवस्थाय च, "द्रक्ष्यामि प्रथमं किमेतेनाऽऽनीतं पत्रादिकम्"–इति निश्चित्य, "भगवन् ! प्रभुणैकान्ते मामाहूय प्रदत्तमिदं पत्रमस्ति, तत् स्वीक्रियताम्" इति कटिबन्धनान्निःसार्य ददतो हस्तादादाय, उत्थाय च, स्तम्भावलम्बित–दीप–प्रकाशेन तूष्णीं मनस्येव पठित्वा, आकुञ्च्य, पूर्वोपविष्ट–मञ्च उपविश्य, पुनः पौनःपुन्येनालि–पटल–विनिन्दकांस्तस्य कुञ्चित–कच–गुच्छान् , उत्पत्स्यमान–केशाङ्कुर–स्विन्नमुत्तरोष्ठम् , अतिमसृणकमलोदर–किशलय–सोदरौ

चुम्बितं यौवनं यया तामपि, न त्यक्तः=न दूरीकृतः, बालभावः=अर्भकत्वं, यया ताम् । स्पष्टतया भासमानेऽपि विरोधे यौवने विद्यमानाया अप्याकृतेर्बालस्वभावसुलभसारल्यसंवलितत्वभानाद्विरोधाभासालङ्कारः । **आकृतिम्**=शरीरात्मकमाकारम् । **गुप्तविषयाणाम्**=गोप्यविचार्याणाम्, **सन्धानेषु**=अनुसन्धानेषु, ज्ञानेषु । **अवस्थाय,** तूष्णीमिति शेषः । **द्रक्ष्यामि,** सामान्यभविष्यति । **मञ्चे**=पर्यङ्कविशेषे । "शयनं मञ्चपर्यङ्कपल्यङ्का" इत्यमरः । **अलिपटलविनिन्दकान्**=भ्रमरसमूहजुगुप्सकान् । काष्ण्येन भ्रमरनिचयोऽपि पराजित इति नितान्तकाष्ण्यं लक्ष्यम् । **उत्पत्स्यमानैः**=उदयिष्यमाणैः, **केशाङ्कुरैः**=श्मश्रुप्ररोहैः, **स्विन्नम्**=स्फुटितम् । **उत्तरम्**=ऊर्ध्वञ्च, तदोष्ठम् ।

कपोलौ, उन्नतमंसम्, दीर्घौ बाहू, माधुर्य-वर्षिणी अक्षिणी, विनय-भरेणेव विनतां कन्धराम्, तेजसेव गौरमङ्गम्, दाक्षिण्येनेवाङ्कितं ललाटम्, भद्रतयेव च स्नातं शरीरम्, विलोकयन्, वारं वारं विचिन्तयंश्च, मशकैरप्यशङ्कनीयम्, मक्षिकाभिरप्यनीक्षणीयम्, समीरणेनाप्यनीरणीयम्, प्रकाशेनाप्यप्रकाशनीयम्, लेखिन्याप्य-लेखनीयम्, पत्रेणापि चाप्रकटनीयं गुप्ततमं वृत्तान्तम्, उपबर्ह-लग्न-पृष्ठः, भ्रूमध्य-स्थापिताचल-दृष्टिः, क्षणं समाधिस्थित इव विचारपरवशोऽभूत्।

ततश्च पुनः सादिन आननं समवलोक्य, समप्राक्षीत्-वत्स! तत्र भवतः समीपात् कदा प्रचलितोऽसि?

स ऊचे—भगवन! मार्त्तण्ड-मण्डले निम्लोचति।

"ओत्वाष्ठ्योः समासे वे"ति वृद्धिविकल्पः। **अतिमसृणकमलस्य**=सुचिक्कण-पद्मस्य, **उदरे**=मध्ये, यत् **किंशलयम्**=पलाशम्, **तत्सोदरौ**=तत्तुल्यौ। आर्थीयमुपमा। **विनताम्**=नम्राम्। स्वभावतो विनतात्वस्य विनयभरेणेवेत्यु-त्प्रेक्षणम्। एवमुत्तरत्रापि। **दाक्षिण्येन**=औदार्येण, **भद्रतया**=शान्ततया। **मशकैरपि**, कर्णान्तिके स्वनद्भिरपि न शङ्कयितुमर्हमिति ध्वनिः। **अनीक्ष-णीयम्**=अनवलोकनीयम्। अत्र वृन्तान्तगतं गोप्यतमत्वं मशकैरप्यशङ्कनीय-मित्यादिना प्रकारान्तरेणाभिहितमिति पर्यायोक्तमलङ्कारः। **उपबर्हलग्नपृष्ठः**= उपधानसंपृक्तपृष्ठांशः। "उपधानं तूपबर्ह"इत्यमरः। **भ्रूमध्ये** स्थापिता दृष्टिर्येन सः। एतेन योगक्रियाऽभिज्ञता सूचिता। "भुवोर्मध्ये प्राणमावेश्य सम्य-ग्वि"त्यादिशास्त्रं चात्रानुकूलम्। अत एव "समाधिस्थित इवे"त्युपमानोपमेयभावः।

निम्लोचति=अस्ताचलं गच्छति। आसन्नास्तमनसमय इति यावत्। शत्रन्तम्।

तेनोक्तम्—कथं तर्हि प्रलम्बमुत्कटं चाद्धानमुल्लङ्घ्य, वात्यां विधूय, अल्पेनैव समयेन समायातोऽसि।

स चाह—श्रीमन्! ईदृश एवाऽऽसीदादेशोऽत्र भवतः।

ततः परं च—"अस्मै गुप्तसन्देशा कथनीया न वा? एष स्वस्मादप्याच्छाद्य, मदुक्तं प्रभुकर्णातिथीकरिष्यति न वा? यतो लिपिः कस्यापि कर्णेजपस्य हस्तेऽपि पतेद्, इति वाग्भिरेवोदीरणीयो मम सन्देशः, इति परीक्षयेयैनं वाग्जालैरिति" विविच्य, दुर्ग्गाधीशस्तेन बहुशः समालपत्। अन्ततश्च तं सर्वथा गुप्त-सन्देश-योग्यमाकलय्य, मनस्येव हर्षमनुभवंश्चिरं प्रशशंस शिवराजं, यत्—"नैतेषु कदाऽपि सतन्द्रोऽवतिष्ठते महाराजः, स सदा योग्यमेव जनं पदेषु नियुनक्ति, नूनं बालोऽप्येषोऽबालहृदयोऽस्ति, तदस्मै कथयिष्यामि सखिलं वृत्तान्तम्, पत्रं च केषुचिद् विषयेषु समर्पयिष्यामि"।

एवमालपच्च,

दुर्ग्गाधीशः—मन्ये क्षत्रियोऽसि।

सादी—आम्, श्रीमन्!

वात्याम्=वायुचक्रम्। "आँधी"इति हिन्दी। लोकोक्तिरलङ्कारः।

स्वस्मादपि, यदा स्वत एवाच्छादयति तदा किमु वक्तव्यं परस्मादिति-ध्वनिः। एवञ्चात्मवाची स्वशब्द इति तत्त्वम्। कर्णेजपस्य=सूचकस्य। "तत्पुरुषे कृति बहुलमि"ति विभक्तेरलुक्। तेन, "वृद्धो यूने"ति दर्शनेन सहार्थैकशब्दाभावेऽपि तृतीया। तन्द्रया=निद्रापूर्वावस्थया, आलस्येन, सहितः, सतन्द्रः।

दुःखेन गम्यत इति दुर्ग्गस्तस्मात्। दुर्गलक्षणं तद्भेदादिकञ्च पुराणेषु

दु०—[स्मित्वा] नान्येषामपत्यान्येवं तेजस्वीनि, दृढ-हृदयानि, प्रभुभक्तानि च भवन्ति। [पुनः सम्मुखमवलोक्य] किं ते नाम ?

सा०—[अञ्जलिं बद्ध्वा] आर्य ! मां रघुवीरसिंह इति वदन्ति जनाः।

दु०—चिरञ्जीव [क्षणं विरम्य] अस्तु, सम्प्रति दुर्गाद् बहिरेव साम्मुखीने हनूमन्मन्दिरे रात्रिमतिवाहय, श्वस्तु किञ्चिदुदञ्चति मरीचिमालिनि, अत्राऽऽगत्य, पत्रादिकं गृहीत्वा, महाराज-निकटे यातासि।

रघुवीरः—बाढम्।

इति शिरो नमयित्वा, प्रतिनिवृत्य, पनस-शाखातोऽश्वमुन्मुच्य, दुर्गाध्यक्ष-प्रेषितस्य भृत्यस्यैकस्य हस्ते वल्गादान-पुरःसरं समर्प्य, अपर-दासेरकेण व्यादिष्ट-मार्गो नव-वारिद-वारिबिन्दु-वृन्द-सम्पर्क-प्रकटित-सिन्धुर-सन्दोह-सन्तर्पण-मधुरगन्धिम्, रजनीकर-कर-निकर-विरोचिताम् भूमिमालोकयन्, मन्दं मन्दमासासाद मारुति-मन्दिरम्। तत्र चाऽऽगन्तुकानामेव निवासाय,

---

द्रष्टव्यम्। उदञ्चति=उदयं प्राप्नुवति। यातासि=गन्तासि। प्रापणार्थकाद् यातेर्लुटि मध्यमपुरुषैकवचनं। अपरदासेरकेण=इतरभृत्येन, व्यादिष्टमार्गः=प्रदर्शिताध्वः। नववारिदस्य=नूतनमेघस्य, वारिबिन्दूनाम्=जलकणानाम्, वृन्दस्य=समूहस्य, संपर्केण=संसर्गेण, प्रकटितः=प्रादुर्भूतः, सिन्धुरसन्दोहस्य=गजयूथस्य, सन्तर्पणम्=तृप्तिजनकः, मधुरः=हृद्यः, गन्धो यस्यास्ताम्। रजनीकरस्य=शशिनः, कराणाम्=दीधितीनाम्, निकरेण=वृन्देन,

कलित-यथोचित-साधनानां प्रकोष्ठानामन्यतमे प्रविश्य, गवाक्षा-नुन्मुद्र्य, वाताभिमुखं नाग-दन्तिकासु वर्म, वस्त्राणि चावलम्बय्य, आसन्न-कूपाज्जलमुत्तोल्य, हस्त-पादं प्रक्षाल्य, हनूमन्मूर्त्तिं दृष्ट्वा, कमपि नित्य-नियममिव निर्वाह्य, दुर्ग्गाध्यक्ष-प्रेषितं किञ्चिदाहा-रादिकमुपगृह्य, ग्रीष्मसुखावहानां वातानां सुखमनुभवन्, कदा-चिच्चन्द्रम्. कदाचित्तारकाः, कदाचिद् गिरि-शिखराणि, कदाचिद् दुर्ग-प्राचीरम, कदाचित् सुदूर-पर्य्यटद्यामिक-यातायातम्, कदाचिन्नतोन्नतभूभागान्, कदाचिच्च अभ्रङ्कषान् हनूमन्मन्दिर-कलशान्, अवलोकयन्, मन्दिरस्य पश्चिमतः परिक्रमा-पर-पादाहति-पिच्छिल-पाषाण-पट्टिका-परिष्कृत-वेदिकायाम् पर्यटन-

---

विरोचिताम्=विशेषतः शोभिताम्। भूमेर्विशेषणद्वयम्। आगन्तुकानाम्=अतिथीनाम्। कलितानि=सम्पादितानि, यथोचितम्=यथायोग्यम्, साधनानि=सामग्र्यः येषु तेषाम्। प्रकोष्ठानाम्="कमरा" पदवाच्यानाम्। गवाक्षान्=वातायनानि। "खिडकी" इति हिन्दी। उन्मुद्र्य=उद्घाट्य। "खोलकर" इति हिन्दी। नागदन्तिकासु=कीलिकासु। "खूंटी" इति हिन्दी। अवलम्बय्य=लम्बयित्वा। उत्तोल्य=उद्धृत्य। हस्तपादम्, प्राण्यङ्गत्वादेकवद्भावः। नित्य-नियमम्=सन्ध्यादिकम्। निर्वाह्येवेति सम्बन्धः। यात्रायामसमये समुचित-रूपेण तदकरणमिवार्थव्यङ्ग्यम्। वातानाम्=वायूनाम्। दुर्गस्य प्राचीरम्=प्रान्ततो वृतिः, "प्राचीरं प्रान्ततोवृतिरि"त्यमरः। सुदूरं पर्यटतां यामिकानाम्=प्रहरिणाम्, यातायातम्। अभ्रम्=मेघम्, "अभ्रं मेघो वारिवाहस्तनयित्नुर्बलाहक" इत्यमरः, कषन्ति=कर्षन्तीत्यभ्रंकषास्तान्। "सर्वकूलाभ्रकरीषेषु कष"इति खच्, "खित्यनव्ययस्ये"ति मुम्। परिक्रमापराणाम्=परिभ्रमणनिरतानाम्, पादा-हतिभिः=चरणताडनैः, पिच्छिलाभिः=कोमलाभिः, गमागमचिह्नमयीभि-

कञ्चित् समयमतिवाहयाम्बभूव ।

तावत् तेन पयःफेनासार-च्छवि-विजित्वरया ज्योत्स्नया द्विगुणितोत्साहेन, धीर-समीर-स्पर्श-शान्त-श्रमेण, प्रस्फुरच्चन्द्रकला-कलिका-भ्रमद्-भ्रमर-झङ्कार-भार-मन्द्र-स्वर-पीयूष-शीकर-परिमार्जित-श्रवणेन समश्रूयन्त, केचित् शुकीर्मूकयन्तः, हंसीर्ध्वसयन्तः, सारिकाः सारयन्तः, कोकिलान विकलयन्तः, वीणां च विगणयन्तः, काकली-कलमयाः स्वरालापाः । श्रवणेनैव तेनावगतं यत्, अलापा एते कस्या अपि बालिकायाः, सा च लज्जा-परवशा, यतो नोच्चैर्गायति, उच्च-कुलप्रसूता यतो नान्यासामेवमुदारा वाक्,

रिति यावत्, पाषाणपट्टिकाभिः=प्रस्तरखण्डैः, **परिष्कृतायाम्**=भूषितायाम्, **वेदिकायाम्**=प्रतर्दिकायाम् । **अतिवाहयाम्बभूव**=गमयाञ्चकार ।

तावत्तेन **स्वरालापाः समश्रूयन्तेति** सम्बन्धः । तं त्रिभिर्विशिनष्टि-**पयःफेनानाम्**=दुग्धडिण्डीराणाम्, **आसारस्य**=धारासम्पातस्य, **छवेः**=शोभायाः, **विजित्वरया**=जयनशीलया **द्विगुणितोत्साहेन**=प्रवर्धितहर्षेण । **धीरसमीरस्य**=मन्दवातस्य, **स्पर्शेन शान्तः**=अपगतः, **श्रमः**=खेदो यस्य तेन । **प्रस्फुरन्त्या**=चाञ्चल्यमुपगच्छन्त्या, **चन्द्रकलया**=चन्द्रिकया, विकासितासु कलिकासु, शाकपार्थिवादिगणीयमध्यमपदलोपिसमासः, **भ्रमताम्**=चरताम्, भ्रमराणां **झङ्कारभारेण**=गुञ्जनव्रजेन, सञ्जातः-**मन्द्रस्वर** एव **पीयूषम्**=अमृतम्, तस्य **शीकरैः**=जलकणैः, **परिमार्जिते**=शोधिते, **श्रवणे**=कर्णौ यस्य तेन । **केचित्**=कियन्ताश्चित्स्वरालापाः । शुकी-हंसी-सारिकादिस्वरविजेतृत्वेनातिश्रेष्ठत्वं निखिलस्वरविलक्षणत्वञ्च ध्वनितम् । **बालिकायाः**=बाल्ययौवनसन्धौ विद्यमानायाः, **लज्जापरवशा**=व्रपाधीना । अप्राप्तपूर्णयौवनत्वात्रपापरवशता ।

समीप-वर्त्तिनी यतः स्फुटः स्वरः, पूर्वस्यामुपविष्टा च यतस्तत एव मूर्च्छन्ति मूर्च्छनाः।

अथ कर्णाविव गृहीत्वाऽऽकृष्टो रघुवीरसिंहो मन्दिरं दक्षिणतः प्रदक्षिणीकृत्य, तयैव प्रदक्षिण-वेदिकया तत्क्षणमेव मन्दिरस्याग्नि-कोणे, कपोत-पोतक-गूङ्कार-मधुर-कपोत-पालिकाधस्तम्भारम्भ-निकटे समुपतस्थेऽवालोकयच्च यत् पूर्वस्यामस्ति विशाला पुष्प-वाटिका, यस्यामतिमुक्त-लताः सौरभेण विष्णुपदमपि मदयन्ति, यूथिकाः सुगन्ध-तरङ्गैर्हरितामपि हृदयं हरन्ति, पाटलि-पटला-न्यलि-पटल-रसनाश्चटुलयन्ति, मालतिकाश्च, मरन्द-बिन्दु-

कन्यानां हि लज्जाधीनत्वं लक्षणकोटिप्रविष्टम्। यतः=यस्माद्धेतोः। मूर्च्छना इति पाठः। "अचोरहाभ्यामि"ति छद्वित्वे चत्वे च तत्साधुत्वम्। तुकस्तु न सम्भावना, छस्य दीर्घात्परत्वाभावात्, ह्रस्वात्परत्वाभावाच्चेति वैयाकरणाः।

कर्णाविव गृहीत्वाऽऽकृष्ट इत्यत्र लोकोक्तिरलङ्कारः। **कपोतपोतकानाम्**=पारावतशावकानाम्, **गूङ्कारेण**=तज्जातीयशब्देन, **मधुरायाः**=मनोहरायाः, **कपोतपालिकायाः**=विटङ्कस्य, "कपोतपालिकायान्तु विटङ्कं पुन्नपुंसकम्"त्य-मरः, **अधः**=निम्नांशे, **स्तम्भारम्भस्य निकटे**। अधस्तम्भेत्यत्र "खपरे शरि वा विसर्गलोपः"। **अतिमुक्तलताः**=माधवीलताः, "अतिमुक्तः पुण्ड्रकः स्याद्वास-न्ती माधवी लते"त्यमरः। **सौरभेण**=सौगन्ध्येन। **विष्णुपदम्**=नभः। "विष्ण-द्विष्णुपदं वापि पुंस्याकाशविहायसी"त्यमरः। **यूथिकाः**=मागध्यः। "अथ मागधी। गणिकायूथिकाऽम्बष्ठे"त्यमरः। **हरिताम्**=दिशाम्। **हृदयम्**=तत्त्व-त्यम्। अन्तरालप्रान्तमिति यावत्। **हरन्ति**=स्वायत्तीकुर्वन्ति। **पाटलिपट-लानि**=मोघासमूहाः। "पाटलिः पाटला मोघा काचस्थाली फलेरुहा। कृष्णवृन्ता कुबेराक्षी"त्यमरः। **अलि-पटलरसनाः**=द्विरेफव्रातजिह्वाः। **चटुलयन्ति**=

मन्दोहैर्वसुमतीं वासयन्ति। तस्यां मन्दिर-पूर्वद्वार-सम्मुख एवास्त्येका परम-रमणीया ज्योत्स्ना-स्पर्श-प्रकटित-द्विगुणतर-चाकचक्या, सोपानत्रयालङ्कृत-चतुरवरोहा, हंसपक्ष-वलक्ष-च्छवि-विजित्वर-धवल-ग्राव-वेदिका। अस्यामागन्तुकानामुपवेशाय रचिताः पाषाणमया एव कतिचन मञ्चाः, तेषामन्यतम उपविष्टा बालिकैका। सेयं वर्णेन सुवर्णम्, कल-रवेण पुंस्कोकिलान, केशै रोलम्ब-कदम्बान, ललाटेन कलाधर-कलाम्, लोचनाभ्यां खञ्जनान, अधरेण बन्धुजीवम्, हासेन ज्योत्स्नां तिरस्कुर्वती, वयसैकादश-

---

चञ्चलयन्ति। **मालतिकाः**=जातयः। "सुमना मालती जातिरि"त्यमरः। **मरन्द-बिन्दु-सन्दोहैः**=मकरन्दपृषद्गणैः। **वसुमतीम्**=वसुधाम्। **वासयन्ति**=सुगन्धयन्ति। **परमरमणीया**=नितान्तहृद्या। वेदिकाविशेषणमिदम्। **ज्योत्स्नायाः**=कौमुद्याः, **स्पर्शेन**=संसर्गेण, प्रकटितं द्विगुणतरं **चाकचक्यम्**=कान्तिविशेषो यया सा। **सोपानत्रयेण**=आरोहणत्रयेण, "आरोहणं स्यात् सोपानमि"त्यमरः, **अलङ्कृता**=विभूषिता, अत एव **चतुष्षु**=वेदसंख्याकस्थानेषु, **अवरोहः**=स्थितिस्थानं यस्याः सा। **हंसपक्षाणाम्**=कादम्बपतत्राणाम्, "गरुत्पक्षच्छदाः पत्रं पतत्रं च तनूरुहमि"त्यमरः, **वलक्षायाः**=सितायाः, **छवेः**=शोभायाः, **विजित्वराणाम्**=जयनशीलानाम्, **धवलानाम्**=स्वच्छानाम्, **ग्राव्णाम्**=प्रस्तराणाम्, वेदिका यस्यां सा। **मञ्चाः**=उच्छ्रितभूमयः, "वृद्धोऽन्धः पतिरेष मञ्चकगत"इत्यादौ प्रसिद्धम्। **बालिका**=इयमेव कथानायिका। "वर्णेन सुवर्णं तिरस्कुर्वती"त्येवं रूपेण सर्वत्रान्वयः। वर्णेन सुवर्णतिरस्कारोक्त्या सुवर्णरूपोपमानानादरप्रतीत्या प्रतीपालङ्कारः सहृदयजनसंवेद्यः। **रोलम्बकदम्बान्**=भ्रमरसमूहान्। **बन्धुजीवम्**=रक्तकम्। "रक्तकस्तु बन्धूको बन्धुजीवक"

मिव वर्षं स्पृशन्ती, श्याम-कौशेय-वस्त्र-परिधाना, श्वेत-बिन्दु-सन्दोह-सङ्कुल-रक्ताम्बर-कञ्चुकिका, कण्ठ एकयष्टिकां नक्षत्र-मालां बिभ्रती, सिन्दूर-चर्चा-रहित-धम्मिल्लेन परिशिष्टं पाणि-पीडनमिति प्रकटयन्ती, हस्ते पाटलि-कुसुम-स्तबकमेकमादाय, शनैः शनैर्भ्रामयन्ती, तमेवावलोकयन्ती च, अविदित-बहुल-तान-तारतम्यम्, मन्द-मन्दं, मुग्ध-मुग्धम्, मधुर-मधुरम्, किञ्चिद् गायतीति।

यद्यपि नैतया सरस्वती-सरूपया, अज्ञात-तातोत्सङ्ग-शयनातिरिक्त-सांसारिक-सुखया कदाऽपि गातुं शिक्षितम्, न वा

इत्यमरः। "दुपहरिया" इति हिन्दी। **हासेन**, हासस्य वर्णनं श्वैत्यमयमिति कविसमयख्यातिः। श्यामं **कौशेयवस्त्रम्**=पट्टवसनम्, परिधानं यस्याः सा। श्वेतबिन्दूनां **सन्दोहैः**=समूहैः, **सङ्कुलस्य**=व्याप्तस्य, **रक्ताम्बरस्य**=रक्तवस्त्रस्य, **कञ्चुकी**=चोलिका यस्याः सा। बहुव्रीहौ "शेषाद्विभाषे"ति कपि "केण" इति ह्रस्वः। **एकावलीम्**=एकयष्टिकाम्। **नक्षत्रमालाम्**=सप्तविंशतिमौक्तिकमयीम्। "एकावल्येकयष्टिका। सैव नक्षत्रमाला स्यात् सप्तविंशतिमौक्तिकैरि"त्यमरः। **सिन्दूरचर्चारहितेन**=नागसंभवसंपर्कशून्येन, **धम्मिल्लेन**=संयुतकेशसमूहेन, "धम्मिल्लः संयताः कचा" इत्यमरः। **पाणिपीडनम्**=विवाहः। **परिशिष्टम्**=अवशेषः। **स्तबकम्**=गुच्छम्। अविदितं बहुलं **तानतारतम्यम्**=तानोत्कर्षापकर्षौ, यस्मिंस्तत्। क्रियाविशेषणम्, **अग्रेतनानि** च।

अज्ञातं तातोत्सङ्गशयनादतिरिक्तं **सांसारिकं सुखम्**=विषयानन्दो यया तया। **कर्णयोः**=श्रोत्रयोः, **रसायनानि**=आनन्ददायिन्यः, मूर्च्छनाः। **कर्णातिथीकृताः**=श्रोत्रगोचरीकृताः। मूर्छनानां श्रोत्रगोचरत्वे स्थिते कर्णातिथीकरणरूपे भक्त्या समारोप इति समाधिर्नाम गुणः।

गायकानां तास्ताः कर्ण-रसायन-मूर्छनाः कर्णातिथीकृताः, तथापि भज्यमानमपि, त्रुट्यमानमपि, आम्रेड्यमानमपि, अदर्शित-राग-विशेषमपि, आरोहावरोह-ध्रुवाभोगालङ्कारादि-कथा-शून्यमपि, निज-कल्पना-मात्रम्, तद्देशीय-ग्राम्यस्त्री-गानानुकल्पं, सुदीर्घ-स्वर-रणनं गानमिदं परम-सरसम्, परममधुरम्, परमहारि चाऽऽसीत्।

रघुवीरसिंहस्तु स्वरालाप-श्रवणेनैव परवशो विलोक्यैनां कोऽहम्? क्वाहं? केयं? किमिदम्?—इत्यखिलं यौगपद्येनैव विसस्मार।

गानमिदं परमसरसादि-आसीदिति सम्बन्धः। गानं विशिनष्टि-**भज्यमानम्**=स्खलत्। **त्रुट्यमानम्**=विच्छिन्नप्रायम्, पूर्वापरसम्बन्धशून्यमिति यावत्। **आम्रेड्यमानम्**=पुनः पुनरुच्चार्यमाणम्। यद्यपि गाने गुणताऽऽम्रेड्यमानतायास्तथाप्यनवसरे स्थितत्वे दोषत्वमेवेति वेदितव्यम्। न **दर्शितः**=न प्रकटीकृतः, **रागविशेषः**=ललिताद्यनेकभेदभिन्नः, यस्मिंस्तत्। **आरोहः**=सरि-ग-म-प-ध-नीनामुच्चैस्त्वम्, **अवरोहः**=तन्नीचैस्त्वम्, **ध्रुवा**=स्थिरपदम्, **आभोगः**=रागविस्तारः, **अलङ्करणमलङ्कारः**=रसादिः, तत्कथाशून्यमपि। तद्देशीयानां **ग्राम्यस्त्रीणाम्**=हालिकदाराणाम्, **गानस्य**=गीतेः, **अनुकल्पम्**=तुल्यम्। सुष्ठु **दीर्घाणाम्**=ताराणाम्, स्वराणां **रणनम्**=ध्वनिः, यस्मिंस्तत्। **परमहारि**=अत्यन्ताकर्षकम्।

अखिलम्=समस्तम्। **यौगपद्येन**=एककालम्।

विनिश्चेतुं शक्यो न सुखमिति वा दुःखमिति वा
प्रमोहो निद्रा वा किमु विषविसर्पः किमु मदः।

अहो आश्चर्यम् ! य एष फणि-फणाफूत्कारेष्वपि, सक्रोध-हर्य्यक्ष-जृम्भारम्भेष्वपि, भल्ल-तल्लजाग्र-परिस्पर्द्धि-खर-नखरभल्ल-धावनेष्वपि, घन-घनाघन-घर्षण-विघट्टित-गैरिक-व्रात-जलप्रपात-गिरिगह्वरोत्फालेष्वपि, तरलतर-तरङ्ग-तोयावर्त्त-शताकुल-तर-ङ्गिणी-तीव्रतर-वेगेष्वपि, गण्डक-मण्डल-घोणाघर्षण-घोरघर्घरा-

---

तव स्पर्शे स्पर्शे मम हि परिमूढेन्द्रियगणो
विकारः कोऽप्यन्तर्जडयति च तापं च तनुते ॥
इति प्राचीनपद्यं तद्दशावधारणायानुचिन्तनीयम्।

अहो आश्चर्यम्="ओदि"ति प्रगृह्यसंज्ञा । फणिफणाफूत्कारेषु= सर्पस्पटा "फूँ"रवेषु । सक्रोधस्य=कुपितस्य, हर्य्यक्षस्य=केशरिणः, "हर्य्यक्षः केशरी हरिरि"त्यमरः, जृम्भारम्भेषु=मुखव्यादानोपक्रमेषु । भल्ल-तल्लजानाम्=प्रशस्तभल्लानाम्, "मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ । प्रशस्तवाचकान्यमूनी"त्यमरः, परिस्पर्धिनः=प्रतिद्वन्द्विनः, खराः=कठोराः, नखराः=हस्तजाः, येषां ते च ते भल्लाः=ऋक्षाः, "भल्लो भल्लूकशस्त्रयो रि"ति कोशः, तेषां धावनेषु=मारणार्थत्वरितगतिषु । घनानाम्=सान्द्राणाम्, घना-घनानाम्=वर्षनिरतवारिदानाम्, "शक्रो घातुकमत्तेभो वर्षुकाब्दो घनाघन" इत्यमरः, घर्षणेन=घट्टनेन, विघट्टितेषु=विदलितेषु, गैरिकव्रातेषु=गैरिकमि-लितप्रस्तरखण्डेषु, जलप्रपाताः=आसाराः, येषु तादृशानि यानि गिरिगह्वराणि तेषाम् , उत्फालेषु=उत्कूर्दनेषु । तरलतराः=अतिचञ्चलाः, तरङ्गाः=लहरयः, येषु तादृशानां तोयानाम्=वारीणाम्, आवर्त्तशतैः=असंख्यभ्रमरि-काभिः, आकुलानाम्=क्षुभितानाम्, तरङ्गिणीनाम्=नदीनाम्, तीव्रतरेषु= अतितीव्रेषु, वेगेषु=ओघेषु । गण्डकमण्डलस्य=खड्गिसमूहस्य, घोणानाम्=

घोष-घोरतर-प्रान्तरेष्वपि च धैर्यं नात्याक्षीत्, कार्यजातं न व्यस्मार्षीत्, आत्मानं च न न्यगकार्षीत्, तस्याधुना स्विद्यन्त्यङ्गानि, एजते गात्र-यष्टिः, विमनायते हृदयम्, अञ्चन्ति रोमाणि, क्षुभ्यति च मनः। तत् कथमिदम्? किमिदम्? कुत इदम्? अहह! सत्यम्, वीर-बालोऽप्येष प्राप्यावसरमाहतो मदन-मृगयुना।

तावदकस्माद् "रघुवीर! रघुवीर! त्वं शिव-वीरस्य चरोऽसि, गूढाभिसन्धिषु प्रेष्यसे, अल्पं तव वेतनम्, साधारणी तवावस्था,

नासानाम्, "घोणा नासा च नासिके"त्यमरः, घर्षणेन, घोरः=भयावहः, यो घर्घराघोषः=घर्घरखः,तेन घोरतराः=अतिकठोराः, प्रान्तराः=दूरशून्याध्वानः, तेषु। अनुप्रासोत्र गद्यसमूहे। न-अत्याक्षीत्=न त्यक्तवान्। न व्यस्मार्षीत्= न विस्मृतवान्। न न्यगकार्षीत्। न न्यक्कारमकरोत्। न नीचैरमन्यतेति यावत्। स्विद्यन्ति=स्वेदवन्ति भवन्ति। एजते=कम्पते। विमनायते=वैक्लव्यमधिगच्छति। अञ्चन्ति=उद्गतानि भवन्ति। क्षुभ्यति=क्षोभमनुभवति। मदन एव मृगयुः=व्याधस्तेन। रूपकम्।

वीररसप्रधानेऽस्मिन् काव्ये तदङ्गतया विप्रलम्भशृङ्गारवर्णनमिदम्। सौवर्णीरघुवीरसिंहावालम्बनविभावौ, रघुवीरधैर्यध्वंससमुद्भूताः स्वेदगात्रकम्पनादयोऽनुभावाः, निर्वेदादयश्चाग्रे वाच्या व्यभिचारिण इति।

तावदकस्मादन्तःकरणेन स्वयमेव प्रबोधितः पुनस्तामेवैक्षिष्टेति सम्बन्धः। "शिववीरस्य चरोसी"त्यनेनोच्चजनसंपर्किणस्ते न युक्तमिदमिति व्यञ्जितम्। तथा च प्राक्तनं पद्यम्-"न गणितं यदि जन्म पयोनिधौ, हरशिरस्थितिभूरपि विस्मृता"। गूढाभिसन्धिषु=गुप्तकृत्येषु। अल्पम्=सस्त्रीकनिर्वाहायोग्यम्। नाद्यत्व इव तदानीं दरिद्रा अलब्धभृतयश्चोद्वाह्य कामपि ललनां स्वीयं तस्याश्च

खड्ग-धारावलेहनमिव कष्टतरं तव कार्यम्, कैशोरं वयः, अबहुदर्शि हृदयम्, सर्वत्र जागरूको राज-दण्डः, अवितर्कणीया च भाविनी घटना, तन्मा स्म त्वं मुखचन्द्रावलोकनैरधर-सीधुतृषाभिः, कोमलाङ्गाऽऽलिलिङ्गिषाभिः, मधुरालाप-शुश्रूषाभिश्चाऽऽत्मानं विक्रीणीष्व"-इत्यन्तःकरणेन स्वयमेव प्रबोधितो नेत्रे प्रमृज्य, स्तम्भावष्टम्भं परिहाय, लोचनयोरुपरि स्फुरतः कुञ्चितकचानपसार्य, शीतलं निःश्वस्य च, आत्मनो दशां स्मरन्नेव पुनस्तामेव कौमारात्परं वयश्चुचुम्बिषन्तीं, कुसुम-कुड्मल-घूर्णन-व्याजेन

जीवनं व्यर्थयन्ति स्मेति विशद्यते। **साधारणी तवावस्था,** लोकोक्तिरियम्। **अवस्था**=परिस्थितिः। वयोर्थकत्वे तु-"कैशोरं वय" इत्यस्य वैयर्थ्यापात इति ध्येयम्। खड्गधारायाः **अवलेहनम्**=रसनयास्वादनम्।

राजसेवा मनुष्याणामसिधारावलेहनम्।
पञ्चाननपरिष्वङ्गो व्यालीवदनचुम्बनम्॥

इत्युक्तेः। **जागरूकः**=अनिद्रितः। सर्वत्र लब्धप्रसर इति यावत्। इयमपि लोकोक्तिः। मा स्म मुखचन्द्रावलोकनादिभिरात्मानं विक्रीणीष्वेति सम्बन्धः। अधरस्थितस्य **सीधुनः**=ऐक्षवमद्यस्य, **तृषाभिः**=तृष्णाभिः। **कोमलाङ्गालिलिङ्गिषाभिः**=मृदुतन्वाश्लेषवाञ्छाभिः। **मधुरालापशुश्रूषाभिः**=हृद्यशब्दश्रवणमनोरथैः। **प्रमृज्य**=प्रोञ्छ्य। **स्तम्भावष्टम्भम्**=स्थगितताम्। सौवर्णीदर्शनोत्थां जडतामिति यावत्। **शीतलं निःश्वस्य,** लोकोक्तिः। "ठण्डी साँस लेकर" इति लोके। स्वदशास्मरणखेदसमुत्थमिदम्। **कौमारात्परं वयः**=यौवनम्। "कौमारं यौवनं जरे"त्यवस्थात्रितयाभिप्रायम्। **चुचुम्बिषन्तीम्**=चुम्बितुमिच्छन्तीम्। स्प्रष्टुमभिलषन्तीमिति यावत्। **कुसुमकुड्मलघूर्णनव्याजेन**=सुमकलिकापरिचालनकपटेन। **घूर्णयन्तीम्**=परिचा-

यूनां मनो घूर्णयन्तीम्, सौन्दर्य-सारावतारस्वरूपामैक्षिष्ट।

अथ सा तु "सौवर्णि! सौवर्णि! तातस्त्वामाकारयति"-इति कस्यापि बटोरिव वाचमाकर्ण्य, "आम्, एषाऽऽगच्छामि"-इति मधुरमुदीर्य, उत्थाय, वेदिकातोऽवतीर्य, वाटिकायामेव दक्षिणतः सुधा-धवलमेकं गृहं प्राविशत्।

रघुवीरसिंहस्य समीपत एव गतेति गमन-समये सचकितं सगति-स्तम्भं परिवृत्त-ग्रीवं "कोऽयम्" इत्येनं क्षणमवलोकयामास। परतश्च "स्यात् कोऽपि"इति समुपेक्ष्य, गृहं प्रविष्टेत्यपरोऽपि जातो वशीकार-प्रयोग-प्रचारः।

रघुवीरश्च ततः प्रतिनिवृत्य, पुनः स्वाधिकृत-कोण-कोष्ठमेवाऽऽयातः।

तत्र च गवाक्ष-जाल-प्रसारितैः, राजत-मार्जनी-निभैः, कलानिधि-कर-निकरैः, समूह्य संशोधित इवान्धकारे, पयः-

लयन्तीम्। **सौन्दर्यसारस्य**=सुन्दरतातत्त्वस्य, **अवतारस्वरूपाम्**=देहधारिणीभूताम्। पिण्डीभूतसौन्दर्यामिति यावत्। **आगच्छामि**="वर्त्तमानसामीप्ये वर्त्तमानवद्वा"। **सुधाधवलम्**=चूर्णकसितम्। **चकितेन**=विस्मयेन सह वर्त्तते यस्यां क्रियायान्तत्। **सगतिस्तम्भम्**=सगमनावरोधम्, **परिवृत्तग्रीवम्**=परिवर्तितकन्धरम्। क्रियाविशेषणानि। **वशीकारप्रयोगप्रचारः**=स्वायत्तीकरणविधानप्रसारः। रघुवीरविषयकमिदम्।

स्वाधिकृतकोणकोष्ठम्=निर्दिष्टस्वावाससदनम्।

गवाक्षजालप्रसारितैः=वातायनरन्ध्रव्याप्तैः। रजतस्येयं **राजती**=रौप्यमयी, **मार्जनी**=बहुकरी, "झाड़ू" इति हिन्दी, तत्तुल्यैः। **कलानिधिक-**

पयोधि–फेनैरिवाऽऽस्तृते शयनीय–पीठ उपविश्य, कदाचिदध इव मुखं विदधत्, कदाचित् कपोलं करे कलयन्, कदाचिज्जालान्तरेण तारकमण्डलमवलोकयन्, कदाचित्किमिति मृषा–चिन्तनैरित्यात्मनैवाऽऽत्मानं सान्त्वयन्, कदाचिच्च 'निद्रे ! कुत इव विद्रुताऽसि ?' इत्यशान्तिं बिभ्रत्, पार्श्वतः पार्श्वे परिवर्त्तमानो होरामेकामयापयत् ।

ततश्च "अहह ! शिववीर–कार्येष्वसम्पादितमेकमवशिष्यते" इति किञ्चिन संस्मृत्येव, कशयेव ताडितः, सपद्युत्थाय, "मन्दिरपुरोहितः क"इति कांश्चिदाप्रच्छ्य, केनचिन्निर्दिष्टमार्गस्तस्यामेव वाटिकायां तदेव बालिकया प्रविष्टचरं गृहं प्रविवेश ।

तत्र चैकस्मिन् प्रकाण्ड–कोष्ठे निरैक्षिष्ट–यत्, एकस्यामारकूटदीपिकायां प्रदीप एको ज्वलति, कुश–काशासनान्यनेकान्यास्तृतानि,

---

रनिकरैः=चन्द्रकिरणसमूहैः । **समूह्य**=समुत्सार्य । "झाड़ कर" इति हिन्दी । **संशोधिते**=स्वच्छीकृते । दूरीकृत इति यावत् । **पयःपयोधिफेनैः**=क्षीरवारिधिडिण्डीरैः । **आस्तृते**=विस्तीर्णे । **शयनीयपीठे**=पल्यङ्के । **विदधत्**=कुर्वाणः । "नाभ्यस्ताच्छतुरि"ति नुम्निषेधः । **जालान्तरेण**=वातायनरन्ध्रेण । **तारकमण्डलम्**=भवजम् । "तारकं तारका तथे"ति शाश्वतः । **सान्त्वयन्**=सामतामापादयन् । **विद्रुतासि**=पलायितासि । **पार्श्वतः पार्श्वे परिवर्त्तमानः**, खेदस्वापे लोके "करवट बदलते हुए" इति समभिधीयते । लोकोक्तिः । **होराम्**=घटिकाम् । **अयापयत्**=व्यतीतयाञ्चकार ।

प्रकाण्डकोष्ठे=विशाले कोष्ठे । "बड़े कमरे में" इति हिन्दी । **आरकूटदीपिकायाम्**=पित्तलदीपिकायाम् । "रीतिः स्त्रियामारकूट" इत्यमरः । **दीपिका**=

आरक्त-वेष्टनेषु बहुशः पुस्तकानि पीठिका अधिष्ठापितानि, नागदन्तिकासु धौत-वस्त्राणि पट्टाम्बराणि च लम्बन्ते, एकस्मिन् शरावे मसिपात्रम्, लेखनी, छुरिका, गैरिकम्, उपनेत्रं चाऽऽयोजितमस्ति, पात्रान्तरे च खादिरं चूर्णम्, आर्द्र-वस्त्र-वेष्टितानि नागवल्ली-दलानि, पूगानि, शङ्कुला, देव-कुसुमानि, एलाः, जाति-पत्राणि, कर्पूरं च विन्यस्तमस्ति। तन्मध्यत एव च महोपबर्हमेकं पृष्ठत आश्रित्य, पादौ प्रसार्य, उपविष्ट एको वृद्धः, सम्मुखस्थश्च छात्र एकः पादौ संवाहयति, अपरश्च किञ्चित् तालीपत्र-पुस्तकं दीप-समीपे पठति, वृद्धश्च किञ्चिन्निद्रा-मन्थरश्छात्र-प्रश्नानुसारेण मध्ये मध्य आलस्यमुन्मुच्य, किमप्यर्द्ध-विशिथिल-शब्दैरुत्तरयति-इति।

दीपस्थापनार्थनिर्मितं वस्तु। "दीयट" इति हिन्दी। **आरक्तवेष्टनेषु**=ईषद्रक्त-बन्धनवस्त्रेषु। "खारुआँ का वेठन" इति हिन्दी। **पीठिका अधिष्ठितानि**, "अधिशीङ्स्थासां कर्मे"ति कर्मत्वम्। **शरावे**=विस्तृतपात्रे। "तस्तरी" इति हिन्दी। **गैरिकम्**, लिखितस्याशुद्धस्य दूरीकरणार्थम्। **पात्रान्तरे**, तथाविधे। **नागवल्लीदलानि**=ताम्बूलवल्लीपत्राणि। "ताम्बूलवल्ली ताम्बूली नागवल्ली" त्यमरः। **पूगानि**=क्रमुकाः। **शङ्कुला**=पूगकर्त्री "सरौता" इति हिन्दी। **देव-कुसुमानि**=लवङ्गानि। **एलाः**=पृथ्वीकाः "पृथ्वीका चन्द्रबालैला निष्कुटिर्बहुले" त्यमरः। **जाति-पत्राणि**=मालतीपत्राणि। **कर्पूरम्**=घनसारः। **महोपबर्हम्**=महदुपधानम्। "मसनद" इति हिन्दी। संवाहनं करोति **संवाहयति**=मर्दयति। "सवाहनं मर्दनं स्यादि" त्यमरः। **तालीपत्र-पुस्तकम्**=तालवृक्षपत्रलिखितपुस्तिकाम्। तदानीं नाद्यत्व इव कर्गजाधिक्यमासीत्। **निद्रा-मन्थरः**=निद्रोद्भूतालस्यवलितः। **अर्धविशिथिलशब्दैः**=कियदक्षरविच्छिन्नैः।

अथनं पाद-संवाहन-परश्छात्रोऽवलोक्य, को भवानित्य-पृच्छत्। एष च "श्रीमतां समर-विजयिनां महाराष्ट्र-राजानां भृत्योऽस्मि" इति मन्दमभ्यधात्। तदवधार्य, वृद्धोऽपि नेत्रे विस्फाय, निन्द्रामन्थरेण स्वरेण, "आस्यतामास्यताम्" इति प्रणमन्तमुवाच। सोऽपि प्रणम्य, समुपविश्य, दत्त-निजपरिचयः, कुशलादि-वार्त्ता आलप्य, क्षणानन्तरं तदादेशानुसारेण करौ सम्पुटीकृत्य, न्यवेदयत्।

"भगवन्! प्रणम्य भवन्तं, तत्रभवान् महाराष्ट्र-राजः कथ-यति, यत् साम्प्रतं शास्तिखान-द्वारा पुण्य-नगरमपि हस्तितवता दिल्लीश्वरेण सह योद्धुमुपक्रान्तमस्ति। परमल्पीयस्यस्मत्सेना, असहयोगिनः पार्श्वस्थ-पृथिवी-पतयः, अङ्ग-वङ्ग कलिङ्गेष्वपि समुद्भूत-ध्वजाः परिपन्थिनः, शैशवादेव यवनवराकैर्महाप्रवृद्धं मम वैरम्, सन्धेश्च कथामात्रमपि न सम्बोभवीति, यद्यप्यल्पेऽपि मामका युद्ध-विद्यासु कुशलाः सन्ति, तथापि किं भावीति मध्ये मध्ये संशेते हृदयम्. भवांस्तु प्रसिद्धोऽस्मदेशे दैवज्ञः, तद् विचार्य

एनम्=रघुवीरसिंहम्। "निरैक्षिष्ट" क्रियाकर्तृत्वेनोपस्थितस्यावलोकनक्रिया-कर्मत्वेन पुनरुपस्थित्याऽन्वादेशतेति द्रष्टव्यम्। एष च मन्दमभ्यधादिति सम्बन्धः। **अभ्यधात्**=अकथयत्। **करौ सम्पुटीकृत्य**=हस्तौ संयोज्य। प्राञ्जलिर्भूत्वेति यावत्। नम्रतासूचकमिदम्।

हस्तितवता=स्वायत्तीकृतवता। "हथियाना" इति हिन्दी, **पार्श्वस्थपृथिवीपतयः**=निकटस्थभूमिपालाः, **असहयोगिनः**=साहाय्याकारिणः, **समुद्भूतध्वजाः**=समुन्नतपताकाः। तेष्वाधिपत्यं लब्धमिति भावः। ध्वजोद्भूननं हि विजयोपलक्षणम्। **परिपन्थिनः**=शत्रवः। **सम्बोभवीति**=अतिशयेन वारं वारं वा भवति। यङ्लुगन्तम्। तदच्छान्दसत्वमभिहितं प्राक्। **संशेते**=संशयमापद्यते॥

कथ्यतां किं भावीति"।

तदवगत्य, पादावाकुञ्च्य, "विजयतां शिवराजः" इत्यभिधाय, ताम्बूल-वीटिकां रचयितुं छात्रमेकमिङ्गितेनाऽऽदिश्य, पृष्ठस्थ-द्वाराभिमुखं ग्रीवां परिवर्त्य, "वत्से, सौवर्णि! इत्याकार्य, "इयमस्मि तात!" इत्यागतां च तां "वत्से! तासां यूथिकामालिकानामेकां मालां प्रसाद-मोदकं चैकमानय"-इत्यभिधाय, बाढमित्युक्त्वा, तथा विहितवत्यां च तस्याम्, रघुवीराभिमुखं "गृहाण, भुक्त्वेदं प्रसाद-मधुरान्नं निद्रामनुभव, यादृशं च स्वप्नमवलोकयितासि, तथा प्रातरेव मां कथयितासि, व्येति रजनी, तद् गच्छ, शेष्व"-इत्युदीर्य, समागतां सौवर्णीमेव मोदकमर्पयितुं मालां च कण्ठे निक्षेप्तुमिङ्गितवान्।

सा चावलोक्य तमेव पूर्वावलोकितं युवानम्, व्रीडा-भर-मन्थ-राऽपि ताताज्ञया बलादिव प्रेरिता, ग्रीवां नमयन्ती, आत्मना-

दैवज्ञः=भागधेयज्ञाता। "इगुपधज्ञाप्रीकिरः कः"। "दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिरि"त्यमरः।

आकार्य=आहूय। यूथिकामालिकानाम्=मागधीमालिकानाम्, प्रसाद-मोदकम्=भगवदर्पितमिष्टान्नम्। यद्यपि "प्रसादस्तु प्रसन्नते"त्य-मरेण प्रसन्नताभिधेयत्वमेव, तथापि लोकप्रसिद्ध्या भगवदर्पितत्वार्थकत्वमेवेह शेषु स्थलेषु। व्यवहारो हि सर्वतो बलीयान् पदार्थ-निर्णायक इति ध्येयम्। मधुरान्नम्=मोदकम्। व्येति=याति। रजनी=निशीथिनी। शेष्व=स्व-पिहि। उदीर्य=उक्त्वा। इङ्गितवान्=चक्षुरादिचेष्टया बोधितवान्।

व्रीडाभरमन्थरा=लज्जाधिक्याधिगतमान्द्या। ताताज्ञया बलादिव

ऽऽत्मन्येव निविशमाना, स्वपादाग्रमेवाऽऽलोकयन्ती, मोदक-भाजन-सभाजितं सव्येतर-करं तदग्रं प्रासारयत्। स चाऽऽत्मनो भावं कष्टेन संवृण्वंस्तद्धस्तादुदतूतुलत्। पुनश्च साऽञ्चलकोणं कटि-कच्छ-प्रान्त आयोज्य, हस्ताभ्यां मालिकां विस्तार्य नत-कन्धरस्य रघुवीरस्य ग्रीवायां चिक्षेप, ईषत्कम्पित-गात्रयष्टिश्च शनैर्यथागतं निववृते।

सैवेयं गौर-श्याम-सिंहयोरनुजा सौवर्णी, या शैशव एव यवन-तनयेनापहृता, यस्याश्च वास्तविकं नाम कोशलेति, स चायं देवशर्म्मा ब्राह्मणो यो गौरसिंहस्य कुल-पुरोहितः, कोशलायाश्च रक्षकः।

ततः प्रणम्य, देवशर्म्मच्छात्रदत्तां वीटिकामादाय, प्रतिनिवृत्य, रघुवीरोऽपि तथैव सुप्तः। को जानाति कोशलारघुवीरयोः प्रेरिता, तथा चोक्तम्महाकविना कालिदासेन "आज्ञा गुरूणां ह्यविचारणीये"ति। निविशमाना, "निर्विश"इत्यात्मनेपदत्वे शानच्। मोदकभाजनेन=मिष्टान्न-भाण्डेन, सभाजितम्=सेवितम्। सहितमिति वाच्योऽर्थः। सव्येतरकरम्=वामं हस्तम्। आत्मनो भावम्=रतितामापन्नम्। संवृण्वन्=समाच्छादयन्, उदतूतुलत्=गृह्णाति स्म। अञ्चलकोणम्=वस्त्रदशाम्। कटिकच्छप्रान्ते=कटिकच्छ-भागयोः। विस्तार्य=प्रसार्य। ईषत्=अल्पम्, कम्पिता=वेपमाना, गात्रयष्टिः=शरीरं, यस्याः सा। सात्विकभावोदयप्रदर्शनमिदम्। यथाऽऽगतम्=आगतिः=आगतम्, तदनतिक्रम्य यथागतम्। क्रियाविशेषणम्। यथा समागता तथैव निवृत्तेति यावत्।

सैवेयमित्यादि रक्षक-इत्यन्तं कविवाक्यं सौवर्णीपरिचयदानपरम्।

को जानाति=कः=ब्रह्मा, स एव जानाति, नान्यः कश्चिदसर्वज्ञ इति

काभिर्भावनाभिरद्यतनी रजनी व्यत्येतीति।

अथोपस्येवोत्थाय, नित्यकृत्यानि निर्वर्त्य, यावद्देवशर्म्मणः समीपमुपतिष्ठासते, तावद्दौर्गिक-दूतेनाऽऽकारितो दुर्गाध्यक्ष-मासाद्य, तद्दत्तं पत्रादिकं वाचनिक-सन्देशं चाऽऽदाय, पुण्यनगर-मधिवसतः शास्तिखानस्य प्रकृत-वृत्तान्तं तत्प्रश्नानुसारं व्याहृत्य, निवृत्य, देवशर्म्माणं प्रणम्य, सङ्क्षिप्य स्वप्न-वृत्तान्तमकथयत्।

यद्—

"यथा मया प्रभुणा च खड्गः समुत्तोलितः, शास्तिखानश्च दृष्ट्वैवैतत्पलायितः" इति।

स चाङ्गुलिपर्वसु किमपि गणयित्वेव प्रोवाच-यद् "यवनैः सह विजयः, आर्यैश्च पराजयः"।

पुनश्च तं प्रणम्य, जिगमिषन्तमुवाच, यत्—

"तावद् बहिरेवोद्याने पर्य्यट, यावद् हनूमत्प्रसाद-सिन्दूरं प्रेषयामि, यत्कृत-तिलको दुर्द्धर्षो भवति शत्रूणामिति"।

स च तथेत्युक्त्वा, बहिरागत्य, पर्य्यटन्, पूर्वेद्युः सौवर्ण्या सनाथितां वेदिकां समायातः, स्मृतवांश्च पूर्वदिन-वृत्तान्तम्, अवालोकयच्च सौवर्ण्यध्युषित चर-पाषाण-मञ्चम्। तावन्निपुणं

तत्त्वम्। काकुर्वा। तथात्वे न कोपि जानातीत्यर्थः। आत्मनैव विज्ञातव्यत्वेन नान्यो ज्ञातेति सूक्ष्मवेदिनः।

उषसि=प्रातः। **उपतिष्ठासते**=उपस्थातुमिच्छति। **दौर्गिकदूतेन**=दुर्गाध्यक्षभृत्येन। **वाचनिकसंदेशम्**=वाचिकम्। **अङ्गुलिपर्वसु**=करजावयवेषु, पर्व="पोर" इति हिन्दी।

सनाथिताम्=अधिष्ठिताम्। **सौवर्ण्या, अध्युषितचरम्**=सर्वथाऽधिष्ठि-

निरीक्ष्य, दृष्टवान्–यदेका 'एक–यष्टिका मौक्तिक–माला' तत्र पतिताऽस्तीति, तां चोत्थाप्य, तस्या एवेयमिति निश्चित्य, तस्यै समर्पयामीति विचार्य, इतस्ततश्चक्षुर्निचिक्षेप।

अथ व्यलोकयद् यद् वाटिकायामेव कोशलाऽपि कदली–दल–पुटकमेकं वामकरे संस्थाप्य, दक्षिण–कर–पल्लवेन कुसुम-पतङ्गानुद्धूय, कुसुमान्यवचिनोति।

ततश्च क्षणं विचार–भारैर्निरुद्ध–गतिरपि शङ्कातङ्कमपास्य, मालां हस्त आदाय, शनैस्तदभिमुखमेव प्रतस्थे। सा च तस्मिन्नतिसमीपमायाते, पादाहतिमाकर्ण्य, अवालुलोकत्। तस्यां चातिचकितायामिव, स्तब्धायामिव च, रघुवीरोऽवादीत्–

"भगवति! भवत्या इयं मालिका तत्र पतिता, मया लब्धेति प्रत्यर्पयितुमायातोऽस्मि–इति, अनुमन्यसे चेदेनां यथास्थानं निवेशयामि" इति।

सा च व्रीडया कुलाङ्गनाङ्गीकृत–महाव्रतेन च स्तब्धवाग् न किञ्चन प्रावोचत्। रघुवीरश्च वाचंयमतामप्यङ्गीकारभङ्गीमङ्गी-

तम्, पाषाणमञ्चम्=प्रास्तरमुच्चभागम्।

कुसुमपतङ्गान्=पुष्पभ्रमरिकाः। "तितली" इति हिन्दी। निरुद्धगतिः=अवरुद्धगमनः। शङ्काऽऽतङ्कम्=संदेहं भयञ्च। प्रत्यर्पयितुम्=प्रतिदातुम्। दुर्गाध्यक्षसमीपे त्वया मह्यमर्पिता माला, मया चात्र तुभ्यमर्प्यत इति विचार्य प्रत्यर्पणाभिधानम्। अनुमन्यसे=स्वीकरोषि। कुलाङ्गनाभिः=सदन्वयजस्त्रीभिः, अङ्गीकृतेन=स्वीकृतेन, महाव्रतेन=ब्रह्मचर्यरूपेण। गुह्यभाषणस्यापि ब्रह्मचर्यविघातकतेति मौनावलम्बनम्। वाचं यच्छतीति तद्भावो वाचंयमता=तूष्णीम्भवनम्। अङ्गीकारभङ्गीम्=स्वीकारप्रकारम्। "मौनं स्वीकारलक्षण"मि

कृत्य, तदन्तिकमागत्य, सौवर्णीचित्रं मानस-भित्तिकायामालिख्य, नक्षत्रमालां तत्कण्ठे प्राक्षिपत्, पवित्रतमानि स्फुटतम-यौवनोद्भेद-लक्ष्म-रहितानि च तदङ्गानि नास्प्राक्षीत्।

ततस्तस्यां मौनेनैवैकतः प्रयातायाम्, स्वयं पुनर्मन्दिरद्वारमागत्य, देवशर्म्मणोऽन्यतमच्छात्रेणाऽऽनीतं सिन्दूरमादाय पुनरश्वमारुह्य, मारुत-नन्दनं संस्मृत्य, तोरण-दुर्ग्गात् सिंह-दुर्ग्गं प्रतस्थे।

इति चतुर्थो निश्वासः।

प्रथमो विरामः

त्युक्तत्वात्। **नक्षत्रमालाम्** = सप्तविंशतिमौक्तिकमयीं पूर्वोक्तामेकावलीम्। **स्फुटतमस्य**=नितान्तप्रकटस्य, **यौवनस्य**=तारुण्यस्य, **उद्भेदस्य**=आविर्भावस्य, **लक्ष्मभिः**=चिह्नैः, **रहितानि**=शून्यानि। **मारुतनन्दनम्**=वायुसूनुम्।

प्राप्त-शास्त्र-त्रयाचार्य-पदवीकेन धीमता।
भगवत्या गर्भजेन विद्वद्भागवतसूनुना॥
विद्वन्निपाठिशिष्येण रामजीशर्मणा मया।
शिवदत्त-कृपा-दत्त-न्याय-शास्त्रावभासिना॥
पाण्डेयशास्त्रीत्यपराभिधेयेन सदक्षरा।
शिवराजस्य विजये वैजयन्ती विकाशिता॥

इति श्रीशिवराजविजयवैजयन्त्यां चतुर्थनिश्वासविवरणम्।

आदिमविरामविवरणं समाप्तम्।

॥ श्रीः ॥

अथ द्वितीयो विरामः

पञ्चमो निश्वासः

"वयं नो ते विप्राः प्रतिदिवसमासाद्य कृपणान् ,
धनं ये याचन्ते प्रतिगणित-नक्षत्र–तिथयः"

—जगन्नाथपण्डितराजः

वागीश्वर्यै नमः

मनोजमदमन्थनेन मदमादधानो भवः
स्वयं भवति विष्टरो विनत एव यस्याः कृते ।
समर्चित-पदद्वया त्रिदश–मण्डली-मण्डनै–
स्तमालदल-भासुरा भवतु कापि बुद्धि-प्रदा ॥

पञ्चमे निश्वासे हिन्दु-धर्म-ध्वंस-विध्वंसन-पटुना शिववीरेण साकं महाकवेर्भूषणस्य सम्बन्धं विवर्णयिषुरुपक्षिपति पण्डितराजोक्तिम्–**वयं ते नो विप्रा** इति । यद्यपि तदात्वे बहवो महादेवशास्त्रिसमा ब्राह्मणध्रुवा धर्माधर्म-विवेक-विधुरास्तात्कालिक-परिस्थितिमात्रदृष्टयोऽप्यभवंस्तथापि तेषामेव ब्राह्मणानां विशिष्टा संख्याऽऽसीद् ये जीविका-निर्वाह-प्रकारेऽदत्तदृष्टयस्त्यागिनो धर्म-रक्षण-मात्र-व्रता इति सूचयति पद्यखण्डेनानेन । वक्ता चास्य दिल्ली-वल्लभ-पाणि-पल्लवतले नवीनस्य वयसः समापक इति परमं वैशिष्ट्यम् । अपरा चात्र कथाऽऽगम्यते शिववीरहस्ताद् "शास्तिखान–" द्वारा दिल्लीवल्लभेन स्वायत्तीकृतस्य पुण्यनगरस्य, तच्च सिंहपराक्रमस्य शिववीरस्य द्वारि शृगाल–शृगाली–सञ्चरणान्ना-

"हरेरद्य द्वारे शिव ! शिव ! शिवानां कलकलः"

—जगन्नाथपण्डितराजः

इतस्तु दृश्यतां किं भवति पुण्यनगर इति। जाल्म-यवनाखेट-व्यसनिनः शिववीरस्य शनैः शनैर्दिल्लीश्वरेणापि सह वैरं ववृधे। दिल्लीश्वरस्तु "शास्तिखान"-नामानं कञ्चिद् यवन-वीरं प्रेष्य, पुण्यनगरं तद्धस्तादाचिच्छिदे। सम्प्रति हि पुण्यनगरे शिववीराध्युषितचरे महाप्रासादे सपरिवारः शास्तिखानः प्रतिवसति। आसन्ने सिंहदुर्ग्गे च ससेनः शिववीरो विराजते। परस्परं च छलाशङ्का युद्धाशङ्काश्च जरीजृम्भन्ते।

अथैकदा रजन्यां सिंहदुर्ग्गाविदूर एव सुकोमल-शादायां कलित-प्रसादायां केकि-केका-विहित-प्रहरि-प्रातिनिध्यायां भुवि, निष्कृप-

तिरिच्यते यवनहतकाधिचरणमिति समुपक्षिपति द्वितीयेन तदीयेनैव पद्यखण्डेन—हरेरद्येति। **शिवानाम्**=शृगालशृगालीनाम्। **जाल्मानाम्**=असमीक्ष्यकारिणाम्, यवनानाम्, आखेटस्य व्यसनिनः। **ववृधे**=एधामास। **तद्धस्तात्**=शिववीरकरात्। **आचिच्छिदे**=विच्छिन्नीकृतवान्। स्वायत्तीचकारेति यावत्। "छीन लिया" इति हिन्दी। "छिदिर् द्वैधीकरण"इत्यस्य लिटि रूपम्। आक्रुपसृष्टस्य द्वैधीकरणपूर्वकस्वाधीनीकरणमर्थः। **अध्युषितं** भूतपूर्वमध्युषितचरम्, "भूतपूर्वे चरडि"ति चरट्। शिववीरेणाध्युषितचरम्, तस्मिन्निति विग्रहः। **छलाशङ्काः**=धौर्त्यातङ्काः। **जरीजृम्भन्ते**=मुखं व्यादायेव वृद्धिमतिशयेन गच्छन्ति। "जृभी गात्रविनाम" इत्यस्य यङ्लुकि रूपम्। **सुकोमलाः शादाः**=हरिततृणानि यस्यां तस्याम्। "शादो जम्बालशष्पयोरि"त्यमरः। **कलितः प्रसादः**=नैर्मल्यं यया तस्याम्। **केकिकेकाभिः**=मयूरवाणीभिः,

कृपाण-पाणिः, कञ्चुकाच्छादित-कठिन-कवचः, कलित-सैनिक-भट-वेषः, श्रीशिववीरो गुप्तवेषेण परितः पर्य्यटन, दुग्ध-धारयेव क्षालितैर्ज्योत्स्नया प्रकाशितैः पथिभिरासन्नाच्छिवमन्दिरादाराद-जगाम। तत्र च द्वारि रेणु-रूषित-रोम-कुहरम्, शफोत्फालित-मृत्स्ना-स्नातम्, त्वरितगति-श्वासप्रश्वास-सहचरित-हिणत्कार-सूचित-क्रमम्, उत्थायोत्थाय पृष्ठमुत्कम्प्य, ग्रीवामुद्धूय, पौनःपुन्येन

विहितम्=सम्पादितम्, प्रहरिणाम्=यामिकानाम्, प्रातिनिध्यम्=प्रतिनिधिकर्म यस्यां तस्याम्। "गुणवचन-ब्राह्मणादिभ्यः कर्मणी"ति ष्यञ्। भुवो विशेषणानि त्रीणि। शिववीरं विशिनष्टि—निष्कृपः=कृपाशून्यः, कृपाणः पाणौ यस्य सः। कञ्चुकेन=चोलकेन, आच्छादितः=प्रावृतः, कठिनः=दृढः, कवचः=तनुत्रं, यस्य सः। कलितः सैनिकभटस्य वेषः=नेपथ्यं येन सः। "सेना रक्षास्तु सैनिका" इत्यमरः, "सेनायां समवेता ये सेन्यास्ते सैनिकाश्च त" इति चामरः, आद्ये "रक्षति" इति ठक्, द्वितीये च "सेनाया वा" इति। ज्योत्स्नया=कौमुद्या। प्रकाशितैः=प्रद्योतितैः। उत्प्रेक्षते-दुग्धधारया=पयःप्रवाहेण। क्षालितैरिव=धौतैरिव। "आराद्दूरसमीपयो"रित्यमरः, तद्योगे "अन्यारादि"ति पञ्चमी। तत्र च द्वारि कञ्चनाश्वमद्राक्षीदिति सम्बन्धः। अश्वं विशिनष्टि-रेणुभिः, रूषितानि=छुरितानि, रोम्णां कुहराणि=छिद्राणि, यस्य तम्। शफोत्फालितया=खुरोद्धूलितया, मृत्स्नया=प्रशस्तया मृदा, स्नातम्=अनुलिप्तम्। त्वरितगतीनाम्=शीघ्रगमनानाम्, श्वासप्रश्वासानाम्, सहचरितेन=नियमतः सहवासिना, हिणत्कारेण=हेषारवेण, सूचितः=प्रकटीकृतः, क्रमः=दूरमार्गानुधावनोत्थः श्रमो येन तम्। अश्वानां दीर्घश्वासप्रश्वासौ हेषासहितावेव भवतः। उत्थायेत्यादि भुवि विलुण्ठन्त-

पतित्वा, भुवि विलुण्ठन्तं कञ्चनाश्वमद्राक्षीत्। कस्यायम्? कुतोऽयम्? इति मनसि विचिन्वंश्च समीपमागत्य, चुचुत्कारैरश्वं सान्त्वयन्तम्, हरितृण-भारं च पुरतः प्रक्षिपन्तम्, कमपि शूद्र-युवकमप्यवालोकयत्। तं च विवर्णवदनम्, आजानु-धूलि-धूसरित-चरण-युगलम्, मन्थरितशरीरम्, स्वेद-क्लिन्नञ्चावलोक्य, "दूरतः कश्चन समायातोऽस्ति, तद्भृत्य एवायमिति" निश्चित्य, शनैरप्राक्षीत्-कस्यायमश्वः? इति। स तु स्वकार्य-संलग्नोऽन्यमनस्क एव,"समायातः कोऽपि" इत्युदतरत्। पुनरपि "कुत आगता यूयम्?" इति पृच्छति शिववीरे, "किमिव निरर्थं प्रश्नानुट्टङ्कयसि, आलपितुमिच्छसि चेद् घटिका-युगलमतिवाह्य समायास्यसि, यथा पूरित-जठर-पिटकः, ताम्रक-धूमपानैर्गलनलं कवोष्णयन्, त्वया सह वार्त्ताभिरद्ध-परिश्रममल्पयिष्यामि"। तदाकर्ण्यान्तर्विहसन्निव शिववीरः, "तथा करिष्यावः, किन्तु, कथय तावत्, कुत आगता यूयम्?"—इति पुनरपृच्छत्। स तु घोटके दत्तदृष्टिरेव सकोपमवादीत्-"कुत आगता यूयम्? कुत आगता यूयमिति कुतःकारैः स्फोटितौ मे कर्णौ, वयं दिल्लीत आगताः, दिल्लीतो दिल्लीतो दिल्लीतः, कथय किं

मित्यन्तं स्वभावोक्तिः। **विवर्णवदनम्**=खिन्नाननम्। **आजानु**=जानुपर्यन्तम्, **धूल्या**=रजसा, **धूसरितम्**=धूसरतामुपगतम्, **चरणयुगलं** यस्य तम्। **मन्थरितम्**=स्थगितम्, **शरीरम्**=देहो यस्य तम्। **स्वेदेन**=क्लमजजलेन, **क्लिन्नम्**=आर्द्रम्। शूद्रयुवकविशेषणानि। **अन्यमनस्क इव**=विमना इव। प्रश्ने प्रश्नकर्त्तरि च ध्यानमददेवेति यावत्। **निरर्थम्**=प्रयोजनशून्यम्। **पूरितः**=भरितः, **जठरमेव पिटकः**=मञ्जूषा येन तादृशः। "पिटकः पेटकः पेटा मञ्जूषे"

गजं ददासि ? घोटकं वा ?" तदाकर्ण्य, शिववीरस्तत्प्रकृतिं परिज्ञाय, शनैः परिवृत्य, मन्दिरस्य पश्चिमदेशे पर्य्यटितुमारेभे ।

"कोऽयं, कुतोऽयं, चरो वा, संदेश-हरो वा, कपटपथिको वा, अस्मत्पक्षपाती वा, शत्रुपदातिर्वा, कोऽप्युभयपक्षोदासीनो वेति सद्य एव विज्ञेयम्" इति विचारयन्, मन्दिर-पाश्चात्य-प्राचीर-गवाक्षादायान्तं कञ्चिदस्पष्टालाप-ध्वनिमश्रौषीत् । क्षणं विरम्य च, यथा कथंचिदेवमेवमिति निश्चित्य, गवाक्ष-समीपमागत्य, ध्वनि-प्रतिध्वनिभिरव्यक्तांश-बहुलामप्येवमुक्तिं निश्चिक्ये यत्—

"चिराय दिल्ली-वल्लभ-पाणिपल्लव-तल्लज-च्छायामध्युषितोऽस्मि, परं वयं कवयः, कस्यापि राजत्वं वा, प्रतापित्वं वा, आढ्यत्वं वा, नापेक्षामहे, न वा कस्यापि साभिमान-भ्रूभङ्गम्, उत्तुङ्ग-कोपाञ्चिताखर्व-गर्व-बर्बरतां वा सहामहे । न तस्य तादृशं भू-वलये

त्यमरः । गलनलम्=कण्ठरन्ध्रम्, कवोष्णयन्=ईषदुष्णीकुर्वन् । मन्दिरस्य=देवालयस्य, पाश्चात्यः=पश्चाद् भवः, यः प्राचीरः=परिखा, तद्गवाक्षात्=तद्रन्ध्रात् । अस्पष्टः=अव्यक्तः, यः, आलापस्य=पारस्परिकवार्त्तायाः, ध्वनिः, तम् । ध्वनिप्रतिध्वनिभिः=शब्दप्रतिशब्दैः । अव्यक्तांशबहुलाम्=अस्पष्टभागप्रचुराम् । निश्चिक्ये=निश्चिकाय ।

चिरायेत्यारभ्य किं भावीत्यन्ता पथिकस्य कस्यचनोक्तिः । स चायं पथिको हिन्दीकविकुलमूर्धन्यो भूषण एवेत्यग्रे स्फुटीभविष्यति । दिल्ली-वल्लभ-पाणि-पल्लवतल्लजस्य=दिल्ली-पति कर-किशलयप्रशस्तस्य, छायाम्=आश्रयम् । आढ्यत्वम्=धनिकत्वम् । अभिमानेन सहितः साभिमानः, स चासौ भ्रूभङ्गः=भ्रूविक्षेपः, तम् । उत्तुङ्गकोपेन=विपुलकोपेन, अञ्चिताम्=भूषिताम्, अखर्वगर्वाम्=अनल्पदर्पाम्, बर्बरताम्=मूर्खताम् । सरस्वत्या

राज्यं यादृशमस्माकं सारस्वत-सृष्टौ, तस्य क्रीतदासा अपि न तदीहा-समकालमेव बद्ध-कर-सम्पुटा यथोचितावस्थानाः पुरतोऽवतिष्ठन्ते, यथाऽस्माकं पदानि, वाक्यानि, छन्दांसि, अलङ्काराः, रीतयः, गुणाः, रसाश्च। स दीनारसंभारैरपि न तथा परांस्तोषयितुमलम्, यथा वयं केवलं वचनभङ्गीभिरेव पारयामः, अस्मच्छृङ्गाररस-रसायनकमास्वाद्य, जित-राग-द्वेषो मुनिरपि, प्रतीपदर्शिनीम-

---

इयं सारस्वती=वाग्देवी, सा चासौ सृष्टिः=सर्गः, तस्याम्। क्रीतदासाः=स्वाधीनकृता भृत्याः। न केवलं वेतनमात्रभोगिनः। तदीहासमकालम्=तदिच्छासमसमयम्। बद्धकरसम्पुटाः=प्राञ्जलयः। यथोचितावस्थानाः=समुचितस्थानस्थितयः। पदानि=सुबन्तानि तिङन्तानि च। "सुप्तिङन्तं पदमि"ति पाणिनिदर्शनम्। "एतानि चत्वारि पदजातानि नामाख्यातोपसर्गनिपातांश्चे"ति भणतो निरुक्तकारस्याप्यत्रैव तात्पर्यम्। उपसर्गनिपातयोरपि सुबन्तत्वात्, नाम्नश्च सुबन्तत्वाविशेषादिति वैयाकरणाः। वाक्यानि=सुबन्तचयाः, तिङन्तचयाः, सुबन्ततिङन्तचयाश्च। "सुप्तिङन्तचयो वाक्यमि"ति दर्पणकारः। "एकतिङ् वाक्यमि"ति वदतः कात्यायनस्याप्यत्रैव तात्पर्यमित्याकरेभ्योऽवधारणीयम्। छन्दांसि=मात्रावर्णभेदभिन्नान्यार्या-भुजङ्गप्रयातादीनि। अलङ्काराः=काव्यशोभाऽऽधायका अनुप्रासोपमादयः। रीतयः=पदसङ्घटनात्मिका वैदर्भीप्रभृतयः। गुणाः=रसधर्माः श्लेषाद्यन्यतमाः। रसाः=शृङ्गारादयः। "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरि"ति भरताचार्यसूत्रम्। एतदर्थः काव्यप्रकाशादिभ्योऽवधारणीयः। दीनारसम्भारैः=स्वर्णमुद्राकोटिभिः। तोषयितुम्=प्रसन्नयितुम्। वचनभङ्गीभिः=कथनप्रकारैः। कवित्वेनेति यावत्। अस्माकं शृङ्गाररस एव रसायनकम्=सर्वश्रेष्ठमौषधम्। रागः=विषयाभिलाषः,

नुकूलयितुमाकुलः कल्पेत। अस्मद्वैराग्य-कवितामाकर्ण्य, रागोऽपि विरज्येत्। अस्मद्वीर-रस-कवितां चाऽऽकलय्य, म्रियमाणोऽपि युद्ध उत्तिष्ठेत। यस्य भाग्ये चिरावस्थायिनी कीर्तिः, समुद्र-कल्लोलाघात-सहं च यशः स एवास्मानाद्रियते। न वयं मीनानिव पीनान्, इभानिव तुन्दिभान्, भेकानिव निर्विवेकान्, वृषदंशकान्

द्वेषः=शत्रुता, तौ जितौ येन तादृशः। मुनिः=मननशीलः। प्रतीपं द्रष्टुं शीलं यस्यास्ताम्। अपाङ्गेनैव वनितानां निरीक्षणं खेदावहम्। "प्रतीपदर्शिनी वामे" त्यमरः। अनुकूलयितुम्=वशयितुम्। आकुलः=विह्वलः।

"शृङ्गारी, चेत्कविः काव्ये जातं रसमयं जगत्।
स एव वीतरागश्चेन्नीरसं निखिलं भवेत्" इति॥

हि माननीयपादाः। वैराग्यजनिका कविता वैराग्यकविता=शान्तरसकविता, ताम्। रागोऽपि विरज्येत्=विषयाभिलाषोऽपि विरागमागच्छेत्। रूपहानिरियं रागस्य विरागिता नाम। को हि नाम सचेताः—

यदि नामास्य कायस्य यदन्तस्तद्बहिर्भवेत्।
दण्डमादाय लोकोऽयं शुनः काकांश्च वारयेत्॥

इत्यादि निशम्य बुद्धा चैतदर्थं पुनः पाञ्चभौतिकदेहरक्षणसक्षणः स्यात्? एव मन्येष्वप्यूहनीयम्। म्रियमाणोऽपि=प्राणांस्त्यजन्नपि। अतिशयोक्तिः। उत्तिष्ठेत=समुद्यतो भवेत्। "उदोऽनूर्ध्वकर्मणी"त्यात्मनेपदम्। भाग्ये=भागधेये। चिरावस्थायिनी=बहुकालव्यापिनी। समुद्रस्य=अकूपारस्य, कल्लोलानाम् लहरीणाम्, आघातस्य=ताडनस्य, सहम्=सोढुंक्षमम्। समुद्रान्तं व्याप्ता कीर्त्तिर्यस्येति वाच्योऽर्थः। आद्रियते=सत्करोति, पीनान्=स्थूलान्। कानिवेत्युपमिनोति। एवमन्यत्राप्युपमालङ्कारो द्रष्टव्यः। इभान्=गजान्। तुन्दिलान्=स्थूलोदरान्। भेकान्=मण्डूकान्। निर्विवेकान्=विचारशून्यान्। वृषदंशकान्=बिडालान्।

निव कपट-हिंसकान्, काकानिवाऽऽस्वादित-दुर्विपाकान्, वली-मुखानिव चञ्चल-मुखान्, शृगालानिव कलित-धूर्त्ततामालान्, द्विजिह्वानिव च द्विजिह्वान्, सजीवानिवोपबर्हान्, आत्मस्तुतिमात्र-रुचीन्, मूर्तिमत इवाभिमानान्, विद्या-शून्यान्, गुणि-गण-गुण-ग्रहणासमर्थान्, मिथ्या-मोद-रतान्, वाराङ्गना-व्रात-चरण-पाताघात-सहान्, मद्य-कीटान्, धूतानन्यभक्तान्, नृपम्मन्यान्, स्वप्नेऽपि समुपास्महे। दिल्लीश्वर-पद-विडम्बनमपि चाहं तादृशे-ष्वेवान्यतममवगत्य, क्षणेनैव तत्सम्बन्ध-सूत्रं त्रोटयित्वा, रसिका-

---

"बिडालो मार्जारो वृषदंशक आखुभुगि"त्यमरः। **कपटहिंसकान्**=छद्महिंसालग्नान्; मार्जारा हि स्वं गोपायित्वा मृगयां कुर्वन्ति। **काकान्**=करटान्। **आस्वादित-दुर्विपाकान्**=भुक्त-मलान्। **वलीमुखान्**=वानरान्। **चञ्चलमुखान्**=चपलमुखान्। अस्थिरवाच इति यावत्। **शृगालान्**=क्रोष्टून्। **कलिना**=गृहीता, **धूर्त्तताया**:=परवञ्चनस्य, **माला**=परम्परा, **यैस्तान्**। **द्विजिह्वान्**=सर्पान्। **द्विजिह्वान्**=निन्दाकारिणः। **सजीवान्**=प्राणयुतान्, उपबर्हानिवेत्युत्प्रेक्षा। यथा स्थूल उपबर्हो भवति तथा स्थूलकायानिति तात्पर्यम्। **आत्मस्तुतिमात्ररुचीन्**=स्वप्रशंसामात्राभिलाषान्। **मूर्त्तिमतः**=गृहीत-देहान्। **गुणि-गण-गुण-ग्रहणासमर्थान्**=कलावेदि-व्रज-वैशिष्ट्य-बोध-विर-हितान्। **मिथ्यामोदे**=असत्यप्रायानन्दे, केवलं कल्पनयैव समुपस्थापिते, **रतान्**=सँल्लग्नान्। **वाराङ्गना-व्रातस्य**=वेश्यानिकरस्य, **चरणपाताघातम्**=अङ्घ्रिनिपतनाहतिम्, सहन्ते ये तान्। **मद्यकीटान्**=आसवमृङ्गान्। अति-मात्रं सुरापायिन इति यावत्। आत्मानं नृपं मन्यन्त इति नृपम्मन्यास्तान्। **स्वप्नेऽपि**=जाग्रदवस्थायास्तु चर्चैव का, निद्रायामपि नेदृशान् सेवामहे।

न्तरं कमपि वीरमन्विष्यन्, दक्षिणां दिशं प्रस्थितोऽस्मि । पथि चामेर-देशाधीशेन बहुशः प्रार्थ्यमानोऽपि स तस्यैव दिल्ली-वलय-कलङ्कस्य लालाटिक इत्यवगत्य, शिववीर-कीर्त्तीश्च श्रावं श्रावं कर्णयोराकृष्ट इव, इतः समायातोऽस्मि, द्रक्ष्यामि किं भावि"—

—इति वक्तारं कमपि कविं त्यक्त-दिल्लीश-द्वारं निजं दिदृक्षु-मत्राऽऽगतमूरीकृत्य, पुनः परिक्रम्य, द्वार-मार्गेण मन्दिरं प्रविश्य, शिवं प्रणम्य, घण्टामाहत्य, बिल्व-दलमुत्थाप्य, नेत्रयोः संस्पर्श्य, शिखायां संस्थाप्य, मृत्तिका-शरावस्थं भस्मालिके विलिप्य, प्रद-

---

रसिकान्तरम्=भिन्नं रसिकम् । न हि कवितानिवेदनमरसिकेषु युज्यते । तथा च प्राक्तनं पद्यम्—

इतरपापफलानि निजेच्छया विलिख तानि सहे चतुरानन !
अरसिकेषु कवित्वनिवेदनं शिरसि मा लिख ! मा लिख ! मा लिख !!

आमेरदेशाधीशेन=जयपुराधीश्वरेण । अद्यतनं जयपुरराज्यं तदानीम् "आमेर" इति ख्यातमासीत् । "अम्बर" इत्यपि व्यवहारस्तत्र । **लालाटिकः**= भालदर्शिसेवकतुल्यः । यथा कार्याकारिणः केवलं प्रभुभालावलोकनमात्रनिरता भवन्ति कुत्सिता भृत्या एवमयमपि दिल्लीकलङ्कस्य क्रोधप्रसन्नताऽवधारणाय केवलं तदीयं भालं समवलोकयति, न स्वतन्त्रतया किमपि विधातुं शक्नोति । सोऽयं दुर्वारः कलङ्को वज्रलेपायितो मानसिंहदुरन्वयजनुषां जयपुरीयाणां स्थास्यत्याप्रलयम् ।

निजं दिदृक्षुम्=शिववीरदर्शनाभिलाषुकम् । "न लोकाव्ययनिष्ठाखलर्थतृनामि"ति षष्ठीनिषेधः । **शिवम्**=शङ्करम् । **आहत्य**=ताडयित्वा । वादयित्वेति यावत् । **भस्म**=भसितम् । **अलिके**=ललाटे । "**ललाटमलिकं गोधिरि**"

क्षिणच्छलेन पान्थाध्युषित-प्रदेशमागत्य, तेनाऽऽलपन्तं शिवमन्दिराध्यक्षं प्रणम्य, बद्धाञ्जलिरागन्तुकमपि-"कुतः श्रीमान् ? कः श्रीमान् ?"—इति सादरं समपृच्छत्।

मन्दिराध्यक्षस्तु स्वरेण, आकृत्या च, तं परिचिन्वन्नपि तन्नियमं संस्मृत्य, न तथाऽचेष्टत, यथा स विज्ञातः स्यादपरैः।

शिववीरस्तु तेन सह चिरमालप्य, तस्य वृत्तान्तमवस्थां प्रकृतिं चावगत्य, चिराय श्रुतचरं 'भूषण'-कविरित्यभिधानं चोररीकृत्य "श्वो द्रष्टा भवान् शिवराजम्" इत्यभिधाय, न्यवर्त्तिष्ट।

निवर्तमानश्च तेनापि "को भवान् ?" इति पृष्टः, "एतद्देशीयः कोऽपि वीरोऽस्मि" इत्युदतीतरत्।

प्रातरेव च नित्य-नियमान्निर्वर्त्य, स्वेष्ट-जन-सहितः सभासंस्थ एव स्व-भृत्येन भूषण-कविमाकारयत्।

स तु बद्धमहोष्णीषः, पादाग्र-पर्य्यन्त-विलम्बमान-कञ्चुकः, नारिकेल-फल-सार-सहितं यज्ञोपवीत-युगलं हस्त आदधानः, द्वारपाल-दर्शितेन पथा सभां प्रविश्य, "विजयतां महाराजः"—इति सिंह-गर्जनमवधीरयता स्वरेणोच्चैरुच्चार्य, स्वोपहारं महाराज-हस्त

त्यमरः। आगन्तुकम्=प्राघुणिकम्।

परिचिन्वन्=शिववीरत्वेनाध्यवस्यन्।

प्रकृतिम्=स्वभावम्। अवगत्य=बुद्ध्वा। न्यवर्त्तिष्ट=निवृत्तोऽभूत्। गतवानिति यावत्। वीरः=राजभटः। "सिपाही" इति हिन्दी। उदतीतरत्=उत्तरं दत्तवान्।

नारिकेल-फलस्य सारेण=तत्त्वांशेन, "गरीका गोला" इति हिन्दी,

आर्पयत् ।

निर्दिष्टस्थान उपविश्य च, स एवायं पूर्वदृष्टो वीर इति निरीक्ष्य, "अहो ! वीरो वीरो वीरः । वीरमेवान्विष्यन्, दिल्लीत इतो यावत् समायातोऽस्मि, वीरमेव च प्राप्तवानस्मि । विजयतां धर्मोद्धारण–धीरः, सपत्नोत्सारण–समीरः, वीरो महाराजः–इत्युदीर्य" किंचित् स्मयमानस्य महाराजस्य मुखमवलोक्यंस्तत्प्रशंसायां वीर–रसमयीं कवितामेकामपठत् ।

महाराजस्तु "साधु साधु" इति व्याहृत्य, पुनः पठितुमाज्ञप्तवान् । पठितवति च तस्मिन् सर्वेषु प्रसन्नेषु पुनरप्यादिशत्, इत्येवं विंशतिवारं तेन सा व्रज–भाषामयी कवित्वकाम–नामिका वृत्ति-

---

सहितम् । आदधानः=धारयन् । स्वोपहारम्=स्वबलिम् । आर्पयत्=अगमयत् । "ऋ गतिप्रापणयोरि"त्यस्माण्णिचि "अर्त्तिह्वीब्लीरीक्नूयीक्ष्माय्यातां पुङ्णावि"ति पुकि रूपम् । आप्धातोर्वाऽऽपयदिति पाठः ।

वीरो वीरो वीरः=आद्यं वीरपदं राजभटवाचकं विशेषणम् । द्वितीयञ्च नामैकदेशन्यायेन शिववीरपरं विशेष्यम् । एतद्वयमुद्देश्यकोटिप्रविष्टम् । तृतीयञ्च विधेयबोधकम्–शौर्यमयार्थकमिति विद्वन्मण्डली । सम्भ्रमेऽनेकशब्दोच्चारणमिति बहवः । **सपत्नानाम्**=शत्रूणाम्, "रिपौ वैरिसपत्नारिद्विषद्वेषणदुर्हृद" इत्यमरः । **उत्सारणे**=दूरीकरणे, **समीरः**=वायुः । **स्मयमानस्य**=ईषद्धास्यनिरतस्य । **व्रजभाषामयी**=व्रजभाषायां निर्मिता । तुलसीदासजन्मनः पूर्वं व्रजभाषैव कविताभाषात्वेन गणिता । बहोः कालादनन्तरमपि तस्यास्तद्गौरवं सुरक्षितमेवाभवत् । अधुना तु प्रायो हिन्द्यामेव कवितां कुर्वन्ति । **कवित्वकामनामिका**=लोके "कवित्त" इत्यपभ्रंशतया ख्याता । **वृत्तिः**=छन्दः ।

रपाठि। महाराजेन च तस्मै गजानां विंशतिर्वितीर्णा–इत्यद्यापि प्रसिद्धं कविता–रसिकानां मण्डले।

तदेव च दिनमारभ्य तेन भूषण–कविः स्व–सभायां संस्थापितः।

× × × ×

अथ दृश्यतां ततः शास्तिखानस्य काऽवस्थेति।

अस्तमिते भगवति मरीचिमालिनि, अन्धकारेण व्याप्तासु हरित्सु, किञ्चिन् किञ्चिच्चमत्कुर्वत्सु नक्षत्रेषु, शिववीरेणाध्युषितचरम्य महा–प्रासादस्याट्टालिकायां निजैरात्मीयैः शास्तिखानः समुपविष्टोऽस्ति। परितश्चानेके योद्धारो मौद्गलाः पर्यवातिष्ठन्त। परितो दीपमाला चकास्ति। पुष्पवाटिकाभ्यश्च प्रस्फुटदतिमुक्त–कुसुमसौरभमादाय, धीरः समीरः प्रवहति। शास्तिखानस्तु महदुपधानं पृष्ठेनाऽऽक्रम्य, सम्मुखस्थ–रत्न–जटित–धूमपान–यन्त्र–नलिकां हस्ते

विंशतिः, "विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोरि"त्यमरः। गजशब्दस्य प्रथमान्तत्वेऽपि गजा विंशतिरित्येव।

अस्तमिते=अस्ताचलं गच्छति। **व्याप्तासु**=सङ्कुलासु। **हरित्सु**=दिक्षु। **चमत्कुर्वत्सु**=प्रभां वितरत्सु। **नक्षत्रेषु**=उडुगणेषु। **महाप्रासादस्य**=विशालराजमन्दिरस्य। **अट्टालिकायाम्**=तलिन्याम्। "अटारी" इति हिन्दी। **निजैरात्मीयैः**=अत्यन्तमात्मीयताङ्गतैः, स्वाभिन्नैरिति यावत्। अत एवोभयसार्थक्यम्। **मौद्गलाः**=मौद्गल्याः। "मोगल" इति हिन्दी। पूर्वप्रदर्शिततर्करत्नमते मौद्गल्यगोत्रा इमे क्षत्रिया इति मन्तव्यम्। साहित्याचार्यरामावतारशर्मादयोऽप्येतत्पथपथिका इति न विस्मरणीयम्। **पर्यवातिष्ठन्त**=परितः स्थिता अभूवन्। **चकास्ति**=दीप्यते। **प्रस्फुटताम्**=विकसताम्, **अतिमुक्तकुसुमानाम्**=माधवीपुष्पाणाम्, **सौरभम्**=शोभनं गन्धम्। **सम्मुख-**

दधत्, मध्ये मध्ये च यूथिका-कोरक-पङ्क्ति-परिवेष्टित-नलिकाग्रतः सगुडगुडाशब्दं ताम्रक-धूममाकर्षन, पार्श्वस्थ-ताम्बूल-वाहक-हस्ताद्वीटिकामपि गृह्णन, उशीर-जल-सिक्त-व्यजन-वातैर्वीज्यमानः, परितः संस्थापित-सतोय-भाजनस्थ-कुसुम-स्तवकैः सुरभीक्रियमाणः, केनचन कार्य वाहेण सहैवमालपत ।

शास्तिखानः-[मुखात् ताम्रक-धूमं फूत्कुर्वन्] बदरदीन ! कथय कीदृशम्ते प्रबन्धः पुण्यनगरे ?

बदरदीनः—[करौ सम्पुटीकृत्य] चमूपते, सर्वं सुष्ठु ! प्रतिशृङ्गाटकम्, प्रतिविपणि, प्रतिगोपुरं, प्रतिपल्लि च, दोधूयन्ते दिल्लीस्थस्य = पुरःस्थापितस्य, **रत्नजटितस्य** = हीरकादिखचितस्य, धूम्रपानयन्त्रस्य="हुक्का" इति ख्यातस्य, **नलिकाम्**="नली" इति लोके ख्याताम्। **यूथिकाकोरकाणाम्**=मागधीकलिकानाम्, **पङ्क्तिभिः**=राजिभिः, **परिवेष्टिताया**:=सर्वतो भूषिताया:, नलिकाया अग्रतः । "गुडगुडा"इत्यनुक्रियमाणः शब्दः-**गुडगुडाशब्दः**, तेन सहितम् । **ताम्रकस्य**="तम्बाकू" इति ख्यातस्य, धूमम् । **पार्श्वस्थः**=निकटे तिष्ठन्, **यस्ताम्बूलवाहकः**, तद्धस्तात् । **वीटिकाम्**=ताम्बूलीदलीम् । "बीड़ा"इति हिन्दी ।

उशीरजलेन=नलदाम्भसा, **सिक्तस्य**=आर्द्रीकृतस्य, व्यजनस्य **वातैः** । **वीज्यमानः**=सेव्यमानः, **परितः संस्थापितेषु**=सर्वतो रक्षितेषु, **सतोयेषु**=पानीययुतेषु, **भाजनेषु**=पात्रेषु, तिष्ठद्भिः, **कुसुमस्तबकैः**=पुष्पगुच्छैः, "गुलदस्ता" इति ख्यातैः । **कार्यवाहेण**=कृत्यसम्पादकेन । अनुचरेणेति यावत् । **बदरदीन !**=सम्बुद्धयन्तम् । "बदरुद्दीन" इति लोकख्यातं तन्नाम ।

शृङ्गाटकं शृङ्गाटकं प्रतीति प्रतिशृङ्गाटकम् । "अव्ययं विभक्ती"त्यादिना यथार्थे वीप्सायामव्ययीभावः । एवमग्रेऽपि प्रतिविपण्यादौ । **शृङ्गाटकम्**=चतुष्प-

श्वरस्य विजय-पताकाः। विनाऽऽदेशं न कश्चिद् रुष्टतम-सोदर्योऽपि शक्तो गोपुरावग्रहणीं पदा स्प्रष्टुम्, उल्लङ्घितुं वा। औद्वाहिक-वर-यात्रार्थं वा, मृतकोद्वहन-निमित्तं वा, श्रीमदादेश-मुद्रापत्रं विना ससमारोहं न केऽपि पारयन्ति सर्पितुम्। साधारणतोऽपि च द्वित्राधिका न सह पर्य्यटितुं शक्नुवन्ति जनाः। प्रतिप्रत्यूषम्, प्रत्यस्तमनवेलम्, प्रतिमध्याह्नम्, प्रतिनिशीथञ्च मज्जित-स्थानेभ्यः समुत्थिताः, मौलिवि-वर्यैर्निषाद-स्वरेणोच्चैरुच्चारिताः, धमद्धमद्ध-

थम्। "चौराहा" इति हिन्दी। **विपणिः**=पण्यवीथिका। "बाजार" इति हिन्दी। **गोपुरम्**=पुरद्वारम्, "पुरद्वारन्तु गोपुरमि"त्यमरः। **पल्लिः**=कुटी। आभीरादिगेहमिति यावत्। "कुटीकुग्रामयोः पल्लिरि"ति शाश्वतः। **दोधूयन्ते**=अतिशयेन कम्पन्ते। **रुष्टतमसोदर्यः**="रुस्तम" इति ख्यातस्य भ्राता। महान् बलशाली रुस्तम नामा कश्चिद् यवनः पूर्वमासीत्। **गोपुरस्य**=पुरद्वारस्य, **अवग्रहणीम्**=देहलीम्। **पदा**=अङ्घ्रिणा। **उल्लङ्घितुम्**=अतिक्रमितुम्। **औद्वाहिकी**=विवाहसम्बन्धिनी या **वरयात्रा**="बरात" इति ख्याता, तस्यै। **मृतकोद्वहननिमित्तम्**=शववहनसंस्कारहेतुकम्। **श्रीमदादेशस्य**=भवदाज्ञायाः, **मुद्रापत्रम्**=मुद्राङ्कितं पत्रम्। **समारोहेण**=जनसम्मर्दन, सहितं यथा स्यात्तथा। **सर्पितुम्**=गन्तुम्। **साधारणतः**=सामान्यरूपेण। निःसमारोहमिति यावत्। द्वौ वा त्रयो वा **द्वित्राः**, तदधिकाः। चतुःप्रभृतयो जना न मिथः संयुज्य वार्त्तालापादिकं कुर्युरिति साम्प्रतिक-भारत-विधानशास्त्रीय-(ताजीरात हिन्द) चतुश्चत्वारिंशदधिकशततम-(१४४) धाराया अर्थः। स यावनकालसमारब्ध एवेति हृदयम्। **मज्जितस्थानेभ्यः**="मस्जिद" नामक भवनेभ्यः। **मौलौ**=शिरसि, **विरिव येषां ते मौलिवयः**="मौलवी" इति ख्याताः, तेषां **वर्यैः**-श्रेष्ठैः।

मकितदिगन्तरालाः, ध्वन्यन्तर–निपातनम्–"अल्ला, अल्ला, अल्ला"–इति ध्वनयः, प्रतिगृहम्, प्रतिप्रासादम्, प्रतिहट्टम्, प्रत्यट्टम्, प्रत्यङ्गणम्, प्रतिशालम्, प्रतितडागम्, प्रत्यारामम्, चोत्थितैः प्रतिशब्दैः सहस्र–गुणभूताः, नभोमण्डलं तरङ्गयन्ति। न जानीमो वराकाः काका इव कुत उड्डीनाः, उदूढ–भ्राष्ट्रा इव दुःख–दन्दह्यमान–हृदया महाराष्ट्राः।

शास्तिखानः–[प्रसन्नानां स्मयमानानां पार्श्वस्थानां मुखान्यवलोक्य, सकपट–हासम्] अहो! अहो! एवं किम्?

बदरदीनः—[सादरम्] श्रीमन्! एवमेव। हत–हतेति हता हिन्दु–हतकाः।

शास्तिखानः—अथ शिव–वियोगेन प्रजाः सीदन्ति, प्रसीदन्ति वा।

बदरदीनः–भगवन्! सर्वोप्यत्यानन्दितः समालोक्यते पुण्यनगर–निवासी जनः। सायं समय आसन्न एव जलैः सिक्तासु

ध्वन्यन्तरनिपातनम्, क्रियाविशेषणम्। धमद्धमदिति ध्वन्यनुकरणम्। अल्ला मातेत्यर्थः संस्कृतशब्दस्यास्य। यवनाः सर्वेश्वरवाचकं मन्यन्ते। सागरपारस्थिताः क्षत्रिया महामायाया मन्तार आसन्निति तर्करत्नमतानुयायिनः। अट्टम्=अट्टालिका। प्रतिशब्दैः=प्रतिध्वनिभिः। नभोमण्डलं तरङ्गयन्ति, "वीचितरङ्गन्यायेन उत्पत्तिः कस्यचिन्मत"इति सिद्धान्तमुक्तावलीप्रदर्शितनैयायिकमतेनेदम्। उदूढभ्राष्ट्राः=अतितप्ताम्बरीषाणि। दुःखेन=पराजयप्राप्तिखेदेन, दन्दह्यमानम्=अतिशयेन दह्यमानम्, हृदयं येषां ते।

सीदन्ति=क्लेशमनुभवन्ति। प्रसीदन्ति=प्रसन्नतामनुभवन्ति।

रथ्यासु, क्षणे क्षणे सखडखडाशब्दं पुष्परथाः प्रधावन्ति। बहव एतद्देशीया अन्यदेशीयाश्च, स्वच्छ-परिधानाः सुसूक्ष्म-वसनाङ्ग-रक्षिकोत्तरीयाः, वीटिका-राग-रञ्जिताधराः, सुवर्णादि-खचितविविध-यष्टिकान्दोलन-चञ्चल-कराः, प्रतोलीषु पर्यटन्ति। केचिद्, उत्तरीयाणि भोः! उत्तरीयाणि, नारङ्गाणि नारङ्गाणि, रम्भा रम्भाः, व्यजनानि व्यजनानि, मालिका मालिकाः, पाचकम् पाचकम, मुरलिका मुरलिकाः, क्रीडनकानि क्रीडनकानि, मोदका मोदकाः, परिमलं परिमलम्-इति विविधभङ्गीभिः सुस्वरं स्व-स्ववस्तूनि विक्रीणते। कुतश्चिदाकुञ्चिततिरस्करिणीषु, अट्टालिका-गवाक्षिकासु, विविध-भूषण-विहित-प्रबल-चाकचक्याः, प्रसाधित-केशाः, अञ्जन-रञ्जित-नयनाञ्चलाः, सुवर्ण-कुसुमाङ्कित-पट्टाम्बर-धराः, मद-विघूर्णित-लोचनाः, उद्भिन्न-यौवनाः, उन्नत-कुचाः, मसृण-कपोलाः,

---

पुष्परथाः=उत्सवादिषु सुखभ्रमणाय यानानि। "अर्त्तो पुष्परथश्चक्रयानं न समराय यदि"त्यमरः। **प्रतोलीषु**-रथ्यासु। **पाचकम्**=कोष्ठशोधकमौषधम्। विक्रेतारश्चतुष्कादिषु प्रायः कदलीनागरङ्गादिविक्रेतृभिः सार्कं मिलन्तीति ननु दृष्टिगोचरतामञ्चतम्। **मुरलिका**:=वंश्यः। **क्रीडनकानि**="खिलौना" इति हिन्दी। **परिमलम्**=सौगन्धिकम्। "इत्र" इति हिन्दी। **आकुञ्चितासु**=ईषद्दूरीकृतासु, **तिरस्करिणीषु**=यवनिकासु, "पर्दा" इति हिन्दी। **अट्टालिका-गवाक्षिकासु**="अटारी की खिड़कियों में" इति हिन्दी। विविधैः, **भूषणैः**=अलङ्करणैः, विहितं प्रबलं चाकचक्यं यासां ताः। **प्रसाधितकेशाः**=कङ्कतिकया कृतपट्टिकाः। **अञ्जनेन**=कज्जलेन, **रञ्जितानि**=भूषितानि, **नयनाञ्चलानि**=नेत्रप्रान्ताः, यासां ताः। **सुवर्णकुसुमैः**=हिरण्मयतन्तुरचितकुसुमाकृतिभिः, **अङ्कितानि**=चिह्नितानि, **पट्टाम्बराणि**=कौशेयवासांसि, यासां ताः।

कपोत-कण्ठ्यो वाराङ्गनाः, कटाक्ष-जाल-वागुराभिर्नव-युवक-मृगान पाशयन्ति । किमिव कथयामि ? क्वचिदापान-गोष्ठ्यः, क्वचिद् मृदङ्गादि-ध्वनयः, क्वचिद् द्यूतकोलाहलाः, क्वचिद् वारवधूतौर्यत्रिकमित्यखिलमानन्दमयमवलोक्यते ।

शा०–तत्किं शिवसहचरा महाराष्ट्रा अपि प्रसादमेवाऽऽसादयन्ति, न तु विषादम् ?

व०–भगवन् ! स्यान्नाम विषादस्तेषां हृदये, किन्तु बहिः प्रसादमेव दर्शयन्ति ।

इत्याकलय्य, अन्येऽपि श्रावकाः,–"भगवन् ! को नाम जिष्णोर्विष्णुः प्रसादं न दर्शयेत् ?, प्रकटित-शिव-वियोग-विषादस्तु बलाद् विषाद एव क्रियेत"–इत्याहुः ।

आसीत् तत्रैवोपविष्ट एको वृद्धो वीरश्चान्द्रखान-नामा । स तु केवलं रोचकमिदं मिथ्या-प्रशंसनमाकर्ण्य, कर्णयोस्ताड्यमान इव ग्रीवामाकुञ्च्य, भ्रू-युगं सन्नमय्य, ओष्ठ-युगं कम्पयन . मनस्येव-"धिगेतान्-श्रादृकार-हतकानः ये प्रशंसाभिरेव प्रभूनन्धयन्ति । प्रतिक्षणम-

उद्भिन्नयौवनाः=विकसिततारुण्याः । **मसृणकपोलाः**=चिक्कणगण्डस्थलाः । **कपोत-कण्ठ्यः**=सारावतकन्धराः । कटाक्षजालमेव **वागुराः**=मृगबन्धनानि, तासु । **नवयुवका** एव मृगा इति रूपकम् । **पाशयन्ति**=बन्धयन्ति । वशीकुर्वन्तीति यावत् । **आपान-गोष्ठ्यः**=मद्यपान-सभाः । **वारवधूनाम्**=वेश्यानाम् , **तौर्यत्रिकम्**=वाद्यादि । प्रकटितः शिववियोगस्य **विषादः**=क्लेशः, येन सः । विषमत्तीति **विषादः**=विषभक्षी ।

चान्द्रखान-नामा="चांद खां" इति नाम यस्य सः । **ताड्यमानः**=

मधिकञ्च जाज्वल्यते शिव-तिरस्कार-जन्या ज्वाला महाराष्ट्राणां हृदये। गानेषु, पानेषु, नृत्येषु, कुकृत्येषु चास्मत्सजातीया एव सह युञ्जते, न तु महाराष्ट्र-सिंहाः। यावदारभ्य चिकनदुर्गोऽस्माभिर्गृहीतस्तावदारभ्य, महाराष्ट्र-बालकोऽप्यस्मांश्चिचर्वयिषुरिव सभ्रुकुटि पश्यति, नत्वधीनइति बिभेति। पर्वत-प्रायस्य कोङ्कण-देशस्य केशरिण एते, को जानीते कदाऽऽक्रम्यास्मान् कर्तयित्वा, क्रव्यादेभ्यो विकिरिष्यन्ति, परन्तु कृतघ्ना एते मिथ्या-प्रलापैरेव चमूपतिं वञ्चयन्ति"-इत्यालपन्।

अथ पुनरारब्धवानालपितुं शास्तिखानः।

शा०-अथ कः प्रबन्धश्चिकनदुर्गस्य ?

ब०-श्रीमन्! तत्रापि परितो नीलध्वजाः समुड्डीयन्ते। यथास्थानं शतघ्नयः संस्थापिताः, द्वारेषु च भटा नियुक्ताः सन्ति, अन्तश्च सानन्दं सेना निवसति।

चान्द्रखानः—[मनस्येव] सानन्दम्; न तु सतर्कम् ?

शास्ति०-[स्वयं किञ्चिद् विचार्येव, सोत्प्रासम्] सम्मुखयुद्धं प्राप्येत चेद्विजय एव को विलम्बः ?

तावत्तत्रस्थः कश्चिच्चाटुकारो महामदगणि-नामा सगात्रविक्षेपं

कण्टकादिना विद्यमानः। भ्रूयुगम्=भ्रूयुगलम्। सह-युञ्जते=संयुक्ता भवन्ति। सम्मिलन्तीति यावत्। चिकनदुर्गः="चाकन दुर्ग" इति प्रसिद्धः। चिचर्वयिषुः=चर्वयितुमिच्छुः। क्रव्यादेभ्यः=मांसभक्षकेभ्यः सिंहादिभ्यः। शतघ्नयः=तोपाः।

सोत्प्रासम्=सोद्वृष्ठनम्। सोपहासमिति यावत्। महामदगणि-नामा=

प्रावोचत्—

"भगवन् ! महाराष्ट्राः स्वप्नेऽपि न पारयन्ति सम्मुखं योद्धुम्, तथा साहसं कलयितुञ्च"।

चान्द्रखानस्त्वसहमानः शनैरवोचत्–अहं तु मन्ये, त उभयं कर्तुं पारयन्ति।

शास्ति०–कथम् ?

चा–किं न स्मर्यते चमूपति–चरणैर्यद् गत–वत्सरे, चिक्कन-दुर्गं प्रविश्याऽऽस्माकीनसेनां ते कथमिव वीरतया साहसेन प्राबल्येन च, पश्यतामेवास्मदीय–वीरम्मन्यानां खण्डशः समकार्षुः ? किं नैतत्सम्मुखं युद्धम् ? न वैतत् साहसम् ? भगवन् ! अहं तैः सह युद्धे बहुवारमासम्। किन्तु समसेनैरपि मौद्गलैर्युद्धे प्रवृत्ते तेषामेव ध्रुवो जय–इति मे निश्चयः।

महामदगणिः [चमूपतेश्चान्द्रस्य च मुखमालोक्य] आः !! तत्किं वयं दुर्बला वा, असाहसा वा अचतुरा वा, कातरा वा ?, यत्समबलानामपि तेषामेव जयो भवेदिति।

चा०—मैवम्, किन्त्वल्पाऽपि परिपन्थि–सेना, द्वैगुण्येनैवाऽऽक्रमणीया–इत्येषोऽस्माकमभ्यासः। तेषां च द्विगुणाऽपि चतुर्गुणाऽपि च शत्रुसेना कतिपयैरेव सादिभिर्योद्धव्या, निरोद्धव्येति च विलक्षणो वीर–स्वभावः।

शा०—[धूममाकृष्य; हसित्वेव] चान्द्रखानो वयोवृद्ध इति

महम्मदगनी-नामधेयः।

पार्वतेभ्यः=पर्वतीयेभ्यः। **उन्दुरुभ्यः**=मूषकेभ्यः। "उन्दुरुर्मूषकोऽ

साम्प्रतं पार्वतेभ्य उन्दुरुभ्योऽपि बिभेति । (चान्द्रस्तु कोष्ण-किरात-स्वरसमिव क्रोधमवगीर्य, तूष्णीक एव तस्थौ)

महामदगणिः–आम्, आम्, आम्, सम्यगाज्ञप्तमार्यैः । उन्दुरव इवैव ते गिरि–कुहरेषु निवसन्ति ।

वद०–हुं हुं हुम, अन्धकारेषु बहिर्भवन्ति, ताड्यमानाश्च पलायमानाः पुनः कुहराणि श्रयन्ते ।

चान्द्र०–आम् सत्यम्, किन्तु, उन्दुरव एतेऽस्मद्भुजान्, कच्छुकान्, उष्णीषांश्च खण्डशो न कुर्य्युः, अस्मदालयभित्तिका–तलानि जर्जरितानि न विदध्युः, पुण्यनगर–बहिःप्रदेशादेतत्पर्य्यन्तं चान्तरन्तरेव महागर्तं विधाय, अकस्मान्न पातयेयुः ।

शा०–इह बहवो यवन–बिडालाः सन्ति न भयमुन्दुरेभ्यः । ततः सर्वेपि चाटुकाराः, सकरतल–ध्वनिमहसन्, चाटुकारा एव च विजिग्यिरे ।

ततश्चिरं यावद् महाराष्ट्र–भटैः सह कथं योद्धव्यमित्येव विचारो जातः । किन्तु चिकनदुर्ग–जय–समये महता कष्टेन महाराष्ट्राः पराङ्मुखीकृताः–इति दुर्गयुद्धायानुत्सहमानः शास्तिखानः प्रावोचत–

"पर्वतमयोऽयं समन्ताद् दुर्गमयः कोङ्कणदेशः, तदेकैकं दुर्गजयोद्योगः क्रियेत चेत्, "पादाङ्गुष्ठ–शिरीषाग्निः कदा मौलिम-

---

प्याखुरि"त्यमरः । कोष्णः=ईषदुष्णः, किरातस्वरसः=भूनिम्बकषायः, तमिव । "चिरायते का काढ़ा" इति हिन्दी ।

विजिग्यिरे=विजयं प्राप्तवन्तः । "विपराभ्यां जेरि"त्यात्मनेपदम् ॥

वाप्स्यति ?–" इति प्रतीक्षा–विडम्बना स्यात्, तस्मात् तिष्ठन्तु नाम दुर्गेषु कारागारेषु निगृहीता इव, महाराष्ट्रा एव। अस्माभिस्तु साम्मुखीन–युद्धार्थमेव यतनीयम्"। चान्द्रखानस्त्वेतद्विषयेष्वत्यन्तं सप्रतिभ आसीत्। स तु किञ्चिद्विचार्यैव करौ सम्पुटीकृत्य, नीतिपरिपूर्णमुपदिदेश, यत्—

"चमूपते! दुर्गाण्येव महाराष्ट्राणां बलानि। प्रायस्ते व्यर्थमिति मत्वा, कमपि प्रशस्त–भूभागं रणाङ्गणीकृत्य, ध्वजान् समुड्डूय, भेरीराहत्य, न योत्स्यन्ते। किन्तु परितः पर्वतदरीषु, महारण्येषु, गिरि–गणावृत–दुर्गेषु च निर्भया अवस्थास्यन्ते। अस्मांश्च यदा कदाचिदेवासावधानानाकलय्य, पशुमारं मारयिष्यन्तीति शनैः शनैरेकैकं दुर्गग्रहणायैवोद्योगः करणीयः–इति मे मतिः। सम्मुखं च युद्धायोपस्थिता अपि पलायिष्यन्ते चेद्, उच्चावचोपत्यकासु, गण्ड–शैलमय–निबिडारण्य–कुज्झटिकासु, दुरूहारोहावरोह-

पादाङ्गुष्ठशिरीषाग्निः कदा मौलिमवाप्स्यति? लोकोक्तिः। एकतस्तु पदाङ्गुष्टतले विद्यमानः सोऽपि च शिरीषाग्निः, तस्य सार्धत्रिहस्तोर्ध्वस्थितशिरःपर्यन्तगमने कियान् विलम्ब इति सम्भाव्यमेव। **शिरीषम्**=पुष्पविशेषः, कोमलतायामुपमीयमानः। वस्तुतस्तु करीषाग्निरिति पाठ इति पाण्डेयशास्त्रिणः। **सप्रतिभः**=नवनवोन्मेषशालिन्या बुद्ध्या विभूषितः। **पशुमारंमारयिष्यन्ति**=यथा पशवो मार्यन्ते तथा मारयिष्यन्तीत्यर्थः। "उपमाने कर्मणि चे" ति णमुल्। **उच्चावचोपत्यकासु**=निम्नोन्नतासु पर्वतासन्नभूमिषु। गण्डशैलमयानि **निबिडानि**=घनानि, अरण्यान्येव **कुज्झटिकाः**=दुरवगाहनीयभूमयः, तासु। **दुरूहाः**=दुर्विज्ञेयाः, **आरोहावरोहपद्धतयः**=उर्ध्वाधोगमनमार्गाः,

पद्धतिषु सानुषु च, तेषां कथामात्रमपि न प्राप्स्यतेऽस्माभिः।

शास्तिखानस्तु चिकन-दुर्गाधिकार-युद्ध-स्मरणेन हतहृदयः, पुनस्तादृशं रोम-हर्षणं युद्धमविधित्सुः, कातरतरान्तरात्मा समुवाच-महाराष्ट्रा युद्धक्षेत्रमपास्य पलायिष्यन्ते चेत् किमास्माकीना नानुधाविष्यन्ति? अस्मत्सेनास्वश्वारोहा न सन्ति? ते किं घोटक-खुर-खडखडाशब्द-श्रवणेनैवार्द्धमृतप्रायान् कन्दरि-कन्दरेष्वर्द्ध-प्रविष्टानेव शक्ति-प्रोतान् न करिष्यन्ति?

चान्द्रखानः-महामान्य! सक्ष्वेडं महाराष्ट्राः, सम्मुखमायाताश्चेद् दिल्लीवल्लभस्य निश्चितो जयः, पलायिता अपि च गृह्येरंश्चेदवश्यमेव जयः, परं पलायितानामेषामनुधावनमेव कठिनम्।

शास्ति०—तत्कथम्?

चान्द्र०—भगवन्! अस्माकं स्थूलकायाः सरल-भूभाग-मात्र धावनाभ्यासिनो हयाः, तदुपरि च महाकवचाः, शस्त्रास्त्रमहाभारभृतः सादिन इति ते न शक्नुवन्त्युद्धातिनीषूपत्यकासु तथाऽश्वांश्चालयितुं यथा महाराष्ट्रा लघुभिः पार्वतघोटकैरुन्दुरव इव कुहरेषु

येषु तादृशेषु। **सानुषु**=पर्वतकोटिषु।

अविधित्सुः=अचिकीर्षुः। **कातरतरः**=अत्यन्तदुर्बलः, **आत्मा**=अन्तःकरणं, यस्य सः। अत्यन्तकातरत्वादेव प्रयोगे वारद्वयं किमं प्रयुक्तवान्। **शक्तिप्रोतान्**=शक्तिनामकशस्त्रविद्धान्।

सक्ष्वेडम्=ससिंहनादम्। "क्ष्वेडा तु सिंहनादः स्यादि"त्यमरः। **गृह्येरन्**=गृहीता भवेयुः।

महाकवचाः=विशालतनुत्राणाः। **उद्धातिनीषु**=स्खलनयोग्यासु।

निविशन्ते, मर्कटा इव सानुमत्सानून्यारोहन्ति, पक्षिण इवोपत्यकात उपत्यकामुड्डीयेव गच्छन्ति, शशका इव च तरुलतासु सपद्यात्मानमाच्छाद्य तिष्ठन्ति, तत् सपदि सेना आयोज्य, सिंहदुर्ग एवाश्वनीयः। तस्मिन्नेव शिवोऽस्ति, मासेन मासद्वयेन वा दुर्गमेतद्धस्तगतं भविष्यति, शिवश्च बन्दीकरिष्यते, दिल्लीश्वरस्य च विजय-पताकाः सर्वत्रापि कोङ्कणप्रदेशे दोधूयिष्यन्ते, इदमेवाध्यवस्यति मम तुच्छा बुद्धिः। श्रीमते च यथा रोचेत तथा विधेयम्।

शा०-[सभ्रुकुटि] कथमिव साहसमुन्मुच्य, सम्मुखयुद्धाद् विरज्यसि। [परितोऽवलोक्य] किं कोऽपि नास्ति साहसिकोऽस्मत्सेनासु यत्त्वं रण-प्राङ्गण-समर-विरुद्धं मन्त्रयसे। [ततो "वयं रणाङ्गणयुद्धमीहामहे" इति परिनश्चादुवादिनोऽब्रुवन्]

चा०-[शोककोपोन्मथितहृदयो मुखमधः कृत्वा निःश्वस्य, च] न सामर्थ्यं मम मन्त्रणस्य, किन्तु श्रीमद्भिरेव स्थिरीक्रियताम्, यथा चाऽऽज्ञापयिष्यते तथा विधास्यति दास एषः।

उन्दुरव इव, उपमालङ्कारः। अग्रेऽप्येवम्। निविशन्ते, "नेर्विश"इत्यात्मनेपदम्। सानुमत्सानूनि=पर्वतश्रङ्गाणि। उड्डीयेवेत्युत्प्रेक्षा। आयोज्य=एकत्रीकृत्य। अश्वनीयः=अश्वैराक्रमणीयः। "तेनातिक्रामति"।

उन्मुच्य=परित्यज्य। साहसेन=बलकर्मणा जयतीति विग्रहे "तेन दीव्यति खनति जयति जितमि"ति ठकि साहसिकशब्दस्य साधुत्वम्।

मनुष्यमारणं स्तेयं परदाराभिमर्षणम्।
पारुष्यमनृतं चैव साहसं पञ्चधा स्मृतम्॥

इति सम्प्रधार्य, धूमपान-नलिका-मुखं पार्श्वस्थोपबर्हे संस्थाप्य, ताम्बूलिक-दत्तां वीटिकां दन्तैः सन्दश्य, सम्मुखसंस्थापित-राजत-पात्रस्थ-कुसुम-गुच्छानामन्यतममुत्थाप्य जिघ्रति तस्मिन्, अकस्मात् प्रतीहारेण प्रविश्य सजयध्वन्यभिवाद्य करौ सम्पुटीकृत्य कथितम्-"दीनबन्धो! सिंहदुर्गात् पंडित एकः समायातोऽस्ति।

तदाकर्ण्य, आ! एवम्! स एव तु चिरात् प्रतीक्ष्यते मया। प्रवेशय प्रवेशय-इति साम्रेडमुक्तवान्-शास्तिखानः।

तावत् सर्वेषु तत्पथमेव प्रविलोकयत्सु, प्रतीहारेण सह सात्त्विकवेषः पण्डित एकः प्रविवेश।

तञ्च श्यामवर्णम्, चन्दन-त्रिपुण्ड्राङ्कितम्, आरक्तचक्रोष्णीषम्, सुन्दर-श्वेत-कञ्चुकम्, पीतोत्तरीय-शोभित-कन्धरम्, किञ्चित्खर्वाकृतिमप्यपीच्यदर्शनमवलोक्य, सर्वे सभासदस्तथैवावास्थिपत।

इति स्मर्यते। "परदारान् प्रकुरुत" इत्यस्य "तेषु सहसा प्रवर्त्तेत इत्यर्थ" इति वदतां दीक्षितादीनामपि साहसिकपदस्य तादृशकृत्यकारिष्वेव शक्तिग्रहोऽनुमीयते। किन्तु बलकर्मरूपार्थेऽपि साहसशब्दो दृश्यते, तेन च कृतेषु साहसिकशब्द इति वेदितव्यम्।

ताम्बूलिकदत्ताम्=ताम्बूलवाहिदत्ताम्। यद्यपि ताम्बूलं पण्यमस्येति विग्रहे "तदस्य पण्यमि"ति ठकि साधुत्वेन ताम्बूलविक्रेत्रर्थे युक्तः प्रयोगः, किन्तु लक्षणया ताम्बूलदायकेऽपि प्रयोगः कार्य इति ग्रन्थकृदभिप्रायः।

सात्विकं वेषं प्रदर्शयति-तञ्चेत्यादिना। चन्दनत्रिपुण्ड्रेणाङ्कितम्। ललाट परिणाहे तिसृभी रेखाभिः सूच्यमानं त्रिपुण्ड्रम्। **आरक्तम्**=ईषद्रक्तम्, **चक्रम्**=वृत्ताकृति, उष्णीषं यस्य तम्। "गोल टोपी" इति हिन्दी। **किञ्चित्खर्वा-**

आगम्यतामिह समीपे स्थीयतामिति स्थानं निर्दिशति शास्ति-खाने, सोऽपि प्रह्वीभूय, किमप्यादर-सूचक-वचनमुच्चार्यैव समु-पाविक्षत् । ततस्तेन तेषामेवमभूदालापः ।

शास्तिखानः-पण्डित ! तव किं नाम ?

पण्डितः-नास्ति देहोऽपि गेहोऽपि नामापि मम किञ्चन । लोकास्तथाऽपि भाषन्ते [सकासनम्] मां महादेव इति । भग-वन् ! अस्मिन्नसारे संसारे देहो वा गेहं वा नाम वा, तादृशं किमस्ति यदहं ममेति कथयामि । तथाऽपि मां जनाः, "महादेवो महादेवः" इति कथयन्ति ।

[तदाकलय्य, सर्वेऽपि पण्डितानां भाषण-भङ्गीमभिनन्दुः]

शा०-अथ को वृत्तान्तः सिंहदुर्गस्य ?

महा०-

"रसयन् गोस्तनी-कन्दम्, स्थितोऽपि स्वर्ण-पञ्जरे" ।

[किञ्चित् कासित्वा]

कृतिम्=ईषद्वामनम् । अपीच्यदर्शनम्=शोभनावलोकनम् । अवास्थि-षत=स्थिता बभूवुः ।

नास्ति देहोऽपि, गेहोऽपीत्यादिना तस्य वेदान्तिनम-मन्यता प्रकटिता । सकासनम्="खाँस कर" इति हिन्दी । कासश्वासादिप्रकरणे वैद्यकग्रन्थेषु बहुश ईदृशोऽर्थे व्यवहृतोऽयं धातुः । धातोरनेकार्थतायाः सर्वसम्मतत्वेन निर्वाहः । असारे संसार इति ते बहुधा कथयन्ति ये संसारार्णवे चिराय निमग्नाः पुत्रकलत्रादिरक्षणमात्रपराः संस्कृताक्षरदुर्दशाकरणपटव इति सोप-हासमुक्तिः । अत एवाग्रे-"पण्डितानां भाषणभङ्गीम्"-इति बहुत्वं प्रायुङ्क्तेति वर्णस्वारस्यवेदिनः ।

रसालवन-वियोग-ज्वालाभिर्दह्यत एव कोकिलः।

शा०-किम् ?

महा०-भगवन् ! यद्यपि सुवर्ण-रचिते पञ्जरे कोऽपि कोकिलस्तिष्ठेत्, यद्यपि च द्राक्षायाः कन्दं प्रत्यहं खादेत्, तथाऽप्याम्रवन-वियोग-दुःखेन दुःखी भवत्येव।

शा०-किं तात्पर्य्यम् ?

महा०-चमूपते ! एतदेव यद्, यद्यपि सिंह-दुर्गे सिंह-सदृशैर्वीर-भटैर्युतो रत्न-जटित-कनक-दण्डैः श्वेत-चामरैर्वीज्यमानः शिववीरः सुखेन वसति, तथाऽपि पुण्यनगर-वियोगस्य चिक्कन-दुर्ग-वियोगस्य च दारुणं व्रणमिव दुःखं स बिभर्त्ति।

शा०-सत्यम्, किन्तु तस्य व्रणस्य का चिकित्सा ? दुःसाध्योऽयं रोगः।

महा०-सोऽप्यसाध्यं न मनुते, किन्तु दुःसाध्यमेव।

शा०-तत्किं प्रधानं चिक्कन-दुर्गं कोङ्कण-देश-रत्नमिव च पुण्यनगरं हस्तीकृतवत्यपि मयि शिवोऽधुना मया सह युयुत्सते ? युद्धेन वा महारोगस्यैतस्योपायं चिकीर्षति ? एवं चेज्जम्बुकस्य

गोस्तनी=द्राक्षा। रसालवनेत्यत्र छन्दाभङ्गः, स च विस्मृतं पद्यखण्डं स्वयं यथा तथा निर्माय पपाठेति द्योतयति। अत एव मध्ये कासनमप्युपपद्यते। विस्मृत्य हि जनाः कासनादिना समयमतिवाहयन्ति।

किमिति पृष्टः श्लोकार्थमेव प्रकटयामासेति द्वितीया पण्डितानां भाषणशैली। ते यदि किमपि वक्तुमुद्यता भवन्ति तदा घुष्टं श्लोकं निवेद्य तादृशैरेवाक्षरैस्तदर्थं समुपस्थाप्य विरमन्ति।

बुभुक्षित–केसरि–खर–नखराक्रान्तोरणजिघृक्षा विफला ।

महा०–चमूपते !

न कुर्य्याच्चतको मुग्धश्चेत्ववाञ्छित–सूचनम् ।

न पूरयति किं मेघस्तत्तृष्णां जल–वृष्टिभिः ?

शा०–किम् ?

महा०–प्रभो ! यदि चातक–नामा पक्षी याचितुं न जानीयात ; तत्किं मेघो जलवृष्टिभिस्तत्तृष्णां न शमयति ? अर्थाद् यदि सम्मुख–युद्ध–पराभव–लज्जितो महाराष्ट्र–राजः, स्वमुखेन सन्धये न प्रार्थयेत, तत्किं भवान स्वयमेव स्वोदारतया यथोचित–दाना–दानैस्तेन सह न सन्दध्यात् ?

शा०–[सन्धि–प्रस्तावं श्रुत्वा, सानन्दः] तत्किं सन्धित्सते शिवः ?

महा०–चमूपते ! दिल्लीश्वरेण योद्धुं कोऽभिमन्येत ? सम्प्रति तु महाराष्ट्र–मण्डले प्रतिगेहं प्रतिभित्ति प्रतिमुखं च सन्धिः सन्धिरित्येव श्रूयते महाध्वनिः ।

शा०–[हसन्, चान्द्रखानं प्रति सामर्षम्] ह ह ह ! पश्य महाराष्ट्राः सम्मुख–युद्धाद्भीताः ? आहोस्विद् दुर्ग्ग–रोधाद् ?

जम्बुकस्य=शृगालस्य । बुभुक्षितस्य=क्षुधार्त्तस्य, केशरिणः खरनखरैः=तीक्ष्णाङ्गुलिप्रान्तैः, आक्रान्तस्य=विद्धस्य, उरणस्य=मेषस्य, जिघृक्षा=गृहीतुमिच्छा । यथा शिवकर्तृकतादृशोरणग्रहणेच्छाया वैफल्यं, तथैव शिववीरस्य चित्रनदुर्गादिलब्ध्यभिलाष इति तत्त्वम् ।

न कुर्याच्चातको मुग्ध इत्यत्र शिववीरशास्तिखानचरिते प्रस्तुतेऽप्रस्तुत–चातकमेघादिवर्णनादप्रस्तुतप्रशंसा ।

साम्प्रेडं कथयाम्येतैः कदर्य्य-हतकैः सम्मुखं योद्धव्यमिति, त्वं तु नेजानेव स्वप्नान् पश्यसि !

तदाकर्ण्य चान्द्रखानः क्रोधारक्त-वदनोऽप्यधोमुखः समतिष्ठत। महादेवश्च महाराष्ट्र-निन्दां सकष्टमश्रौषीत्। शास्तिखानः पुनर्महादेवाभिमुखीभूय, तं सम्बोध्य, सोत्प्रासमुवाच—

"साधु, साधु, पण्डित ! साधु, तव पाण्डित्येऽनितरां प्रसीदामि।"

चाटुकाराः—आम, आम, साधु, साधु, महानेष पण्डितः।

शा०—अहो ! माधुर्य्यं संस्कृत-भाषायाः।

चा०—ओः ! अपूर्वमेव माधुर्य्यमिदम् !!

शा०—तत्किमायातो भवान् सन्धि-विषयक-वार्त्ताः कर्तुम् ?

महा०—एवम् !

शा०—अथ दर्शय किमपि प्रमाणपत्रम्, यथा त्वं शिवेनाऽस्मिन् विषयेऽधिकृतोऽसीत्यहं निश्चिनुयाम।

महा०—तथा [इति पत्रं दर्शयामास] ततः शास्तिखाने पत्रं हस्ते गृहीतवत्येव कञ्चन भृत्यो जाज्वल्यमान-दीपाश्रित-काच-मञ्जूषां हस्ते समादाय, सम्मुख आगत्य, पत्रोपर्यनुकूल-प्रकाशमकरोत्। स च द्विस्त्रिः पठित्वा, मुद्रादिकं सावधानतयाऽवलोक्य, पत्रं भुवि संस्थाप्य, "भद्रम्, ज्ञातमिदम्, अस्मि भवानधिकृतोऽस्मिन् विषये, तदारभ्यताम्"—इत्यब्रूत।

महा०—चमूपते ! "वयमादौ पराजिताः, पुनश्च शोणित-शोण-

शोणित-शोण-धाराभिः=लोहित-लोहित-प्रवाहैः।

धाराभिः क्षोणी-क्षालनं व्यर्थम्"-इति निवेदयति प्रभुः ।

शा०—आम् !

महा०—अतः स सन्धित्सते ।

शा०—तथाऽस्तु ।

महा०—तत् कैर्नियमैः सन्धेयमिति स विवित्सति ।

शा०—आदौ दिल्लीश्वरस्य वशंवदता, कर-प्रदता चाङ्गीकरणीया, अपि रोचत इदं भवत्प्रभवे ?

महा०—तस्मै किं रोचते, का वा तस्य सम्मतिरिति वक्तुं नाधिकृतोऽस्मि, किन्तु यदादेक्ष्यतेऽत्रभवद्भिस्तदेवास्मै निवेदयिष्यामि, स चोरीकारमनूरीकारं वा स्वयं प्रकटयिष्यति ।

शा०—अस्तु, कथ्यतां तस्मै यत्-प्रथमतो दिल्लीश्वराज्ञावाहकता तत्करदता चाङ्गीकरणीया । द्वितीयतो यानि दुर्गाणि स्थानानि चास्माभिर्जितानि, तेषां पुनरादित्सा न विधेया । तृतीयतश्चान्यान्यपि सिंहदुर्ग-प्रभृतीनि कानिचिद् दुर्गाणि दिल्लीश्वरायोपहरणीयानि ।

महा०—(किञ्चिद् विचार्यैव) सिंह-दुर्गादीनि कानि कानि ?

शा०—तानि विविच्य, परस्तात् पत्रद्वारा सूचयिष्यामि ।

महा०—नान्यत् ?

विवित्सति=वेत्तुमिच्छति ।

आदेक्ष्यते=आदेशः करिष्यते ।

आदित्सा=आदातुमिच्छा ।

उपहरणीयानि=उपायनीकरणीयानि ।

शा०—नान्यत्। इदमेव तस्मै कथ्यतां तत्सम्मतिश्च मह्यं सोसूच्यताम्।

महा०—अथास्मिन् विषये यावत् पत्रालापः, नियम-व्यवस्थापनं च भवेत्, तावद् युद्धं शाम्यतु-इत्यपि निवेदयति प्रभुः।

शा०—अलमुत्कीर्त्यापि तत्। यावन्नियमः स्थिरो न भवति तावद् यवन-वीरा यत्रैव महाराष्ट्र-सेना द्रक्ष्यन्ति, तत्रैव योत्स्यन्ते। गम्यतामधुना, कथ्यतामेष विषयः स्वप्रभुषु।

तदाकर्ण्य, "तथास्तु" इति व्याहृत्य, सप्रह्वभावमुत्थाय, न्यवर्तत महादेवः।

चान्द्रखानस्तु महादेवस्य वार्त्ताः श्रावं श्रावम्, "अप्येष स्वयं शिवर्वीरः, अपि वा तस्यैव कश्चिदनुजः, सहचरो वा, यतः संवादिन्याकृतिरनुकारिणी च वागस्ति"-इति संशयानः, मुहुर्मुहुः परामर्श-पराभ्यां नयनभ्यां तं निपुणं निरीक्षमाणः, चमूपतिरन्यादृश इति स्वाभिप्रायं प्रकटयितुमप्यनीहमानः, उत्थित एवास्मिन् स्वयमप्युत्तस्थौ।

महादेवस्तु मुकुर-चित्र-पट्टिका-स्तम्भ-वितान-द्वार-कपाटावलोकन-छलेन, शनैः शनैर्निश्रेणीः, प्राचीराणि, शस्त्रागारम्, रक्षकावासं च, यथाशक्ति गम्भीरमवालोकयन्। "किमिवेत-

उत्कीर्त्य=कथयित्वा। वक्तव्यमपि नेत्यर्थः।

सप्रह्वभावम्=सनम्रतम्।

संवादिनी=सदृशी। अनुकारिणी=तुल्या।

निःश्रेणीः=अधिरोहणीः।

स्ततः पश्यसि ?" इति पृष्टवति चान्यतमे रक्षके, "न किमपि, अस्मिन्नेव पूर्वं शिववीर उवास, अधुना च सर्वं युष्माभिराक्रान्त-मित्येव स्मृत्वा, भवदैश्वर्यं विलोकयामि"–इत्युवाच ।

अथ "गच्छ, यत्र शिवोऽधुना वसति, तस्मिन्नपि वयमद्य श्वो वा, एवमेव विचरिष्यामः । किमिव गतं शोचसि ? तद्रक्षार्थमेव यतनीयमिति प्रभवे निवेदय"–इति प्रौढं भाषमाणे रक्षके, अङ्गार-प्रतिमाभ्यां चक्षुर्भ्यां तं दहन्निव, आपादमामस्तकञ्च, द्विस्त्रिरवलोक्य "यदाज्ञाप्यते वीरैरिति सव्यङ्ग्यमाभाष्य, द्वारदेहलीमुल्लङ्घ्य, तत्रत्यानि पञ्चपाणि सोपानान्यवतीर्य घण्टापथेन यातायातं कुर्वतां मनुष्याणां प्रवाहे मिश्रितो बभूव ।

इति पञ्चमो निश्वासः ।

घण्टापथेन=राजमार्गेण । "दशधन्वन्तरो राजमार्गो घण्टापथः स्मृत" इति चाणक्यः ।

इति श्रीशिवराजविजयवैजयन्त्यां पञ्चमनिश्वास-विवरणम् ।

"बुद्धिर्यस्य बलं तस्य निर्बुद्धेस्तु कुतो बलम् ?"

—पञ्चतन्त्रम् ।

आसीत् शिववीरस्य परम-मित्रम्, नीति-निष्णातः, वीरवरः, परम-साहसी, विविध-युद्धेषु विहित-शिव-साहचर्यः, खड्ग-चालन-विद्या-कुशलो माल्यश्रीकनामा । स च महादेव-पण्डित-वेषमाकलय्य, दूतताच्छलेन शत्रुभवनं प्रविविक्षुं शिववीरमालोक्य, तदनुमत्या गृहीत-यवन-भिक्षु-वेषः, नील-निचोलाञ्चलाधस्तिरोहित-तीक्ष्णतर-च्छुरिकः, कटि-पर्य्यन्त-विलम्बमान-मेचक-कुञ्चित-केशः, सुशोभित-कृत्रिम-श्मश्रु-कूर्चः, हरित-परिधानः, करेणैकेन तीव्रतम-शङ्कुकृत-दण्डम्, नारङ्गाकृति-मुखम्,

---

शिववीरेण महादेवपण्डितात्मना योधपुराधीश्वरः श्रीयशवन्तसिंहः स्वमनीषाप्रभावाद्वशीकृत इति कथोपक्षेपकं पञ्चतन्त्रीयं प्रतीकमुद्धरति—बुद्धिर्यस्येति । **परमश्च तन्मित्रम्** । मित्रशब्दो नित्यक्रीवः सहचररूपेऽर्थे । **नीतिनिष्णातः**=राजनीतिकुशलः । **विविधयुद्धेषु-विहितं शिवस्य साहचर्यं** येन सः । नित्यसापेक्षत्वं विधानस्य केन कथं कुत्रार्थ इति न सविशेषणानां वृत्त्यभावानुचिन्ता । **प्रविविक्षुम्**=प्रवेष्टुमिच्छुम् । **गृहीतः**=अङ्गीकृतः, **यवनभिक्षोः**=यवनयाचकस्य, "फकीर" इति ख्यातस्य, **वेषः**=नेपथ्यं, येन सः । **नीलनिचोलस्य**=नीलरक्तकञ्चुकस्य, **अञ्चलाधः**=कोणनिम्नभागे, **तिरोहिता**=छुपिता, **तीक्ष्णतरा**=खरतरा, **छुरिका**=कृपाणिका, येन सः । **कटिपर्यन्तम्**=श्रोणीपर्यन्तम्, **विलम्बमानाः**=समायाताः, **मेचकाः**=श्यामाः, **कुञ्चिताः**=वलिताः, **केशाः**=बालाः, यस्य सः । **हरितपरिधानः**=हरितवासाः । यवनसाधवः प्रायो हरितवाससः एव भवन्ति । वाद्यं विशिनष्टि—**तीव्रतमः**=अत्यन्त-

विलम्बित–विविध–सुसूक्ष्म–शृङ्खला–खण्डम , झणज्झणद्ध्वनि–रुचिरं वाद्यमेकं वादयन , भिक्षाटनार्थमिव, तत्पश्चादेव प्रचलितः । यवन–भिक्षुकाणां च नाऽऽसीत्तथा निरोधः–इति गोपुराध्यक्षेण किञ्चिदालप्यैवान्तः प्रवेष्टुमाज्ञप्तः, सपदि प्रविश्य, पारस्य–भाषया कानिचिच्छन्दांसीवाऽऽम्रेडयन , कर्हिचिन प्रपद–पातित–दृष्टिः· कदाचिद् गगनतलं समीक्षमाणः, निरपेक्ष इव, ब्रह्मानन्द–निमग्न इव च· महादेव–पण्डित–वेषं शिववीरमेव, कदाचिन किञ्चिद् दूरतोऽनुगच्छन , कर्हिचिद्भ्रम–ग्राहमनुसरन , स्वयमपि शाम्भिग्वानाध्युषित–प्रासादस्य द्वारपर्य्यन्तमायातः । शिववीरे प्रासादान्तःप्रविष्टे च, स्वयमेव तत्रैव पर्य्यटन , प्रासादं भृ–भागाट्टालिका–पर्य्यन्तं निपुणं निरीक्षमाणः· द्वार–पालानां रक्षकाणां च

कठोरः, शङ्कुकृतः=कीलकीकृतः, दण्डो यस्य तत् । **नाराङ्काकृति**=नाराङ्काकारम्, अर्थाट्टालाकृति, मुखं यस्य तत् । **विलम्बितानि**=आलम्बमानानि, विविधानि सुसूक्ष्माणि शृङ्खलाखण्डानि यस्मिन्तत् । झणज्झणद्ध्वनिना **रुचिरम्**=श्रोतृचित्ताकर्षकम् । **भिक्षाटनार्थमिव** भिक्षाटनविषयप्रदर्शनमात्रन्तु भिक्षार्थमटनम्–अत एवैवसार्थक्यम् । **तथा**=यथा हिन्दूनामिति शेषः । उक्तिवैचित्र्यार्थमनुक्तिः । **गोपुराध्यक्षेण**=पुरद्वारप्रहरिप्रवरेण । **किञ्चिदेवालप्येत्यन्वयः**। **छन्दांसि**="गजल" प्रभृतीनि । **प्रपदे**=पादाग्रे, "पादाग्रं प्रपदमि"ति कोशः, **पातिता**=स्थापिता, दृष्टिर्येन सः । निरपेक्षतात्र्यञ्जकमिदम् । सापेक्षा हि पथि गच्छता महतो विचित्रया दृशा दयापूर्णया निभालयन्ति । **हस्तग्राहम्**=हस्तेन गृहीतुं योग्यो यथा स्यात्तथा । **स्वयमेव**=आत्मनाऽपि । एवकारोऽप्यर्थे । अत एव न समानार्थकशब्दद्वयस्यैकवाक्यघटकत्वम् । **द्वारपालानाम्**=दौवारिका-

तानि तानि निवेशनानि समीक्षमाणः, भवनमेतत् परितः पूर्णतया दिदृक्षुः परितो विस्तीर्णायां पुष्प-वाटिकायां प्रविष्टः।

प्रथमतः सघन-हरित-लता-वेष्टित-द्रुमावलिः, द्वितीयतस्तमोबहुला तमीः तृतीयतश्च नील-निचोलोऽयं जटिलः-इति वीक्षमाणैरप्यवीक्ष्यमाणः, प्रासादं परिक्रम्येव, सर्वाणि स्वाभिमतगुप्तस्थानानि सम्यगवलोक्य, सप्रसादं मनस्येवाचकथत्-

यदहो! न दुर्घटमाक्रमणमेतस्य शान्तिखान-वराकस्य, नगराद्बहिरेतस्य सेना, प्रासादरक्षका अपि च प्रासादादस्माद् दूरतो मन्दुरासु वसन्ति, यथासमयं च पञ्चषाः समागत्य, द्वारि तिष्ठन्ति, प्रासादस्य पृष्ठदेशे विशालमुद्यानम्, नात्र रात्रौ कोऽपि मनुष्यो विचरति, उद्यानं परितस्तु लोह-दण्ड-प्रावारः, यमुल्लङ्घ्य,

---

णाम्। **रक्षकाणाम्**=प्रहरिणाम्। **निवेशनानि**=आवासकोष्ठकानि। **समीक्षमाणः**=सम्यक् पश्यन्। **परितः**=सर्वतः। सदनस्येति शेषः। **पुष्पवाटिकायाम्**=गृहोपवने।

सघनाभिः=ससान्द्राभिः, **हरिताभिः**=हरिद्वर्णमयीभिः, अशुष्काभिरिति यावत्, **लताभिः**=व्रततिभिः, **वेष्टिताः**=वलयिताः, द्रुमाणाम्, **आवलयः**=पङ्क्तयो यस्यां तादृशी वाटिका। सघनेति हरितेति च पृथक्पदे वाटिकाविशेषणीभूते इवानुभूयेते पाठान्तरतः-"सघना-हरिता" इत्यादि रूपतः **तमोबहुला**=अन्धकारप्रचुरा। **तमी**=तमिस्रा। **नीलनिचोलः**=कृष्णप्रच्छदः। **जटिलः**=जटायुतः। "लोमादि-पामादि-पिच्छादिभ्यः शनेलचः"। **वीक्षमाणैः**=पश्यद्भिः। **अवीक्ष्यमाणः**=अनवलोक्यमानः। **सप्रसादम्**=सप्रसन्नतम्।

मन्दुरासु=वाजिशालासु। प्रासादरक्षकाणां प्रासादस्थितिरपेक्षिता-सा नेति

यतस्तत एव प्रविविक्षुः प्रवेष्टुमर्हति, यत्राऽऽच्छन्नशरीराश्च, परः-सहस्राः परैरलक्ष्यमाणाः समस्तां रात्रिमतिवाहयितुं पारयन्ति । प्रासादे च बहवो गवाक्षाः, ग्रीष्मकालेऽस्मिन्नुन्मुद्रिता एवोपेक्ष्यन्ते । "कः समायाति ? परास्तो महाराष्ट्र-हतकः"-इति विश्वसन्तः प्रहरिणो रक्षकाश्च, निर्निस्त्रिंशा एव, निश्चर्माण एव च, सोपेक्षं परस्परं हसन्तो हासयन्तश्च, स्व-प्रहरमतिवाहयन्ति । प्रासादान्तःस्थितानां चमूपतेः सहवासिनां च पानैरेव, शयनैरेव च, तथा समयो व्यत्येति, यथा ते, का प्राची ? का प्रतीची ? कः परकीयः ? क आत्मीयः ? दिनं वा ? रजनी वा ? शयामहे वा ? उद्बुध्यामहे वा ? श्वेतो वा ? कृष्णो वा ?-इत्यादि चिरेण विदन्ति—इति ।

पुनः परावृत्य, प्रधान-द्वारमागत्य, तदधिकृतस्य प्रतीहारस्यैकस्य सम्मुखमागत्य, वाम-हस्तेन वाद्यं झणज्झणत्कुर्वन्, तस्यैव

साधिक्षेपमुक्तिः । **पृष्ठदेशे**=पाश्चात्यभागे । **लोहदण्डप्रावारः**=आयसदण्डवृतिः । **आच्छन्नशरीराः**=प्रावृतदेहाः । **परैः**=शत्रुभिः । **अलक्ष्यमाणाः**=अज्ञायमानाः । **उन्मुद्रिताः**=खुलिताः । **उपेक्ष्यन्ते**=उपेक्षाविषयीक्रियन्ते । **निर्निस्त्रिंशाः**=खड्गशून्याः । **निश्चर्माणः**=त्यक्तफलकाः । "फलकोऽस्त्री फलं चर्मे"-त्यमरः । **सोपेक्षम्**=उपेक्षया सहितं यथा स्यात्तथा । **पानैः**=मद्यगोष्ठीभिः । **शयनैः**=रतिफलकैः स्वापैः । **व्यत्येति**=व्यतिक्रामति । परस्यायं **परकीयः**=अनात्मीयः । गहाद्यन्तर्गणसूत्रेण कुक्कछश्च । आत्मनोऽयमात्मीयः । गहादित्वाच्छः । **श्वेतो वा कृष्णो वा**, लोकोक्तिरेषा । एतद्विवरणफलकान्येव पूर्वोक्तपदानि ।

मुख–मण्डले दत्तदृष्टिरनिमेषपातमवलोकयन्नस्थात्।

स च–स्वामिन्! किं कथ्यते?–इति द्विस्त्रिश्चाप्रच्छत्। अस्मिंश्चोत्तरमददत्येव तथैवावलोकयति, स्वामिन! अपि भोक्ष्यते किमपि?–इति सादरमुवाच।

स तु किञ्चन मस्तकं कम्पयन, मौनेनैव प्रतिनिवृत्य, निवर्तन–मार्ग एव कतिपयानि पदानि गत्वा, घण्टापथस्य प्रान्तस्थायामेकस्यामुन्नत–वेदिकायां पश्चिमाभिमुख उपविश्य, पातितोभय–जानु स्थित्वा, वाद्यं पुरस्तात् संस्थाप्य, मुखमधःकृत्य, तूष्णीकः समतिष्ठत। तथास्थितस्यैव तस्य हृदये विचाराकूपारस्य तरङ्गा इव बहुभङ्गमाकलयन, यद्—

"अहह! कथमिव समायातोऽयं दुर्भाग्यमयः समयः कोङ्कण–

परावृत्य=यथागतमागत्य। **अनिमेषपातम्**=निमेषानप्यपातयित्वेत्यर्थः। क्रियाविशेषणम्। **अस्थात्**=निवृत्तगतिकोऽभूत्। स्थाधातोरत्रैवार्थे मुख्यः प्रयोगः। "तिष्ठतु भवानि"त्यागन्तुकं प्रति पण्डितराजशिवकुमारमिश्रकथने "किमपराद्धं मये"ति तत्पूर्वपक्षकथाऽप्यानुसन्धातव्या। **स्वामिन**!="सांई" इति हिन्दी। यवनसाधोः सम्बोध्यमानत्वात्।

स तु तूष्णीकः समतिष्ठतेति सम्बन्धः। **मस्तकं कम्पयन्**=न भोक्ष्यामीति बोधनायेदम्। **निवर्त्तनमार्ग एव** येन पथा निवृत्तस्तेनैव कियद्दूरं गत्वेत्याशयः। **घण्टापथस्य**=राजमार्गविशेषस्य। **प्रान्तस्थायाम्**=समीपवर्त्तिन्याम्। **उन्नतवेदिकायाम्**=उच्चायां परिष्कृतभूमौ। **पातितावुभयजानू** यस्यां तदिति क्रियाविशेषणम्। **विचाराकूपारस्य**=विवेकसागरस्य। **बहुभङ्गमिव**=आघातप्रतिघातमिव। **आकलयन**=व्यदधुः।

देशस्य, यद् यत्र गरुडाङ्किता महाध्वजाः समुद्धूनैर्गगन-तलोद्धूयमान-पवनमपावयन; तत्र भारताभिजन-सघनकलङ्का इव नील-ध्वजाः समुद्धूयन्ते, यत्र कोटि-जन्मार्जित-महापातक-दीर्घ-दाव-दावानल-ज्वालामालाभिरिव हरि-नाम-घोषणाभिर्व्यापूर्यत वसुधा, तत्र कर्ण-काषायाः, चीत्कारमयाः, हरि-हर-निन्दा-नादाः कर्णौ स्फोटयन्ति । यत्र कदा जन्माष्टमी ? कदा रामनवमी ? कदैकादशी ? कदा प्रदोषः ?—इति पृच्छा समश्रूयत पण्डित-मण्डलेषु;

गरुडाङ्किताः = गरुडचिह्निताः । विष्णुमन्दिरीयत्वात् । **गगनतले** = छायापथे, **उद्धूयमानम्** = सञ्चरन्तम्, **पवनम्** = समीरणम्, स्वयमपि पवित्रताहेतुमिति शब्दव्यङ्ग्यम् । **अपावयन्** = पूतमकार्षुः । **भारताभिजनस्य** = भारतदेशस्य, **सघनाः** = सान्द्रीभूताः, कलङ्का इव । स्वभावत एव नीलध्वजपटस्य भारतीयसघनकलङ्कत्वेनोत्प्रेक्षणम् । **नीलध्वजाः**=कृष्णपताकाः, सचन्द्रा हरिद्वर्णा यवनध्वजा भवन्ति । **कोटिजन्मभिः**=असंख्यातजननैः, **अर्जितानि** = सञ्चितानि यानि, **महापातकानि**=ब्रह्महत्यादीनि, "ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः । महान्ति पातकान्याहुः संसर्गश्चापि तैः सहे"ति मानवं शासनम्, तान्येव **दीर्घदावः**=महाकाननम्, तस्य **दावानलः** = वनाग्निसदृशः, रूपकम् । भस्मीकरणं रूपणहेतुः, तस्य **ज्वालमालाभिरिव**=अर्चिस्ततिभिरिवेत्युत्प्रेक्षा । **हरिनामघोषणाभिः** = भगवन्नामोच्चारैः । नाम्नि दहनत्वं तदुच्चारणे च ज्वालमालात्वमारोपितमिति ध्येयम् । **व्यापूर्यत**=अभार्षीत् । **कर्णकषायाः**=श्रोत्रवेधकाः । श्रवणानर्हा इति यावत् । **चीत्कारमयाः**= शब्दविशेषमयाः । अत्र "वांग"इति यावनप्रसिद्धे तात्पर्यम् । **हरिहरनिन्दानादाः** = देवगर्हणाशब्दाः । उपलक्षणं हरिहरपदं देवमात्रस्य । रमयतीति

तत्र हि कदा मोहरमः ? कदा रामयानम् ?—इत्यादिराकर्ण्यत आरब्य-भाषामयो मौलिवीनां वचन-विन्यासः। यत्र विपणिषु सर्वदा द्राक्षा, रम्भा, आम्राणि, नारिकेलानि, दाडिम्बानि, बीजपूराणि, जम्बीराणि, लिकुचानि, पनसानि च, व्यक्रीयन्त, तत्राधुना, वर्तिकाः, तित्तिराः, कुक्कुटाः, लावाः, कलविङ्काः, सारसाः, श्येनाः, उलूकाः, तत्तदण्डानि च विक्रीयन्ते। यत्र विशालतिलकाः, कलित-रुद्राक्ष-तुलसी-कमलाक्ष-मालिकाः, ऊर्णा-कौशेय-मात्र-वसनाः, काष्ठ-पादुकारोहिण, भगवन्नामामृत-रस-रसन-रसिक-रसनाः,

---

रमः, मोहस्य रमो मोहरम इति संस्कृतशब्दता। "मुहर्रम" इति लोके। एतद्दिन एव मोहमदो घातितः। **रामयानम्**="रमजान" इति लोके। **द्राक्षा**= गोस्तनी। **नारिकेलानि**=कूर्चशीर्षकाः। "नारिकेलो दृढफलो लाङ्गलीकूर्चशीर्षकः"। **दाडिम्बानि**=लोहितपुष्पकाः। "दाडिमः करको दन्तबीजो लोहितपुष्पकः"। **बीजपूराणि**=मातुलुङ्गाः। "बीजपूरो मातुलुङ्गो रुचकः फलपूरकः"। **लिकुचानि**=डहवः। "लिकुचो लकुचो डहुरि"त्यमरः। "वडहर"इति हिन्दी। "लकुचकुचापादताडनं श्रेय" इत्यत्रत्यविचारेण तु "लीची"इति हिन्दी। **पनसानि**=कण्टकिफलानि, "कटहर" इति हिन्दी। **वर्तिकाः**="बटेर" इति हिन्दी। **लावाः**=लघुवर्त्तिकाः। **कलविङ्काः**=जलपक्षिणः। **विशालं तिलकं** येषां ते। **कलिताः**=धारिताः, रुद्राक्षस्य, तुलस्याः, कमलाक्षस्य च मालिका यैस्ते। **ऊर्णा**=मेषादिलोम, **कौशेयम्**=कृमिजम्, तन्मात्राण्येव **वसनानि**=वासांसि, येषां ते। ऊर्णादिवस्त्राणां वातसंसर्गमात्रतः शुच्यभिधानात्पूजाभोजनादिषु प्रायो व्यवहरन्ति तान्येव धार्मिकाः। **काष्ठपादुकामारोढुं** शीलं येषां ते। **काष्ठपादुका**="खडाऊं" इति हिन्दी। भगवन्नामैव **अमृतरसः**=

विहित-तीर्थ-सार्थ-सञ्चरण-चरणाः, स्वोचिताचाराचरणमात्र-व्यसनिन, महात्मानः, सप्रश्रयं सस्तवं सपादस्पर्शं च प्राणम्यन्त,

सुधारसः, तस्य **रसने**=आस्वादने, **रसिकाः**=संलग्नाः, **रसनाः**=जिह्वा येषां ते । अनुप्रासोऽत्राग्रे च ।

"नाम्नोऽस्ति यावती शक्तिः पापनिर्हरणे हरेः ।
तावत्कर्तुं न शक्नोति पातकं पातकी जनः ॥"
"साङ्केत्यं पारिहास्यं वा स्तोभं हेलनमेव वा ।
वैकुण्ठनामग्रहणमशेषाघहरं विदुः ॥"
"अवशेनापि यन्नाम्नि कीर्तिते सर्वपातकैः ।
पुमान् विमुच्यते सद्यः सिंहत्रस्तमृगैरिव ॥"

इत्यादिविधायकवचनसमूहेन नामोच्चारणविधिः प्रदर्शित इति ज्ञेयम् । नात्रत्यफलश्रुतेरर्थवादतेति श्रीकरपात्रिचरणानां सङ्कीर्त्तनमीमांसायां स्फुटम् । विहितं **तीर्थसार्थेषु**=बदरी-जगन्नाथ-रामेश्वर-द्वारकादिपूततमस्थानसमूहेषु, **सञ्चरणम्**=भ्रमणम्, यैस्तादृशाः, **चरणाः**=पादाः, येषां ते । तीर्थभ्रमणस्य स्वर्गापवर्गादिफलं शतशः पुराणेतिहासेषु निरूपितम् । **स्वोचितानाम्**=स्वस्ववर्णाश्रमादियोग्यानाम्, वेदशास्त्रविहितानाम्, **आचाराणाम्**=शौच-स्नानसन्ध्यावन्दनादिनित्यनैमित्तिककाम्यानुष्ठानानाम्, **आचरणमात्रम्**=पालनमेव, **व्यसनम्**=प्रतिदिवसकृत्यम्, येषां ते । यथा मद्यादिदुर्व्यसननिरता न कदाचिदपि परित्यजन्ति तानि तथा न कदाचिदपि नैत्यिकाद्यनुष्ठानं नानुतिष्ठतीति भावः । व्यसनपदस्वारस्येन चैतदेवैकं व्यसनं ननु मद्यपानादिव्यसनमिति ध्वन-यति । **महान्**=विशालः, **आत्मा**=जीवात्मा येषां ते । आत्मनि महत्त्वञ्च निर्दूष-णत्वम् । नित्यशुद्धबुद्धमुक्तस्वभावो हि जीवः कर्मपाशबद्धोऽशुद्धाज्ञबद्ध इव लक्ष्यते, स्ववर्णाश्रमोचितकर्त्तव्यव्रातसमनुष्ठानेन चाज्ञानहाने **स्वस्वरूपं** परिचिनोति ।

तत्र त एवाधुना वीथीषु, राजपथेषु, तडाग-तटेषु, उद्यानेषु, विपणिषु, समाजेषु च, महामांस-डक्कार-पूतिगन्ध-सम्बन्धान्धीकृत-पारिपार्श्विकैः, चिर-जलानवगाहनोद्भूत-महामलावलि-मलीमसैः, मद्य-स्वेद-निष्ठ्यूत - कर्णकिट्ट-सिङ्घाण-दूषिकादि-विविध-मल-लिप्त-चिराक्षालित-मलिन-वसनैः, वारवधूच्छिष्ट-भोजिभिः, दुराचार-हतकैरवहेल्यन्ते, अवधीर्यन्ते, गालि-प्रदान-पुरःसरं तिर-

---

तत्र कृतश्रमाश्च महात्मान इत्युच्यन्ते। अथवाऽऽत्मपदमन्तःकरणपरमाश्रित्य ऋजुवृद्धिमादाय व्याख्येयम्। **सप्रश्रयम्**=सनम्रतम्। **सस्तवम्**=स्तुतिपूर्वकम्। **प्राणम्यन्त**=समभिवाद्यन्त। कर्मणि प्रत्ययः। **वीथीषु**=लघुपथेषु। "गल्ली" इति हिन्दी। **समाजेषु**=मानवसङ्घेषु। **महामांसस्य**=गोमांसस्य, **डक्कारैः**=उद्गारैः, "डेंकार इति हिन्दी", यः **पूतिगन्धः**=दुर्गन्धः, **तत्सम्बन्धेन**=तत्संसर्गेण, **अन्धीकृताः**=व्यर्थचक्षुष्कीकृताः, **पारिपार्श्विकाः**=समीपवर्तिनः, यैस्तैः। **चिरजलानवगाहनेन**=बहोः कालाद्वारिस्नानाभावेन, **उद्भूतानाम्**=सञ्जातानाम्, **महामलानाम्**=अतिमलिनतानाम्, **आवलिभिः**=पङ्क्तिभिः, **मलीमसैः**=मलिनैः। **मद्यस्वेदः**=सुराघर्मः। **निष्ठ्यूतम्**=थुत्कारः। **कर्णकिट्टम्**=कर्णमलम्। **सिङ्घाणम्**=नासिकामलम्। **दूषिका**=नेत्रयोर्मलम्। परस्परमेतेषु द्वन्द्वः। एतदादिभिः, **विविधैः**=नानाप्रकारैः, **मलैः लिप्तानि**=व्याप्तानि, **चिरात्**=बहोः कालात्, **अक्षालितानि**=अधौतानि, अत एव च **मलिनानि**=अत्यधिकमलिनताभाञ्जि, **वसनानि**=वस्त्राणि, यैषां तैः। बीभत्सरसः। **वारवधूनाम्**=वेश्यानाम्, **उच्छिष्टानि**=भुक्तावशिष्टानि, भोक्तुं शीलं येषां तैः। **दुराचारहतकैः**=आचारविरहितैः पापिभिः। **अवहेल्यन्ते**=तिरस्क्रियन्ते। **अवधीर्यन्ते**, इत्यपि तदर्थकम्। तिरस्कारातिशयद्योतनाय

स्क्रियन्ते, कचन ताड्यन्ते, निःसार्यन्ते च।

"अहह! सम्प्रति बहवः सरोदनं सकष्टं तिलकादिधारण-मर्य्यादां त्यक्तवन्तः, अपरे च व्याघ्र-वदनाघ्राण-साहस-सोदर्य-साहसोपबृंहिताः, कृपाण-धारास्विव धावन्तः, प्राणानगणयन्तोऽधुनाऽपि "हरे कृष्ण! दामोदर! महादेव! राधावर! सीताराम! नारायण! वामन! वैकुण्ठ! रमापते! गौरीपते!" इत्यादीनि कलिमल-मथनानि, अधरीकृत-सुधा-माधुर्याणि, सवीणा-वादं

त्रितयप्रयोगः। **ताड्यन्ते**=हन्यन्ते। **निःसार्यन्ते**=बहिः क्रियन्ते, गेहादिभ्यः। स्थानशून्याः क्रियन्त इति यावत्।

व्याघ्रवदनाघ्राणम्=शार्दूलमुखकवलनम्, एव **साहसम्**=बलकर्म, **तत्सोदर्यम्**=तत्समानोदरे शयितम्, तुल्यमिति यावत्, **यत्साहसम्**=बलकर्म तेन-**उपबृंहिताः**=संवलिताः, व्याघ्रमुखनिपतनेऽपि भयशून्या इति यावत्। **कृपाण-धारासु**=असिधारासु। **धावन्तः**=त्वरया गच्छन्तः। अतिशयोक्तिर्लोकोक्तिश्च। हरति पापानीति-हरिस्तत्सम्बुद्धौ **हे हरे!**, **"हरिर्हरति पापानि दुष्टचित्तैरपि स्मृत"** इति पुराणम्। कृषतेर्नङि कृष्णः, पापानि कर्षतीति व्युत्पत्तिः। पौराणा अपि **"कृषिर्भूवाचकः शब्दो नो निवृत्तेश्च वाचकः। तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयत"** इति वदन्तो जन्मकारणीभूतकर्मबन्धनप्रहाणपरतामेव दर्शयन्ति। **दाम**=रज्जुः, उदरे=कटौ, यस्य तत्सम्बुद्धौ। कृष्णो बद्धो गोपिकया यशोदयेति ब्रह्मवैवर्त्तादिषु स्फुटम्। सीतया सहितो रामः **सीताराम**स्तत्सम्बुद्धौ। मायाप्राबल्यबोधनाय सीताशब्दस्याद्यता। **नारायण**!="**आपो नारा इति प्रोक्ता आपो वै नरसूनवः। ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः"**। **वैकुण्ठ**!=विष्णो! "वैकुण्ठो विष्टरश्रवा" इत्यमरः। **कलेः**=तुरीययुगस्य, **मलानाम्**=पापानाम्, **मथनानि**=दूरीकरणानि। **"हरेर्नामैव नामैव नामैव गतिरन्यथा।**

नारदेन रसनीयानि, भगवन्नामान्युच्चारयन्तः, कलित-परम-पवित्र-वेषाः, सहमाना अपि वाचटानामरुन्तुदा वाचः, कथं कथमपि स्वधर्मं निर्वहन्ति।

अहह! धिगस्मान्! ये दुराचाराणामीदृशमात्म-धिक्कार-मीक्षामहे, सहामहे, जीवामश्च। म्लेच्छा एव भारत-साम्राज्य-सिंहासनमधितिष्ठन्तु, धर्मेण च शासनमूररीकुर्वन्तु। "नराणां च नराधिपः"-इति मुद्रया स्वभाव-सिद्धाऽस्माकं राजभक्तिरुद्रेक्ष्यति;

कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा"। अधरीकृतम्=निम्नीकृतम्, सुधाया, माधुर्यं यैस्तानि। नारदेन=ब्रह्मसूनुना परमभागवतेन। मनस एव नारदसंज्ञा पौराणिकैः कृता, तस्य च चञ्चलत्वमभिलक्ष्यैकत्रास्थायित्वं द्विघटीतोऽधिककालं शापादिना प्रतिपादितमिति पुराणमतदीपिकायामस्माभिः स्पष्टीकृतम्। रसनीयानि=सरसास्वादं गेयानि। कलितपरमपवित्रवेषाः=स्वीकृतातिपूतनेपथ्याः। वाचाटानाम्=असद्वहुभाषिणाम, "आलजाटचौ बहुभाषिणि"। "कुत्सित इति वक्तव्यमि"त्येतत्सूत्रस्य वार्त्तिकम्। सम्यग् यो बहु भाषते स तु वाग्मी। अरुंषि तुदन्तीत्यरुंतुदाः=मर्मवेधकाः। "अरुन्तुदस्तु मर्मस्पृगि"त्यमरः।

दुष्टा आचारा येषां तेषां-दुराचाराणाम्=सदाचारविरहितानाम्। ईक्षामहे=पश्यामः। दर्शकास्तूदासीना अपि भवन्तीति सहामहे। अथ किमपि कर्तुमशक्नुवानैः सोढव्यमेव-तत्राह जीवाम इति। अशक्तैर्जीवनं त्याज्यम्। "सतां माने म्लाने मरणमथ वा दूरसरणमि"ति हि मनस्विगता प्रतीतिः। म्लेच्छाः=अपशब्दभाषिणः। असंस्कृतभाषाभाषिण इति यावत्। धर्मेण=मानवादिप्रदर्शितशासनविधानेन। स्वभावसिद्धा=प्राकृतिकी। भारतीया हि प्रायः प्रकृत्या राजप्रवणा आसन्। यद्यपि समये समये दुष्टराजमारणमपि कृतमेव तैः-

किन्तु केयं व्यर्थं प्रजा-हत्या, लुण्ठनम्, बलात्कारश्च, नहि लुण्ठकेषु कस्याऽपि प्रीतिर्भवति।

अहह! ग्रहा एव प्रतिकूलाः, विधिरेव वामः, समय एवाशुभमयः, अदृष्टमेव निकृष्टम्, भवितव्यमेव निन्दितव्यम्, भारतवर्षस्य। अन्यथा को वा भटम्मन्यो भारतीय-क्षत्रियाणां बालस्यापि क्रीडा-चन्द्रहास-चमत्कारमतिसोढुमलम्। परन्त्वैक्यमेव न भवत्यस्मदेशीयानाम्, यदि नाम सर्वेऽपि भारताभिजन-वीर-वराः सह युञ्जेरन्, तद्वयं क्षणेन पारावारमपि मरूकुर्मः, बन्धुभिरपि कृत-वैरस्य महानीचस्यैतस्य मर्दनं तु को नाम कठिनो व्यापारः। परन्तु राजपुत्र-देशीय-महाराजानामन्यतमः प्रधान-वीरोऽयं महाराजो मरु-धराधीश्वरो यवनानामेव पार्श्व-ग्रहतामङ्गीकृत्य, अस्माभिरेव सह योद्धुं ध्वजानुद्धृय, पुण्यनगरनेदीयस्येव प्रकाण्ड-भूभागे, शिबिराण्यधितिष्ठति। राजपुत्र-गण-शिरोमणिरामेर-देशाधीशश्च दिल्लीश्वरस्यैव पृष्ठ-पोषकः, अयोध्या-प्रान्तस्थाः क्षत्रिय-केसरिणश्च पूर्णतया परवन्तः संवृत्ताः—इति श्रूयते। कोङ्कण-देशे

यथा वेनेतिवृत्ते मनुर्नैव प्रदर्शिते स्पष्टम्। लुण्ठकेषु=राजनामधारिषु चौरेषु।

ग्रहाः=शनैश्चरादयः। विधिः=दैवम्। अदृष्टम्=भागधेयम्। नहि सर्वज्ञातिरिक्तः कोऽपि द्रष्टुं शक्नोति तत्। भवितव्यम्=अवश्यभावि। नीलकण्ठनम्रत्वादिना तदवार्यता स्फुटा। आत्मानं भटं मन्यत इति भटम्मन्यः। "आत्ममाने खश्च"। क्रीडाचन्द्रहासचमत्कारम्=लीलाखड्गसञ्चालनकौतुकम्। मरूकुर्मः=शुष्कतामापादयामः। पार्श्वग्रहताम्=पक्षपातिताम्। प्रकाण्डभूभागे=विशालप्रदेशे। आमेरदेशाधीशः=अम्बराधिपतिः। क्षत्रियकेश-

तु विजयपुरादीनां प्रधानतम-स्थानानां यवना एवाध्यक्षाः, वङ्गदेशे तु प्रायः क्षत्रिया एव न सन्ति. सन्तोऽपि च युद्ध-विद्यां न जानन्ति। केवलमेक आयुष्माञ्छिववीर एव धर्मं बलात्कारमेतमसहमानः सर्वदा यवनैर्युद्धाय सज्जति. न चैतस्य ऋते परमात्मनः कोऽपि साहाय्यं विदधाति।

हा भारत! किं लुण्ठकैरेव भोक्ष्यसे? हा वसुन्धरे! किं दीन-प्रजानां रक्तैरेव स्नास्यसि? हा सनातनधर्म! किं विलयमेव यास्यसि? हा चातुर्वर्ण्य! किं कथावशेषमेव भविष्यसि? हा मन्दिर-वृन्द! किं धूलिसादेव सम्पत्स्यसे? हा साङ्गवेद! किं भस्मतामेव प्राप्स्यसि? अहह!! धिग् धिग्! रे! कलिकाल! यस्त्वं रक्षकानेव भक्षकान् विदधासि!

हन्त भगवन्! महति दुराचारे प्रवृत्तेऽवतरामीति प्रतिज्ञातवानसि, तत्किमितोऽप्यधिकं दुराचारमपेक्षसे? अहह!! परः-कोटयो मूर्त्तयो भज्यन्तेः असङ्ख्यानि मन्दिराणि भूमिसात्क्रियन्तेः

रिणः=सिंहविक्रमा राजानः। परवन्तः=पराधीनाः। प्रायः क्षत्रिया एव न सन्ति,

अङ्ग-वङ्ग-कलिङ्गेषु सौराष्ट्र-मगधेषु च।
तीर्थयात्रां विना गत्वा पुनः संस्कारमर्हति॥

इति पतितजननिवेद्यमान-नवीनतमधर्मशास्त्राभास-श्लोकादिदुःश्रवणफलमिदमिति सञ्चिन्त्यम्। अवतरामि=मानवे लोके गृहीतदेहो भवामि।

"यदा यदा हि धर्मस्य ग्लानिर्भवति भारत!।
अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यहम्॥

राशीकृतानि वेदादि-पुस्तकानि ज्वाला-जालैर्ज्वल्यन्ते; कुलीनानामपि कन्यकाः कदर्य्यहतकैः कुत्सिताभिप्रायेण बलादाच्छिद्यन्ते, शिरश्छेदानाम्, नयनोत्पाटनानाम्, करकर्तनानाम्, जिह्वाकर्षणानाम्, उदरविदारणानाम्, शूलारोपणानाञ्च क्रीडा इव क्रियन्ते । याः प्रजाः पूर्वं राजभिरौरस-प्रजा इव प्राणाधिक-प्रेम्णा समपाल्यन्तः ता अधुना निरर्थं निर्दयं लुण्ठ्यन्ते, पात्यन्ते, घात्यन्ते ज्वल्यन्ते च । अहह ! नाधुनाऽपि तव हृदये दया संचरति ? भगवन ! किमिति दीनबन्धु-पदेन सम्बोध्यसे ? यासां भारतीय-प्रजानां दीनतामवलोक्य, ग्रावाणोऽपि रुदन्ति, तासामुपरि करुणामयीं दृष्टिमपि न क्षिपसि ? हन्त ! कियच्छयिष्यसे ? अहह ! अस्माकं महाक्रन्दन-कोलाहलैरपि न विद्राव्यते तव निद्रा ? हा ! तवापि कथं व्यामोहः ? गरलं तु धूर्जटिना पीतम्, मधु च दानवैरास्वादि, किं तु चित्रं यद्, एष विलक्षणस्त्वयि दृश्यते व्यामोहः, त्वं हि राजत-प्रासादो वा, क्षीर-सागरो-वा, दन्ति-दन्त-पर्यङ्को

इति हि भगवदीया प्रतिज्ञा । **कदर्य्यहतकैः**=पापात्मभिः । **कुत्सिताभिप्रायेण**=बलात्कारकरणाभिलाषेण । उरसा जाता औरस्यः, ताश्च ताः प्रजा **औरसप्रजाः**=स्वोत्पन्नसन्तानानि । "हृदयादधिजायस" इति श्रुतिः । इवेनोवमा । **लुण्ठ्यन्ते घात्यन्ते पात्यन्ते ज्वल्यन्ते च**, क्रियादीपकमलङ्कारः । **ग्रावाणोऽपि रुदन्ति**, अतिशयोक्तिः । **गरलम्**=विषम् । **धूर्जटिना**=शम्भुना । **मधु**=मद्यम् । **आस्वादि**=कवलीकृतम् । **व्यामोहः**=मदातिरेकजन्या विचारशून्यता । कार्यकारणयोर्भिन्नदेशत्वादसङ्गतिरलङ्कारः । रजतस्य विकारो राजतः, स चासौ **प्रासादः**=हर्म्यम् । **क्षीरस्य** सागरः । **दन्तिदन्तस्य**=

वा, कुण्डलितानन्तभोगाऽऽभोगो वा, इति किमपि न वेवेक्षि। अगणित-फणावलि-फूत्कृतैरिव वीज्यमानः, विमल-कमलोदर-सोदर-सौन्दर्याभ्यां कमल-कोमल-कमला-करतलाभ्यां पादयोः पीड्यमानः, निःशङ्कं तस्मिन्नेव कोमलतमवेषे शेषे शेषे। तत्किं जगतः शेषे, तव निद्रया भङ्क्ष्यते? अथवा तस्यैव महागरलस्य

करिकरस्य, **पर्यङ्कः**=पल्यङ्कः। **कुण्डलितः**=कुण्डलाकृतिमुपगतः, **अनन्तभोगः**=शेषदेहः, स एव **आभोगः**=अधिष्ठानम्। **वेवेक्षि**=पृथक्पृथग् विचारयसि। "विजिर् पृथग्भावे"। इतिना निपातेनाभिहितत्वान्न राजतप्रासादादिकर्मसु द्वितीया। एषु टीकाकृतां बहुव्रीहिप्रदर्शनं किमर्थकमिति बुद्धिमद्भिरवधारणीयम्। **अगणितैः**=असंख्यातैः, **फणावलीनां फूत्कृतैः**=फूत्कारशब्दैः। **वीज्यमान इव**=आसेव्यमान इव। उत्प्रेक्षा। **विमलस्य**=निर्मलस्य, **कमलस्य**=पद्मस्य, **उदरसोदरम्**=मध्यतुल्यम्, **सौन्दर्यम्**=सुषमा, ययोस्ताभ्याम्। कमलवत् कोमलाभ्यां **कमलायाः**=लक्ष्म्याः, करतलाभ्याम्। **निश्शङ्कम्**, अनेन फणावलिवायुसोदना ध्वनिता। **कोमलतमः**=नितान्तमृदुः, **वेषः**=नेपथ्यं, यस्य तस्मिन्। वेषमात्रं कोमलं कृत्यन्तवकोमलमिति ध्वनिः। **शेषे**=अनन्ते, **शेषे**=स्वपिषि। अगणितैरित्यारभ्यानुप्रासः शब्दालङ्कारः। विमलकमलोदरसोदरसौन्दर्याभ्यामित्यनेन कमलाकरतलयोर्लालित्यमीषद्रक्तवर्णत्वञ्च व्यञ्जितम्, कमलकोमलेत्यनेन च मृदुत्वम्, कोमलतमाभ्यामपि ताभ्यां सम्पर्के भगवच्चरणयोः पीडैव सञ्जायते नितान्तकोमलत्वादिति पीड्यमानपदनिवेदितत्वम्, एवञ्च द्विधाऽभिधानसार्थक्यं वेदितव्यम्। ये तु पदार्थपौनरुक्त्यप्रदर्शनं मनीषां क्षपयन्ति ते दोषान्वेषणमात्रपटुबुद्धयो न कस्य नमस्याः। **जगतः**=संसारस्य। **शेषे**=समाप्तौ। **भङ्क्ष्यते**=नङ्क्ष्यते। "भञ्जो आमर्दने"। कर्मणि

महामद्यस्य च भगिन्या कनकाङ्गिन्या समालिङ्गित इति पन्नग-कुल-मूलस्य शेष-नागस्य गरलावलीढैर्निश्वासैः प्रतिरोम-कुहरं रञ्जित इति च कलयसि काञ्चन मूर्च्छाम्, मत्ततां च । कथमन्यथा क्षीरधिवेष्टित एव क्षीरधि-कन्यया रमेथाः ? किं तु मैवम्, क्षमस्वैनामनल्प-जल्प-कल्पनाम्, सर्वत्रैवासि, सर्वान् पश्यसि, सर्वं वेत्सि, सर्वेषु दयसे-इति सन्त्यत्र परःसहस्राणां प्रामाणिकानां वचनानि । येषु विश्वस्य तव सत्ताऽङ्गीक्रियते, कथं तेष्वेव विश्वस्य तवेदृग्गुणिता नाङ्गीकरिष्यते ? । परमहह ! पश्यन्नपि विदन्नपि

तद् । तस्यैव=पुराणादिषु सुप्रसिद्धस्यैव । महागरलस्य=सागरोत्थस्य हालाहलस्य । महामद्यस्य=वारुण्याः । भगिन्या=सहोदरया । समुद्रमन्थने हालाहलादिभिः सार्कं लक्ष्मीरपि निःसृतेति पुराणेषु स्पष्टम् । कनकाङ्गिन्या=सुवर्णशरीरया । अतिगौरवर्णयेति यावत् । "धत्तूरः कनकाह्वय" इति धत्तूरवाची कनकशब्दः । धत्तूरवद्विषमिश्रिताङ्गयेति ध्वन्यमानोऽर्थः । इति=हेतोः । मूर्च्छां मत्तताञ्च कलयसीत्यनेन सम्बन्धः । इतरथा हेतुमाश्रयति-पन्नगकुलमूलस्य=सर्पान्वयप्रसूतेः । शेषनागस्य=अनन्तस्य । गरलावलीढैः=विषमिश्रैः । प्रतिरोमकुहरम्=सर्वेषु लोमच्छिद्रेषु । रञ्जितः=व्याप्तः । काञ्चन=अनिर्वाच्याम् । केवलानुभवैकशरणाम् । पित्रा वलयितस्य तत्कन्यकया रमणं मत्तताकृत्याज्ञातिरिच्यते । अनल्पजल्पकल्पनाम् =बहुविधभाषणरचनाम् । शब्दमात्रार्थिकेयं कल्पनेति हृदयम् । सर्वत्रैवासि=विभुत्वात् । सर्वान् पश्यसि=सर्वद्रष्टृत्वात् । सर्वं वेत्सि=सर्वज्ञत्वात् । अत्र=विभुत्वसर्वज्ञत्वादिगुणगणनिलयस्य भगवतः सत्तायाम् । प्रामाणिकानाम्=वेदादीनाम् । नाङ्गीकरिष्यते, यदि वेदादिनिवेद्यमानास्तदीया सत्ता सती, तर्हि तन्निवेद्यमानास्तदीया गुणा अपि सन्त्येवेति तात्पर्यम् ।

न दयसे, हन्त ! किं कथ्यते, जगदीश्वरोऽसि ! तत् किं गजोद्धार-धावन-स्थगितोऽसि ? यन्न धावसि, विप्र-रावण-हनन-वनवास-व्रीडितोऽसि ? यन्नावतरसि, कंसच्छेदनायास-स्मरणेन वा तूष्णीकोऽसि ? चिरन्तन इति वली-पलित-विग्रहो वा सम्पन्नोऽसि, न ज्ञायते तत्त्वम्। यादृशस्त्वं तादृशमेव त्वां वयं नमस्कुर्मः।

हा विश्वम्भर ! काश्यां विश्वनाथ-मन्दिरं धूलीकृतमेतैः। हा माधव ! तत्रैव बिन्दुमाधव-मन्दिरस्य बिन्दुमात्रमपि चिन्हं न प्राप्यते ! हा गोविन्द ! तव विहार-भूमौ श्रीवृन्दावने गोविन्द-देव-मन्दिरस्यापीष्टिकावृन्दं स्वच्छन्दं भषकैराक्रम्यते। प्रभो ! दयस्व, कदा तव कौमोदकी मोदं जनयिष्यति ? कदा तव चाप-स्तापं विलयं यापयिष्यति ? कदा तव नन्दको नन्दयिष्यति ?

जगदीश्वरोऽसि=महाप्रभुरसि। महाप्रभुत्वादेव स्वतन्त्रोऽसीत्यत एव च युक्तायुक्तविचारशून्योऽपि वचनानर्होऽसीति व्यङ्ग्यपरम्परा।

पाणिनेनं नदो गङ्गा यमुना न स्थली नदी।
प्रभुः प्रभुत्वमापन्नः स्वातन्त्र्यमवलम्बते॥

इत्यादिध्वयमर्थो व्यक्तीकृतः। **गजोद्धारे**=हस्तिरक्षायाम्, **धावनेन**=शीघ्र-गत्या, **स्थगितः**=खिन्नः। **विप्रस्य**=ब्राह्मणस्य, **रावणस्य**=पौलस्त्यस्य, हननेन वनवासेन च **व्रीडितः**=लज्जितः। ब्रह्महत्या हि परं व्रीडाजनिका। **चिरन्तनः**=पुरातनः। **वलीपलितविग्रहः**=जराजायमानश्चैत्योपलक्षितदेहः। **न ज्ञायते तत्त्वम्**, अतिदुरूहत्वाद्भगवन्मायायाः। विश्वम्भर-माधव-गोविन्दादीनां सम्बाधनीयपदानां साभिप्रायत्वम्, विश्वनाथमन्दिर-बिन्दुमाधवमन्दिर-गोविन्ददेव-मन्दिरादिभिः साकञ्च परं वैशिष्ट्यमित्यलङ्कारिता वेदितव्या। **भषकैः**=कुक्कुर-तुल्यैर्म्लेच्छैः। **कौमोदकी**=भगवद्गदा। **चापः**=शार्ङ्गम्। **नन्दकः**=भगव-

कदा तव चक्रं दुष्टचक्रं चङ्क्रमिष्यते ? मा स्मास्मदपराधान स्मार्षीः। पाहि, पाहि, भगवन् ! पाहि—

एवं भावयत एव तस्यान्तर्दुःखमिव जलरूपेण द्रावयन्ती, कपोलं क्षालयन्ती, श्मश्रुग्राद् बिन्दूभूय, कूर्चं सिञ्चन्ती, भूतलमाविलं चकाराश्रु-जल-धारा।

तं तथा ध्याननिष्ठमिव यवन-यतिं मन्यमानाः, बहवोऽध्वन्याः, परितोऽवातिष्ठन्त। एक ऊचे—महानेष महात्मा, अपर उवाच—अत एव भगवत्स्मरणेन पुलकितः। अन्योऽभाषत—ईदृश एव विचित्रो भवत्यानन्दः परमात्मस्मरणतः, तथेतरोऽब्रूत—तर्हि सर्वं स्तृष्णीकैरेव स्थेयं न स्याद् यथा ध्यानभङ्ग एतस्य—इति मन्दस्वरेणाऽऽलपतामेवैतेषां तस्य ध्यानभङ्गो जातः। नेत्रे उन्मील्य च, भावना-सहस्रैर्येषु वर्द्धित-महामर्ष-ज्वाला-जटाल आसीत्, तानेन-

---

स्खड्गः। चक्रम्=सहस्रारं सुदर्शनम्। दुष्टचक्रम्=दुष्टसमूहम्। अत्र अहह कथमिव समायात" इत्यारभ्य करुणरसप्रवाहः। धर्मध्वंसन-मूर्त्तिखण्डन-भारतीयपीडनादयो विभावाः। दैवोपालम्भनिःश्वासवैवर्ण्यादयोऽनुभावाः। निर्वेद-ग्लान्यादयो व्यङ्ग्यतया स्थिता व्यभिचारिणः। एतैरभिव्यक्तोऽसौ चर्वणतामेतः।

तदास्वादनिरतदशां दर्शयति—एवं भावयत इति। भावयतः=भावनया चित्तगोचरतां नयतः। कूर्चम्=दाढिकां।

ध्याननिष्ठम्=समाधिनिरतम्। अध्वन्याः=पथिकाः। परितोऽवातिष्ठन्त=परिवारितवन्तः।

पुलकितः=रोमाञ्चितः। भावनासहस्रैः=बहुविधविचारधाराभिः। येषु=यवनेषु। वर्द्धितस्य=वृद्धिं प्रापितस्य, महामर्षस्य=महाक्रोधस्य, ज्वालाभिः=

वापश्यत्–लशुन–गन्धैः श्वास–प्रश्वासैर्वमिमुत्तेजयतः, परिपन्थि-पथिकान। ततो द्विगुणितकोपो ज्वलदङ्गार–प्रतिम–नयनो वाद्य-मुत्तोल्य, सहुङ्कारं ताडयितुमिवोदस्थात। तेषु चेतस्ततः पलायन-परेषु शास्तिखान–भवनान्निवृत्तो महादेव–पण्डितोऽप्यकस्मादुप-स्थाय, "किमिव स्वामिन! किमिति कुपितोऽसीति" पर्य्यप्राक्षीत, स तु तमेव ताडयितुमिव वाद्यमुदतुलत्, महादेवस्तु भीत इव पलायितः काञ्चन महान्धकारावृत–वीथिं प्रविष्टः, तत्पश्चादेव चायमपि तस्मिन्नेवान्धकारसमुद्रे निमग्नः।

प्रधान–मार्गमपहाय, ध्वान्त–मार्गेण सानुसन्धानं प्रतिनिव-र्त्तनमेव महादेवस्यार्भीष्टमासीत्। तदेव च मुद्रयाऽनयाऽनायासेन सम्पन्नम्।

अर्चिर्भिः, जटालः=संवलितः। लशुनस्य=रसोनस्य गन्धो येषु तैः। वमिम्=उद्गीर्णम्। परिपन्थिपथिकान=मार्गस्थतस्कराध्वनीनान्। ज्वलता=दीप्यता, अङ्गारेण प्रतिमे=तुल्ये, नयने यस्य सः। उत्तोल्य=उत्थाप्य। सहुङ्कारम्=हुंशब्दसहितम्। ताडयितुम्=हन्तुम्। अकस्मात्=सहसा। पर्य्यप्राक्षीत्=पृष्टवान्। तमेव=महादेवपण्डितमेव। अन्योन्यानभिज्ञानबोधनायेदम्। भीत इव, इदमपि प्रदर्शनफलकम्। महता=प्रबलेन, अन्धकारेण=तमसा, आवृ-ताम्=सच्छन्नाम्, वीथिम्=पदवीम्। "वीथिः पङ्क्तौ गृहाङ्गे च रूपकान्तरवर्त्म-नारि" ति मेदिनी।

प्रधानमार्गम्=राजपथम्। ध्वान्तमार्गेण=अन्धकारच्छन्नेन पथा। सानुसन्धानम्=गम्भीरावलोकनपुरस्सरम्। मुद्रयाऽनया=अनेन प्रकारेण व्याजात्मना। अनायासेन=निष्परिश्रमम्।

ततस्तु वीथिकातो वीथिकाम्, मार्गान्मार्गमुल्लङ्घमानः, सपद्येव दूरमायातः । अथ महादेवः, स्थित्वा कञ्चित्कालं, यवनयतिमपेक्षाञ्चकार । तस्मिन्नानागच्छति चान्धकारे मार्गभ्रष्टोऽयमन्यतो गत इति निश्चित्य, आस्तां तावत् सङ्केतितस्थले तेन सह योक्ष्यामीति मनस्येवावधार्य, निर्भयोऽन्धकार एव नगरस्य वर्त्तमान-दशामवलोकयन्निव प्रचलितः ।

अस्मिन्समये प्रायश एतद्वीथि-वासिनः सर्वेऽपि सुप्ताः, द्वारो रुद्धाः, स्थाने स्थाने विचरन्तः प्रहरिणो वा तदुच्चाह्वानोद्बुद्धा अट्टालिकासु पिञ्जरावलम्बिताः शुकसारिकादयो वा क्वचित् क्वचित् शब्दायन्ते । सर्वतः सरणिषु ससणत्कारं समीरणः सरति ।

गाढोऽयमन्धकारः कज्जलस्य रेणु-पटलमिव सर्वत उड्डीयते । गगनं मसिमिव वर्षति । महादेवस्तु परिचित-सकलपुण्यनगर-मार्ग-जालः, वीथिकान्तरं प्रविष्टः, पूर्वं पूर्णतया पर्य्यटितचरमिदं नगरमिति-अन्धतमसेऽपि सुखेन पर्य्यटितुमशकत् । तत्रै-

यवनयतिम्=म्लेच्छभिक्षुवेषं माल्यश्रीकम् । **अनागच्छति**=अप्राप्नुवति । **योक्ष्यामि**=युक्तो भविष्यामि । **तेषाम्**=प्रहरिणाम्, **उच्चेन**=तारेण, **आह्वानेन**=शब्दप्रयोगेण, **उद्बुद्धाः**=विरहितनिद्राः । **सरणिषु**=मार्गेषु । **समीरणः**=वायुः । **सरति**=गच्छति ।

कज्जलस्य=अञ्जनस्य । **रेणुपटलम्**=धूलिनिकरम् । इवेत्युत्प्रेक्षा । मसिमिवेत्यत्रापि । **परिचितम्**=पूर्वज्ञातम् , **सकलम्**=समस्तम् , पुण्यनगरस्य **मार्गजालम्**=वर्त्मसमूहो येन सः । **अन्धतमसे**=गाढान्धकारे । **पर्यटितुम-**

कस्मिन् गृहे, गोक्षे दीप एको मन्दं मन्दं ज्वलति। तस्मिन्नवतमसे तत एव गच्छन्, तद्वार-सम्मुख-द्वार-वेदिकायामेकत्रीकृतमन्धकारमिव, मूर्छितं भल्लूकमिव, सुप्तं वायस-समूहमिव, राशीकृतं कृष्ण-सर्प-सङ्घातमिव, आकुञ्च्य स्थापितं कृष्ण-कम्बलमिव च किमपि श्याम-श्याममद्राक्षीत्। निकट आगत्य, निपुणं निरीक्षमाणश्च दृष्टवान्,-यदेकः प्रहरी स्वपिति, दिल्लीश-नामाङ्कित-रजत-पट्टिका-भूषितं तस्योष्णीषमेकतोऽर्द्धस्खलितं विशीर्यते, खड्गः शिरसः समीपे दूरत एव स्थापितोऽस्ति, उपानदेका वेदिका-प्रान्त-लम्बित-पाद-च्युता, अधः पतिता, मुख-निर्गताभिर्लालाभिः सिक्तो बाहुः, धूलि-धूसरितानि नील-वसनानि च, स्वेदैराक्लिद्यन्ते।

शकन्=भ्रमितुं समर्थोऽभूत्। गोक्षे=गवाक्षे। व्यवस्थितविभाषात्वं कविप्रौढ्यानासृत्येदम्। ज्वलन्ति, स्मेत्यध्याहृत्येदृशेषु स्थलेषु व्याख्येयम्। तात्कालिकीं वर्त्तमानतामाश्रित्य वा प्रयोगः। एवमन्यत्रापि। यथा पञ्चतन्त्रे "अस्ति गोदावरीतीरे विशालः शाल्मलीतरुरि"त्यादि। अस्तीत्यस्य विभक्तिप्रतिरूपकस्याव्ययस्य सर्वकालप्रयोगविषयस्य सत्त्वे तु तत्र निर्वाहेऽप्यत्र प्रकृतोक्तरीत्यैव कार्यमिति वेदितव्यम्। तस्मिन्नवतमसे किमपि श्यामश्याममद्राक्षीदिति सम्बन्धः। उत्प्रेक्षते-**एकत्रीकृतमन्धकारमिव**। **मूर्च्छितम्**=निश्चेष्टं शयानम्। **आकुञ्च्य**=एकत्रीकृत्य। दिल्लीशनाम्नाऽङ्किता रजतनिर्मिता **पट्टिका**="पेटी" इति भाषा, तया भूषितम्। **एकतः**=एकस्मिन् पार्श्वे। सार्वविभक्तिकस्तसिल्। **अर्धस्खलितम्**=अर्धभ्रष्टम्। **विशीर्यते**=प्रसरितमस्ति। **उपानत्**=पादुका। "अथ पादुका। पादरुपानत् स्त्री" त्यमरः। **वेदिकायाः**=उपवेशस्थानस्य, **प्रान्ते**=निम्नभागे, लम्बतात् **पादात्**=अङ्घ्रेः. **च्युता**=पतिता। **लालाभिः**=सृणिकाभिः। "सृणिका

तदालोक्य, किञ्चिद्वसन्निव, महादेवो–"मूर्खोऽयं यातैक–यामा-यामेव यामिन्यां सुप्तः"—इति मनस्येवोक्त्वा, शनैस्तस्योष्णीषं खड्गं चापजहार ।

ततश्च दक्षिणतो वाणिग्वीथीं प्रविश्य, यावत् किञ्चित् प्रयातिः तावत् पृष्ठतः ममश्राव कञ्चिन पादध्वनिः । दत्तकर्णोऽवधार्य च· संशयितवान् यत–किमेतदपहरन्तं मां कोऽप्यद्राक्षीत् ?

अथ दिल्लीश–नामाङ्कित–रजत–पट्टिकामादाय, कक्ष–गुटिकायां संस्थाप्य, उष्णीषिकामेतामेकस्यां गवाक्षिकायामुत्क्षिप्य , खड्गं कोषान्निस्सार्य· स्वयमेकस्मिन निबिडान्धकारे कोणे, परिपन्थिनः पन्थानमवेक्षमाणः समस्थित । ततो मुहूर्त्तं यावन्नाश्रयत कोऽपि ध्वनिः, निपुणं निरीक्षमाणेनापि च नाऽऽलोकि कश्चन जनः ।

ततस्तु नैज एव भ्रम इति विभाव्य, पुनरग्रे प्रातिष्ठत, न्यविशत च वीथिकातो वीथिकाम् । तावदकस्माद् वामत उपवीथिकायामेव कस्यचन जागरूकस्य, "जागृत ! भो जागृत ! संतमसमिदं निवि-

स्यन्दिनी लाले"त्यमरः । धूलिधूसरितानि=रजोमिश्राणि । स्वेदैः=घर्मजलैः । आक्लिद्यन्ते=आर्द्रीभवन्ति । यातैकयामायाम्=व्यतीतैकप्रहरायाम् ।

वणिग्वीथौ=वणिजामावासे । दत्तकर्णः=सावधानीकृतश्रोत्रेन्द्रियः । अपहरन्तम्=गृह्णन्तम् । अद्राक्षीत्=दृष्टवान् । कक्षगुटिकायाम्=कक्षि-स्थापितलघुपोटलिकायाम् । गवाक्षिकायाम =वातायनिकायाम् । कोषात्= असिबन्धनात् । निबिडान्धकारे यस्मिन् तादृशे, घनतमसि । कोणे=गृहैकदेशे, अवेक्षमाणः=प्रतीक्षां कुर्वन् । समस्थित=स्थितोऽभूत् । नैजः=स्वीयः । भ्रमः=भ्रान्तिः । न्यविशत=प्रविष्टः । उपवीथिकायाम्=उपपदव्याम् ।

ङम्" इत्याद्यामेड्य वदतस्तारध्वनिमश्रौषीत्। मा स्म मामीक्षिष्टेति च दक्षत एकामुपवीथिकां प्राविक्षत्, किन्तु दैवाद् यामिकोऽप्येष वृणाक्षर-न्यायेन तामेव प्रविष्टः।

महादेवस्तु, अग्रे रुद्धो मार्गः, पश्चाच्चोच्चैश्चीत्कुर्वन यामिक-हतकः समायातीति कान्दिशीकः, मार्गान्तरमलभमानः, उच्चामेकां वेदिकामारुह्य, निष्कोप-निस्त्रिंश-हस्तः, सतर्कः, समतिष्ठत। तावत् प्रहरी तु तथैवाऽऽम्रेडमाम्रेडं तार-स्वरेण रटन, पार्श्वस्थ-गृहिणां च कपटश्रुत-डक्कार-च्छिक्काः शृण्वन, कर-कलित-काच-मञ्जूषा-न्तःस्थ-दीप-प्रकाशेन पादाग्रस्थ-हस्त-चतुष्टयमात्र-परिमाणामिव भुवं पश्यन, अलसनयनः, "कदेयं होरा समाप्नुयात? कदा वा गत्वा शयीय?"—इतीव चिन्तयन, महादेवाध्युषित-वेदिकाया दूरादेव निवृत्तः। महादेवस्तु "नैतस्य जीवनमधुना समाप्तम्,

जागरूकस्य=जागरणशीलस्य। आम्रेड्य=द्विस्त्रिरुच्चार्य। तारध्वनिम्=उच्चैः शब्दम्। मा स्म मामीक्षिष्ट=मा स्म मामवलोकयत्। दैवात्=अदृष्टात्।

चीत्कुर्वन=चीत्कारं कुर्वन्। कान्दिशीकः=भयद्रुतः। मार्गान्तरम्=अन्यं पन्थानम्। निष्कोपनिस्त्रिंशहस्तः=नग्नखड्गकरः। सतर्कः=सावधानः। पार्श्वस्थगृहिणाम्=समीपस्थगृहस्थानाम्। कपटेन=व्याजेन, श्रुतादयः। श्रुतम्=कांसः। "खांसना" इति हिन्दी। करे=हस्ते, कलिता=धारिता, या काचमञ्जूषा=रक्तवर्त्तिका, तदन्तःस्थितस्य=तदन्तरालवर्त्तमानस्य, दीपस्य प्रकाशेन। पादाग्रस्थाम्=पुरो विद्यमानाम्, हस्तचतुष्टयमात्रं परिमाणं यस्यास्तादृशीम्=चतुर्हस्तमिताम्। अलसे=निद्रातुरे, नयने यस्य सः। होरा=घण्टा। समाप्नुयात्=समाप्तिं गच्छेत्। शयीय=स्वापं कुर्याम्। समाप्तम्,

चिरायुरेष" इति मनस्येव निर्धारयन्, पुनर्मार्गान्तरं प्रविश्य, झटित्याकुलाभ्यामिव पद्भ्यां गच्छंस्तडागमेकमाससाद। यत्र चोच्चावचायां भुवि भग्न-मन्दिरेष्वेकं शिव-मन्दिरमिव प्रविश्य, "अस्ति कश्चिदत्र संन्यासी ?" इत्यप्रच्छत। ततस्तु तस्मादेकस्स एव यवन-भिक्षुः, अपरौ च द्वौ संन्यासिनौ निर्गतौ, तैश्च सह तत्रैवैकस्मिन् पाषाण उपविश्य, बहुश आलप्य, एकेनैवं समालपत्—

महा०—उद्वाहः कदा भविता ?

संन्या०—श्वः।

महा०—अथ वरयात्रा-समयः कः ?

संन्या०—यातैक-यामायां यामिन्याम्।

महा०—कति सहचरा अनुमता नगराधिकारिभिः ?

संन्या०—वादकाद्यतिरिक्ताम्त्रिंशत्।

महा०—भद्रम्, वयमपि सह योक्ष्यामः।

तावदकस्मात्, महादेवस्य कण्ठमिव लक्ष्यीकृत्य क्षिप्तः, किञ्चिदेव लक्ष्यभ्रष्टः, कश्चिद् भयानक-भल्लः, स्कन्धे निपपात बाण एकः। स्कन्धस्थोत्तरीयवस्त्र ओत-प्रोतमिवैनमालोक्य, यावत् सर्वे

अन्यथा समीपमागच्छेत्। **तडागम्**=जलाशयम्। **उच्चावचायाम्**=निम्नोन्नतायाम्। **शिवमन्दिरमिव**, कतिपयचिह्नानुमेयशिवमन्दिरत्वम्। अत एवैवकारसार्थक्यम्। **एकेन**, साकमिति शेषः। विनापि सहार्थशब्दयोगं तृतीयेति "द्वन्द्वो यूना"निर्देशवेद्यम्।

योक्ष्यामः=सम्मिलिता भविष्यामः। **भयानकभल्लः**=तीक्ष्णाग्रभागः। बहुव्रीहिः। स्कन्धे तिष्ठतीति स्कन्धस्थं तादृशञ्चोत्तरीयवस्त्रम्=उपरि धारणीयं आवरणम्, तस्मिन्। **ओतप्रोतम्**=विद्धानुविद्धम्।

सचकितमुत्तिष्ठन्ति, तावच्छक्तिरप्येका महादेव-वक्षस्थलं चुचुम्ब, ताञ्च कञ्चुकान्तःस्थित-वर्म्माघातेन सङ्गणत्कारं परतः पतितामालक्ष्य, यावन् ते पुरतः पश्यन्ति, तावद् धृतखड्गमेकं प्रांशुं पिचण्डिलं यवनमपश्यन्।

स च—"तिष्ठ रे महाराष्ट्र-कुल-लाञ्छन! कपट-दूत! सर्वा शृणोमि ते दुर्वृत्त-वार्त्ताम्। किन्तु चान्द्रखाने जीवति, न त्वादृशा जम्बुक-वराकाः कृतकार्या भवन्ति" इत्याक्षेप्य, सचन्द्रहासः श्येन इवाभिपत्य, खड्गं तद्वाम-बाहौ प्राक्षिपत्।

परं महादेवस्तु न टिट्टाणञ् पण्डितः, किन्तु युद्ध-पण्डितः, खड्ग-विद्यायां च तथा निष्णातोऽस्ति, यथा महाराष्ट्र-देश एतस्य परःसहस्राः शिष्या अपि, निज-निस्त्रिंश-बलेन रिपूणां शतेन

सचकितम्=साश्चर्यम्। **शक्तिः**="नेजा" इति, "बरछी" इति वा भाषा। **कञ्चुकान्तः स्थितम्**=चोलकान्तर्निहितम्, यद् **वर्म**=कवचम्, तदाघातेन **सङ्गणत्कारम्**=झणत्कारशब्दसहितं यथा स्यात्तथा। **धृतखड्गम्**=गृहीतासिम्। **प्रांशुम्**=प्रोन्नतम्। **पिचण्डिलम्**=तुन्दिलम्। "तुन्दिलस्तुन्दिभस्तुन्दी बृहत्कुक्षिः पिचण्डिल" इत्यमरः।

दुर्वृत्तवार्त्ताम्=दुर्व्यवहारवृत्तान्तम्। **जम्बुकवराकाः**=दयनीयशृगालसदृशाः। **भवन्ति**, "वर्त्तमानसामीप्ये वर्तमानवद्वा"। **सचन्द्रहासः**=सासिः। **श्येन इव**=शशादन इव। "अथ शशादनः। श्येनः पत्री" त्यमरः। उपमालङ्कारः।

टिट्टाणञ् पण्डितः=व्याकरणघोषणमात्रनिरतः। **युद्धपण्डितः**=सङ्ग्रामविद्याकुशलः। **निष्णातः**=कुशलः। "निनदीभ्यां स्नातेः कौशले"। **रिपूणां**

सह योद्धुमभिमन्यन्ते। यद्यपि पाञ्चालाः, सैन्धवाः, मारवाः, राजपुत्रदेशीया अपि च, असि-चालन-विद्यायां जगत्प्रसिद्धाः सन्ति, तथा च निपतन्ति तेषां प्रबला असयः, यथा सुबहून् कदलीस्तम्भान, क्रमेलक-पादास्थीनि, किमधिकं लोह-दण्डानपि च. ते सकृदसि-क्षेपणेन निकृन्तन्ति, परं झटितिकारितेयं महाराष्ट्राणामेव। येऽतिसत्त्वरतया चन्द्रहास-चालनपरा हैहया इव, बहुबाहवः समालोक्यन्ते। सर्वत्रैव महाराष्ट्र-देशीय-वीरता-महिमा शिववीरकृत एवेति सोऽयं चञ्चल-चपला-चमत्कारमिव चपलस्वरु-सारेणेव सृष्टम्, कल्पान्त-सप्त-जिह्वस्येवैकं जिह्वा-विशेषं

शतेन सह, एकाकीति शेषः। अन्यथा परःसहस्राणां रिपुशतेन युद्धकरणं कि वैशिष्ट्यमाश्रयेत। **अभिमन्यन्ते**=अभिमानं वास्तविकं कुर्वन्ति। **पाञ्चालाः**=पञ्चालदेशराजाः। **सैन्धवाः**=सिन्धुदेशीयाः। **मारवाः**=मरुदेशीयाः। **सुबहून्**=अत्यधिकसंख्याकान्। **क्रमेलकपादास्थीनि**=उष्ट्रचरणकीकसानि। **सकृदसिक्षेपणेन**=एकवारं खड्गप्रहारेण। **निकृन्तन्ति**=खण्डयन्ति। **झटितिकारिता**=शीघ्रकरणम्। **अतिसत्वरतया**=नितान्तशीघ्रतया। **हैहया इव**=कार्त्तवीर्या इवेत्युपमा। सहस्रं बाहवो हि कार्तवीर्यस्यासन्। **बहुबाहवः**=अनेकभुजाः। महाराष्ट्रदेशीयानां वीरताया **महिमा**=महत्त्वम्। **चञ्चलचपलाचमत्कारमिव**=चपलविद्युद्विच्छुरणमिव। चपलश्चासौ **स्वरुः**=वज्रम्, "शतकोटिः स्वरुरि"त्यमरः, तस्य **सारेण**=तत्त्वांशेन। सप्त जिह्वा यस्य सः, **सप्तजिह्वः**=दहनः, ताश्च—

काली कराली च मनोजवा च सुलोहिता या च सुधूम्रवर्णा।
स्फुलिङ्गिनी विश्वरूपी च देवी लेलिह्यमाना इति सप्त जिह्वाः॥

निज-कर-कलितं महाचन्द्रहासं तथा प्राहिणोद्, यथा चान्द्रखानस्यासिं, कन्धरां च, एकेनैवाऽऽघातेन द्विरकरोत्। उक्तवांश्च यद्-"अरे रे शास्तिखान! मिथ्या-तिरस्कारेणैवाद्य यवनवीर-इमश्रुपममेतं चान्द्रखानं धर्मराजाध्वन्यध्वनीनं कारितवानसि, एक एवाऽऽसीदेष त्वत्पार्श्वे विचार्यकारी नीतिज्ञश्च, तदस्मिन मदसि-विलीढे को नाम कठिनो वारवधू-कर-शराव-चुम्बन-चञ्चुरस्य नव विजयः?"—इति।

तदालोक्य च चकितेनैव यवन-भिक्षुणा कथितं परमेष विघ्न इव विभात्यस्मद्विवाहोत्सवस्य, यतः प्रधानोऽयं राजसभायाम्, अथ एवैतद्विषये घण्टा-घोषो भविष्यति।

इति मुण्डके प्रसिद्धाः। कल्पान्ते सप्तजिह्वस्येति विग्रहः। कल्पान्तविशेषेण भीषणताऽऽधिक्यं प्रतिपादितम्। **एकम्**=अद्वितीयम्। जिह्वाविशेषमिवेन्धनमा। **निजकरकलितम्**=स्वहस्तधारितम्। **प्राहिणोत्**=अक्षिपत्। **असिम्**=चन्द्रहासम्। **कन्धराम्**=ग्रीवाम्। उत्थितहस्तस्थितासिना साकं ग्रीवाकर्तनेन सुमहद्वैलक्षण्यमसिचालने प्रदर्शितम्। **द्विरकरोत्**=खण्डद्वयमकारयत्। **अरे रे शास्तिखान!** वृद्धया सन्निधापितस्य सम्बोद्ध्यमानता। **यवनवीराणाम्**=यवनभटानाम्, **इमश्रुपमम्**=ओष्ठलोमतुल्यम्। अतिप्रधानमित्यर्थः। "यवनवीरों की मूंछ के समान" इति हिन्दी। **धर्मराजाध्वनि**=यममार्गे। **अध्वनीनम्**=पान्थम्। **विचार्य करोतीति** तथाभूतः। **मदसिना**=मद्यहेन, **विलीढे**=आस्वादिते। मारित इति यावत्। **वारवधूनाम्**=वेश्यानाम्, **करेभ्यः**=हस्तेभ्यः, **शरावाणाम्**=मद्यभाण्डानाम्, **चुम्बने**=आस्वादने, **चञ्चुरस्य**=चपलस्य। वेश्याभिः समं मद्यपानासक्तस्येति यावत्।

श्रुत्वैतद् महादेव उवाच–"मा म्म भूद् विचिकित्सा कापि । अज्ञायं राजसभायामनादृतः कानिचिद्दिनान्यगच्छत्यप्यस्मिन न कोऽपि सन्धेक्ष्यत्येतस्य जीवन–विषये, तत्सत्त्वरमेष आसन्नेऽस्मिन शुष्क–कूपे निक्षेपणीयः, उपरिष्टाच्चास्य पाषाण–कर्पर–मृत्पिण्ड–खण्डान निपात्यः तथाऽऽच्छादनीयो यथा निपुणं निरीक्षणेनापि न स्याच्छक्योऽवलोकयितुम ।"

तदाकर्ण्य च, सपद्येव ते तथा विदधिरे । महादेवश्च शनैः शनैः पुनरप्यालप्य, कतिभिश्चिच्छोणित–शोण–बिन्दुभिरङ्कितं दक्षिणबाहुमूलमुत्तरीयेणाऽऽवृत्य पुनर्मार्गान्मार्गान्तरं प्रविशन, घण्टापथमासाद्य, गोपुराभिमुखं प्रचलन, केनचिन मन्दिह्यमानश्च, शाम्भिखान–हस्ताक्षराङ्कितं पत्रं दर्शयन, कुशलेन गोपुराद् बहिराजगाम । अग्र एव कुटपटलीषु निलीयमान एव घनच्छायस्यैकस्य वट–वृक्षस्य तले मर्मर–श्रवण–स्तब्ध–कर्णम , अनिमेष–नयनाभ्यां सम्मुखमवलोकयन्तम , अश्वमेकमारूढम वीरवेषमात्मानं प्रतीक्ष-

विचिकित्सा=संशयः । **अनादृतः**=तिरस्कृतः । **सन्धेक्ष्यति**=सन्देहं करिष्यति । **आसन्ने**=समीपस्थे । **पाषाणानाम्** =प्रस्तराणाम् , **कर्पराणाम्**=शकलितमृद्भाण्डानाम् , **मृत्पिण्डानाम्** =लोष्टानाम् , **खण्डान्** ।

शोणितशोणबिन्दुभिः=रक्त-रक्तपृषतैः । **अङ्कितम्**=चिह्नितम् । **उत्तरीयेण**=प्रावरणेन । **आवृत्य**=आच्छाद्य । **घण्टापथम्**=राजमार्गविशेषम् । **गोपुराभिमुखम्**=अनुपुरद्वारम् । **कुटपटलीषु**=वृक्षसमूहेषु । **घना**=निबिडा, छाया यस्य तस्य । **मर्मरस्य**=शुष्कपर्णध्वनेः, **श्रवणेन**=श्रोत्रगोचरीकरणेन, **स्तब्धौ**=शङ्कभूतौ, कर्णौ यस्य तम् । **अनिमेषनयनाभ्याम्**=निमेषपतनोत्पतनशून्यनेत्राभ्याम् । **आत्मानम्**=महादेवपण्डितरूपं शिववीरम् । **प्रतीक्ष-**

माणम्, गौरसिंहमद्राक्षीत्। तत्समीपे च दासेरकेणैकेन गृहीतवल्गमपरमपि निजार्थमानीतमाजनेयमपश्यत्। ततस्तेन किञ्चिदालप्य, अविगणित-परिश्रमः, स्नातोत्थित इव स्फूर्ति-स्फुरितगात्रः, अनूनोत्साहः, स्मयमानमुखः, वामहस्तेन रश्मिं संयम्य दक्षेणाश्व-ग्रीवामास्पृश्य, अविलक्षितोत्पतनः सपदि तत्पृष्ठमारूढः। "रात्रौ कश्चनास्मत्पण्डितः समायास्यतीति पत्रद्वारा प्राप्तास्मत्सन्देशः, शिबिरस्थः, यशस्विसिंह-महाराजः, पण्डितं प्रतीक्षते" इति कुशल-प्रश्नाद्यनन्तरं गौरेणोक्तश्च, तेन सह मन्दं मन्दमालपन, कृतायासोऽप्यनायस्तः, तामेव दिशं प्रातिष्ठत।

माणम्=प्रतिपालयन्तम्। **दासेरकेण**=दास्याः अपत्यं पुमान् दासेरकस्तेन भृत्येन। **गृहीतवल्गम्**=धारितकविकम्। **आजानेयम्**=कुलीनमश्वम्। **अविगणितपरिश्रमः**=अज्ञातखेदः। पूर्वं स्नातः पश्चादुत्थित इति **स्नातोत्थितः**। "पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेने"ति समासः। स इवेत्युपमा। **स्फूर्त्या**=स्नानादिजन्यलाघवविशेषेण, **स्फुरितम्**=चञ्चलतां गतम्, शीघ्रकार्यकरणशीलतां प्राप्तम्। **गात्रम्**=शरीरं यस्य सः। **अनूनः**=अत्यधिकः, उत्साहो यस्य सः। **स्मयमानमुखः**=ईषद्धास्यमयाननः। **रश्मिम्**=वल्गाम्। **संयम्य**=संस्तभ्य। **आस्पृश्य**=स्पृष्टं कृत्वा। **अविलक्षितम्**=अनवलोकितम्, **उत्पतनम्**=अश्वपृष्ठोत्प्लवनम्, यस्य सः। **यशस्विसिंहमहाराजः**="जशवन्तसिंह" इति लोके ख्यातो योधपुर-शासकः। **कृतायासः**=विहितपरिश्रमः। **अनायस्तः**=श्रमशून्यः। **तामेव दिशम्**=यशस्विसिंहाध्युषित-हरितम्।

इतस्तु राजपुत्र-राजो यशस्विसिंहः, शिबिरान्तः पट-भवने-ष्वन्यतमे कलितोपबर्हाश्रयः, केनचिद् भृत्येन मन्दं वीज्यमानः, उपधान-स्थापित-बाहुमूले कमल-दल इव दक्ष-कर-तले, ईषद-रुण-पाण्डुरं सायंसमय-मृगाङ्क-मण्डलमिव वदनं संस्थाप्य, पुरः-स्थित-खड्गमालोकमालोकं वामहस्ततर्जन्यङ्गुष्ठाभ्यां च वाम-श्म-श्रवग्रं परिमृजन्नेवमचिन्तयत —

ममायातं घोरं कलियुगम, नात्र संशयः ; यैराततायिहतकै-

राजपुत्रराजः="राजपूताना"नाम्ना प्रसिद्धस्य देशस्य नरेशः। **शिबि-रस्य**=सेनानिवेशस्य, **अन्तः**=मध्ये, यानि **पटभवनानि**=उपकार्याः, तेषु। **कलितोपबर्हाश्रयः**=धारितोपधानास्थानः। **वीज्यमानः**=व्यजनवायुना सेव्य-मानः। उपधाने स्थापितं बाहुमूलं यस्य तस्मिन्। **कमलदल इव**=पद्मपलाश इव। **दक्षकरतले**=दक्षिणहस्ततले। **ईषदरुणपाण्डुरम्**=किञ्चिद्रक्तपीतम्। सायंकालिकः शशाङ्क उभाभ्यामपि वर्णाभ्यां भूषितो भवत्येव। मुखञ्च क्रोधेन रक्तम्, खेदेन च पीतम्। **सायंसमय-मृगाङ्क-मण्डलमिव**=सूर्यास्तवेलादित-चन्द्रखण्डमिव। **वदनम्**=आननम्। **आलोकमालोकम्**=वारं वारमालोकय-न्तम्। णमुलन्तम्। "नित्यवीप्सयोरि"ति द्वित्वम्। **तर्जनी चाङ्गुष्ठश्चेति** द्वन्द्वः। वामहस्तस्य तर्जन्यङ्गुष्ठाभ्याम्। यद्यपि "द्वन्द्वश्च प्राणितूर्यसेनाङ्गानामि"त्येक-द्वावः समपेक्षितस्तथापि सर्वद्वन्द्वस्थलीयैकवद्भावस्य वैकल्पिकत्वमतमनुसृत्येद-मभिहितमिति न च्युतसंस्कृतिदोषोद्भावनं युक्तम्। चस्य **परिमृजन्नित्यनेन** सम्बन्धः। **वामश्मश्रग्रम्**=वामभागीयमुखकेशप्रान्तम्। आततं यथा स्या-त्तथा–अयितुं शीलमेषामित्याततायिनः–वधोद्यताः, "सन्नद्धे त्वाततायी वधोद्यत" इत्यमरः।

दृशाऽप्यवलोकितमन्नादि, अस्मत्पूर्वजैः शुनकेभ्यो वितीर्णम्, तेऽधुना साञ्जलि जयजयध्वनि-पुरस्सरमभिवाद्यन्ते, येभ्यश्चमत्कार-मण्डलेष्वस्माभिर्वासभूमिरदीयत, तेषां विजय-पताका अधुना वङ्गेषु, कलिङ्गेषु, अङ्गेषु, मगधेषु, मत्स्येषु, मैथिलेषु, काशिषु, कोशलेषु, कान्यकुब्जेषु, चोलेषु, पाञ्चालेषु· काञ्चिषु, शौरसेनेषु, सिन्धुषु, सौराष्ट्रेषु च, दोधूयन्ते । येऽस्मदिष्टदेव-निन्दकाः सजिह्वाच्छेद-मस्माभी राज्याद् निरवासिषतः तेऽद्य जीवतामेव चास्माकं काश्यादिषु मन्दिराणि मर्दयन्ति, तीर्थान्यापानभूमीकुर्वन्ति । कमला इव विमलाचाराः कुलीन-कन्याः कदर्थयन्ति, सगात्र-

अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः ।
क्षेत्रदारहरश्चैव षडेते-आततायिनः ॥

दृशाऽप्यवलोकितम्=नेत्रेणापि दृष्टम् । स्पर्शादिस्तु कथैव का । शुनकेभ्यः=कुक्कुरेभ्यः ॥ वितीर्णम्=दत्तम् । चाण्डालादिदृष्टान्नपानादिपरित्यागस्यापि मानवाद्यभिहितत्वेन "न नीचो यवनात्पर" इति स्मृतिविषयदृष्टानां सर्वथा भोजनाभाव एव युक्त इति विवेकः । अभिवाद्यन्ते=नमस्क्रियन्ते । चमत्कारमण्डलेषु=पादकुटसतिषु । वासभूमिः=निवासस्थानम् । इष्टदेवनिन्दकाः=इन्द्रादन्यादि-निन्दारताः । सजिह्वाच्छेदम्=सरसनोत्कर्त्तनम् । न येन पुनरेवमविनयं कुर्युः । निरवासिषत=निस्सारिताः । आपानभूमीकुर्वन्ति=सुरागोष्ठीकुर्वन्ति । कमला इव=श्रिय इवेत्युपमा । विमलाचाराः=सदाचारिण्यः । कुलीनानाम्=सद्वंशजातानाम्, कन्याः=अविवाहिता बालिकाः । प्रायो यवना अविवाहिता एवागृह्णन् बालिका इत्यत एव "अष्टवर्षा भवेद्गौरी"त्यादि वचांसि धर्मशास्त्रे सम्मेल्य तदानीन्तना बुद्धिमन्तो बालविवाहं प्रचारितवन्त इति वेदितव्यम् ।

कम्पं साश्रुपातं सकरुणं "त्रायस्व-त्रायस्वेति" आम्रेडन-पराणां परम-पूज्यपाद-वेद-विदुषामपि शोणितैर्भुवं शोणयन्ति। अहह! धिगस्माद्दशान् क्षत्रियकुलकलङ्कान्; ये तेषां मानवाकाराणां क्रव्यादानां रुधिरैर्देवान् पितॄंश्च न तर्पयामः, अपि तु तत्साहाय्य-दानेन स्वधर्म-रक्षण-परान् स्वबन्धूनेव चिक्लेशयिषामः। हा! सर्वोऽप्यस्मद्देशः परतन्त्र एव संवृत्तः। केवलं महाराष्ट्र-देशे स्वातन्त्र्यस्योद्यानं विकसितमवलोक्यते। अहह! तदप्येतेऽनुदारा भूदारा इवोल्लुलूषन्ति। परन्तु न्यक्कार-विषया वयमेव, ये तुच्छानामेषामुच्छलतां म्लेच्छ-हतकानां चाटुकारा इव, किमिदमित्यविगणय्य, प्राप्त-

सगात्रकम्पम्=सशरीरवेपनम्। क्रियाविशेषणम्। आम्रेडनपराणाम्=वारं वारं कथयताम्। परमपूज्यपादाश्च ते वेदविद्वांसस्तेषाम्। नमस्करणीयचरणश्रोत्रियाणाम्। भुवम्=धराम्। शोणयन्ति=रक्तां कुर्वन्ति। मानवाकाराणाम्=मनुष्यशरीरधारिणाम्। क्रव्यादानाम्=आममांसभक्षणतत्पराणाम्, रक्षसाम्। रुधिरैर्देवान् पितॄंश्च न तर्पयामः=एतेषां हत्यया देवानाञ्च पितृणाञ्च महती तृप्तिः स्यादित्येवमुक्तिः। तत्र दोषलेशाभावसूचनाय तु तर्पयाम इत्यादि। एवं कृते पुण्यमेव भवेदिति वास्तवं तत्त्वम्। स्वधर्मरक्षणपरान्=हिन्दुधर्मरक्षानिरतान्, शिवराजप्रभृतीन्। स्व-बन्धून्=देश-भ्रातॄन्। चिक्लेशयिषामः=क्लेशयितुमिच्छामः। परतन्त्रः=पराधीनः। उद्यानम्=वाटिका। विकसितम्=कुसुमितम्। अनुदाराः=उदारताशून्याः। भूदारा इव=क्रोडा इव। "क्रोडो भूदार" इत्यमरः। उल्लुलूषन्ति=लवितुमिच्छन्ति। न्यक्कारविषयाः=तिरस्कारपात्राणि। तुच्छानाम्=अतिनीचानाम्। उच्छलताम्=उच्छृङ्खलानाम्। चाटुकारा इव=नर्मालापका इव। प्राप्त-

सङ्केता एव स्वबन्धु-सर्वस्वमेव कृत्रिम-कोप-ज्वालाभिर्दिधक्षामः। अथवा किं कुर्मः ? पूर्वजचरणा एवास्माकं महा-महिम-मर्यादा-मुल्ललङ्घिरे। आसीदेष आमेराधीशो वीरवरो महामान्यो मानसिंह एव, यो बहूनां पैतृकीम्, पारम्परीणाम्, प्राणाधिक-मूल्याम्, सर्वस्व-हानेनापि रक्षणीयाम्, धर्मार्थ-काम-मूल-भूताम्, स्वतन्त्रतासम्पत्तिं बलादाच्छिद्य, खड्ग-धारासारैरखिलान्, आत्मानं चान्धीकृत्येव, दुराचार-यवनराज-हस्ते समर्पयति स्म। अथवा कस्तस्य दोषः ? क्रूरतमोऽयं कलिः, अभद्राणि भाग्यानि, अभव्यं भाव्यम्, पतनोन्मुखी सम्पत्तिः, विधूतप्रायो धर्मः, ध्वस्ता धीरता, चञ्चला चक्रवर्त्तिता, स्रस्ता च स्वतन्त्रता, तद् महतां विनिन्दनेन व्यर्थोऽयं वदन-मलिनीकारः—इत्यादि

सङ्केता एव=आदेशप्राप्तिसमकालमेव। कृत्रिम-कोप-ज्वालाभिः=क्रियानिर्वृत्तक्रोधावलीभिः। दिधक्षामः=दग्धुमिच्छामः। महामहिम्नाम्=अतितेजस्विनाम्, मर्यादाम्=सीमाम्। उल्ललङ्घिरे=अतिचक्रमुः। आमेराधीशः=अम्बराधिपतिः। पारम्परीणाम्=परम्पराप्राप्ताम्। मूलपुरुषक्रमायातामिति यावत्। प्राणाधिकमूल्याम्=जीवनतुल्याम्, आधारभूतामिति यावत्। सर्वस्वहानेनापि=निखिलत्यागेनापि। रक्षणीयाम्=पालनीयाम्। स्वतन्त्रता-सम्पत्तिम्=स्वातन्त्र्यलक्ष्मीम्। बलात्=तिरस्कारेण। आच्छिद्य=सङ्क्षिप्य। खड्गधारासारैः=असिपतनवर्षैः। अन्धीकृत्येव=विचारविरहितीकृत्येव। अभद्राणि=अमङ्गलानि। अभव्यम्=अशोभनम्। भाव्यम्=भवितव्यम्। पतनोन्मुखी=विनाशप्रवणा। विधूतप्रायः=विध्वस्तकल्पः। चक्रवर्त्तिता=साम्राज्यम्। स्रस्ता=पतिता। वदनमलिनीकारः=मुखकालिमानयनम्।

बहुशश्चिन्तयत एव तस्य कतिभिश्चिदश्रुबिन्दुभिः श्मश्रुमूलमसिच्यत । यावच्चैष उपधानं परित्यज्य, जानुद्वयं सम्पात्य, उपविश्य, करपृष्ठाभ्यां नेत्रे सम्मृज्य, उत्तरीयाञ्चलेन वाष्पमपाकृत्य, सम्मुखमवलोकयति ; तावदन्यतमः प्रतीहारः प्रविश्य, सजयध्वनिं करौ सम्पुटीकृत्य, प्रावोचद्–"देव ! शिवबीर-प्रेषितो महादेवपण्डितो दिदृक्षतेऽत्रभवतः"। तदूरीकृत्य च, "ओम् ! प्रवेशय" इत्युक्तवति महाराजे, प्रतीहारोऽपि तथाऽकरोत् । ततः प्रतीहारेण सह प्रविष्टमात्रे महादेव-पण्डिते, यशस्विसिंहः प्रणम्य आसन्न-स्थानमुपवेशार्थं दक्षकरेण निर्दिष्टवान । तं च स्वेदार्त्तिखिन्नवदनमवलोक्य सम्यगुपवीजितुं व्यजननिमङ्गितवान । तेन वीज्यमानमपगत-परिश्रमं च कुशलादिकमपृच्छत्, स च यथोचितमालप्य विशेषवार्ता आलपितुं राजप्रश्नं प्रतीक्षमाण इव तस्थौ ।

ततस्तयोरेवमभूदालापः ।

यशस्विसिंहः—पण्डितवर ! महाराष्ट्र-राजस्य पत्रं तु प्राप्त-

श्मश्रुमूलम्=कूर्चिकाग्रम् । असिच्यत=सिक्तमक्रियत । शोकादश्रुपतनमारब्धमिति यावत् । अथ शोकावस्थां दर्शयति–यावच्चैष इति । अन्यतमः=अनेकेष्वेकः । सजयध्वनि=जय-शब्दपुरस्सरम् । सम्पुटीकृत्य=संयोज्य । अत्रभवतः=पूजनीयान् , ऊरीकृत्य=स्वीकृत्य । आसन्नस्थानम्=समीपवर्त्तिदेशम् । "समीपे निकटासन्नाविति"अमरः । दक्षकरेण=दक्षिणहस्तेन । स्वेदात्=घर्मजलात् । खिन्नवदनम्=क्लान्ताननम् । उपवीजितुम्=व्यजनेन सेवितुम् । व्यजननिम=व्यजनक्रियायुक्तम् । इङ्गितवान=चेष्टया बोधितवान् ।

वानेवास्मि। तत्र तेन यद्यदलेखि तत्तत् पठितवानस्मि। तदधिकं भवतः किं प्रस्तोतव्यमिति निरूप्यताम्।

महादेवपण्डितः-मरुराज! नाहं तत्रभवता किमपि प्रस्तोतुं प्रेषितोऽस्मि, अपि तु शोकं प्रकाशयितुम्।

यश०-तत् किं पुण्यनगरेण सह प्रधानचिक्कन-दुर्गोऽपि हारित इति शोकः?

महा०-तस्य हस्ते बहवो दुर्गाः सन्ति-इति दुर्गार्थं न खिद्यते।

यश०-अथ किं भारत-चक्रवर्त्तिना दिल्लीश्वरेण युद्धरूपा महती विपदुपतिष्ठते-इति शोकः?

महा०-क्षत्रियराज! विपत्समये धीरतात्यागः शिवेन नाभ्यस्तः।

यश०-तत् किमति शोकः?

महा०-[उच्चैर्निरश्वसत]

यश०-कथ्यतां कथ्यतां किमिति शोकः?

महा०-भगवन! यः क्षत्रियता-धूर्धरः, येन राजन्वतीयं भूः, योऽस्मादृशानामभिमान-भाजनम्, यस्मिन धर्म-धुरन्धरा

प्रस्तोतव्यम्=प्रस्तावयितव्यम्।

प्रधानम्=प्रधानीभूतः, नित्यक्लीबम्।

किमिति=कस्माद्धेतोः।

उच्चैर्निरश्वसत=महान् शोको यो न वाग्गोचर इति दर्शयितुं किमप्यनभिधाय निश्वासग्रहणम्।

क्षत्रियतायाः=क्षात्रस्य, निखिलविपन्नरक्षणरूपस्य; धुरम्=भारं धरतीं-

आग्रह-ग्रहिलाः, यं पीयूष-पूरमिव चक्षुश्चषकैश्चिराय पिपासामः, यः सनातन-धर्मरक्षाया एकमात्रं शरणम्, यश्च भारतीय-वीरकुल-मुकुट-मणिः, तमेवाद्य कदर्य्य-हतकानां पाटच्चराणां जाल्मानां धर्म-ध्वंसिनामेतेषां दासपदलाञ्छनमालोक्य, शोकाकुलो महाराष्ट्र-राजः!

ततो यशस्विसिंहस्तु स्फुटमेष मां धिक्करोतीति किञ्चिन् कुपितः, सतां न्यक्करणीयमेव भारत-विद्रोहि-यवन-वशवर्त्तिताकार्यं करोमीति ग्लानः, विचित्रेयमुत्थानिकैतत्प्रस्तावस्येति चकितः, मामेष निरुत्तरयतीति ह्रीणः, किमितोऽपि कथयेदिति च सकुतू-

त्येवम्भूतः। **राजन्वती**=सुराजवती, "राजन्वान् सौराज्ये"। "सुराज्ञि देशे राजन्वानि" त्यमरः। **अभिमानभाजनम्**=अभिमानकारणीभूतः। **यस्मिन्**, सति। भावसप्तमी। **धर्मधुरन्धराः**=धार्मिकाः। **आग्रहग्रहिलाः**=धर्मपक्षपातिनः। **पीयूषपूरम्**=अमृतप्रवाहम्। **चक्षुश्चषकैः**=पानपात्राभेदतां गतैर्नयनैः। **एकमात्रम्**=अद्वितीयम्। **भारतीयवीरकुलस्य**=हैन्दवीयबलिसमूहस्य, **मुकुटमणिः**=मस्तकरत्नम्। **पाटच्चराणाम्**=चौराणाम्। **जाल्मानाम्**=असमीक्ष्यकारिणाम्, धूर्त्तानाम्। **दासपदलाञ्छनम्**=भृत्यशब्दचिह्नितम्। एतादृशापवादगोचरतामुपगतमिति यावत्। **सतां न्यक्करणीयम्**=सद्भिस्तिरस्करणीयम्। "कृत्यानां कर्त्तरि वे"ति वैकल्पिकषष्ठी। **भारतविद्रोहिणाम्**=आर्यावर्त्तघातिनाम्, यवनानाम्, **वशवर्तिता**=अधीनतास्वीकरणम्, सैव कार्यम्। **ग्लानः**=क्षीणहर्षः। "ग्लै हर्षक्षय" इत्यस्माद् "गत्यर्थाकर्मके"ति कर्त्तरि क्तः "संयोगादेरातो धातोर्यण्वत" इति नत्वम्। **उत्थापनिका**=प्रारम्भकरणरीतिः। **चकितः**=साश्चर्यः। **निरुत्तरयति**=उत्तरशून्यं करोति। **ह्रीणः**=लज्जापरवशः।

हलः, स्वेदापसारणच्छलेन विविध-भाव-भङ्ग-तरङ्गितमाननं पटान्तेन साच्छादनं प्रोञ्छन्, उपधानं क्रोडे संस्थाप्य, तदुपरि च स्थापित-कफोणिः, यावत् पुरतः पश्यति तावत्पुनरारभत तथैव वक्तुं महादेवः-"महाराज! दिक्करि-कर-दोधूयमान-यशःपुञ्ज-पुण्डरीकस्य स्वातन्त्र्य-पोत-कर्णधारस्य, क्षत्रिय-कुलकमल-दिनेशस्य, उदयपुराधीश-श्रीप्रतापसिंहस्य कुल-प्रसूतं स्त्री-रत्नं यस्यार्द्धाङ्गम्, विद्युद्विनिन्दक-कृपाण-करैः, सघनश्मश्रु-कूर्च-समाच्छन्न-

इतोऽप्यधिकमिति शेषः। **स्वेदापसारणच्छलेन**=घर्मजलदूरीकरणव्याजेन। **विविधानाम्**=अनेकेषाम्, **भावानाम्**=शोकहर्षादीनाम्, **भङ्गैः**=आविर्भावतिरोभावैः, **तरङ्गितम्**=समुत्पन्नलहरिम्, आकुलीभूतमिति यावत्। **साच्छादनम्**=सगोपनम्, **प्रोञ्छन्**="पोंछकर" इति हिन्दी। **स्थापितकफोणिः**=धृतकूर्परः। "स्यात्कफोणिस्तु कूर्पर" इत्यमरः। **दिक्करिणाम्**=दिङ्नागानाम्, **करैः**=शुण्डादण्डैः, **दोधूयमानम्**=वारं वारं सञ्चाल्यमानम्, **यशःपुञ्ज एव**=कीर्तिव्रात एव, **पुण्डरीकम्**=सिताम्भोजम्, यस्य तादृशस्य। समस्तभूखण्डव्यापियशस इति वाच्योऽर्थः। **स्वातन्त्र्यमेव**=स्वतन्त्रतैव, **पोतः**=नौः, **तत्कर्णधारस्य**=तन्नाविकस्य। **क्षत्रियकुलमेव**=क्षात्रान्वय एव, **कमलम्**=पद्मम्, **तद्दिनेशस्य**=तदुदयकारणस्य खेचराधिनायकस्य। उदयपुराधीशश्चासौ श्रीप्रतापसिंहस्तस्य। श्रीप्रतापः सुप्रतापः सूर्यवंश्यः क्षत्रिय आसीदकबर-साम्राज्यकाले तत्पितृव्यजस्य श्रीमानसिंहस्य भगिनी "जोधाबाई" अकबरपट्टमहिष्यभूदिति श्रीप्रतापदेवो मानसिंहमपमानितवान् कदाचिदसहभोजनेनेति सुमहान् सङ्ग्रामो हल्दीघट्टे सञ्जात इत्यादि सुप्रसिद्धमेव भारतीयेतिवृत्तवेदितृषु। **स्त्रीरत्नम्**=स्त्रीषु श्रेष्ठा। **अर्द्धाङ्गम्**=अर्द्धदेहः, स्त्रीत्यर्थः। **विद्युद्विनिन्द-**

कन्धरैः, वाम-पाद-कलित-राजतैक-कटकैः, दक्षकर-कलित-कनक-वलय-द्वयैः, पीतरक्त-श्यामारुणार्जुन-कर्बुर-पाण्डुर-धूसर-पाटल-चित्र - विचित्रोष्णीषैः , विविध-मणिमय - हाटक-माला-सङ्घट्ट-किरणाङ्कितादिक-विकट-वक्षस्थलैः, रणाङ्गण-विपोथित-प्रत्यर्थि-सार्थ-मुकुट-मौक्तिक-मण्डलारचित-कुण्डलैः, सिंहसंहननैः, मधु-

कानि=चपला-जुगुप्सा-कारणानि, **कृपाणानि**=असयः, करे येषां तैः। **सघनेन**=सम्बन्धेन, **श्मश्रुणा**=दाढिकया, **कूर्चकेन**=उत्तरोष्ठस्थकेशेन, च **समाच्छन्नानि**=व्याप्तानि, कन्धराणि येषां तैः। **वामपादे**=दक्षिणेतरचरणे, **कलितः**=धारितः, **राजतः**=रजतनिर्मितः, **एकः**=अद्वितीयः, कटको यैस्तैः। **दक्षकरे**=दक्षिणहस्ते, कलितं **कनकवलयद्वयम्** = हिरण्यकङ्कणयुगलम्, यैस्तैः। पीतादिभिश्चित्रविचित्रान्युष्णीषाणि येषां तैः। **अरुणम्** =ईषद्रक्तम्, **अर्जुनः**=धवलः। "वलक्षो धवलोऽर्जुन" इत्यमरः। **कर्बुरम्** =चित्रम्, अनेकवर्णमिश्रणरूपन्न तु स्वतन्त्रम्। **पाण्डुरम्** =ईषत्पीतम्, श्वेताभम् **धूसरम्**=मृण्मिश्रश्वेतम्, "भूरा" इति हिन्दी। **पाटलम्** =पाटलपुष्पवर्णम्। "गुलाबी" इति हिन्दी। **विविधानाम्** =अनेकप्रकाराणाम्, **मणिमय-हाटकमालानाम्**=हीरकादिजटितसुवर्णस्रजाम्, **सङ्घट्टस्य**=व्रातस्य, **किरणैः**=मयूखैः, **अङ्कितम्** = लाञ्छितम्, अत एव-**अधिकम्** =बहु, **विकटम्**=निम्नोन्नताभम्, **वक्षःस्थलम्**=उरःस्थलं येषां तैः। **रणाङ्गणे**=सङ्ग्रामभूमौ, **विपोथितानाम्** = विनाशितानाम्, **प्रत्यर्थिनाम्** = शत्रूणाम्, **सार्थस्य**=व्रजस्य, **मुकुटानाम्** = उष्णीषाणाम्, **मौक्तिकमण्डलैः**=मुक्ताप्रकरैः, **आरचितानि**=निर्मितानि, कुण्डलानि येषां तैः। **सिंहसंहननैः**=वराङ्गरूपोपेतैः। "वराङ्गरूपोपेतो यः सिंहसंहननो हि स" इत्यमरः। **मधुनयनैः**=मत्तनेत्रैः।

नयनैः, परःशत-वीर-वरैः, सजयजयध्वनि त्रियमाणं मरुदेश-राजसिंहासनं पदा समाक्रम्य यो विराजते, यत्कथोपकथनै राजपुत्र-देश-कामिन्यो बालकान् शाययन्ति; एष दिल्ली-कलङ्कोऽवरङ्गजीवोऽपि सिप्रातीरे यद्बाहुविक्रममवलोक्य, क्षणम-निमेषो विस्मृतात्मदेहो विस्मितस्तस्थौ, सदैव यतो बिभेति, साहाय्यं च समपेक्षते, अस्मिन् विश्वस्मिन्नपि भारते वर्षे, नगरे नगरे ग्रामे ग्रामे गृहे गृहे मन्दिरे मन्दिरे च यस्य क्षेमाय विज-याय बलवृद्धयै राज्यसमृद्धयै विपुलसम्पत्त्यै रिपु-निकर-हत्त्यै च, द्विजवरा हस्तावुन्नमय्य, सनाम-सङ्कीर्त्तनमाशीराशीनुच्चारयन्ति, 'अस्मास्वपि केचन वीरा ऊर्जस्वलयशसस्ते महापुरुषाः सन्ति' इति यं वारं वारं स्मारं स्मारं सर्वेऽप्यभिमन्यामहे ; स एव महावीरः, स एव भारत-रत्नम्, स एव राजकुल-भूषणम्, स एव च धर्म-धारिधौरेयः, अद्य यवनानां पक्षमवलम्ब्य, स्वकीयानामेव शिरां-स्युच्छेत्तुं चतुरङ्गिणीं सज्जितवानस्तीत्यवलोक्य, क्षुभितं महाराष्ट्र-

---

परःशतैः=अगणनीयैः, वीरवरैः=श्रेष्ठैर्बलिभिः। त्रियमाणम्=स्वीक्रियमाणम्। यत्कथानाम्=यच्चरितानाम्, उपकथनैः=वर्णनैः। बालकान् शाययन्ति, तच्चरितक्रूरता निशम्य भीता बालाः स्वपन्तीति तत्त्वम्। सिप्रातीरे=सिप्रातटे। उज्जयिनीभूषणाश्रिता मालवविहारिणी सिप्रा। विस्मृतात्मदेहः=अविगणित्स्वशरीरः। विस्मितः=विलक्षः। विश्वस्मिन्नपि=सम्पूर्णेऽपि। क्षेमम्=कल्याणम्, लब्धसंरक्षणरूपम्। रिपुनिकरस्य=शत्रुव्रजस्य, हतिः=मारणम्, तस्यै। ऊर्जस्वलयशसः=विपुलकीर्त्तयः। धर्मधारिधौरेयः=धार्मिकाग्रेसरः। स्वकीयानामेव=स्वदेशीयानां स्वगोत्राणाञ्च। उच्छेत्तुम्=कर्त्तितुम्। क्षुब्धम्=

राजस्य हृदयम्" ।

यशस्विसिंहं किञ्चिल्लज्जया तिर्य्यग्वदनं विमनायमानमिवावलोक्य, पुनः—

वीरवर ! साधारणोऽहं दूतः, महाराजैः सह कथमालपनीयमिति भाषण-परिपाटीमपि न जानामि-इति भाषण-भङ्गीवैधुर्य्य-प्रयुक्तोऽपराधो भवेच्चेत् क्षन्तव्यः, किन्तु निरीक्ष्यतां किमर्थयं रणसज्जा ? किमर्थ एष महोपकार्या-सन्निवेशः ? किमिति भयानक-भङ्गा भासन्ते ? किमिति चञ्चलाश्चन्द्रहासाश्चमत्कुर्वन्ति ? कमध्वयितुमेते सादिनः ? कञ्च भस्मसात् कर्त्तुं ज्वालाजटिल एष भवत्कोप-दावानलः ? किं ये भवन्तमाशिषो ब्रुवन्ति, तेषामेव

आविलीभूतम् । "आगमशास्त्रमनित्यमि" ति नेट् । "श्रुध्वस्वान्तध्वान्त" सूत्रे निपातितो मन्थार्थ एवेडभावो नान्यत्रेति वदतान्तु क्षुभितस्यैव साधुत्वं वाच्यत्वश्चेति वेदितव्यम् ।

यान्युज्जहार माहेशाद् व्यासो व्याकरणार्णवात् ।
तानि किम्पदरत्नानि मान्ति पाणिनिगोष्पदे ॥

इति पद्यार्थवेदिनस्तु पूर्वोक्तयुक्त्या साधुत्वं मन्यन्ते वदन्ति चेति, तत्त्वं तत्त्वात्मिका महामायैव वेत्तु नीलसरस्वती ।

तिर्यग्वदनम्=साचीमुखम् ।

भाषणपरिपाटीम्=कथनशैलीम् । **भाषण-भङ्गीवैधुर्य-प्रयुक्तः**=कथन-प्रकार-शून्यता-कारणकः । **किमर्था**=किम्प्रयोजनिका । **महोपकार्यासन्निवेशः**=शिबिरव्रातस्थितिः । **अध्वयितुम्**=अश्वैराक्रमितुम् । **सादिनः**=अश्वारोहाः । **भस्मसात्कर्त्तुम्**=दग्धुम् । **ज्वालाजटिलः**=ज्वालावद्धितः ।

रक्तै रेणुकाराशिमरुणयितुम्? ये भवन्माहात्म्य-समाकर्णनेन मोदन्ते, तेषामेव मेदोभिर्मेदिनीं मेदस्विनीं निर्मातुम्? ये भवन्तं निजकुलावतंसं मन्यन्ते, तेषामेव वंशं ध्वंसयितुम्? ये निरर्थं दीनान् लुण्ठन्ति, कुलीन-कन्या अपहरन्ति, मन्दिराणि निपातयन्ति, सद्यो वृक्णैः प्रजानां मस्तकैर्नयनैश्च चिक्रीडन्ति, तानेव वैदिक-मर्य्यादा-विलोपन-व्रतिनो वैरिहतकान् वा वर्द्धयितुम्? महाराज! यथा श्येनो वज्र-निष्पेष-निष्ठुरैर्निज-चञ्चु-चरणाघातैर्दीनान्, भय-विह्वलान, पतत्रिणो निहत्य व्याधाय समर्पयति, स्वयं च हत्यामात्रफलभाग् भवति, तथाभूतं व्रतं न शोभते श्रीमति, यन्निरर्थं स्वतन्त्रा अपि प्रजा विजित्य, केवलमविचार-व्यभिचार-प्रचाराय धूर्तानामेषां यवनानां हस्ते समर्प्यन्ते। क्षत्रिय-

---

रक्तैः=रुधिरैः। **रेणुकाराशिम्**=धूलिव्रातम्। **अरुणयितुम्**=रक्तयितुम्। **मेदोभिः**=विस्रैः। "मेदस्तु पलतेजः पलोद्भवम्। विस्रमस्थिकरं स्नेहवरं गौतममित्यपी"ति वैजयन्ती। **मेदिनीम्**=धरणीम्। **मेदस्विनीम्**=विस्रमयीम्। **निर्मातुम्**=कर्तुम्। **निजकुलावतंसम्**=स्वान्वयसम्भूतम्। **निरर्थम्**=निष्प्रयोजनम्। **लुण्ठन्ति**=चोरयन्ति। **सद्यो वृक्णैः**=तत्कालकृत्तैः। **चिक्रीडन्ति**=वारं वारं क्रीडां कुर्वन्ति। **वैदिकमर्यादायाः**=आर्यपद्धतेः, **विलोपनम्**=विनाशनमेव, व्रतं येषां तान्। बहुव्रीहिणा निर्वाहेऽपि "अत इनिठनौ"। **वर्द्धयितुम्**=उन्नतयितुम्। **श्येनः**=पक्षिघाती पक्षी। **वज्रनिष्पेषनिष्ठुरैः**=कुलिश-पतन-कठोरैः। **निजचञ्चुचरणाघातैः**=स्वत्रोटिपादमारणैः। **भयविह्वलान**=भीतिकातरान्। **पतत्रिणः**=पक्षिणः। **व्याधाय**=मृगयवे। **समर्पयति**=ददाति। व्याधाः श्येनान् पालयन्ति तद्द्वारा चाखेटं कारयन्तीति **लोकप्रसिद्धम्**। **हत्या-**

व्याघ्र ! किमहं कथयामि ? स्वयमेव विवेच्योऽयं विषयः।

अथ कांश्चित् क्षणान् शिरःकण्डूयनैरेव यापयित्वा किञ्चिद्ब्रीणोऽपि त्रपां संवृण्वन्निव शनैरवादीन्मरुराजः।

यशस्वि०-दूतवर ! साधु, तव भाषण-भङ्गीमत्यन्तं प्रशंसामि, न तव भाषणे गौरवमवगूर्य्यते, पदवैधुर्यं ध्रियते, प्रसादो निरस्यते, संशयापादक-पद-प्रचयो वा प्रचीयते। विलक्षणं तव पाटवमालापेषु, गहन-गहनैः, कोमल-कोमलैः, मधुर-मधुरैः, वाचां विलासैर्मनो हरसि, यदेव वक्तुं प्रवर्त्तसे, तन्मूर्त्तिमिव पुरतो विलिख्य दर्शयसि, यदेव वक्तुमीहसे, तदासार-प्रसारैरिव परितः प्लावयसि, धन्यः शिवो यत्त्वादृशान कल्पना-केसरिणो दूतत्वे नियुनक्ति।

मात्रस्य = केवलमारणस्य, फलं भजति तथाभूतः। **अविचारस्य**=अविवेकस्य, **व्यभिचारस्य**=कदर्थनस्य, च प्रचाराय। **क्षत्रियव्याघ्र** !=राजन्यश्रेष्ठ !, **विवेच्य**:=विचारणीयः।

शिरःकण्डूयनैः=शिरःखर्जनैः। लज्जितस्योत्तरदौर्बल्ययुतस्य च सूचकमिदम्। **त्रपाम्**=ह्रियम्। **संवृण्वन्**=आच्छादयन्। **गौरवम्**=श्रैष्ठ्यम्। **अवगूर्यते**=हिनस्ति। **पदवैधुर्यम्** = अपेक्षितार्थबोधनाय समपेक्षितपदशून्यता। **न ध्रियते**=नावतिष्ठते। **प्रसादः**=स्पष्टार्थतात्मा गुणः। **निरस्यते**=क्षिप्यते। "असु क्षेपणे"। "उपसर्गादस्त्यूह्योर्वेति वाच्यमि"ति पाक्षिकमात्मनेपदम्। **संशयापादकानाम्**=सन्देहजनकानाम्, पदानाम्, **प्रचयः**=आधिक्यम्। **प्रचीयते=वर्धते**। निरर्थकपदराहित्यमिति यावत्। **पाटवम्**=पटुता। **गहनगहनैः**=अतिगम्भीरार्थैः। **तन्मूर्त्तिम्** =तत्स्वरूपम्। **ईहसे**=वाञ्छसि। **तदासार-प्रसारैः**=तद्धारासम्पातप्रपातैः। "धारासम्पात आसार" इत्यमरः। **कल्पनाकेशरिणः**=नव-नव-विचार-मृगेन्द्रान्। तादृशविचारपटूनिति या-

त्वदुक्ति-श्रवण-विरिरंसैव न भवत्यस्माकम्।

महा०—महाराज! एष साधारणोऽस्ति दूतो न जानीत उचितमनुचितं वेति सर्वथा क्षमा-भिक्षुरेष जनः। (इति नतकन्धरः समास्थित)

यश०—अथ प्रकृतमाकलय। न खल्वस्माभी राजपुत्र-देशीय-क्षत्रियैर्भयेन वा, लोभेन वा, कस्याप्युपचिकीर्षया वा, अपचिकीर्षया वा, यवन-हस्तेष्वात्मा समर्पितः। अस्माभिरेव वारसहस्रं यवनाः खड्गैः खण्डशः कृताः, अस्माभिरेव वारं वारं त आसिन्धु-कूलं विद्राविताः, पारतन्त्र्य-कलङ्कमसहमानानामस्माकमेव नवनीत-कोमला रमण्यो ज्वाला-जाल-जटालेषु ज्वलनेष्वात्मानं ज्वालयाम्बभूवुः। एवमेवाऽऽपदमनुभवतामस्माकं वत्सराणां शतकानि व्यतीतानि। न जानीमहे, किमिवेहितं भगवत्या महामायायाः,

---

वत्। त्वदुक्तेः=त्वद्भाषणस्य, श्रवणे=श्रोतृगोचरीकरणे, विरिरिंसा=विरन्तुमिच्छा।

क्षमाभिक्षुः=क्षमाप्रार्थी। नतकन्धरः=नमितग्रीवः। समास्थित=स्थितोऽभूत्। "समवप्रविभ्यः स्थः"।

उपचिकीर्षया=उपकर्त्तुमिच्छया। अपचिकीर्षया=अपकर्त्तुमिच्छया। वाराणां सहस्रं वारसहस्रम्=अनेकवारम्। आसिन्धुकूलम्=सिन्धुनदतट-पर्यन्तम्। अभिविधावाङ्। विद्राविताः=भगनतां नीताः। पारतन्त्र्यम्=पराधीनतैव, कलङ्कः, तम्। नवनीतकोमलाः=अतिकृशाङ्ग्यः। ज्वाला-जालैः=कीलालमालाभिः, जटालेषु=उपचितेषु। ज्वलनेषु=दहनेषु। ईहितम्=चेष्टितम्। महामायायाः="अजामेकामि" ति श्रुतिश्रुतायाः सक-

यदितोऽप्यधिकार-वैशिष्ट्यमेव कलयति भारत-विद्रोहि-सन्दोहः। वयं चानिच्छन्तोऽप्यात्मनस्तद्धस्तगतानेव पश्यामः। अधुना तु विश्वस्मिन्नपि राजपुत्रदेशे तेषां तथाऽधिकारोऽस्ति, यत् केवलमात्मोच्छेदायैव तैः सह विरोधः स्यात्-इति किमिव क्रियेत, भाग्यैरेतेषां कदर्य्याणां परस्परमैक्यमपि नास्त्यस्माकम्। तद् यथोचितं निर्वहामः।

महा०—महाराज! सम्यगवैमि, मा स्म भूद्राजपुत्रदेशे तादृशं यौष्माकीण-बलम्, परमस्मिन् देशे तु यवनानामधुनाऽपि तथा प्रबलोऽधिकारो न संवृत्तोऽस्ति। शतशो दुर्गाणि सन्ति, यवन-रुधिर-तृषित-खड्ग-प्रचयोद्भासित-भुजाः, सहस्रशो महाराष्ट्र-व्याघ्राः सञ्चरन्ति। एषां च सर्वोऽपि वीरता-धुरन्धरान्, क्षत्रिय-कुलमणीन्, भारत-गौरवाश्रयान्, दत्तम्लेच्छ-हस्तावलम्ब-

---

लजगदुद्भवस्थितिनिरोधलीलाया अगणितगुणगणसमुचितकलेवरायाः अपि त्रिगुणात्मिकायाः। **अधिकारवैशिष्ट्यम्**=विशिष्टमधिकारम्। **कलयति**=धारयति। **भारतविद्रोहिसन्दोहः**=हैन्दव-प्रत्यर्थि-निकरः। **आत्मोच्छेदाय**=स्वविध्वंसनाय। **कदर्य्याणाम्**=कुत्सितावरणानाम्। **निर्वहामः**=निर्वाहं कुर्मः।

युष्माकमिदं यौष्माकीणं तच्च तद्-**बलम्**=सामर्थ्यम्। शैषिकेऽपि "तस्मिन्नणि च युष्माकास्माकौ"ति युष्माकादेशः। **यवनानाम्**=म्लेच्छानाम्, **रुधिरस्य**=लोहितस्य, **तृषितानाम्**=पिपासितानाम्, **खड्गानाम्**=असीनाम्, **प्रचयैः**=निकरैः, **उद्भासिताः**=चञ्चद्भासः, **भुजाः**=बाहवो येषां ते। **महाराष्ट्र-व्याघ्राः**=श्रेष्ठा महाराष्ट्रदेशीयाः। **सर्वोऽपि**=अस्य "मध्ये" इत्यादौ, "जनः" इति चान्ते शेषः। **दत्तम्लेच्छहस्तावलम्बनान्**=यवनसाहाय्यकारिणः।

नान्, युष्मानवलोक्य रोदिति। युष्मदग्रे सर्वोऽपि बद्ध-कर-सम्पुटः। राज्यमेतदखिलं भावत्कम्, शिववीरोऽपि भवता स्वसेनापतिष्वेवान्यतमोऽङ्गीक्रियताम्, दिल्लीश्वरेण च सह युद्धमारभ्यताम्। यो यौवराज्य-समय एव महासमरे चित्रार्पित इव चकितीकृतो भवता, यः प्राप्त-साम्राज्य-सिंहासनोऽपि बिभ्यदिव श्रीमन्तमितस्ततो महायुद्धेषु सम्प्रेष्य, श्रीमदनिष्टं शुश्रूषते, स सर्वथा दण्डेनैव शिक्षणीय आर्यैः। अस्मिन् महाकार्ये श्रीमत्प्रतिवेशी 'आमेर'-देशाधीशो न सह युङ्क्ते भवता चेन्निजभक्तो महाराष्ट्र-राज एव विधेयो विधीयताम्। ऐक्यं नास्तीति मा स्म भूच्छोकः श्रीमताम्। उद्योगेनैक्यमारभ्यताम्।

शिवो भारतीयानां पारतन्त्र्यं नावलुलोकयिषति, राज्यलोभस्तु तस्य नास्ति—इति विजये राज्यमिदमप्यत्र भवतामेव भवेत्, किन्तु यथा भारत-द्रुहाँ यवनानां प्राबल्येन प्रत्यहं धर्मलोपो न स्यात्,

बद्धकरसम्पुटः=कृतहस्ताञ्जलिः। भावत्कम्=भवदीयम्। अङ्गीक्रियताम्=स्वीक्रियताम्। सेनापतिमेव जानीहीति यावत्। यौवराज्यसमये=राज्याधिकारप्राप्त्यवसरे। चित्रार्पित इव=चित्रलिखित इव। चकितीकृतः=साश्चर्यीकृतः। यशस्विसिंहेनावरङ्गजीवस्य चादौ प्रत्यक्षं युद्धमभूत् पश्चादपि चान्तः-कलह आसीदितीतिवृत्तेषु प्रसिद्धम्। प्राप्तसाम्राज्यसिंहासनोऽपि=लब्धचक्रवर्तित्वपदोऽपि। बिभ्यदिव=भयं कुर्वाण इव। भवत इति शेषः। शुश्रूषते=श्रोतुमिच्छति। दण्डेनैव=न तु सामादिभिः। श्रीमत्प्रतिवेशी=भवद्देशसमीपदेशः। सहयुङ्क्ते=सहयोगं करोति। विधेयः=आज्ञाकारी। पारतन्त्र्यम्=वैदेशिकाधिपत्यम्। अवलुलोकयिषति=द्रष्टुमिच्छति। भारतद्रुहः=हैन्दवद्रोहकारिणः।

तथैव शिवस्याभिप्रायः।

यश०—राज्यं त्वस्माकमपि बह्वस्ति। वयमपि गर्द्धाभिभूता न स्मः। शिवस्योद्देश्यं चाखिलं प्रशस्यमस्ति। वयमपि शिवमवलोक्य क्षत्रियकुलस्य च सारवत्तामाकलय्य, मोदामहे, किन्तु शिवस्य व्यापारेष्वेकमेवास्मभ्यं न रोचते, यदेष चौराणां लुण्ठकानाञ्च वृत्तमनुसरति-इति।

महा०—महाराज मैवम्! किं कुत्रापि कुतश्चिदपि समश्रौषीच्छ्रीमान्; यन्निरपराधान् पथिकान् लुण्ठति महाराष्ट्र-राजः? आहोस्वित् कस्यापि भित्तिं भित्त्वा, धनमपजहार श्रीमान्? किन्तु लुण्ठकानामेषामत्याचारमसहमानो लुण्ठका यथा न लुण्ठेयुस्तथैतान् दण्डयति। सन्ति प्रबलाः परिपन्थिनः, भवादृशाश्च तेषामेव दत्त-हस्तावलम्बनाः। धर्मो हि सर्वथा रक्षणीयः। सतीत्वध्वंसन-मन्दिरावपातादिरूपो घोरतरो दुराचारः सर्वथा प्रतिरोद्धव्यः। आततायिनश्चावश्यमेव दण्डनीयाः—इति क्वचन परवशतया

क्त्विबन्तम्। प्रत्यहम्=प्रतिदिनम्। गर्द्धया=अतिलोभेन, अभिभूताः=तिरस्कृताः। प्रशस्यम्=अतिश्लाघ्यम्। सारवत्ताम्=बलयुक्तताम्। व्यापारेषु=कार्येषु। अस्मभ्यं न रोचते=अस्मत्प्रीतिकरो न भवति। "रुच्यर्थानां प्रीयमाण" इति सम्प्रदानसंज्ञा।

समश्रौषीत्=सम्यक् श्रुतवान्। निरपराधान्=दोषरहितान्। भित्तिम्=कुड्यम्। भित्त्वा=त्रोटयित्वा। सन्धिं कृत्वेति यावत्। अपजहार=चोरयामास। एषाम्=यवनानाम्। दण्डयति=पीडयति। परिपन्थिनः=विरोधिनः। सतीत्वध्वंसन-मन्दिरावपातादिरूपः=पातिव्रत्यविनाशनशिवालयादिविघटनप्रभृतिः। आततायिनश्चावश्यं दण्डनीयाः।

नीति–विशेषस्याप्याश्रयोऽपेक्ष्यते–इति किमियं लुण्ठकता ?

दिल्ली–कलङ्कस्तु प्राधान्येन श्रीमन्तमेव द्वेष्टि। श्रीमानपि तदुराचारमसहमानः शिवापेक्षयाप्यधिकतरस्तच्छत्रुः। श्रीमताऽपि शठे शाठ्यमिति मुद्रया कूटनीतिरङ्गीक्रियेत चेत्, किमियं लुण्ठकता स्यात् ?

यश०—[दीर्घामुष्णञ्च निश्वस्य] अथ मां किमभिदधाति शिवराजः ?

महा०—मरुराज ! स श्रीमतः साहाय्यमभयं च वाञ्छति।

यश०—दिल्लीश्वरेण सह कृतप्रतिज्ञः कथमन्यथा विधास्यामि ?

महा०—भगवन् ! ये हि रोदं रोदं पादयोर्विलुठतामपि ; त्रायध्वं त्रायध्वमिति सहाहाकार–चीत्कारै रोदसी रोदयतामपि

"आततायिनमायान्तं हन्यादेवाविचारयन्।"
"नाततायिवधे दोषो हन्तुर्भवति कश्चन॥"

"आततायी वधार्हण" इत्यादि शतशः स्मृतिपुराणेतिहासवचनैस्तेषां दण्डनीयत्वं सुव्यक्तम्। **परवशतया**=आवश्यकतयेति यावत्। **नीति-विशेषस्य**=

"व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः" इत्येवंरूपस्य। **अधिकतरः**=श्रेष्ठतरः। तच्छत्रुः, "शठं प्रति चरेच्छाठ्यमि" ति समाश्रयतो न शत्रुत्वं मित्रव्याजाच्छन्नं दोषावहम्।

"रामकृष्णेन्द्रादिदेवैः कूटमेवाद्दतं पुरा"

इत्यादिवचनशतेन नीतिकारैः सेतिहासप्रदर्शनं समर्थितमावश्यकञ्चेदमिति मन्तव्यम्।

रोदं रोदम्=रुदित्वा रुदित्वा। **रोदसी**=द्यावापृथिव्यौ। **रोदयताम्**=

दारा अपहरन्ति, इष्टदेव-प्रतिकृतीश्चूर्णयन्ति, बालान् वृद्धांश्च सकष्टं घ्नन्ति, तेषामेषां दुर्विनीतानामाततायिनां बलेनापि छलेनापि च दण्डनं परम-पुण्यमेव; न पापम्। स्वयमेव धर्म-मर्म-गौरव-लाघवाभ्यामालोचनीयोऽयं विषयः।

यश०—[चिरं तूष्णीं चिन्तयित्वा, आत्मनोऽप्यवरङ्गजीवस्य राज्य-प्राप्तेरपि पूर्वसमयमारभ्याद्यावध्यन्तरेव जाज्वल्यमानम्, क्रमतो गुरुरूपेणैव प्रवर्द्धमानम्, क्वचित् क्वचित्स्फुटमुपदृश्यमानं कथङ्कथमपि वीरवर-जयसिंहादिभिरुपशम्यमानम्महावैरं विचार्य, नैजमपि च महादेव-सदृशमेव सिद्धान्तं विभाव्य सर्वम्मनस्येव निगीर्य्य प्रकृतानुरूपमाह]

-दूतप्रवर! दिल्लीश्वरं "महाराष्ट्रैः सह योत्स्ये"-इति कथयित्वा समायातोऽस्मि, तद् योत्स्ये।

महा०——सत्यं योत्स्यते, स्व-वंश-जातानामेव क्षत्रिय-बालकानां वक्षश्छुरिकाभिर्विदारयिष्यते। सद्यश्छिन्न-ब्राह्मण-

विलापयताम्। **दाराः**=स्त्रीः। हेमचन्द्रानुसारि-पूर्वप्रदिर्शित-टाबन्तस्य शसि। "पुं भूम्नि दारा" इति कोशोक्तस्य तु दारानित्येव। **इष्टदेवप्रतिकृतीः**=रामादिप्रतिमाः। **छलेनापि**=कूटनीत्याऽपि। **धर्ममर्मगौरवलाघवाभ्याम्**, धर्मस्य हि सूक्ष्मा गतिः, कियन्तोऽधर्मत्वेनापाततो भासमाना धर्माः, कियन्तश्च धर्मत्वेन भासमाना अधर्मा इति शतशः स्मृतिवचनैः स्पष्टीकृतम्।

जाज्वल्यमानम्=अतितरां ज्वलत्। **क्रमतः**=शनैः शनैः। **प्रवर्द्धमानम्**=वृद्धिं गच्छत्। **उपशम्यमानम्**=निर्वाप्यमानम्। **निगीर्य्य**=निपीय। **प्रकृतानुरूपम्**=स्थित्यनुकूलम्।

दिल्लीश्वरम्, कथयित्वेत्यस्य कर्म। **वक्षः**=उरःस्थलम्। **छुरिकाभिः**=

कन्धर-विगलद्रुधिर-प्रवाहैर्भगवती वसुमती स्नपयिष्यते। यवन-हस्तेष्वधिकारं समर्प्य महामांस-दिग्धा च भारतभूर्द्रक्ष्यते—

इति प्रस्फुरिताभ्यामधराभ्यामरुणिमाञ्चिताभ्यां च प्रस्फारिताभ्यां नयनाभ्यामचकथत्।

यशस्विसिंहस्तु तदाकर्ण्य, स्थगित इव, चकित इव, ह्रीत इव, अवहेलित इव, आक्षिप्त इव, पुत्तलीकृत इव, क्षणमधः, क्षणं पुरः, क्षणं त्रिवली-मण्डिते महादेव-ललाटे, क्षणं च नासाग्रे, दत्तदृष्टिः, अवागिव, स्तब्धवागिव, मन्त्रित इव च, तूष्णीमेव तस्थौ।

कृपाणीभिः। **विदारयिष्यते**=द्वैधीकरिष्यते। **सद्यश्छिन्नेभ्यः**=तत्कालकृत्तेभ्यः, **ब्राह्मणकन्धरेभ्यः**=विप्रग्रीवाभ्यः, **विगलताम्**=पतताम्, **रुधिराणाम्**=लोहितानाम्, **प्रवाहैः**=धाराभिः। **वसुमती**=धरणी। **स्नपयिष्यते**=रक्तरञ्जिता विधास्यत इति यावत्। **महामांसेन**=गोमांसेन, **दिग्धा**=क्लिन्ना। **द्रक्ष्यते**=अवलोकिष्यते।

प्रस्फुरिताभ्याम्=प्रचलद्भ्याम्। **अरुणिमाञ्चिताभ्याम्**=लौहित्यभूषिताभ्याम्। **प्रस्फारिताभ्याम्**=विकाशिताभ्याम्। **अचकथत्**=कथयामास।

स्थगित इव=निश्चेष्ट इव। **चकित इव**=साश्चर्य इव। **ह्रीत इव**=लज्जित इव। "ह्रीणह्रीतौ तु लज्जित" इत्यमरः। **अवहेलित इव**=तिरस्कृत इव। **आक्षिप्त इव**=निरस्त इव। **पुत्तलीकृत इव**=कृत्रिममानवाकृतीकृत इव। **त्रिवलीमण्डिते**=वार्द्धक्योत्थशिरोरेखात्रयभूषिते। **अवागिव**=मूक इव। **स्तब्धवाक्**=जडीकृतभाषः। **मन्त्रितः**=मन्त्रैः कीलितः। **तूष्णीम्**=अभाषणपरः। किं वा भाषेत, तादृशीं भाषां निशम्य। भारतीयत्वाभिमानिभिः श्रोतव्ये-

महा०-धर्म-मर्मज्ञ ! प्रार्थनामात्रमस्मादृक्षाणाम् ; कार्यस्वीकारे तिरस्कारे वा प्रभव एव प्रमाणम् ।

यश०-पण्डित ! भवादृशा वा भवादृशानां मन्त्रणा वा तिरस्करणीया न भवन्ति । किन्तु स्वच्छेन हृदा स्वाभिप्रेतं प्रकटयति महाराष्ट्र-राजे, नीति-गर्भं स-धर्मोपदेशं च मन्त्रयमाणे भवादृशे वाग्मिनि, अहमपि हृद्गतानां निज-विचाराणामाच्छादनमयुक्तं मन्ये-इति तथा कथितवानस्मि । शिवस्य सर्वोऽप्युद्देशो मह्यं रोचते, परं भवानेव विचारयतु प्रतिज्ञाविरुद्धाचरणं महतां कार्यं वा ?

महा०-महाराज ! यं भवान् 'दिल्लीश्वरः'-इति ब्रूते, तस्यैव राक्षसोचितानि कर्म्माणि दृश्यन्ताम् : आत्मनो जनन-पोषणहेतुभूतस्य, वली-पलितस्य, सक्रन्द-नयन-जलसिक्त-श्वेत-श्मश्रु-कूर्चस्य पितुः, सावहेलं निगृह्य कारागारे स्थापनम् , महतां कार्यं

यमेकदा संस्कृतपण्डितवचनावली ।

मन्त्रणा=विचारणा । **तिरस्करणीयाः**=अनादरणीयाः । पुंस्त्रियोरेकशेषः । विभक्तिश्लेषो वा । **स्वच्छेन**=पूतेन, **स्वाभिप्रेतम्**=निजाभिमतम् । **नीतिगर्भम्**=नयमिश्रम् । **आच्छादनम्**=गोपनम् । **कार्यं वा ?** नीचानां वेति शेषः । वास्तवं धर्म्यं पन्थानमविज्ञायापाततो निरूपयतीति स्पष्टमेव ।

राक्षसोचितानि=राक्षसैरेव कर्तुमर्हाणि । **जननस्य**=उत्पत्तेः, **पोषणस्य**=रक्षणस्य च **हेतुभूतस्य**=कारणतां गतस्य । **वलीपलितस्य**=जरसा शुक्लकेशस्य । **क्रन्देन**=रोदनेन, सह **यन्नयनजलम्**=यदस्रम् , **तेन सिक्तौ**=आर्द्रीकृतौ श्मश्रुकूर्चौ यस्य तस्य । **सावहेलम्**=सतिरस्कारम् । **कारागारे**=चारके ।

वा ? यैः सह जननी-करस्थ-मोदकमहमहमिकया समाच्छिद्य भुक्तम्, तात-तातेति-भाषणैः क्रीडा-कौतुकैश्च पूर्वं वयो व्यत्यायितम्, तेषामेव सोदर्याणां सच्छलं सदर्पं सक्रौर्यं च मारणम्, ईदृशीभिर्हत्याभिरपि सोद्दण्डभावं लज्जानावहनञ्च महतां कार्यं वा ? केवलमार्य-स्वभावानामार्य-जनानां क्लेशनार्थमेव गो-हिंसनम्, प्रतिमा-खण्डनम्, दीन-हीन-सनातन-वैदिकधर्म-शरणानामेवास्माकं "जीवं-जीवं" करग्रहणं महतां कार्यं वा ? वाराणस्यादि-देव-तीर्थेषु बलात् पातितानां मन्दिराणां भग्नावशेषैः कपाट-देहली-पाषाणेष्टिकादि-प्रचयैरेव स्वमज्जितरचना च महतां कार्यं वा ? अन्तःस्थं किञ्चन पुरातनं वैरं संस्मृत्य, खरतरयुद्धेष्वत्रभवत एव प्रेषणम्, भवदनिष्टचिन्तनञ्च महतां कार्यं वा ? यशस्वि-शिवयोर्यतर एव महावीरो महाराष्ट्र-युद्धेऽस्मिन् शयिष्यते, ततर एव गिरि-गुरु-महाभार इव भारतमहावीरः प्रशममेष्यति-इति विचा-

जननीकरस्थ-मोदकम्=मातृहस्तस्थमिष्टान्नम्। **अहमहमिकया**=अहं पूर्वमहं पूर्वमित्येवं भाषणपूर्वम्। "अहमहमिका तु सा स्यात्परस्परं यो भवत्यहङ्कारः"। **क्रीडाकौतुकैः**=लीलाकौतूहलैः। **व्यत्यायितम्**=यापितम्। **सोदर्याणाम्**=भ्रातॄणाम्। **सोद्दण्डभावम्**=सक्रूरतम्। **लज्जानावहनम्**=त्रपाया अनङ्गीकरणम्। **आर्यस्वभावानाम्**=श्रेष्ठप्रकृतीनाम्। **जीवंजीवं-करग्रहणम्**=हिन्दुभ्यो "जिजिया" नामकं राजस्वं लगितमवरङ्गजीवनकाल इति नेतिवृत्तविदां निरूहितम्। **कपाटस्य**=अररस्य, **देहल्याः**=गृहावग्रहण्याः, **पाषाणस्य**=प्रस्तरखण्डस्य, इष्टकादेश्च **प्रचयैः**=समूहैः। **स्वस्य मज्जितम्**="मस्जिद्" इति ख्यातं यावनदेवस्थानम्, तस्य रचना। **खरतर-युद्धेषु**=भयङ्करतरसङ्ग्रामेषु। **यतरः**=

र्य्येव श्रीमतोऽत्र प्रेषणं महताङ्कार्यं वा? येषां दुराचाराणां दलनाय क्षमापि क्षमां त्यजति, समुद्रोऽपि मर्य्यादामुल्लङ्घते, भगवान्नारायणोऽपि च करुणां जहाति, तेषां दुर्वृत्तानां दण्डनं भवादृशानां महाराजानामुचितम् ? उत प्रतिज्ञा-पालन-व्याजेन महापातकवर्द्धनम्? इति स्वयमेव विविनक्तु श्रीमान् !!

यश०—[किञ्चिद्विचिन्त्य] दूतवर ! तव वाग्मिता मां बलेन वाचंयमं विधत्ते, किन्तु शिवस्य वञ्चकता कर्ण-परम्परयाऽस्मद्देशेऽपि प्रतिगृहं प्रसृताऽस्ति. तत् कथमहमेतस्य प्रस्तावेषु विश्वसिमि ?

महा०—(सक्रोधमिव) "महाराज ! महाराज !! खलु खलु प्रोच्चैवम !! मा स्म सनातन-धर्मैक-शरणं महाराष्ट्र-राजमेवं मिथ्या-कलङ्क-पङ्केनाङ्कय ! को ब्राह्मणः, क्षत्रियः, वैश्यः, शूद्रो वा तेन वञ्चितः ? म्लेच्छेष्वेव वा सज्जनः कोऽवमानितः ? अपि तु धर्म-मर्य्यादा-घस्मराणामपि प्रत्यर्थिनां व्यर्थहिंसा सदैव तेन

यथोरेकः । **गिरिगुरुमहाभार इव**=हिमालयभार इव । **क्षमा**=पृथिवी । **क्षमाम्**=क्षान्तिम् । **मर्यादाम्**=वेलाम् । **प्रतिज्ञा-पालन-व्याजेन**=स्वीकृत-निर्वहण-च्छद्मना । **विविनक्तु**=विचारयतु । न धर्मस्य वास्तविकं गौरवं लाघवञ्च त्वया विचारितमिति मतम् । **वाग्मिता**=सती भाषणशैली । **वाचंयमम्**=मौनिनम् । **वञ्चकता**=कपटपटुता । **अस्मद्देशेऽपि**=राजपुत्रस्थानेऽपि । सकलभारतस्यैकदेशत्वकल्पना न तेषामासीदित्यपि पारस्परिककलहकारणम् ।

सक्रोधमिव,-सत्यपि क्रोधकारणे नीतिनिपुणतया न क्रोधं वस्तुतोऽङ्गीकृतवानितीवव्यङ्ग्यम् । **मिथ्याकलङ्कपङ्केन**=असत्यापवादकर्दमेन । **अङ्कय**=चिह्नितं कुरु । **धर्ममर्यादाघस्मराणाम्** = सनातनसीमाविध्वंसिनाम् ।

निवार्यते। अहह! देव! न शोभते युष्मादृक्षाणां मुखादेवं कलङ्क-नम्-" इत्युक्तवत एव महादेव-पण्डितस्य चक्षुषी बाष्प-बिन्दु-द्वयमुदगिरताम्। महादेवश्च पटप्रान्तेन प्रामार्ट्।

तदालोक्याकस्मादेव मरुराजस्यापि प्रेम-पारावार-पूराप्लु-तमिव हृदयम्, बाष्पोद्गारेण सिक्तमिव पक्ष्म-पङ्क्ति-युगलम्, पुल-कोदञ्चित-रोम-राजिभिः कण्टकितमिव शरीरम्, उत्साहसुधा-सारैश्च मुदितमिव मनः, समजनि।

ततश्च महाराज उन्नतं वीरासनेन स्थित्वा, "पण्डित! क्षम्य-ताम्, अद्यावधि मित्रं मे महाराष्ट्र-राजः, साम्प्रतमहं तमालिलि-ङ्गिषामि, तन् सपदि दर्शय तं क्षत्रिय-कुलावतंसम्"-इति भाषि-तवान।

महादेवस्तु तदाकर्ण्य, व्यजनिनो मुखमवलोक्य, महाराजं चावलोक्य, शनैः प्रोक्तवान्-यद् "अचिरादेव शिवः समुपस्था-स्यते श्रीचरणयोरन्तिके" महाराजस्तु तृतीयेनाश्रवणीयं किञ्चन

बाष्पबिन्दुद्वयम्=अस्रपृषद्द्वयम्, उदगिरताम्=बहिर्निरसारयताम्। पटप्रा-न्तेन=वसनकोणेन। प्रामार्ट्=प्रौञ्छीत्।

मरुराजस्य=यशस्विसिंहस्य। प्रेमपारावारपूराप्लुतमिव=स्नेह-समुद्र-प्रवाह-व्रुडितमिव। बाष्पोद्गारेण=अश्रुप्रवाहेण। पक्ष्मपङ्क्तियुगलम्=नेत्र-लोमराजिद्वयम्। पुलकोदञ्चितरोमराजिभिः=प्ररूढहर्षोच्छ्रितलोमावलिभिः। उत्साहसुधासारैः=उत्साहपीयूषसम्पातैः।

उन्नतम्=क्रियाविशेषणम्। वीरासनेन=बलशालिस्थितिप्रकारविशेषेण। आलिलिङ्गिषामि=आलिङ्गितुमिच्छामि। सपदि=शीघ्रम्।

वचनीयमवशिष्यते-इत्याकलय्य, व्यजनिनं भ्रू-सञ्ज्ञया बहिर्याप-यित्वा, पुनर्महादेव-पण्डितमपृच्छत्-"कथय, कथय, कदाऽहं प्रियस्य शिवराजस्य परिष्वङ्गेन म्लेच्छ-पक्षावलम्बन-ग्लानि-ग्लपितमात्मानं मोदयिष्ये-" इति।

अथ महादेवस्तु नम्रीभूय, को जानीते किमिव तस्य कर्णेऽच-कथत्। यशस्विसिंहश्च तदाकर्ण्य, सचकितं सप्रफुल्लनयनं द्विस्त्रिश्चा-ऽऽमस्तकमापादं च महादेवं निपुणं निरीक्ष्य, ससम्भ्रममुत्थाय, तथैवोत्थितं महादेवम्, बाहू प्रसार्य, सानन्दं परिषस्वजे। द्विस्त्रि-र्गाढमालिङ्ग्य च स्वाधिष्ठितोन्नत-तूलिकास्तरण उपधान-समीपे महादेवेन सहोपविश्य, मुहूर्त्तं यावत् सगोपनं शनैः शनैर्बहु सँल-लाप ; तावन्निशीथ-समय-सूचको भेरीनादः समश्रावि। महा-

व्यजनिनः=व्यजनवाहकस्य। उभयमुखनिरीक्षणेन व्यजनी श्रोष्यतीति न वच्मि किमपीति सूचितवान्। **अश्रवणीयम्**=अश्रोतव्यम्। **वचनीयम्**=वक्त-व्यम्। **यापयित्वा**=प्रापयित्वा। **परिष्वङ्गेन**=आलिङ्गनेन। **म्लेच्छानाम्**= यवनानाम्, **पक्षावलम्बनेन** पक्षग्रहणेन, या **ग्लानिः**=घृणाविशेषः, तया **ग्लपितम्**=क्षीणहर्षम्। **मोदयिष्ये**=हर्षयिष्ये।

नम्रीभूय तस्य कर्णेऽचकथदिति सम्बन्धः। किमकथत्-तत्राह-**को जा-नीते किमिवेति**। भाषणचातुर्यं शिवस्य ग्रन्थकर्तुश्च।

सप्रफुल्लनयनम् = सविकसितनेत्रम्। **आमस्तकम्**=शिरःपर्यन्तम्। **आपादम्**=चरणमारभ्य। **ससम्भ्रमम्**=सशीघ्रतम्। **परिषस्वजे**=आलि-लिङ्ग। **द्विः**=वारद्वयम्। **त्रिः**=वारत्रयम्। सुजन्ते। स्वेनाधिष्ठिते, **उन्नते**= उच्चे, **तूलिकास्तरणे** = तूलवद्विष्टरे। **उपधानसमीपे**=उपबर्हान्तिके।

देवस्तु समाकर्ण्य तत्, प्रतिनिवृत्सुरिवोदतिष्ठत्, सपदि सप्रश्रयं महाराजं न्यवेदयच्च-करुणाकर! श्वो रात्रौ पुण्यनगरात् कियक्रोशान्तराल एव केनापि व्याजेन स्थीयतां महाराजेन।

मरुराजः समप्रच्छत्-तत् किं पुण्यनगरमाचिक्रंसते भवान् श्वः?

महा०-औद्वाहिकी वरयात्रा भवित्री।

यश०-बाढम्! अहमपि श्वो वाताहत-भीमा-शीकर-शीतलीकृते क्रमुक-कानने मृगयाभिरात्मानं विनुनोदयिषामि।

महा०—आम्! अतिसमीचीनमदः।

यश०—[मन्दं स्मयमानो महादेवमुखमवलोक्य] धन्योऽसि पण्डित! खरतर-फक्किकासु विप्रतिपत्तिषु च ते महाभ्यासः।

महा०—[कन्धरां नमयित्वा स्मित्वा च] असंख्यावच्छेदकतानल्प-कल्पन-कल्पतरौ तर्कशास्त्र एव मम महान् अभ्यासः,

मुहूर्त्तम्=क्षणम्। **संललाप**=सम्यगालापं कृतवान्। **प्रतिनिविवृत्सुः**=प्रतिनिवर्त्तुमिच्छुः। **सप्रश्रयम्**=सनम्रतम्।

आचिक्रंसते=आक्रान्तुमिच्छति,

वरयात्रा="बारात" इत्यपभ्रंशीभूतो लोके।

वाताहतायाः=वायुसञ्चालितायाः, **भीमायाः**=तन्नाम्न्या नद्याः, **शीकरैः**=जलकणैः, शीतलीकृते **क्रमुककानने**=पूगविपिने। **विनुनोदयिषामि**=विनोदयितुमिच्छामि।

अतिसमीचीनम्=अतिशोभनम्। **अदः**=इदम्।

खरतरफक्किकासु = कठोरपङ्क्तिषु। **विप्रतिपत्तिषु** = विरुद्धकोटिद्वयोपस्थापकेषु शब्देषु विपत्तिषु च। **असङ्ख्यानाम्**=अनेकासाम्, **अवच्छे-**

येन खड्गा आस्माकीना अवच्छेदकाः, दुरात्मानो यवन-म्लेच्छाश्च, अवच्छेद्या इति शिक्षितवानस्मि।

यश०—किन्तु छात्रता चिरं त्यक्तेति तद्विद्या-शैथिल्यमपि सम्बोभवीति।

महा०—महाराज! भवत्कृपया छात्रतां त्यक्त्वाऽध्यापकता-मङ्गीकृतवानस्मि, साम्प्रतं परःसहस्रा मम छात्रा एव विवादे विजयमासादयितुमलम्।

चिरत्यक्ताध्ययनस्यापि मे विद्यया दिल्लीश्वरोऽपि विस्मि-तवानस्ति।

अथ द्वावपि हसन्तौ मन्दमन्दमालपन्तौ द्वार-पर्य्यन्तमा-यातौ। निवर्त्तमानं महादेवमनुमन्यमानः, श्रीमान् मरुधराधीशः, पुनः प्रोवाच—"द्रष्टव्यम्, युद्धविषये यथाऽऽलापो जातस्तथैव विधेयम्"।

महा०—आम् श्रीमन्! तथैव विधातुं विनिवेदयिष्यामि तत्र भवन्तम्।

दृकतानाम्=विशेषकधर्माणाम्, खण्डनतानां वा, **अनल्पस्य**=अत्यधिकस्य, **कल्पनस्य**=परिष्करणस्य, **कल्पतरौ**=कल्पवृक्षे, श्रीवाचस्पतिमिश्रीयभामत्या उपरि श्रीमदमलानन्दसरस्वती-प्रणीतो वेदान्तग्रन्थोऽपि कल्पतरुः, तत्तुल्यतां नामसाम्येन ध्वनयति। **तर्कशास्त्रे**=न्यायशास्त्र इत्यर्थः। **अवच्छेदकाः**=खण्डकाः। **अवच्छेद्याः**=खण्ड्याः।

छात्रता=छात्रस्य भावः। पराधीनतेति तत्त्वम्।


अध्यापकताम्=शासनकारितां स्वतन्त्रताञ्च।

विवादे=विरुद्धे वादे, शास्त्रार्थे, सङ्ग्रामे च।

यश०—आ ! एवम् , विस्मृतवानस्मि। तथैव विधातुं महाराष्ट्र-राष्ट्र-सृष्टि-परमेष्ठी निवेदनीयः श्रीमान् शिववीरः ।

ततो बाढमित्यभिदधद् महादेवः प्रचलितः, मरु-मेदिनीपरिवृढोऽपि च किञ्चित् स्मयमानोऽन्तः प्रविवेश ।

इति षष्ठो निश्वासः



महाराष्ट्राणां राष्ट्रस्य **सृष्टेः**=उत्पत्तेः, **परमेष्ठी**=पितामहः । **मरुमेदिनी परिवृढः**=मारवधराधिनाथः । **अन्तः**=मध्ये, उपकार्यायाः ।

इति श्रीशिवराजविजयवेजयन्त्यां षष्ठनिश्वासविवरणम्



अयं रेवा-कुञ्जः कुसुमशर-सेवा-समुचितः
समीरोऽयं वेला-दर-विदलदेला-परिमलः ।
इयं प्रावृड् धन्या नव-जलद-विन्यास-चतुरा
पराधीनं चेतः सखि किमपि कर्तुं मृगयते ॥

—कविरत्नभानुदत्तः

सप्तमे निश्वासे सौवर्ण्या भविष्यतः सम्बन्धस्य प्रथमपरिच्छेदरूपमनुराग-मौत्सुक्यञ्च वर्णयिष्यति, तदुपक्षिपति कविरत्नभानुदत्तवचसा–अयं रेवाकुञ्ज इति । **अयम्**=पुरोदृश्यमानः । **रेवायाः**=एतन्नामिकायास्तरङ्गिण्याः, **कुञ्जः**=लतादिपि-हितद्वारविशेषः । एतेन परकीयचक्षुरविषयत्वसूचनद्वारोद्दीपकत्वं ध्वनितम् । विशिनष्टि कुञ्जम्–**कुसुमानि**=पुष्पाणि, **शराः**=बाणा यस्य तस्य । **सेवायै**=उपासनायै, **समुचितः**=अत्यन्तमुपयुक्तः । रहसि हि सेविता देवा मनोऽभिल षितमानन्दं समुपस्थापयन्तीति देवप्रियजनप्रतीतिः । वस्तुतस्तु कुसुमशरसेव पुङ्कर्तृका कामिनीसन्तर्पणमेव, स्त्रीकर्तृका च कामुकसन्तर्पणमेवेति वेदितव्यम्– तदुत्थश्चानन्दो ब्रह्मानन्दसहोदर इति नाविदितचरं विदितवेदितव्यानाम् । **वेलायाम्**=तटे, **दरम्**=ईषत्, **विदलन्तीनाम्**=विकसन्तीनाम्, **एलानाम्**=चन्द्रबालानाम्, **परिमलः**=सौगन्ध्यम्, यस्मिन् तादृशः । **समीरः**=पवनः । अस्याप्युद्दीपकत्वं स्फुटमेव । **इयम्**=एषा । **प्रावृट्**=वर्षाकालः । **धन्या**=रमणीया । कथम्भूता प्रावृडित्याह–**नवानाम्**=नवीनानाम्, **जलदानाम्**=वारिदानाम्, **विन्यासेषु**=विभिन्नरूपेणोत्थापनेषु, **चतुरा**=दक्षा । **सखि**!=हे आलि! । एतेन हार्दिकभावप्रकटीकरणयोग्यत्वं ध्वनितम् । **चेतः**=मान-सम् । **पराधीनम्**=परस्य मनसैवेष्टव्यस्य, आयत्तीकृतम् । **किमपि**=अनिर्वाच्यम् । **कर्त्तुम्**=विधातुम् । **मृगयते**=अन्विष्यति । विरहिण्या उक्तिः । अनुप्रासः ।

"गर्ज गर्ज क्षणं मूढ !"

—चण्डी

क्रामन्त्यः क्षत-कोमलाङ्गुलि-गलद्रक्तैः सदर्भाः स्थलीः,
पादैः पातित-यावकैरिव गलद्बाष्पाम्बु-धौताननाः ।
भीता भर्तृ-करावलम्बित-करास्त्वद्वैरि-नार्योऽधुना
दावाग्निं परितो भ्रमन्ति पुनरप्युद्यद्विवाहा इव ॥

—स्फुटकम्

अत्रैव निश्वासे शास्तिखानस्य पराजयमपि दिदर्शयिषुरिति सप्तशतीसङ्गृहीतं महामायाभिहितं मन्त्रैकखण्डमपि स्मारयति–"**गर्ज गर्ज क्षणं मूढ !**" तत्र महिषासुरो वाच्यः ।

पराजिते शास्तिखाने तदीयवनितानां क्रन्दनादिकमपीहैव वर्णनीयमिति तदप्युपक्षिपति–**क्रामन्त्य** इति । कवेरुक्तिः कमपि नरपतिं प्रति । **अधुना**=सम्प्रति । **त्वद्वैरिनार्यः**=त्वदीयशत्रुवनिताः । **पुनरपि**=भूयोऽपि । **उद्यद्विवाहा इव**=समुपस्थितविवाहकाला इव । **दावाग्निम्**=वनाग्निम् । **परितः**=सर्वतः । **भ्रमन्ति**, लाजहोमे वह्निप्रदक्षिणा प्रसिद्धा साङ्गुष्ठहस्तग्रहणञ्च । वनिता विशिनष्टि–**क्षताभ्यः**=कुशादिना विदारिताभ्यः, **कोमलाभ्यः**, **अङ्गुलिभ्यः**=चरणजाभ्यः, **गलत्**=पतत्, **रक्तम्**=लोहितं, येषु तैः । **पादैः**=चरणैः । उत्प्रेक्षते **पातितयावकैरिव**=लिप्तालक्तकैरिव । **सदर्भाः**=कुशकाशमयीः । **स्थलीः**=स्थण्डिलभूमीः । होमेऽपि वेदिकामभितः कुशाः प्रस्तीर्यन्त इति न विस्मर्त्तव्यम् । **क्रामन्त्यः**=लङ्घयन्त्यः । **गलता**=प्रच्यवता, **बाष्पाम्बुना**=अश्रुजलेन, **धौतम्**=प्रक्षालितम् , **आननम्**=मुखं यासां ताः । होमकाले धूमव्याप्तदृष्टित्वाद्रोदनमिह च खेदात् । **भीताः**=भयाश्रयीभूताः । इह रिपोस्तत्र च वरादिति

अहह ! चिररात्राय भ्रान्तमस्मन्मनः पुण्यनगरान्धतमस–वीथिकासु। क्षणं तोरण–दुर्गोपत्यकोद्यान–भ्रमणैरात्मा विनोदनीय इति दृश्यतां कीदृश आनन्द–सन्दोहोऽत्रेति। तोरण–दुर्गसमीप एव सुदृढं सुन्दरं मारुति–मन्दिरम्, ततोऽपि पूर्वतः क्रोशार्द्ध यावद्विस्तृतं रमणीयमुद्यानम्। अर्द्धव्यतीतोऽयमाषाढः, कदाचिज्जलद–पटलाच्छन्नम्, कर्हिचिच्च निर्मेघमपि सान्द्र–नीलम्, गगनतलमालोक्यते। क्वचिन्मयूर–नृत्यानि, क्वचिच्चातक–विरावाः, क्वचिज्जल–प्रवाहाः, क्वचिद्धारासाराः, क्वचनेन्द्रगोप–संसर्गाधिक–मनोहराणि शाद्वलानि प्रतिभान्ति। पञ्चपाणि दिनानि चण्डकर–करैः संसारं

चिन्त्यम्। **भर्तृणाम्**=पतीनाम्, **करेषु**=हस्तेषु. **अवलम्बिताः** करा यासां ताः।

अहह!, कवेरुक्तिः। लेखशैलीयमेका। **चिररात्राय**=चिरम्। पुण्यनगरस्य, **अन्धतमसवीथिकासु**=गाढान्धकारव्याप्तलघुपथेषु। तोरणदुर्गस्य **उपत्यकायाम्**=अद्रेरासन्नभूमौ, **उद्यानस्य**=वाटिकायाः. **भ्रमणैः**=पर्यटनैः। **आत्मा** = अन्तःकरणम्। **विनोदनीयः** = आनन्दयितव्यः। **आनन्दसन्दोहः**=आह्लादसमूहः। **सुदृढम**=सुघटितम्, त्रोटयितुमनर्हमिति यावत्। **विस्तृतम्**=विस्तीर्णम्। **आषाढः**=मासविशेषः। **जलदपटलाच्छन्नम्**=मेघसमूहप्रावृतम्। **सान्द्रनीलम्**=घनीभूतनीलम्, अतिनीलम्। चातकस्य **विरावाः**=शब्दाः। **धारासाराः**=धाराप्रपाताः। **इन्द्रगोपानाम्**=वर्षकालिकरक्तवर्णकीटविशेषाणाम्, **संसर्गेण** = सम्पर्केण, **अधिकमनोहराणि**=नितान्तरम्याणि। **शाद्वलानि**=शाद्वलवन्ति क्षेत्राणि। "नडशादाड्ड्वलच्"। "शाद्वलः शादहरित" इत्यमरः। इह अर्श आद्यजन्तम्। एवञ्च न नप

सन्ताप्य, अद्य कैश्चिन्मेघ-खण्डैः किमपि व्याप्तं नभः-इत्युष्णता किञ्चित् क्रशिमानमालम्बते।

मारुतिमन्दिरात् किञ्चिद् दूरं वाटिकामध्ये सुदृढौ द्वौ स्तम्भौ, तयोरुपरि तिर्य्यग् विन्यस्तो दारु-स्तम्भः, एतन्मध्यत एव विलम्बमानं शृङ्खलायुग-द्वयम्, एतत्प्रान्ते च विलम्बमाना प्रतिकोणासक्तैक-शृङ्खला, सुरुचिरा पीठिकेति सुभगेयं दोलिका। सर्वतोऽप्यस्यां शिल्पि-शिल्प-चमत्कारः, विविधा लताश्च स्तम्भौ वेष्टयित्वा पारस्परिक-सर्वाङ्गीण-संश्लेषेणेव प्रफुल्लास्तथाऽवतिष्ठन्ते; यथा विविध-कुसुममयी भ्रमद्-भ्रमर-निकर-झङ्कृता दोलिकेयं

सकृत्वदर्शनाद्धीतिलेशः। वस्तुतस्तु "लिङ्गमशिष्यं लोकाश्रयत्वादि"ति महाभाष्यकारोक्तेः श्रीहर्षदेवीये "शय्या शाद्वलमासनं शुचि शिले"त्यादिलोके नपुंसकप्रयोगदर्शनाच्च नामरप्रामाण्यात्पुंस्त्वमात्रमाश्रयितव्यमिति विदुषां सम्मतिः। प्रतिभान्ति=शोभन्ते। चण्डकरकरैः=भास्करदीधितिभिः। क्रशिमानम्=कृशताम्। "पृथ्वादिभ्य इमनिज्वा"। "रक्तोहलादेर्लघोः"।

सुदृढौ=सुपुष्टौ। तिर्य्यक्=तिरश्चीनः। "पट्" इति हिन्दी। दारुस्तम्भः=काष्ठस्थूणा। शृङ्खलायुगयोर्द्वयम्, द्वे द्वे शृङ्खले स्थानद्वय इति भावः। एतत्प्रान्ते=शृङ्खलान्तभागे। विलम्बमाना=तत्साहचर्येण निम्नभागे स्थिता। कोणं कोणं प्रतिकोणम्, आसक्ता=लग्ना, एका शृङ्खला यस्याः सा। सुभगा=शोभना। दोलिका=क्रीडार्थदोलायन्त्रम्। शिल्पिशिल्पचमत्कारः=कारुनिर्माणकौशलम्। पारस्परिकेण=आन्योन्येन, सर्वाङ्गीणेन=निखिलशरीरभवेन, सर्वविधेनेति यावत्, संश्लेषेण=संसर्गेण। प्रफुल्लाः=पूर्णतया विकसिताः। भ्रमताम्=सञ्चलताम्, भ्रमराणां निकरैः, झङ्कृता=निनादिता।

दर्शनमात्रेण चक्षुष्मतां मनो हरति। एतद्दोलिकाधिष्ठित-शाद्वलस्य मध्ये मध्ये श्वेत-श्यामादि-पाषाणनिर्मिता रमणीया आसन्द्यः, प्रत्यासन्दि चोभयतः प्रफुल्लसुमाः क्षुपाः, प्रतिक्षुपमालवालेष्वपि सकोरका विविधा अङ्कुराः शोभन्ते। वर्तुल-क्षेत्रं चैतत् परितः कुसुमिताः कदम्बकुटाः, तेषां चैकैकमन्तरा महाफला माकन्द-द्रुमाः, मध्ये मध्ये च विहितपार्श्वस्थ-पादपाश्लेषा मन्दमन्दम-निलालोला लता लसन्ति।

अमूं दोलां समवयस्कास्तिस्रश्चुम्बितयौवनाः सुन्दर्यः समारूढाः। एका हस्ताभ्यां शृङ्खले धृत्वा मध्ये समुपविष्टा, इतरे च

चक्षुष्मताम्=वास्तविकरूपेण द्रष्टुं शक्तिमताम्, रसिकानामिति यावत्। अरसिकास्तु काष्ठकुड्याश्मसन्निभाः सत्यपि नेत्रद्वये किमवलोकयेयुः। एतया दोलिकयाऽधिष्ठितस्य **शाद्वलस्य**=सशादस्य। **आसन्द्यः**=आसनविशेषाः। "कुर्सी" इति हिन्दी। प्रफुल्लानि **सुमानि**=कुसुमानि येषु ते। **क्षुपाः**=ह्रस्वशाखा द्रुमाः। **आलवालेषु**=जलाधारेषु वृक्षपरितो रचितेषु। **सकोरकाः**=सकलिकाः। **अङ्कुराः**=नूतनोद्भिदः। **वर्त्तुलं च तत् क्षेत्रम्**=गोलस्थलम्। **परितः**=सर्वतः। तद्योगे द्वितीया। **कदम्बकुटाः**=कदम्बवृक्षाः। **महाफलाः**=बहुफलमयाः। **माकन्दद्रुमाः**=आम्रवृक्षाः। **विहित-पार्श्वस्थ-पादपाश्लेषाः**=कृतासन्नवृक्षसम्पर्काः। **अनिलेन**=वायुना, **आलोलाः**=ईषच्चञ्चलाः। **लताः**=व्रततयः। **लसन्ति**=शोभन्ते। द्रुमाणां लतानाञ्च प्रस्तुते सम्पर्के समभिधीयमानेऽप्रस्तुतानां नायकनायिकानामालिङ्गनादिप्रतीतेः समासोक्तिः।

समम्=समानम्, **वयः**=अवस्था यासां ताः। **चुम्बितम्**=लब्धम्,

धृतशृङ्खले अभितः समुत्थिते स्वोपवेशाघातैर्दोलां दोलयतः ।

वासांस्यासां महाराष्ट्र–कन्योचितान्यतिरमणीयानि । ये एते उत्थायमुत्थायं दोलां चालयतः, तयोर्दक्षतो वामतश्च विभज्य प्रसाधिताः केशाः. पीत–रक्त–कौशेय–सूत्रग्रन्थन–पाटवाङ्किता कबरी, विविध–मणि–जटित–वालपाश्या, कनककुसुमालङ्कृतं शिरः, सुवर्णसूत्र–वेष्टनाविष्कृत–बहुल–सुषमा कुण्डलीकृत्य वेष्टिता वेणी. सिन्दूर–रेखाङ्किता कबरी मध्य–रेखा, मौक्तिक–गुच्छाङ्कित–सुवर्णाभरणालङ्कृता नासा, आरक्त–कौशेय–कूर्पासक–समाच्छन्नमारब्ध–

यौवनम्=तारुण्यं याभिस्ताः । **सुन्दर्यः**=अभिरामाः । **स्वोपवेशाघातैः**=मध्ये मध्ये समुपवेशेन जातैस्ताडनैः । **दोलयतः**=चालयतः ।

महाराष्ट्रकन्योचितानि=महाराष्ट्रीयबालिकार्हाणि । **ये एते** "इदमेद्रि· वचनं प्रगृह्यम्" । **उत्थायमुत्थायम्**=ऊर्ध्वं स्थित्वा स्थित्वा । **दक्षतः**=दक्षिणतः । **प्रसाधिताः**=विरचिताः । पीतञ्च तद्रक्तं पीतरक्तम्, तच्च **कौशेयसूत्रम्** = पट्टसूत्रम्, तस्य **ग्रन्थनपाटवेन**=गुम्फनचातुर्येण, **अङ्किता**=भूषिता । "**कबरी**=केशवेशः" । एवमेवामरः । **विविधमणिभिः**=अनेकप्रकाररत्नैः, **जटिता**=मिलिता, **वालपाश्या**=सीमन्तभूषणम् । **कनककुसुमैः**=सौवर्णपुष्पैः, **अलङ्कृतम्**=भूषितम् । **शिरः**=भालम् । **सुवर्णसूत्रवेष्टनेन**=हिरण्यतन्तुवलनेन, **आविष्कृता**=प्रकटीकृता, **बहुला**=प्रचुरा, **सुषमा**=शोभा, यस्याः सा । **कुण्डलीकृत्य**=कुण्डलाकृतिं प्रापय्य । **वेष्टिता**=जूटिता । **वेणी**=केशबन्धनम् । **सिन्दूररेखया**=नागोद्भवलेखया, **अङ्किता**=लिखिता । **कबरीमध्यरेखा**=केशान्तरालगतलेखा । **मौक्तिकगुच्छेन**=रत्नस्तवकेन, **अङ्कितम्**=युतम्, यत् **सुवर्णाभरणम्**=हिरण्यरचितमाभूषणम्, तेन, **अलङ्कृता**=

कुचोन्नति-महोत्सवमवलोचक-नयन-वशीकरणं वक्षः, कर्णिका-युगल-चोचुम्ब्यमानं दोलन-श्रमोद्भूत-स्वेद-कणिका-पटल-परिलसितं समीर-सरणान्दोलित-चूर्ण-कुन्तल-वीजितं कपोल-युगलम्, सौवर्ण-मौक्तिक-राजि-राजित-ग्रैवेयकाङ्किता कम्बुग्रीवा, दोलादोलन-दोदुल्यमान-ललित-ललन्तिका-लालितमुरः, पञ्च-कच्छ-भङ्ग्या परहितं हरितं परिधानम्, हंसक-काञ्ची-कङ्कणादि-मण्डि-

मण्डिता । **नासा**=नासिका । **आरक्तेन**=समन्ततो रक्तवर्णेन, **कौशेयकूर्पासकेन** = पट्टवस्त्रचोलकेन, **समाच्छन्नम्**=नितान्तगोपितम् । **आरब्धः**=समुद्भूतः, **कुचयोः**=स्तनयोः, **उन्नतिमहोत्सवः** = उद्गमनोद्भवः, यस्मिंस्तत् । **अवलोचकानाम्**=द्रष्टृणाम् = **नयनानाम्** = नेत्राणाम्, **वशीकरणम्**=पाशीकरणम् । **वक्षः** = उरस्थलम् । **कर्णिकायुगलेन** = कर्णभूषणद्वयेन, "कर्णिका कर्णभूषण" इति हैमः, **चोचुम्ब्यमानम्** = वारंवारं स्पृश्यमानम् । **दोलनश्रमेण**=दोलाखेलनश्रान्त्या, **उद्भूतानाम्**=जातानाम्, **स्वेदकणिकानाम्**=घर्मजलबिन्दूनाम्, **पटलेन**=समूहेन, परितः, **लसितम्** = शोभितम् । **समीरसरणेन** = वायुचलनेन, **आन्दोलितैः**=सञ्चलितैः, **चूर्णकुन्तलैः** = कुटिलकेशैः, **वीजितम्** = कृतव्यजनम्, सेवितमिति यावत् । **सौवर्णानाम्** = सुवर्णतन्तूनाम्, **मौक्तिकानाम्** = मणीनाञ्च **राजिभिः**=सरणिभिः, **राजितम्** = लसितम्, यद् ग्रीवायां भवं **ग्रैवेयकम्**=कण्ठाभरणम्, "कुलकुक्षिग्रीवाभ्यः ष्वास्यलङ्कारेष्वि" ति ढकञ्, तेन, **अङ्किता** = मण्डिता । **कम्बुग्रीवा** = शङ्खाकारा शिरोधरा । **दोलादोलनेन**=देलिकाहिल्लोलनेन, **दोदुल्यमानया**=वारं वारमुत्क्षिप्यमाणया, **ललितया** = शोभनया, **ललन्तिकया** = आनाभिलम्बितया कण्ठिकया, **लालितम्**=शोभितम् । **उरः** = वक्षः । **पञ्चानाम्** = पञ्चसङ्ख्याकानाम्, **कच्छानाम्** = वस्त्रबन्धानाम्, **भङ्ग्या**=प्रकारेण। महाराष्ट्र-

तान्यङ्गानि। या चेयं मध्यतः समुपविष्टा सा तदपेक्षयाऽप्यल्पं वयो जुषाणा, धम्मिल्ल-समुल्लसन्मूर्द्धभागा, कुङ्कुम-बिन्दु-सुन्दर-ललाटा, कज्जलाञ्जन-रञ्जित-लोचन-युगला, नागवल्ली-दल-रसना-संरक्ताधर-विवर्द्धित-रसिकजन-पिपासा, वृन्ताक-श्यामां कौशेय-

देशीया परिधानीयं तथा परिदधति यथा पञ्च कच्छानि जायन्त इति तात्पर्यम्। तत्र पश्चाद्भागे कच्छमेकं त्रिधा बध्नन्तीति त्रयम्, नीवीं तुरीया, उपरिधारणीय-भागं स्कन्धप्रदेशेनानीय बध्नन्तीति पञ्चतयीत्यनुभवरसिकाः। **परेभ्यः** = पुरुषेभ्यः, **हितम्** = कल्याणकारकम्। **हरितम्** = हरिद्वर्णम्। **परिधानम्** = वासः। **हंसकेन** = नूपुरेण, **काञ्च्या** = रसनया, **कङ्कणादिभिः** = वलयादिभिश्च **मण्डितानि** = भूषितानि। **अङ्गानि** = चरणाद्यवयवाः। **तदपेक्षया** = तयोर्दीलाचालिकयोरपेक्षया। **जुषाणा** = सेवमाना। **धम्मिल्लेन** = संयतकेशव्रातेन, **समुल्लसन्** = शोभमानः, मूर्धभागो यस्याः सा। कुङ्कुमबिन्दुना **सुन्दरम्** = मनोहरम्, **ललाटम्** = गोधिर्यस्याः सा। **कज्जलाञ्जनेन** रञ्जितं लोचनयुगलं यस्याः सा। **नागवल्लीदलस्य**=ताम्बूलीच्छदस्य, **रसनेन**=आस्वादनेन, **आ**, समन्तात् **संरक्ताभ्याम्**=अतिलोहिताभ्याम्, **अधराभ्याम्**=दन्तच्छदाभ्याम्, **विवर्द्धिता**=वृद्धिं नीता, रसिकजनपिपासा यया सा। स्वभावतो रक्तयोरोष्ठयोस्ताम्बूलभक्षणेनातितरां लौहित्यमिति विशेषणसार्थक्यम्। असंरक्तेति छेदे विपरीतार्थाभास इति "ताम्बूलीदलरसना"-इति पदस्य पार्थक्यमाश्रित्य व्याचक्षाणास्तु न कस्य नमस्याः, भिक्षुकागमनानुचिन्तया स्थाल्यनधिश्रयणपटवो बटवः। कञ्चुकीं वक्षसा बिभ्रतीति सम्बन्धः। कञ्चुकी विशिनष्टि-**वृन्ताकश्यामाम्**=भण्टाकीकृष्णाम्। "बैंगनी रंग की" इति हिन्दी। "वृन्ताके स्त्री तु वार्त्ताकुर्भण्टाकी भाण्टिकाऽपि चे"ति निघण्टुः। **कौशेयसूत्र-**

सूत्र-रचितां समावृतार्द्धबाहुं सुवर्णसूत्र-रचित-लता-वितान-रोचित-प्रान्तां, कञ्चुकीमभिनव-समासादित-मांसलताभावेन वक्षसा बिभ्रती, दोला-दोलन-वेग-भङ्ग-परवशतया उच्छालमुच्छालमुरसि निपतन्तीं नक्षत्रमालां कुच-प्रदेशाधस्तात् परिवेष्टित-शोण-चैलाञ्चलापातिनीमपि तदुपरिभागे प्रत्यक्षतो दरीदृश्यमान-पूर्वार्द्धां धारयन्ती, सुवर्ण-विजित्वरवर्णा, मूर्तिमतीव शोभा,

रचिताम्=पट्टतन्तुनिर्मिताम्। **समावृतम्**=समाच्छन्नम्, अर्धं बाह्वोर्यया ताम्। अर्धबाहुकामिति यावत्। "अधबाँहिया" इति हिन्दी। **सुवर्णसूत्रैः**=हैरण्यतन्तुभिः, "जरी" इति हिन्दी, **रचितानाम्**=निर्मितानाम्, **लतानाम्**=वल्लीनाम्, **वितानेन**=विस्तारेण, **रोचितः**=भ्राजमानः, **प्रान्तः**=कोणभागो यस्यास्ताम्। कीदृशेन वक्षसा, तत्राह-**अभिनवः**=अतिनूतनः, **समासादितः**=प्राप्तः, **मांसलताभावः**=स्थूलतावस्थानं येन तेन। समुत्पद्यमानकुचौन्नत्येनेति यावत्। नक्षत्रमालां धारयन्तीति बालिकाविशेषणम्। कीदृशीं नक्षत्रमालाम्, तत्राह-**दोलादोलनेन**=दोलायन्त्रहिल्लोलनेन, यो **वेगभङ्गः**=जवरोधः, **तत्परवशतया**=तदायत्ततया। **उच्छालमुच्छालम्**=उच्छाल्योच्छाल्य। "उछल उछल कर" इति हिन्दी। **उरसि**=वक्षसि। **निपतन्तीम्**=स्खलन्तीम्। **नक्षत्रमालाम्**=सप्तविंशतिमौक्तिकमयीं हारयष्टिकाम्। **कुचप्रदेशाधस्तात्**=स्तनतलाधोभागात्। **परिवेष्टितम्**=वलितम्, यत् **शोणम्**=रक्तम्, **चैलम्**=वसनम्, तस्य, अञ्चले=कोणे, **पातिनीम्**=पतनशीलाम्। **तदुपरिभागे**=चैलाञ्चलोपरिप्रदेशे। **प्रत्यक्षतो दरीदृश्यमानम्**=भृशं समवलोक्यमानम्, पूर्वार्धं यस्यास्ताम्। **धारयन्ती**=समाश्रयन्ती। **सुवर्णस्य विजित्वरः**=जयनशीलः, वर्णो यस्याः सा। अतिगौरीत्यर्थः।

धारितदेहेव प्रेम-परम्परा, कलितावतारेव च रतिरासीत्।

शनैः शनैर्दोलाया वेगो ववृधे। एकतो गच्छन्ती दोला यावन्निवर्तते: तावत्तस्यां दिशि स्थिता साङ्गहारमुपवेश-मुद्रया दोलां तथा हन्ति, यथा सा साधिकवेगं परतो निवर्तते स्म। ततोप्यवधिपर्य्यन्तं गतायां च तस्यां तद्दिशि सज्जतराऽपि तथैवानुकरोति, द्वयोरपि गत्योरन्तरेषु मञ्जीर-रशनादीनां विलक्षणशिञ्जनं भवति, प्रतिगतं च प्रत्यागतञ्च तासां सर्वासां वासांसि वारमेकमेकतः परतश्च परतः, समुड्डीयन्ते, कर्णाभरणीकृतानां पाटलि-कुसुमानां केशेषु व्यासञ्जितानां मल्लिका-कोरकाणां सर्ववस्त्राणामुपरि लम्बमानानां च विशिथिल-दलानि परिस्खलन्ति स्म, एवं दोला-

मूर्त्तिमती=रूपधारिणी। धारितदेहा=गृहीतशरीरा। कलितावतारा=धारितावतरणा। रतिः=कामपत्नी।

ववृधे=एधाञ्चक्रे। साङ्गहारम्=अङ्गाक्षेपसहितम्। क्रियाविशेषणम्। उपवेशमुद्रया=उपस्थितिप्रकारेण। हन्ति=ताडयति। साधिकवेगम्=अतिजवेन सह। अवधिपर्यन्तम्=यावद्गन्तुं शक्नोति शृङ्खला यन्त्रिता सती। सज्जा=सन्नद्धा, हन्तुम्। अनुकरोति=हन्तीति यावत्। मञ्जीररसनादीनाम्=नूपुरकाञ्चीप्रभृतीनाम्। विलक्षणम्=अलौकिकम्, शिञ्जनम्=भूषणशब्दः। प्रतिगतम्=प्रतिगमनम्। प्रत्यागतम्=प्रतिपरावृत्ति। कर्णाभरणीकृतानाम्=श्रवोभूषणीकृतानाम्। पाटलिकुसुमानाम्=अमोघापुष्पाणाम्। व्यासञ्जितानाम्=निबद्धानाम्, चितानामिति यावत्। मल्लिका-कोरकाणाम्=मालतीमुकुलानाम्। सर्ववस्त्राणाम्=निखिलवाससाम्। लम्बमानानाम्, सृमानाम्, विशिथिलदलानि=विचलितबन्धनानि पत्राणि।

दोलनासक्ताभिरेव ताभिरारब्धा महामधुर-माध्वीक-मधुरिम-धिक्काराधिकार-धारिणी, प्रफुल्लोल्लास-तल्लज-मल्लार-रागानुसारिणीयं गीतिर्गातुम् । तथा हि—

घन-पटली *बहु वर्षति तोयम्*,
घन-पट-लीन-मुखः *पथिकोऽयम्*,
बहुधारा*सारा***श्च** *स***मुदिताः**
बहुधा *रा***गै** *रसिका* **मुदिताः**

परिस्खलन्ति स्म=पेतुः । **दोलादोलनासक्ताभिः**=दोलासञ्चालननिरताभिः । **आरब्धा**=प्रारम्भीकृता । **महामधुरस्य**=अतिस्वादुनः, **माध्वीकस्य**=मधुमद्यस्य, **मधुरिम्णः**=माधुर्यस्य, **धिक्कारे** = तिरस्करणे, योऽधिकारः=स्वाम्यम्, तस्य धारिणी । अनुप्रासः । एवमन्यत्राप्यनुचिन्तनीयः । **प्रफुल्लः**=विकसनशीलः, **उल्लासतल्लजः**=प्रकृष्टोल्लासः, यो **मल्लारराग**=मल्लारीत्यभिधीयमाना मेघरागरागिणी, **तदनुसारिणी**=तदनुकूला । **गीतिः**, प्रधानारब्धक्रियानिरूपितस्य कर्मत्वस्याभिधानान्न गीति-निरूपिताप्रधानकर्मत्वाश्रया द्वितीयेति स्वादुमिसूत्रस्थभाष्यानुसारी पूर्वाभिहितः पन्थाः ।

घनपटली=मेघराजिः । **बहु**=अधिकम् । **अयम्**=साक्षाद्दृश्यमानः । **पथिकः**=यात्रिकः, **घनपटे**=मेघखण्डे, **लीनम्**=व्याप्तम्, तन्मयताङ्गतमिति यावत्, **मुखम्**=वदनं यस्य सः । सर्वथा मेघे दत्तदृष्टिरिति तात्पर्यम् । **बहूनां धाराणा मासाराः**=सम्पाताः । **समुदिताः**=सम्यगुदयं प्राप्तवन्तः, मेघेभ्यः प्रादुर्भूता इति यावत् । **रसिकाः**=रागिणः । **बहुधा**=अनेकधा । **रागैः**=विषयाभिलाषैः । **मुदिताः**=प्रसन्नताङ्गताः । प्रथमे चरणे "घन पटली"ति सा-

एवं कियत्कालगानेनैव श्रान्तयोस्तयोः पार्श्व-परिवर्तिन्योः स्वेदैः कपोलौ क्षालितौ, वसनमार्द्रितम्, कञ्चुकी कुचयोर्दत्तं संलग्ना, वपुर्वेपथुना चुम्बितम्, श्वास-प्रश्वासयोर्गतिस्त्वरिता, आनन-च्छटा च काञ्चन कमनीयां शोणता-शोभामकलयत्। ललिता-विशाखाभ्यां विमानेन गगनतलं नीयमाना राधिकेव चेयमपरा दोलापट्टिकोपविष्टा, नीप-शाखाग्र-चुम्बि-दोला-वेगमसहमाना कदाचिद्भुवम, कर्हिचिदात्मानम, कदाचन द्रुमाग्राणि, कर्हिचन

र्थकम्, द्वितीये च निरर्थकम्। प्रथमद्वितीयपादयोर्यमत्वे "मुखम्" नाम यमकम्, तृतीयचतुर्थयोश्च "पुच्छम्" नामेति तयोः संसृष्टिः। अन्त्यानुप्रासोऽपि।

कियत्कालगानेन=लघुसमयलयकलनेन। **पार्श्वपरिवर्त्तिन्योः**=पार्श्व-परिवर्त्तनकारिण्योः। **स्वेदैः**=घर्मबिन्दुभिः। **क्षालितौ**=धौतौ। **वसनम्**=वस्त्रम्। **आर्द्रितम्**=क्लेदितम्। **कञ्चुकी**=अर्धबाहुका। **संलग्ना**=संसक्ता। **वपुः**=शरीरम्। **वेपथुना**=कम्पेन। **चुम्बितम्**=स्पृष्टम्। **त्वरिता**=वेगवती। जातेति शेषः। **आननच्छटा**=मुखच्छविः। यद्यपि प्राक्तनैरयं 'छटा'-शब्दः समूहेऽर्थे प्रयुक्तस्तथापि साम्प्रतिकैरिच्छविनात्पर्येण प्रयुज्यत इति वेदितव्यम्। **काञ्चन**=कामप्यनिर्वचनीयाम्। **कमनीयाम्**=हृद्याम्। **शोणताशोभाम्**=रक्तताकान्तिम्। **अकलयत्**=अधारयत्। **ललिता-विशाखाभ्याम्**=तन्नामिकाभ्यां राधिकासखीभ्याम्। **विमानेन**=वायुयानेन। **नीयमाना**=प्राप्यमाणा। **राधिकेवेत्युपमा**। **इयम्**=एषा, **अपरा**=द्वितीया, सौवर्णी। दोलायाः, **पट्टिकायाम्**=काष्ठपीठे, **उपविष्टा**=स्थिता। **नीपशाखायाः**=कदम्बशाखायाः, अग्रचुम्बिन्याः, दोलायाः, **वेगम्**=जवम। **असहमाना**=सोढुमशक्नुवती।

कदाचिद् भुवम्-इत्यादि-अवलोकयन्ती क्रियासमभिहारेण वक्तुमारब्धवतीति सम्बन्धः। **भुवम्**=पृथिवीम्। **आत्मानम्**=स्वम्। **द्रुमाग्राणि**=

समीर-वेगाहत-निज-वसनाग्र-ताड्यमान-दोलावलम्बि-शृङ्खलाम्, कदाऽपि तारस्वर-गान-श्रवण-विद्रावित-निद्रान, कदम्ब-शाखा-सन्धि-विलम्बि-नीडान्तराल-रिङ्गणान, सित-पीत-सृक्किणीन, अप्राप्त-पक्षति-पुष्टीन, अर्धोन्मिषित-लोचनान, विहित-मञ्जीरानुकारि-रावान, पिक-शावकान, कर्ह्यपि दोलान्दोलन-दोल्यमान-दोलाग्र-विलम्बि-लताप्रतान-निपत्यमान-कुसुम-स्तबकान. अवलोकयन्ती, भ्रमरिका-कलित-दृष्टिः, प्रतिगतिभेदं पत-

---

वृक्षशाखाः। **समीरवेगाहतस्य**=पवनजवताडितस्य, **निजवसनस्य**=स्ववस्त्रस्य, **अग्रेण**=प्रान्तेन, **ताड्यमानायाम्**=आहन्यमानायाम्, दोलायाम्, **अवलम्बिनीम्**=सँल्ग्नाम्, **शृङ्खलाम्**=लौहदाम। कदाचित्पिकशावकानिति मध्ये सम्बन्धः। पिकशावकान् विशिनष्टि-**तारस्वरेण**=उच्चस्वरेण, पञ्चमनादेनेति यावत्, यद् **गानम्**=गीतिः, तस्य **श्रवणेन**=कर्णातिथितामापादनेन, **विद्रावित**=दूरीकृता, **निद्रा**=स्वापो येषां तान्। **कदम्बशाखानाम्**=नीपद्रुमावयवानाम्, **सन्धिषु**=जोडेषु, **विलम्बिनाम्**=लम्बमानानाम्, **नीडानाम्**=कुलायानाम्, **अन्तरालेषु**=मध्येषु, **रिङ्गणम्**=भ्रमणम्, येषां तान्। **सिताः**=श्वेतवर्णाः, **पीताः**=पीतवर्णाः, **सृक्किण्यः**=ओष्टप्रान्तभागाः, येषान्तान्। **अप्राप्ता**=अनधिगता, **पक्षतीनाम्**=पक्षमूलानाम्, **पुष्टिः**=उड्डयनसामर्थ्यम्, यैस्तान्। **अर्धोन्मिषिते**=कियदुन्मीलिते, लोचने येषां तान्। विहिताः, **मञ्जीरानुकारिणः**=नूपुरध्वनितुल्याः, **रावाः**=शब्दाः, यैस्तान्। **पिकशावकान**=कोकिलशिशून्। **दोलान्दोलनेन**=दोलिकासञ्चालनेन, **दोल्यमानानाम्**=सञ्चाल्यमानानाम्, **दोलाग्रविलम्बिनीनाम्**=दोलिकाप्रान्तप्रतायमानानाम्, **लतानाम्**=व्ततीनाम्, **प्रतानेभ्यः**=कुटिलतन्तुभ्यः, निपात्यमानान्, कुसुमानाम्, **स्तबकान्**=गुच्छान्। **भ्रमरिकाभिः**=भ्रमरकैः, **आकलिता**=

न्तीव, कम्पमानेव, आहतेव, भीतभीतेव, मुग्धा, क्रियासमभिहारेण वक्तुमारब्धवती–"अलमलम्, विरमतं विरमतं, पतामि पतामि"—इति।

अथ तयोरेका–"सौवर्णि! किमिव बिभेषि? आवयोर्मध्ये स्थिताऽसि, शृङ्खला–ग्रहणासक्तां मुष्टिं मा शिथिलय, न पतिष्यसि। साम्प्रतमेव विहिताभ्यासा चेत् पत्या समं सुखेन दोला–विहार–रसं रसयिष्यसि"–इति सस्मितमालपत्। सौवर्णी च––

"चारुहासिनि! अलं हासैः। भ्रमति मे चक्षुः, क्षुभ्यति मनः, तत्सपदि स्थिरीकुरु दोलाम्। अये विलासिनि! नास्ति मम तथा क्षमता यथा भवत्योः, तन्न पारयामि, विरम विरम"—

इत्युभयतो ग्रीवां परिवर्त्य, मन्दं सक्षोभमिवाचकथत्। तत-

व्याप्ता, दृष्टिः, यस्याः सा। **प्रतिगतिभेदम्**=प्रतिगमनच्छेदम्। **पततीव**=स्खलन्तीव। **कम्पमानेव**=वेपमानेव। **आहतेव**=ताडितेव। **भीतभीतेव**=अतिभयाक्रान्तेव। **मुग्धा**=अल्पवयस्का। **क्रियासमभिहारेण**=पुनः पुनः। **वक्तुम्**=लपितुम्। अनुप्रासो यत्र तत्रानुचिन्तनीयः।

विहिताभ्यासा=कृतवारंवारानुभवा। **दोला–विहार–रसम्**=दोला-क्रीडानन्दम्। **रसयिष्यसि**=अनुभविष्यसि। सौवर्णी चाचकथदिति सम्बन्धः। किन्तत्राह=**चारुहासिनि**! इति। "विलासिनि!" इति च सम्बोधनपदे सखीनाम्नोः। **अलम् हासैः**=क्ष्वेलाभिः साध्यं नास्ति। "क्रिया गम्यमानाऽपि कारकविभक्तौ निमित्तम्"। **भ्रमति**=घूर्णते। "घूमती" इति हिन्दी। **क्षुभ्यति**=सञ्चलति। **क्षमता**=सोढुं शक्तिः। **न पारयामि**=न शक्ता भवामि। **ग्रीवाम्**=शिरोधराम्। **परिवर्त्य**=वक्रयित्वा। **सक्षोभम्**=सकृत्रिमकोधम्।

स्तृतीयाऽपि–"प्रियसखि ! किमिव क्षुभ्यसि ? पश्य, विरतमावाभ्याम्, दोला च क्रमतो मन्दीभूता स्वयमेव स्थिरा भवित्री"–इति सप्रेम समवादीत् ।

अथ प्रेमालाप–परायणास्वेव तासु स्थिरीभूतायां दोलायां चारुहासिनी विलासिनी च पूर्वमवतीर्णे, तद्धस्तावलम्बनेनैव च सभयं सौवर्ण्यप्यवतीर्णा । क्षणं च चक्षुषी निमील्य चारुहासिनी–स्कन्धमेव गृहीत्वा सावेगं स्थितवती । परस्तात् प्राप्तधैर्य्या सम्मुखस्थामन्द्यां समुपाविशत् । चारुहासिनी विलासिनी च महाराष्ट्र–महिले इति दोलारोह् एतयोः स्वाभाविकः । दोलन–प्रयुक्तं वैकल्यं वा, शैथिल्यं वा, चक्षुर्भ्रमरिकां वा, मनोग्लानिं वा, एते न जानीतः स्म । ते खिन्न–स्विन्न–सर्वाङ्गिण्याविति कदली–दल–खण्डेनाऽऽत्मानं वीजयन्त्यौ पर्य्यटितुमारेभाते । एवमितस्ततः शाद्वले प्रर्य्यटन्त्योस्तयोः पार्श्वस्थमल्लिका–स्तवक–परिक्रमण–परवश–मिलिन्दवृ-

---

मन्दीभूता=वेगशून्या सती । भवित्री=भाविनी । सप्रेम=सादरप्रदर्शनम् ।

प्रेमालापः=नर्मोक्तिः, तत्परायणासु=तन्निरतासु । सावेगम्=दोलाखेलनभ्रमरिका ("घुमरी"इति हिन्दी) सहितम् । प्राप्तधैर्य्या=लब्धस्थैर्या । सम्मुखस्थायाम्=पुरः स्थापितायाम्, आसन्द्याम्=वेत्रासने । दोलनप्रयुक्तम्=दोलाखेलसमुत्थम् । वैकल्यम्=विकलताम् । शैथिल्यम्=खेदविशेष अत्यधिकश्रमजन्मा । चक्षुर्भ्रमरिकाम्=नेत्रभ्रमम् । मनोग्लानिम्=चेतःक्लान्तिम् । खिन्नम्=क्लान्तम्, स्विन्नम्=घर्मजलमयम् । सर्वाङ्गम्=निखिलशरीरं ययोस्ते । णिन्यन्तान् ङीप् । कदलीदलखण्डेन=रम्भाच्छदांशेन । पर्य्यटितुम्=भ्रमितुम् । पार्श्वस्थमल्लिकास्तवकस्य=समीपस्थजाती-

न्द–दत्तदृष्टेः सौवर्ण्यश्चैवमभूवन्नालापाः।

विलासिनी–अम्माकं सौवर्णी न किमपि वेत्ति।

चारुहासिनी–(समन्दस्मितम्) आम्! न किमपि। यतो मुग्धा।

विला०–अज्ञातयौवना च।

चारु०–[सहासम्] सत्यं दुग्धमुखीयम्।

[उभे सौवर्णीमालोकमालोकं जहसतुः]

सौवर्णी–[सकपट–कोपम्] भवतीभ्यामेव रोचन्ते भवत्योः क्ष्वेलनानि।

विला०–मैवं, मैवं, क्षमस्व, त्वं सर्वं वेत्सि!

चारु०–इयं रासपञ्चाध्यायीं पठन्त्यात्मानमपि विस्मरति। गीतगोविन्दस्य च "उरसि मुरारेरुपहितहारे"–इत्यादि–गीतानि

गुच्छस्य, परिक्रमणपरवशेः=भ्रमणसंलग्ने, मिलिन्दवृन्दे=द्विरेफवृन्दे, दत्तदृष्टेः=संस्तम्भितनयनायाः। आलापाः, अत्र हासमया वेदितव्याः।

मुग्धा=बाला।

अज्ञातयौवना=अविदिततारुण्या।

दुग्धमुखी=पयोमुखी। "दुध मुहीं" इति हिन्दी।

आलोकमालोकम्=दृष्ट्वा दृष्ट्वा।

क्ष्वेलनानि=नर्मवाक्यानि।

रासपञ्चाध्यायीम्=श्रीमद्भागवते सन्दर्भविशेषः कृष्णविलासप्रदर्शनपरो रासपञ्चाध्यायी। रागिणस्तदर्थं रागपरतया, पण्डिताश्च कामविजयपरतया सङ्गमयन्ति। अत्र च "तासस्तनेषु परिषेहि" "च्छिन्धि हृच्छयाग्निम्" इत्यादिभिस्तात्पर्यम्। उरसि मुरारेरुपहितहारे। "घन इव तरलबलाके। तडिदि-

गायन्त्येव बाष्प-प्रवाहेणाञ्जनम्, अधर-रागं, वक्षः, रोमराजीं च क्षालयति, तन्न किं न वेत्ति ? किन्त्वस्मदग्र आत्मानं मुग्धतममेव परिचाययति । [पुनरुभे अहसताम्]

सौवर्णी-सख्यौ ! यदि मामेवं हेपयथस्तदहं गच्छामि । युवामेवात्र विहरतम् । [इत्युदतिष्ठत्] ।

विला०-[सौवर्ण्यां बाहुं गृहीत्वा] उपविश, उपविश । नाऽऽवामेवं परस्तादालपिष्यावः ।

[सौवर्णी तूष्णीमुपाविशत्]

चारु०-[समीपस्थायामासन्धामुपविश्य, विलासिनीं चोपवेश्य] सौवर्णि ! सत्यं कथयति विलासिनी । यदि नाम तुभ्यं प्रेमवार्ता आत्मीयोचितालापाश्च न रोचन्ते, तत्किमग्निहोत्रविधिं वा योग-साधन-पद्धतिं वा कथयावः ? तथैव चेत् तव तात एव वेदान्तोपदेशैस्त्वामपरां गार्गीं विधास्यति, किमस्मत्साहचर्यैः ? किं वा

व पीते रतिविपरीते, राजसि सुकृतविपाके" इत्यवशिष्टं पदत्रयम् । **बाष्पप्रवाहेण**=अश्रुधारया । **अधररागम्**=ओष्ठलौहित्यसाधनम् । **रोमराजीम्**=लोमपङ्क्तिम् । **क्षालयति**=धावयति ।

हेपयथः=लज्जयथः । **विहरतम्**=क्रीडतम् ।

अग्निहोत्रविधिम्=अग्न्याधानप्रकारम् । **योगसाधन-पद्धतिम्**=चित्तवृत्तिनिरोधात्मकस्य योगस्य यानि साधनानि यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाध्यात्मकानि तेषाम् पन्थानम् । **वेदान्तोपदेशैः**=ब्रह्मविद्याकथनैः । **गार्गीम्**=वाचक्नवीम् । जनकसंसदि याज्ञवल्क्येन कृतब्रह्मविद्याविवादा विदुषी बृहदारण्यके श्रुता । **अस्मत्साहचर्यैः**=आवयोः

सखि सखीति मुधैवाऽऽवां सम्बोध्य वञ्चनैः ?

विला०–प्रिये! मा स्मोपेक्षिष्टाश्चारुहासिन्या वचनम्। आवामेव तव प्रीतिपात्रे, अन्तरङ्गित्व–गर्विण्यौ सख्यौ। आवयोरप्यग्रे कदाऽपि किमपि न वक्षि। अन्तरेव कञ्चनानुरागमिव वहसि, कदाचिद्विमनायसे, अस्माभिः शृङ्गार–रस–स्नातानां बहूनामाननान्यवलोकितानि सन्ति, त्वं तु सदैवास्माभिः सह क्रीडसि, कथं त्वया गोपितोऽप्यप्रकटो भवेत् तवानुराग–प्रवाहः ? त्वमेव केवलं स्पष्टं न ब्रूषे, किं तु तव नवाभ्यस्तापाङ्ग–प्रसारे दृशौ, आलीढ–तालीदल–च्छविः कपोल–पाली, सह्रीस्तम्भ–निःश्वास–मान्थर्य–माधुर्य्य–स्वर–भङ्गा आलापाश्च, सर्वं स्फुटयन्ति। तदलमितोऽपि बाह्यैरालाप–शतैः। सत्यं कथय, किमिव चिन्तयसि ? केन च महाभा-

सान्निध्यैः। **मुधैव**=व्यर्थमेव। **वञ्चनैः**=प्रतारणैः।

मास्मोपेक्षिष्ठाः=उपेक्षां मा कार्षीः। वचनं नोपेक्षितं विधेहीति तात्पर्यम्। **प्रीतिपात्रे**=स्नेहस्थाने। **अन्तरङ्गित्वस्य**=रहस्यज्ञत्वस्य, **गर्विण्यौ**=अभिमानयुक्ते। **न वक्षि**=न कथयसि। **अनुरागम्**=व्यक्तिविशेषे प्रेम। **शृङ्गार–रस–स्नातानाम्**=वैषयिकधारायां कृतमज्जनानाम्। अनुभूतविषयाणामिति यावत्। **गोपितोऽपि**=यत्नादाच्छादितोऽपि। **अप्रकटः**=अविस्पष्टः। दुर्ज्ञेय इति यावत्। **नवः**=नूतनः, **अभ्यस्तः**=शिक्षितः, **अपाङ्गप्रसारः**=कटाक्षपातप्रकारः, याभ्यां ते। **आलीढा**=अङ्गीकृता, **तालीदलच्छविः**=द्रुमविशेषपत्रकान्तिर्यया सा। **कपोलपाली**=गण्डप्रान्तः। **ह्रीस्तम्भेन**=लज्जावरोधेन, सहितेन, **निश्वासेन**=दीर्घश्वासेन, यत्–**मान्थर्यमाधुर्यम्**=आलस्यलालित्यम्, तेन स्वरभङ्गो येषु तादृशाः। **स्फुटयन्ति**=प्रकटयन्ति। **बाह्यैः**=बहिर्भूतैः।

ग्येन सहचरितां स्वमूर्तिं स्वापेषु पश्यसि ? ।

[सौवर्णी पादाङ्गुष्ठ-नखेन भुवमालिखन्ती तूष्णीमेव समतिष्ठत]

चारु०-सौवर्णि ! तव दुःखेन दुःखिते आवामिति विश्वसिहि ; त्वां हि, कदाचित् सर्वा अस्मान् विहाय, उद्यानं प्रविश्य, एकान्ते तरुतल उपविशन्तीम्, क्वचन रहसि शिलासूपविश्य करतले कपोलं संस्थाप्यानिमिषाभ्यां दृग्भ्यां किमपि चिन्तयन्तीम्, कर्हिचित् कुञ्जान्तः प्रविश्य गज-दन्त-फलके कस्यापि प्रतिमूर्तिमिव लिखन्तीम्, कदाचन पाण्डु-गण्ड-तल-विसृत्वराण्यश्रूणि पट-

महाभाग्येन=विशिष्टभागधेयेन । **सहचरिताम्**=एकत्रावस्थिताम् । **स्वापेषु**=स्वप्नेषु । प्रत्यक्षं साहचर्य्यमननुभवन्त्या अपि, अनिच्छन्त्या अपि च स्वापेषु साहचर्यं भवतीति न ते दोष इति गूढव्यङ्ग्यम् ।

पादाङ्गुष्ठनखेन भूलिखनं लज्जितानां जातिः । **अस्मान्**=सहचरीः । **एकान्ते**=रहसि । **उपविशन्तीम्**=उपतिष्ठन्तीम् । उपवेशश्चायं न निरर्थक इत्यभिलाषाख्या प्रथमा स्मरदशा सूचिता । स्मरदशा हि दशसंख्याकाः, तथा च साहित्यदर्पणे—

अभिलाषश्चिन्ता स्मृतिगुणकथनोद्वेगसम्प्रलापाश्च ।
उन्मादोऽथ व्याधिर्जडता मृतिरिति दशात्र कामदशाः ॥

चिन्तात्मिकां द्वितीयां दशां दर्शयति-क्वचनेत्यादिना-चिन्तयन्तीमित्यन्तेन ; **शिलासु**=प्रस्तरखण्डेषु । **दृग्भ्याम्**=नेत्राभ्याम् । **चिन्तयन्तीम्**=विचारयन्तीम् । **गजदन्तफलके**=हस्तिदन्तनिर्मितपीठे । **प्रतिमूर्त्तिम्**=प्रतिच्छविम् । **लिखन्तीम्**=निर्मयन्तीम् । एतेन स्मृतिनाम्नी तृतीया दशा प्रत्यक्षीकृता, गुणकथनञ्च मानसमेनेनैव बोध्यम्-नहि विना गुणविचारं प्रतिकृत्युल्लिखनं सम्भव ;

प्रान्तेन मार्जयन्तीम्, कचिद् लुण्ठितेनेव, वञ्चितेनेव, प्रणष्टेनेव, अपहृतेनेव च, हृदा, कञ्चिद्धवलिमानमिवाङ्गेषु वहन्तीम्, दर्शं दर्शं भिद्यत इवाऽऽवयोर्हृदयम्। किमिव कुर्वः! शतधा पृष्टाऽसि, सहस्रधा विश्वासमापिताऽसि, न वक्षि, न च सूचयसि। किन्तु विश्वासपात्रेऽस्मादृक्षे सखीजनेऽनुचितमेतत्। सर्वतः संवृतोऽग्निरधिकं तापयति, अनुद्गीर्णं विषं प्राणानपहरति, असूचितो व्याधिरप्रतीकारो वर्द्धते, तदयमीदृशो दृढो निरोधस्तेऽनुरागस्याधिकमेव त्वां दुःखाकरिष्यतीति सहाये सखीजने किमिव नान्तर्ज्वरं विभजसि? यथाऽऽवामपि सम-दुःख-सुखे भवेव।

सौवर्णी तु करस्थं कुसुम-स्तबकं क्षिप्त्वा, दक्ष-कर-तल एव

पाण्डु-गण्डतल-विसृत्वराणि = पीत-कपोलस्थल-प्रसरणशीलानि। अश्रूणि=रोदनाम्बूनि। पटप्रान्तेन=वसनाग्रेण। मार्जयन्तीम्=प्रोञ्छयन्तीम्। एतेनोद्वेगसम्प्रलापौ सूचितौ। लुण्ठितेनेव=चोरितेनेव। एभिश्चतुर्भिरुन्मादादयश्चतस्रो दशा दर्शिताः। मृतिपदेन च न मरणं गृह्यत इति जानन्त्येव सुधियः। धवलिमानम्=श्वैत्यम्। वहन्तीम्=धारयन्तीम्। दर्शं दर्शम्=दृष्ट्वा दृष्ट्वा। आपिता=लम्भिता। न वक्षि=न कथयसि। न च सूचयसि=न बोधयसि। संवृतः=अवरुद्धः। अधिकम्=भृशम्। अनुद्गीर्णम्=अवान्तम्। विषम्=हालाहलादि। असूचितः=अबोधितः, परेभ्योऽप्रकटीकृतः। अप्रतीकारः=वारयितुमनर्हः। दृढः=प्रबलः। निरोधः=गोपनम्। दुःखाकरिष्यति=खेदवतीं विधास्यति। सहाये=सहायताकारिणि। अन्तर्ज्वरम्=मानसिकं दुःखम्। ज्वरपदं कामज्वरोपस्थापकतया किमपि वैशिष्ट्यमाश्रयतीति स्वारस्यवेदिनः। विभजसि=विभागं करोषि।

कपोलं संस्थाप्य, निरन्तर-परिक्रमण-क्लम-क्लान्तं मुखं कमलपल्लवोदरे सुप्तं कलानाथमिव कदर्थयन्ती, विरह-जन्मना धवलिम्ना भस्मनेव रूषिता, बदर-पाण्डुना गण्डेन, उष्ण-श्वास-प्रश्वासाघात-शुष्केणाधरेण, स्वेदजुषा च वपुषा, कञ्चन दुष्प्रतीकारमाधि-प्रधानं व्याधिं स्पष्टयन्ती, चक्षुषी धवलयता, कपोलौ मलिनयता, अधरं ताडयता, रागमपहरता, वक्षसि शतधारीभूय पट-सन्धिषु प्रवहता, बाष्प-बिन्दु-सन्दोह-प्रवाहेण, स्वान्तस्थं धैर्यं गाम्भीर्यं च बहिः प्रवाहयामास ।

कुसुमस्तबकम्=पुष्पगुच्छम् । क्षिप्त्वा=भूमौ निपात्य । **निरन्तर-परिक्रमण-क्लम-क्लान्तम्**=सतत-परिभ्रमण-खेद-खिन्नम। **कमलपल्लवोदरे**=पद्मकिसलयान्तराले । **सुप्तम**=निद्रितम् । **कलानाथम्**=शशिनम् । इवेत्युत्प्रेक्षा। **कदर्थयन्ती**=तिरस्कुर्वती । **विरहजन्मना**=वियोगसमुत्थेन । **धवलिम्ना**=श्वैत्येन । **भस्मनेव**=भसितेनेव । **रूषिता**= छुरिता । **बदरवत् पाण्डुना**=पीतेन । गण्डेन=कपोलेन । लुप्तोपमा । उष्णयोः, श्वासप्रश्वासयोः, आघातैः, **शुष्केण**=शोषवता । रूक्षेणेति यावत् । **स्वेदजुषा**=घर्मजलप्रीतिमता । तद्युक्तेनेति यावत् । **दुष्प्रतीकारम्**=निरौषधम् । **आधिः**=मानसिकी व्यथैव **प्रधानम्**=श्रेष्ठम्, यस्मिन् तादृशम् । **व्याधिम्**=रोगम् । **स्पष्टयन्ती**=प्रकटयन्ती । **चक्षुषी**=नेत्रे । **धवलयता**=श्वेतिमानं लम्भयता । **कपोलौ**=गण्डस्थलौ । **मलिनयता** = मलिनतां प्रापयता । **ताडयता**=आघातयता । **रागम्**=विषयाभिलाषम् । **अपहरता**=दूरीकुर्वता । नहि खेदे रागस्तिष्ठति । **शतधारीभूय**=अनेकप्रवाहतां गत्वा । **पटसन्धिषु**=वसनबन्धनेषु । **प्रवहता**=प्रवाहं लम्भता । **बाष्प-बिन्दु-सन्दोह-प्रवाहेण**=अश्रुपृषत्समूहधारेण । **स्वान्तस्थम्**=आभ्यन्तरिकम् । **प्रवाहयामास**=धारारूपेण निःसारयामास ।

तां तथा निःशब्द-रोदनेनापि रोदसी रोदयन्तीम्, सधडत्कृतिना वक्षसा, विवर्णेन वदनेन, शून्यया दृष्ट्या, विकलया चाङ्गयष्ट्या, अतिस्फुटीकृत-प्रिय-विरह-क्लेशमाकलय्य, परवशतामङ्गीकुर्वदिव हृदयम्, भज्यमानामिव वाचम्, रुध्यमानमिव कण्ठम्, वेपमानमिव विग्रहम्, प्लाव्यमानमिव च चक्षुः, कथं कथमिव स्व-वशंवदं विधाय, ते अश्रु-मार्जनैः, कदली-दलवीजनैः, शान्त-वचनैश्च सान्त्वयामासतुः।

अथ क्षणानन्तरमात्मानमात्मनैव स्थिरयित्वा, चारुहासिनीं विलासिनीं च सम्बोध्य, वक्तुमारभत सौवर्णी—

"भगिन्यौ! भवत्यावेव मम जीवने, भवत्यावेव ममाऽऽधारौ, भवत्यावेव च सर्वथा बन्धूइति भवत्यौ विहाय कोऽन्योऽस्ति,

निःशब्दम्=ध्वनिशून्यम्, यद् रादनं तेन। रोदसी=द्यावापृथिव्यौ। रोदयन्तीम्=खेदयन्तीम्। सधडत्कृतिना=धडत्कारमयेन। वक्षसा=हृदयेन। विवर्णेन=शुष्केण। वदनेन=लपनेन। विकलया=विलक्षया। अङ्गयष्ट्या=देहेन। अतिस्फुटीकृत-प्रिय-विरहक्लेशम्=अतिव्यक्तीकृत-प्रेम-वियोग-खेदम्। परवशताम्=पराधीनताम्। अङ्गीकुर्वत्=स्वीकुर्वत्। भज्यमानाम्=त्रुट्यमानाम्। रुध्यमानम्=अनिर्गमच्छ्वासम्। वेपमानम्=कम्पमानम्। विग्रहम्=शरीरम्। प्लाव्यमानम्=पयःपूरवृद्ध्यमानम्, स्ववशंवदम् =स्वाधीनम्। ते=सहचर्यौ।

आत्मानम्=स्वम्। आत्मनैव = स्वयमेव। स्तम्भयित्वा = अवरोध्य।

जीवने=प्राणने। आधारौ=आश्रयौ। सर्वथा=सर्वप्रकारेण। बन्धू=

यदग्रे मानसं सुखं वा दुःखं वा प्रकटयेयम्; किन्तु वित्थ एव भाग्यहीनाया मम व्यतीतं वृत्तान्तम्। नाहं जननी-क्रोड-क्रीडा-सुखं स्मरामि। नाहं तात-लालन-सुखस्य स्वप्नमपि पश्यामि। नाहं स्व-देशस्य स्व-जन्मभुवश्च कथामपि शृणोमि, न वाऽहं चिरविनष्टयोर्भाग्यैः पुनः प्राप्तयोरपि भ्रात्रोः सहवास-सुखमनुभवामि। अहह! मातापितृ-विहीनाया भाग्यहीनाया दीनाया मम भ्रातरावेव त्वाधारभूतौ। हन्त! तयोश्च प्रत्यहं सम्मुखस्था खड्गधारा, प्रतिक्षणञ्च पार्श्व-परिवर्तिनः प्रत्यर्थिनः। द्वार-देशमालोकयन्ती वासरं व्यत्यापयामि। हन्त! स्वप्नेष्वपि, रणाङ्गण-गतावेव सोदरौ पश्यामि-इति नास्ति मे कदाऽपि सुख-लेशः। मृगतृष्णासु तृष्णाभिरापतन्ती मृगीव च यं प्राणनाथं मन्यमाना"-

भ्रातृकल्पे, कल्याणकारिण्याविति यावत्। **मानसम्**=चेतः। **वित्थः**=जानीथः। **भाग्यहीनायाः**=भागधेयशून्यायाः, दुर्भाग्याया इति यावत्। **व्यतीतम्**=विगतम्, भूतकालिकम्। **वृत्तान्तम्**=प्रवृत्तिम्। **जननी-क्रोड-क्रीडा-सुखम्**=मात्रङ्क-परिष्वङ्ग-मोदम्। **तात-लालन-सुखस्य**=जनक-पालनानन्दस्य। **स्वप्नमपि पश्यामि**=साक्षात्कारस्य तु कथैव का। **चिर-विनष्टयोः**=अत्यधिककालादृष्टिपथगयोः। **सहवास-सुखम्**=एकत्र स्थिति-मोदम्। **मातापितृ-विहीनायाः**=जननीजनकशून्यायाः। "आनङ् ऋतो द्वन्द्वे"। **सम्मुखस्था**=पुरोवर्त्तिनी। **खड्गधारा**=असिधारा। **पार्श्व-परिवर्त्तिनः**=वामे दक्षे च स्थिताः। **प्रत्यर्थिनः**=अरयः। **व्यत्यापयामि**=क्षपयामि। **रणाङ्गणगतौ**=सङ्ग्रामभूमिं प्राप्तौ। **सुखलेशः**=अल्पमपि सुखम्। **मृगतृष्णासु**=हरिणपिपासासु। पिपासिता मृगा निदाघे सौरी-

इत्यर्द्धोक्तावेव निःश्वस्य व्यरमत्। ततस्तयोः-"कथय, कथय, मा स्म रोदीः, कस्मिन् मनोऽनुरक्तम्? कः प्राणनाथता-सनाथितः? को भवत्या मनोमन्दिरं प्रविष्टः?"-इति साम्रेडं कथयत्योः पुनराह सौवर्णी—

"यं च प्राणनाथं मन्यमाना मनोरथ-सन्तान-वितानैरात्मानं व्यथयामि, तस्य मासान् यावत् कथामात्रमपि न लभे। आवसथमपि न वेद्मि। पात्रेऽयमभिलाषः, सुपरिणामोऽयं चित्तबन्ध इत्यपि न जाने। केवलमेनं प्रातिपदिकं चन्द्रमिव, कदाचित क्षणाय दूरतोऽवलोक्य, चिर-दाह-दग्धं हृदय-हतकं शीतलयामि। दुःखकथा-कथन-समये दुःखमधिकमधिकं वर्द्धते-इति भवती-

---

भिर्भाभिर्भासमानेषूपरेषु दूरस्थेषु जलभ्रान्त्या धावन्ति तत्र गत्वा जलमलब्ध्वा पुनर्दूरे तथाविधमेव स्थलान्तरं वीक्ष्य धावन्तीत्येवं गतासुतामाश्रयन्ति। तदेतन्मृगतृष्णापदेनाभिधीयते। **यम्**=पुरुषधौरेयं वृषमपि। **प्राणनाथम्**=प्राणेश्वरम्। **अर्द्धोक्तौ**=अर्द्धमेव कथिते। **व्यरमत्**=भाषणाद्विरताभूत्। "व्याङ्परिभ्यो रमः"। **अनुरक्तम्**=सप्रेम। **प्राणनाथतया**=पतितया। **सनाथितः**=सनाथीकृतः। **मनोमन्दिरम्**=चेतःपूजालयम्।

मनोरथ-सन्तान-वितानैः=अभिलाषसमूहप्रसारणैः। **व्यथयामि**=पीडयामि। **आवसथम्**=गृहम्। **पात्रे**=योग्ये। **सुपरिणामः**=अन्ते सुखप्रदः। **चित्तबन्धः**=मनोनिवेशः। **प्रतिपदि भवं प्रातिपदिकम्**=आद्यतिथ्युदितम्। यद्यपि द्वितीयाशशिन एव चक्षुर्गोचरता, तथापि तमेव प्रतिपच्चन्द्रत्वेनाश्रित्य कवय उपमानभावं कल्पयन्ति। तथा च दामोदरो भारविः-"प्रतिपच्चन्द्रमिव प्रजा नृपम्" इति। **चिर-दाह-दग्धम्**=तीव्रवियोगानलज्वलितम्।

म्यां पृष्टाऽपि न ब्रवीमि, अनुरुद्धाऽपि चापवृणोमि । तत् सख्यौ ! अलं मादृक्षाया हतभाग्याया मुखमप्यवलोक्य । परःशता रत्न-भूता रणाङ्गणेषु प्रत्यहं शेरते । मम तु विधिना मृत्युरपि ललाटे नालेखि"—इति कथयन्त्या एव तस्या हस्तं गृहीत्वा चारुहासिनी समवादीत्—

हला ! मा स्म वदस्तत । मातापितृ-सुखं सर्वं सदा नानुभवन्ति, विरह-दुःखमननुभूय न कोऽपि प्रेयसा संयुङ्क्ते, केनापि पारावार-तरङ्ग-रिङ्गणाघातमसोढ्वा मुक्ता नाप्यन्ते, शतशः शङ्कुलाभिरनुत्कृत्ता देवमूर्तिः सुसिंहासनार्हां सुषमां न कलयति, तत समाश्वसिहि ।

ततश्चिराय तासां बहुविधो मन्दं मन्दमालापो जातः, अथाकस्मादेव ममश्रावि कस्यापि बालस्येव—अत्तिके ! अत्तिके !—इति दूराहूतिः ।

अनुरुद्धा=अनुरोधविषयङ्गमिता । अपवृणोमि=आच्छादयामि । मादृक्षायाः=मत्तुल्यायाः ।

हला !=सखीनाम्पारस्परिकं सम्बोधनमिदम् । मा स्म वदः=तत्-प्रभृतिविषये न किमपि निवेदय । विरह-दुःखम्=वियोगखेदम । अननुभूय=अनुभवगोचरमविधाय । प्रेयसा=प्रियतमेन । संयुङ्क्ते=सम्मिलति । पारावार-तरङ्ग-रिङ्गणाघातम्=समुद्र-लहरि-सञ्चलन-ताडनम् । मुक्ताः=मणयः । नाप्यन्ते=न लभ्यन्ते । शङ्कुलाभिः=पूगीप्रभृतिकर्त्तिकाभिः, वरिच्छेदिकाभिः । अनुत्कृत्ता=अखण्डिता । सुसिंहासनार्हाम्=शोभन-विष्टस्थिति-योग्याम् । सुषमाम्=शोभाम् । समाश्वसिहि=धैर्यमाश्रय ।

अत्तिके ! = भगिनि ! । दूराहूतिः = दूरादाह्वानम् । सम्बोधनमिति

ततः सौवर्ण्या, "चारुहासिनि ! तवानुजस्त्वामाह्वयति" इत्यवाचि। चारुहासिनी च विलासिनीमपि "उत्तिष्ठ प्रजावति ! गच्छावः" इति कथयित्वा, "गोपाल ! एषाऽऽयामि, तद् गच्छ, अम्बां कथय" इति तमप्युक्त्वा, सौवर्णीं बहु सान्त्वयित्वा, सोत्प्रासमनुमतिमासाद्य प्रचलिता। तामेव च विलासिन्यप्यनुससार।

अनयोरेका मन्दिराध्यक्ष-महाराष्ट्र-ब्राह्मणस्य पुत्री, अन्या च पुत्रवधूः।

तयोर्गतयोः पुनरेकलैवोपविश्य, स्वकटि-पट-प्रान्तासज्जितमेकं गज-दन्त-पट्टिका-फलकमुत्सार्य करे धृत्वा, तत्र स्वयमेव लिखितां रघुवीर-मूर्तिमालोकयन्ती, स्वयमपि चित्रलिखितेव यावत्कांश्चन क्षणानतिवाहयति; तावत् पृष्ठतः स्थितस्येव कस्यचन श्वास-भङ्गमश्रौषीत्। सपदि पृष्ठतः परिवृत्य च, तमेव चिर-चिन्तितं प्राणाधारं रघुवीरमपश्यत्। चकित-चकितेव च, झटिति समुत्थाय, मुदिता, मोहिता, कम्पिता, भीता, ह्रीता, चैकतो नत-

यावत्। **अवाचि**=उक्ता। अवोचीति प्रयुञ्जन्तस्तु विस्मृत-"वच उम्" सूत्रार्था एवेति न तिरोहितम्। **प्रजावति !** = भ्रातृजाये। "भ्रातृजाया प्रजावती"। **अम्बाम्**= मातरम्। **सोत्प्रासम्**=सोल्लासम्। **अनुमतिम्** = आज्ञाम्। **अनुससार**=अनुसृतवती।

एते परिचाययति पाठकेभ्यः कविः, तयोरिति। **पुत्रवधूः**=स्नुषा।

एकला = एकाकिनी। **स्व-कटि-प्रान्तासज्जिताम्** = निज-मध्य-भाग-स्थापिताम्। **गजदन्त-पट्टिका-फलकम्** = हस्तिदन्त-पीठिका-खण्डम्। **उत्सार्य**=निःसार्य। **क्षणान**=मुहूर्त्तानि। **अतिवाहयति**=यापयति। **श्वास-**

मुखी, फलकं गोपयन्ती समवतस्थे । रघुवीरस्तु तस्मिन्नेवावसरे वेगेन हयेन समायातो मुहुरत्राऽऽयातीति केनापि सवैलक्ष्यमवीक्षितः, सपदि वृक्षस्यैकस्य शाखायामाजानेय-वल्गामायोज्य, उपवन-पर्य्यटनेन स्वेदानपनेतुमकस्मादितः समायातः-इत्यधुनाऽपि खिन्न-कपोलयोर्ललाटे च चूर्णकुन्तला भ्रमरकाश्च श्लिष्टा एव । श्मश्रु-प्ररोह-स्थली, मौक्तिक-व्रातेनेव स्वेद-बिन्दु-व्रजेनाङ्कितैव । ततोऽपि चाकस्माच्चिरसन्दृष्टा चिराभिलषिता च प्रेयसी रहसि सन्दृष्टेति, पुनरुद्वेल्लित इव स्वेद-प्रवाहः ।

रघुवीरो हि यदैवास्मिन् प्रान्ते समायाति, तदैव केनापि व्याजेन हनूमन्मन्दिरस्यापि परिक्रमां करोत्येव, एतद्वाटिकाया अपि धीर-समीर-स्पर्श-सुखमनुभवति, यथासम्भवं सौवर्णीसा-

---

भङ्गम्=उच्छ्वासम । **चकितचकितेव**=साश्चर्यमेव । **मुदिता**=प्रसन्ना । **मोहिता**=विक्षिप्ता । अकस्माद्दर्शनेन हर्षाधिक्यात् । **फलकम्**=पट्टकम् । **गोपयन्ती**=आच्छादयन्ती । **समवतस्थे**=आसाञ्चक्रे । **वेगेन**=जवेन । **सवैलक्ष्यम्**=साशङ्कम् । **अवीक्षितः**=अनवलोकितः । **आजानेयवल्गाम्**=सदश्व-कविकाम् । **उपवनपर्यटनेन**=उद्यानभ्रमणेन । **अकस्मात्**=सहसा । **चूर्णकुन्तलाः**=वक्राः केशाः । **भ्रमरकाः**=वर्वरीकाः । "घुंघराले बाल" इति हिन्दी । **श्मश्रु-प्ररोह-स्थली**=दाढिकोद्गम-तलम् । **मौक्तिकव्रातेन**=मणिव्रजेन । **स्वेद-बिन्दु-व्रजेन**=घर्मपृषद्गणेन । **चिरसन्दृष्टा**=बहुकालावलोकिता । **प्रेयसी**=प्रियतमा । **उद्वेल्लित इव**=उच्छलित इव । **स्वेद-प्रवाहः**=घर्माम्बुपूरः ।

प्रान्ते=देशैकदेशे । **परिक्रमाम्**=परिभ्रमणम् । **धीर-समीरस्य**=मन्द-

क्षात्कारेण च चिरतृषिते नयने सन्तर्पयति, एतेन सौवर्ण्या सह समालापस्यापि पञ्चषा अवसराः प्राप्ताः—इति नायमालापस्य प्रथमः क्षणः। रघुवीरेणैतस्याः कमलोदरसोदरे करे दन्ति-दन्त-फलकालिखिता स्वप्रतिकृतिरपि साक्षात्कृता, प्रेयस्या विलुलित-वारि-विन्दु-व्रजे लोचने अपि चाऽऽलोकिते, तदेनां स्वविरह-दुःख-दुःखितामाकलय्य, स्वयमपि दुःखितः प्रोवाच—

प्रिये ! किमेतत्, अहह ! किमिति ताम्यसि ? शुष्यसि, ग्लायसि, खिद्यसे च। मुधा मादृशे पथिकजने पराधीने रज्यसे। हन्त ! अहमेव वा किं करोमि, अश्व-पृष्ठमेव मे गृहम्. असिरेव मम कुटुम्बम्. परिश्रम एव मे धनम्. स्वामिभक्तिरेव मे यशः; तत् कथं मादृशमशरणमव्यवस्थञ्च चिन्तयन्ती चेतश्चञ्चलयसि, प्रत्यहं शुष्यन्तीं तव गात्रयष्टिमालोक्य, स्वप्रेष्वप्युद्विजे। कतिवारं

मारुतस्य, स्पर्शसुग्वम् सम्पर्कमोदम्। सौवर्णीसाक्षात्कारेण=सौवर्णीदर्शनेन। चिरतृषिते=चिररात्राय पिपासिते। समालापस्यापि=वार्त्ताकरणस्यापि। पञ्च वा षड वा पञ्चषाः। क्षणः=कालः। कमलोदरसोदरे=पद्मान्तरालतुल्ये। स्वप्रतिकृतिः=निजप्रतिमूर्तिः। विलुलित-वारिविन्दु-व्रजे=विच्छुरित-जल कण-समूहे। आलोकिते=दृष्टे।

ताम्यसि=दुःखिनी भवसि। शुष्यसि=शोषमेषि। दुर्बलीभवसीति यावत्। ग्लायसि=क्षीणहर्षा भवसि। खिद्यसे=खेदमनुभवसि। रज्यसे=अनुरागं करोषि। अश्वपृष्ठमेव=घोटकपृष्ठमेव। सर्वदा तत्स्थत्वात्। कुटुम्बम्=बन्धुजनः। अशरणम्=अनाथम्। अव्यवस्थम्=अनिश्चितावासम्। चञ्चलयसि=चपलयसि। शुष्यन्तीम्=कार्श्यमाश्रयन्तीम्। उद्विजे=खेदमनुभवामि।

"सौवर्णि ! सौवर्णि ! मा स्म खेदयथा आत्मानम्" इति स्वप्ने चाऽहं चीदकरवम्, व्यलपम्, उदस्थाम्, करौ प्रासारयम्, अरोदिषञ्च। सप्रश्रयं प्रार्थये, विरम विरम, मा स्म जटालाभिश्चिन्ताज्वालाभिः कुसुमानीव कोमलान्यङ्गानि धाक्षीः—इति।

सौवर्णी तु पटान्तेन चक्षुषी परिमृशन्ती, परिवर्तितवदना मन्दं मन्दमभ्यधात्—"वीर ! अभाग्य एष जनः, अस्वायत्तं हृदयम्, विगलितं धैर्य्यम्, पराधीनं चित्तम्, अस्थिर आत्मा, दुर्निवारः प्रेमप्रवाहः, दुरन्तोऽभिलाषः, अप्रतिरोधा कर्मरेखा, तत् किमिव वच्मि ? किमिव भावयामि ? न जाने कीदृशं वज्रादपि निष्ठुरं हृदयं भवादृशानां व्यरचि विधात्रा, ये स्व-समर्पित-जीव-

चीदकरवम् = चीत्कारमकार्षम्। व्यलपम्=विलापमकरवम्। उदस्थाम्=उत्थितोऽभूवम्। करौ=हस्तौ। प्रासारयम्, क्रोडीकरणार्थम्। अरोदिषम्=रोदनमकार्षम्। सप्रश्रयम्=सनम्रतम्। जटालाभिः=जटामयीभिः। अङ्गानि=शरीराणि। मा स्म धाक्षीः=नादाहयः।

परिमृशन्ती=परिमार्जयन्ती। परिवर्त्तितवदना=अन्यतःकृताननाः। अभ्यधात्=अकथयत्। अस्वायत्तम्=अस्वाधीनम्। विगलितम्=विनष्टम्। आत्मा=अन्तःकरणम्। दुरन्तः=असुखचरमांशः। अभिलाषः=मनोरथः। अप्रतिरोधा=रोद्धुमनर्हा। अवारणीयेति यावत्। भावयामि=करोमि। वज्रादपि=अशनेरपि। निष्ठुरम्=कठोरम्। भवादृशानाम्=लोकोत्तराणाम्।

वज्रादपि कठोराणि मृदूनि कुसुमादपि।
लोकोत्तराणां चेतांसि को नु विज्ञातुमर्हति॥

इत्युत्तररामचरिते। स्वसमर्पितजीवनानाम्=स्वसमुत्सृष्टप्राणनानाम्।

नानामनन्यशरणानां वचनमात्रेणापि विश्वासमापाद्य, सुधासार-सारेरिव ज्वलज्जीव-जीवन-जीवातुभूतैरालापैरालोकैरपि च दुःख-दाव-दन्दह्यमानं देहं न शीतलयन्ति"—

इति कथयित्वा, अश्रूणि मुञ्चन्तीं, स्वप्राणाधारभूतामालोक्य विस्मृतात्मा, सपदि समीपमागत्य, स्वकक्ष-गुटिकातः पट-खण्डं निस्सार्य्य, स्वहस्तेन तद्वाष्पाण्यपहरन्, द्वित्रैर्मौक्तिकैरिव च स्वच-क्षुःपतितैः कवोष्णैर्बिन्दुभिस्तद्धम्मिल्ल-मतल्लिकामासिञ्चन्, भग्नेन स्वरेण, मन्दमगादीद् रघुवीरः-

किमत्र संशेषे? कोऽत्र सन्देहः? काऽत्र विचिकित्सा? कौमार-ब्रह्मचर्य-महाव्रतेनैव गात्राणि जर्जरयिष्यामि, त्वामेव वा

अनन्यशरणानाम् =अनितरनाथानाम्। सुधासारसारेरिव=पीयूषधारावर्षेरिव। ज्वलताम् =दहताम्, जीवानाम् =प्राणिनाम्, जीवनस्य=प्राणनस्य। जीवातुभूतैः=जीवनौषधिकल्पैः। आलापैः=मधुरभाषणैः। आलोकैः=दर्शनैः। दुःख-दाव-दन्दह्यमानम् =क्लेशाग्निजाज्वल्यमानम्। न शीतलयन्ति=न शिशिरयन्ति।

अश्रूणि मुञ्चन्तीम्=रुदन्तीम्। स्वप्राणाधारभूताम्=स्वजीवनाश्रयभूताम्। स्व-कक्ष-गुटिकातः=निजबाहुमूलान्तरालस्थापितपोटलिकातः। पटखण्डम्=कर्पटम्। मौक्तिकैरिव=मणिभिरिवेत्युपमा। कवोष्णैः=ईषदुष्णैः। "कवञ्चोष्ण" इति कवादेशः। धम्मिल्ल-मतल्लिकाम्=प्रशस्तं कुसुमादियन्त्रितं केशव्रातम्। भग्नेन=त्रुटितेन।

संशेषे=संशयं करोषि। विचिकित्सा=संशयः। "विचिकित्सा तु संशयः"। दार्ढ्याय पुनरुक्तिः। कौमारब्रह्मचर्य-महाव्रतेन=आबाल-ब्रह्मचर्य-

परिणेष्यामीति सुदृढो मे नियमः । त्वं क्षत्रिय-कन्याऽसि, सुक्षत्रिय एवैष जनः । त्वं राजपुत्र-देशीयाऽसि, तद्देशीय एव चाहम् । अनुरागश्चोभयत; तद् यदि तवाग्रजौ पूज्यपुरोहितश्चानुमन्येत, तत्प्रकटमेव तूर्णमेव च स्यात् परिणयः-

इति वदत्येव तस्मिन्-"सौवर्णि ! कुतोऽसि ? अग्रजस्त्वां प्रतीक्षते, आगच्छ"-इति देवशर्म-च्छात्र-विशेष-विहितेव दूराहूतिराकर्णि । सद्य एव च तौ कर्णयोः किमप्यालप्य, एकतः सौवर्णी, परतश्च रघुवीरः-इति द्वावपि शाद्वलमेनद् रिक्तमकुरुताम् ।

❀ ❀ ❀ ❀

तत्र तु गौरसिंहो देवशर्मणः पुरोहितस्योपवेश-भवने समुपविष्टो देवशर्म्मणैवमालपति स्म ।

गौरसिंहः-गुरो ! अद्यापि प्रधाना काचन घटना भवित्रीति श्रीमत आशिषमेव ग्रहीतुमायातोऽस्मि ।

रूपेण महता नियमेन । **जर्जरयिष्यामि**=जीर्णयिष्यामि । **परिणेष्यामि**=विवाहयिष्यामि । क्षत्रियस्य **कन्या**=बालिका । **सुक्षत्रियः**=शोभनः क्षत्रियः । विवाहयोग्यतासूचकमिदम् । **अग्रजौ**=ज्येष्ठौ भ्रातरौ । **प्रकटम्**=प्रत्यक्षम् । **तूर्णम्**=शीघ्रम् ।

देवशर्म-च्छात्र-विशेष-विहिता=देवशर्म-शिष्यान्यतमकथिता । **दूराहूतिः**=आह्वानम् । **शाद्वलम्**=घासमयम् । **रिक्तम्**=शून्यम् । **अकुरुताम्**=व्यधत्ताम् ।

× × × × ×

उपवेश-भवने=वार्त्तादिकरणार्थके सदने । "बैठक" इति हिन्दी ।

देवशर्म्मा-[प्रणमतः पृष्ठं संस्पृश्य] विजयी भूयाः !

गौरसिंहः-आर्य ! अपि मे भगिनी सौवर्णी प्रसीदति ?

देव०-आम, प्रसन्नाऽस्मि। अथवा किमिक प्रसीदेत् ? राजवंश-जातापि मातापितृ-विहीना, भ्रातृ-साहचर्य-सुखमप्यननुभवन्ती, वृद्धस्य मे सेवया कथं कथमपि दिनानि गमयति। अधुना त्वेतस्या विवाह-चिन्ताऽपि भवद्भ्यामावहनीया। कन्यका हि श्वशुरालये क्लेशिता अपि वरम, न चान्यत्र सुखिन्योऽपि।

गौर०-आर्य ! आवयोरपि मनसि वारं वारमुदेत्येष विषयः। किन्तु कोऽपि योग्यो वर एव न हृदयमारोहति। अपि स्मरति भवान् तातेन कस्मैचिदहातुमेषा मनसि कृता ?

देव०-स्मरामि, अम्बराधीशानां कुलजातः कश्चिद् वीरसिंहो नामान्यतमो भूस्वाम्यासीत्। स चैकदा सपुत्रस्तव तातेनोत्सवविशेषे समाकारितो बभूव। तत्पुत्रेण रामसिंहेन सह सौवर्णी चिरमक्रीडत्। अन्यैः समवयस्कैर्बालैश्च क्रीडास्वेव तयोर्विवाह-खेला

प्रणमतः=प्रणतिं कुर्वतः।

प्रसीदति=प्रसन्नाऽस्ति।

राजवंशजाताऽपि=नृपान्वयोद्भवाऽपि। **दिनानि**=अहानि। **गमयति**=क्षपयति। **आवहनीया**=धारणीया। **क्लेशिताः**=दुःखिन्यः।

उदेति=उदयं प्राप्नोति। **आरोहति**=समागच्छति।

कुले=अन्वये, **जातः**=उत्पन्नः। कुलपदस्य सविशेषणत्वेऽपि नित्यसाकाङ्क्षत्वात्समासः। **भू-स्वामी**="जमींदार" इति हिन्दी। **समाकारितः**=समाहूतः। **अक्रीडत्**=खेलमकार्षीत्। **समवयस्कैः**=तुल्यावस्थाकैः। **विवाह-**

व्यधायि। तदाकर्ण्य, प्रीतः खड्गसिंहः स्वमित्रं सुचरितं वीरं प्रत्यज्ञासीत्, यद्-"यद्युभौ चिरं जीवेतां; तर्हि कोशला रामाय दास्यते" इति

गौर०-अपि ज्ञायते सन्ति ते कुशलिनः?

देव०-[निश्वस्य] विचित्रा घटना भगवतः। तस्य सेनानिवेशशैथिल्यमेकदा समवलोक्य, अम्बराधीशेन जयसिंहेन तस्याखिला भू-सम्पत्तिरपहृता। पत्नी चैतस्य विसूचिकापीडिता पुत्रमुखे दत्तदृष्टिरेव चरमं निरश्वसत्। वीरश्च सपुत्र-पुरोहितो रामेश्वरयात्रायै गतो नाद्यापि ज्ञायते कास्तीति-

एवमालपत्स्वेव तेषु सौवर्ण्यपि समायाता, प्रफुल्लनयना च गौरस्य समीपे समुपविष्टा। गौरोऽपि तत्पृष्ठे दत्तहस्तः, कुशलादिकं पृष्ट्वा यावत्किमप्यालपति : तावदकस्माद् रघुवीरोऽपि तत्राऽऽगत्य, देवशर्म्माणं प्रणम्य, सादरं गौरमुवाच—

खेला=क्रीडात्मकः परिणयः। व्यधायि=कृता। प्रीतः=प्रसन्नः। प्रत्यज्ञासीत्=प्रतिज्ञामकार्षीत्। कोशला=साम्प्रतिकी सौवर्णी। रामाय=रामसिंहाय। वचनभङ्ग्या तदावश्यकत्वं निवेदितम्।

सेनानिवेशे=शिबिरकृत्ये, शैथिल्यम्=त्रुटिम्। भू-सम्पत्तिः=क्षेत्रवित्तम्। विसूचिकया=तन्नामकेन रोगविशेषेण, महामार्यपरपर्यायेण, पीडिता=क्लेशिता। चरमं निरश्वसत्=अन्तिमं श्वासमगृह्णात्, ममारेति यावत्। रामेश्वरस्य=भगवद्रामभद्रसंस्थापितस्य भारतदक्षिणस्थस्य लङ्काविजयलक्ष्मभूतस्य धामचतुष्टयान्यतमाधीशस्य, यात्रायै=दर्शनार्थगमनाय।

प्रफुल्लनयना=विकसितनेत्रा।

आर्य ! क्षम्यतां किञ्चनात्यावश्यकं निवेदयिष्यामि।

अथ तयोरेवमभूदालापः।

गौर०–कथय कथय किं कथयसि ?

रघु०–इतः पश्चिमतो गव्यूत्यन्तराले कतिभिश्चन यवनसादिभिरावृता, बहुभिर्भल्लहस्तैर्धानुष्कैः शाक्तीकैश्च सुरक्षिता, शिबिकैका नीयते। निरचैषमवेदिषं च यत् कस्मैचित् प्रयोजनाय गोलखण्डपर्यन्तं दिल्लीश्वरः समायातोऽस्तीति, तत्साक्षात्काराय तद्दुहिता रसनारी यातीति। तदत्राऽऽर्याः प्रमाणम्।

गौर०–आ ! किमुक्तम् ? दिल्ली–कलङ्कस्य कन्या ?

रघु०–एवम्।

गौर०–योऽसावार्याणां दारानपहरति, सतीर्दूषयति, तस्यैव कन्याऽद्य महाराष्ट्र–सिंहानां कन्दर–द्वारि मृगीव स्वयमापतिता ?

रघु०–एवमेव निश्चीयते।

पश्चिमतः=पश्चिमायां दिशि। गव्यूतेः=क्रोशद्वयस्य,"गव्यूतिः स्त्री क्रोशयुगमि"त्यमरः, अन्तराले=मध्ये। यवनसादिभिः=अश्वारोहिम्लेच्छैः। भल्लहस्तैः=करेकृतभल्लशस्त्रैः। धानुष्कैः=धनुर्धारिभिः। शाक्तीकैः=शक्ति-प्रहरणवद्भिः। शिबिका=नरवाह्या पालङ्की। निरचैषम्=निर्णीतवान्। अवेदिषम्=अज्ञासिषम्। गोलखण्डपर्यन्तम्="गोलकुण्डा" स्थानान्तम्। दिल्लीश्वरः=अवरङ्गजीवः। तद्दुहिता=तत्कन्यका। रसनारी="रोशन आरा" इति ख्याता।

आर्याणाम्=हिन्दूनाम्। दूषयति=ध्वंसयति, पातिव्रत्यात्। कन्दरद्वारि=गुहामार्गे। मृगीव=हरिणीवेत्युपमा।

गौर०-आर्यपुरोहित ! सौवर्ण्यपहारकस्य यवन-युवकस्य हत्ययाऽपि न शाम्यति मे क्रोधः, तदद्य पर-वधू-कन्या-हरणं कथमिवारुन्तुदमिति "अवरङ्गजीव-"हतकमनुभावयिष्यामि। तदनुमन्यतां त्वरितमार्यैः।

इति प्रणम्य, सह रघुवीरेण सपदि निवृत्तः। तोरणदुर्गात् कांश्चिदतिचतुरान् सैन्धवारोहान् सह नयन्, स्वाधिष्ठितचरकुटीरतः कटि-पटाच्छन्न-च्छुरिकान्, सान्तर्भल्ल-कृत्रिम-दण्डहस्तान्, शतं मस्करिवेषान्, वीरान् सह नीत्वा, येन पथा सा शिबिका समानीयते, तस्मिन्नेवैकत्र पर्वत-प्रान्ते गण्ड-शैलावृतस्थले वर्षा-वारि-पूर्णमेकमल्पं कुण्डमालोक्य विपाक्तं विधाय, तत्प्रान्त-प्ररूढ-कुसु-

सौवर्ण्यात्, **अपहारकस्य**=चोरयितुः। **हत्यया**=मारणेन। **परेषाम्**=अन्येषाम्, **वधूनाम्**=स्त्रीणाम्, **कन्यकानाम्**=अविवाहितानां बालिकानाम्। **कथमिव**=केन प्रकारेण। **अरुन्तुदम्**=मर्मपीडकम्। **अनुभावयिष्यामि**=अनुभवगोचरतामानयिष्यामि। **अनुमन्यताम्**=अनुमतिदानेन स्वीक्रियताम्। **त्वरितम्**=शीघ्रम्।

सपदि=तत्कालम्। **सैन्धवारोहान्**=सादिनः। **स्वाधिष्ठितचरकुटीरतः**=स्वाध्युषितकुटीरात्। **कटिपटेषु**=मध्यभागीयवसनेषु, **आच्छन्नाः**=गुप्ततया स्थापिताः, **छुरिकाः**=असिधेनवः, येषां तान्। **सान्तर्भल्लाः**=सगुप्तशस्त्राः, **कृत्रिमाः**=निर्मिताः, **दण्डाः**="गुप्ती" इति ख्याताः, हस्ते येषां तान्। **शतम्**=शतसङ्ख्याकान्। **मस्करिवेषान्**=परिव्राजकवेषधारिणः। **पर्वतप्रान्ते**=गिर्येकदेशे। **गण्डशैलैः**, **आवृते**=सञ्छन्ने, **स्थले**=भुवि। **वर्षा-वरि-पूर्णम्**=प्रावृड्-जल भरितम्। **अल्पम्**=क्षुद्रम्। **कुण्डम्**=पल्वलम्। **विपाक्तम्**=

मस्तबकेष्वपि घ्राणमात्रेण मूर्च्छावहं गरलमायोज्य, तत्परिसर-वनभाग एव सर्वे समाच्छन्नाः समतिष्ठन्त।

तावत् समायातास्ते सगणाः शिबिकावाहाः। "अहो! रम्यमिदं स्थानम्, क्षणं विरम्यताम्, उदकादिकं पीयताम्, परतो यास्यते"-इति वदन्तः, उपविशोपविश, तिष्ठ तिष्ठ, रुन्धि रुन्धि, इति सर्वे तत्रैव विरेमुः। यावत्ते किमपि बुभुक्षव इव, इतस्ततः, समवलोकयन्ति, तावदकस्मादेको वृद्धः करधृत-गात्रावलम्बदण्डः पिटकमेकं वहन् दृष्टः। "अरे! रे! दशमीहतक! किमास्ते पेटायाम्? कुतो यासीति पृष्टोऽसावीपत्त्रस्त इव, "न न न न न किमपि, भ भ भगवन्!" इति कथयन् त्वरितं चलितः। ते तु सर्वे गृह्णीध्वं गृह्णीध्वं, हरध्वं हरध्वं, लुण्ठत लुण्ठत, हत हतेति तं वराकमहम्पूर्विकया लुलुण्ठुः। स च कृत्रिम-पथिकः सकपट-क्रन्दन-गलज्जलैर्मुखं

हालाहलादिमिश्रम्। तत्प्रान्त-प्ररूढ-कुसुमस्तबकेषु=तद्देश-सञ्जात-पुष्पगुच्छेषु, घ्राणमात्रेण=केवलेन नासिक्यसाक्षात्कारेण। मूर्च्छावहम्=मोहजनकम्। गरलम्=विषम्। आयोज्य=सम्मिश्र्य। तत्परिसर-वनभागे=तदन्तिकविपिनैकदेशे। समाच्छन्नाः=गोपिताङ्गाः। समतिष्ठन्त=स्थिताः।

सगणाः=ससैन्याः। रम्यम्=हृद्यम्। क्षणम्=मुहूर्त्तम्। परतः=पश्चात्, यास्यते=गमिष्यते। रुन्धि, रुन्धि=स्थगितो भव, स्थगितो भव। सम्भ्रमे द्विरुक्तिः। विरेमुः=यात्रां स्थगितामकार्षुः। बुभुक्षव इव=क्षुत्पीडिता इव। अकस्मात्=सहसा। करधृतगात्रावलम्बनदण्डः=हस्तगृहीतशरीरालम्बदण्डः। पिटकम्=मञ्जूषाम्। वहन्=नयन्। दशमीहतक=दशमीमवस्थां गत! नीच!। ईषत्त्रस्त इव=कियद्भयाक्रान्त इव। हरध्वम्=चोरयध्वम्। हत=

क्षालयन तिरोबभूव ।

एते च तत्पेटकाद् मधुर-मोदक-वृन्दमाप्य, परस्परं विभज्य, बुभुजिरे । तत्र प्रत्येकं मूर्छक-द्रव्यमयमास्वाद्य, सर्वेऽप्यशयिषत । तन्मण्डलाध्यक्षस्य तु समीपे शूलाकृतं मांसम्, काच-पात्र-परिपूरितं मद्यं चाऽऽसीदिति स तदास्वादनमात्रासादिततृप्तिः, केवलं जागर्ति स्म ।

अथाकस्मात् सतडतडाशब्दं वर्षन्, कश्चन मेघखण्ड उपरिष्टात समायातः । न कोऽप्युदस्थादित्यवलोक्य, अत्यन्तं समशयिष्टाध्यक्षः । स्वयं स्वास्तरणमेकस्याऽऽसन्नस्य च्छायातरोर्मूल आकृष्य, वाहकानाह्वयमानां शिबिकान्तःस्थां रसनारीम् . "मन्ये न कोऽपि जागर्ति, सर्वेऽत्यन्तगाढ-निद्रया सुप्ता एते दास्याःपुत्राः"-इति

ताडयत । **अहम्पूर्विकया**=अहं पूर्वमहं पूर्वमिति मनीषापूर्वम् । **लुलुण्ठुः**=बलाच्चोरयामासुः । **सकपटम्**=सव्याजम्, यत् **क्रन्दनम्**=रोदनम्, तज्जलैः । **तिरोबभूव**=अन्तर्धानीभूतः ।

मधुर-मोदक-वृन्दम्=सरसमिष्टसमूहम् । **बुभुजिरे**=भुक्तवन्तः । **मूर्छकद्रव्यमयम्**=मोहकविषमिश्रम् । **आस्वाद्य**=रसयित्वा । **अशयिषत**=निद्रामलभन्त । **तन्मण्डलाध्यक्षस्य**=सेनापतेः, **शूलाकृतम्**=शूले पक्वम् । **काचपात्रे**=वर्तुले, 'बोतल' इति हिन्दी, **परिपूरितम्**=भरितम् । **मद्यम्**=मधु । **तदास्वादनमात्रेण**=तत्खानपानमात्रेण, **आसादिता**=लब्धा, **तृप्तिः**=परिपूर्तिः येन सः । **केवलम्**=एकाकि, क्रियाविशेषणम् ।

सतडतडाशब्दम्=सविद्युत्स्तनितद्ध्वनिम् । **समशयिष्ट**=स्वापमकृत । **स्वास्तरणम्**=स्वबिष्टरम् । **च्छायातरोः**=च्छायादायिवृक्षस्य । **वाहकान्**=शिबिकावोढ्न् । **अत्यन्तगाढनिद्रया**=प्रबलस्वापेन । **दास्याः पुत्राः**=

बोधयित्वा, अखिलान् पादाघातेन कराकर्षणेन चाऽऽलोक्य, सत्यं मूर्च्छितानवगत्य, शीतलयितुं सुगन्धि-कुसुमानि जिघ्रापयिषुः, पार्श्वपरिवर्ति-क्षुपाग्राद् गुच्छकमेकमाचिनोत्। तत्समीपे समागच्छंश्च नव-कुसुम-स्तबक-रूप-दर्शन-मोहितो गाढं स्वयमेवाघ्रात। तत्क्षणाच्च भूमौ पतितो मुमूर्च्छ। वृष्टिरप्यकस्मात् प्रशममाप।

तत्क्षणादेव संन्यासि-कदम्ब-संवलितः, कतिपयैः सादिभिरनुगतो गौरसिंहः समाजगाम। एते कपट-संन्यासिनस्तु यवन-स्पर्शे घृणामावहन्तोऽपि क्षात्र-धर्ममाकलय्य, झटिति तत्कञ्चुकैर्दिल्लीश्वरनामाङ्कित-रजत-फलकालङ्कृतोष्णीषैस्तादृश-पित्तल-पट्टिकाङ्कित-कटिबन्धैश्चाऽऽत्मानमलञ्चक्रुः। एवं केचन तरुशाखालम्बि-

---

नीचाः। "षष्ठ्या आक्रोशे" इति षष्ठ्या अलुक्। **पादाघातेन**=चरणताडनेन, **कराकर्षणेन**=हस्ताकृष्ट्या। **शीतलयितुम्**=शिशिरयितुम्। निद्रां दूरयितुमिति यावत्। **सुगन्धिकुसुमानि**=आम्रादिपुष्पाणि। **जिघ्रापयिषुः**=घ्रापयितुमिच्छुः। **पार्श्वपरिवर्त्तिनः**=समीपस्थस्य, **क्षुपस्य**=ह्रस्वशाखिनः, **अग्रात्**=प्रान्तात्। **गुच्छकम्**=स्तबकम्। **आचिनोत्**=अत्रोटयत्। नवकुसुमस्तबकस्य, **रूपदर्शनेन** शोभानिरीक्षणेन, **मोहितः**=वशीकृतान्तरङ्गः। **अघ्रात्**=घ्राणविषयमकृत। **मुमूर्च्छ**=मूर्च्छामधिगतवान्। **प्रशमम्**=शान्तिम्। **आप**=लेभे।

संन्यासि-कदम्ब-संवलितः=मस्करि-व्यूह-निचितः। **घृणाम्**=ग्लानिम्। **झटिति**=त्वरया। **तत्कञ्चुकैः**=तेषां वसनैः। दिल्लीश्वरनाम्ना, **अङ्कितैः**=चिह्नितैः, **रजतफलकैः**=रौप्यपट्टिकाभिः, **अलङ्कृतैः**=भूषितैः, **उष्णीषैः**=शिरोवेष्टनैः। तादृशीभिः, **पित्तलपट्टिकाभिः**=रीतिफलकैः, **अङ्कितैः**, **कटिबन्धैः**=परिकरबन्धैः। **अलञ्चक्रुः**=भूषयामासुः। **तरुशाखालम्बितान्**=

तान् वाजिन उन्मुच्य, वल्गादि-योजनैः सज्जीकृत्य, वलित-वार-बाणाः, सुप्त-सादि-शस्त्रैरेव धानुष्काः, काण्डीराः, शाक्तीकाः, याष्टीकाः, पारश्वधिकाः, प्रासिकाः, नैस्त्रिंशिकाः, कौन्तिकाः, फलक-पाणयश्च भूत्वा तानारुरुहुः । अपरे तथैव परिवर्तितवेषा जङ्घालाः, इतरे च वाहकतामङ्गीकृत्य पालङ्कीमुत्थाप्य, सर्वैः सह तोरण-दुर्गाभिमुखमेव चल चलेति चेलुः । एवं रसनारीमेनां तोरण-दुर्गे संस्थाप्य, दुर्गाध्यक्षं च यथोचितादरैस्सत्कर्त्तुं रक्षितुं च प्रार्थ्य, जवनं निजमाजानेयमारुह्य, तन्निगालमास्फोट्य, सह रघुवीरेण क्वचिदास्कन्दितैः, क्वचिद् धौरितकैः, क्वचिद् वल्गितैः, प्लुतैः, निम्लो-चति मार्तण्डमण्डले, सपदि सिंहदुर्गमायातो गौरसिंहः ।

वृक्षस्कन्धनिबद्धान् । **वल्गादीनाम्**=कविकादीनाम्, **योजनैः**=संलगयनैः । **वलिताः**=धारिताः, **वारबाणाः**=कवचानि यैस्ते । **सुप्तसादिशस्त्रैः**=निद्रालु-घोटकवाहासिप्रभृतिभिः । **धानुष्काः**=धनुर्धारिणः । **काण्डीराः**=बाणवन्तः । **शाक्तीकाः**=शक्तिप्रहरणाः । **याष्टीकाः**=यष्टिप्रहरणाः । **पारश्वधिकाः**=परश्वधप्रहरणाः । **प्रासिकाः**=प्रासप्रहरणाः । **नैस्त्रिंशिकाः**=खड्गप्रहरणाः । **कौन्तिकाः**=भल्लधारिणः । **फलकपाणिनः**=चर्महस्ताः । **तान्**=अश्वान् । **परिवर्त्तितवेषाः**=अङ्गीकृतराजभटनेपथ्याः । **जङ्घालाः**=वेगवत्या जङ्घया लक्षितो धावकः । **वाहकताम्**=शिबिकावोढृताम् । **पालङ्कीम्**=शिबिकाम् । "पालकी" इति हिन्दी । **जवनम्**=वेगवन्तम् । **आजानेयम्**=शोभनमश्वम् । **तन्निगालम्**=तद्गलोद्देशम् । **आस्कन्दितैः**=उत्प्लुत्योत्प्लुत्य गमनैः । "पोईया" इति हिन्दी । **धौरितकैः**=वेगाद्गमनैः । **वल्गितैः**=उच्छलनविशेषैः । "आस्क-न्दितं धौरितकं रेचितं वल्गितं प्लुतम् । गतयोऽमूः पञ्चे"ति कोशेऽश्वगतिः पञ्च-प्रकारा प्रदर्शिता । **निम्लोचति**=अस्तं गच्छति । **मार्त्तण्डमण्डले**=भास्करे ।

अस्मिन् समये पश्चिमाशा-कुण्डलमिव मार्तण्ड-मण्डलमस्ताचल-चूडा-शोणोष्णीषतां भेजे। सिंहदुर्ग-प्राचीराभ्यन्तर एव निःशब्दं वीरा युद्धसज्जां विदधति स्म। भूषणकविर्वीररस-कविता-पाठैरखिलानामुत्साहं द्विगुणयति स्म। वीरा अन्तर्लौहं वर्म्म परिधाय, तदुपरि माङ्गलिक-वर्णैर्वारबाणैरङ्गरक्षिकाभिश्चाऽऽत्मानमाभूष्य, सारसनं बद्ध्वा, आयस-शीर्षाच्छादकस्योपरि स्वदेशीयं चक्रोष्णीषं धारयन्ति स्म।

अथोच्चाया एकस्या वेदिकाया उपरि समारूढो महाराष्ट्रराजः शिववीरः समवालोकयत्, यत् पूर्वस्यां रिङ्क्तरङ्ग-भङ्गाहत-तीरा शीतल-समीरा धलद्धलद्-ध्वनि-धीरा गम्भीरा नीरानाम्नी नदी प्रवहति। दक्षिणा प्रतीच्यां च गिरिराजीनां परतो गिरि-राजयः,

---

पश्चिमाशायाः=वारुण्या दिशः, कुण्डलमिवेत्युपमा। **अस्ताचलस्य**=चरमगिरेः, **चूडायाः**=मस्तकस्य, **शोणोष्णीषताम्**=रक्त शिरोवेष्टनताम्। **भेजे**=स्वीचकार। सिंहदुर्गस्य, **प्राचीरस्य**=परिखायाः, **अभ्यन्तरे**=अन्तराले। **युद्धसज्जाम्**=सङ्ग्रामसन्नद्धताम्। **अन्तः**=निम्नांशे। **लौहम्**=लोहनिर्मितम्। **माङ्गलिकवर्णैः**=पीतादिभिः। **वारबाणैः**=कवचैः। **अङ्गरक्षिकाभिः**=शरीररक्षयित्रीभिः। **आभूष्य**=भूषयित्वा। **सारसनम्**=कटिबन्धम्। **आयसस्य**=लोहनिर्मितस्य, **शीर्षाच्छादकस्य**=शिरस्त्राणस्य। **स्वदेशीयम्**=भारतनिर्मितम्। **चक्रोष्णीषम्**=गोलं शिरोवेष्टनम्। **रिङ्क्तरङ्गभङ्गैः**=समुच्छलल्लहरिच्छेदैः, **आहतम्**=ताडितम्, **तीरम्**=तटप्रदेशो यस्याः सा। **शीतलसमीरा**=शिशिर-वायु-समवेता। **धलद्धलद्ध्वनिना**=धलदित्यनुश्रूयमाणशब्देन, **धीरा**=मन्दगमना। **गम्भीरा**=अगाधजला। **दक्षिणा**=दक्षिणस्याम्।

स्वकीयैरभ्रंलिहैरुच्चैः सानुभिरधित्यकास्थैररण्यानी-संस्थानैर्मेघमाला-मण्डल-भ्रममुत्पादयन्ति। उदीच्यां च सुदूर-विस्तृतं हरित-शाद्वलम्, ततश्च पुण्यनगरमवलोक्यते। दुर्गमिदं शैल-शिखरस्थमिति दूर-वीक्षण-नलिकातो वीक्षणेन, विलिख्य स्थापितं चित्रमिव, साकल्येन नगरमिदमालोक्यते स्म। शिववीरः, तेन सह द्वित्राणि मित्राणि च, सतर्कं सविविध-भाव-भङ्गं नगरमेनदालोकयन्ति। रजन्यामेतस्मिन् नगरे केव दुर्घटा घटना भवित्रीति च पर्य्यालोचयन्ति स्म।

अस्मिन् मण्डले बहुदर्शी, शिव-पितृ-कर-पल्लव-च्छायायां यापित-बाल्य-वयस्कः, युद्ध-विद्या-निष्णातः श्रीमुरेश्वराख्य एको

आजन्तम्। प्रतीच्याम्=पश्चिमायाम्। गिरिराजीनाम्=पर्वतश्रेणीनाम्। स्वकीयैः=नैजैः। अभ्रंलिहैः=मेघस्पर्शिभिः। सानुभिः=शृङ्गैः। अधित्यकास्थैः=पर्वतोर्ध्ववर्त्तिभिः। अरण्यानी-संस्थानैः=महारण्यनिवेशैः। मेघमालामण्डलभ्रमम्=नीरदराजिबिम्बभ्रान्तिम्। उदीच्याम्=उत्तरस्याम्। सुदूरविस्तृतम्=अतिविस्तीर्णम्। हरित-शाद्वलम्=हरिद्वर्णघासमयम्। दूर-वीक्षणनलिकातः="दूरबीन" इति प्रसिद्धयन्त्रेण। वीक्षणेन=अवलोकनेन। विलिख्य=चित्रीकृत्य। स्थापितम्=रक्षितम्। साकल्येन=सम्भूय। सतर्कम्=सविचारम्। दुर्घटा=अभूतपूर्वा। घटना=दशा। पर्य्यालोचयन्ति स्म=व्यचारयन्।

बहुदर्शी=दीर्घदर्शी। शिव-पितृ-कर-पल्लव-च्छायायाम्=शिववीर-जनक-हस्त-किसलय-च्छायायाम्। यापितम्=क्षपितम्, बाल्यम्=आद्यम् वयः=अवस्था, येन सः। युद्ध-विद्यायाम्=सङ्ग्रामज्ञाने, निष्णतः=निपुणः

वीरवर आसीत्। अपर आबाजीस्वर्णदेवाभिधो ब्राह्मणः, येन स्वबाहुबलेन सर्वोऽपि कल्याणप्रदेशः, कल्याणदुर्गं च शिवस्य वशमानीतमासीत्। इतरश्च "अन्नजीवदत्तः," येन स्ववीर्येण वर्षचतुष्टयात् प्राक् पानालय-दुर्गं यवन-दुर्गं च शिवस्य हस्तगतं कृतम्। तदेते त्रयोऽपि सम्मुखमायाता एवमालापमकार्षुः।

मुरेश्वरः-आर्य! सत्यमेव स्थिरीकृतं यदद्य मां वा स्वर्णदेवं वा न सह नेष्यति श्रीमान्?

शिवराजः-वीरवर! क्षम्यतां, नाहं युष्माकं धैर्यं गाम्भीर्यं चातुर्यं वीर्यं वा विस्मरामि। परमलमनुरोधैरद्य। केवलमाशीर्भिरेव संवर्द्धयतामेष जनः। निश्चयेनाहं युष्मदाशीः संवर्द्धितो विजेष्ये। दैवाद् वीरगतिं गतश्चेद् भवत्सु कुशलिषु पुनरपि स्वतन्त्रमेव महाराष्ट्र-राज्यम्, पुनरपि प्राप्तशरणो वैदिको धर्मः, पुनरपि च कम्प एव वक्षःसु भारत-प्रत्यर्थि-पत्नीनाम्। युष्मासु मया सह भारतभुवं विरहयत्सु च कस्मिन् धुरं धारयिष्यति धर्मः? कमालम्बिष्यते भारताभिजनस्वातन्त्र्य-भारः? कस्याग्रे च रोदिष्यति नवोन्न-

---

श्रीमुरेश्वराख्यः="मोरेश्वर, मोरोपन्त" इति प्रसिद्धः। अन्नजीवदत्तः="अण्णाजी, दत्तोबा" इति ख्यातः। स्ववीर्येण=स्वबलेन।

धैर्यम्=धीरताम्। गाम्भीर्यम्=गूढप्रकृतिताम्। चातुर्यम्=पाण्डित्यम्। वीर्यम्=बलम्। विस्मरामि=विस्मृतिपथमानयामि। संवर्द्धयताम्=वृद्धिं प्राप्यताम्। युष्माकम्=भवताम्, आशीभिः=आशीर्वादैः, संवर्द्धितः=वृद्धिं गमितः। वीराणां गतिम्, सूर्यमण्डलं भित्वोर्ध्वगतिम्। प्राप्तशरणः=लब्धरक्षणः। भारत-प्रत्यर्थिपत्नीनाम्=हैन्दवशत्रुस्त्रीणाम्। विरहयत्सु=विरहितां

तिमासादयन्ती महाराष्ट्र-जातिः? तदलमालप्यान्यत् ! सहसहचराय मे स्वस्त्युच्यताम्, यथा लीलयैवैतान् प्रमत्त-हतकान् विजये ।

ततस्तेष्वशीराशीन् वदत्सु सपदि प्रविश्य, प्रणनाम गौरसिंहः । शिवेन सप्रेमाशीराश्युदन्तं पृष्टश्चोवाच-"भगवन् ! वरयात्रा-प्रस्थानात् प्रागेव वधू-प्रवेशो जातः" । अथ किमिति ? किमिति ? पृच्छति सर्व-वीर-मण्डले, स विशकलय्य सर्वमकथयद् रसनारीलाभचरितम्, कुशलेन तोरणदुर्गे स्थापन-वृत्तान्तञ्च । तदाकर्ण्य चात्यन्त-प्रमुदिताः सर्वे, "अतिमाङ्गलिकमिदं, मूर्तिमतीयं जयश्रीः, निश्चितो जय आर्यचरणानाम्"-इति प्रोचुः ।

शिवराजस्तु 'गौर ! यद्यप्यल्पं ते वयः, तथापि युद्धकार्येष्वनियुक्तोऽपि बहुधा मां तोषितवानसि, तदस्मिन् युद्धयात्रा-समये मङ्गलमाचक्षाणोऽवश्यं पुरस्कार्यः-इति सादिनां पञ्चसहस्र्या अध्यक्षतायां त्वां विनियुनज्मि, अङ्गीकुरु"-इत्यगादीत् ।

कुर्वत्सु । धुरम्=भारम् । भारताभिजनस्वातन्त्र्यभारः = हैन्दवदेशस्वतन्त्रताधूः । नवाम्=नवीनाम्, उन्नतिम्=वृद्धिम् । आसादयन्ती=प्राप्नुवती । सहसहचराय=सहगणाय । "नमः स्वस्ती"ति चतुर्थी स्वस्तियोगे । विजयं करोमि विजये । सप्रेमाशीराशि=सस्नेहमङ्गलोक्तिपुरस्सरम् । क्रियाविशेषणम् । उदन्तम्=वृत्तान्तम् । विशकलय्य=स्पष्टीकृत्य । रसनारीलाभचरितम्= "रौशन आरा" प्राप्तिवृत्तम् । जयश्रीः = विजयलक्ष्मीः ।

अनियुक्तोऽपि=अलगयितोऽपि । आचक्षाणः=कथयमानः । पुरस्कार्यः पारितोषिकदानार्हः । अध्यक्षतायाम्=स्वाम्ये, सैनापत्ये । विनियुनज्मि= विनियोजयामि ।

अथ समस्तकनमनमङ्गीकुर्वति गौरे; शिवेङ्गितेन तत्पदार्हाणि वासांसि विश्राणयति मुरेश्वरे, तत्पदसूचकमेकं सुवर्ण-पट्टकं वक्षसि, ससुवर्णकोशं खड्गं च कटिप्रदेशे शिवः स्वहस्तेन स्वयमायोजयत्। तदुदारता-वर्णन-कविता रचयन्तं पठन्तं च भूषणं मौक्तिक-मालया सम्मान्य यावत् पुरतः पश्यति, तावद् दृष्टम्; पुरतश्चिर-सहचरो माल्यश्रीको नयन-जल-क्षालित-कपोलः सहगमनानुमतिं वाञ्छतीति। तन्निषेधमनुचितं मन्यमानस्तत्प्रार्थनामङ्गीकृत्य चरणयोः पतितं रघुवीरमपश्यत्। "किं किं ? कथनीयं वा किमपि ?"-इति पृष्टः स प्रावोचत्-"महाराज! तद्दिने तोरण-दुर्गात् सपदि पत्रादिकमानीतवन्तं मामवलोक्य प्रसन्नः पारितोषिकं प्रत्यज्ञासीदार्यः"।

ततः शिवराजः प्राह-"सत्यं दास्यते, किन्तु त्वरासमये साम्प्रतमसाम्प्रतं तद्याचनम्। तथाऽपि कथय किं याचसे ?"। रघुवीर उवाच-"भगवन्निदमेवाभ्यर्थये यदनुगन्तुमाज्ञाप्योऽयं विधेयः"। तदाकर्ण्यात्यन्त-चकितः शिवराजः प्राह-"चित्रम्! संदेश-

---

तत्पदार्हाणि=तत्स्थानयोग्यानि। तादृशसेनापतिधारणीयानीति यावत्। **विश्राणयति**=दत्तवति। **सुवर्णपदकम्**=हैरण्यपट्टिकाम्। सुवर्णनिर्मितेन **कोशेन**=आच्छादकेन सहितम्। **आयोजयत्**=योजितवान्। **तदुदारतायाः**=तदीयाया मुक्तहस्तविश्राणनतायाः, वर्णने, **कविताः**=काव्यानि। **नयनजलेन**=अश्रुणा, **क्षालितम्**=धौतम्, **कपोलम्**=गण्डं यस्य सः। **प्रत्यज्ञासीत्**=प्रतिज्ञातवान्।

असाम्प्रतम्=अयुक्तम्। "युक्ते द्वे साम्प्रतं स्थाने" इत्यमरः। **आज्ञाप्यः**=

हर-पदे नियुक्तोऽसि, अतिशिक्षित-वीर-कार्य-प्रवाहे च पतितुं साहसमाधत्से ! कथमेतत् ?"

रघुवीर आह-महाराज ! स्वकुटुम्बेऽहमेकोऽस्मि, विनष्टं मामवगत्य न कोपि रोदिष्यति ; प्रभुं तोषयितुं शक्ष्यामि चेदायतिर्मे मङ्गलमयी ।

शिवस्तु विलम्बस्यानवसरमाकलयन्, झटित्योमित्युवाच । स च शिरसा भुवं स्पृशन्, प्रणम्य युद्धसज्जोऽभूत् । अथाऽपि प्रच्छिषमाणं गौरं सम्बोध्य, शिवराजेनाभाणि—

"त्वं तु सादिनां पञ्चशतीं सह नीत्वा, पुण्यनगरस्य पूर्वतः प्रतीक्षस्व, यदि रक्तमेकमग्निपुष्पं नगने समुड्डीयमानं पश्येः, ततस्त्वं बलात् प्रविश्य प्रत्यर्थिनामाक्रमणं विधास्यसि ; इतश्च पश्चिमतः स्वर्णदेव आर्यः" ।

स च तथेत्युक्त्वा तथा कर्तुं प्रचलितः । स्वर्णदेवोऽपि चोमिति स्वीचकार ।

आदेशयितव्यः । **चित्रम्**=आश्चर्यम् । **संदेहहर-पदे**=वार्त्ताहारिस्थाने । अतिशिक्षितानां वीराणां **कार्यप्रवाहे**=कर्त्तव्यधारायाम् । कृत्यव्रात इति यावत् ।

विनष्टम्=अदृष्टम् । मरणन्तु नार्थो मङ्गलवेलायाममङ्गलाभिधानस्य कविसमयख्यातिविरुद्धत्वात् । **आयतिः**=उत्तरकालः ।

अनवसरम्=अवेलाम् । **ओम्**=स्वीकृतम् । **आपिप्रच्छिषमाणम्**=आप्रष्टुमिच्छन्तम् ।

प्रतीक्षस्व=प्रतीक्षां कुरु । **रक्तम्**=शोणम् । **अग्निपुष्पम्**="गुल्वारा" इति हिन्दी । **समुड्डीयमानम्**=उड्डयन्तम् ।

चोमिति, "ओमाङोश्चे"ति पररूपम् ।

शिवराजोऽपि–"प्रतीक्ष्यताम्, जननीं प्रणम्याऽऽगच्छामि" –इति व्याहृत्यान्तः प्रविष्टो मुहूर्तानन्तरं च पटान्तेन चक्षुषी परिमृशन, निरगात्, आललाप च।

शिवः–अपि सज्जा यूयम्?

माल्यश्रीकः–आम्! प्रस्तुता वयम्।

शिवः–अथ विजयतां त्रिपुर–मथनो देव–देवः।

सर्वे–विजयते महादेवः! विजयते सनातनधर्मः! विजयते च श्रीमान् महाराष्ट्रराजः!

रघुवीरः–[पुष्पमालामर्पयन्] तोरण–दुर्गास्थ–मारुतिमन्दिराध्यक्षेणार्पितेयम्।

शिवः–जय जय हनूमन्! त्रायस्व!! [इति सादरं प्रसाद–मालां कण्ठे स्थापयति स्म।]

ब्राह्मणाः–[कुङ्कुमाक्षत–दान–पुरःसरम्]

"अक्षतान् विप्रहस्तेभ्यो नित्यं विन्दन्ति ये नराः।
तेषां विवृद्धिमायान्ति लक्ष्मीरायुर्यशो बलम्"।

परिमृशन्=प्रोञ्छन्। **निरगात्**=निष्क्रान्तः।

त्रयाणां पुराणां समाहारस्त्रिपुरम्, तत्र विद्यमानोऽसुरो लक्षणया त्रिपुरः, **तन्मथनः**=तन्मर्दकः।

प्रसादमालाम्=हनूमदर्पितमालिकाम्।

अक्षतान्=क्षतशून्यान् तण्डुलकणान्। **विप्राणाम्**=ब्राह्मणानाम्, **हस्तेभ्यः**। **नित्यम्**=सततम्। **विन्दन्ति**=प्राप्नुवन्ति। "विदॢलाभे"। **विवृद्धिम्**=

"शत्रवः पराभवं यान्तु, शाम्यन्तु घोराणि, शाम्यन्तु पापानि, हताश्च ब्रह्मद्विषः, हताश्च परिपन्थिनः, हताश्च विघ्नकर्तारः श्रीरस्तु श्रीरस्तु" ।

माल्यश्रीकः—*"यतो धर्मस्ततः कृष्णो यतः कृष्णस्ततो जयः"* । एवं सर्वे इष्टदेवं स्मरन्तो माङ्गलिक-शब्दानुच्चारयन्तो महता कोपेन रिपु-निकरं दिधक्षन्त इव दुर्ग्गादवातरन् ।

सिंहदुर्ग्गात् पुण्यनगरपर्य्यन्तं शिवराजेन तूष्णीमदीपप्रकाशा, अवाग्विलासा सेना, सन्निवेशिता । स्वयं च पञ्चविंशतिं वा त्रिंशद्वोत्साहधनान् धीरान् वीरान् सह नीत्वा, पुण्यनगरप्रवेश-द्वार-समीप एव गहने गाढान्धकार आम्र-वणे प्रतीक्षमाणः समतिष्ठत ।

तावद् "ढं ढं ढम्" इत्याश्रावि वाद्य-निनदः, आलोकिषत च स्थूलवर्तिका-महाद्युतयो दीपाः । परस्परमालोक्य, तैः कथि-

---

विपुलां वृद्धिम् । **शाम्यन्तु**=शान्तिं गच्छन्तु । **घोराणि**=उपद्रवकराणि । **ब्रह्मद्विषः**=वेदशत्रवो ब्राह्मणशत्रवश्च ।

रिपुनिकरम्=शत्रुव्रातम् । **दिधक्षन्तः**=दग्धुमिच्छन्तः ।

अदीपप्रकाशा=आलोकरहिता । **अवाग्विलासा**=भाषणरहिता । **सन्निवेशिता**=संस्थापिता । **उत्साहधनान्**=सोत्साहान् । **धीरान्**=धैर्यशालिनः । **गहने**=घनीभूते । गाढान्धकारपदेनापि घनीभूतता निवेदितेति चेद् "गहनं काननं वनमि"ति कोशानुश्रयणपूर्वककाननार्थकत्वमाश्रयणीयम्। आम्रवणाभिधानाच्च काननस्य नवीनस्यान्वेषणीयत्वमिति विद्वन्मण्डली। **आम्रवणे**=रसालविपिने।

वाद्यनिनदः=भेरीध्वनिः। **आलोकिषत**=दृष्टाः । **स्थूलवर्त्तिकया महा-**

तमियं सा वरयात्रेति। अथ समीपमायाते तस्मिन् वरयात्रामण्डले शनैः शनैरेते सर्वेऽपि तैरेव सह मिलिताः सुखेन पुण्यनगरं प्रविष्टाः।

यत एव सपादाताः, सवाडवाः, घाण्टिक–चाक्रिकायुधिक–वैजयन्तिक–वादकादि-सहिताः, कृशानु–क्रीडा–कलन–कौतुकिन एते यान्ति स्म, तत एव गवाक्षेभ्यः क्रोड–स्थापित–स्तनन्धया गृहिण्यः, उच्चकुचाग्रास्फालित–गवाक्ष–दण्डाः, स्वप्रेमपात्र–प्रियजन–दन्तक्षतव्रण–विषम–ताम्बूलराग–रञ्जिताधराश्चिरण्ट्यः, अङ्गुल्येदमिदमिति निर्दिशन्त्यः, पश्यन्ति स्म।

शनैरायात एष समारोहः शास्तिखानाध्युषित–गृह–द्वारपर्य्यन्तम्। शास्तिखान–सीमन्तिन्योऽपि धमद्धमद्ध्वनि–समाकर्णन-

द्युतयः=विशिष्टकान्तिशालिनः। दीपाः, "मशाल" इति ख्याताः।

सपादाताः=सपदातिसैनिकाः, सवाडवाः=घोटकैरुह्यमानाः। घाण्टिकाः घण्ट्या चरन्तः, चाक्रिकाः=चक्रेण चरन्तः, आयुधिकाः=आयुधजीविनः, वैजयन्तिकाः=ध्वजधारकाः, वादकाः=वाद्यवादनपटवः, एतदादिभिः सहिताः=समेताः। कृशानुक्रीडायाः, "आतिशबाजी" इति ख्यातायाः, कलने=करणे, कौतुकिनः=सकुतूहलाः। यान्ति स्म=अगच्छन्। क्रोडस्थापितस्तनन्धयाः=अङ्कनिवेशितपयःपायिबालाः, उच्चकुचाग्रैः=उन्नतस्तनचूचकैः, आस्फालिताः=ताडिताः, गवाक्षदण्डाः=वातायनदण्डा याभिस्ताः। स्वप्रेमपात्रस्य=स्वस्नेहाधारस्य, प्रियजनस्य, दन्तक्षतव्रणेन=दशनखण्डनव्रणेन, विषमाः=उच्चावचाः, चिह्निता इति यावत्, ताम्बूलरागेण=ताम्बूलभक्षणजेन लौहित्येन, रञ्जिताः=सवर्णाः, अधरा यासां ताः। चिरण्ट्यः=युवत्यः।

जात-कुतूहलाः, निरादृततन्द्राः, मन्दाक्ष-मन्द-प्रचाराः प्रतिसीरा अपसारमपसारम्, लशुन-पलाण्डु-गन्ध-कटुभिर्जम्भापरम्परा-भिर्नासा-मौक्तिकानि मलिनयन्त्यः, लोलत्कुण्डलाः, दोलल्लन्तिकाः, स्खलद्वसनाः, वलद्वसनाः, मदव्याघूर्णितनयनाः, विहित-मेचक-कुञ्चित-कच-प्रचय-सञ्चयनाः, अञ्जनरञ्जिताभिर्दृग्भिरिन्दीवर-माला इव वर्षन्त्यः, रोलम्ब-कदम्बमिव क्षिपन्त्यः, वीक्षितुमारेभिरे । समारोह एष शनैः शनैः परतो निर्यातः, किन्त्वन्यूनाश्चिशद्वीरास्तद्व-

---

समारोहः=जनसम्मर्दः । शास्तिखानस्य, **सीमन्तिन्यः**=केशवेशवत्यो वनिताः । धमद्धमद्धनेः, **समाकर्णनेन**=श्रवणेन, **जातम्** = उत्पन्नम् , **कुतू-हलम्**=कुतुकं यासां ताः । **निरादृता**=अनादरविषयीकृता, **तन्द्रा**=आलस्यं यभिस्ताः । **मन्दाक्षेण**=लज्जया, मन्दः, **प्रचारः**=सञ्चरणं यत्र तत्र यासां ताः । **प्रतिसीराः**=यवनिकाः । **अपसारमपसारम्**=दूरीकृत्य दूरीकृत्य । **लशुनस्य**=रसोनस्य, **पलाण्डोः**="प्याज" इति ख्यातस्य, गन्धेन कटुभिः । **जम्भापर-म्पराभिः**=गात्रविनामसमूहैः । **नासामौक्तिकानि**=नासिकामणीन् । **मलिन-यन्त्यः** = मलिनतां नयन्त्यः । **लोलत्कुण्डलाः**=हिलत्कर्णभूषणाः । **दोलल्ल-न्तिकाः**=हिल्लोलत्कण्ठिकाः । **स्खलद्वसनाः**=गलद्वस्त्राः । **वलद्वसनाः**=विवृद्ध-हास्याः । **मदव्याघूर्णितनयनाः**=मद्यादिपानप्रचलन्नेत्राः । **विहितम्**=सम्पादि-तम् , **मेचकस्य**=श्यामस्य, **कुञ्चितस्य**=गुच्छितस्य, **कचप्रचयस्य**=केशसमू-हस्य, **सञ्चयनम्**=बन्धनम्, याभिस्ताः । **अञ्जनरञ्जिताभिः**=कज्जलाक्ताभिः, **इन्दीवरमालाः**=पद्मश्रेणीः । **वर्षन्त्य इव**=प्रकिरन्त्य इवेत्युत्प्रेक्षा । **रोलम्ब-कदम्बमिव**=द्विरेफव्रातमिवेत्युत्प्रेक्षा । **क्षिपन्त्यः**=प्रसारयन्त्यः । **वीक्षितुम्**= द्रष्टुम् । **आरेभिरे**=प्रारब्धवत्यः । **परतः**=अन्यस्यां दिशि । **तद्भवनस्य**=

वन-नेदिष्ठ-वाटिका-विटपान्धतमस-च्छायास्वेव समलीयन्त।

वरयात्रा-कलकलः शान्तः, स्त्रियः पुनः स्व-शयनीयेषु शयिताः। अन्धकारो ववृधे। नागरिक-जनरवोऽस्तः। पथि पथिकानां गतागतं निवृत्तम्। श्याम-श्यामैर्मेघैस्तिमिरसान्द्रता द्विगुणिता। झिल्ली-रवानुसृतो नैशीथः स्वभावसिद्धोऽनाहतानुकारी ध्वनिरश्रूयत। प्रतीहारा अपि गृहीतभित्तिकाश्रयाः, घुरघुरायित-घोरघोणाः, श्लथत्करवालाः, समशयिषत।

अथार्द्धसुप्ताभिर्महामद-महिलाभिः, प्रासाद-पृष्ठतः सीत्कारमयं खटखट-प्रधानं किञ्चन शब्दजातमिवाश्रावि, किन्तु निद्रया

तत्सदनस्य, **नेदिष्ठायाः**=अन्तिकस्थायाः, **वाटिकायाः**=उद्यानस्य, **विटपानाम्**=द्रुमाणाम्, **अन्धतमसच्छायासु**=गाढान्धकारप्रतिबिम्बेषु। **समलीयन्त**=क्षुपिताः। **वरयात्राकलकलः**=विवाहसमारोहकोलाहलः। **स्वशयनीयेषु**=स्वपर्यङ्केषु। **ववृधे**=एधामास। **अस्तः**=समाप्तिङ्गतः। **पथिकानाम्**=यात्रिणाम्। **श्यामश्यामैः**=अतिमेचकैः। **तिमिरसान्द्रता**=अन्धकारघनीभूतता। **द्विगुणिता**=ववृधे। **झिल्लीरवानुसृतः**=झिण्टिकाशब्दपृष्ठगः। **नैशीथः**=आर्धरात्रिकः। **स्वभावसिद्धः**=प्राकृतिकः। **अनाहतस्य**=योगशास्त्रप्रसिद्धध्वनिविशेषस्य, **अनुकारी**=अनुकरणशीलः। **प्रतीहाराः**=दौवारिकाः। **गृहीतभित्तिकाश्रयाः**=लब्धकुड्याधाराः। **घुर्घुरायितघोरघोणाः**=घुरघुरशब्दनिस्सरणभयङ्करनासाः। **श्लथत्करवालाः**=स्थानभ्रष्टतरवारयः। **समशयिषत**=सुप्ताः।

अर्धसुप्ताभिः=अपूर्णस्वापीभिः। **महामदमहिलाभिः**=शास्तिखानयोयाभिः। **प्रासादपृष्ठतः**=हर्म्यपश्चाद्भागे। **शब्दजातमिव**=ध्वनिसमूह इव।

गाढमाक्रान्ताभिर्नापार्य्यतोत्थातुं निर्णेतुं वा। धमधमाध्वनिरेष द्वैगुण्यं प्राप्तः। महानस-गृह इष्टिकाग्रावपात इव चान्वभावि। ततस्तु भीताः स्त्रिय उत्थाय, पल्यङ्केषूपविश्य, किमिदं कुतः ?-इति परस्परमालप्य, दासीं प्रोचुः-"हण्डे ! हण्डे ! गत्त्वाऽवधेहि, रन्धन-गृहे किमिव सशब्दमास्खलितम्"।

सा तु निद्रा-भर-मन्थरा प्रावोचत्-भट्टिनि ! शेष्व, कोऽपि बिडाल आखुं गृह्णन् समापतितो भवेत्।

क्षणानन्तरं पुनराकर्णि तथैवेष्टिका-पात-घातः। अथ द्वित्राः स्त्रियो भीत-भीता रन्धनालय-द्वार-देशमुद्घाट्य, मन्दालोकेन दीपेनाऽऽलुलोकन्त—यत् पञ्चषा महाराष्ट्र-वीरा भित्तिं भित्वा, अन्तरायाताः सन्ति, अन्ये चैकस्मात् परम्-अपरः, ततोऽपि परमपरः-इति विकोशखड्गाः प्रविशन्ति। तास्तु सर्वा-

अश्रावि=श्रुतम्। आक्रान्ताभिः=व्याप्ताभिः। नापार्यत=न समार्थ्यत। द्वैगुण्यम्=बाहुल्यम्। महानसगृहे=रसवतीसदने। इष्टिकानां ग्राव्ण पात इव=पतनमिव। अन्वभावि=अनुभवगोचरीकृतः। पल्यङ्केषु=पर्यङ्केषु। हण्डे=दास्यादिनीचसम्बोधनम्। अवधेहि=जानीहि। रन्धनगृहे=महानसे। सशब्दम्=सध्वनि। आस्खलितम्=पतितम्।

निद्राभरमन्थरा=स्वापभारसालस्या। शेष्व=शयनं कुरु। आखुम्=मूषकम्। समापतितः=कूर्दितः।

मन्दालोकेन=अल्पप्रकाशजनकेन, शयनसमयार्थरक्षितेन। भित्तिम्=कुड्यम्। च्छित्वा=संत्रोट्य। सन्धिं कृत्वेति यावत्। अन्तः=अभ्यन्तरे। एकस्मात्परमपरः="एकके बाद दूसरा" इति हिन्दी। विकोशखड्गाः=नग्नासयः।

त्कारं प्रतिनिवृत्ताः, गृहावग्रहणी-समुद्घाताहतप्रपदाः, प्रघाणे निपतन्त्यः, कान्दिशीका अट्टेष्वितस्ततो धावन्त्यः, घोरनिद्रया सुप्तं सेनान्यं समबूबुधन्नचकथंश्च यद् "नग्नासिहस्ता महाराष्ट्रा गृहे प्रविष्टाः"-इति।

सेनानीस्तु महादेव-पण्डितालापं स्मरन् सुप्तः-इति स्वप्नेऽपि बद्धकरसम्पुटं सन्धिं प्रार्थयमानं स्वाग्रतः स्थितं शिवराजं पश्यन्नासीत्। अकस्मादुत्थापितश्च क्षणमुपधानम्, क्षणं पल्यङ्क पट्टिकाम्, क्षणं सीमन्तिनी-जन-ग्रीवाम्, समालिङ्गन्, परतः प्राप्तचेतनः समज्ञासीद्, यत् पुण्यनगरं वशंवदं विधाय, महाराष्ट्रा अन्तःपुराक्रमणमपि व्यधुरिति। अथैष सपदि समुत्थाय, येनैव पथा पलायितुमियेष, तत एव सखड्गं महाराष्ट्र-वीरं मूर्तिमन्तमिव मृत्युमुपस्थितमवलोक्य, पुनः प्रविश्य, स्वाधिष्ठित-विशाल-कोष्ठस्य प्रधानद्वारं पक्ष-द्वाराणि च व्यधात्। स्त्रीभिः सहितः स्वयमेकल एव

गृहावग्रहणीषु=सदनदेहलीषु, समुद्घातेन=समुच्छलनेन, आहतानि=ताडितानि, प्रपदानि=पादाग्राणि यासां ताः। प्रघाणे=बहिर्द्वारप्रकोष्ठके। कान्दिशीकाः=भयद्रुताः। अट्टेषु=अट्टालिकासु। सेनान्यम्=सेनापतिम्। समबूबुधन्=अजागरयन्।

बद्धकरसम्पुटम्=कृताञ्जलिम्। पल्यङ्कपट्टिकाम्=पर्यङ्कस्य वामीयं दक्षीयं वा काष्ठम्। "पाटी" इति हिन्दी। सीमन्तिनीजनस्य=नारीवर्गस्य, ग्रीवाम्=कन्धराम्। समालिङ्गन्=समाश्लिष्यन्। वशंवदम्=स्वाधीनम्। व्यधुः=कृतवन्तः। स्वेन, अधिष्ठितस्य=अध्युषितस्य, विशालप्रकोष्ठस्य=महतःशयनसदनस्य। प्रधानमार्गम्=गमागमपथम्। पक्षद्वाराणि="खिड़की"

च पुरुषोऽन्तःस्थः प्रच्छन्नतया पलायितुं व्यचेष्टिष्ट।

इतस्तु कञ्चित् कोलाहलमिवाऽऽकर्ण्य, द्वार-देशस्था रक्षकाः, पार्श्व-कोष्ठेषु चन्द्रशालासु, मण्डपेषु च सुप्ताः, अपरे वीराः समुत्थाय, श्येना इव समापतन्। महाराष्ट्रैः-"हर हर महादेव"-इति, यवनैश्च-"अल्ला अल्ला अल्ला"-इति, युद्धारम्भसूचको महानिनदोऽक्रियत। तस्मिन् घोरेऽन्धकारे दीप-प्रकाश-साक्षिकम्, कुट्टिमेऽट्टे प्राङ्गणे च खड्ग-खणत्कार-क्ष्वेडा-हुङ्कार-ध्वनि-प्रतिध्वनि-धर्षित-प्रतिवेशि-निचयम्, मुहुर्त्त यावत्तुमुलं युद्धमभूत्। आक्रान्तमाक्रान्तम्, जितं जितम्, इति वर्द्धितोत्साहैर्महाराष्ट्रैराक्रान्ता आक्रान्ताः, जिता जिता इति भग्नोत्साहा यवनाः, परितो विशस्यमानाः, स्वमज्जरुधिर-

---

इति ख्यातानि। **प्यधात्**=अबन्धयत्। **एकलः**=एकाकी। **पुरुषान्तःस्थः**=मनुष्यमध्यस्थः, लुक्कायित इति यावत्। **प्रच्छन्नतया**=गुप्ततया। **पार्श्वकोष्ठेषु**=द्वारपार्श्वयो रक्षकनिवासाय रचितेषु लघुसदनेषु। **चन्द्रशालासु**=शिरोगृहेषु। **मण्डपेषु**=अङ्गणान्तरालशयनीयसदनेषु। तृणादिनिर्मितेषु लोकप्रसिद्धस्य तादृशसदनमात्रे प्रयोग इति बोधयति। **महानिनदः**=विशिष्टो ध्वनिः। **दीपप्रकाशसाक्षिकम्**=आलोकभाद्दृष्टिपथम्। **कुट्टिमे**=निबद्धभूमौ। "कुट्टिमोऽस्त्री निबद्धा भूरि"त्यमरः। **प्राङ्गणे**=चत्वरे। "अङ्गणं चत्वराजिरे"इत्यमरः। **खड्गखणत्कारस्य**=असिखडखडाशब्दस्य, **क्ष्वेडायाः**=सिंहगर्जनस्य। **हुङ्कारस्य**=हुंशब्दस्य च, **ध्वनिप्रतिध्वनिभिः**=शब्दप्रतिशब्दैः, **धर्षितः**=भयाकुलीकृतः, **प्रतिवेशिनिचयः**=पार्श्वसदनीयजनव्रातो यस्मिन् कर्मणि तादृशम्। **मुहूर्त्त यावत्**=घटिकाद्वयपर्यन्तम्। **तुमुलम्**=सङ्कुलम्। **भग्नोत्साहाः**=विनष्टबलहर्षाः, **विशस्यमानाः**=कर्त्यमानाः। **मज्जः**=धातुविशेषः, **रुधिरम्**=लोहितम्,

मेदो-निचयैर्मेदिनीं मेदस्विनीं पङ्किलां च समकार्षुः।

तावत्प्रासादबहिर्भाग एकमग्निमयं रक्तं कुसुमाकारं स्फुलिङ्ग-निकुरम्बकमपि गगनं चुचुम्ब।

शिवराजस्तु सेनापतिमेवान्विष्यन्, शुद्धान्तदिश्यापतितो मार्ग-मवरुध्य स्थितं द्वाविंशति-वर्षदेश्यमेकं सुन्दरं यवनयुवकमवा-लोक्य, चान्द्रेण संवादिनीमिव तदाकृतिं निर्धारयन्, उक्तवान-यद् "मन्ये, चान्द्रखानस्य पुत्रोऽसि", स ऊचे' ओम्' इति।

शिवोऽभाणीद्-"अपसरापसर, किमिति मृषा स्वपितृ-शोणि-त-दिग्ध-मत्करवाल-धारा-तीर्थे शरीरं विसिसृक्षसि! समालोक्य तव मुग्धं मुख-मण्डलं करुणा-परवशः क्रौर्यमाचरितुं नोत्सहे"-

इति कथयत एव तस्याकस्मादुत्प्लुत्य शितधारं खड्गं

मेदः=अस्थितेजः, तेषां निचयैः=समूहैः। मेदस्विनीम्=मेदसा व्याप्ताम्। पङ्किलाम्=कर्दमभरिताम्।

अग्निमयम्=वह्नियुतम्। स्फुलिङ्गनिकुरम्बकम्=अग्निकणव्रजः। गगनं चुचुम्ब=नभः पस्पर्श।

शुद्धान्तदिशि=अन्तःपुरमार्गे। आपतितः=वेगाच्चलितः। द्वाविंशति-वर्षदेश्यम्=द्वाविंशतिहायनवयस्कम्। चान्द्रेण=चान्द्रखानेन। संवादि-नीम्=मिलन्तीम्। तदाकृतिम्=तदाकारम्। ओम्=एवम्।

स्वपितृशोणितेन=त्वज्जनकलोहितेन, दिग्धे=छुरिते, भविष्यत्यवश्य-म्भावित्वाद्भूतत्वमारोप्येदम्। मत्करवालधारातीर्थे=मत्खड्गधारापूतस्थले। विसिसृक्षसि=विसृष्टुमिच्छसि। मुग्धम्=अकपटपटुम्। करुणापरवशः=दयाधीनः। क्रौर्यम्=क्रूरताम्।

मूर्द्धनि प्राहिणोत् स रिपुबालः। शिवस्तु स्तिमित उत्प्लुत्य, यावदेकतस्तिष्ठन्, स्व-खड्ग-त्सरुं दृढं करेणाऽऽकलयति, तावद्-द्राक्षीद्, यद् भयानक-शल्यया कयाचित् हृदयं भित्वा परतोऽपि निस्मृताग्रया शक्त्या तीव्रं विद्धः, भूमौ शायितोऽस्ति शत्रुरिति। तावद् दृष्टवान्, यत् पिचण्डिल एकोऽपरः कृष्ण-कूर्च-प्रचय-चुम्बित-वक्षोभागो ज्वलद्भ्यामिव विस्फारिताभ्यां नयनाभ्यां दिधक्षन्निव, सक्ष्वेडम्-अरे रे अपसद! शास्तिखान-पुत्र-स्हतेनैव ते निधनं स्थिरीकृतं धात्रेति प्रकटमवलोकयन्तु सर्वे-इति कथयन् शक्तिमुद्-तूतुलत्। तच्छक्तिं छेत्तुं खड्गं सज्जीकुर्वन्नेव च केनापि भूमौ निपात्य छुरिका-विदार्यमाणं वेपमानावयवं शत्रुमपश्यत्।

एवमुत्थितं च विघ्न-हर्तारं शत्रु-शोणित-शोणीकृत-करद्वयम्

उत्सृत्य=उच्छालं कृत्वा। **शितधारम्**=तीक्ष्णाग्रम्। **प्राहिणोत्**=प्राचालयत्। **रिपुबालः**=शत्रुसूनुः। **स्तिमितः**=स्तब्धीभूतः। **स्वखड्गत्सरुम्**=स्वासिमुष्टिम्। **दृढम्**=कठोरम्। **भयानकम्**=भीतिजनकम्, **शल्यम्**=भल्लम्, यस्यामेवम्भूतया। शक्त्येति विशेष्यम्। **हृदयम्**=वक्षः। **भित्वा**=विदार्य। **परतोऽपि**=हृदयद्वितीयपार्श्वेऽपि, पृष्ठेऽपीति यावत्। **निःसृताग्रया**=समुद्गताग्रभागया। **पिचण्डिल**=दीर्घोदरः। **कृष्णकूर्चप्रचयेन**=कालमुख-बालसमूहेन, **चुम्बितः**=स्पृष्टः, वक्षोभागो यस्य सः। **ज्वलद्भ्यामिव**=वह्नि-मुद्गिरद्भ्यामिव। **दिधक्षन्निव**=दग्धुं समभिलषन्निव। **सक्ष्वेडम्**=ससिंहनादम्। **उदतूतुलम्**=उदस्थापयत्। **छेत्तुम्**=द्विधा कर्तुम्। **सज्जीकुर्वन्**=सन्नद्धीकुर्वन्। शिववीर इति कर्त्ता। **छुरिकया**=असिधेन्वा, **विदार्यमाणम्**=स्फार्यमाणम्। **वेपमानावयवम्**=कम्पमानगात्रम्।

विघ्नहर्त्तारम्=प्रत्यूहवारकम्। **शत्रुशोणितशोणीकृतकरद्वयम्**=रिपु

इन्द्रगोप-द्युति-द्योतित-बिन्दु-वृन्दाच्छादित-वारबाणम्, निपुणमवलोक्य, 'रघुवीर' इति पर्य्यचेष्ट।

ततश्च "साधु रघुवीर! साधु, न विस्मरिष्यामि ते वीरताकायमिदम्"-इति व्याहृत्य, प्रणमतः पृष्ठं स्पृष्ट्वा, पुनरग्रतो यावज्जिगमिषति, तावदकस्मादट्टालिकातो भटानां विंशतिरिव सोत्फालं शिवस्य परितः समापतत्।

शिवस्तु चन्द्रहास-चालने अद्वितीय इति झटिति केषांचिदविहितोत्फालानामस्पृष्टतलानां गगन एवोदरं सविदरमकार्षीत्, परेषां परिपत्योत्तिष्ठासतामेव शिरोधरामशिरोधरां व्यधित, अन्येषां मेदो-मांस-पिच्छिल-कर्दम-चलितान्, चरणानसंचरणानकृत, इतरेषां च खड्गोत्क्षेपणोत्क्षिप्तान्, करान्, निजासि-वृक्ण-बाहुमू-

---

लोहितलोहितीकृतहस्तयुगलम्। इन्द्रः, गोपाः=रक्षको यस्य सः, इन्द्रगोपः, वर्षाकालिको रक्तः कीटविशेषः, **तद्द्युतिद्योतितैः**=तत्कान्तिभासितैः, **बिन्दुवृन्दैः**=पृषद्व्रजैः। **आच्छादितम्**=आवृतम्, **वारबाणम्**=कवचो यस्य तम्। **निपुणम्**=विचारपूर्वम्।

जिगमिषति=गन्तुमिच्छति। **विंशतिरिव**=प्रायो विंशतिसङ्ख्याका। अपरिगणितत्वादिवः। **सोत्फालम्**=सकूर्दनम्। **चन्द्रहासचालने**=असिमारणे। **अस्पृष्टतलानाम्**=भूतलमनुपेयुषाम्। **गगन एव**=नभस्येव। **सविदरम्**=विदीर्णिमयम्। **परिपत्य**=ऊर्ध्वाद्भूमिमागत्य। **उत्तिष्ठासताम्**=उत्थातुमिच्छताम्। **शिरोधराम्**=ग्रीवाम्। **अशिरोधराम्**=शिरोधारणकर्मरहिताम्। खण्डितामिति यावत्। **व्यधित**=अकार्षीत्। **मेदोमांसपिच्छिले कर्दमे चलितान्**=स्खलितान्। **चरणान्**=गमनकारणीभूतान्, पदः। **असञ्चर-**

लानुदक्षैप्सीत्। क्रमतश्च रघुवीरोऽपि द्वित्रानपातयत्। तस्मिन समिद्धक्रोधाः पञ्चषा युगपदेव परितः समापतन् यवन-भटाः। तं चाभिमन्युमिव महारथैराक्रान्तमालोक्य सगर्जनं चन्द्रहास-चक्रेणेव समावृतः समापन्न-शिवबीरः। चन्द्रहास-चालन-चातुरी-महिम्ना च खड्गेनैव तेषामाघातान् प्रतिरुन्धन्, तेषु बहून् यम-सदनमनैषीत्। तावदन्येऽपि महाराष्ट्राः परितः श्येना इवाभिपत्य, काकोलानिवातिलोलांस्तान् दोला-योग्यानकार्षुः। एवं हतेषु बहुषु परेषु पतितेषु, आर्तनादेन प्रासादं ध्वनयत्सु, उपद्रवः प्रशशाम। पुनरग्रेऽवरोधमवरोद्धुं प्रचचाल महाराष्ट्रमण्डली-मण्डनः। तत्र रुद्धान्यरराणि पादाघातैः प्रासनिपातैश्च भित्त्वा, "हर हर महादेव" इति गर्जनैरन्तर्निविश्यापश्यत्-यद् गवाक्षि-

---

णान्=गन्तुमनर्हान्। **खड्गोत्क्षेपणाय**=करवालसञ्चालनाय, **उत्क्षिप्तान्**=उद्धारितान्, ऊर्ध्वान्। **निजासिना वृक्णम्**=खण्डितम्, बाहुमूलं येषां तान्। **उदक्षैप्सीत्**=उदभैत्सीत्। **अपातयत्**=अपोथयत्। **तस्मिन्**=रघुवीरे। **समिद्धक्रोधाः**=विवृद्धकोपाः। **अभिमन्युमिव**=उत्तरागर्भजमर्जुनसूनुमिवेत्युपमा। **महारथैः**=अतिबलैः। य एकल एव हस्त्यश्वरथपादातैरनेकसङ्ख्यैर्योद्धुं शक्नोति स महारथ इति पारिभाषिकाः। **चन्द्रहासचक्रेणेव**=करवालसहस्रेणेव। चन्द्रहास-चालने या **चातुरी**=पाण्डिती, **तन्महिम्ना**=तन्महसा। **श्येना इव**=लक्ष्मारका इवेत्युपमा। **काकोलान्**=कृष्णकाकान्। "डोम कौआ" इति हिन्दी। **अतिलोलान्**=परमचञ्चलान्। **दोलायाः**=शिबिकायाः "डोली" इति हिन्दी, योग्यान्। **उपद्रवः**=हिंसादिरूपः। **अवरोधम्**=अन्तःपुरम्। **महाराष्ट्रमण्डलीमण्डनः**=महाराष्ट्रजनाभूषणीभूतः। **अरराणि**=कपाटानि। **प्रासनिपातैः**=भल्लपातनैः।

कातः सर्वाः स्त्रियः पूर्वमुत्तार्य, पश्चात्सेनानीरप्युत्तरतीति। शिवराजस्यैकेन चरेण खड्गः क्षिप्तः। तस्य च प्रसारित-करस्याङ्गुलित्रयमेव छिन्नम्, तावत् सोत्फालमन्धकार-महोदधौ निमग्नः।

इतस्तु दानवा इव मानवान्, महाराष्ट्रा म्लेच्छान् घ्नन्तीत्यालोक्य, व्यर्थ-हत्या शिवेन निवारिता। "विजितं सनातनधर्मेण, विजितं महाराष्ट्रराजेनेति" महानभूज्जयध्वनिः।

"सम्प्रति साधितं साधनीयम्, पलायितः शास्तिखानो नाऽऽयास्यति सम्मुखमिति क्षिप्रं सिंहदुर्गं आसादनीयः"-इति शिवेनाऽऽज्ञप्तास्त्यक्त-रुधिरारक्त-वसनाः, प्रासाद-नागदन्तिकावलम्बितैरेव बहुभिर्वस्त्रैर्वेष्टिताः, कतिचन प्रत्यर्थि-परिचारक-वसन-पट्टिका-शस्त्रैरालोचकान् यवन-भृत्य-भ्रममुत्पादयन्तः, निर्भयाः, सर्वेऽपि घोरान्धकारायां यामिन्यां प्रचलिताः। निर्विघ्नं पुण्यनगराद्बहिरागत्य, यथासङ्केतमाक्रमणेन विजित-बाह्य-सेनासन्निवेशं सम्यगुन्मुद्रित-

गवाक्षिकातः=वातायनिकातः। स्त्रियः=नारीः। चरेण=दूतेन। तस्य=सेनापतेः, शास्तिखानस्य। सोत्फालम=सकूर्दनम्। अन्धकारमहोदधौ=तमोवारिधौ। दानवाः=दनुतनयाः, राक्षसाः। इवेनोपमा। व्यर्थहत्या=अनावश्यकमारणम्। जयध्वनिः=जयशब्दः।

साधितम्=विहितम्। साधनीयम्=कार्यम्। आसादनीयः=प्राप्तव्यः। त्यक्तानि=दूरीकृतानि, रुधिरारक्तानि=लोहितप्लुतानि, वसनानि यैस्ते। प्रासादस्य=हर्म्यस्य, नागदन्तिकासु=कीलिकासु, अवलम्बितैः=स्थापितैः। वेष्टिताः=परिहितवसनाः। प्रत्यर्थिनः=शत्रोः, परिचारकाणाम्=भृत्यानाम्, वसनपट्टिकाशस्त्रैः। आलोचकान्=द्रष्टॄन्। यवनभृत्यभ्रमम्=म्लेछपरिचारकभ्रान्तिम्। निर्विघ्नम्=निष्प्रत्यूहम्। विजितबाह्यसेनासन्निवेशम्=स्वाय-

सर्व–गोपुरं संस्थापित–निज–यामिक–द्वार–रक्षकं स्वर्णदेव–गौरसिंहाधिष्ठितं बलं साक्षात्कुर्वन्तः, गव्यूतिं यावदन्धतमस एवोच्चावचं पाणिन्धममद्वानं व्यतीत्य, ततः शतशो दीपान् संज्वाल्य, पुण्यनगरस्थैः कान्दिशीकैः पराजितप्रत्यर्थिभिः, प्रजाभिश्च वीक्ष्यमाणाः, कुशलेन सिंहदुर्गमारुरुहुः ॥

इति सप्तमो निश्वासः ।



स्तीकृतबहिर्भूतबलशिबिरम् । **उन्मुद्रितसर्वगोपुरम्**=त्खुलितनिखिलप्रधानमार्गम् । **बलम्**=सेनाम् । **अन्धतमसे**=गाढान्धकारे । **उच्चावचम्**=निम्नोन्नतम् । पाणयो ध्मायन्ते सर्पाद्यपनोदाय यस्मिंस्तम्, **पाणिन्धमम्** । **अध्वानम्**=मार्गम् । पाणिन्धमपदार्थकुक्षौ नाध्वप्रवेशो योगमात्रार्थप्रवृत्तिनिमित्तकत्वाच्छब्दस्येति मतमनुसृत्येदम् । **पराजितैः**=परास्तैः, **प्रत्यर्थिभिः** शत्रुभिः । **प्रजाभिः**=सानन्दाभिरिति शेषः । **कुशलेन**=शिवेन ।

इति श्रीशिवराजविजयवैजयन्त्यां सप्तमनिश्वासविवरणं समाप्तम् ।



'वेधा द्वेधा भ्रमं चक्रे कान्तासु कनकेषु च ।
तासु तेष्वप्यनासक्तः साक्षाद्भगों नराकृतिः' ॥

—कुवलयानन्दे

तोरणदुर्गे तु रसनारी, काभिश्चन मूर्छितप्रायाभिरुत्थाप्य समानीताभिः, पुनः प्राप्तसंज्ञाभिः, चेटीभिः सहिता, मञ्चासन्दी-पल्यङ्क-वितान-तूलिकोपबर्हादि-सकल-परिच्छद-परिष्कृतायाम्,

अष्टमेऽवरङ्गजीवननयाया रसनार्याः श्रीशिवबीरेऽनुरागं विवाहेच्छाञ्च वर्णयिष्यति कविः, तत्र च नायकोदात्तत्वरक्षणाय सत्यमेव श्रीशिवबीरानङ्गीकरणं प्रदर्शयिष्यति, तदेतदुपक्षेप्तुं कुवलयानन्दीयं पद्यमुपक्षिपति वेधा इत्यादि। **वेधाः**=जगन्निर्माता। **द्वेधा**=द्वाभ्यां प्रकाराभ्याम्। **भ्रमं चक्रे**=भ्रान्तिमुत्पादयामास। **कान्तासु**=आपाततो रमणीयासु रमणीषु। **कनकेषु**=धनुरविषविषायमाणेषु हिरण्येषु च। **तासु**=रमणीषु। **तेषु**=कनकेषु। **अपि**, सकलजनमनोहरणप्रायेषु। **अनासक्तः**=असंलग्नः। **नराकृतिः**=मानवदेहधारी। **साक्षात्**=प्रत्यक्षताङ्गतः। भर्जयति कामादीनिति तथाभूतो **भर्गः**=शङ्करः। नोभयोरणुतरोऽपि भेदलेश आकृतिविभिन्नत्वातिरिक्त इति तत्त्वम्। रूपकालङ्कारोऽत्रेति मूल एव स्पष्टम्।

तोरणदुर्गे तु रसनारी न वेत्ति स्मेति सम्बन्धः। **मूर्च्छितप्रायाभिः**=प्रायो गतचैतन्याभिः। **प्राप्तसंज्ञाभिः**=लब्धचैतन्याभिः। **मञ्चः**=लघुमुखासनिका, "मँचिया" इति हिन्दी, **आसन्दी**="कुर्सी"इति ख्याता, **पल्यङ्कः**=पर्यङ्कः, **वितानम्**=उल्लोचः, "चन्दोवा"इति हिन्दी, **तूलिका**=तूलवद्विष्टरम्, **उपबर्हः**=उपधानम्, एवमादिभिः **सकलपरिच्छदैः**=समस्तावश्यकवस्तुजातैः,

अतिरम्य-हर्म्यट्टालिकायामवरुद्धा, काऽऽयाता ? केन संयता ? किं भावि ?-इति किमपि न वेत्ति स्म। तत्परिचर्य्यायामितरा महाराष्ट्र-देशीया अपि दास्य आसन्, किन्तु ता अपि रसनार्या बहुशः प्रलोभिता अपि, सप्रश्रयं पृष्टा अपि, तेषु विषयेषु वाचमेव न यच्छन्ति स्म।

रसनारी हि नित्यं प्रातर्निर्मलं कोष्णं यूथिका-मल्लिका-चन्दनादि-वासितम्, आनीय स्थापितं स्नानीयं पानीयम्, कर्पूर-काश्मीर-पाटीर-क्षोद-रचितमुद्वर्त्तनम्, रजत-पात्रेषु विन्यस्तम्,

परिष्कृतायाम्=भूषितायाम्। **अतिरम्यायाम्**=अतिहृद्यायाम्, **हर्म्यट्टालिकायाम्**=प्रासादाट्टे। **अवरुद्धा**=निगृहीता। **संयता**=बद्धा। बन्दीकृतेति यावत्। **तत्परिचर्य्यायाम्**=तत्सेवायाम्। **दास्यः**=भृत्याः। **प्रलोभिताः**=गर्द्धिताः। **सप्रश्रयम्**=सप्रार्थनम्। **तेषु विषयेषु**=प्रश्नगोचरेषु। **यच्छन्ति स्म**=ददति स्म।

निर्मलम्=पवित्रम्। **कोष्णम्**=ईषदुष्णम्। शिरोविरहितस्य शरीरस्य पावनाय कोष्णमेव वारि भवत्युपयुक्तम्, रोमच्छिद्रप्रविष्टमलापकर्षकत्वात्। शिरसो धावनन्तु न कदुष्णेन वारिणेति वैद्यकग्रन्थेषु स्फुटम्। यूथिकादिभिः, **वासितम्**=सुरभीकृतम्। **आनीय**=सम्प्रापय्य। **स्थापितम्**=रक्षितम्। **स्नानीयम्**=स्नानयोग्यम्। **कर्पूरः**=हिमवालुका, **काश्मीरम्**=कश्मीरदेशोद्भवं केसरम्।

सहोदराः कुङ्कुमकेसराणां भवन्ति नूनं कविताविलासाः।
न शारदादेशमपास्य दृष्टस्तेषां यदन्यत्र मया प्ररोहः॥

इति बिल्हणः। **पाटीरम्**=चन्दनम्। एतेषां **क्षोदेन**=चूर्णेन, **रचि-**

पटवास-वासितानि सुसूक्ष्माणि सौवर्ण-प्रान्तानि, नानावर्ण-कौशेय-कुसुम-रचना-विचित्रितानि वासांसि, प्रसाधनी, दर्पणम्, धूपः, सिन्दूरम्, कुसुममालाः, अङ्गरागम्, चूडाबन्धं च, प्रस्तुतमेवावलोकयति स्म। विविधासु दासीषु सतैलाभ्यङ्गं सोत्सादन-मर्दनं सकेशमार्जनं च स्नानसेवां विहितवतीषु, धारितकौशेया, द्राक्षा-द्रव-दाडिम्ब-दुग्धादि-महामधुर-महोपस्कारमयीमाहार-सामग्रीमुपलभते स्म। क्षणे क्षणे जातीपत्र-केसर-कर्पूर-लवङ्गैला-सुवासितानि ताम्बूलानि, प्रहरे प्रहरे च पाटल-सुगन्धि-ताम्रक-

---

तम् = निर्मितम्। उद्वर्त्तनम्=देहनिर्मलीकरणद्रव्यम्। "उबटन" इति हिन्दी। **रजतपात्रेषु**=रौप्यामत्रेषु। **विन्यस्तम्**=स्थापितम्। **पटवासैः**=वसनवासकैः कुङ्कुमादिचूर्णविशेषैः, **वासितानि**=कृतसुगन्धीनि। **सौवर्ण-प्रान्तानि**=सुवर्णविकारतन्तुनिर्मितदशानि। "सुनहली जरी की किनारी" इति हिन्दी। **नानावर्णानाम्**=अनेकरङ्गाणाम्, **कौशेयकुसुमानाम्**=पट्टसूत्र-रचितपुष्पाणाम्, रचनया, **विचित्राणि**=दर्शनीयानि। **प्रसाधनी**=कङ्कतिका, "कंघी" इति हिन्दी। **दर्पणम्**=आदर्शः। **धूपः**=केशवासकः। **अङ्गरागम्**=शरीरानुलेपनद्रव्यम्। **चूडाबन्धम्**=जूटिकाबन्धनम्। **सतैलाभ्यङ्गम्**=स्नेहलगयनपुरस्सरम्। **सोत्सादनमर्दनम्**=सोद्वर्त्तनलेपनम्। "उद्वर्त्तनोत्सादने द्वे" इत्यमरः। **सकेशमार्जनम्**=सजूटिकास्वच्छनम्। **धारितकौशेयाः**=परिहितपट्टवस्त्राः। **द्राक्षाद्रवः**=गोस्तनीरसः, **दाडिम्बः**=दाडिमीफलरसः, **दुग्धम्**=पयः, एवमादिका, **महामधुरा**=अतिमिष्टा, **महोपस्कारमयी**=विशिष्टव्यञ्जनयुता, ताम्। **आहारसामग्रीम्**=भोजनपदार्थम्। **जातीपत्रम्**=जातिदलम्, **केसरः**=काश्मीरजः, **कर्पूरः**=हिमवालुका, **लवङ्गम्**=

पिष्टकाङ्गारक-परिपूर्ण-साच्छादनक-हाटकामत्रिकालङ्कृतोर्द्ध्वभागं केतक-तोय-पूरित-पयःपात्र-परिलसित-मूलम्, काञ्चन-चञ्च-चमत्कृत-प्रलम्ब-नलिका-संवलितम्, धूमपानयन्त्रम्, सर्वदा च व्यजन-चामर-पतद्ग्राह-हस्ता दास्यः-इत्यखिलं सुसज्जमेवावलोकयति स्म ।

क एवमाद्रियते ? कस्य कक्ष आपतिता ? कोऽधुनाऽपि मर्यादां न भनक्ति ?-इति तया किमपि ज्ञातुं न शक्यते स्म ।

देवकुसुमम्, एला=चन्द्रबाला, आभिः सुवासितानि=समुरभीणि । पाटलमुगन्धि=आशुबोहिमुरभि, यत् ताम्रकम्="तमाखू" इति ख्यातम्, तेन, पिष्टकस्य="टिकिया" इति ख्यातस्य, अङ्गारकेण=प्रज्वलितदाह्येन, "अंगार" इति हिन्दी, च, परिपूर्णया=युतया, साच्छादनिकया=सप्रावरणिकया, "ढकी हुई" इति हिन्दी, हाटकामत्रिकया=सुवर्णनिर्मितधूमपानसाधनिकया, "सोने की चिलम" इति हिन्दी, अलङ्कृतः=भूषितः, ऊर्ध्वभागो यस्य तत् । केतकतोयेन="केवडा" इति प्रसिद्धपुष्पवासितेन वारिणा, पूरितेन=भरितेन, पयःपात्रेण=जलाधारेण, परिलसितम्=अतिशोभितम्, मूलं यस्य तत् । काञ्चनचञ्चवा=सुवर्णनिर्मिताग्रभागेन, चमत्कृतया=सुसज्जितया, प्रलम्बया=लम्बायमानया, नलिकया=धूमाकर्षिकया, "हुक्के की नली" इति हिन्दी, संवलितम्=विशिष्टम् । धूमपानयन्त्रम्="हुक्का" इति प्रसिद्धम् । व्यजन-चामर-पतद्ग्राहाः, हस्ते यासां ताः । पतद्ग्राहः=पतद्ग्रहः, "पतद्ग्राहः पतद्ग्रह" इत्यमरः । "पीकदान" इति हिन्दी । सुसज्जम्=सन्नद्धम् । अवलोकयति स्म=अदर्शत् ।

आद्रियते=आदरं करोति । कक्षे=कुक्षौ । सर्वविधाधिकार इति यावत् । मर्यादाम्=सीमानम्, परदारदूषणाभावरूपम् । न भनक्ति=न त्रोटयति ।

पुरुषः कोऽपि निकट एव नाऽऽयाति। निज-चेटी-द्वारा कथं कथमपि पृष्टश्च मूक इव न किमपि वक्ति, इति विचित्रं चरित्रं पश्यन्ती, विलक्षणमिदं कारागारम्, अलौकिका अत्रत्या मानवाः-इति मनस्येव तर्कवितर्कैश्चिर-चिन्ता-निमग्ना समभूत।

अथैकदाऽट्टालिकायां पर्यटन्त्या, दक्षिणस्यां सुदूरं विस्तृतानां काननानाम्, अभ्रंलिहानां, शैल-शिखराणाम्, कालिन्दी-सलिल-सौन्दर्य-विजित्वरातिहरित-वनौषधि-वृन्द-व्याप्तानामुच्चावच-तलान्तःस्रवत्-प्रस्रवण-स्रोतस्समीप-नरीनृत्यमान-मेघनादानु-लासि-लास्य-ललितानामुपत्यकानाम्; द्रुमाद् द्रुमम्, शाखातः शाखाम्, गण्ड-शैलाद् गण्ड-शैलम्, दन्तकाद् दन्तकम्, पादाच्च पादम्.

मूक इव=वाक्शक्तिशून्य इव। **विलक्षणम्**=विचित्रम्। **अलौकिकाः**=अति-मानवाः।

अथैकदाऽट्टालिकायां पर्य्यटन्त्या बहूनां पादध्वनिरिवाश्रावि-इति सम्बन्धः। **सुदूरम्**=अतिविस्तीर्णप्रदेशम्। **अभ्रंलिहानाम्**=मेघस्पर्शकारिणाम्। अत्युच्चा-नामिति यावत। **शैलशिखराणाम्**=पर्वतकोटीनाम्। **कालिन्दी-सलिल-सौन्दर्य-विजित्वरेण**=यामुनाम्भोलावण्यविजयकारिणा, **अतिहरितेन**=अति-तरां हरिद्वर्णेन, **वनौषधिवृन्देन व्याप्तानाम्**=लसितानाम्। **उच्चाव-चतलानाम्**=निम्नोन्नतभूभागानाम्, अन्तः, **स्रवताम्**=प्रवहताम्, **प्रस्रवणा-नाम्**=निर्झराणाम्, **स्रोतसाम्**=धाराणाम्, **समीपे**=अन्तिके, **नरीनृत्य-मानानाम्**=सहर्षं नृत्यताम्, **मेघनादानुलासिनाम्**=मयूराणाम्, **लास्यैः**=नर्त्तनैः, **ललितानाम्**=मनोहराणाम्। **दन्तकात्**=अद्रिकटकात्। "दन्तोऽद्रिकटके कुञ्जे दशनेऽथौषधौ स्त्रियामि"ति। **दन्तकम्**=अद्रिकटकम्।

सपत्र-कम्पनम् , सचञ्चु-चाञ्चल्यम् , सग्रीवाभङ्गम् , सपक्षति-कण्डूयनम् , सतनूरुह-स्फुरणम् , सकूजनं च प्रडीनोड्डीन-सण्डीनैरुड्डीय गच्छतां कलविङ्कानाम् , कर्करेटूनाम्, किकीदिवीनाम् , कपोतानाम् , कोकानाम् , काकानाम् , कीराणाम् , क्रौञ्चानाम् , कुरराणाञ्च शोभाः पश्यन्त्या , अकस्मादश्रावि पादध्वनिरिव बहूनाम् ।

झटिति तत आगत्य, द्वारोपरिस्थ-गवाक्षाच्चाऽऽलोकितवतीः यदेक ईषच्छ्यामलः सुन्दरो विधृत-मौक्तिक-माणिक्य-मरकत-

---

पादात्=पर्वतशृङ्गात् । **पादम्**=पर्वतशृङ्गम् । **सपत्र-कम्पनम्**=पक्षधूनन-सहितम् । **सचञ्चु-चाञ्चल्यम्**=सत्रोटि-चापल्यम् । **सपक्षति-कण्डूयनम्**=सपक्षमूल-खर्जनम् । **सतनूरुह-स्फुरणम्**=सरोमोद्गमम् । **सकूजनम्**=सशब्दम् । **प्रडीनोड्डीनसण्डीनैः**=पक्षिणां गतिविशेषैः । **कलविङ्कानाम्**=चटकानाम् । **कर्करेटूनाम्**=करेटूनाम् । "कर्करेटुः करेटुः स्यादि"त्यमरः । **किकीदिवीनाम्**=चाषाणाम् । "अथ चाषः किकीदिविरि"त्यमरः । **कपोतानाम्**=पारावतानाम् । **कोकानाम्**=चक्रवाकानाम् । **काकानाम्**=वायसानाम् । **कीराणाम्**=शुकानाम् । **क्रौञ्चानाम्**=चक्रवाकविशेषाणाम् । **कुरराणाम्**=उत्क्रोशकारिणां पक्षिणाम् । **पादध्वनिः**=चरणशब्दः । **बहूनामिव**=अनेकेषामिव । अदृश्यत्वादनुमेयत्वं बहुत्वस्येतीवः ।

झटिति=त्वरितम् । **द्वारोपरिस्थगवाक्षात्**=निर्गममार्गोपरिविद्यमानाद्वातायनात् । **ईषच्छ्यामलः**=किञ्चित्कृष्णवर्णः । **विधृतम्**=शिरसि स्थापितम् , मौक्तिकमाणिक्यमरकतगुच्छैः, अङ्कितम् , **उष्णीषम्**=शिरोवेष्टनम् ,येन सः । **मौक्तिकम्**=हस्त्यादिलब्धमणिः । **माणिक्यम्**=खनिप्राप्तमणिः । मरकतस्य

गुच्छाङ्कितोष्णीषः सौवर्ण-सूत्र-रचित-कञ्चुको जाम्बूनद-कौशेय-कुसुम-चित्राञ्चित-प्रावार-परिलसित-वामस्कन्धो महार्ह-वज्रक-प्रचयाकलित-कोशस्थ-चञ्चच्चन्द्रहासावलम्बित-कटितटो मरकत-मणि-महामाला-लसितगल कमनीयो युवाऽऽगच्छतीति। तस्याग्रे पश्चात् पार्श्वयोश्च समागच्छतः शतशो भुशुण्डिका-तोमर-पट्टिश-सौवर्ण-दण्डाकलित-करान् भटान्; अपरांश्च छत्र-चामर-वेत्र-व्यजन-हस्तानुचरान्; आलोक्य, निश्चितमेष एवाध्यक्षो दुर्गस्यैतस्य, एष एव च सम्बोभोति परिवृढोऽस्मल्लुण्ठक-गणस्येति मन्यमाना, किञ्चिद् भीतेव, स्तब्धेव, खिन्नेव, क्षुब्धेव,

---

मणिविशेषत्वेऽपि ब्राह्मणवशिष्ठन्यायेन पृथगुक्तिः। **सौवर्णसूत्ररचितकञ्चुकः**=हैरण्यतन्तुनिर्मितचोलकः। **जाम्बूनदैः**=सुवर्णरचितैः, **कौशेयैः**=पट्टसूत्ररचितैश्च, **कुसुमचित्रैः**=पुष्पाकृतिकनिर्माणैः, **अञ्चितेन**=भूषितेन, **प्रावारेण**=उत्तरासङ्गेन, "द्वौ प्रावारोत्तरासङ्गौ" इत्यमरः, **परिलसितम्**-शोभितम्, **वाम-म्**=दक्षेतरम्, स्कन्धं यस्य सः। **महार्हवज्रकप्रचयेन**=बहुमूल्यहीरकव्रजेन, **आ-कलिते**=युते, **कोशे**=असिधान्याम्, तिष्ठतीति तथाभूतेन, **चञ्चता**=चमत्कुर्वता, चन्द्रहासेन, **अवलम्बितम्**=लसितम्, कटितटं यस्य सः। **मरकतमणिमहामालया, लसितः**=मण्डितः, गलो यस्य सः। **कमनीयः**=मनोहरः। **भुशुण्डिका**="बन्दूक"इति ख्याता, **तोमरम्**, पट्टिशम्, **सौवणदण्डाः**=हैरण्ययष्टयः, एभिः, आकलिताः करा येषां तान्। **सम्बोभोति**=अतिशयेन भवति। **परिवृढः**=प्रभुः। "प्रभौ परिवृढः"। अस्माकं, **लुण्ठकस्य**=चोरयितुः, **गणस्य**=समूहस्य। **भीता**=भयाक्रान्ता। अन्तिमनिर्णयकर्त्ताऽऽयाति, किमनुष्ठास्यतीति विचारेण। **स्तब्धा**=निश्चेष्टा। **खिन्ना**=खेदाक्रान्ता। **क्षुब्धा**=चञ्चलिता। पूर्ववत्साधुत्वम्।

उद्विग्नेव च, सा समवित्त।

अथ रसनारी स्वोपवेश-देशं प्रविश्य स्विन्नां गण्डस्थलीं यावत्पटान्तेन परिमार्ष्टि: तावत्प्रतिसीरामुत्क्षिप्य झटिति प्रविश्य शिरो-नमन-पुरःसरमादराचारं विदधदवलोकितः स एव वीर-वरः। इयं नमादरेङ्गितैः, तद्वचन-सुधाधारा-पिपासिताभ्यामिव कर्णाभ्यां परमैकतानता-जडीकृताभ्यामिव नयनाभ्यां चित्रार्पितेवाभूत। महाराष्ट्रराजस्तु बद्धकरसम्पुटः समवर्तत। न च बिन्दुमपि विसर्गमपि चात्रृत। ततः पराधीना, तदाकार-सौजन्य-

उद्विग्ना = मानसिकोद्वेगवती। **समवित्त** = अज्ञासीत्।

स्वोपवेशदेशम् = स्ववासभूमिम्। **स्विन्नाम्** = चिन्तासञ्जातघर्मजलवतीम्। **गण्डस्थलीम्** = कपोलपालिम्। **परिमार्ष्टि** = प्रोञ्छति। **प्रतिसीराम्** = यवनिकाम्। "प्रतिसीरा यवनिका स्यात्तिरस्करिणी च से"त्यमरः। **उत्क्षिप्य** = दूरीकृत्य। **शिरोनमनपुरस्सरम्** = मस्तकनतिपूर्वकम्। **आदरेङ्गितैः** = आदरसूचकचेष्टाभिः। **तद्वचनसुधाधारापिपासिताभ्यामिव** = तदुक्तिपीयूषप्रवाहपानाभिलाषुकाभ्यामिव। उत्प्रेक्षा। **परमैकतानता जडीकृताभ्यामिव** = अत्यन्तैकाग्रीकृतिनिश्चेष्टीकृताभ्यामिव। **चित्रार्पितेव** = चित्रलिखितेव। **बद्धकर-सम्पुटः** = कृताञ्जलिः। **बिन्दुमपि विसर्गमपि** = अनुच्चारयितुमर्हः केवलो बिन्दुरूपोऽनुनासिको बिन्दुद्वयरूपो विसर्जनीयश्चापि यदा नोक्तस्तदा वर्णसमूहरूपपदाद्युच्चारणचर्चैव केति कैमुतिकन्यायेन किमपि नाकथयदित्यत्र तात्पर्यम्। भाषणभङ्गीपाटवप्रदर्शनाय त्वेवमभिधानम्। अनुनासिकविसर्जनीययोर्लिपिरेव बिन्द्वात्मिका, तौ तु वर्णावेवेत्ययोगवाहानामाट्सु शर्षु चोपसंख्यानेन भाष्ये दर्शितमित्यादिकं शाब्दिकशैलीविदां नातितिरोहितमिति **शम्**। **पराधीना** = अस्वतन्त्रा।

लावण्य-गाम्भीर्यादराचाराद्यवलोकन-मोहिता रसनारी, स्वयमेवाऽऽरभ्य, एवमालपत्।

रसनारी-आगम्यतामियमासन्दी सनाथ्यताम्।

शिवराजः-यदाज्ञाप्यतेऽत्रभवत्या।

इत्येकस्यामासन्दां महाराष्ट्रराजः, अपरस्यां च रसनारी, सार्द्धहस्तोच्छ्रायायाः कौशेय-वसनाच्छन्नायाः सजल-कुसुमस्तबकालङ्कृत-मध्यायाः वर्तुल-पीठिकायाः प्राक् प्रत्यक् चोपाविक्षताम्।

रसनारी-वीर! अतिसमादृताऽपि सुखं स्थापिताऽपि दुःखिताऽस्मितमाम्, यतो यत्नैरपि न ज्ञातुमशकम, निज-धन्यवाद-भाजनं धन्य-धन्यं कमपि मान्य-वदान्यं; यत्प्रदत्तं द्राक्षा-दाडिम-

---

तदाकारस्य=तदाकृतेः, **सौजन्यस्य**=सज्जनतायाः, **लावण्यस्य**=सौन्दर्यस्य, **गाम्भीर्यस्य**=अप्रकटहार्दतायाः, **आदराचारादेश्च**=आदृतिकरणादेश्च, अवलोकनेन, **मोहिता**=वशीकृता।

सनाथ्यताम्=सस्वामिकीक्रियताम्। स्थीयतामिति यावत्। आदरातिशयद्योतनार्थेयमुक्तिः।

आज्ञाप्यते=आदिश्यते। अतिशयनम्रताध्वननायेदम्।

सार्धहस्तोच्छ्रायायाः=अर्धेन सह वियमानो हस्तः, अर्धादिकः, **उच्छ्रायः**=ऊर्ध्वत्वं यस्यास्तस्याः। **कौशेयवसनाच्छन्नायाः**=पट्टवस्त्रप्रावृतायाः। **सजलकुसुमस्तबकैः**=सवारिपुष्पगुच्छैः, **अलङ्कृतं मध्यम्**=मध्यभागो यस्यास्तस्याः। **वर्तुलपीठिकायाः**=गोलाकृतिकाष्ठपीठिकायाः, "मेज़" इत्याङ्गलशब्दस्य हिन्दीप्रयोगविषयस्याभिधेयायाः। **उपाविक्षताम्**=आसिषाताम्।

जातमास्वादमास्वादम् , केकि-केका-कोकिल-कूजितानि श्रावं श्रावं, दर्शं दर्शं चोपत्यका-शाद्वलेषु शम्बर-शल्की-शशक-शिवा-पलायनानि, दिनानि गमयामि ।

शिवराज-आर्ये ! अपि कस्यापि महाराष्ट्र-वीरस्य शिवराज इति नामधेयं श्रीमत्याः कर्ण-शष्कुलीमस्पार्क्षीत् ?

रस०-[क्षणं चिन्तयित्वेव] किं पार्वतोन्दुरुः शिव इति ?

शिव०-["दिल्ली-कलङ्का वराका एते मां पार्वतोन्दुरुमेवाऽऽख्यान्ति" इति स्वगतमेव विचार्य, किञ्चिद्भ्रीण इव पुनरुन्नतीभूय] भद्रे ! महाराष्ट्रराजः शिववीरः ।

रसनारी-[सभौग्ध्यम्] तत् किं पार्वतोन्दुरुः कोऽप्यन्यः ?

शिव०-अत्र भवती न वेत्ति मर्म्मैतस्य । अस्माकं सदैव युद्धानि भवन्ति श्रीमत्यास्तातचरणैः सह । वयं सदैव तान् विजयामहे । तदीयानि कदर्य्याण्याचरणान्यवलोक्य च "दिल्ली-कलङ्का इमे" इति कथयामः । ते च दग्धहृदया अस्मान् पार्वतोन्दुरून्

केकिकेकाः=मयूरस्तानि, कोकिलकूजितानि=परभृतोच्चारणानि । श्रावं श्रावम्=श्रुत्वा श्रुत्वा । शम्बरस्य=मृगविशेषस्य, शल्क्याः=स्वाविधस्य, "साही"इति हिन्दी, शशकस्य, शिवायाः=शृगाल्याश्च पलायनानि=धावनानि। दिनानि गमयामि=दिवसान् क्षपयामि । निरर्थं यापयामि कालमिति यावत् ।

कर्णशष्कुलीम्=श्रवणझिल्लीम् । श्रोत्ररन्ध्रमिति यावत् ।

पार्वतोन्दुरुः=पर्वतीयाखुः ।

आख्यान्ति = कथयन्ति ।

मर्म्म = रहस्यम् । कदर्य्याणि=अतिनिन्द्यानि । आचरणानि=कर्त्त-

प्रचक्षते, परन्तु यथा तव तातस्तत्र राजा, तथा शिववीरोऽत्र राजा। तव तातस्य प्रजासु तुः येषां दारा अपह्रियन्ते, येषां देवमन्दिराणि निपात्यन्ते, येषां च तीर्थस्थानानि बलाद्विलोप्यन्ते, ते प्रतिप्रभातं, प्रतिसायं च, बाष्प-वारि-बिन्दु-सन्दोहैराननं क्षालयन्तः, दग्धहृदयाः, धमद्धमद्धमनी-धावमान-रुधिर-धारा-दुर्धर्ष-वदनाः, हस्तावुन्नमय्य तव तातस्योच्छेदाय शपन्ति, शिव-राज्ये तु प्रजा प्रतिक्षणमाशीराशीनुच्चारयन्ति। त्वत्पितृराज्यं बहिरेव; न तु प्रजानामन्तःकरणे। शिवस्य तु राज्यं महाराष्ट्र-देशीय-प्रजानामन्तर्बहिश्च।

रस०-[सलज्जम्] तत् किं शिवराज्ये यवना अपि मोदन्ते?

शिवः-सर्वासां प्रजानां समान एव मोदः, न भवति शासनकाले जातिनामाद्युद्भङ्गनमावश्यकम्।

व्यानि। दग्धहृदयाः=ज्वलितान्तःकरणाः। प्रचक्षते = कथयन्ति। दाराः=वनिताः। अपह्रियन्ते=चोर्यन्ते। विलोप्यन्ते=अदृश्यतां नीयन्ते। प्रतिप्रभातम्=प्रतिप्रातः। प्रतिसायम = प्रतिसूर्यास्तमनवेलम्। बाष्पवारिबिन्दुसन्दोहैः=अस्रजलपृषत्समूहैः। क्षालयन्तः=धावयन्तः। धमद्धमन्तीषु=भोन्याऽतितरां धडत्कुर्वतीषु, धावमानस्य=शीघ्रगतेः, रुधिरस्य, धाराभिः=प्रवाहैः, दुर्धर्षाणि वदनानि=लपनानि येषान्ते। उन्नमय्य=ऊर्ध्वांकृत्य। आशीराशीन=आशीर्वादततीः। अन्तःकरणे=चेतसि।

मोदन्ते=प्रसन्नतामनुभवन्ति।

शासनकाले=रक्षणवेलायाम्। जातिनामादीनाम्, उद्भङ्गनम्=प्रकटीकरणम्।

रस–ततः किमित्यहमपहारिताऽस्मि ?

शिव०–मा स्म भूच्छ्रीमत्याः काचन बलात्कार–भीतिः ! बहुभी रुधिर–प्रवाहैर्भगवती विश्वम्भरा स्नापिता, बहवश्च युद्धाहत-वीर–रमण्यो रोदिताः–इति यदि भवतीमाश्रित्य भवत्याः पित्रा सह सन्धातुं शक्येत; तद् यत्नायैव समानीता मङ्गलमय्यत्र भवती । नेतद् मौद्गल-राज्यम् ; यत्र प्रजानामपि भवेद् बलात्कार–साध्वसम् । अत्र तु महाराष्ट्राणां राज्यम् ; यत्र परिपन्थिनामपि युवजन–मनो-मोहनेनातिमधुरेण कौमारात् परेण वयसाऽऽलिङ्गिता अपि सौन्दर्य–सार–विरचिता इवापि दुहितरः सम्मान्यन्ते, न त्ववहेल्यन्ते । अत्रभवत्येवात्र प्रमाणम् ।

रस०–[तदाकर्ण्य, शिरो नमयित्वा, अपाङ्ग–क्षिप्त–लोल–तारकेण लोचनेन शिव–मुखमसकृदीक्षमाणा, उरोजयोः खंसदिव वस्त्रं पुनः स्क-

अपहारिता=चोरिता ।

विश्वम्भरा=धरणी । स्नापिता=निर्णेजिता । युद्धे, आहतानाम्=मारितानाम्, वीराणाम्, रमण्यः=स्त्रियः । मङ्गलमयी=माङ्गल्यकारिणी । बलात्कारात् साध्वसम्=भीतिः । परिपन्थिनाम्=लुण्ठकानाम् । युवजन-मनोमोहनेन=नववयस्कचेतोवशीकारेण । कौमारात्परेण=यौवनेन । आलिङ्गिताः=आश्लिष्टाः । नवयुवत्य इति यावत् । सौन्दर्यसारविरचिताः=लावण्यतत्त्वनिर्मिताः । दुहितरः=कन्यकाः । अवहेल्यन्ते=तिरस्क्रियन्ते । अत्रभवती=माननीया । अत्र=अस्मिन् विषये । अतो न पौनरुक्त्यम् । प्रमाणम्=प्रमाकरणम् । मदुक्तिसत्यतासाधकमिति यावत् ।

अपाङ्गे=नेत्रप्रान्ते, क्षिप्ता=प्रेरिता, लोला=चञ्चला, तारका=कनीनिका, यस्य तेन । लोचनेन=नयनेन । असकृत्=अनेकवारम् । ईक्षमाणा=अव-

न्धयोः क्षिप्त्वा] अथ कासौ महाराष्ट्र-राजो मोदित-सकल-समाजो रणधीरः शिववीरः ? तं दिदृक्षत एष जनः।

शिवः-[समुत्थाय] एषोऽत्र भवत्याः सम्मुख एव बद्धकर-सम्पुट उपतिष्ठते शिवः, तदाज्ञाप्यतां काचन सेवा।

रस०-[ससम्भ्रममुत्थाय] आ ! एवमेतत् ? अपि श्रीमानेव महाराष्ट्रराजः, यो मामेवं धृष्टवादिनीं मनोरमैर्नर्मालापैर्लज्जयते ? उपविश्यतामुपविश्यताम्। मनसाऽप्यकल्पनीयोऽयमीदृशः स्वभावः, यत् सपत्नोऽप्यादरेष्वेव सयत्नो भवान।

ततः परमुपविष्टयोर्मुहूर्तं यावद् बहव आलापास्तयोः परस्परं चकितयोर्मुदितयोरनुरक्तयोश्चाभूवन।

अथ समादेवं तदनुमतिमासाद्य, सिंहदुर्गं प्रति निवर्तमानो मार्ग एव महता हिमगिरि-खण्डेनेव, कर्पूर-पूर-निर्मितेनेव चन्द्र-

---

लोकयन्ती। **उरोजयोः**=स्तनयोः। **स्रंसदिव**=स्खलदिव। इदेन न स्वयं वस्त्रस्खलनमपि तु शिवासक्तिसूचनाय रसनायैव पातितमिति ध्वनितम्। **स्कन्धयोः**=अंसयोः। **क्षिप्त्वा**=अस्तव्यस्तं संस्थाप्य। "फेंककर" इति हिन्दी।

मोदितसकलसमाजः=प्रसन्नीकृतसमस्तजनसमूहः। **दिदृक्षते**=द्रष्टुमिच्छति।

धृष्टवादिनीम्=धार्ष्ट्येन वचः प्रयुञ्जतीम्। **मनोरमैः**=चेतोहरैः। **नर्मालापैः**=कोमलभाषणैः। **लज्जयते**=लज्जितां करोति। **अकल्पनीयः**=अननुमेयः। **सपत्नः**=अरिः। **आदरेषु**=सम्माननेषु। **सयत्नः**=सश्रमः।

चकितयोः=साश्चर्ययोः। **मुदितयोः**=प्रसन्नयोः। **अनुरक्तयोः**=अन्योन्यासक्तिमतोः।

चन्द्रिका-चय-रचितेनेव मूर्तेनेव महाराष्ट्र-यशसा दुग्ध-धवलेन घोटकेन धावमानः, कतिभिश्चन सप्रसाद-नयनैरुत्साहमिव वमद्भिः, प्रत्यर्थि-प्रतापमिवारुण-रश्मि-बन्धं सव्येन करेण वशयद्भिः, निज-विजय-ध्वजेनेव मन्दमाधूर्णमानेन कशाग्रेण ह्यान हेषयद्भिः, कटितट-विलम्बि-विलोल-करवालैरुष्णीष-पर-प्रान्त-दोदुल्यमानानिल-बल-विलोल-बाल-जालैः, सादिभिरनुगम्यमानो माल्यश्रीकः, समागच्छन्नालोकि । समीपमागतास्ते सर्वे जय जीव ! इत्युच्चैः शिवराजमाचाराशीराशिभिः सममानयन । माल्यश्रीकस्तु-"विजयतां श्रीमान् ! प्रतिहतममङ्गलम्, हताः परिपन्थिनः"-इत्युदीर्य, किञ्चन रहस्यं निवेदनीयं न्यवीविदत् ।

समार्दवम्=सकोमलम् । **हिमगिरिखण्डेनेव**=प्रालेयाचलशैलेनेव । **कर्पूरपूरनिर्मितेनेव** = हिमवालुकाधूलिरचितेनेव । **चन्द्र-चन्द्रिका-चय-रचितेनेव**=शशाङ्कदीधितिनिकरनिर्मितेनेव । **दुग्धधवलेन**=पयःश्वेतेन । **सप्रसादनयनैः**=प्रसन्ननेत्रैः । **वमद्भिः**=उद्गिरद्भिः । प्रकटयद्भिरिति यावत् । **प्रत्यर्थिप्रतापमिव**=शात्रवतेज इव । **अरुणम्**=ईषद्रक्तम्, **रश्मिबन्धम्**=प्रग्रहम् । **सव्येन**=वामेन । **वशयद्भिः**=स्ववशीकृतवद्भिः । पुष्टत्या दृढीकुर्वद्भिरिति यावत् । **निज-विजयध्वजेनेव**=स्वजयवैजयन्त्येव । **आधूर्णमानेन**=सञ्चलता । **कशाग्रेण**=अश्वताडनीप्रान्तेन । **हेषयद्भिः**=हिणत्कारं कारयद्भिः । **कटितट-विलम्बि-विलोल-करवालैः** = मध्यभागावलम्बिचञ्चलचन्द्रहासैः । **उष्णीषपरप्रान्तेन**=शिरोवेष्टनस्थितपार्श्वेन, **दोदुल्यमानस्य**=उत्क्षिप्यमाणस्य, **अनिलस्य**=वायोः, **बलेन विलोलानि**=चञ्चलानि, **बालजालानि**=केशवृन्दानि, येषान्तैः । **आलोकि**=दृष्टः । **प्रतिहतम्**=विध्वस्तम् । **अमङ्गलम्**=प्रत्यूहः । **न्यवीविदत्**=न्यवेदयत् ।

अथ शिवेङ्गितमासाद्य, सर्वेष्वश्वारोहेषु, धनुषां विंशत्यामिव दूरतः कृतमण्डलेषु, मन्दमन्दं तुरग-निगालास्फोटन-पुरःसरं प्रचलत्सु, शिवस्य वामतः शनैः स्वमश्वं चालयन्, मन्दं मन्दमगादीन्माल्यश्रीकः ।

माल्यश्रीकः-[जनान्तिकम्] न्यवेदयमेव ह्यो रात्रौ श्रीमच्चरणेषु यत् पुरुषमयं पारावार-प्रवाहमिव सह नयन्, दिल्लीकलङ्कस्यावरङ्गजीवस्य तनयो मायाजिह्मो महाराष्ट्रैः सह योद्धुमायातीति ।

शिवः-आम् ! ततः परमुच्यताम् !

माल्य०-स त्रितो गव्यूति-सप्तकान्तराल एवोपकार्य्याः समासज्यावसरं प्रतीक्षमाण आसीत् ।

शिवः-आसीदस्ति वा ?

माल्य०-प्रभो ! आसीदेव; सम्प्रति तु श्रीमच्चरणानां वशंवदः सञ्जातः-इति विशकलय्य निवेद्यते ।

शिवेङ्गितम्=शिववीरचेष्टाम् । **धनुषां विंशत्यामिव**=प्रायो विंशतिधनुःपरिमितायामिव । **कृतमण्डलेषु**=विहितपरितःस्थितिषु । **तुरगनिगालास्फोटनपुरस्सरम्**=अश्वगलोद्देशसन्धूननपूर्वकम् । जनान्तिकम्=

त्रिपताककरेणान्यानपवार्यान्तिके जनान् ।
अन्योन्यामन्त्रणं यत्स्याद् जनान्ते तज्जनान्तिकम् ।

पुरुषमयम्=मानवप्रचुरम् । **पारावारप्रवाहमिव**=सिन्धुधारामिव । **माया जिह्मः**="मुल्तान् मुआजिम्" इति प्रसिद्धः । **गव्यूतिसप्तकान्तराले**=चतुर्दशक्रोशमध्ये । **उपकार्य्याः**=शिबिराणि । **समासज्य**=सम्यगायोज्य । **प्रतीक्षमाणः**=प्रतीक्षां कुर्वन् ।

शिवः–[सप्रसादं हसन्निवाकाशे दृष्टिं बद्ध्वा,] अहह ! अरे रे ! अवरङ्कजीव ! महाराष्ट्रान् वञ्चयितुमिच्छसि ? न वेत्स्यस्मदीया बाला अपि त्वादृशांस्तृणाय मन्यन्ते। [माल्यश्रीकाभिमुखम्] अपि सत्यं निगृहीत एषः ?

माल्य०–महामान्य ! कोऽत्र संशयः ?। स भवान् यस्य प्रतापो नृसिंहस्य सटाम्, कपर्दिनो जटाम्, फणिराजस्य स्फटाञ्च स्पृशन्, जाज्वल्यते।

शिवः–अथ विशकलय्य क्रमतः कथ्यताम्।

माल्य०–आर्य्य ! विनिवेदयामि भूतार्थम्। मायाजिह्म एष लम्पटराजस्य पुत्रः–इति कथं नानुहरेत्स्वपितरमिति। महाराष्ट्र–देश आगतमात्र एव, "एतद्देशीयाः कीदृश्यो वारवनिताः ? कीदृश आसां वेषः ? कीदृशं गानम् ? कीदृक्च नृत्यम् ?"–इति लाम्पट्य–गर्भमभिलापं प्रकटितवान्।

शिवः–ततस्ततः।

हसन्निव=हासं कुर्वन्निव। महतां हासो नोग्रतामाश्रयतीति ध्वनिः। **तृणाय**, "मन्यकर्मण्यनादर" इति चतुर्थी।

प्रतापः=तेजः। **नृसिंहस्य**=हिरण्यकशिपुहन्तुरवतारविशेषस्य। **सटाम्**=केशरम्। **कपर्दिनः**=शिवस्य। **फणिराजस्य**=शेषस्य। **स्फटाम्**=फणाम्।

विशकलय्य=स्पष्टीकृत्य।

भूतार्थम्=व्यतीतं सत्यं वस्तु। **लम्पटराजस्य**=परस्त्रीलोलुपाधिनाथस्य। **नानुहरेत्**=नानुकुर्वीत। **वारवनिताः**=वेश्याः। **वेषः**=नेपथ्यम्। **लाम्पट्य–गर्भम्**=परस्त्रीलोलुपतामिश्रम्।

वृत्तान्तममुं पाञ्चसाहस्रिको गौरसिंहः समाकर्ण्य, मायाजिह्मो मायां रचितवान।

शिव०—आचार्य्य एष माया-कल्पनेषु। ततस्ततः।

माल्य०—प्रभो! गौरः प्रकृत्यैवातिसुन्दरः, तत्रापि दिवा-कीर्तिमाहूय, मसृणमुखः संवृत्य, अधररागमञ्जन-रञ्जनं, वारवधू-योग्यमाभरण-जातम्, प्रच्छद-पटं च धारयित्वा, पटवास-वासित-दिगन्तरः, रति-प्रतिकृतिरिव, स्मितैः कटाक्ष-क्षेपैः, मधुर-वचनैः, सजघन-कम्प-पाद-क्षेपैः, सकृत्रिम-कुच-वेपन-वलित-वलि-भङ्ग-ललित-कञ्चुकिका-दर्शनैः, यूनां मनो मन्मथोन्मथितं विद-धन. ब्रह्मचारि-कुटीर-वासि-संन्यासिनामेव परिवर्तितवेषः.

पाञ्चसाहस्रिकः=शरसहस्रसेनापतिः।

दिवाकीर्त्तिम्=नापितम्। एतद्वाचकशब्दानां रात्रौ नोच्चारणं कार्यमन्यथा मरणाशौचापात इति मैथिलेषु प्रसिद्धिः। सा चैतदभिधानमूलिका युक्ता चेति वेदि-तव्यम्। **मसृणमुखः**=चिक्कणाननः। **संवृत्य**=भूत्वा। **अधरागः**=ओष्ठ-लौहित्यकारकम्, **मञ्जनम**=दन्तधार्यम्, **रञ्जनम्**=कपोलश्वैत्यलम्भकम्, त्रितयसमाहारद्वन्द्वे द्वितीयान्तं "धारयित्वा" कर्म। **प्रच्छदपटम्**=आवरक-वस्त्रम्। **पटवासवासितदिगन्तरः**=वसनसौगन्ध्यसुरभितहरिदन्तरालः। **रतिप्रतिकृतिरिव**=कामपत्नीप्रतिमूर्त्तिरिव। **स्मितैः**=ईषद्धास्यैः। **कटाक्ष-क्षेपैः**=भ्रूभङ्गसञ्चालनैः। **मधुरवचनैः**=कोमलभाषणैः। **सजघनकम्पपाद-क्षेपैः**=जघनवेपनपुरस्सरमङ्घ्रिपातैः। **कृत्रिमयोः**=निर्मितयोः, कुचयोः, **वेप-नेन**=कम्पेन, सहितेन, **वलितैः**=उपचितैः, **वलिभङ्गेन**=त्रिवलीभङ्गेन, **ललितैः**=सुन्दरैः, **कञ्चुकिकादर्शनैः**=चोलिकाप्रकटनैः। **मन्मथोन्माथितम्**=काम-

कैश्चिन् कलितमृदङ्गैः, अपरैस्तान-पूरिका-ताल-झर्झर-करैः, अन्यैर्व्यजन-पतद्ग्रह-ताम्बूल-करङ्क-मञ्जीर-पोटलिकादि-वाहकैः, इतरैश्च पञ्चपैः कलित-दासी-रूपैरनुगम्यमानः, सौवर्णप्रच्छदाच्छन्नामतिरमणीयामेकां शिबिकामारुह्य, वीरैरेवाऽऽकलित-भार-वाह-वेषैरूह्यमानः, तदीय-शिविर-मण्डलमासाद्य, "पद्मिनीनाम्नी जगत्प्रसिद्धा महाराष्ट्र-देशीया वाराङ्गना समागच्छति"—इति सममसूसुचत् ।

शिव०—ततः ।

माल्य०—ततो नामश्रवणमात्रेण पुलकितः, प्रफुल्लितः, स्विन्नः, आनन्दितश्च, मायाजिह्मः, रङ्ग-शिविरं प्रवेष्टुमादिदेश ।

शिव०—रङ्ग-शिविरम् ?

माल्य०—प्रभो ! लम्पटानां शिबिर-सन्निवेशेषु रङ्ग-शिबिर-

मदितम । **विदधत्**=कुर्वाणः । **परिवर्तितवेषैः**=नवीकृतनेपथ्यैः । **कलितमृदङ्गैः**=धारितमृदङ्गैः । **व्यजनम्**=तालवृन्तकम्, **पतद्ग्रहः**=निष्ठ्यूतग्रहः, **ताम्बूलकरङ्कम्**=ताम्बूलाधारपात्रम्, "पान डब्बा" इति हिन्दी, **मञ्जीरपोटलिका**="घुघुरुवों की पोटली" इति हिन्दी, इत्यादीनां **वाहकैः**=नायकैः, भृत्यैः । **कलितदासीरूपैः**=गृहीतभृत्यानेपथ्यैः । **सौवर्णेन**=हैरण्येन, **प्रच्छदेन**=आच्छादनपटेन, "ओहार" इति हिन्दी, **आच्छन्नाम्**=परितो गोपिताम् । **आकलित-भारवाह-वेषैः**=धारितशिबिकोद्वाहिकनेपथ्यैः । **ऊह्यमानः**=नीयमानः । **वाराङ्गना**=गणिका । **सममसूसुचत्**=समबूबुधत् ।

पुलकितः=सरोमाञ्चः । **प्रफुल्लितः**=विकसितः । **स्विन्नः**=आर्द्रवपुः । **आनन्दितः**=प्रसन्नीकृतः । **रङ्गशिविरम्**=नृत्योपकार्याम् ।

मपि भवति, यत्र केवलं दुरोदरं वा, वारवधू-विलासो वा, नर्म-शर्माणि वा, पान-परम्परा वा भवति। तत्र न सर्वेऽपि निविशन्ते; किन्तु कैश्चिदेवात्यन्तमन्तरङ्गैर्विषय-भोग-भाजो भवन्ति भट्टारकाः।

शिव०—एवम्! ततः किमभूत्?

माल्य०—आर्य! तन्निदेशेन रङ्गशाला-द्वारि शिबिकामास्थाप्य सह सर्वैरनुचरैरन्तः प्रविवेश पद्मिनी। तत्रैकत्राऽऽस्तीर्णा, वितस्युच्छ्राया कनक-सूत्रमयी तूलिका, तदुपरि स्थापितास्तादृशा एव त्रय उपबर्हाः, सम्मुखतः सौवर्णे वर्तुलास्तरणे सुसज्जितम्, प्रलम्बनलम्, कटु-मधुरामोदामोदित-दिगन्तरम्, धूमपानयन्त्रम्, एकतो राजत-पीठिकायां विन्यस्तानि अन्तःस्थ-रक्त-पीतारुण-द्रवाभा-भार-धारा-स्नापितास्तरणानि, मध्यस्थ-दीप-द्योत-द्योतित-

---

शिविरसन्निवेशेषु=सेनानिवेशदेशेषु। दुष्टमुदरं **दुरोदरम्**=द्यूतम्। **नर्मशर्माणि**=हास्यादिक्रीडाः। **पानपरम्परा**=मद्यपानाभ्यासः। **भट्टारकाः**=अधिपतयः सेनादीनाम्, लघुराजा वा।

आस्थाप्य=संस्थापयित्वा। **अनुचरैः**=साकमिति शेषः। **वितस्युच्छ्राया**=हस्ताधोच्छ्रितिः। वितस्तिः="वित्ता" इति हिन्दी। **कनकसूत्रमयी**=सुवर्णतन्तुशिल्पसमेता। **तूलिका**="गद्दी" इति हिन्दी। **उपबर्हाः**=उपधानानि। **वर्तुलास्तरणे**=गोलमञ्चिकाविष्टरे। **प्रलम्बनलम्**=दीर्घधूमार्कर्षकम्। **कटुमधुरामोदमोदितदिगन्तरम्**=अतिमिष्टसुगन्धिसुरभितहरिदन्तरालम्। **राजतपीठिकायाम्**=रौप्यपीठे। **अन्तःस्थायाः**=अन्तर्वर्त्तमानायाः, **रक्तपीतारुणद्रवाभायाः**=रक्तादिवर्णत्रयमद्यकान्तेः, **भारधारया**=समुदायरेखया,

दीप्ति-प्रचय-विहित-बहुल-चाकचक्यानि, अधोमुख-विन्यस्त-विविध-काच-चषक-वृत्तानि, माध्वीक-मैरेय-जगल-वारुणी-परिपूरितानि, ऊर्द्ध्वमुखानि काचपात्राणि, परितोऽष्टापद-रचित-मष्टापदम्, रत्ननिर्मिताः शारिवाटिकाः, दन्ति-दन्त-सार-रचिताः पाशकाः, परितो विलम्बमानेषु नानावर्ण-काच-कुसुम-स्तबकेषु ज्वलन्तः शतशो दीपाः, कोणेषु तूष्णीं स्थिता व्यजनयुजो भरण्य-भुजश्चाऽऽसन ।

स्नापितानि = क्षालितानि, रक्तरञ्जितीकृतानि, **आस्तरणानि**=वर्तुलाच्छादन-वसनानि यैस्तानि । **मध्यस्थदीपद्योतेन**=अन्तरालस्थापितदीपप्रकाशेन, **द्योति-तेन**=प्रकाशितेन, **दीप्तिप्रचयेन**=छविसमूहेन, **विहितम्** =सम्पादितम्, **बहु-लम्**, **चाकचक्यम्**=चमत्कृतिर्येषु तानि । **अधोमुखानि**=निम्ननानि, **विन्य-स्तानि** = स्थापितानि, **विविधानि**=अनेकानि, **काच-चषक वृत्तानि**= काचनिर्मित-पान-भाजनानि । **माध्वीकम्** = मधूकपुष्पजातं मद्यम्, **मैरेयम्** = "मिरा" नामकौषधिनिर्मित आसवः, **जगलः**=मद्यकल्कः, "मेदको जगलः समाविं"त्यमरः, **वारुणी**=सुरा, एताभिः **परिपूरितानि**=भरितानि । **काच-पात्राणि**=वर्तुलानि, "बोतल" इति हिन्दी । **अष्टापदेन**=सुवर्णेन, **रचितम्**= निर्मितम् । **अष्टापदम्**=पाशकक्रीडार्थशारिकाधारस्वरूपं चतुष्पाटीनामकं वसनम् । "चौपड़" इति हिन्दी । **शारिवाटिकाः**=पाशकप्रक्षेपार्थं निर्मितानि कोष्ठकानि । **दन्तिदन्तसाररचिताः**=करिदशनमध्यनिर्मिताः । **विलम्बमा-नेषु**=अधोमुखेषु स्थितेषु । नानावर्णानाम्, काचानाम्, **कुसुमस्तबकेषु**=कुसु मचित्रितगुच्छवदवभासमानेषु । **व्यजनयुजः**=वृन्तकवाहिन्यः । **भरण्यम्**= वेतनम्, भुञ्जत इति भरण्यभुजो वैतनिककर्मकराः ।

शिव०—ओम् !

माल्य०—तत्र प्रविश्यैकतः स्थित्वा, किञ्चित्प्रतीक्षमाणायामेव पद्मिन्याम्, झटिति द्वित्रैर्वयस्यैर्वृतः, ताम्बूल-चर्वण-चञ्चल-रदन-वदनः, विस्फारिताभ्यामिव नयनाभ्यां पिबन्निव, विविध-परिमल-परिमर्दिताग्रया घोणया जिघ्रन्निव च मायाजिह्मः प्रविश्य पद्मिनी-दत्त-दृष्टिरेव तूलिकामलञ्चकार।

अथ ताम्बूल-परिमलैला-लवङ्ग-पत्रक-पटवास-दानादानैरेव कियन्तं समयमतिवाह्य, सहासं सस्मितं सानुरागं सकटाक्ष-विक्षेपणं सभ्रूभङ्गं सकन्धर-परिवर्त्तनं च पद्मिन्या सहाऽऽलप्य, मुहूर्तं ससाधुवादं तद्गानानन्दं चानुभूय, पारितोषिकं निजकण्ठहारं समर्प्य, रजन्याः प्रथम-प्रहर-व्यत्यय-सूचकं समुरलीरणनं भेरी-नादमाकर्ण्य, सहचरान् विसृज्य, एकाकी संवृत्य, किञ्चित् समीप-मुपसृत्य, शनैः पद्मिनीं पान-गोष्ठी-सहचार-स्वीकार-भिक्षां ययाचे। सा च स्मयमानेव लज्जमानेव सग्रीवा-भङ्गमवनत-मुखी, कपटहिया स्वयं स्वस्मिन्नेव निविशमाना, तूष्णीङ्कारेण-

वयस्यैः=समानावस्थाकैर्मित्रैः। **ताम्बूलचर्वणचञ्चलरदनवदनः**=वीटिकाऽऽननकरणचटुलदन्तमुखः। **विविध-परिमल-परिमर्दिताग्रया**=अनेकसुगन्धिसुरभिभरितया। **घोणया**=नासिकया। **पद्मिनीदत्तदृष्टिः**=पद्मिनीनिरीक्षणनिरतः। **ससाधुवादम्**='साधु गीतम्' इत्यादिकथनपुरस्सरम्। **पारितोषिकम्**=प्रसन्नेन सता दीयमानम्। **प्रथम-प्रहर-व्यत्यय-सूचकम्**=आदिमयामसमाप्ति-बोधकम्। **एकाकी**=अद्वितीयः। **संवृत्य**=भूत्वा। **पानगोष्ठी-सहचारस्वीकारभिक्षाम्**=मद्यसभासम्मिलनाङ्गीकरणयाच्ञाम्। **स्मयमानेव**=

वाङ्गीकारमाचक्षाणा, चूर्ण-कुन्तल-मूलं कण्डूयितुमारेभे।

शिव०—ततः

माल्य०—ततो भ्रूभङ्गेन पद्मिनीसहचरानपि पुरुषान् द्वारदेशे प्रतीक्षितुमाख्याय, तेषु गतेषु, द्वित्रासु पद्मिन्याश्चेटिकास्वेव वर्त्तमानासु, मायाजिह्मो हाटकामत्रादुत्थाप्य पञ्चपा एलाः पद्मिन्याः कर आर्पयत्। साऽपि सखीहस्तादेकं रजत-सम्पुटमादाय, ततो वीटिका-द्वयं सुवासितं पूग-चूर्ण ताम्रक-सार-लेहं च तस्मै प्रायच्छत्।

शिव०—साधितं पद्मिन्या। ततः ?

माल्य०—भगवन् ! स तु वीटिकामास्वादयन्नेव, चर्वयन्नेव प्रेमवार्ता विदधदेव, शनैः शनैस्तन्द्रा-परवश इव, विनैव मैरेय-शरावचुम्बनं मदपराधीन इव, उपवर्हं पृष्ठेनाऽऽश्रयीकृत्य, शनैः शिरोऽपि तस्मिन समासज्य निद्रापरवशोऽभूत्।

पद्मिनी तु मूर्छक-महौषध-मिश्रितं किञ्चित् परिमलं नासा-

ईषद्धास्यनिरतेव। अवास्तवत्वादिवत्वोक्तिः। **कपटह्रिया**=कृत्रिमत्रपया। **तूष्णीङ्कारेणैव**=मौनेनैव। **चूर्णकुन्तलमूलम्**=कुटिलकेशमूलम्।

चेटिकासु=भृत्यासु। **वर्तमानासु**=तिष्ठन्तीषु। **हाटकामत्रात्**=सुवर्णपात्रात्। **रजतसम्पुटम्**=रौप्यनिर्मितं ताम्बूलाधारभाजनं लघुभूतम्। **ताम्रकसारलेहम्**="किमाम" इति प्रसिद्धम्, ताम्बूलोपयोगिद्रव्यम्।

तन्द्रा=निद्रापूर्वरूपम्, आलस्यविशेषात्मकम्। **मदपराधीन इव**=मदवशग इव। **तस्मिन**=उपवर्हे।

मूर्च्छकम्=मूर्च्छाजनकम्, **यत् महौषधम्**=श्रेष्ठौषधिः, **तन्मिश्रितम्**=

पुटयोः संयोज्य, तमधिकं मूर्छयित्वा, तस्य वस्त्राण्यपहृत्य स्वकीयेनांशुकेन तदङ्गमावृत्य, स्वयं च पोटलिकास्थेनापरेण दासीयोग्येन वाससा दासीभूय, बहुरूपविद्यया क्षणेन स्वाकृतिं तदाकृतिं च परिवर्त्य, मायाजिह्मपटैरुपबर्हमेकं शृङ्गार्य शाययित्वा, उत्तरीयेण चैकत आच्छाद्य, चेटीभिः सह कलित-पद्मिनी-वेषं मायाजिह्ममुत्थाप्य, बहिरानीय, पश्यतामेव भ्रान्तानां द्वारपालानां-"अहो! महानद्य विहितः सरकः, कादम्बरीयमतितीक्ष्णा, अवदंशमप्यास्वादयितुं न पारयसि, प्रविश, शेष्व पालङ्क्यामेव"-इति सहचरीरालपन्ती शिबिकायामतिष्ठिपत्।

एका चेटी द्वारपालमेकं शनैरकथयत्-"अत्रभवान् युवराजः शेते, तद् निर्मक्षिकमेव विधेयं भवद्भिरिति"। स च "अस्माकमन्तःप्रवेष्टुं नाधिकारः, वयं नग्नचन्द्रहासा अत्रैव पर्य्यटितुं

तत्संवृत्तम्। **परिमलम्**=सौगन्धिकम्। **अपहृत्य**=दूरयित्वा। **अंशुकेन**=प्रावरकेण वाससा। **दासीभूय**=दासीनेपथ्यभूषिता भूत्वा। **बहुरूपविद्यया**=अनेकस्वरूपधारणकलया। **क्षणेन**, एतेन तद्विद्यायामतिपाटवं बोधयति। **उपबर्हम्**=उपधानम्। **शृङ्गार्य**=शृङ्गारितं विधाय। **आच्छाद्य**=संगोप्य। **भ्रान्तानाम्**=भ्रमे निपतिताम्। **सरकः**=सुरापानम्। **कादम्बरी**=वारुणी। **अवदंशम्**=भक्षणम्, "अवदंशस्तु भक्षणमि"त्यमरः। **शेष्व**=स्वपिहि। **पालंक्याम्**=शिबिकायाम्। **सहचरीः**=चेटीः। **आलपन्ती**=कथयन्ती। **अतिष्ठिपत्**=अस्थापयत्। गृहीतदासीनेपथ्या कर्त्री, गृहीतपद्मिनीवेषा च कर्मत्वाश्रयीभूतेति वेदितव्यम्।

मक्षिकाणामभावो **निर्मक्षिकम्**=जनसञ्चारशून्यम्। **अन्तःप्रवेष्टुम्**=

नियुक्ताः"-इत्युदतारीत् ।

वाहकाश्च पल्यङ्कीमुत्थाप्य चल चलेति चेलुः, अनुचराश्च सहैव गच्छत गच्छतेति जग्मुः ।

शिव०- [आकाशे दृष्टिं बद्ध्वा] धिक् त्वां रे मायाजिह्म! सम्यग् गृहीतोऽसि !

माल्य०-भगवन् ! ततो नल्व-द्वयान्तराले प्रतीक्षमाणानश्वानारुह्य त्यक्त-चेटी-वादकादि-वेषा वीराः सावधानतया मायाजिह्ममुं ब्रह्मचारि-कुटीरे समानीतवन्तः सन्ति । तदत्र प्रभुचरणा एव प्रमाणम् ।

शिव०-अथ काऽवस्था तत्सेना-सन्निवेशस्य ?

माल्य०-वीर ! प्रातरेव ते प्रनष्टं मायाजिह्ममालोक्य, विवर्णाः पृष्ठत एव प्रस्थितवन्त इत्यश्रौषम् ।

शिव०-अथासौ माया-भवने स्थापनीयो भोजनासनादिभिश्च सत्करणीयः, अहमेनमवसरे द्रक्ष्यामि ।

अथोमित्युक्त्वा कुटीराभिमुखं प्रस्थिते माल्यश्रीके, सिंहदुर्गा-

---

अन्तराले गन्तुम् । उदतारीत्=उत्तरयाम्बभूव ।

नल्वयोः=चतुश्शतहस्तमितदेशयोः, "नल्वः किष्कुचतुश्शतमि"त्यमरः, द्वयम्, तदन्तराले

प्रनष्टम्=अदर्शनताङ्गतम् । "नशेः षान्तस्ये"ति णत्वनिषेधः । विवर्णाः= वर्णरहिताः । दुःखिन इति यावत् ।

मायाभवने=कूटागारे ।

अथोम्=ओमाङोश्च" । महाराष्ट्रभुवः परिवृढे=प्रभौ । पश्चिमघट्टे"घाटी"

भिमुखं च पुनः प्रचलति महाराष्ट्रभूपरिवृढे, पश्चिमघट्ट-महा-पर्वत-श्रेणीतः समुत्तीर्य, समुद्भूत-ध्वजाः सन्देशहराः, फेनाविल-वल्गैः ह्रेषा-विहित-जयध्वनि-प्रातिनिध्यैः, सचामरैरिवोत्थित-पुच्छैः, कलित-कमलदल-द्वयैरिवोर्द्ध्वकर्णैः, हर्ष-वर्ष-स्नातैरिव स्विन्नैः, घोटकैर्धावमाना दूरादेव जयजयेतिवादिनः, पञ्च सादिनः समागताः। कोङ्कणेश्वरश्च तान् समासादित-शुभ-संवादानवगत्य, निजाजानेय-रश्मिमाकृष्य स्वगतिं निरुरोध, भ्रूसंज्ञयैव च किमिति पप्रच्छ। तेषु जयध्वनि-धाराभिर्धराधरं धाराधरं धराञ्च ध्वनयत्सु, तेषामेकः समुपसृत्य साञ्जलि-बन्धं प्रणम्य प्रावोचत—

"भगवन्! विजयस्व, विजयस्व, सर्वोऽपि स्वान-देशः, सकलोऽपि च पोत-परम्परा-प्रधावमान-सांयात्रिक-सकौतुक-वीक्षितः पारावार-वीचि-व्रज-मार्जितः कोङ्कणदेशः श्रीचरणानां हस्तगतः

इति हिन्दी, ये महान्तः पर्वताः, तेषां श्रेणीतः=परम्परातः। **समुद्भूत-ध्वजाः**=समुच्चालितध्वजयन्त्रीकाः। **फेनाविलवल्गैः**=डिण्डीरक्षुब्धकविकाभिः। **ह्रेषया**=हिणत्कारेण, विहितं जयध्वनिप्रातिनिध्यं यैस्तैः। सचामरैरिवेत्युत्प्रेक्षा। **उत्थितपुच्छैः**=उत्थितं पुच्छम्=लाङ्गूलं येषां तैः। **कलितकमलदलद्वयैरिव**=धारितपद्मद्वितयैरिवेत्युत्प्रेक्षा। **ऊर्ध्वकर्णैः**=उच्छ्रोत्रैः। **हर्षवर्षस्नातैरिव**=आनन्दवृष्टिनिर्णिक्तैरिव। **पञ्चसादिनः**=पञ्चसङ्ख्याका अश्वारोहाः। **समासादित-शुभसंवादान**=समानीतहर्षसंदेशान्। **अवगत्य**=बुद्ध्वा। **धराधरम्**=पर्वतम्। **धाराधरम्**=जलधरम्। **धराम्**=पृथिवीम्। **समुपसृत्य**=अन्तिकमागत्य। **पोतपरम्पराभिः**=नौकाश्रेणीभिः, **प्रधावमानैः**=शीघ्रगतिभिः, **सांयात्रिकैः**=जलमार्गिकैः, **सकौतुकम्**=सकौतूहलम्, **वीक्षितः**=दृष्टः। **पारावर-**

सम्पन्नः । सागर-संसर्पि-प्लव-कूपकानां मस्तकेष्वपि महाराष्ट्र-मण्डलाऽऽखण्डलस्यैव जय-पताकाः गगन-तलं विलोडयन्ति । विजयतां विजयतां विजयतां महाराजः । सेनापतिना पत्रमिदमर्पितम" इति कक्ष-गुटिकातो निस्सार्य पत्रमेकमार्पयत् ।

शिव०-[पत्रावरणमुन्मुञ्चन्] अपि जानास्यवस्थां सुरतयुद्धस्य ?

सन्देशहरः-विजयतां भट्टारकः । एकेनैवाह्ना विजिताः सर्वेऽपि भारतद्रुहः । साम्प्रतं सुरत-नगरस्यापि गृहे गृहे, चत्वरे चत्वरे प्राङ्गणे प्राङ्गणे च, देवस्यैव विक्रम-कथा जेगीयते ।

शिव०-[पत्रं प्रसार्य मुद्रां विलोक्य, सहचरांश्चाऽऽनन्ददृशा सम्भाव्य] विलिखत्येतद् धीरेन्द्रसिंहो विजयध्वजापरनामा ।

तदाकर्ण्य सर्वेऽपि शिव-सहचराः सगुल्फाहति सवल्गास्फालनं च सप्तीन समीपमानीय, किमिति किमितीति सोत्कण्ठाः

वीचित्रजमार्जितः=क्षीरधिलहरिव्रातधौतः । सागरे **संसर्पिणाम्**=सङ्गच्छमानानाम् , **प्लवानाम्**=पोतानाम् , **ये कूपकाः**=गुणवृक्षकाः, तेषाम् । "कूपको गुणवृक्षक" इत्यमरः। "मस्तूल" इति हिन्दी। **जयपताकाः**=विजयवैजयन्त्यः । **विलोडयन्ति**=सङ्घर्षयन्ति । **कक्षगुटिकातः**=कुक्षिपोटलिकातः

पत्रावरणम्="लिफाफा" इति प्रसिद्धम् । **सुरते**=गुर्जरदेशैकदेश-"सूरत"-इति नाम्नाऽधुना प्रसिद्धे, यद् युद्धं तस्य ।

भट्टारकः=स्वामी । **अह्ना**=दिवसेन । **देवस्य**=भवतः । **विक्रमकथा**=पराक्रमवार्त्ता । **जेगीयते**=वारं वारमुद्घोष्यते ।

मुद्राम्=राजचिह्नम्, स्वीयाम् ।

सगुल्फाहति=गुल्फैरश्वताडनपुरस्सरम् । एवं कृतेऽश्वाः शीघ्रतया चलन्ति । **सवल्गास्फालनम्**= सकविकाऽऽकर्षणम् । **सप्तीन्**=हयान् । **सोत्कण्ठाः**=

समस्थिषत। ततस्त्वरितया दृशोर्द्वमधश्चावलोक्य, सहचरस्यैकस्य हस्ते दत्वा, समन्दस्मितं पठितुमाज्ञप्तवान्। सोऽपि च–"महाराष्ट्रराजस्य नास्ति लेखपाठादिषु पाटवम्"–इति स्मरन्, सपदि तद्धस्तात् गृहीत्वा, वारमेकं मनसैव पठित्वा, झटिति पठितुमारब्धवान्, यद्—

"विजयतां पाथोधि-पयःपूर-परिवर्ति-परःशत-पोतस्थ-सांयात्रिक-समूह-जेगीयमान-कीर्तिचन्द्रिका-चुलुकन-चातकीभूत-कोङ्कण-कल्याण-खानदेशादि-महामण्डल-प्रजागणः, सद्यश्छिन्न-प्रत्यर्थि-पृथिवीपति-कन्धरा-विगलत्कवोष्ण-शोण-शोणित-प्रवाह-परितर्पित-शाकिनी-डाकिनी-भूत-प्रेत-मण्डली-विलोडित-ताम्र-श्मश्रु-गण्ड-मुण्ड-माला-मण्डित-चण्डीकः, सनातन-धर्म-रक्षण-

---

उत्काः। **समन्दस्मितम्**=अत्यल्पमन्दहाससहितम्। **पाटवम्**=दाक्ष्यम्।

पाथोधिपयःपूरे=वारिधिवारिप्रवाहे, **परिवर्त्तिषु**=सञ्चलितेषु, **परःशतेषु**=शतादधिकेषु, पोतेषु, तिष्ठताम्, **सांयात्रिकाणाम्**=जलपथिकानाम्, समूहेन, जेगीयमानायाः=वारं वारमुद्घोष्यमाणायाः, **कीर्त्तिचन्द्रिकायाः**=यशःकौमुद्याः, **चुलुकने**=चुलुकीकरणे, **चातकीभूतः**=चातकपक्षितामुपगतः, कोङ्कण-कल्याण-खानदेशादिमहामण्डलप्रजागणो यस्यैवम्भूतः। **सद्यश्छिन्नाभ्यः**=तत्कालकृत्ताभ्यः, **प्रत्यर्थि-पृथिवीपति-कन्धराभ्यः**=विरोधि-भूपाल-ग्रीवाभ्यः, **विगलितेन**=विच्छुरितेन, **कवोष्णेन**=ईषदुष्णेन, **शोणेन**=रक्तवर्णेन, **शोणितप्रवाहेण**=रुधिरधारया, **परितर्पितया**=तृप्तिमानीतया, डाकिनी-शाकिनी-भूत-प्रेत-मण्डल्या, **विलोडितानाम्**=मथितानाम्, **ताम्रश्मश्रुगण्डानाम्**=रक्तवर्णकूर्चकपोलानाम्, **यवनानाम्**, **मुण्डमालाभिः**=छिन्नमस्तक-

सक्षणः, रिपु-निकर-सम्पत्ति-सीमन्तिनी-धम्मिल्ल-वेल्लित-मल्लिका-मतल्लिका-माल्य-सुवासित-करपल्लव-तल्लजः परःसहस्र-श्रीसंवलितः श्रीमहाराष्ट्रमण्डलाऽऽखण्डलः !

श्रीचरणेषु विविध-प्रणतितति-पुरस्सरं सजयध्वनि सविजय-ध्वजान्दोलनञ्च विनिवेदयत्येष विजयध्वजनामा सेनापति-पद-सनाथितो यद्-ये हि कलित-मर्कयात्रि-वेषा वारं वारं हीन-दीन-प्रजाश्च बाधमाना महाराष्ट्रैर्युयुत्सव आसन्, तेषु शतशो महाराष्ट्र-रिष्टि-धारा-तीर्थे मुक्तिं गताः, अपरे च पलायिताः ।

स्वभिः, **मण्डिता**=भूषिता, **चण्डी**=तमोगुणप्रधाना शक्तिरखिलभुवनधक्षण-सामर्थ्यशालिनी, येन सः । "नयूतश्चे"ति कप् । डाकिन्यादयो वायवीयशरीरोपेताः श्रुतौ तदर्थभूतेषु पुराणेषु लोककथासु च चिरप्रसिद्धाः । एतदनङ्गीकरणनिपुणास्तु लोकायतमात्रदृष्टय इति पुराणमतदीपिकायां विस्तरेण प्रतिपादितम् ।

सनातनधर्मरक्षणे, **सक्षणः**=सयत्नः । **रिपुनिकरस्य**=शत्रुसमूहस्य, **सम्पत्तिरेव**=श्रीरेव, **सीमन्तिनी**=वनिता तस्याः, **धम्मिल्ले**=केशबन्धे, **वेल्लितस्य**=दोलितस्य, **मल्लिकामतल्लिकामाल्येन**=प्रशस्तमल्लिकास्रजा, **सुवासितः**=सुरभितामापादितः, **करपल्लवतल्लजः**=प्रशस्तहस्तकिसलयं यस्य सः । **परःसहस्रश्रीसंवलितः**=अत्यधिकशोभाशाली ।

सविजयध्वजान्दोलनम्=विजयवैजयन्तीहिल्लोलनपुरस्सरम् । **सेनापतिपदेन**=सेनानीपदव्या, **सनाथितः**=सनाथीकृतः । **कलित-मर्कयात्रि-वेषाः**=धारित-मर्कपान्थनेपथ्याः । मर्क "मक्का" इति प्रसिद्धं यवनतीर्थम् । पुरा हिन्दूनां तीर्थमिदमासीत् । अधुनाऽपि शिवलिङ्गं दृश्यते, तदेव च पूजयन्ति तत्र गता यवना इति श्रोत्रपरंपरानुस्यूता वार्त्ता । **बाधमानाः**=पीड्यमानाः । महाराष्ट्राणां **रिष्टिधारातीर्थे=खड्गधारापावितस्थले । मुक्तिं गताः**=मृताः ।

अत्रालप्यीयसी दिल्ली-कलङ्केन प्रेषिता, अपरा च सुरताधिष्ठितैर्यवनवणिग्भिर्योजिता चमूरप्यस्माभिर्योद्धुं चन्द्रहासान् कोशेभ्यः कर्षितवती। तया सह श्रीमच्चरणौ स्मृत्वाऽस्मद्वीरैर्युद्धमारब्धम्। मुहूर्तं तुमुलमभूज्जन्यम्। परतश्चोद्यतखड्गैरस्मद्भटैर्बेभिद्यमानाः केचन पुरन्दर-मन्दिरम्, अपरे च गिरिकन्दरं भेजुः। साम्प्रतमस्मद्धस्तगताः शतं पोताः, सुरतनगरम्, खानदेशः, निखिलश्च कोङ्कणदेशोऽस्ति। तदत्र श्रीचरणाः प्रमाणम्"—इति।

तदाकर्ण्यातिप्रसन्नः क्षणमालप्य, "अथाऽऽगम्यताम्, सिंहदुर्गं लप्स्यत उत्तरपत्रम्" इति कथयित्वा, इङ्गितज्ञैः, समीरं ग्रसमानैरिव विपदङ्गणरिङ्गणमीहमानैरिव तुरङ्गैः सपदि सिंहदुर्गमायातः।

❀ ❀ ❀ ❀

संन्यासिकुटीरे तु दिल्लीश्वर-तनयं तथाऽऽनीतमालोक्य,

पलायिताः=युद्धमपहाय दूरं गताः। **सुरताधिष्ठितैः**="सूरत" नगरनिवासिभिः। **योजिता**=एकत्रीकृता। **चमूः**=वाहिनी। **कोशेभ्यः**=असिधानीभ्यः। सङ्ग्रामोद्यताऽभूदिति यावत्। **मुहूर्त्तम्**=कियत्कालपर्यन्तम्। **उद्यतखड्गैः**=उच्छ्रितासिभिः। **बेभिद्यमानाः**=चेच्छिद्यमानाः। **पुरन्दरमन्दिरम्**=इन्द्रसदनम्, **स्वर्गम्**। **गिरिकन्दरम्**=पर्वतदरीम्। **पोताः**=महानौकाः। जलयानानीति यावत्।

लप्स्यते=प्राप्स्यते। **इङ्गितज्ञैः**=अभिप्रायवेदिभिः। **समीरम्**=वायुम्। **ग्रसमानैः**=लेलिहानैः। वायुतोऽप्यधिकगतिभिरिति यावत्। **विपदङ्गणे**=विपत्तिचत्वरे, **रिङ्गणम्**=भ्रमणम्। **ईहमानैः**=चेष्टमानैः। **तुरङ्गैः**=त्वरितगमैर्घोटकैः।

× × × × ×

ब्रह्मचारिगुरुणा सह सर्वेऽपि तत्पार्श्वस्था मुमुदिरे। गौरश्च पर्य्यायतः सर्वेऽपि सानन्दं परिषस्वजिरे। गौरस्तु सुप्रस्थैव तस्य पुरुषरूपं परिवर्तयामास।

तस्मिन् गततन्द्रे च सर्वेऽपि सादरं जय जीव! इति कथयन्तः, "आज्ञाप्यतां काऽपि सेवा दिल्ली-वल्लभ-कुमारेण"—इति प्रोचुः।

स च वारं वारमाश्चर्यपुषी तन्द्रा-सम्पर्क-जुषी चक्षुषी चिरालस्य-मन्थराभ्यां हस्ताभ्यां सम्मर्द्य; क्षणमात्मानम्, क्षणं कुटीरम्, क्षणं परितः परिसर्पिणो जनान्, क्षणं सान्द्र-श्यामता-श्यामीकृत-दिग्वलयं वनम्, क्षणञ्च कचन कलित-विकोश-खड्गैर्भटैः, कचन ब्रह्मपाठ-परैर्ब्रह्मचारिभिः, कचन श्मश्रु-कूर्च-केश-जाल-जटालैर्जटिलैः, कचन बाहुयुद्धमभ्यस्यद्भिः खड्ग-चालन-चातुरीमासादयद्भिर्व्यायामोत्तजितोच्छ्वासैर्धूलि-धूसरैः पटुभिर्वटुभिर्विहित-

पर्य्यायतः=क्रमतः। परिषस्वजिरे=पर्याश्लिष्यु:। पुरुषरूपम्=मानवनेपथ्यम्।

गततन्द्रे=विनष्टमोहे, विधूतालस्ये। आज्ञाप्यताम्=आदिश्यताम्।

आश्चर्यपुषी=कौतुकाकुले। तन्द्रा-सम्पर्क-जुषी=निद्राद्यवस्था-संसर्ग-सेविके। चिरालस्येन मन्थराभ्याम्=शिथिलप्रायाभ्याम्। सम्मर्द्य=मर्दनं विधाय। आत्मानम्=स्वम्। परिसर्पिणः=गच्छतः। सान्द्रया=घनीभूतया, श्यामतया=कार्ष्ण्येन, श्यामीकृतम्=कृष्णतामापादितम्, दिग्वलयम्=हरित्समूहो यस्मिंस्तादृशम्। कलितविकोशखड्गैः=धारितनग्नासिभिः। ब्रह्मपाठपरैः=वेदाध्ययननिरतैः। जटिलैः=जटायुतैः साधुभिः। बाहुयुद्धम्="कुस्ती" इति प्रसिद्धम्। आसादयद्भिः=प्राप्नुवद्भिः। व्यायामोत्तजितो-

विविध-क्रीडं शाद्वलम्, कचन सदक्षाक्षिकुञ्चनं भुशुण्डीमुत्तोल-मुत्तोलं चिञ्चाकिशलयाग्रेषु लक्ष्यमनुसन्दधतो वीरांश्चाऽऽलोकमा-लोकं चकितचकितो भीतभीतो लज्जितलज्जितो वाचंयम एवावर्तिष्ट।

तावदागत्य माल्यश्रीको गौरमालिङ्ग्य मुहूर्तमालप्य युव-राजमपि "श्रीमतो निवासाय प्रासाद एकोऽतिरुचिरः प्रस्तुतोऽस्तीति शिबिकां सज्जीकृत्याऽऽनीतवानस्मि, करुणया सनाथ्यताम्, तत्रैव च यथोचितसेवाऽऽदेशैरस्मादृशोऽनुगृह्यताञ्च"-इति सादर-मालपत्।

स तु हाटक-करहाट-च्छवि-कपोलो लोलतारको मुख-मवनमय्य, विविधभाव-भावना-भङ्ग-भज्यमान-भावो नोमिति, न वा नेत्यचकथत्, तन्निर्दिष्टां शिविकामेव चाऽऽरोहत्।

च्छ्वासैः=शरीरपुष्ट्यर्थकविधिविशेषवर्धितोच्छ्वासैः। **सदक्षाक्षिकुञ्चनम्**=दक्षिणनयनसंकोचनपुरस्सरम्। **उत्तोलमुत्तोलम्**=उत्थाप्योत्थाप्य। **चिञ्चा-किसलयाग्रेषु**=तिन्तिडीदलाग्रेषु। **लक्ष्यम्**=वेधनीयम्। **वाचंयमः**=मौनी।

आलिङ्ग्य=आश्लिष्य। **प्रासादः**=हर्म्यम्। **करुणया**=दयया। सव्य-ञ्जयम्। **यथोचितसेवादेशैः**=उचितानतिक्रमणपूर्वकसेवनाज्ञाभिः। **अनु-गृह्यताम्**=अनुग्रहः क्रियताम्।

हाटक-करहाट-च्छवि-कपोलः=सुवर्ण-शिफाकन्द-कान्ति-गण्डस्थलः। "करहाटः शिफाकन्द" इत्यमरः। कमलमूलकन्द इति यावत्। **विविधभा-वानाम्**=अनेकविधानाम्, **भावनानाम्**=विचारपरंपराणाम्, **भङ्गेन**=त्रुट्या, **भज्यमानः**=खण्ड्यमानः, **भावः**=अभिप्रायो यस्य सः। **तन्निर्दिष्टाम्**=तत्प्रदर्शिताम्।

एवं तं सह नीत्वा याते माल्यश्रीके, शाद्वले कटमास्तीर्यो-पविष्टेषु सब्रह्मचारिगुरुषु तत्रत्येष्वखिलेषु च, प्रजागर-मन्थरोऽपि क्रियासमभिहारेणाऽऽहूयमानो गौरसिंहस्तत्राऽऽगत्य गोष्ठी-मध्यं भेजे।

कथमिव किमिव संवृत्तं गतयामिन्याम्? कैः कौशलैः? काभिर्मायाभिः? कैरुपायैः? काभिर्विद्याभिः? कैर्नियोगैः? काभिः प्रवञ्चनाभिः? कैः प्रकारैः? काभिश्च घटनाभिः? आनीतवानसि मायाजिह्ममेतम्, कथं दीपोद्योत-विद्योत-चतुर्गुणित-चाकचक्य-चञ्चच्चन्द्रहास-भासा भयानकानां प्रहरिणां चक्षुःषु रेणुका-राशि-माहितवानसि? कथं वा गगनोद्भेदाभ्यासेनेव निशिततरैर्वाता-घात-क्षालितैरिव चमत्कुर्वद्भिः परितः प्रसर्पिभिर्मयूख-पूरैरिव विहितातपत्र-विडम्बनैर्भल्लैर्भयङ्करकरान् प्रतीहारान् मोहित-

प्रजागरेण=दीर्घया जागृत्या, **मन्थरः**=अलसः। **क्रियासमभिहारेण**=पौनःपुन्येन। **भेजे**=सिषेवे।

कौशलैः=दाक्षिण्यैः। **मायाभिः**=वञ्चनप्रकारैः। **नियोगैः**=अनुष्ठानैः। **प्रवञ्चनाभिः**=प्रतारणाभिः। **दीपोद्योतेन**=दीपप्रकाशेन, **विद्योतानाम्**=विद्योतितानाम्, प्रकाशितानाम्, **चतुर्गुणितचाकचक्यानाम्**=वृद्धिगतचमत्कृतीनाम्, **चञ्चताम् चन्द्रहासानाम्**=खड्गानाम्, **भासा**=तेजसा। **भयानकानाम्**=भीतिप्रदानाम्। **प्रहरिणाम्**=यामिकानाम्। **रेणुकाराशिम्**=धूलिनिकरम्। **आहितवान्**=दत्तवान्। **गगनतलोद्भेदाभ्यासेनेव**=नभोमण्डल-द्विदलतापादननिरतेनेव। **निशिततरैः**=अतितीक्ष्णैः। **वाताघात-क्षालितैरिव**=वायुताडननिर्णिक्तैरिव। **मयूखपूरैः**=दीधितिव्रजैः। **विहितात-**

वानसि ? इति सकुतूहलं सोल्लासं सादरं साश्चर्यञ्च पृष्टवत्सु तेषु, संक्षिप्यैष एवमेवमिति सर्वं यथातथं सूचितवान्। तदाकर्ण्य, साधुवाद-वर्षैः कुटीरमापूरयत्स्वखिलेषु, ब्रह्मचारिगुरुराह-"कथं न स्याः ? परमवीरवरस्य खड्गसिंहस्य पुत्रोऽसि, पिता तव बाल्य एव व्याघ्र-मृगया-व्यसनी समभूत्, यौवने च बहुभिर्श्चतुर्गुणबलैरयुध्यत, वार्द्धके च रणाजिर एव वीरगतिं गतो मार्तण्ड-मण्डलं भित्त्वा नन्दनवनविहारमाससाद।

ततस्त्वतिकुतूहल-समाविष्टेन गौरेण सह तस्यैवमभूवन् वाचां प्रचाराः।

गौ०—अपि मम तातचरणैः महाऽऽसीदाचार्याणां परिचयः ?

ब्रह्मचारिगुरुः—[किञ्चिद् निश्वस्य] आसीदतितराम्।

पत्रविडम्बनैः=कृतच्छत्रानुकृतिभिः। **भयङ्करकरान्**=भीतिदहस्तान्। **सोल्लासम्**=सहर्षम्। **संक्षिप्य**=तनूकृत्य। **साधुवादवर्षैः**=धन्यवादवृष्टिभिः। **आपूरयत्सु**=ध्वनयत्सु। **व्याघ्र-मृगया-व्यसनी**=व्याघ्राखेटनिरतः। **वार्द्धके**=वृद्धावस्थायाम्। **रणाजिरे**=सङ्ग्रामाङ्गणे। **मार्त्तण्डमण्डलम्**=भानुबिम्बम्। **भित्त्वा**=द्विधा कृत्वा। तत एव मार्गादित्यर्थः। **नन्दन-वन-विहारम्**=इन्द्रकाननक्रीडाम्। **आससाद**=प्राप। मुक्तोऽभूदित्यत्र वास्तविकं तात्पर्यम्। सूर्यमण्डलभेदिनो हि न पुनरावर्त्तन्ते जन्मपङ्काकुले जगति, स्वर्गं गतानाञ्च परावृत्तिः—

ते तं भुक्त्वा स्वर्गलोकं विशालं
क्षीणे पुण्ये मर्त्यलोकं विशन्ति॥

इत्यादिवचनसहस्रेण स्पष्टीकृतेति दिक्।

गौरः--[अधिकाधिक-कौतुक-ग्रस्तानामखिलानां मुखमवलोक्य] आर्य ! क्षम्यतां प्रौढिरेतस्य भवदनुकम्पा-पात्रस्य, एष चिररात्राय भवन्तं ब्रह्मचारिगुरुनामधेयं महाराष्ट्रराजस्य शुभोदयोदर्काभिलाषिणं कोङ्कण-पृथिवी-परिवृढस्य परमस्नेहपात्रं विक्रम-व्यापार-व्यत्यायित-यौवनं सदा सदाचार-प्रचार-परं हविष्यभोजिनं विविध-देवाराधनाऽनुष्ठानैकतानं कञ्चन क्षत्रिय-कुल-कलशं मन्यते ।

अतितराम् =अत्यन्तमधिकम् ।

प्रौढिः=अभिमानः । चिररात्राय=चिरम् । ब्रह्मचारिगुरुः, नामधेयं यस्य तम् । ननु नामान्तरं किमप्यस्ति विज्ञातमस्माभिः । शुभोदयोदर्काभिलाषिणम्=उत्तरकालिकाभ्युदयकामनावन्तम् । उदर्कः=उत्तरकालः, भाविशुभफलं वा । कोङ्कणपृथिवीपरिवृढस्य=कोङ्कणधराधिनाथस्य । विक्रमव्यापारेषु=पराक्रमकर्तव्येषु, व्यत्यायितम् =क्षपितम्, यौवनं येन तम् । सदा=सर्वस्मिन् काले । सताम्, आचाराणाम्, प्रचारपरम्=विवर्धनरतम् । विविधानाम्=अनेकेषाम्, देवानाम्=हनूमन्महादेवादीनाम्, आराधने=सेवायाम्, अनुष्ठाने=मन्त्रादिजपे, एकः=अद्वितीयः, तानः=लवः, यस्य तम् । यद्यप्यनेकदेवपूजकत्वस्य दोषत्वं "स देवानां पशुरेवे"त्यादिना बृहदारण्यकादिषु स्फुटीकृतम्, एतदेव ध्वनयितुं "देवानां प्रिय" इति "षष्ठ्या आक्रोशे" सूत्रस्थवार्त्तिके "मूर्खे" इति पूरितं कौमुदीकृता, तथापि तदानन्तनीं स्थितिं प्रदर्शयितुमभिधानमिति वेदितव्यम् । सर्वेष्वेवैकस्यैव ब्रह्मणः सत्तामाश्रित्य विभिन्ननामरूपस्याप्यभिन्नस्य पूजनं कुर्वन्ति विद्वांस इति न दोषलेश इति पञ्चदेवोपासकाधिश्रितः पन्थाः । वास्तवं तत्त्वं तत्त्वात्मिका वेत्तु नीलसरस्वती । क्षत्रियकुलकलशम = क्षात्रान्वयसमुद्भवम् ।

महाराष्ट्रभाषाञ्चैवं मधुरया सुस्पष्टमुच्चार्य्याऽऽऽलपति भवान; यत्र भवत्यल्पीयस्यपि मे विचिकित्सा भवतो महाराष्ट्रदेशीयत्वे। महाराष्ट्रदेशीयमहाशयेन च सहोदयपुर-निवासिनो मम तातपादस्य दुर्घटः परिचयः। तद्यावद् विशकलय्य नोच्यते; तावन्न शाम्यत्युद्वेगः शङ्कापङ्कपङ्किलस्य हृदयस्य। तद् यदि नाम न भवेत् किमपि गोपनीयं नीतिविरुद्धं वा, तन्मादृशानुचरानुरोधात् कृपया निर्वचनीयोऽयं वृत्तान्तः-इत्यभिधाय, मौनमाकलयति गौरे, सकुतूहलमेकाग्रेषु चाखिलेषु, क्षणं स्थिरीभूय, उच्छ्वस्य च समारभत व्याहर्तुं ब्रह्मचारिगुरुः।

ब्रह्म०-नास्म्यहं महाराष्ट्रदेशीयः। जनिभूर्मम राजपुत्रदेशः। महाराज-श्रीजयसिंह-निर्मिताज्जयपुर-नगरादारादेवाऽऽश्वीन एको 'जितवार'-नामा ग्रामोऽस्ति, तदध्यक्ष एवाहमासम्। मथुरायात्रां कुर्वतः खड्गसिंहस्य मम च पित्रोः स्नेहः प्रगाढो जात इति

अल्पीयसी=अतिन्यूना। विचिकित्सा=संशयः। दुर्घटः=दुःखेन भवितुं योग्यः। विशकलय्य=स्पष्टीकृत्य। उद्वेगः=मानसमौत्सुक्यं जिज्ञासासमुत्थम्। गोपनीयम्=रहस्यम्, अवाच्यमिति यावत्। निर्वचनीयः=निःसन्दिग्धं वक्तव्यः। एकाग्रेषु=यतमनःसु। उच्छ्वस्य=दीर्घश्वासं गृहीत्वा। व्याहर्त्तुम्=वक्तुम्। जनिभूः=जन्मभूमिः।

महाराजेन, जयसिंहेन, निर्मितात्=निर्मापितात्, वासितादिति यावत्। आश्वीनः=अश्वेनैकेन दिनेन गन्तुं योग्यः। "त्रिष्वाश्वीनं यदश्वेन दिनेनैकेन गम्यते" इत्यमरः। "अश्वस्यैकाहगम" इति खञ्। "जितवार" नामा=साम्प्रतं "जटवारा" इति ख्यातः। पिता च पिता च=पितरौ, तयोः। प्रगाढः=

तन्मूलक एवाऽऽवयोरपि परमः प्रेमा बभूव। सोऽपि बहुवारं मम भवनं सनाथितवान्, अहमपि चानेकशस्तत्र गतः—इति।

गौ०—अप्यापृच्छे ? अपि कथयिष्यति? कथमिहाऽऽयातो भवान्? कथं वा त्यक्तवान् निजमाधिपत्यम्?

ब्रह्मचारिगुरुः—गौर! वयं महाराज—जयसिंहस्याधीना बान्धवाः सेनानियमेन भूमिभुजः। अकस्माज्ज्वरितेषु कतिपयेषु सादिषु बहुभिः कर्णेजपैरीर्ष्यापरवशैः किमप्युक्तोऽसूचितयात्रो महाराजः समायातः। सादिसङ्ख्यामूनामवलोक्य विनैव विचारं मम सर्वस्वमाहर्तुं स्वसभायामकथयत्। मम पत्नी तु ततोऽपि पूर्वमेव स्मृतिमात्र—विषया संवृत्ता। ततोऽहं दशवर्षदेश्यं रामसिंहं तनयं सह नयन् रामेश्वर—यात्रां विधातुकामः, पूर्वं द्वारकां गतः, ततश्च पोतमारुह्य रामेश्वर—दर्शनार्थं प्रचलितः।

गौरो रामेश्वर—यात्रा—समाख्यया तनयस्य नाम रामसिंह इति स्वयं च खड्गसिंहस्य गेहं बहुवारं गत इति च निष्कृष्टार्थं शृण्वन्

अत्यधिकः। **प्रेमा**=स्नेहः।

अपि=पुनरपि। **आपृच्छे**=पृच्छामि। "आङि नु पृच्छयोरि"त्यात्मनेपदम्। वर्त्तमानसामीप्ये लट्। **आधिपत्यम्**=ग्रामाधीशताम्।

भूमिभुजः="जागीरदार" इति ख्याताः। **ज्वरितेषु**=ज्वरग्रस्तेषु ज्वलितेषु वा पाठः। **कर्णेजपैः**=सूचकैः, निन्दाकारिभिः। **ईर्ष्यापरवशैः**=गुणेषु दोषाविष्करणपरायणैः। **असूचितयात्रः**=अबोधितगमनः। **ऊनाम्**=अल्पाम्। **सर्वस्वम्**=निखिलं वित्तजातम्। **स्मृतिमात्रविषया**=केवलस्मरणगोचरा। मृतेति यावत्। **विधातुकामः**, "तुंकाममनसोरपि"।

रामेश्वरयात्रायाः **समाख्यया**=नाम्ना। **निष्कृष्टार्थम्**=निर्गलिताभिप्रा-

देवशर्म्मणा कथिताञ्च नूत्नामेव कथां स्मरन, समाधिस्थ इवैकतान उदन्तमेतं शुश्राव।

ब्रह्मचारिगुरुः—ततः परं यत् संवृत्तं तस्य तु कथनेनापि स्मरणमात्रेणापि च कम्पते मे हृदयम्। तथाऽपि किं कुर्य्याम्, वज्रेण रचितं हृदयं मानवानाम्, यस्य स्मरणमात्रेण रोमाण्यञ्चन्ति, वपुर्वेपते, मनो मथ्यते, चित्तं चञ्चल्यते, लोचने लोलतः, जीवनञ्च जर्जरीभवति, तदेव दुःखम्, तदेव व्यसनम्, तामेव च यन्त्रणाम्, अनुभूयापि जीवामि—इति वदन्नेवोच्छ्वस्यापाङ्गसङ्गिनो द्वित्रान बाष्प-बिन्दून पटप्रान्तेनापाहरत्।

गौ०—तात! परिवर्ती संसारः, अवितर्कणीया दैवघटना, अवश्यम्भाविनो भावाः, सुखदुःखमय एव च संसारः, कस्य दुःखासम्भिन्नं सुखम्? कस्य निःशेषं पूर्णा अभिलाषाः? कस्याप-

---

यम्। नूत्नाम्=नव्याम्। समाधिस्थस्य=चित्तनिरोधार्थक्रियानिरतस्य। एकतान इव=अनन्यमनस्क इव। उदन्तम्=वृत्तान्तम्।

रोमाणि=तनूरुहाणि। अञ्चन्ति=उद्गच्छन्ति। चञ्चल्यते=अतितरां चञ्चलं भवति। लोलतः=चपलतः। जर्जरीभवति=निस्तत्त्वीभवति। करुणरसप्रवाहोऽत्र गद्ये। वैदर्भी च रीतिः स्फुटैव।

दुःखव्यसनयोरिह समानार्थत्वेऽपि दुःखिनाभिहितमिति न दोषः, प्रत्युत गुणः। यन्त्रणाम्=मानसव्यथाम्। उच्छ्वस्य=दीर्घं निश्वस्य। अपाङ्गसङ्गिनः=नेत्रप्रान्तलग्नान्। अपाहरत्=अदूरयत्।

परिवर्त्ती=परिवर्त्तनशीलः। वितर्कणीया=विवेचयितुमनर्हा। दैवघटना=भाग्यकृतिः। भावाः=भवनीयाः पदार्थाः, दुःखेन, असम्भिन्नम्=

रिचित-पश्चात्ताप-संघर्षं हृदयम् ? तत् पौर्वापर्य्येणाऽऽलोच्य धैर्यमेव धारणीयं धर्म-धारि-धौरेयैः।

ब्रह्मचारिगुरुः—[बाष्पं निरुध्य] अथाकस्मादेव सहडहडा-शब्दमाकुलयितुमारब्धवती वात्या, पारावारश्च पयसः पर्वतानिव तरङ्ग-भङ्गान् रचयितुमारब्धवान, पोतेन चास्माकमारब्धं दोलयेव दोलितुम्। तावदुद्विग्नानिव कर्णधारानालोक्य महान्तं क्रन्दन-कोलाहलं कलितवन्तः सकला यात्रिनिकराः। ततो भय-भ्रान्त-नयनस्य रामबालस्य करं गृहीत्वा समागतः पुरोहितो मां झटित्यवादीत्—

"प्रभो ! नायमवसरः शुष्क-चिन्तया क्षणमप्यतिवाहयितुम्। अस्मिन्नुडुपे बहवः कार्पास-भाराः सन्ति, तेषामेकं दृढं कराभ्यां धृत्वा, भवता प्लव-प्रान्तस्थेन भाव्यम्। भवान् किञ्चिन् तुन्दिभ

अच्छिन्नम्। निःशेषम् =यथा स्यात्तथा। अभिलाषाः=मनोरथाः। अपरिचित-पश्चात्ताप-सङ्घर्षम्=अविज्ञातानुतापसङ्घट्टम्। धर्मधारिधौरेयैः=धार्मिकाग्रेसरैः।

आकुलयितुम्=क्षुब्धं विधातुम्। वात्या=वातसमूहः। पारावारः=अम्भोधिः। पयसः=पर्वतानिवेत्युत्प्रेक्षा। रचयितुम् =विन्यस्तुम्। दोलयेव=दोलायन्त्रेणेव। दोलितुम्=हिल्लोलितुम्। उद्विग्नान्=भीतिग्रस्तचेतसः। कर्णधारान=नाविकान्। क्रन्दनकोलाहलम् =रोदनकलकलम्। कलितवन्तः=कृतवन्तः। भयभ्रान्तनयनस्य=भीत्याक्रान्तनेत्रस्य।

शुष्कया=शून्यया, वृथाप्रायया, चिन्तया=विचारधारया। उडुपे=नावि। कार्पासभाराः=तूलभाराः। प्लवप्रान्तस्थेन=नौसमीपवर्त्तिना। तुन्दिभः=

इति न पारयिष्यते बालमेनं सह रक्षितुम्, तदहं पृथुकमेनमात्मना सह गोपायिष्यामि" इति व्याहृत्य, स्वपृष्ठ-देश उत्तरीयेणातित्रस्तं रामसिंहं दृढं बद्ध्वा, कार्पास-भारमेकमानाय्य, तद्दत्त-हस्तावलम्बनस्तस्थौ। अहमपि च तथैव विहितवान्। द्वावपि चाऽऽवां परमेश्वरं स्मरन्तौ, परितो दोधूयमानस्योदन्वतो चाचल्यमानैर्लोल-लोलैः कल्लोलैश्चङ्क्रम्यमाणौ, कांहिचिद् लोकालोकमाकृष्य लोकालोकमिवोल्लिलङ्घयिषुमस्ताचल-चूडा-चुम्बिनं लोकलोचनमालोकमालोकम्, कदाचिद् बाष्प-बिन्दु-स्नात-श्मश्रुं पुरोहितम्, रोरुद्यमानमस्माभिः स्वयं रोदनोन्मुखैरपि कथमपि बोबुध्यमानं बालकञ्च,

---

तुन्दिलः। "तुन्दिलस्तुन्दिभस्तुन्दी"त्यमरः। **रक्षितुम्** =गोपायितुम्। **पृथुकम्**=बालम्। "पृथुकौ चिपिटार्भकावि"त्यमरः। **व्याहृत्य**=कथयित्वा। **उत्तरीयेण**=प्रावरणेन। **अतित्रस्तम्** =परं भीतम्। **तस्मिन्**=कार्पासभारे, दत्तम्, **हस्तावलम्बनम्**=कराश्रयो येन तथाभूतः। **दोधूयमानस्य**=अतितरां कम्पमानस्य। **उदन्वतः**=वारिनिधेः। **चाचल्यमानैः**=अत्यन्तं चलद्भिः। **लोललोलैः**=अतिचञ्चलैः। **कल्लोलैः**=लहरिभिः। **चङ्क्रम्यमाणौ**=अतितरामुच्छाल्यमानौ। **लोकस्य**=संसारस्य, **आलोकम्**=प्रकाशम्। **आकृष्य**=एकत्रीकृत्य। **लोकालोकम्** =चरमाचलान्तिकगिरिम्। **उल्लिलङ्घयिषुम्**=उल्लङ्घयितुमिच्छुम्। **अस्ताचलस्य**=चरमगिरेः, **चूडाचुम्बिनम्**=उन्नतभागाश्लेषिणम्। अस्तं यान्तमिति यावत्। **लोकलोचनम्** =संसारनेत्रम्। **आलोकमालोकम्**=दृष्ट्वा दृष्ट्वा। **बाष्पबिन्दुस्नातश्मश्रुम्**=अस्रक्लिन्नमुखकेशम्। **पुरोहितम्**=सर्वश्रेष्ठहितकारकम्, वैदिककार्यनिर्वाहकं ब्राह्मणम्। **रोरुद्यमानम्**=वारं वारं रुदन्तम्। **बोबुध्यमानम्**=जगन्नश्वरादिभिरनेकशः शिक्ष्यमाणम्। युगमिव-

दर्शं दर्शं युगमिव मन्वन्तरमिव कल्पमिव च कांश्चित् क्षणानजीगमाव ।

अथ बलवतैकेन तरङ्गाऽऽघातेन क्षणं विस्मृतात्मानौ परतश्च चक्षुषी उन्मील्य, आवां दृष्टवन्तौ, यन्न स पोतः न तत्स्थानम्, न वा ते तथाभूताः सहचराः, विक्षुब्धेनापि मया धैर्यमाधायादर्शि । यद् धृतकार्पासभारोऽहं कदाचित्तरङ्गोत्तमाङ्गे, कदाचिच्च तरङ्गतले तरामि, अपरे च तथैव कार्पासभारान्, अब्भ्रीः, क्षेपणीः, सेचनानि, आनायान्, कुवेणीश्च, धृत्वा सचीत्कारं तरन्ति । तेषामेव च मध्ये मम पुरोहितोऽपि क्रन्दमानं रामं पृष्ठे वहन्, वीचिभङ्गैराहन्यते-इति क्षणत एव च तरङ्गभङ्गैराहतो न वेद्मि, के कुतः प्रयाताः ? पञ्चषा एव च वयं तथाभूता अवशिष्टाः ।

एवमतिलोलं कोलमकूपारस्य तलं प्रवेश्य, प्रशान्तो झञ्झावातः । उदन्वानपि तरङ्गोच्छालन-वेगं कथमपि मन्दमकार्षीत् । तदा मया

कलिप्रभृतिमिव । **मन्वन्तरमिव**="मन्वन्तरन्तु दिव्यानां युगानामेकसप्ततिरि"त्यमरः । **कल्पम्**=एकसहस्रमहायुगात्मकम् । **अजीगमाव**=अक्षपयाव ।

तथाभूताः=मज्जमानाः । **आधाय**=गृहीत्वा । **अदर्शि**=दृष्टम् । **तरङ्गोत्तमाङ्गे**=लहरिशिरसि । **तरामि**=प्लवामि । **अब्भ्रीः**=काष्ठकुद्दालान् नौमलक्षालनार्थकान्, "अभ्रिः स्त्री काष्ठकुद्दाल"इत्यमरः । **क्षेपणीः**=नौदण्डान् । **सेचनानि**=नौकागतजलदूरीकरणभाण्डानि । **आनायान्**=मात्स्यजालानि । **कुवेणीः**=मत्स्याधानीः । **आहन्यते**=ताड्यते । **तथाभूताः**=तरङ्गभङ्गाहताः ।

कोलम्=प्लवम् । **अकूपारस्य**=क्षीरधेः । **तलम्**=अन्तरालम् । **झञ्झावात**=सवृष्टिको महावायुः । **तरङ्गोच्छालनवेगम्**=लहरिहिल्लोलनजवम् । **नावे-**

केवलं पुरोहित एव धृत-कार्पास-भारः, सम्मुखमालोकि। इतरे च, नावेदिषं वीचि-पात-घातैः कुतो नीता इति। इतः सूर्य्यस्यास्तमनसमयः, ततः समागच्छन्ती घोरा रजनी, तटस्य कथाऽपि नाऽऽसीत्, उपरि गगनम्, अधश्च सागरः, परितः प्रसर्पिणो वात-घाताः. परिकलितालिपिष्ठाकारा अपि भयानकास्तरङ्गभङ्गाः।

अथ शनैः शनैः समुद्रेणाहमेकतोऽपसारयितुमारब्धः, पुरोहितश्च परतः। उभयोरनिच्छतोरप्यन्तरालमावयोरवर्धिष्ट। क्षणानन्तरमेव च स मम चक्षुषोः पन्थानमतीतः। ततोऽहं कदाचिद् राममम्, कर्हिचित पुरोहितञ्च स्मरन, कर्हिचित् व्यतीतं निजजीवनं चिन्तयन. कदाचित् समाप्तमिदं दुःखान्तमायुरिति भावयन्, कर्हिचित् सक्रन्दं परमात्मानं ध्यायन्, प्रतिपदं पयःपूरेण प्लाव्यमान इव, तिमिङ्गिलैर्गीर्यमाण इव, ग्राहैर्ग्रस्यमान इव, सामुद्रिक-सत्त्वैरास्वाद्यमान इव, परीवाहैरूह्यमान इव, यमेन नियम्यमान

दिषम्=नाज्ञासिषम्। **समागच्छन्ती**=आयान्ती। **घोरा**=भीतिप्रदा। **वात-घाताः**=समीरताडनानि। **परिकलितालिपिष्ठाकाराः**=धारितलघुतमाकृतयः।

एकतः=एकस्यां दिशि। **अपसारयितुम्**=दवयितुम्। **अन्तरालम्**=व्यवधानम्। **अवर्धिष्ट**=ऐधिष्ट। **सः**=पुरोहितः सबालः। **व्यतीतम्**=भूतकालिकम्। **दुःखान्तम्**=क्लेशान्तम्। **सक्रन्दनम्**=सरोदनम्। **प्रतिपदम्**=पदं पदम्। **पयःपूरेण**=वारिप्रवाहेण। **तिमिङ्गिलैः**=महामत्स्यैः। **गीर्यमाण इव**=उदरीक्रियमाण इव। **ग्राहैः**=नक्रैः। **ग्रस्यमान इव**=कवलीक्रियमाण इव। **सामुद्रिकसत्त्वैः**=यादोभिः। **आस्वाद्यमान इव**=रस्यमान इव। **परीवाहैः**=आवर्त्तैः। **ऊह्यमान इव**=नीयमान इव। **यमेन**=वैवस्वतेन।

इव, कालेन काल्यमान इव, मृत्युना च मार्यमाण इव, तारकितं गगनम्, तरङ्गितं सागरम्, प्रेङ्खितं वीचिप्रचयम्, क्षार-क्षोद-क्षीयमाणं चाऽऽत्मानमवलोकयन्, न वेद्मि कैः कैः क्रन्दनैर्धैर्य्य-धारणैर्भगवत्स्मरणैश्च तमीमतिवाहयाम्बभूव ।

अथ शनैः समुद्रफेनेष्विव लीयमानेषु तारकानिकरेषु, उडुप इव प्रतीच्यां निमग्न उडुपे, सरस्वतस्तरङ्गोच्छालितांस्तोय-कणान् माणिक्यानिव विदधत् प्राचीं कुङ्कुमबलाहकनिकराक्रा-न्तामिवाकार्षीद्भगवान् भास्वान्। अस्मिन् समये वीचिक्षोभोऽति-

नियम्यमान इव=वध्यमान इव। कालेन=समयेन। मृत्योरग्रेऽभिधानादेवमे-वार्थः। काल्यमान इव=चर्व्यमाण इव। मृत्युना=अन्तकेन। मार्यमाण इव=विध्वस्तजीवनक्रियमाण इव। तारकितम्=उडुगणोपेतम्। गगनम्=नभः। तरङ्गितम्=लहरिसमेतम्। प्रेङ्खितम्=उल्लोलितम्। वीचिप्रचयम्=लहरिव्रजम्। क्षारक्षोदक्षीयमाणम्=समुद्रडिण्डीरकृशीभवन्तम्। तमीम्=रात्रिम्। अतिवाहयाम्बभूव=अतिगमयामास। न वेद्मीत्यनेन चित्तविक्षेपा-भिधानात्पारोक्ष्यमुपपादनीयम् "बहु जगद पुरस्तात्तस्य मत्ताकिलाहमि"त्यादाविवे-ति वेदितव्यम्।

समुद्रफेनेषु=वारिधिडिण्डीरेषु। तारकानिकरेषु=भगणेषु। उडुपे=नावि। इवेनोत्प्रेक्षा। प्रतीच्याम्=पश्चिमायाम्। निमग्ने=बुडिते। उडुपे=तारकाधिनाथे। सरस्वतः=अर्णवस्य। "सरस्वान् सागरोऽर्णव" इत्यमरः। तरङ्गोच्छालितान्=लहरिसञ्चालितान्। तोयकणान्=अम्भोबिन्दून्। मा-णिक्यानिव=मौक्तिकानीव। कुङ्कुमबलाहकनिकराक्रान्तामिव=केसरमे-घव्रातव्याप्तामिव। भास्वान्=दिनेशः। वीचिक्षोभः=लहरिसञ्चलनम्।

मन्द आसीदित्यपारयमहं सुदूरमीक्षितुम्। उद्ग्रीवेणापि विस्फारित-चक्षुषाऽपि नाऽऽलोकि पुरोहितो वा भूभागो वा।

समुद्रेण तूर्मिघातैः प्रागेव प्रेर्यमाणश्चिरानन्तरमद्राक्षं गुणवृक्ष-कमिव कस्यापि पोतस्य। क्षणेनैव वायुना समुद्धूयमानाः पटाः, परतश्च वेगेन मदध्यासितामेव दिशं समुपसर्पन् प्लव एको दृष्टः। तन्नियामकाश्च कथमप्युद्धृतकरं मामवलोक्येव वायुविधूतान् पटान् विचाल्य, मामेव लक्ष्यीकृत्य समायाताः, कथं कथमपि च मामुत्थाप्य स्वपोते समुदस्थापयन्। अहन्तु तत् स्थानं प्राप्यैव निश्वस्य पतितश्चिरं मूर्च्छामापम्। ते तु तैलसम्मर्दनादिभिर्मां सुखयन्तः, सुरत-नगर-प्रान्त आगत्य मामुद्रोध्य दुग्धादि पाय-यित्वा तटे व्यसृजन्।

अहन्तु क्षारोद-क्षार-नीलीकृत-वर्णः सुरतनगरे परिभ्रमन्, रामचन्द्र-मन्दिरमेकमवाप्य तत्रैव विरक्त-भिक्षुकाणां मध्ये निव-

---

अपारयम्=शक्तोऽभूवम्। **ईक्षितुम्**=द्रष्टुम्। **उद्ग्रीवेणापि**=उत्कन्धरेणापि। **भूभागः**=महीतलम्।

ऊर्मिघातैः=तरङ्गताडनैः। **प्रेर्यमाणः**=प्रोह्यमानः। **गुणवृक्षकमिव**=कूपकमिव। **समुद्धूयमानाः**=हिल्लोल्यमानाः। **मदध्यासिताम्**=मत्सेवितम्। **प्लवः**=जलयानम्। **तन्नियामकाः**=तत्सञ्चालकाः। **उद्धृतकरम्**=उत्थापित-हस्तम्। **वायुविधूतान्**=वातचालितान्। **समुदस्थापयन्**=सम्यगूर्ध्वमपात-यन्। **आपम्**=लेभे। **व्यसृजन्**=त्यक्तवन्तः।

क्षारोदस्य=क्षारवारिधेः, **क्षारेण**=लवणाम्भसा, **नीलीकृतवर्णः**=श्या-मीकृताकृतिः। **विरक्तानाम्**=विरागिणाम्। **भिक्षुकाणाम्**=भिक्षारतानाम्,

सन् मन्दिराध्यक्षेण चिकित्सित उल्लाघोऽभूवम्। एकदा विहितनित्यनियमं तं स्वपुत्रपुरोहितयोः कुशलविषये समपृच्छम्। स च चिरं ध्यात्वाऽब्रूत, यत् मा स्म प्रसिष्ठा अमङ्गलचिन्तया, कापि समुद्रतटे संलग्नौ तव पुत्रपुरोहितौ त्वदपेक्षयाऽधिकं तौ कुशलिनौ स्तः।

अथ "भगवन्! कथं तत्साक्षात्कारो भवेद्?"—इति पृष्टश्च मां मन्त्रमेकमुपादिक्षत्, उक्तवांश्च यद् "आसन्ने तव तनयस्योद्वाहसमये तेन तव सम्मेलनं भविष्यति, तावदेनं मन्त्रराजं जप।" अहं तु तत्र वारं वारं लुण्ठकोपद्रवमवलोक्य, तुरुष्क-मौद्गल-गोरण्ड-पाठीनादीनां महासम्मर्दं च सम्भाव्य, इतोऽस्मिन् देशे समागतोऽस्मि। न जाने कदा जीवन्तं रामं द्रक्ष्यामि—इति।

गौरः—विचित्रा दैवघटना, विचित्र एव चायं भवतो वृत्तान्तः। अवश्यमेव कञ्चित् समयमतिवाह्य मन्त्रबलेन द्रक्ष्यत्यार्यः स्वपुत्रस्यापि मुखम्। अपि पृच्छेयं कथमिव महाराष्ट्रराजेन समालापो जातः?—इति।

मस्करिणां वा। **चिकित्सितः**=औषधेनोपचरितः। **उल्लाघः**=रोगनिर्मुक्तः। **विहितनित्यनियमम्**=कृतनैत्यिककृत्यम्। **तम्**=मन्दिराध्यक्षम्। **मा स्म प्रसिष्ठाः**=ग्रस्तो मा भूः। **अमङ्गलचिन्तया**=अशुभचिन्तनेन। **कुशलिनौ**=सानन्दौ।

उपादिक्षत्=उपदिष्टवान्। **आसन्ने**=समीपस्थे। **तुरुष्काः**="तुर्क" इति मौद्गलाः "मोगल" इति, गोरण्डाः "गोरे" इति, पाठीनाः "पठान" इति च ख्याता लोके। **महासम्मर्दम्**=अतिसंघर्षम्।

विचित्रा=साश्चर्या। **कथमिव**=केन प्रकारेण। **समालापः**=वार्त्ता।

ब्रह्मचारिगुरुः—भीमायास्तटे स्नात्वा परावर्तमानस्य ममैकदा द्वाभ्यां म्लेच्छलुण्ठकाभ्यां सह मेलनमासीत्। तयोरेकेनोक्तम्—"त्यज सर्वं वस्त्रादिकम्, अन्यथा व्यापाद्यसे"—इति। तत्क्षणमेव मयैकया प्रबलचपेटिकया स तथाऽभिहतो यत्पीतं रक्तं श्याममिव च दिक्चक्रमालोकयन्, निरुद्धनिश्वासो भ्रान्त्वा भूमिमालिङ्गितवान्। द्वितीयश्च निस्त्रिंशं कोषादाकर्षन्, मामभिचलितः। तस्य हस्ताच्चार्द्धकृष्टमेव कृपाणमहमाच्छिद्य, त्सरुणा तथा मस्तके हतवान्, यथा सोऽपि मूर्छितः स्वसहचरस्य चरणयोः पतितः। तत्खड्गं गृहीत्वा चाहं कुशलेन न्यवर्तिषि।

घटनामेतां दूरतोऽश्वं चालयन् महाराष्ट्रराजोऽपश्यत्। स च मार्ग एव मत्समीपमागत्य, ससाधुवादं मम जातिमभिप्रेतञ्च पृष्ट्वा, पञ्चषान् भृत्यान् मम सेवायां नियोज्य, अस्मिंस्तडागतटे पर्णकुटीरे मामस्थापयत्। अहञ्च सर्वथा तस्य जयमीहमानो यथाशक्यं यतमानश्चात्र तिष्ठामि, मन्त्रञ्च साधयामि। महाराष्ट्र-

---

परावर्त्तमानस्य=पर्यागच्छतः। **म्लेच्छलुण्ठकाभ्याम्**=यवनचौराभ्याम्। **व्यापाद्यसे**=हन्यसे। **प्रबलया**=असहनीयया, **चपेटिकया**=तलेन। **पीतं रक्तं श्यामभिव च दिक्चक्रम्**=हरिद्रणम्। आसन्नमरणस्वभाववर्णनम्। **निरुद्धनिश्वासः**=अचलत्प्राणवायुः। **आलिङ्गितवान्**=आशिश्लिषे। **निस्त्रिंशम्**=खड्गम्। **कोषात्**=असिधान्याः। **अर्धकृष्टम्**=कोषादर्धनिष्कासितम्। **कृपाणम्**=असिम्। **आच्छिद्य**=स्वायत्तीकृत्य। **त्सरुणा**=खड्गमुष्टिना **न्यवर्त्तिषि**=निवृत्तोऽभूवम्।

जातिम्=सामान्यम्, मनुष्यत्वावान्तरभेदम्। **अभिप्रेतम्**=इष्टम्।

राजोऽपि मम निखिलं वृत्तान्तं न वेत्ति ।

गौर०—[मनसि बहुशश्चिन्तयन्] आर्य ! क्षम्यतां श्रीमतो नाममन्त्रश्रवणेन कर्णौ पिपावयिषत्येष जनः ।

ब्रह्मचारिगुरुः—किमिव नाम्ना ? यदा मम परितो गच्छतां गजानां घण्टानादैर्दिगन्तोऽपूर्यतः तदा तु स्वप्नेष्वपि शत्रूणां कर्णकुहरं निविशमानं ममापरमेव किमपि नामाऽऽसीत् । अधुना तु ब्रह्मचारिगुरुरित्येव वदन्ति जनाः ।

गौर०-क्षम्यताम्, परमं मम कुतूहलं तदेव श्रोतुं नाम श्रीमतः ।

ब्रह्मचारिगुरुः-[चिरं तूष्णीं स्थित्वा] वत्स ! तदानीं मां वीरेन्द्रसिंहः-इत्यवदन् जनाः ।

गौर०-[प्रणमन्] आर्य ! तत्किं स्मर्यते यन्मम पित्रा कश्चन सम्बन्धोऽपि प्रतिज्ञातः ?-इति ।

ब्रह्मचारिगुरुः-वत्स ! सर्वं स्मरामि, किन्तु तत्कथोपकथनैर्दुःखमेव वर्द्धतेतमामिति-अलमालप्यामुष्मिन् विषये ।

गौर०-आर्य ! अलं तद्विषये शोकावहनेन । न भवन्ति

ईहमानः=समभिलषमाणः । यतमानः=यत्नमादधानः ।

नामैव=अभिधानमेव **मन्त्रम्**=रहस्यपूतवर्णावली, **तदश्रवणेन**=तच्छ्रोत्रगोचरीकरणेन । **पिपावयिषति**=पावयितुमिच्छति ।

कर्णकुहरम्=श्रोत्रच्छिद्रम् । शष्कुलीमिति यावत् ।

तत्कथोपकथनैः=तदुच्चारणप्रत्युच्चारणैः । **वर्द्धतेतमाम्**=अतितरामेधते ।

भवादृशैः सनियममनुष्ठितानि मन्त्रसाधनानि विफलानि। रामसिंहं वयमपि विशिष्य मार्गयिष्यामः।

एवमालपतोरेव तयोरकस्मादुपावर्त्तत हयारूढो रघुवीरसिंहः। झटिति रामसिंहमयी दृष्टिरपतत्तदुपरि सर्वेषाम्। यदि जीवेद् वयसा, रूपेण, ईदृश एव सम्बोभूयेत रामसिंहः-इति विचारयति वीरेन्द्रसिंहे, किमिति पृच्छति च गौरे, "महाराजः स्मरत्यत्र भवन्तम्"-इति मन्दं गौरसिंहमभ्यधाद् रघुवीरसिंहः। सोऽपि चोमिति व्याहृत्य वाजिनमारुह्य तेन सह सपदि प्रतस्थे।

रघुवीरस्तु कियन्तमद्धानमतीत्य, विकचसारसं सारसकारण्डवादि-कदम्ब-कूजितं सर एकमवलोक्य, "अहं चिर-तृष्णा-गलितोत्साहं वाहं पानीयं पाययित्वा, अनुपदमेवाऽऽयामि, तावद्रत्वा विलोकनीयः श्रीमता महाराजः"-इति कथयित्वा गौरं प्रस्थाप्य, स्वयं वाहवल्गां तत एवाऽऽचकर्ष। तत्र च सैन्धवस्य मुखात् फेन-क्षालित-खलीनं रश्मिमपसार्य्य, तत्पृष्ठमार्द्रयन्, जलं पाय-

---

सनियमम् =सविधि। अनुष्ठितानि=साधितानि। **मार्गयिष्यामः**= अन्वेषयिष्यामः।

उपावर्त्तत=परावृत्तः। **रामसिंहमयी**=रामसिंहभावनाभरिता। **तेन**= रघुवीरसिंहेन।

विकचसारसम् =प्रफुल्लसरोजम्। **सारसः**=प्रलम्बचञ्चुचरणः श्वेतपक्षी, **काण्डवः**=पक्षिविशेषः, एवमादीनां **कदम्बेन**=समूहेन, **कूजितम्** =नादितम्। **चिरतृष्णागलितोत्साहम्** =दीर्घकालपिपासाविधूतहर्षम्। **वाहम्** =घोटकम्। **अनुपदम्** =पदः पश्चात्। त्वरितमिति यावत्। **सैन्धवस्य**=घोटकस्य। फेन-

यन्, सरस्तटशाद्वले पर्य्यटयंश्च, परिश्रममपनेतुमारब्धवान्।

अस्य तु सर्वक्षणे सौवर्णी-मूर्त्यैव चित्रितं चित्रफलकमिव चित्तमित्यस्मिन्नेकान्ते पुनरुदभूवंस्तद्विषयिण एव मानसाः कथा-प्रसाराः—

यन् "किमिव करोमि, अल्पं मे महत्त्वम्, क्षुद्रोऽधिकारः, असिधारावलेहनमिव कार्यम्, प्रत्यहं वर्द्धमान उपद्रवो महाराष्ट्र-देशे, स्वप्रेम्णा क्रीतवती मे हृदयं सौवर्णी, सा महतां कुलरत्नम्, महाधिकारस्य श्रीमतो गौरसिंहस्य भगिनी, कस्यापि कृतपुण्यस्य जनस्य जनुः सफलयितुमवतीर्णा, तथाऽपि सा मदर्थमेव रोदिति, दूयते, खिद्यते, क्लिश्यति, रोमाञ्चति, सीदति, म्विद्यति, ताम्यति च।

क्षालित-खलीनम्=डिण्डीरधौतकविकम्। रश्मिम्=प्रग्रहम्। अपसार्य्य=दूरयित्वा। सरस्तटशाद्वले=जलाधारतटघासमयस्थाने। पर्याटयन्=भ्रामयन्। अपनेतुम्=दूरीकर्त्तुम्।

सौवर्ण्याः, मूर्त्या=प्रतिबिम्बेन। चित्रफलकम्=चित्रपट्टम्। चित्तम्=मानसम्। एकान्ते=रहसि। तद्विषयिणः=सौवर्णीसम्बन्धिनः। कथा-प्रसाराः=कथनप्रकाराः।

क्षुद्रः=हीनः। अधिकारः=स्वाम्यम्। स्वप्रेम्णा=निजस्नेहेन। कुले=अन्वये, रत्नम्=श्रेष्ठा। कृतपुण्यस्य=विहितानेकपवित्रकृत्यस्य। जनुः=जन्म। सफलयितुम्=सफलीकर्त्तुम्। स्त्रियो हि जन्मिनां जन्मनां साफल्यस्य वैफल्यस्य च कारणताङ्गताः। दूयते-खिद्यते-प्रभृतीनां प्रायः समानार्थकानां खेदाधिक्यप्रदर्शनायाभिधानं वक्तुश्च विरहदूयमानमानसत्वादिति न पौनरुक्त्यानुचिन्तनैर्मनीषा क्षपयितव्या।

न जाने केनेवान्तरात्मना प्रेरितोऽहमपि तयैव पाणिपीडां प्रतिज्ञातवान्। अहह! कथमेतत् सम्भवेत्? मनोरथोऽयं चिरेणापि साधयितुं दुःशकः, मन्मथस्तु प्रतिक्षणमेव मनो मथ्नाति।

अहह! तस्यास्तानि तानि भाषितानि, तानि तानीङ्गितानि, तानि तानि भ्रूविभ्रमणानि, तानि तानि प्रेक्षितानि तानि तानि हसितानि तानि तानि च रुदितानि शल्यानीव निमग्नानि मम हृदये, स्वप्नेष्वपि तामेव सुदतीं मदर्थं रुदतीमवलोकयामि, "प्रिये! प्रिये! मा स्म मृणाल-कोमलान्यङ्गानि चिन्ता-सन्ताप-ज्वाला-जालावलीढानि कार्षीः"-इति सक्षोभं विलपंश्च, भग्ननिद्रः समुत्थाय परितस्तामेव कटाक्षपातैर्मां निघ्नतीमिवान्वेषयामि।

अहह!! कथं तां प्राप्नुयाम्? कथं तां परिणयेयम्? कथं वा तदधर-सीधु-समास्वादनेन सुधा-सुखमधरीकुर्य्याम्?। हन्त! कष्टं जीवनं मादृशानाम्, किमिव नाहं युद्धभूमिपु विनाश्ये?

पाणिपीडाम्=विवाहम्। **मन्मथः**=कामः। **मथ्नाति**=मृद्नाति।

इङ्गितानि=चेष्टितानि। **भ्रूविभ्रमणानि**=भ्रूचालनानि। **प्रेक्षितानि**=अवलोकनानि। **शल्यानीव**=कण्टकानीव। **निमग्नानि**=खचितानि। **सुदतीम्**=शोभनदन्तवतीम्। **चिन्तासन्तापज्वालाजालावलीढानि**=चिन्तानुतापकीलालसमूहालिङ्गितानि। **निघ्नतीम्**=मारयन्तीम्। **अन्वेषयामि**=द्रष्टुमभिलषामि।

परिणयेयम्=विवाहयेयम्। **तदधरसीधुसमास्वादनेन**=तदोष्ठमधुरसग्रहणेन। **सुधासुखम्**=पीयूषपानानन्दम्। **अधरीकुर्याम्**=निम्नं विदध्याम्। **विनाश्ये**=मारितो भवेयम।

हा दैव ! किं प्रिया-वियोग-दुःखेनैव हृदयहतकं शोषयितुं जीवयसि ?।"

एवं चिन्ता-सन्तान-वितान-परवशः सोऽश्वमारुह्य चलित-श्चित्त-परवशतया सिंहदुर्गं यामि-इति मनसि निधाय, प्रस्थितोऽपि तोरणदुर्गं प्राप्तः। तत्र च चकितः काम-परवशतां धैर्य-विरहं च निन्दन्, मारुति-मन्दिर-पूर्व-वाटिकां प्रविष्टः, एकस्मिन् कुञ्ज उपविश्य निःशब्दं रुदतीं च तामेव प्राणप्रियां ददर्श। सा तु दृष्ट्वैनमुत्थाय, "कितव ! सुसमये समायातोऽसि, तिष्ठ, यावदहं त्वां पश्यन्त्येव शाखि-शाखायात्मानमुद्बध्य, प्राणांस्त्यजामि" इति रोषारुणाभ्यां नयनाभ्यामनिमिषमीक्षमाणा व्याहृतवती। रघुस्तु-"प्रिये! कथय, किमिव संवृत्तम् ? केनावहेलिताऽसि ? केन क्ष्वेलिताऽसि ? तोरण-दुर्ग-नेदीयस्यस्मिन् महाराष्ट्रराज-भट-सङ्घट्ट-रक्षित उद्याने कस्य वा शक्तिस्त्वां धर्षयितुम्"-इति न्यवीविदत्।

सा तु पुनराह-वीर ! रक्षक एवात्र भक्षकः। योऽयं क्रूरसिंहाभिधोऽश्वारोहाणां पञ्चशत्या अध्यक्षोऽत्र तोरणदुर्ग-प्रान्त-रक्ष-

---

चिन्ता-सन्तान-वितान-परवशः=विचार-समूह-विवर्धन-रतः। काम-परवशताम् =कामाधीनताम्। धैर्यविरहम् =धीरताराहित्यम्। कुञ्जे= लतादिपिहितोदरे। निःशब्दम् =ध्वनिशून्यम्, अस्फुटशब्दमिति यावत्। कितव !=धूर्त !। शाखिशाखायाम् =वृक्षावयवे। व्याहृतवती=जगदे। अवहेलिता = तिरस्कृता। क्ष्वेलिता = हास्यविषयीकृता। तोरणदुर्गस्य नेदीयसि=अन्तिकस्थे। महाराष्ट्रराजस्य, भटानाम् =वीराणाम्, संघट्टेन= सम्मर्देन, रक्षिते=पालिते। धर्षयितुम् =दूषयितुम्। तोरणदुर्गप्रान्तरक्ष-

कत्वे नियुक्तः, स स्वयमेव केनापि व्याजेनाऽऽगत्य मामवलोक्य हसति, भ्रुवौ नर्त्तयति, करकम्पनैराह्वयति, मन्दं मन्दं किमप्यभिदधाति च। अद्य नूद्याने पुष्पाण्यवचिन्वतीं, मामकस्मादुपगत्य, चिरं-"प्रिये! प्राणेश्वरि! अनुगृहाण, पाणिं मे गृहाणेत्यवादीत्"। मया बहुशो धिक्कृतश्च-"जाने, त्वं रघुवीरेऽनुरक्तासि, तत् सपदि तं मदसि-विलीढमालोक्य मां वरिष्यसि"-इत्युक्त्वा च्योतद्रक्ताभ्यामिव नेत्राभ्यां विदारयन् मम हृदयम्, निरगात्"।

तदाकर्ण्य दुःखितो रघुवीरश्चिरं तां सान्त्वयित्वा, क्रूरे कुपितः सिंहदुर्ग्गं प्रास्थित। अकस्माच्च तस्मिन्नेव दिने पुण्यनगरात् पूर्वस्यां सेनास्थाने स्व-सादि-समूहेन सह स्थातुं क्रूरसिंहेन महाराजस्याऽऽदेशः प्राप्तः-इति स तथाऽकरोत्। अत्र चान्यः ससादिगणो रक्षक आगतः-इति किञ्चिच्छान्तः सौवर्ण्या आधिः।

एवं विलक्षणा संवृत्ता दैवघटना; यदेकतः पुत्र-वियोग-दुःखितः पुनस्तत्प्राप्तये साधन-विशेषमनुतिष्ठन्, वीरेन्द्रोऽवसी-

---

कत्वे=तोरणदुर्ग्गयुतदेशखण्डशासकत्वे। व्याजेन=छद्मना। करकम्पनैः=हस्ताह्वानैः। किमपि=अश्रोतव्यमश्रुतं च। अवचिन्वतीम्=एकत्रयन्तीम्। उपगत्य=समीपमागत्य। अनुगृहाण=कृपां कुरु। धिक्कृतः=धिक्शब्दगोचरीकृतः। मदसिना विलीढम्=मृतम्। आलोक्य=वीक्ष्य। वरिष्यसि=स्वीकरिष्यसि। च्योतद्रक्ताभ्यामिव=प्रवहल्लोहिताभ्यामिव। निरगात्=निष्क्रान्तः।

सान्त्वयित्वा=धीरयित्वा। स्वसादिसमूहेन=निजाश्वारोहिव्रातेन। आधिः=मानसिकी व्यथा।

दति। अन्यतः सौवर्णी-विवाह-चिन्ता-ग्रस्तौ रामसिंहालुलोकयिषा-लोलुप-लोल-लोचनौ गौरश्यामौ विषीदतः, परतो रघुवीराय लज्जया विरहय्य वितीर्णेव ; उत्कण्ठया समाकृष्य समर्पितेव, इन्द्रिय-गणेन कुसुमेषु-घातैर्वशंवदां विधाय विनिवेदितेव, मदनेन किङ्करीकृत्योपहृतेव, कामेन दुर्मद-मदन-मदैर्मामद्यमानाऽप्यधिकं सम्मदय्य प्रदत्तेव, अनुरागेण सकलगुण-गणान् विगणय्य विक्रीतेव, हृदयेन रघुवीरं चिन्तयन्ती कोशला, दिवसान् गणयति। ततो रसनारो च, महाराष्ट्रराजस्य मधुरालापैरिव क्रीता, मन्मथोन्मथितेन मनसेव विक्रीता।—

"कथमेतेन परिणीता भवेयम्? कथमेनेन सह विहरेयम्? कथमेतस्य चिरविहार-विसृमरान् स्वेद-कणानात्मनः शाटी-प्रान्तेन परिहरेयम्? कथमेतस्य "प्रिये! पूर्णदृशाऽवलोक्यानुगृह्णीष्व माम्"-इति चाटु-वचन रचनानि समाकर्णयेयम्? कथ-

साधनविशेषम्=मन्त्रानुष्ठानम्। अवसीदति=क्लिश्नाति। रामसिंहस्य, आलुलोकयिषायाम्=द्रष्टुमिच्छायाम्, लोलुपे=लुब्धे, लोले=चपले, लोचने=नयने, यस्य तौ। विषीदनः=विषादं कुरुतः। लज्जया=त्रपया। विरहय्य=विरहितीकृत्य। वितीर्णा=दत्ता। उत्कण्ठया=आध्यानेन। कुसुमेषुघातैः=पुष्पेषुताडनैः। विनिवेदिता=नम्रतया प्रदत्ता। दुर्मदस्य=दुर्दमनीयस्य, मदनस्य मदैः। मामद्यमाना=अतितरां माद्यन्ती। सम्मदय्य=मदविह्वलीकृत्य। मन्मथोन्मथितेन=कामोन्मत्तेन।

परिणीता=विवाहिता। विहरेयम्=विहारं कुर्याम्। चिरविहारविसृमरान्=दीर्घक्रीडाप्रसृतान्। स्वेदकणान्=घर्मबिन्दून्। शाटीप्रान्तेन=धौताञ्चलेन। परिहरेयम्=दूरयेयम्। चाटुवचनानां रचनानि। समाकर्ण-

मिव चास्मै स्वमनोरथं सूचयेयम् ? एष वैदिक-धर्मानुष्ठानायैव दत्त-हस्तावलम्बनः, तत् कथमेष म्लेच्छराज-तनयां मामर्द्धाङ्गिनीं विधित्सिष्यति ? अहह !! हताऽहम्, किमिति म्लेच्छ-गर्भात् सम्भूताऽस्मि ? चक्रवर्ति-नन्दिनीति व्यर्थो मेऽभिमानः। वरं राजपत्नीः न तु राजकन्या। न जाने कस्मै दित्सते मां तातः, अवश्यमनुचरायैवानुगतायैव च कस्मैचन दास्यति, न तु स्वतन्त्रो महाराष्ट्र-राज-सदृशो महाराजः कश्चन तस्य प्रेमपात्रम्। तत्किं लज्जया विरज्य, धैर्यमवधीर्य, गुणान् विगणय्य, वाचालतामूरीकृत्य, धृष्टतां शिरसि संस्थाप्य, अभिमानमवमान्य, चापलं चावलम्ब्य, स्वयमेव किमप्यमुष्मिन् विषये प्रकटयामि। परं न वेद्मि प्रकारमीदृशे प्रेमाचारे स्वाभिलाष-प्रकाशनस्य। एतद्विषय एतस्य सत्कारोऽपि तिरस्कारः, आदरोऽपि न्यक्कारः, स्तवोऽपि परिभवः, आलापोऽपि विलापः, सेवनमपि परिदेवनम्, भाषणमपि च

येयम्=शृणुयाम्। सूचयेयम्=बोधयेयम्। दत्तहस्तावलम्बनः=कृतकराश्रयः। अर्द्धाङ्गिनीम्=अर्धशरीररूपिणीम्। स्त्रियमिति यावत्। म्लेच्छगर्भात्=यवन्युदरात्। जातिविवक्षया पुंस्त्वम्। 'कुकुट्यादीनामण्डादिष्वि"ति वार्त्तिकप्रत्याख्याने भाष्ये समाश्रितमिदमिति सन्तोष्टव्यम्। चक्रवर्त्तिनः=सम्राजः, नन्दिनी=तनया। दित्सते=दातुमिच्छति। अनुगताय=वचःपालकाय। विरज्य=विरागं कृत्वा। अवधीर्य=तिरस्कृत्य। अवमान्य=अपमानितं कृत्वा। चापलम्=चाञ्चल्यम्। अवलम्ब्य=आश्रित्य। प्रेमाचारे=स्नेहव्यवहारे। स्वाभिलाषप्रकाशनस्य=स्वमनीषितप्रकटीकरणस्य। परिभवः=अनादरः, "परिभवः परीभावस्तिरस्क्रिये"त्यमरः। विलापः=रोदनम्। परिदेवनम्=

भषणम्, हा ! हताऽस्मि ! दुराचारेण मारेण !"—

इति जल्पन्ती केनचन धवलिम्नेवाऽऽलिङ्ग्यमाना, पाण्डुरतयेव म्लाप्यमाना, रोमपञ्जरणेव निगृह्यमाणा, स्वेदबिन्दुसन्दोहैरिवाभिषिच्यमाना, प्रेम-निगड-बद्धा, अनुराग-कारागार-संयन्त्रिता, कदाचिदुच्छ्वसन्ती, कदाचिदश्रूणि मुञ्चन्ती, कदाचिच्छून्यं जगदाकलयन्ती, कदाचित् तदभिनिविष्टचेतना सम्मुख-स्थितमिव च महाराष्ट्रराजं पश्यन्ती खिद्यते। इतः क्रूरः क्रूरतया रघौ क्रूरं कर्म चिकीर्षुः, कोशला-कामनया क्लिश्यति। ततो रघुवीरोऽपि क्रूर-क्रूरतामाकलय्य; ग्लायति। इति बहूनां हृदये चिन्तासन्तान-विताना ज्वालामुखपर्वता इव जाज्वल्यन्ते।

× × × ×

इतश्च माया-भवने सादरं संस्थापितोऽपि मायाजिह्मो नतरां

कृतस्य कर्मणोऽनुचिततत्वबुद्ध्याऽनुतापः। **भषणम्**=श्वरवः। **दुराचारेण**=कुव्यवहारेण। **मारेण**=मन्मथेन।

धवलिम्ना=श्वैत्येन। **आलिङ्ग्यमाना**=आश्लिष्यमाणा। **पाण्डुरतया**=ईषत्पीतवर्णतया। **रोमाण्येव पञ्जरम्**=शुकादिबन्धनस्थानं तेन। **अभिषिच्यमाना**=म्लाप्यमाना। **प्रेमैव निगडम्**=लोहदाम, तेन, बद्धा। **अनुराग एव कारागारः**=चारकम्, तस्मिन्, **संयन्त्रिता**=नियमिता। **आकलयन्ती**=अवधारयन्ती। **तदभिनिविष्टचेतना**=शिवमयीभूतचैतन्या। **क्रूरः**=तन्नामा। **रघौ**=रघुवीरे। **क्रूरम्**=अमानुषम्। **क्रूरक्रूरताम्**=क्रूरसिंहक्रौर्यम्। **ज्वालामुखपर्वता इव**=बह्वग्युद्गिरका गिरय इव। **जाज्वल्यन्ते**=अतितरां ज्वलन्ति।

× × × ×

केनापि सह सम्भाषते, नतमां वा कमपि पूर्णदृशाऽवलोकयति। एवं चिर-चिन्ता-पूर-पूरितोऽद्य हन्ये, श्वो विनाश्ये,-इति स्वस्मिन् नृशंसं कर्माऽऽशङ्कमान एवैकदा कैश्चित्सहचरैः सह समायान्तं महाराष्ट्रराजमद्राक्षीत्। यावदेष तत्प्रभाधर्षित उत्थाय, किमपि विमृशति स्म; तावत्स स्वयमेव सादरमुवाच यद्-"भद्रं भवतु राजकुमारस्य। न मां पूर्वमपश्यद् भवान्;-इति सूचयामि, मां जनाः शिवराज-इति कथयन्ति। कुमारस्यापि पित्रा सह मम बहूनि युद्धानि जातानि, भवन्ति च, श्रूयते श्रीमानपि मया योद्धुमेव प्रेषित इति, परं स्वच्छतया वा, साधुतया वा, मुग्धतया वा, अल्पवयस्कतया वा, संग्राममननुष्ठायैव मम गृहमायातः-इति स्वागतम्। कच्चिद् यथासमयं यथोचिताचारैरुपतिष्ठन्ते दासेराः? कच्चिन् प्रसीदति वा भवान्? उपविश्यतामुपविश्यताम्"-इत्युक्त्वा, तमुपवेश्य स्वयमप्युपविष्टः। एवं साम्रेडमाप्रच्छ्यमानः कुमारोऽपि ह्रीपरवशः कथमपि सम्मुखं मुखं विधायोक्तवान्-"राजन्! अहं शत्रुपुत्रोऽस्मि,

---

सम्भाषते=वक्ति। पूर्णदृशा=समस्तचक्षुषा, द्रष्टव्यरूपेणेति यावत्। चिरचिन्तापूरपूरितः=दीर्घानुचिन्तनप्रवाहभरितः। नृशंसम्=क्रूरम्। अद्राक्षीत्=अवालोकयत्। तस्य प्रभया=कान्त्या, धर्षितः। विमृशति स्म=व्यचारयत्। भद्रम्=कल्याणम्। स्वच्छतया=निर्मलतया। साधुतया=परोपकृतिपटुतया। मुग्धतया=विवेकशून्यतया। अल्पवयस्कतया=न्यूनावस्थाकतया। अननुष्ठाय=अविधाय। स्वागतम्=शुभागमनम्। दासेराः=भृत्याः। प्रसीदति=प्रसन्नति। साम्रेडम्=अनेकवारम्। ह्रीपरवशः=त्रपाधीनः।

योद्धुं चाऽऽयातोऽस्मि–इति निगृहीतश्चेद्धन्तव्यः, दण्डयितव्यश्च, न तु सत्कारैस्तिरस्करणीयः, स्वागत–वाणी–बाणैश्च मर्मसु वेधनीयः" ।

ततस्तावेवमालापिष्टाम् ।

शिव०–कुमार ! केयं कथा ? राज्ञां पारस्परिकाः सन्धिविरोधरूपा भवन्त्येव सम्बन्धा इति दैवान्मे विरोधस्तव पित्रा, त्वं तु यथा दिल्लीनायकस्य लालनीयस्तथा ममापि–इति दर्शं दर्शं तव यौवनोद्भेदसुभगान्यङ्गानि प्रीतिरेव मे वर्द्धतेतराम् ।

कुमा०–एवं चेत् कथं निगृहीतोऽस्मि ? स्वतन्त्रः कथं न क्रियें?

शिव०–कोऽत्र निग्रहः? केवलं मम साक्षात्कारायात्र वासितो भवान् । अधुना तु यथा रोचेत, तथा विधातुं शक्यते । अस्मिन देशे न कदाऽप्यायातो भवान–इति कुतूहलं चेदवलोक्यन्तां विविधानि दुर्गाणां पर्वतानां वनानाञ्च रामणीयकानि । निविवर्त्तिषते चेत् सुखेन गम्यतां स्वदेशे, निर्विघ्नमास्माकीनाः सादिनः प्रतियाप-

---

सम्मुखम्=पुरः । निगृहीतः=चारके कृतः । दण्डयितव्यः=दण्डविषयीकर्त्तव्यः । सत्कारैः=आदरैः । स्वागतवाण्य एव बाणाः=इषवः, तैः । मर्मसु=कोमलेषु रक्षणीयेषु च ।

आलापिष्टाम्=वार्त्तामकुरुताम् ।

पारस्परिकाः=आन्योन्याः । दैवात्=अदृष्टात् । लालनीयः=सुखेन पालनीयः । यौवनोद्भेदसुभगानि=तारुण्योद्भूतिसुन्दराणि ।

निग्रहः=बन्धनम् । साक्षात्काराय=अवलोकनाय । अवलोक्यन्ताम्=दृश्यन्ताम् । रामणीयकानि=सौन्दर्याणि । निविवर्त्तिषते=निवर्त्तितुमिच्छत ।

यिष्यन्त्यायुष्मन्तम्।

कुमा०-[तदौदार्येण चकित इव] महाराष्ट्रराज! किमिव व्यामोहयसि? न भवति मे निश्चयो यन्महत्या वाहिन्या सह भवतो राज्यमात्मसात्कर्तुमायाते मादृशे श्रीमानेवं दयिष्यते-इति।

शिव०-आः! कोऽत्र संशयः? नैतद्भवतस्तातचरणानां राज्यम्, यत्र विश्वासघातो हत्या लुण्ठनं दाहश्च वशंवदानामपि क्रियते। राज्यमिदं महाराष्ट्राणाम्। नात्र दारापहरणम्, नात्र रक्ष रक्षेति व्याहरमाणानां वधः, न चात्र वशमागतैः सह विश्वास-घातव्यापारः। सुखेन स्वगृह इव यथेच्छं विहरतु भवान्।

तदखिलमिदं सदाचार-सौष्ठवाधिक-मधुरं वचनामृतं कर्ण-पुटाभ्यां पीत्वा, स्वपितुर्दौरात्म्ये घृणामावहन्, महाराष्ट्रराजस्य निगृहीतेष्वपि सदाचारं बहुमानयन्, चिरमालपच्छिवराजेन मायाजिह्मः।

ततः-"अद्य सपदि समायास्यति कश्चिन्मया प्रेषितोऽधिकृतः, भवन्तं च पुण्यनगरं कानिचिच्च दुर्गादीनि दर्शयिष्यति"-इत्यभि-

---

प्रतियापयिष्यन्ति=प्रापयिष्यन्ति। आयुष्मन्तम्=चिरायुषम्।

व्यामोहयसि=बुद्धिभेदं जनयसि। वाहिन्या=सेनया। आत्मसात्क-र्त्तुम्=स्ववशीकर्त्तुम्। दयिष्यते=दयां करिष्यते।

वशंवदानाम्=अधीनतामङ्गीकृतानाम्। व्याहरमाणानाम्=कथयताम्। यथेच्छम्=यथाभिलषितम्। विहरतु=क्रीडतु।

सदाचारसौष्ठवेन, अधिकम्, मधुरम्। वचनामृतम्=उक्तिपीयूषम्। दौरात्म्ये=दुष्टतायाम्। मानयन्=मानितं कुर्वन्।

धाय प्रस्थिते महाराष्ट्र-राष्ट्र-त्रिविष्टपनाथे, कैश्चिन्नर्तितकाम्बोजै-रश्वारोहैरनुसृतः, श्यामेनैकेन सुवर्ण-वल्गेन राजत-खलीनेन मौक्तिक-स्तबक-राजि-राजित-निगालेन, रत्न-निचय-रुचिर-रोचिः-प्रचय-च्छुरित-बालधिना सुवर्ण-सूत्र-ग्रथित-प्रान्त-पीत-कौशेयोप-वेशनिकाऽऽच्छन्न-मध्येन कशाङ्कितकक्षेण धृतरश्मिनैकेन नियन्त्रा मन्दं मन्दमानीयमानेन वनायुजेन सहितः, श्यामसिंहः समुपतस्थे।

मायाजिह्मनश्च तेनाऽऽलप्य हयमेनमारुह्य श्यामेन सह प्रथमं पुण्यनगरं प्राविक्षत्। तत्र च गृहे गृहे गीतानि द्वारि द्वारि रम्भा-स्तम्भान् कुट्टिमे कुट्टिमेऽवलम्बित-माणिक्य-दीपिकानुल्लोचान्

अधिकृतः=साधिकारः। महाराष्ट्रं राष्ट्रम्=राज्यम्, तदेव त्रिविष्टपम्=सुरलोकः, तन्नाथे=तदधीशे। नर्तिताः=सुगत्या चालिताः, काम्बोजाः=कम्बोजदेशोद्भवा अश्वा यैस्तैः। अनुसृतः=अनुगतः। सुवर्णवल्गेन=हिरण्यरश्मिना। राजतखलीनेन=रौप्यकविकेन। मौक्तिकस्तबकानाम्=मणिगुच्छानाम्, राज्या=श्रेण्या, राजितः=शोभितः, निगालः=गलोद्देशो यस्य तेन। रत्ननिचयस्य=हीरकादिसमूहस्य, रुचिरेण=मनोहारिणा, रोचिः-प्रचयेन=तेजोव्रातेन, छुरितः=रूषितः, बालधिः=पुच्छं यस्य तेन। सुव-र्णसूत्रग्रथिता=हिरण्यतन्तुस्यूता, प्रान्ते=चरमेऽशे, पीता=पीतवर्णा, या, कौशेयस्य=पट्टवस्त्रस्य, उपवेशनिका=आसनिका, "चारजामा" इति हिन्दी, तया, आच्छन्नं मध्यं यस्य तेन। कशया=अश्वताडन्या, "कोडा, चाबुक" इति हिन्दी, अङ्किता कक्षा यस्य तेन। धृतरश्मिनाऽऽनीयमानेनेति समान्वयि। वना-युजेन=वनायुदेशे जातेन सदश्वेन। "अरबी घोड़ा" इति हिन्दी।

एनम्=पूर्वोक्तगुणगणम्। प्राविक्षत्=प्रविवेश। कुट्टिमे कुट्टिमे=प्रति-

वीक्षमाणः, ग्रैवेयकालङ्कृतकन्धरान् सिन्धुरान्, उच्चःश्रवस इव बान्धवान् सैन्धवान्, धारिताभिनववस्त्रान् पौरान्, समुद्भूत-विजय-ध्वजांश्चाखिलान् गेहान्, उपलभमानः, भेरी-पटह-झर्झरादि-नादांश्चाऽऽकर्णयन्, "अप्यस्ति कोऽप्यद्य उत्सवविशेषः ?—"—

इति श्याममपृच्छत्। स च "अद्य एकपदमेव महाराजो दिल्लीश्वरं सौरतान् विद्रोहिणः पोतयोधिनः सामुद्रांश्च पराजितवान्-इति महोत्सवोऽस्मिन् राज्ये"-इति समुदतारीत्, मायाजिह्मश्च सलज्जमश्रौषीत्।

अथ ततो निवृत्तः, सिंहदुर्गमायातस्तत्रत्यान् विजयध्वजानालोक्य किञ्चिदन्तर्गत्वा च, शास्तिखान-शिरोभूषणादीनि बहूनि विजित्याऽऽच्छिद्याऽऽनीतानि वस्तूनि दृष्ट्वा ह्रीण इव हतोत्साह इव चकित इव च ततोऽपि निवृत्तः, पथि महदेकं महाप्रघणं शारद-

---

निबद्धभूमिम् । अवलम्बितमाणिक्यदीपिकान्=धारितमणिप्रदीपान्। उल्लोचान=वितानानि। ग्रैवेयकालङ्कृतकन्धरान्=ग्रीवाभूषणभूषितग्रीवान्। सिन्धुः=मदजलम्, अस्ति येषां तान् सिन्धुरान=करिणः। उच्चैःश्रवसः=इन्द्रघोटकस्य। बान्धवानिव=भ्रातृनिवेत्युत्प्रेक्षा। सैन्धवान्=हयान्। धारिताभिनववस्त्रान=परिहितनूतनवसनान्। पौरान=नागरिकान्। समुद्भूतविजयध्वजान=समुच्छलज्जयवैजयन्तीकान्। उपलभमानः=समवलोकयन्। आकर्णयन=श्रोत्रातिथीकुर्वन्। उत्सवविशेषः=महोद्धवः। एकपदमेव=एकदैव। सौरतान=सुरतदेशीयान्। पोतयोधिनः=नौसङ्ग्रामकारिणः। सामुद्रान्=क्षारोदीयान्। पराजितवान=विजिग्ये। विजयध्वजान्=विजयवैजयन्तीः। ह्रीण इव=सलज्ज इव। महान् प्रघणः=बहिर्द्वारप्रकोष्ठकं, यस्मिंस्ता-

घन-घनाघन-विडम्बनं भवनमद्राक्षीत्। तत्र प्रविश्य च, रजतेन कनकेन च निर्मीयमाणाः शिवराजनामाङ्किता मुद्रा निष्काणि च दृष्ट्वा, ततः प्रचलितो राजदुर्गमाससाद। दूरादेव दुर्गस्य समीपवर्त्तिनि प्रशस्ते शाद्वले च, परःसहस्रानश्वारोहान् उन्मुखयन्तं भ्रामयन्तश्च महान्तं कर्कमारूढं युवानमेकं समलुलोकत्। कोऽसाविति पृष्टश्च श्यामसिंहः-कुमार! एष मे ज्येष्ठो भ्राता, महाराष्ट्रराजस्यान्यतमः सेनापतिरस्ति-इति व्याहार्षीत्।

तावदेकतो धौरितकेनाश्वारोह-शतकेनानुगम्यमानः, स्वयमपि पारसीकमेकमारूढः, तथैव धावमानोऽनिल-लोलकुन्तलो नवीनैरुणैर्वासोभिरपरिचीयमानो रघुवीरसिंहः समागतः। समादरमुद्रया कुमारं सम्भाव्य, श्यामेन भ्रूसञ्ज्ञयैव पृष्टो "मान्य! शास्तिखान-युद्धे मयि प्रसन्नेन प्रभुणा शतमश्वारोहान ममाधिकारे निरूप्य, तदध्यक्षतायां नियोजितोऽस्मि"-इति समस्तक-नमनमभ्यधात्। तेन "भद्रं भद्रम्, दिष्ट्या दिष्ट्या"-इति सप्रसादमुक्तश्च

दृशम्। "प्रघाणः प्रघणालिन्दा बहिर्द्वारप्रकोष्ठक" इत्यमरः। शारदस्य=शरदि भवस्य, घनस्य=सान्द्रस्य, घनाघनस्य=वर्षुकमेघस्य, विडम्बना=अनुकृतिर्यस्य तत्। निर्मीयमाणाः=विरच्यमानाः। निष्काणि=सुवर्णमुद्राः। कर्कम्=श्वेतमश्वम्। "शुक्लोऽश्वः कर्क उच्यते"।

धौरितकेन=हयगतिविशेषेण। अश्वारोहाणाम्=सादिनाम्, शतकेन। पारसीकम्=पारस्यदेशोद्भवम्। अनिललोलकुन्तलः=वायुचञ्चलबालः। अरुणैः=ईषद्रक्तैः। अपरिचीयमानः=अनवबुध्यमानः। समादरमुद्रया=हर्षप्रदर्शनमात्रात्मिकया। कुमारम्=मायाजिह्मम्। समस्तकनमनम्=सशिरोनुति। दिष्ट्या=भागधेयेन।

पुरतः प्रचलितः।

अथ मायाजिह्मो राजदुर्गं परितः परिक्राम्यन्, कुतश्चित् सेना-निवेशान्, कुतश्चित् पदाति-निकर-विरचिता व्यूह-रचनाः, कुतश्चिद्धडद्धडद्धुनिपुरःसरं विहायसि प्रयुज्यमाना भुशुण्डिकाः, कुतश्चित् ह्रादिनी-निर्ह्रादं ह्रेपयन्तीः शतघ्नीः, कुतश्चिन्मिथ्या-युद्धरचनया चन्द्रहास-चालन-चातुरीम्, प्रासासन-साहसम्, पट्टिश-प्रयोग-पाटवम्, इषु-वर्षण-कौशलञ्च दर्शयतोऽनेकान् वीरान्, कुतश्चिच्च ध्वजमुत्थाप्य भारतस्य सनातनधर्मस्य महाराष्ट्र-राजस्य च जयमुद्घोषयतः प्रमोदपूरप्रफुल्लान् पौरान् पश्यन्, विविध-विभावना-भङ्ग-भज्यमान-हृदयः, पुनर्माया-प्रासादं निवर्तते।

श्यामसिंहस्तु तं तत्र प्रवेश्य, स्वयमपि महाराष्ट्रराजस्य विजयोत्सवे राजदुर्गे समागतानां सम्भावित-मण्डलानां साकारे प्रताप इव महति स्वर्ण-सिंहासने समारूढं मूर्तिमता यशसेव छत्र-

सेनानिवेशान=शिबिराणि। पदातिनिकरेण=पदगसेनासमूहेन, विरचिताः=निर्व्यूढाः। विहायसि=नभसि। ह्रादिनीनिर्ह्रादम्=वज्रगर्जनम्। "ह्रादिनीवज्रमस्त्री स्यादि"त्यमरः। ह्रेपयन्तीः=लज्जयन्तीः। शतघ्नीः=तोभान्। प्रासासनसाहसम्=कुन्तक्षेपणबलकर्म। पट्टिशस्य प्रयोगे=चालने, पाटवम्=कौशलम्। प्रमोदपूरप्रफुल्लान्=प्रसन्नताप्रवाहविकसितान्। विविधविभावनाभङ्गेन=अनेकविधविचारच्छेदेन, भज्यमानम्=त्रुट्यमानम्, हृदयं यस्य सः। मायाप्रासादम्=मायादुर्गम्।

सम्भावितमण्डलानाम्=पूजितमित्रवर्गाणाम्। साकारे=शरीरधारिणि।

मण्डलेन सुशोभितं प्रजाभिरादियमाणं महाराष्ट्रराजं द्रष्टुं राजदुर्गं प्रचलितः ।

इत्यष्टमो निश्वासः

इति द्वितीयो विरामः ।



प्रताप इवेत्युत्प्रेक्षा । **मूर्त्तिमता**=आकृतिमता । **यशसेव**=कीर्त्येवेत्युत्प्रेक्षा । **आदियमाणम्**=आदरविषयतामापाद्यमानम्, जयजय-ध्वनिगोचरीक्रियमाण-मिति यावत् ।

अशेष-भूमीतल-विद्यमान-शब्दज्ञ लोकार्चित-पाद युग्म ।
नारायणः श्रीहरशब्दपूर्वस्त्रिपाठिवर्यो गुरुरस्ति यस्य ॥ १ ॥
अध्यापिपच्छ्रीशिवदत्तमिश्रस्तर्काँश्च यं तार्किकमण्डलीशः ।
सिपाह-वासी भगवत्युदीतो वेदान्तविद्भागवतोद्भवो यः ॥ २ ॥
श्यामा-पदद्वन्द्व-मरन्द-लुब्धः स रामजीशर्म-पद-प्रसिद्धः ।
प्रादर्शयद्वीर-जये द्वितीये विरामके नूतन-वैजयन्तीम् ॥ ३ ॥

इति श्रीशिवराजविजयवैजयन्त्यामष्टमनिश्वासविवरणम् ।

द्वैतीयीकविरामविवरणं समाप्तम् ।

* श्रीः *

तृतीयो विरामः

* नवमो निश्वासः *

"दैवी विचित्रा गतिः"

—स्फुटकम्

येनामन्दमरन्दे दलदरविन्दे दिनान्यनायिषत ।
कुटजे खलु तेनेहा तेने हा ! मधुकरेण कथम् ? ॥

—जगन्नाथः

या सत्त्वैकगुणाश्रया भगवती वाणीति सम्बोधिता,
लीना राजससंहतौ सुरवरैर्लक्ष्मीति चाभ्यर्थिता ।
या कालीति तमोगुणा मधुमदोन्माथे चिरादर्चिता,
सेयं काचिदनूतनाऽपि युवती बोभूयतां भूतये ॥ १ ॥

नवमे निश्वासे वृद्धिं गच्छतः शिववीरमहिम्नः प्रबलबलसमवेतबलसमवेत-जयपुरपुरन्दरजयसिंहमहाराजतोऽवरोधं विवर्णयिषुस्तन्मूलाश्चाग्रेभाविनीं दिल्लीवल्लभाधीनतामाशङ्कमानस्तदुभयमुपक्षिपति-पद्यखण्डेन पण्डितराजीयेन पद्येन च।

दैवी=देवसम्बन्धिनी, अदृष्टाधीना वा ।

येन मधुकरेण, **अमन्दमरन्दे**=प्रचुरमकरन्दे, **दलदरविन्दे**=विकसत्पद्मे, **दिनानि**, सुखमयानि, रसानुसेवनपराणि, **अनायिषत**=व्यतियापितानि, **हा !** कष्टम्, **खलु**, निश्चितम्, **तेन**, नतु परेण, **कुटजे**=पार्वतमल्लिकायाम्, **ईहा**=इच्छा, अपि, **कथम्**=केन प्रकारेण, **तेने**=विवृद्धिं नीता । धीरवीरस्वभावेन पर-

ऋतुरेष शरत्। साम्प्रतं पुण्यनगरप्रान्तेऽकालेऽपि वसन्त इव पुंस्कोकिलाः काकली-कल-कलैर्दिगन्तं बधिरयन्ति। मिलित-मलयानिल-लोला लवङ्ग-लता दोलन्ति। मधु-गन्धान्ध-मधुव्रत-व्रात-विधुता माकन्द-मञ्जर्यो माञ्जुल्यं वमन्ति। नितान्त-विरह-क्लान्त-परमश्रान्त-शून्यस्वान्त-कान्तजन-ज्वाला-जटाल-दाव-ज्वलन-जाज्वल्यमानाङ्गारक-कदम्बमिव पाटलपटलमुल्ल-

---

मोदात्तेन नायकेन श्रीशिववीरेण जयसिंहसेनासमवेतत्वात्मके महति विपद्गणे समुपायातेऽपि सन्धित्सा कथमकारि, यन्मूलाऽग्रेतनी बन्धनादिरूपा दुर्यशोज्वाला धूमाविलेति मधुकरान्योक्त्याऽवश्यम्भावि-दैवतन्त्रैव वा यन्त्रणैवेति प्राथमिकपद्यखण्डेन च दन्द्वन्यते।

ऋतुरेष शरत्=शरच्छब्दो नित्यस्त्रीलिङ्गो विधेयभूतः, उद्देश्यभूतश्च ऋतुशब्दो नित्यपुंल्लिङ्गः, उद्देश्यप्रतिनिर्देश्ययोरेकत्वमापादयन्ति सर्वनामानि पर्यायेण तत्तल्लिङ्गभाजीति सर्वनाम्नि पुंस्त्वमुद्देश्यगतमाश्रित्य प्रयोग इति वेदितव्यम्। **अकाले**=असमये। **पुंस्कोकिलाः**=पिकाः। **काकलीकलकलैः**=पञ्चमस्वरैः। **दिगन्तम्**=हरिदन्तरालम्। **बधिरयन्ति**=शब्दश्रुतिशून्यं कुर्वन्ति। पिकरवो व्याप्त इति यावत्। **मिलितेन**=संयुक्तेन, **मलयानिलेन**=मलयवायुना, **लोलाः**=चञ्चलाः। **लवङ्गलताः**=देवकुसुमव्रततयः। **दोलन्ति**=कम्पन्ते। **मधुगन्धेन**=मकरन्दगन्धेन, **अन्धानाम्**=मत्तानाम्, **मधुकराणाम्**=द्विरेफाणाम्, **व्रातेन**=व्रजेन, **विधुताः**=सञ्चालिताः। **माकन्दमञ्जर्यः**=रसालपुष्पगुच्छाः। **माञ्जुल्यम्**=कोमलतामिश्रां सुन्दरताम्। **वमन्ति**=उद्गिरन्ति। **नितान्त-विरह-क्लान्तः**=अतिशयितवियोगखिन्नः, **परमश्रान्तः**=अत्यन्तं स्थगितः, **शून्य-स्वान्तः**=विरहितचित्तः, विक्षिप्तप्राय इति यावत्, **कान्तजनः**=प्रेमिसमूह एव

मति । पुष्पपरागैः पीत-मकरन्द-बिन्दु-सन्दोहैरार्द्रः प्रफुल्लता-लिङ्गनैः शीतः कुञ्जसंश्लेषैश्च धीरः समीरः प्रवहति स्म । दुःश-कुन-रूपत्वादागामि-भय-सूचकेऽपि वसन्तप्रायत्वात् सुखमयेऽ-स्मिन् समये तोरणदुर्गादबहुदूरं पूर्वस्यां कुसुमवाटिकायां स्वयं महाराष्ट्रराज एकाकी पर्यटति स्म ।

तत्र च भ्रमद्भ्रमरैश्चोचुम्ब्यमाना मल्लिकाः पश्यन्, दोदुल्य-मानैः कर-पल्लवैरिव पल्लव-तल्लजैः पार्श्व-परिवर्ति-द्रुमान् स्पृशन्ती-र्वासन्तीरवलोकयन , पुंस्कोकिल-काकली-प्रतिवचनानीव कोकिल-

ज्वालाजटालः=कीलालालङ्कृतः, दावज्वलनः=वनाग्निः, तेन जाज्वल्यमा-नानाम्=अतितरां ज्वलताम्, अङ्गारकाणाम्=वह्निदग्धकाष्ठखण्डानाम्, कद-म्बमिव=समूहमिव । कान्ताजनेषु दावदहनत्वमारोपितं तदीयश्वासेषु ज्वलदङ्गार-त्वनिमित्तमिति विशेषशोभाधायकत्वम् । पाटलपटलम्=झाटलासमूहः । पुष्प-परागैः=कुसुमरजोभिः । पीतः=पीतवर्णः । मकरन्द-बिन्दु-सन्दोहैः=मर-न्दपृषत्समूहैः । आर्द्रः=क्लिन्नः । प्रफुल्लतालिङ्गनैः=विकसितव्रततिसमा-श्लेषैः । शीतः=शीतलः । कुञ्जसंश्लेषैः=लतादिपिहितोदरसम्पर्कैः । धीरः= मन्दगतिः । समीरः=वायुः । प्रवहति स्म=सरति स्म । दुःशकुनरूपत्वात्, असामयिकत्वेन दुःशकुनत्वम् । आगामिभयस्य=आयतिकालभीतेः, निग्रहा-त्मकानिष्टस्य, सूचके=बोधके । सुखमये=आपातरमणीये । अबहुदूरम्= अन्तिकम्। पर्यटति स्म=बभ्राम ।

भ्रमद्भ्रमरैः=सञ्चलद्भिरेफैः । चोचुम्ब्यमानाः=समाश्लिष्यमाणाः । मल्लि-काः=मालतीः । दोदुल्यमानैः=उत्क्षिप्यमाणैः । करपल्लवैरिव=हस्तकिसल-यैरिव । पल्लवतल्लजैः=प्रशस्तैः किसलयैः । पार्श्वपरिवर्त्तिनः=समीपस्थान्, द्रुमान्=वृक्षान् । स्पृशन्तीः=आश्लिष्यन्तीः । वासन्तीः=माधवीलताः ।

कलरव-कुहूकारानाकर्णयन्, अहरहर्जय महाराष्ट्रराज ! इति साम्रेडमाकर्णनेन विहित-तदनुकरण-विरावाभ्यासाः सारिका विभावयन्, अकस्मात् परस्पर-ग्रथितं कुसुम-भार-निबिडं मिलिन्द-व्याप्तं लता-प्रताप-निचयं हस्ताभ्यामुभयतोऽपसार्य निविशमानाम्, अष्टादशवर्षदेशीयाम्, धारित-हरित-परिधानाम्, कण्टकाकर्ष-श्लथद्वसन-दरीदृश्यमानमीषदुन्मिषितमुरोज-युगलमञ्चलेनाऽऽच्छादयितुं यतमानाम्, प्रफुल्ल-कमल-भ्रमेणेव वदनमभिपततो मधुकरान् ससम्भ्रमं सभ्रूभङ्गमीक्षमाणाम्,

---

पुंस्कोकिल-काकली-प्रतिवचनानीव=पिकोक्तिप्रत्युक्तीरिव, कोकिल-कलरव-कुहूकारान्=पिकमधुरोक्तिकुहूरवान्। आकर्णयन=शृण्वन्। अहरह=प्रतिदिनम्। विहित-तदनुकरण-विरावाभ्यासाः=कृततद्विडम्बनशब्दावृत्तीः। सारिकाः=शारिकाः। विभावयन=अवलोकयन्। परस्परग्रथितम्=अन्योन्यसंसक्तम्। कुसुमभारनिबिडम्=पुष्पभरघनीभूतम्। मिलिन्द-व्याप्तम्=द्विरेफयुतम्। लताप्रतानिचयम्=व्रततिविस्तृतिसमूहम्। अपसार्य=दूरीकृत्य। निविशमानाम्=प्रविशन्तीम्। अष्टादशवर्षदेशीयाम्=प्रायोऽष्टादशवर्षवयस्काम्। धारित-हरित-परिधानाम्=परिहितहरिद्वर्णवसनाम्। कण्टकानाम्, आकर्षेण=आकृष्ट्या, श्लथतः=पतमानात्, वसनात्=वाससः, दरीदृश्यमानम्=वारं वारं दृष्टिपथपथिकायितम्। ईषदुन्मिषितम्=किञ्चिदुन्नतम्। उरोजयुगलम्=कुचद्वन्द्वम्। अञ्चलेन=वसनकोणेन। आच्छादयितुम्=गोपयितुम्। यतमानाम्=यत्नमादधतीम्। प्रफुल्ल-कमल-भ्रमेणेव=विकसितारविन्दभ्रान्त्येव। वदनम्=लपनम्। अभिपततः=समीपमुपसर्पतः। सभ्रूभङ्गम्=भ्रूपातपुरस्सरम्। ईक्षमाणाम्=अवलोकयन्तीम्। कपो-

कपोल-पालि-लग्न-पराग-रागेण होलिका-महोत्सव-नेपथ्येनेवावतरन्तीम्, मल्ली-वल्ली-सङ्घर्षोन्मथितेनाधररागेणाधिकमधिकं तर्षमिव जनयन्तीम्, शुक-शावक-रावानुकारि-मञ्जु-मञ्जीर-मन्द-शिञ्जितताम्, गृहीत-कुसुम-स्तवकां कामपि यवन-कामिनीमद्राक्षीत् ।

सा तु दृष्ट्वैव महाराष्ट्रराजं दक्षकरमुत्थाप्य शिरो नमयित्वा स्रंसमान-वसन-दर्शित-ताटङ्क-निचया, रशना-निःस्वनेनेव किञ्चन वचनीयमिति सूचयन्ती, लोलल्लन्तिका, सूक्ष्मवसना-

---

लपालौ=गण्डस्थले, लग्नेन=मिश्रेण, परागरागेण=धूलिलौहित्येन । होलिका-महोत्सवनेपथ्येन=होलोद्धववेषेण । अवतरन्तीम्=समायान्तीम् । मल्ली-वल्ली-संघर्षोन्मथितेन=मालती-व्रतति-संसर्ग-मर्दितेन । अधररागेण=ओष्ठलौहित्येन । तर्षम्=पानेच्छाम् । अर्थादधरमधुनः । जनयन्तीम्=उद्भावयन्तीम् । शुकशावकरावानुकारि=कीरशिशुशब्दविडम्बनम्, मञ्जु=सुन्दरम्, मञ्जीरयोः=नूपुरयोः, शिञ्जितम्=भूषणध्वनिः, यस्यास्ताम् । गृहीतकुसुमस्तबकाम्=कलितपुष्पगुच्छाम् । यवनकामिनीम्=म्लेच्छवनिताम् ।

दक्षकरम्=दक्षिणहस्तम् । स्रंसमानात्=पतमानात्, वसनात्=वाससः, दर्शितः=साक्षात्कारितः, ताटङ्कनिचयः=कर्णभूषणव्रजो यया सा । रसनानिस्वनेनेव=सारसनशिञ्जितेनेव । वचनीयम्=वक्तव्यम् । सूचयन्ती=बोधयन्ती । लोलन्ती=चाञ्चल्यमधिगच्छन्ती, ललन्तिका=आनाभिलम्बितकण्ठिका, यस्याः सा । सूक्ष्मवसनस्य=जूटकबन्धनस्य, "झूल, जाल"इति प्रसिद्धस्य, अन्तः=मध्ये, देदीप्यमाना=अतितरां प्रकाश्यमाना, वालपाश्या=शिरोरुहसमूहो यस्याः सा ।

न्तर्दीप्यमान-बालपाश्या, बद्धकरसम्पुटा, एकतः समवतस्थे।

महाराजस्तु तां तथाभूतामालक्ष्यैवमालपत्।

महाराजः—भद्रे ! का त्वम् ? कुतः समायाता ? किमीहसे ? किं विवक्षसि ? कथमेकाकिनी वनेषु भ्रमन्ती न लज्जसे ? न वा बिभेषि ? रमणीया तवाऽऽकृतिः, वरणीयं वयः—इति कथं न स्वगेहे स्वकुटुम्बेन समं वससि? किमिति चाञ्चल्यमङ्गीकृतवत्यसि ? स्फुटं वद।

यवनी—महाराज ! अत्रभवत्या दिल्लीवल्लभस्य तनयायाः सहचरीं मामवैतु श्रीमान्। श्रीमती तु चन्द्रशाला-गवाक्ष-जालिकातो वनानीक्षमाणा श्रीचरणानपश्यदिति किमपि सन्दिश्य मां प्रेषितवती। अहञ्च केवलं तदाज्ञा-पालन-व्रतं शिरसा वहन्ती समायाताऽस्मि। कस्या वाऽपरस्याः साहसं भवेन् महाराजस्य समीप

बद्धकरसम्पुटा=कृताञ्जलिका।

आलक्ष्य=अवलोक्य।

भद्रे !=कल्याणकारिणि ! विवक्षसि=वक्तुमिच्छसि। एकाकिनी=असहाया। बिभेषि=भयं करोषि। आकृतिः=अवयवसंस्थानम्। वरणीयम्=विवाहयोग्यम्।

सहचरीम्=सर्वकार्येषु सम्मिलन्तीं भृत्याम्। चन्द्रशालायाः=शिरोगृहस्य, "चन्द्रशाला शिरोगृहमि"त्यमरः, गवाक्षजालिकातः=वातायनिकातः। वनानि=काननानि। श्रीचरणान्=भवतः। सन्दिश्य=सन्देशं दत्वा। तस्याः, आज्ञापालनमेव व्रतम्=नियमम्। वहन्ती=धारयन्ती। अपरस्याः=अन्यस्याः, भवतो भवदीयाया वाऽसम्बन्धिन्याः।

एवमुपस्थातुम् ? ।

महा०–अपि राजकुमार्य्याः सहचर्य्यसि ?

सहचरी–[साभिवादम्] आम् महाराज !

महा०–कच्चित् कुशलिन्यत्र भवती ?

सहचरी–महाराज ! कुतः कुशलम् ?

महा०–किं तत् ?

सहचरी–महाराज ! अत्यन्तं खिद्यते सा !

महा०–तत्किम् ? किं भृत्या नावहन्ति तदाज्ञाम् ? सत्कारे नियुक्ता न सत्कुर्वन्ति ? समये नोपस्थाप्यते सामग्रीजातम् ? विनयं न रक्षन्ति रक्षकाः ? दिल्ली–गमनाभिलाषो वा विकलयति राजकुमारीम् ?

सहचरी–महाराज ! नेदं किमप्याशङ्कनीयम् ।

महा०–तत्किमेतद्देशीय–वायु–जलादिकं न भवति तदनुकूलमिति शिथिला राजकुमारी ?

सहचरी–दीनबन्धो ! नास्ति सोऽपि हेतुः खेदस्य ।

महा०–तत्किं मयैव किमप्यपराद्धम् ?

सहचरी–आः ! शान्तं पापम् ! नैतत्स्वप्नेष्वप्याशङ्क्यत आतिथेयेषु कोङ्कण–चक्रवर्तिषु ।

महा०–[क्षणं चिन्तयित्वा] अथापनयतु मे सन्देहं सहचरी ,

नावहन्ति=न पालयन्ति । विकलयति=खेदयति ।

शिथिला=खिन्ना ।

आतिथेयेषु=अतिथिषु साधुषु ।

किमिति खिन्ना राजकुमारी ?

सहचरी-महाराज ! न विद्मः को नाम व्याधिर्धुनोति राजकुमारीम्। साऽस्माभिरतिसावधानतया सेव्यमानाऽपि प्रतिक्षणमनिमिषपात-निरुद्धनिःश्वासं चेक्ष्यमाणाऽपि रोमाञ्चति, स्विद्यति, सीत्करोति, ताम्यति, विलपति, वेपते, उद्भ्रमति, रोदिति, ग्लायति, क्लिश्यति, मुह्यति, मूर्च्छति च। धीरं समीरमासाद्याधिकं खिद्यते, शीत-मयूखमालोक्याधिकं तप्यते, कोकिल-कलरवमाकर्ण्य कर्णयोस्तोद्यमानेव कराभ्यां कर्णकुहरं पिधायान्तर्निविशते, अस्माभिर्हास्यमानाऽपि न हसति, विविधविलास-रामणीयकेष्वपि न रमते, पाटलि-पटल-कलिका-मालामपि ज्वलन-ज्वाला-जालावलीमिव वेवेत्ति। किं कथयामि ? केवलं दक्षतो वामतश्च परिवर्तनैः, दीर्घ-निश्वासैः, सजृम्भाऽङ्गुलिस्फोटनैश्च, साक्षपां क्षपयति।

व्याधिः=व्यथा। आधिरित्यनुक्त्वा व्याधिरित्यभिधाय निगोपनं गोपितम्। अग्रे च लक्षणैराधिं स्पष्टयति। **प्रतिक्षणम्**=क्षणे क्षणे। **अनिमिषपातनिरुद्धनिश्वासम्**=निर्निमेषश्वासरोधपुरस्सरम्। **ईक्ष्यमाणा**=अवलोक्यमाना। **रोमाञ्चति**=पुलकं बिभर्ति। **धीरम्**=मन्दगतिम्। **आसाद्य**=लब्ध्वा। **शीतमयूखम्**=हिमदीधितिम्। **तप्यते**=क्लिश्नाति। **कोकिलकलरवम्**=पिककुहूशब्दम्। **कर्णयोः**=श्रोत्रयोः। **तोद्यमानेव**=पीड्यमानेव। **कर्णकुहरम्**=श्रोत्रशष्कुलीम्। **अन्तर्निविशते**=अन्तराले गच्छति। **हास्यमाना**=नर्मवचसां गोचरीक्रियमाणा। **न हसति**=न कथति। **विविधेषु**=अनेकप्रकारेषु, **विलासरामणीयकेषु**=क्रीडासौन्दर्येषु। **पाटलिपटलकलिकामालाम्**=झाटलासमूहकोरकस्रजम्। **ज्वलनज्वालाजालावलीम्**=दहनकीलालव्रजपङ्क्तिम्। **वेवेत्ति**=अवधारयति। **परिवर्त्तनैः**=वलनैः। **दीर्घनिश्वासैः**=लम्बोच्छ्वासैः। **सजृ-**

महाराष्ट्रराजः—[स्वस्मिन्नेव] तत् किं मदन-व्याधिरेषः ? अस्तु, शृणोमि तावत् ।

सहचरी०—महाराज ! सा, साञ्जन-वारिधारा-सम्पात-सम्मर्द-मलिनौ पाण्डुरौ कपोलौ, ताप-तपन-तप्त-निश्वासाहति-शुष्कमधरम्, कर्पूर-पूर-चूर्ण-मञ्जिम्ना केनचिद् धवलिम्ना, कृशिम्ना च समालिङ्गितान्यङ्गानि, वहति । कदाचिद् विमनायमाना किञ्चित्पुस्तकमादाय पिपठिषन्त्यपि बाष्प-जलैः पत्राण्याविलयति । कर्हिचिच्चक्षुषी निमील्य, विरहमयानि कानिचिच्छन्दांस्यामेडते । कदाचन कोणात् कोणं पर्य्यटन्ती, कुड्ये लम्बमानं महाराज-चित्र-फलकमालोकमालोकं बाष्प-बिन्दु-व्रज-व्याजेन धैर्यमिव वमति । कर्हिचन फलकार्पितामेवात्रभवतो मूर्तिं सम्बोध्य चिरमालपति, उपालभते, स्तवीति, प्रार्थयते, वन्दते च । अथ फलकमिदमुत्तार-

---

म्भाङ्गुलिस्फोटनैः=गात्रविनामचुटुकीकरणपुरस्सरम् । क्षपाम् =निशीथिनीम् । क्षपयति=यापयति । साञ्जनस्य=सकज्जलस्य, वारिधारासम्पातस्य=जल-प्रवाहपतनस्य, सम्मर्देन=सम्पर्केण, मलिनौ=कज्जलाविलौ । पाण्डुरौ=पीत-वर्णौ । ताप एव=कामज्वर एव, तपनः=सूर्यः, तेन, तप्तस्य=उष्णताङ्गतस्य, निश्वासस्य, आहतिभिः=ताडनैः, शुष्कम्=नीरसम् । कर्पूर-पूर-चूर्ण-मञ्जि-म्ना=हिमवालुकापुञ्ज-क्षोद शोभया । केनचित्=अवचनीयेन । धवलिम्ना=श्वैत्येन । कृशिम्ना=दौर्बल्येन । विमनायमाना=उत्का । पिपठिषन्ती=पठि-तुमिच्छन्ती । बाष्पजलैः=अश्रुभिः । आविलयति=दूषयति । विरहमयानि विप्रलम्भशृङ्गारवर्णनपराणि, छन्दांसि=काव्यानि । पारसीकैः "शेर" इत्यभिहिता-नि । कुड्ये=भित्तौ । बाष्प-बिन्दु-व्रज-व्याजेन=अश्रुपृषत्समूहछद्मना । वम-तीव=उद्गिरतीव । क्रियोत्प्रेक्षा । फलकार्पिताम्=चित्रलिखिताम् । उपालभते=

यति, करे करोति, वक्षसि धत्ते, निपुणमीक्षते, गाढं चुम्बति, चिरमालिङ्गति, शिरसा च वहति, कचन स्वहस्तेनापि श्रीचरणानामिव मूर्त्तिमालिखति, आत्मनश्च प्रतिमां तद्वामत एव विन्यस्यति, ततश्च क्षणं मोदते, क्षणं हसति, क्षणं विषीदति, क्षणं क्रन्दति, क्षणमालपति, क्षणञ्च विलपति,—इति किमिव कथयामि ? कुमार्या आदेशो मां मुखरितवानित्यपराधश्चेत् क्षन्तव्यो महाराष्ट्रराजैः।

महाराष्ट्रराजस्तु तां तथाऽभिधाय, शिरो नमयित्वा, बद्धकरसम्पुटामेकतः स्थितामालोक्य, रसनार्याश्च स्वस्मिन्ननुरागमवधार्य, तत्क्षणमेव प्राप्तावसरेण धैर्य-धस्मरेण स्मरेण व्याकुलीक्रिय-

---

उपालम्भं ददाति। **स्तवीति**=स्तुतिं करोति। **वन्दते**=नमस्करोति। **उत्तारयति**=निम्नांशे करोति। लोके प्रसिद्धाम् "उतारना" क्रियाम्,-उत्तरण-क्रियापभ्रंशभूतां मत्वाऽत्र पूर्वत्र च प्रयोगः। धातूनामनेकार्थत्वादुपसर्गाणाञ्च तदर्थमात्रव्यञ्जनपरत्वाद्व्यवहारस्य च सर्वश्रेष्ठतयाऽर्थनिर्णायकत्वाद्युक्तत्वमेतदीयमवधारणीयम्। आधुनिकास्त्वीदृशे स्थले संस्कृत-भाषायाम्-अवतारयति-इत्येव प्रयुञ्जते, हिन्द्याम् "उतारता है" इति प्रयुञ्जन्तोऽपीति वेदितव्यं विवेचनीयञ्च भाषाविज्ञानवेदिभिः। **वक्षसि**=उरसि। **धत्ते**=धारयति। **गाढम्**=घनम्। **मूर्त्तिम्**=चित्रम्। **आत्मनः**=स्वस्याः। **प्रतिमाम्**=मूर्त्तिम्। **विन्यस्यति**=स्थापयति। वामाङ्गस्थापनेन हिन्दुधर्मव्यवहारस्वीकरणपूर्वकं वनितात्वाङ्गीकरणं व्यनक्ति। **क्रन्दति**=रोदिति। **आलपति**=आलापं करोति। **विलपति**=सशब्दं रोदिति। **मुखरितवान्**=बहु भाषणवतीमकृत।

अभिधाय=निगद्य। **शिरो नमयित्वा**=प्रणम्य, कथनसमाप्तिसूचकमि-

माणः, क्षणं किमपि नोक्तवान् । मार-विकार-प्रसार-भार-जर्जरितमाकारञ्च कथं कथमपि कुसुम-स्तबकावचयैः, कल-कूजित-पूजित-पतत्रि-कुल-कलित-शाखाऽनुसन्धानैः, तत्क्षण-त्रोटित-कदली-दल-वीजनैः, स्वेदापनोदनैश्च निगूढवान् । तां सहचरीन्तु,—

"त्रायतां महाराजः, त्यक्ष्यति प्राणानत्रभवती यदि न रक्ष्यते श्रीचरणैः"-इत्यभिदधानाम्, "ओम् ! निवेदय भवतीमेषोऽहमायामि" इत्यभिधाय विसृष्टवान् ।

तस्यां प्रयातायाञ्च चिरं बहुशश्चिन्तयन्, मुहूर्तमतिवाह्य, स्वयमपि शनैः शनैस्तोरणदुर्ग-शिरोगृहं सनाथयामास । तत्र च तथाभूतया रसनार्या सादरमुपवेशितः, स्वयं सखीजनेऽपसृते, वारं

दम् । बद्धकरसम्पुटाम्=कृताञ्जलिम् । प्राप्तावसरेण=लब्धसमयेन, धैर्यघस्मरेण=धीरताभक्षकेण । "भक्षको घस्मरोऽग्र" इत्यमरः । स्मरेण=मदनेन । व्याकुलीक्रियमाणः=विचेतस्कतां नीयमानः । मारविकारस्य=कामजविकृतेः, स्वेदादेः, प्रसारस्य=प्रसरणस्य, भारेण=आधिक्येन, जर्जरितम्=जीर्णप्रायम् । आकारम्=शरीरम् । कुसुमस्तबकावचयैः=पुष्पगुच्छैकत्रीकरणैः । कलकूजितेन=मधुररवेण, पूजितेन=सत्कृतेन, पतत्रिकुलेन=विहगनिवहेन, कलितानाम्=व्याप्तानाम्, शाखानाम्=वृक्षावयवानाम्, अनुसन्धानैः=विचारणैः, समवलोकनैरिति यावत् । तत्क्षणम्=तत्कालम्, त्रोटितस्य=भञ्जितस्य, कदलीदलस्य=रम्भापत्रस्य, वीजनैः=व्यजनव्यापारैः । स्वेदापनोदनैः=घर्मबिन्दुदूरीकरणैः । निगूढवान्=गोपितवान् ।

आयामि=आगच्छामि । "वर्त्तमानसामीप्ये वर्त्तमानवद्वा" । विसृष्टवान्, त्यक्तवान्, गमनाय ।

तोरणदुर्गस्य, शिरोगृहम्=चन्द्रशालाम् । स्वयम्=आत्मनैव । अप-

वारं रसनार्या मुखं पश्यन्, करतल-न्यस्त-कपोलां रसनारीं व्यजिज्ञपत्, यद् "भद्रे ! श्रुतवानस्मि सहचरीमुखादखिलं वृत्तान्तम्, तथाऽपि भवत्या मुखादपि शुश्रूषे कोऽयं ? कथमयं ? कीदृशश्चायं खेदः ?—इति"।

सा त्वतरल-तारकेण क्षुण्ण-पक्ष्मणेक्षणेन क्षणं राजमुखमैक्षिष्ट। ईक्षमाणैव च स्वेद-सलिल-सन्दोहैः स्नपितेव, महाराष्ट्र-मण्डलाखण्डलाय बाष्प-बिन्दु-मौक्तिकावलिमिवोपहरन्ती, श्वास-प्रश्वास-झञ्झावातोड्डीन-धैर्या, शोकाङ्कुरैरिव रोम-निकरैर्निगृहीता, भयेनेवाकम्पत।

अथ "कथ्यतां, कः क्लेशः कुमार्याः ? किं वाऽभीप्सितम् ?—" इति वदति महाराष्ट्रराजे, सा वेपमानैरङ्गैरिव निवार्यमाणा, मन्म-

---

मूर्तेः=दूरीभूते। विज्ञाताभिप्रायत्वात्सहचरीणां स्वयं दूरीभवनम्। तदुक्तम्-"परेङ्गितज्ञानफला हि बुद्धयः"। एतेन सहचरीणामतिनिपुणत्वं विशकलितम्। **करतलन्यस्तकपोलाम्**=हस्ततालिकास्थापितगण्डाम्। **व्यजिज्ञपत्**=विज्ञापितवान्। **शुश्रूषे**=श्रोतुमिच्छामि। "ज्ञाश्रुस्मृदृशां सन" इत्यात्मनेपदम्।

अतरलतारकेण=अचपलकनीनिकेन। **क्षुण्णपक्ष्मणा**=अनिमीलितलोम्ना। **ईक्षणेन**=नयनेन। **ऐक्षिष्ट**=अलोकयत्। **स्वेद-सलिल-सन्दोहैः**=घर्म-जल-व्रातैः **स्नपितेव**=कृतनिर्णेजनेव। **बाष्पबिन्दुमौक्तिकावलीम्**=अश्रुपृषद्रत्नमालिकाम्। **उपाहरन्ती**=ददती। **श्वासप्रश्वासयोः, झञ्झावातेन**=सवृष्टिकेन पवनेन, अत्र रोदनसहितेन, **उड्डीनम्**=विलुप्तम्, धैर्यं यस्याः सा। **शोकाङ्कुरैरिव**=खेदोद्गमनैरिव। **रोमनिकरैः**=लोमव्रातैः। **भयेनेव**=भीत्येव।

थोन्मथितेन मनसेव मूकीक्रियमाणा, उद्वेल्लितैर्बाष्पैरिव कण्ठे रुध्यमाना, अवहेलितया ह्रियेवावहेल्यमाना, अनासादितचरेण साहसेनेव हस्यमाना, मदन-मदेनेव च मामद्यमाना, न कञ्चन वाचां प्रचारमूरीचकार ।

अथ क्रियासमभिहारेण महाराजेन सान्त्व्यमाना, अभ्यर्थ्यमाना च, अञ्चलान्तेन स्वेदैःसह लज्जामिवापसार्य, कदली-दल-वीजनव्याजेन किञ्चनावशिष्टं धैर्यमप्युद्धूय, बाष्पापहरण-कैतवेन विवेकमपि च सम्मर्द्य, कर्णार्पित-कर्णिकार-पापत्यमान-मधुकर-

अभीप्सितम्=अभिलषितम् । वेपमानैः=कम्पमानैः । निवार्यमाणा=भाषणाद्विरतीक्रियमाणा । मन्मथोन्मथितेन=कामजर्जरितेन । मूकीक्रियमाणा=मौनतामापाद्यमाना । उद्वेल्लितैः=उच्छलद्भिः । रुध्यमाना=अवरोध्यमाना । अवहेलितया=तिरस्कृतया । ह्रिया=त्रपया । अवहेल्यमाना=तिरस्क्रियमाणा । अनासादितचरेण=अप्राप्तप्रायेण । साहसेन=मानसिकेन बलकर्मणा । हस्यमाना=हासविषयतां नीयमाना । मदनमदेन=कामजविकारेण । मामद्यमाना=अतितरां माद्यन्ती । वाचां प्रचारम्=वाक्प्रसारम् । ऊरीचकार=स्वीचकार ।

क्रियासमभिहारेण=पौनःपुन्येन । सान्त्व्यमाना=साम्ना प्रतिबोध्यमाना । अभ्यर्थ्यमाना=प्रार्थनागोचरीक्रियमाणा ।

अञ्चलान्तेन=वसनप्रान्तेन । स्वेदैः सह=घर्मबिन्दुभिः साकम् । लज्जामपसार्य=त्रपां दूरीकृत्य । सहोक्तिरलङ्कारः । कदलीदलवीजनव्याजेन=रम्भापत्रहिल्लोलनच्छद्मना । अवशिष्टम्=शेषम् । उद्धूय=दूरीकृत्य । बाष्पापहरणकैतवेन=अश्रापनयनव्याजेन । विवेकम्=विचारम् । सम्मर्द्य=विना-

निकर-विधूनन-च्छलेन निर्म्मक्षिकमिव विदधती, परितोऽवलोकन-च्छद्मना वास्तुदेवी-श्रवणमिवाऽऽशङ्कमाना वक्तुकामाऽपि स्वाशयं प्रकटयितुं यतमानाऽपि स्फुरितोत्तराधराऽपि च विरह-ज्वालावलीढ-वसनया प्रकाशमनाजिगमिषन्त्या भगवत्या सरस्वत्या वारितेव पुनर्मौनमेवाकलयत्।

ततस्तच्छोक-दर्शनातिखिन्नेन, महाराष्ट्र-कुम्भिनी-स्तम्भेन पौनःपुन्येन प्रार्थितम्—"भद्रे ! अकथितकारणो वर्द्धते खेदः। यदि दूती-प्रेषणेन मामनुगृहीतवत्यसि, तत् कथं मानस-खेद-हेतु-

---

श्य। **कर्णयोः**=श्रोत्रयोः, **अर्पितेषु**=स्थापितेषु, **कर्णिकारेषु**=तन्नामककुसुमेषु, **पापत्यमानानाम्**=वारं वारं पतताम्, **मधुकराणाम्**=भ्रमराणाम्, **निकरस्य**=समूहस्य, **विधूननच्छलेन**=दूरीकरणव्याजेन। **निर्म्मक्षिकम्**=जनसञ्चारशून्यम्। **वास्तुदेवीश्रवणम्**=ग्रहाधिष्ठातृदेवीश्रुतिम्। **आशङ्कमानेव**=संशयानेव। एतेन वक्तव्यस्य परमगोप्यत्वं ध्वनितम्। **वक्तुकामाऽपि**=कथयितुमभिलषन्त्यपि। **स्वाशयम्**=स्वाभिप्रायम्। **प्रकटयितुम्**=व्यक्तीकर्तुम्। **यतमाना**=चेष्टमाना। **स्फुरितोत्तराधरा**=चञ्चलितोत्तरोष्ठा। **विरहज्वालावलीढवसनया**=वियोगकीलालकवलितवासस्या। **प्रकाशम्**=स्फुटताम्। **अनाजिगमिषन्त्या**=गन्तुमनभिलषमाणया। निर्वसनत्वादिति स्फुटमेव। **वारिता**=निषिद्धा।

तच्छोकदर्शनातिखिन्नेन=तद्दुःखावलोकनातिदुःखिना। **महाराष्ट्रकुम्भिन्याः**=महाराष्ट्रवसुमत्याः, **स्तम्भेन**। "गौरिला कुम्भिनी क्षमे"त्यमरः। **पौनःपुन्येन**=क्रियासमभिहारेण।

अकथितकारणः=अनिवेदितहेतुः। **वर्द्धते**=एधते। **अनुगृहीतवती**=

कथनेनाधिकं न कृतार्थयसि ? नात्र कश्चन तृतीयः। न भवति भवत्या वाणी षट्कर्णा। प्राणान् संशयमारोपयसि, न च वक्षि। लज्जां मानयसि, न तु जीवनम्'—इति।

परतश्च निश्वासानुपातिभिर्मधुपैरिव परिपीतायाम्, खेद-सागर इव निमग्नायाम्, बाष्प-प्रवाहेणेव क्षालितायाम्, मदन-दहनेनेव दग्धायाम्, नख-विलेखैरिव कर्तितायाम्, दीर्घोच्छ्वासैरिव विधूतायाम्, महाराजवचनैरिव विलुण्ठितायाञ्च त्रपायाम्, चक्षुषी प्रमृज्य, अभिमुखीभूय, वक्तुमारभत रसनारी—

"महाराज ! सर्वं विदितमार्यस्य, केवलं पुनरुक्तिरियं भवित्री

कृपाविषयीकृतवती। **मानस-खेद-हेतु-कथनेन**=चैतस-दुःख-कारण-निवेदनेन। **षट्कर्णा**=वक्तृश्रोत्रितरश्रोत्रगोचरा। तृतीयादिश्रवणे रहस्यभेदादाशङ्का भवति। तथा चोक्तम्—"षट्कर्णो भिद्यते मन्त्र" इति। **संशयम्**=सन्देहस्थानम्। **वक्षि**=कथयसि। **मानयसि**=धारयसि। **जीवनम्**=प्राणनम्।

निश्वासानुपातिभिः=निश्वासपश्चाद्गतिभिः। परितः **पीतायाम्**=आन्दितायाम्। इवेनोत्प्रेक्षा। एवमग्रेऽपि। **निमग्नायाम्**=द्रुडितायाम्। **बाष्पप्रवाहेण**=अस्रपूरेण। **क्षालितायामिव**=धौतायामिव। **मदनदहनेन**=कामवह्निना। **दग्धायामिव**=प्रज्वलितायामिव। **नखविलेखैः**=करजाग्रकर्त्तनैः। **कर्त्तितायामिव**=छेदितायामिव। **विलुण्ठितायाम्**=बलादपहृतायाम्। **त्रपायाम्**=लज्जायाम्। **अभिमुखीभूय**=सम्मुखीभूय।

सर्वं विदितमार्यस्य=एतेन विज्ञाताशयोऽपि महाराजो बलान्मदननाच्छ्रोतुं वाञ्छति निखिलम्, तदिदञ्च महाराजत्वं पुरुषत्वञ्चेति ध्वनयति प्रथमवाक्येनैव रसनारी। एषा हि परं विदुषी कवयित्री चेतीतिवृत्तेषु ख्यातम्। नारी-

मदुक्तिः, तथाऽपि वारं वारमापृच्छ्यमानाऽपि यदि वाचं यच्छेयम्, प्रत्युत्तरञ्च न प्रयच्छेयं तत्परमापराधिनी स्यामिति निवेदयामि यद्-महाराज एव कारणं ममाऽऽधीनाम्। न शोभते महाराज एवं वनिता-जन-वञ्चनं व्यर्थ-मर्यादा-विकत्थनञ्च"।

महाराजस्तु, ईदृशीं भङ्गीमाकर्ण्य, दिल्लीश्वर-दुहितुर्लोलताम्, निर्भीकताम्, अभीकताम्, चटुलताम्, चतुरताम्, कविताञ्च विभावयन्, पुनरुवाच—"भद्रे! विशकलय्य कथ्यताम्, कोऽनाचारः प्रादर्शि जनेनैतेन?"

रसनारी—महाराज! किमिवाऽऽच्छन्दयसि? विचित्रास्तव

णां च विदुषीणां वचनं व्यङ्ग्यबहुलं भवतीति न तिरोहितम्-"विजृम्भितं यस्य किल ध्वनेरिदं विदग्धनारीवचनं तदाकरः" इति श्रीहर्षोक्तिवेदिनामिति यत्किञ्चिदेतत्। **पुनरुक्तिः**=द्वितीयवारं कथनम्। **मदुक्तिम्**=मत्कथनम्। मदुक्तिरेव सहचरी मुखादधिगता भवद्भिरिति तामेव कथयिष्यामि नान्यत्किमपीति व्यनक्ति। **वाचं यच्छेयम्**=मौनिनी भवेयम्। **प्रत्युत्तरम्**=प्रतिवाचिकम्। **न प्रयच्छेयम्**=न प्रदद्याम्। **आधीनाम्**=मानसिकीनां व्यथानाम्। **वनिता-जन-वञ्चनम्**=नारी-जन-प्रतारणम्। **व्यर्थमर्यादायाः**=निष्प्रयोजनधार्मिकबन्धनस्य, **विकत्थनम्**=श्लाघनम्, धर्मरक्षणायुक्तिः श्लाघामात्रम्, खिन्नजनखेदवारणं हि सर्वतो बलीयान् धर्मः, स नानुष्ठीयते भवता।

भङ्गीम्=कथनप्रकारम्। **लोलताम्**=चपलताम्। **निर्भीकताम्**=निर्लज्जताम्। **अभीकताम्**=कामुकीत्वम्। "कम्रः कामयिताऽभीकः कमनः कामनोऽभिक" इत्यमरः। **चटुलताम्**=चपलताम्। **चतुरताम्**=कौशलम्। **कविताम्**=ध्वनिबोधनताम्। **विभावयन्**=विचारयन्। **अनाचारः**=दुर्व्यवहारः।

मायाः, विलक्षणास्तव घटनाः। यदा यदा मां साक्षात्करोषि, तदा तदाऽनया तु मूर्त्याऽऽचारं विनयं मर्यादामेव च रक्षसि, किन्तूत्थाय प्रस्थितोऽपि मायामय्येव मूर्त्या चक्षुषोरग्रत एव वर्वर्त्सि। अहह! साहचर्य्यमेव न त्यजसि, सहैव पर्य्यटसि, सहैव भुङ्क्षे, सहैव च शेषे, निद्रायामपि मम कदाचिदंशुकं स्पृशसि, कर्हिचित् कपोलयोः स्वेदानपहरसि। केयं चातुरी? यदेकया मूर्त्या मर्य्यादाया ध्वजं वहसि, परया चाचिन्तनीयमाचरसि, हन्त! कुत आयासि? मुद्रितं कवाट-युगलमपि नोद्घाटयसि, शृङ्खलामपि न चालयसि, सहचरीभिरपि नेक्ष्यसे, अनन्य-श्राव्यमालपसि, निभृतमेव वहसि, चित्रं चित्रं चित्रगतोऽपि च स्मयसे। अवलोकमवलोकं तवैतां मायामत्यन्तं बिभेमि, खिद्ये, उन्माद्यामि च। को वा न मुह्येदीक्षमाण ईदृक्षाणि विलक्षणानीन्द्रजालानि? तत् समये समायातोऽसि

आच्छन्दयसि=मोहयसि। मायाः=मोहनप्रकाराः। घटनाः=कार्याणि। साक्षात्करोषि=पश्यसि। मूर्त्या=आकारेण। आचारम्=व्यवहारम्। विनयम्=नम्रताम्। मर्यादाम्=धार्मिकसीमानम्। मायामय्या=वशीकरणशक्तियुतया। वर्वर्त्सि=अतितरां तिष्ठसि। पर्य्यटसि=भ्रमसि। अंशुकम्=वसनम्। अपहरसि=प्रोञ्छसि। मर्यादाया ध्वजम्=धार्मिकसीम्नो वैजयन्तीम्। परां धार्मिकतां प्रकटयसीति यावत्। अचिन्तनीयम्=अविचारणीयम्, मुद्रितम्=पिहितम्, कवाटयुगलम्=कपाटद्वयम्। "कपाटमररं तुल्ये" इत्यमरः। शृङ्खलाम्=अररबन्धनदाम। न चालयसि=न हिल्लोलयसि। कपाटोन्मुद्रणार्थं शृङ्खलां सञ्चाल्य शब्दयन्ति जना इति लौकिकम्। अनन्यश्राव्यम्=अनितरश्रोतव्यम्। गुह्यभाषाणमिति यावत्। निभृतम्=गुप्तम्। स्मयसे=आश्चर्यं करोषि। खिद्ये=खेदिनी भवामि। इन्द्रजालानि=मायिकानि कार्याणि। इति-

निवेदितवत्यस्मि निखिलमितिवृत्तम्, साम्प्रतन्तु न शक्नोमि जीवितुमिति पश्यत एव तव प्राणांस्त्यजामि। स्मरणीयाऽहम्, कोऽप्यपराधश्चेद् भ्रमविहितः स क्षन्तव्यः" इत्युक्त्वाऽञ्चल-प्रान्तेनाऽऽत्मानमुद्बद्धुमिव यतमानां करे धृत्वा सान्त्वयन्, शीतलयंश्च पुनराह महाराष्ट्रराजः।

महाराजः-भद्रे! मुधैव मामुपालभसे। यदा गम्भीरं निरीक्षिष्यसे, परीक्षिष्यसे च, तदा स्पष्टं समीक्षिष्यसे, यन्नात्राणुरपि दोषो मामकीनः। श्रीमत्या एव हृदयम्, मनः, वाञ्छा, यौवनम्, कामः, रागश्चात्रापराध्यति, धन्यमात्मानं मन्ये, यच्छ्रीमती दिल्लीवल्लभ-नन्दिनी गर्वमपहाय पार्वतोन्दुरुनाम्ना प्रसिद्धिं गमितेऽपि मय्यनुरक्तवती। आनृण्यञ्चास्यानुग्रहस्य मन्ये न कदाऽप्युपयास्यामि, परमिदमत्र विभावनीयम्-पित्राऽप्रदीयमाना यं कञ्चिदेवाङ्गीकुर्वती व्यभिचारिणी वचनीया च भवति वदावदानाम्। मातापितृभ्या-

---

वृत्तम्=पूर्ववृत्तम्। जीवितुम्=प्राणान् धारितुम्। स्मरणीया=स्मृतिपथमानेतव्या। भ्रमविहितः=भ्रान्तिकृतः। उद्बद्धुम्=पाशीकर्तुम्। सान्त्वयन्=सामवचांसि प्रयुञ्जानः। शीतलयन्=शिशिरयन्।

मुधा=व्यर्थम्। उपालभसे=उपालम्भं ददासि। निरीक्षिष्यसे=द्रक्ष्यसि। परीक्षिष्यसे=विचारयिष्यसि। समीक्षिष्यसे=आलोचयिष्यसि। अणुरपि=लघुतमोऽपि। वाञ्छा=अभिलाषः। यौवनम्=तारुण्यम्। रागः=प्रेमा। अपराध्यति=अपराधहेतुर्भवति। धन्यम्=अतिश्रेष्ठम्। गर्वम्=अभिमानम्। अनुरक्तवती=प्रेम कृतवती। आनृण्यम्=ऋणशून्यत्वम्। अनुग्रहस्य=कृपायाः। विभावनीयम्=विचारणीयम्। अप्रदीयमाना=दानगोचरतामनीयमाना।

मदत्तामात्मसात्कुर्वश्च लम्पटः-इति निन्द्यते। तदाज्ञा चेदत्र भवतीमहं सादरं स्वसेनया रक्ष्यमाणां कुशलेन तातभवनं प्रापयामि, तातेनानुमता च मां सूचयिष्यसि। मदपत्येयाऽप्यतिसुन्दरम्, अतिक्रमनीयम्, अतिसम्पदम्, अतिप्रार्थनीयम्, तुरुष्काऽऽरब्य-पारस्यादिदेश-राजकुमारेषु वाऽन्यतमं वरं वरयिष्यसि। मा स्माकृतार्थमात्मानं मंस्थाः। यैः पुण्य-बलैर्दिल्ली-वल्लभ-कुले जाताऽसि, तैरेव कञ्चन चक्रवर्ति-कुमारं वासन्त-वासन्तीव सहकारं वरयिष्यसि।

एवमालपद्भ्यामेव ताभ्यामन्वभावि कञ्चन धूमगन्ध इव। यावच्चेतस्ततः पश्यतस्तावद् गवाक्ष-द्वारेण प्रविशन्, शुण्डि-शुण्डा-दण्ड

अङ्गीकुर्वती=स्वीकुर्वती। व्यभिचारिणी=परपुरुषपरता। वचनीया=निन्दनीया। दुर्यशोगोचरेति यावत्। वदावदानाम्=कथयितृणाम्। "वदो वदावदो वक्ते"त्यमरः। आत्मसात्कुर्वन्=स्वाधीनतां नयन्। लम्पटः=परस्त्रीरतः, कामुकः। अनुमता=आज्ञप्ता। सूचयिष्यसि=बोधयिष्यसि। अतिसुन्दरम्=अत्यन्तरूपिणम्। अतिकमनीयम्=अतितरामर्थयितव्यम्। वरयिष्यसि=स्वीकरिष्यसि। अकृतार्थम्=अपूर्णमनोरथम्। वासन्तवासन्तीव-वसन्ते गृहीतजन्मा मालतीव। सहकारम्=रसालम्। उपमा।

एवं धर्ममर्मसंरक्षणप्रवणेन शिववीरेण प्रत्याख्याता रसनारी, किन्तु न सर्वथा प्रार्थयमानायारितरस्कारोऽपि विधेयः "स्त्रीणां वरमनुस्मरन्, रामाया जातकामायाः प्रशस्ता हस्तधारणे"त्यादिवचनेभ्य इति बुबोधयिषुः, अमङ्गलमयशस्यञ्च भावि किञ्चनेति दुःशकुनं प्रदिदर्शयिषुः, रसनार्याः परममिष्टमालिङ्गनं दैवप्रापितमिति च समर्थयितुमिच्छुरग्रेतनं गद्यं निगदति—

अन्वभावि=अनुभवगोचरीकृतः। अनवलोकितत्वादिवः। पश्यतः=

इव चण्डो धूमोऽवलोकितः। यावच्च तद्विचिन्तयितुं यतते; तावदग्निरग्निरग्निः, वह्निर्वह्निर्वह्निः, ज्वाला ज्वाला ज्वालेति प्रचण्डोऽश्रावि क्षुब्धानामिव दौर्गिकाणां कोलाहलः। तत्कोलाहल-श्रवण-समकालमेवात्युद्विग्ना रसनारी त्रायस्व त्रायस्वेति वदन्ती महाराजं बाहुलताभ्यां गाढमवेष्टयत्। महाराजोऽपि तां तथा भीत-भीतां किञ्चिदुदञ्चिताभ्यां कुचाभ्यां वक्षःस्थलं पीडयन्तीं, बाहुपाश-वेष्टित-ग्रीवां सवेपथुं गाढमाश्लिष्टामवलोक्य, माभैपीरित्यभिधाय कराभ्यां क्रोड उत्थाप्य, सपदि द्वार-देशान्निस्मृत्य बहिरायातः। सहचर्योऽपि च कान्दिशीका भय-भ्रान्त-नयनाः, भट्टारक! भट्टारक! भट्टिनि! भट्टिनि!-इत्युच्चैः प्लुतेनेव स्वरेणाऽऽकारयन्त्यस्तत्रैव समागमन्।

अवलोकयतः। **प्रविशन्**=गेहमाक्रामन्। **शुण्डिशुण्डादण्ड इव**=करिकरदण्ड-इव। **प्रचण्डः**=अत्युत्कटः। **विचिन्तयितुम्**=कुत इति विवेचयितुम्। **प्रचण्डः**=बहुलीभूतः। **क्षुब्धानाम्**=आविलीभूतानाम्, भयभ्रान्तानामिति यावत्। **कोलाहलः**=कलकलः। **अत्युद्विग्ना**=अतितरां भीता। **त्रायस्व त्रायस्व**=पाहि पाहि। **बाहुलताभ्याम्**=भुजव्रततीभ्याम्। रूपकम्। **अवेष्टयत्**=आच्छादयत्। **उदञ्चिताभ्याम्**=उन्नतचूचुकाभ्याम्। **वक्षःस्थलम्**=उरः-स्थलम्, महाराजस्य। **पीडयन्तीम्**=आनन्दवर्षिणीं पीडामुद्भावयन्तीम्। **बाहुपाशवेष्टितग्रीवाम्**=भुजबन्धयन्त्रितशिरोधराम्। **सवेपथुम्**=सकम्पाम्। **मा भैषीः**=भयं न विधेहि। **क्रोडे**=अङ्के। **कान्दिशीकाः**=भयद्रुताः। **भय-भ्रान्त-नयनाः**=भीत्युद्घूर्णमाननेत्राः। **प्लुतेन**=त्रिमात्रिकेण। **आकारयन्त्यः**=आह्वयन्त्यः।

एनां कथां समुपस्थाप्य सर्वोऽप्यग्रेतनः शिवराजचारकीकरणादिरूपो

तावदुद्भूतमकृशं कृशानुमालोक्य दौर्गिकाः सर्वेऽपि यौगपद्येन कृतोद्योगा जलयन्त्रैः शमयाम्बभूवुः।

ततस्तु गृहीतकण्ठां रसनारीमालोक्य, "आः! कथमाश्लिष्ट एवास्मि यवनराज-तनयया"-इति तदभिमुखः 'एष जनः'-इत्यभिधाय, अनेकपुरुष-दर्शनेन लज्जमानां झटिति निर्दिष्ट-गृहे प्रविष्टां राजकुमारीं त्यक्त्वा, महाराजः सोपानैर्नीचैरवातरत्। तत्र च "महाराज! आकस्मिकोऽयमज्ञात-कारणो ज्वालाजालः सञ्जातो जातवेदसः, तदमङ्गलमिव सूचयति, सूचयति चामङ्गलमेवाकाल-कुसुमोद्गमः। तस्मात् सपदि ज्योतिर्विदं देवशर्म्माणं पण्डितं दृष्ट्वा शान्तिरस्य काचन विधेया; फलञ्च प्रष्टव्यम्"-इत्यभिदधत आत्मीयानालोक्य, स्वयमेवैकाकी सहचरान् प्रतिनिवर्त्य, देवशर्मणः

दुर्यशोव्रातो रसनारीस्नेहजन्मेति बोधयति। दिल्लीगमन-सन्धित्सादावप्ययमेवानुरागः कथोपकथनादिश्चान्तरङ्गीभूतो हेतुरिति विवेचनीयं सुधीभिः।

उद्भूतम्=उत्थितम्। **अकृशम्**=अदुर्बलम्। सुपुष्टमिति यावत्। **कृशानुम्**=हिरण्यरेतसम्। **यौगपद्येन**=एककालम्। **कृतोद्योगाः**=विहितश्रमाः। **जलयन्त्रैः**=वह्निशमकैर्धाराजनकैर्यन्त्रैः। "फायर ब्रिगेड" इति विदेशीयभाषाशब्दस्तद्वाचकः।

आश्लिष्ट एव=आलिङ्गित एव। न ज्ञानपूर्वकमिदं वृत्तमिति प्रदर्शयन् नायकोदात्ततां रक्षयति। **एष जनः**=अयं मनुजव्रातः, अवलोकयतीति गम्यमाना क्रिया। **निर्दिष्टगृहे**=पूर्वप्रदर्शितसद्मनि। **सोपानैः**=अवरोहणीभिः। **आकस्मिकः**=सहसा भवः। **अज्ञातकारणः**=अनवबुद्धहेतुः। **जातवेदसः**=तनूनपातः। **अकालकुसुमोद्गमः**=असमयसुमसमुद्भूतिः। **फलम्**=भाविशुभा-

साक्षात्काराय हनुमन्मन्दिरमयासीत्। दुर्ग्गद्वाराद् बहिर्निर्गतमात्र एव च कांश्चिद् दूरत आयातांश्चरानद्राक्षीत्। तैरुक्तम्–

महाराष्ट्र–विश्वम्भरेश्वर! वीराणां महारण्येनेव सिन्धुराणां घटयेव वाजिनां वीचिभिरिव च परिवृतोऽम्बरेश्वरो जयपुर–संस्थान–निपुणो महाराज–जयसिंहो दिल्लीपक्षं पुष्णन् योद्धुमागत्य, अविदूरत एवोपकारिका आयोज्य, श्वो वा परश्वो वा समरमारिप्सते, अत्रभवन्त एवात्र प्रमाणम्–इति।

महाराष्ट्रराजस्तु, "आम् तदागमन–सूचना दूरचरैः पूर्वमेव दत्ता" इत्यभिधाय, तत्क्षणात् सर्वानपि दुर्ग्गाध्यक्षान् सेनापतींश्च रण-सज्जयाऽपेक्षितुं सूचयितुमादिदेश। मात्रायामेकस्याञ्च व्यतीत-मात्रायाम्, तोरणदुर्ग्गे महानेकः शतघ्नीनिर्ह्रादो जातः। परतश्च युद्ध–सज्जा–सूचकाः सर्वेभ्योऽपि दुर्ग्गेभ्यस्सेनासन्निवेशेभ्यश्च

शुभम्। **निर्गतमात्रः**=निष्क्रान्तप्रायः। **चरान्**=स्पशान्।

महाराष्ट्रविश्वम्भरायाः=महाराष्ट्रभूमेः, **ईश्वर!** =अधिनायक!। "रसा विश्वम्भरा स्थिरे"त्यमरः। **महारण्येनेव**=अरण्यान्येव। उत्प्रेक्षा। **सिन्धुराणाम्**=गजानाम्। **घटयेव**=समूहेनेव। **वीचिभिरिव**=लहरिभि-रिव। **परिवृतः**=समवेतः। **अम्बरेश्वरः**=आमेरदेशाधीशः। **जयपुरस्य**=तन्नामकनगरस्य, **संस्थाने**=संस्थापने, **निपुणः**=कुशलः। **पुष्णन्**=पुष्टयन्। **उपकारिकाः**=शिबिराणि। **आरिप्सते**=आरब्धुमिच्छति।

दूरचरैः=दूरभ्रमणशीलैर्गुप्तचरैः। **रणसज्जया**=सङ्ग्रामोद्योगेन। **अपेक्षि-तुम्**=सन्नद्धीभूय प्रतीक्षितुम्। **आदिदेश**=आज्ञप्तवान्। **मात्रायाम्**=सार्धप-लद्वये। "मिनट" इति लोके ख्यातिः। **व्यतीतमात्रायाम्**=समाप्तप्रायायाम्।

सघर्घराघोषाः, घोर-घोराः, घनाघन-निर्घोष-निभाः, तोभ-निस्वनाः प्रादुरभूवन्। घोरं घोषममुमाकर्ण्य कथमुद्विग्ना रसनारीति तदितरः को वेत्ति ?

महाराष्ट्रराजस्तु हनूमन्मन्दिरमासाद्य, मारुतिमूर्तिं दण्डासनेन प्रणम्य, देवशर्माणं तत्रैवाऽऽकारयत्। सोऽप्यागतः, साशीर्वादं महाराजेन सह तत्रोपविष्टः पृष्टश्च प्रोवाच-"महाराज ! न भवत्येषोऽग्निदाहः समयं विनैव वासन्तकुसुमोद्गमश्च शुभः, तद् दुष्फलमेतस्य हवनैः, विप्र-पूजनैः, दानैश्च प्रशमनीयम्"-इति।

महाराजस्तु तदैव मन्दिर-पुरोहितमाहूय, देवशर्म-निदेशानुसारेण हवन-पूजनादिकं विधातुमाज्ञप्तवान्। परतश्च जयसिंह-युद्ध-विषये पृष्टवान्। देवशर्मा तु-महाराज ! एतेन समरेऽनुष्ठितेऽवश्यं महाराष्ट्राणां पराजय इति सर्वथा सन्धातव्यमित्याह।

शतघ्नीनिर्ह्रादः=तोभगर्जनम्। युद्धसज्जासूचकाः=सङ्ग्रामसन्नद्धताबोधकाः। सेनासन्निवेशेभ्यः=सैनिकशिबिरेभ्यः। घोषाः=शब्दाः। घनाघननिर्घोषनिभाः=वर्षुकमेघध्वनितुल्याः। तोभनिस्वनाः=शतघ्नीरवाः। "णभ तुभ हिंसायाम्"-इत्यस्माद् घञि तोभः। लोके "तोप" इति। तदितरः=रसनारीभिन्नः।

मारुतिमूर्त्तिम्=हनूमत्प्रतिमाम्। दण्डासनेन=साष्टाङ्गपातम्। प्रणम्य=नमस्कृत्य। एवम्भूतः प्रणामो योगशास्त्रे प्रसिद्धः। समयं विनैव=वसन्तकालाभावेऽपि। वासन्तकुसुमोद्गमश्च=माधवीलताप्रादुर्भूतिश्च। दुष्फलम्=असत्फलम्। हवनैः=होमैः, विप्राणां पूजनैः=सेवनैः। दानैः=सात्विकादिभिः, दरिद्रेषु दीयमानैः।

महाराष्ट्रेश्वरोऽपि चिरं चिन्तयित्वा "सत्यं, बहुतरैर्युद्धैः साम्प्रतं स्थगिता मे सेना, वीराश्च केचन सुरतदेशे, केचित् कल्याणदेशे, अपरे सामुद्रकेष्वनूपेषु, कच्छेषु, द्वीपेषु च, नवाऽऽसादितराज्यं प्रबध्नन्ति, सामायातश्च महत्या सेनया वीरराजः, कुशलाऽस्य सेना, दूरदर्शी च जयपुरोश्वरोऽस्ति, तत्सम्भाव्यते तादृक्षमेव। यथोच्यतेऽत्रभवता तथैव विधातुं यतिष्ये"–इत्यवदत्।

देवशर्म्मा–विजयतां कहाराजः!

महाराष्ट्रराजः–[प्रणम्योत्तिष्ठन् देवशर्म्माणं निपुणं निरीक्ष्य] दैवज्ञशिरोमणे! सदैव भवानस्मच्छुभं चिन्तयति, आशिषो वदति, ग्रहनक्षत्रादि–गणनैः फलकथनैः सदुपदेशैः साहाय्यञ्च विदधाति, तत्कथ्यतां कथमस्माभिरानृण्यमासादनीयम्?

देवशर्म्मा–महाराज! सर्वथा सुखी वर्ते। न किमपि याचनीयम्।

अनुष्ठिते=कृते। **सन्धातव्यम्**=सन्धिः कर्त्तव्यः। **स्थगिता**=भ्रान्ति गता। **सामुद्रकेषु**=समुद्रान्तरालवर्त्तमानेषु। **अनूपेषु**=जलप्रायेषु। **कच्छेषु**=एकतो भूमिसम्पर्कवत्सु सर्वतश्च जलवत्सु। **द्वीपेषु**=उभयोर्दिशोर्जलयुतेषु, सर्वतो जलयुतेषु च। **नवासादितराज्यम्**=नूतनलब्धराष्ट्रम्। उपनिवेशमिति यावत्। **प्रबध्नन्ति**=प्रबन्धं कुर्वन्ति। **कुशला**=निपुणा, सुशिक्षितेति यावत्। **दूरदर्शी**=विशेषविचारकः, नतु शास्त्रिखानादिवन्मद्यादिनिरतः।

दैवज्ञशिरोमणे!=मौहूर्तिकश्रेष्ठ!। **साहाय्यम्**=सहायताम्। एतदेवब्राह्मणकर्तृकं देशकार्यमिति वेदितव्यम्।

वर्त्ते=तिष्ठामि। **याचनीयम्**=भिक्षितव्यम्।

महा०–तथाऽपि ।

देव०–वेत्ति महाराजोऽहं गौरसिंहस्य पुरोहित इति ।

महा०–सर्वं श्रुतवानस्मि भवतामितिवृत्तम् ।

देव०–गौरस्य भगिनी मयैव लालिता, पालिता, मयैव च साम्प्रतमपि रक्ष्यते ।

महा०–अवगतमस्ति ।

देव०—तस्या एव विवाहार्थं वयं सर्वेऽपि चिन्ताऽऽकुला इति कमिव निवेदयाम ऋते प्रभुवर्यात् ।

महा०—वरः कोऽपि स्थिरीकृतः ?

देव०—[सनिश्वासम्] राजन् ! पित्रा यस्मै दातुं प्रतिज्ञातमासीत्; स कास्तीति न ज्ञायते, किन्तु ज्यौतिष-गणितेनैतद्देश एव सम्प्रति तत्स्थितिरनुमीयते । तत्पिता च कलितमुनिवेषो वीरसिंहोऽपि प्रभुमेवोपजीवति ।

महा०—आ ! एवम् ? स्मृतमखिलम् । गौरद्वारा तदपि श्रुतवानस्मि ।

देव०—तद् यथासम्भवं स एव प्रनष्टो वीरसिंह-पुत्रो रामसिंहोऽन्वेष्टव्यः, यथा बहूनां स्याज्जीवनम्, अन्यथा तु यथोचित-

---

अवगतम्=विज्ञातम् ।

ऋते=विना । तद्योगे पञ्चमी ।

ज्यौतिषगणितेन=भगणचिन्तनेन । अनुमीयते=अनुमानेन निश्चीयते । कलितमुनिवेषः=धारिततपस्विनेपथ्यः ।

प्रनष्टः=क्षुपितः, गोपितात्मेति यावत् । यथोचितम्=उचितानतिक्रमणपूर्वकम् ।

माचरितुं प्रभव एव प्रमाणम्।

महा०—देव! तामहं निजामेव दुहितरं मन्ये। तद्, जयसिंह-सेना-समुद्रस्य सन्धिना वा विग्रहेण वा पारं गत्वा, पूर्णैरुद्योगै-र्वीरसिंहपुत्रं परिमार्गयिष्यामि, दैवादसफलोद्योगश्च कस्मैचिदन्यस्मै योग्याय वराय स्वहस्तेन वितरिष्यामि। मा स्म भूदत्र सन्देह आर्यस्य। आज्ञाप्यतामधुना, प्राप्तकालं यते, प्रणमामि—

इत्युक्त्वा, आशिषो गृहीत्वा प्रचलितो महाराजः, सिंहदुर्गमा-गत्य, स्वविश्वास-पात्रं स्तन्यजीवम्, माल्यश्रीकम्, स्वं वृद्धं पुरोहितं च सन्धिवार्त्ताः स्थिरयितुं बहुश एवमेवमिति कर्णे कथयित्वा, जयसिंहं साक्षात्कर्तुं विससर्ज। महाराजानुमतो भूषणकविरपि तत्साहचर्येण जयसिंहशिबिरमुद्दिश्य चलितः।

तौ च महाराज-जयसिंहेनाऽऽलप्य, आगत्य च, महनीयमहो-भिर्महितं महाराष्ट्र-मही-महेश्वरं समासाद्य, एकान्ते प्रावोचतम्—महाराज! भूषणकविना सहितावावां द्वावपि पण्डित-वेषमाकलय्य, महाराज-जयसिंहस्य शिबिरं गतौ। सोऽस्मत्संवादं प्राप्यैवान्तः प्रवेष्टुमाज्ञापत्। अस्माभिस्तु प्रविश्यैव साशीराशि तन्निर्दिष्टस्थाने

दुहितरम्=कन्याम्। सन्धिना=मेलेन। विग्रहेण=सङ्ग्रामेण। परि-मार्गयिष्यामि=अन्वेषयिष्यामि। वितरिष्यामि=दास्यामि। प्राप्तकालम्=आगतसमयम्। यते=करोमि।

स्तन्यजीवम्="तानाजी"-नाम्ना प्रसिद्धम्। स्वम्=आत्मीयम्। साक्षात्कर्तुम्=द्रष्टुम्। तत्साहचर्येण=स्तन्यजीवादिसहायकत्वेन।

महनीयमहोभिः=वन्दनीयतेजोभिः। महितम्=पूजितम्। प्राप्यैव=

स्थितम् । स भूषणकवेः पूर्वपरिचित इति प्रथमं तेनैव मुहूर्तमालपत् । भूषणकवि-मुखेन श्रीमत्प्रशंसामयीं व्रजभाषा-कवितां श्रुत्वा समधिकममोदिष्ट । युष्मद्दत्तं तत्पारितोषिक-वृत्तान्तमाकर्ण्य, भूषणद्वारा तत्समभिव्याहारेणैव महाकवेः सप्तशती-कारस्य विहारिणः प्रशंसाविशेषं श्रुत्वा चाधिकं ह्रीण इवाभूत् । तत इतरान् भ्रूसंज्ञया स्थानं निर्मक्षिकयितुं सूचयित्वाऽस्मदभिमुखो बभूव । महाराज ! किमिव कथयावः, व्यर्थ एवाभूत्तदग्र आवयोः पाण्डित्याऽऽडम्बरः । स तु स्वयमेव शास्त्रज्ञः, ज्योतिषां निगूढं तत्त्वं वेवेत्ति । कानिचिदेव वर्षाणि व्यतीतानि; यत्तेन ज्योतिर्यन्त्रालया वाराणस्यादि-प्रसिद्ध-

---

लब्ध्वैव । न विलम्बितवानिति यावत् । **अमोदिष्ट** = प्रसन्नतामन्वभूत् । **तत्समभिव्याहारेण** = तत्साहचर्येण । सप्तानां शतानां समाहारः **सप्तशती** । "सतसई"इति प्रसिद्धा । गाथासप्तशत्या अनुवादभूता विहारिकवितेयमित्यालोचकशिरोमणयः । यद्यप्यनुवादे "कविरनुहरति च्छायामि"'ति नास्ति, तथापि परं प्रावीण्यं विहारिणस्तन्निर्माण इति न ननु न च समेतम् ।

ह्रीणः=लज्जितः । महाराष्ट्राधिनाथः कवितामेकां भूषणकवेर्निशम्य सिन्धुरानेकान् ग्रामांश्च ददौ, जयपुराधीशश्च सप्तशतीं निपीयापि दीनाराणां सप्तशतीमेवार्पयदिति लज्जाकारणम् । **निर्मक्षिकयितुम्**=असञ्चरयितुम् । **ज्योतिषाम्**=भानाम्, खेचराणाम् । **निगूढम्**=गुप्ततमम् । **ज्योतिर्यन्त्रालयाः**=भगणगत्यादिबोधनपराः शालाः । **वाराणस्यादिषु**=चतुःषु स्थानेषु, वाराणस्यां जयपुरे दिल्ल्यामुज्जयिन्याञ्च । जयपुरं स्वीयं नगरमिति कृत्वा, वाराणसी च सर्वतः श्रेष्ठं हिन्दूनां तीर्थमिति कृत्वा, दिल्ली च सम्राण्निवासभूमिरिति कृत्वा, उज्जयिनी च कृष्णकालिकविद्यातीर्थत्वात्सान्दीपनिजन्मभूमित्वाद्भूमध्यरेखास्थितत्वाच्च स्वी-

स्थानेषु व्यरचिषत। अथ क्षणानन्तरं स्वयमस्मानपृच्छद् युद्धविषये। किमधिकं कथयामः, चिरमालपितमस्माभिः, किन्तु दृष्टं यज्जयसिंहोऽयं नापजलखानः, न शास्तिखानः, न वा यशस्विसिंहः, यः कथमपि वशयितुं शक्येत। यद्देशीया गौरसिंह–सदृशा अल्पवयस्का अपि नीतिमर्मज्ञाः, किं नाम कथनीयं स्यात् तद्देशीय–महाराजानां विषये? स प्रबलया सेनया समायातोऽस्ति, शीघ्रमस्मद्दुर्गरोधं विधित्सति। एकैकशश्च दुर्गाण्याच्छिद्य, साकल्येनास्मान् विजिगीषते।

महा०—अपि कथमपि सन्धातुमपि तेनाङ्गीकृतम्?

माल्य०—भगवन्! स्पष्टीकृत्य तेनोक्तम्–यद्–"वृद्धोऽस्मि, क्षत्रियोऽस्मि, द्विर्भाषणं न जाने। यदि सन्धित्सते महाराष्ट्रराजः, तद् दिल्लीश्वरस्यापहृत–दुर्गेष्वधिकारस्त्याज्यः, कर–प्रदता चोरीकार्येति", उक्तवांश्च यद् "नाऽस्मत्त उपधिराशङ्कनीयः। स्वच्छेन हृदा समागत्य महाराष्ट्रराजेन स्वयमेव मया सह स्थिरयितव्योऽ-

---

कृतिविषयताङ्गतेति वेदितव्यम्। वाराणस्यामिदं मानमन्दिरनाम्नाऽऽख्यातं दशाश्वमेधघट्टतो नातिदूरे। एतदुत्तरतश्च शिवराजविजयकर्तुर्निवासभूमिरिति प्रत्यक्षीभूतम्। **वशयितुम्**=स्वायत्तीकर्तुम्। **नीतिमर्मज्ञाः**=राजनीतिविशारदाः। **विधित्सति**=विधातुमिच्छति। **आच्छिद्य**=बलात्स्ववशीकृत्य। **साकल्येन**=सर्वतो भावेन। **विजिगीषते**=जेतुमिच्छति।

द्विः=वारद्वयम्। **भाषणम्**=कथनम्। सत्यप्रतिज्ञ इति यावत्। **अपहृतदुर्गेषु**=बलात्स्वायत्तीकृतेषु दुर्गेषु। **करप्रदता**=राजस्वविश्राणनता। **अस्मत्तः**=अस्मत्सकाशात्। **उपधिः**=छद्म। धौर्त्यमिति यावत्। **स्वच्छेन**=अगुप्तीकृत-

यं विषयः"—इति । तदत्र प्रभुचरणा एव प्रमाणम् ।

तदाकर्ण्य, महाराष्ट्र-धरा-धनी, किञ्चिन्निश्वस्य, "तथाऽस्तु, यथोचितं श्वो रात्रौ विधातास्मः" इत्युक्त्वा, स्वान्तरङ्ग-मित्रमण्डल्या सह बहु सम्मन्त्र्य, सर्वेषामपि च विजिघृक्षायामसम्मतिम्, सन्धित्सायामेव च सम्मति-माकलय्य, माल्यश्रीकं पृष्टवान्, "मया तेन सहाऽऽलपितुं कथं तत्सेना-व्यूहं विभिद्य प्रवेष्टव्यम्"—इति । स उवाच--"भगवन्! जयपुराधीश्वर-मुद्राङ्कितं प्रवेशक-पत्रमानीतवानस्मि-इति न कोऽपि प्रविशन्तं श्रीमन्तं किमपि वक्ष्यति" । ततस्तथा-तथेत्युक्त्वा सर्वेऽप्युत्तस्थुः ।

परेद्युर्होराद्वयमतीतायां रजन्यामकस्माच्छिबिरान्तरुपविष्टं महाराजमम्बराधीश्वरं प्रतीहारः, प्रविश्य प्रावोचत्—"भगवन्! महाशयः कश्चनैकाकी द्वारदेशे वितिष्ठते, पृष्टश्चाऽऽत्मनो नाम शिव

रहस्येन । स्थिरयितव्यः=निश्चाययितव्यः ।

महाराष्ट्रधरायाः, धनी, ननु साम्प्रतं महेश्वरो वाऽऽखण्डलो वाऽधिनाथो वा । अधुना तु सन्धित्सापरायणत्वाद्धनी स्थास्यति, स एव चास्तीति कविजनसंवेद्योऽर्थः । किञ्चित्=ईषत् । निश्वस्य=उच्छ्वस्य । एतेन न सोऽपि प्रेम्णा सन्धिमकरोत्; अपितु परिस्थितिवशादिति व्यनक्ति ।

विजिघृक्षायाम्=विग्रहकरणेच्छायाम् । सन्धित्सायाम्=सन्धिकरणेच्छायाम् । तत्सेनाव्यूहम्=तद्वाहिनीरचनाम् । जयपुराधीश्वरस्य, मुद्रया=राजचिह्नेन, अङ्कितम्=चिह्नितम् । वक्ष्यति=कथयिष्यति । एतत्स्थलमेव मनसि कृत्वाऽभाणि मनीषिणां मान्येन, "कुटजे खलु तेनेहा तेने हा! मधुकरेण कथम्?" ।

इत्येव ब्रूते, तदत्र प्रभुचरणा एव प्रमाणम्"—इति।

महाराजस्तु, "आम्! परिचिनोमि"-इत्युक्त्वा, स्वयं द्वार-देशमागत्य, बहुशश्चित्रेषु कारुवरैर्लिखितास्तन्मूर्त्तीरदर्शदिति दर्शनसमकालमेव महाराष्ट्रराज इति निश्चित्य, सादरमालिङ्ग्य, अन्तर्निनाय। स्वोपविष्टविष्टर एव च तमुपवेश्य, तेन सह स्वयमपि स्थित्वा, एवमालपत्।

जयपुरराजः-महाराष्ट्रराज! भवान् एतेन साधारणेन वेषेण स्वयमागत्य मामधिकं सम्मानितवानस्ति-इति स्वागतं श्रीमते। अत्र स्वगृह इव व्यवहरणीयम्, न कोऽपि संशयावसरः।

महाराष्ट्रराजः-महाराजस्यामुना स्नेहेन सनाथितोऽस्मि। महामान्य! यद्यहं स्वगृह इव न व्यवाहरिष्यम्; समधेक्ष्यञ्च; तर्हि कथमेकाकी सेना-व्यूह-प्रचण्ड-दुर्गान्तःस्थे शिविरे समागमिष्यम्। परन्तु क्षत्र-वंशावतंसानां भारतीय-महाराजानां युष्मा-

---

वितिष्ठते, "समवप्रविभ्यः स्थ" इत्यात्मनेपदम्।

परिचिनोमि=जानामि। चित्रेषु=आलेख्येषु। कारुवरैः=चतुरशिल्पिभिः। अदर्शत्=आलोकयत्। सादरम्=सबहुमानम्। आलिङ्ग्य=आश्लिष्य। स्वोपविष्टविष्टरे=स्वाधिष्ठितासने। आलपत्=अभाषत।

सम्मानितवान्=आदृतवान्। व्यवहरणीयम्=विधेयम्। संशयावसरः=सन्देहस्थानम्।

सनाथितः=सभाजितः। व्यवाहरिष्यम्=व्यवहारमकरिष्यम्। समधेक्ष्यम्=सन्देहमकरिष्यम्। सेनाव्यूहेन=वाहिनीरचनया, प्रचण्डे=भीतिप्रदे, दुर्गान्तःस्थे=दुर्गमान्तरालस्थे। क्षत्रवंशावतंसानाम्=क्षत्रियान्वयभूषणानाम्

रक्षाणामुदार-हृदयानां दास एवैष जनः । गतदिवसे द्वौ पण्डितौ श्रीचरणानां समीपमायातौ, यथा च तद्द्वाराऽऽज्ञां लब्धवानस्मि; तथैव चानुष्ठितवानस्मि ।

जय०—सत्यम्, पण्डितवेषौ द्वौ भावत्कावायातौ भूषण-कवि-सहितौ ।

महा०—[किञ्चिल्लज्जितवान्]

जय०—अस्तु, तद्द्वारा यथा सन्देशं प्रहितवानस्मि, तत्स्मर्यते भवता ? यदि भवान् सन्दधीत; तद् भवतो विद्रोहाचरणं विस्मृत्य दिल्लीवल्लभो भवन्तं प्रेमपात्रं मन्यते, भवतो रक्षादि-विषये प्रतिज्ञातवानस्मि, स्वीक्रियेत चेत् तथा विदध्याम् । राज-पुत्र-देशीयोऽयं वृद्धः, एतदुक्तिर्वज्रलिपिरिवान्यथा न भवति ।

ततस्तृतीयस्य कथयाऽपि रहिते तस्मिन्प्रदेशे तादृशमाकर्ण्य परितोऽवलोक्य किञ्चिद्विमनायमान इव तूष्णीके महाराष्ट्र-महा-

---

आज्ञां **लब्धवान्**=आदेशं प्राप्तवान् । **अनुष्ठितवान्**=कृतवान् ।

भावत्कौ=भवदीयौ ।

लज्जितवान्=शिवेन पण्डितावित्युक्तम्, जयसिंहश्च पण्डितवेषावित्यभिधाय भावत्कतां प्रकटितवानिति लज्जा ।

प्रहितवान्=प्रेषितवान् । **सन्दधीत**=सन्धिं कुर्यात् । **विद्रोहाचरणम्**=शत्रुताकरणम् । **प्रेमपात्रम्**=स्नेहाधारम् । **विदध्याम्**=कुर्याम् । **वज्रलिपि-रिव**=वज्रोल्लिखितेव । **अन्यथा**=विपरीता । तदिदं वृद्धस्यास्य वृद्धमतेर्भ्रान्ति-विलसितमग्रेतनेनोरगजिह्वकर्त्तव्येन स्फुटीभविष्यति ।

कथयाऽपि=नाम्नाऽपि । **विमनायमाने**=उत्कतां गते । **तूष्णीके**=मौ-

राष्ट्रपतौ, पुनराहाम्बरेशः—

जय०—वीर! भवानेकाक्यत्र समायातः, आत्मानञ्च समर्पितवानिति ग्लानेन न भाव्यम्। यदैव रोचेत तदैव मदश्व-शालात एकमुत्तममाजानेयमारुह्य मद्भटै रक्षित एव स्वालयपर्य्यन्तं यास्यति, परतश्च रणाजिरे जयो वा पराजयो वा भवेत्, किन्तु नास्मत्तो लेशोऽपि विश्वासघातस्य शङ्कनीयः।

महा०—[तादृशीमुदारां वाचं निशम्य विस्मित इव] महाराज! दृढं विश्वसिमि, तद्विषये नास्ति मम खेदः।

जय०—तत्किं ग्लानिमिव वमति मुखमण्डलं भवतः?

महा०—ग्लानेरनल्पं कारणमस्ति।

जय०—नात्र पञ्चमः कर्णोऽवधत्ते, तत् स्पष्टमुच्यताम्।

महा०—वीरवर! येषां राजपुत्र-देशीय-क्षत्र-कुल-च्छत्राणां प्रताप-गानैर्बाल्यं व्यतियापितवानस्मि, यै राजन्वतीयं भारतभूः, ये

निनि। महाराष्ट्रमेव, महद्, राष्ट्रम्, ननु ततो बहिर्भूतं भारतं नाम किञ्चित्, तत्पतौ=तद्रक्षके।

ग्लानेन=खिन्नेन। मदश्वशालातः=मामकघोटकसदनात्। आजानेयम्=अश्वम्। उत्तमपदस्य पृथगभिधानात्। रणाजिरे=सङ्ग्रामाङ्गणे। लेशोऽपि=मात्राऽपि।

वमति=उद्गिरति। प्रकटयतीति यावत्।

अनल्पम्=बहु।

पञ्चमः कर्णः=पञ्चानां सङ्ख्यानां पूरणकं श्रोत्रम्। न कश्चिद्द्वाभ्यामतिरिक्तः शृणोतीति यावत्।

चैकमात्रमालम्बनं सनातन-धर्मस्य भारत-गौरवस्य भारताभिजन-स्वातन्त्र्यस्य च; तेषामेव महाराजमद्य म्लेच्छानां सेनापतिमवलोकयतो विदीर्यते मे हृदयम्।

जय०—अपीदमेव कारणं खेदस्य भवतः ? वीर ! यदा तारुण्यमासीदस्मद्देशीय-क्षत्रिय-प्रताप-तपनस्य; तदा यवनराजानां वक्षःस्थलेषु छुरिका लेखनीभिर्भारत-जयः क्रियासमभिहारेणास्माभिरलेखि, किन्तु; न सदा समानो व्यत्येति कालः। ग्रीष्मे शोषित-महानदोऽपि भास्करो हिमे हिम-कणिकाभिस्तथाऽऽच्रियते; यत्तदवलोकनमपि दुःशकं भवति। तदधुना क्षत्रिय-प्रतापस्य वार्द्धक्य-समयः—इति दैवघटनयाऽस्माकं पारवश्यं सम्पन्नमस्ति। न जानीमहे कदा वा कल्पपरिवर्तनं भविता, यदा पुनः स्वातन्त्र्य-

---

प्रतापगानैः=तेजस्विताप्रकटनपराभिर्गीतिभिः। बाल्यम्=शैशवम्। व्यतियापितवान्=क्षपितवान्। राजन्वती=सुन्दरराजसमेता। आलम्बनम्=आधारस्तम्भभूतम्। भारताभिजनस्वातन्त्र्यस्य=हैन्दवनिवासिस्वतन्त्रतायाः। विदीर्यते=द्वैधीभवति।

तारुण्यम्=यौवनम्। अस्मद्देशीयक्षत्रियाणां प्रताप एव तपनः=खेचरचक्रवर्त्ती, तस्य। छुरिकाः=असिधेनुका एव, लेखन्यः=लिपिसाधनानि, ताभिः। रूपकम्। समानः=एकविधः। शोषितमहानदः=शुष्कीकृतमहाजलाधारः। हिमे=शीतर्त्तौ। हिमकणिकाभिः=प्रालेयखण्डैः। आच्रियते=आच्छाद्यते। तदवलोकनम्=तद्दर्शनम्। वार्द्धक्यसमयः=वृद्धत्वकालः। दैवघटनया=भाग्यचक्रेण। पारवश्यम्=पारतन्त्र्यम्। यत एवेयं शिक्षा राजनीतौ कृतपदा तत एव भारतीयपारतन्त्र्यशृङ्खला द्रढिमानमासादितवतीति न विस्मर्त्तव्यं वृद्धोक्ति-

सुखमासादयेद् भारतं वर्षम्। नाधिकमस्मिन् विषये वचनीयम्, यतः सर्वमवगतं वीरस्य।

महाराष्ट्र०—आर्य! अवगतमस्ति, अत एव च पृच्छामि—यद् यैः सहैवं चिरन्तनो वृद्धो द्वेषः; कथमद्य तदाज्ञा शिरसा धार्यते?

जय०—मन्ये, जानीते भवान्; यदस्माकं सत्य-प्रतिज्ञताया महान् पक्षपातः।

महा०—आम्! जाने।

जय०—तद् यदा वैरमासीन् तदा रणाङ्गणमासाद्य; निष्कृप-कृपाणप्रहारैर्यवन-कूट-कोटि-कन्धरा-कोष्ण-रक्त-प्रवाहैस्तुन्दिली-कृता भगवती चण्डिका, यदा च कैरपि कारणैर्वशंवदताऽङ्गीकृता; तदाज्ञां वहामि। राजपुत्र-देशीय-क्षत्रिया छद्मना न कुर्वन्ति विद्रोहाचरणम्।

महा०—किं सदा सर्वैः सह सत्यं पालनीयम्?

पठनपरैः। कल्पपरिवर्त्तनम्=समयपरावृत्तिः। वचनीयम्=वक्तव्यम्।

वृद्धः=वृद्धिं गतः। द्वेषः=शत्रुता।

सत्यप्रतिज्ञतायाः=सत्यसन्धतायाः।

वैरम्=शत्रुत्वम्। निष्कृपकृपाणप्रहारैः=निर्दयासिताडनैः। यवनकूटकोटेः=म्लेच्छसमूहकोटेः, कन्धराभ्यः=ग्रीवाभ्यः, कोष्णस्य=ईषदुष्णस्य, रक्तस्य, प्रवाहैः=धाराभिः। तुन्दिलीकृता=स्थूलोदरीकृता, चण्डिका=महामाया। वशंवदता=अधीनता। छद्मना=कपटेन। विद्रोहाचरणम्=शत्रुताव्यवहारम्।

जय०—आः ! किं कथ्यते ? अत्रापि सन्देहः ? किं महाभारते जरासन्धस्य, अर्जुनस्य, युधिष्ठिरस्य वा, न श्रुतानि कथानकानि ? राजपुत्रदेशीय-क्षत्रियाणां किं नाश्राविषतेतिहासा भवता ?अस्माकं कथनमेव पत्रम् , कथनमेव च मुद्रा।

महा०—सत्यम् , किन्तु मरुधराधीश्वरो महाराज-श्रीयशस्विसिंहोऽपि सनातनधर्म-रक्षायाः प्रधान एव यामिकः। स तु सनातनधर्म-रक्षायै यवन-वंशावतंस-ध्वंसं चिकीर्षन्नस्मत्सहयोगमकार्षीत् , तत्साहचर्यञ्चात्याक्षीत्।

जय०—श्रुतमस्माभिः, यदवधि मरुराजः सिप्रातीरे दिल्लीश्वरेण विजितः; तदवधि बहिः सन्धिं दर्शयन्नन्तर्द्वेष्टीति। परं छलमिदं गर्हितमनुष्ठितं तेन।

महा०—अथ किं म्लेच्छानां भारत-विद्रोहिणामप्यपकारः स्वदेशीयानाञ्च साहाय्यं गर्हितं कार्यम् ?

न श्रुतानि=न कर्णगोचरीकृतानि। **कथानकानि**=चरितानि। जयसिंहेन कथानकानि श्रुत्वापि दुरर्थतयैवाध्यवसितानीति विदुषां सम्मतिः। सर्वैरेवैभिर्महाभारतख्यातैः कूटनीतिराश्रिता। किमपरं युधिष्ठिरोऽपि 'अश्वत्थामा हत' इत्यभिधाय तामेवाशिश्रयदिति न तिरोहितं विज्ञेषु। ईदृशा एव हि धर्ममापाततः श्रुत्वाऽन्यथयन्ति खेदयन्ति च भारतभुवमिति किमधिकम्। **अश्राविषत**=श्रुताः।

यामिकः=प्रहरी। **अत्याक्षीत्**=उदसृजत्।

अन्तः=अभ्यन्तरे। **द्वेष्टि**=शत्रुतां करोति। **छलम्**=कपटम्। **गर्हितम्**=निन्दितम्।

अपकारः=अपकृतिः।

जय०—मम तात्पर्यं न बोबोद्धि भवान्। ननु कथयामि; छलं गर्हितम्। यदि स प्रत्यक्षतो विरोधमनाच्छादयन् समयोत्स्यत, दिल्लीश्वरं विजित्य यौधिष्ठिर-ध्वजाधारे धरातले ध्वजमुदधूनयिष्यद्; भारत-स्वातन्त्र्य-पोत-कर्णधार-धुरमवक्ष्यत्; समराङ्गणे प्राणानत्यक्ष्यत्; मार्तण्ड-मण्डलमभेत्स्यत्; सकुसुमवृष्टिं दिवं चासनाथयिष्यत्; तत् तद्यशोगीति-गानैं राजपुत्रदेशः समपूरयिष्यत। परं यदवधि स छलमकार्षीत्; तदवधि बाला अप्यस्मद्देशीयास्तं निन्दन्ति। वीर! यदि सत्येन स्वधर्म-रक्षा न भवति, तत्किमसत्येन सम्बोभवीति? यदि च प्राण-दानैरपि स्वदेशो दुराचारात् त्रातुं न शक्यते; अथ छलेन शक्ष्यते? कुलीनाः प्राणानगणयन्तो धर्मं रक्षन्ति, न तु कपटाचरणैर्धर्मं विघट्टयन्ति।

महा०—[किञ्चित् कुपित इव] वीरवर! वयमपि धर्मार्थमेव प्राणान् न गणयामः, महाराष्ट्रा अपि भीरवो न सन्ति, महाराष्ट्रा अपि स्वार्थं न कुर्वन्ति सङ्ग्रामम्, किन्तु काश्यादिस्थानेषु विहितानत्याचारान् श्रावं श्रावं कर्णौ स्फुट्येते, हृदयञ्च विदीर्यते—इति

बोबोद्धि=अतितरां जानाति। अनाच्छादयन्=अगोपयन्। समयोत्स्यत=युद्धं व्यधास्यत्। यौधिष्ठिरस्य=युधिष्ठिरसम्बन्धिनः, ध्वजस्य, आधारे=स्थितिभूमौ। उदधूनयिष्यत्=उदस्थापयिष्यत्। भारत-स्वातन्त्र्य-पोत-कर्णधारधुरम्=हैन्दव-स्वतन्त्रता-नौ-नाविक-भारम्। अवक्ष्यत्=अधारयिष्यत्। सकुसुमवृष्टिं=ससुमवर्षणम्। दिवम्=स्वर्गम्। असनाथयिष्यत्=अभूषयिष्यत्। तद्यशोगीतिगानैः=तत्कीर्तिगीतिकागीतिभिः। समपूरयिष्यत=परिपूर्णोऽभविष्यत्। कुलीनाः=सत्कुलप्रसूताः। विघट्टयन्ति=मर्दयन्ति।

न शक्यते सोढुमिति यथासामर्थ्यं सम्मुखं परतश्च युक्तिभिरपि विजयामहे। धन्यं युष्माकं सत्यम्! यदबलम्ब्य काशीस्थ-विश्वनाथ-बिन्दुमाधवादि-मन्दिर-मूलच्छेद-कौतुकिनो व्यर्थ-हत्याकाण्ड-व्यसनिनो लम्पटाः प्रबलीक्रियन्ते। युष्माद्दशैरेव वीरवरैर्गौराङ्ग-विहित-हरिकीर्त्तन-पूता वङ्गभूमिर्म्लेच्छ-हतकानां हस्ते समर्पिता, अधुना गवां ब्राह्मणानञ्च रक्तैः स्नाति। महाराज! दृश्यतां धर्मशास्त्रम्, हत्या-साहाय्यमपि हत्या-विशेष एव।

जय०—वीर! वर्द्धस्व। शास्त्र-श्रवणैरेव केशाः श्वेतिताः सन्ति; नत्वातपतापेन। तत्र न बहु वचनीयम्। किन्तु प्रवञ्चनं नाङ्गीचिकीर्षत्येष वृद्धः।

भीरवः=भयभीताः। स्वार्थम्=स्वस्मै प्रयोजनाय। स्फुट्यते=विद्ध्यते। परतः=सामर्थ्यशून्ये। युक्तिभिः=छद्मादिशब्दव्यपदेश्याभिः। लम्पटाः=परस्त्रीपातिव्रत्यध्वंसकाः। गौराङ्गेण=महाप्रभुणा, विहितेन=सम्पादितेन, हरिकीर्त्तनेन=भगवद्यशोगानेन, पूता=पवित्रा। हत्यायाः साहाय्यम्=सहायताकृतिः। हत्याविशेषः=मारणभेदः।

"अनुमन्ता विशसिता निहन्ता क्रयविक्रयी" इत्यादिना सहायकादीनामपि घातकत्वं धर्मशास्त्रकारैर्विस्पष्टमङ्गीकृतम्।

शास्त्रश्रवणैः=श्रुत्यादिश्रुतिपथानयनैः। केवलं श्रवणमेव कृतं नार्थो व्यज्ञायीति कवेर्व्यङ्ग्यम्। आतपतापेन=घर्मतपनेन। तत्र=शास्त्रविषये। न बहु वचनीयम्=नाधिकं वक्तव्यम्। परास्तानामेष पन्था योऽनुसृतो जयसिंहेन विषयमनभिधाय स्वबोधव्यापनात्मा। प्रवञ्चनम्=धौर्त्यम्। नाङ्गीचिकीर्षति=नोररीकर्त्तुमिच्छति।

महा०—[क्षणं तूष्णीं स्थित्वा] महाराज ! तत्किं सदा यवन-पद-दलितयैव स्थास्यते हतभाग्यया भारतभूम्या ? दन्दल्यमानेनैव वर्तिष्यते चातुर्वर्ण्येन ? बम्भज्यमानेनैव वा भविष्यते सनातनधर्मेण ? अहह ! अस्मदीये कोङ्कणदेशे कोटिशो जनाः सुखेन स्वधर्ममनुतिष्ठन्ति, भेरीराहत्य सनातनधर्मस्य जयमुद्घोषयन्ति, चन्द्र-चुम्बि-कलशाग्रेषु माधव-मन्दिरेषु च सशङ्खवादमारार्तिक-महोत्सवान् अनुभवन्ति, किन्तु निखिलमिदमद्य श्रीमता संशयमारोपितम्। यदि वशंवदतामङ्गीकुर्याम्; तदधुनैव सुखेन यवनाः प्रविश्य प्रतिमन्दिरं पार्श्वतो मज्जितस्थानानि निर्म्माय कलहमारप्स्यन्ते। यदि भवताऽऽहवद्यूतमूरीकुर्य्याम्; तत् प्रथमं भगवती भारतभूः, ब्राह्मणानां क्षत्रियाणाञ्च मांस-रुधिर-कर्दमेन पङ्किला भवित्री, परतश्च भवादृक्षेषु भारतरत्नेषु प्रजामण्डलं निष्कण्टकीकृत्य यवनराजहस्ते समर्पितवत्सु, पुनस्तदेव मन्दिर-मर्द-

---

यवनानां पदेन दलितया=मर्दितया। हतभाग्यया=भागधेयविरहितया। भारतभूम्या=हैन्दवधरित्र्या। दन्दल्यमानेनैव=अतितरां दलनमधिगच्छतैव। चातुर्वर्ण्येन=चतुर्णां वर्णानां समाहारः, चतुर्वर्णम्, तदेव चातुर्वर्ण्यम् तेन। स्वार्थे ष्यञ्। बम्भज्यमानेनैव=अतितरां भ्रज्यमानेनैव। जयम्=विजयम्। उद्घोषयन्ति=प्रकटयन्ति। चन्द्रचुम्बिकलशाग्रेषु=शशिसंसर्गिशृङ्गेषु। सशब्दवादम्=कम्बुवादनपुरस्सरम्। आरार्त्तिकमहोत्सवान्=आरार्त्तिक्यमहोद्धवान्। पार्श्वतः=समीपे। आरप्स्यन्ते=आरम्भयिष्यन्ते। आहवद्यूतम्=युद्धकपटम्। मांसरुधिरकर्दमेन=मांसरक्तपङ्केन। पङ्किला=कर्दमभरिता। निष्कण्टकीकृत्य=निर्विघ्नीकृत्य। मन्दिराणां मर्दनम्=पातनम्। वेदानाम्,

नम्, तीर्थमन्थनम्, वेदच्छेदनम्, धेनुध्वंसनञ्च पदे पदे संवर्त्स्यते । अहह ! प्राणानगणयित्वा रक्षितोऽपि मयाऽयं देशोऽद्य भवच्चन्द्रहास-चन्द्रिका-चुम्बितोऽसाध्येन दुर्दश-ज्वरेणोल्लीढः ! किमिव करोमि ? महाराज ! पूर्वं जहि मां तीक्ष्णेन च्छुरिकाग्रेण, परतश्च देशमिमं यवनहस्तगतं विधास्यसि । [इति कथयन् कांश्चिदश्रुबिन्दूनपातयत्]—

जय०—[तदाकर्ण्य, स्वयमपि ग्लान इव, मुखं परिवर्त्य, चक्षुषी सम्मर्ज] महाराष्ट्रराज ! "भवितव्यं भवत्येव नारिकेलफलाम्बुवत्" । तदलं महता शोकेन । दृश्यताम्-किं किं न कृतं राजपुत्रदेशीयैः क्षत्रियैः ? किन्तु ये युद्धक्षेत्रे धारातीर्थे करप्रदताग्लानिं चिक्षालयिषन्तो जीवनमपि तृणाय मन्यमाना देहमपातयन्; तेषां पुत्रपौत्रा अधुना करप्रदाः संवृत्ताः । प्रबलैः सह विरोधो न भवत्येव सुखकरः । यदि भवान्मामपि युद्धे हन्यात्; तन् सम्राजा कश्चन परः सेनानीः प्रेषयिष्यते, तस्मिन्नपि च दैवाद्धते, अपरोऽपरः समायास्यति-इत्येवं न सम्भवत्यन्तो

छेदनम्=भेदनम् । धेनूनाम्=पयस्विनीनाम्, ध्वंसनम्=हननम् । संवर्त्स्यते=सम्भविष्यति । भवच्चन्द्रहासचन्द्रिकाचुम्बितः=भवदसिकौमुदीस्पृष्टः । दुर्दशेव, ज्वरः, तेन । उल्लीढः=आघ्रातः । जहि=मारय । तीक्ष्णेन=खरतरेण ।

ग्लान इव=गतहर्ष इव । नारिकेलफले यथाऽन्तराले, अम्बु=जलम्, तद्वत् । "गन्तव्यं गुप्तको याति गजभुक्तकपित्थवदि"त्युत्तरार्द्धम् । करप्रदताग्लानिम्=राजस्वविश्राणनमालिन्यम् । चिक्षालयिषन्तः=क्षालयितुमभि-

महाराष्ट्रदेशदुर्दशायाः। यत्र च चिरं युद्धानि भवन्ति; तत्रैव प्रायशो रोगा आपतन्ति, तत्रैव दरिद्रता पदमादधाति, तत्रैव च क्रमशः सर्वं महर्घतामाप्नुवद् भयानकं दुर्भिक्षं जनयति—इति चिर-युद्ध-हतोत्साहाः प्रजा भटाश्च हतोत्साहा भवन्ति-इती-दृशेष्वेवावसरेषु सन्धी राजधर्मः।

महा०—[क्षणं विमृश्य] महाराज! भवान् वृद्धो दीर्घदर्शी राज-धर्म्म-मर्म्मज्ञश्चेति मामप्यनुशास्तु। नाहं यवनरुधिरतृषितं खड्गं राजपुत्र-देशीय-क्षत्रिय-रक्तैरारक्तयितुमिच्छामि, न वा मम सहचराः स्वबान्धवाविशेषैर्भावत्कैर्योद्धुमुत्सहन्ते। तद् यदाज्ञाप्यते, तदेव मे शिरोधार्यम्। यथा श्रेयो भवति तथैवानुशास्योऽयमनुगतः।

जय०—वीर! सन्धिरेव श्रेयान्। कोङ्कणदेशे धर्मविप्लवोऽपि चैवं नाऽऽशङ्कनीयः। यतो भवान् केवलं करं दास्यति, स्व-

लघन्तः। **करप्रदाः**=राजस्वदायिनः। **सेनानीः**=वाहिनीपतिः। **महर्घताम्**=बहुमूल्यप्राप्यवस्तुताम्। **दुर्भिक्षम्**=अकालम्। **चिरयुद्धहतोत्साहाः**=दीर्घसङ्ग्रामविधुतसाहसाः। **सन्धिः**=मेलः। मूले "रो रि" लोपे दीर्घे च दीर्घप्रयोगः।

अनुशास्तु=अनुज्ञां ददातु। **यवनरुधिरतृषितम्**=म्लेच्छरक्तपिपासितम्। **आरक्तयितुम्**=लोहितीकर्तुम्। **स्वबान्धवाविशेषैः**=निजभ्रातृकल्पैः। **उत्सहन्ते**=सन्नद्धा भवन्ति। **शिरोधार्यम्**=शीर्षग्राह्यम्। **श्रेयः**=कल्याणम्। **अनुशास्यः**=आज्ञाप्यः। **अनुगतः**=पश्चात्पदः।

प्रजाश्च स्वयमेव पालयिष्यति ।

महा०—यदि ते बलान्मम शासने हस्तं क्षिपेयुः !

जय—मा भैषीः । अहं प्रतिजाने; न भविष्यति तथा, यथा राजपुत्रदेशीयभूपेषु करप्रदेष्वपि तत्र न हस्तक्षेप एषाम्, तथाऽत्रापि संवर्त्स्यति ।

महा०—महाराज ! बाल्येऽहं चिरं स्वप्नानपश्यम्—यद् दुराचारैर्म्लेच्छैः सह प्रतियोद्धुं स्वदेशस्य स्वातन्त्र्यं धर्मञ्च रक्षितुं मां स्वयं भगवती दुर्गाऽऽदिशतीति । तादृश—स्वप्नावलोकन—वर्द्धितोत्साहः क्रमेण यदकरवम् ; तन्मन्ये तिरोहितं नास्ति श्रीमन्निकटे । तदधुना विमूढ इव पृच्छामि, कीदृशा मे स्वप्नाः ? कीदृशञ्चानुष्ठितवानस्मीति ?

जय०—वीर ! अस्मद्देशे स्त्रियोऽपि तव गीतीर्गायन्ति, भारतस्य सुपुत्रोऽसि, भारतस्य रत्नमसि, आर्यवंशस्य ध्वजोऽसि । सत्यास्ते स्वप्नाः । अनुपमं तवोद्देश्यम् । भगवती सफलयतु तव मनोरथान् ।

महा०—राजन् ! प्रतिदिनं वर्द्धमाने यवन प्रतापे कथं स्युः सफला मनोरथाः ?

प्रतिजाने=प्रतिज्ञां करोमि ।

तिरोहितम्=अज्ञातम् । **विमूढ इव**=गतमनोष इव । **अनुष्ठितवान्**=कृतवान् ।

अनुपमम्=अतुलम्, उपमारहितम् ।

वर्द्धमाने=एधमाने ।

जय०—वीर ! कास्ति वर्द्धमानः प्रतापः ? एषां दुराचारकीटैरेवायं जर्जरितान्तःसारः संवर्तितोऽस्ति, तन्निश्चितामिमां वाचमवगच्छ, मौद्गल-राज्यं न चिराय स्थास्यति। इदमधुनैव महापातकैः कृत्तमूलं संवृत्तमस्ति। परतश्च प्रतिदिनमेतस्य क्षयः-इति काशीस्थ-बिन्दुमाधव-विश्वनाथादि-मन्दिर-समीपस्थ-महामज्जितस्थानेषु घूङ्कारैर्घूका घोरं घोषं विधास्यन्ति, वरटाः सरटाः करटाश्च चिक्रीडिष्यन्ति, तैलपायिकाश्च विष्ठाभिर्मलिनयिष्यन्ति।

महा०—दीनबन्धो ! भवादृशेषु सहायेषु कथमेवं सम्भवति ?

जय०—अहं वृद्धोऽस्मि। न चिरं जीवामि। यावतीनां प्रजानाञ्च हृदये जाज्वल्यते वैरवह्निः। एतदीया मण्डलशासका अनुचरा अपि गूढं विद्विषन्ति। कथं शासनमूरीकरणीयमिति बहुश एनं पत्रद्वारा बोधितवानस्मि। नैषोऽस्मदुपदेशाञ्छृणोति, प्रजाः पीड-

---

दुराचारा एव **कीटाः**=क्षुद्रजीवाः, तैः। **जर्जरितान्तःसारः**=विध्वस्ताभ्यन्तरिकबलः। **महापातकैः**=अहिंस्यहिंसनादिभिः। **कृत्तमूलम्**=छिन्नाधारम्। **क्षयः**=विनाशः। **घूङ्कारैः**=घूंशब्दैः। **घूकाः**=उलूकाः। **घोरम्**=अश्राव्यम्। **घोषम्**=रवम्। **वरटाः**=मयूरयोषितः। **सरटाः**=कृकलासाः। **करटाः**=काकाः। **चिक्रीडिष्यन्ति**=वारं वारं क्रीडां विधास्यन्ति। **तैलपायिकाः**=जतुकाः। "जतुकाजिनपत्र स्यात्परोष्णी तैलपायिके"त्यमरः। **विष्ठाभिः**=गूथैः। **मलिनयिष्यन्ति**=मलिनतामानयिष्यन्ति। सफलीभवतादाशीरियं वृद्धस्य कवेश्चेति महामायामभ्यर्थयामः।

यावतीनाम्=समस्तानाम्। **मण्डलशासकाः**=भूखण्डरक्षकाः। "सूबेदार, नवाब"इत्यादि पदवाच्याः। **गूढम्**=अप्रकटम्। **विद्विषन्ति**=शत्रुत्वमाच-

यति, बान्धवेष्वपि वैरायते, निज-धर्म-धुर्याणां मौलिवीनामपि च न कर्णे करोति वाचः, आसन्न-विनिपातानि भवन्तीदृश-शासकाध्युषितानि सिंहासनानि।

महा०—शान्तं पापम्! प्रतिहतममङ्गलम्!! चिरं जीवतु महाराजः!! [क्षणं द्वावपि तूष्णीकौ स्थितौ, परतश्च पुनः किंञ्चिद्विचार्य, प्रोवाच-महाराष्ट्रराजः] अहं चिरमयुध्ये—इति दिल्लीश्वरः कथं मैत्र्या वर्तिष्यते—इति संशये।

जय०—भवन्तमतिमात्रमित्रं मंस्यते दिल्लीश्वरः, यदि भवान् तस्य किमपि कार्यं साधयेत्।

महा०—किं तत्?

जय०—कार्यत्रयमुपस्थितमस्ति।

महा०—किं किम्?

जय०—प्रथमतस्तु गोलखण्डमायाते दिल्लीश्वरे, तत्समीपमागच्छन्ती, तद्हिता श्रीमती रसनारी मार्ग एव कैश्चन लुण्ठकै-

---

रन्ति। पत्रद्वारा, महाराजजयसिंहेन 'अवरङ्गजीवं' सम्बोध्य लिखितमेकं पत्रं तन्मुद्राङ्कितं काशीस्थाग्रवालप्रतिष्ठितरामनारायणदास-महोदयानां निकट आसीत्। तद् यथास्थितं भारतेन्दुहरिश्चन्द्रमहाशयेन प्राप्तम्, तद्द्वारा शिवराजविजयकारेण साक्षादवलोकितम्, भारतेन्दुना च निजे "बादशाहदर्पण"-नामधेये पुस्तके प्रकाशितमिति मूलकारशिष्यलिखिता मूलकारानुमोदिता च टिप्पणी। **बान्धवेषु**=भ्रातृषु। अवरङ्गजीवकर्तृकं भ्रातृवधादि नातितिरोहितमितिवृत्तविदाम्। **आसन्नविनिपातानि**=सन्निकटविनाशानि।

अयुध्ये=समग्रामयम्। **मैत्र्या**=मित्रतया। **संशये**=सन्दिग्धे।

रपहृता, साऽन्वेषणीया।

महा०—[मनस्येव प्रसीदन्] द्वितीयम् ?

जय०—द्वितीयतो भवतैव सह योद्धुं प्रस्थितो राजकुमारो मायाजिह्मः कुत्राप्यटवीष्वपभ्रष्टः, स तु नाद्यापि लब्धः—इति सोऽपि मार्गणीयः।

महा०—[मनसि स्मयमान इव] आम्! तृतीयम् ?

जय०—तृतीयतस्तु विजयपुरेश्वरेणाऽऽहवोऽनुष्ठेयः।

महा०—[सहर्षम्] एतत् त्रयमपि साधयिष्यामि।

जय०—इतोऽप्यधिकं किं नाम स्यात् कारणं तोषस्य? परं विजय-पुराधीशेन योत्स्यते भवानिति न सन्देहः; किन्तु शिष्टं कार्यद्वयं साधयिष्यत्येव—इति कथं विश्वसेयम् ?

ततः शनैः शनैरुभयोर्बहव आलापाः सञ्जाताः। परिशेषे च जयपुराधीशेनोक्तम्—सर्वमवगतवानस्मि। श्व एव मायाजिह्मं

अटवीषु=अरण्यानीषु। **अपभ्रष्टः**=मार्गच्युतः। **मार्गणीयः**=अन्वेषयितव्यः।

आहवः=सङ्ग्रामः।

विश्वसेयम्=विश्वासं कुर्याम्। "तनादि कृञ्भ्य उरि" त्यत्र कृञ्ग्रहणेन गणकार्यानित्यतामाश्रयन्तो बहवः कवयः परस्मैपदमपि प्रयुञ्जते। तथा च "न विश्वसेदविश्वस्तम्, आश्वसेयुर्निशाचरा" इत्यादि, किन्तु सकलजनानुमोदितेषु सार्वत्रिकेषु शुद्धतयाऽऽगोपालाङ्गनं प्रसिद्धेषु सत्सु किमिति तादृशप्रयोगः प्रयुज्यत इत्यध्यवस्यन्नात्मनेपदं प्रायुङ्क्तेति वेदितव्यम्।

अत्रभवति=माननीये भवति। **तोषम्**=प्रसन्नताम्।

रसनारीञ्चात्र प्रेषयतु, यथा स्वपत्रेण सह तौ दिल्लीं प्रेषयामि !

अत्रभवति चात्यन्तं दिल्लीश्वरस्य तोषं सम्पादयामि ।

महा०—यदाज्ञाप्यते ।

जय०—स्वीकृता भवताऽधुना सकरप्रदता मैत्री ?

महा०—सर्वोऽपि भवदादेशः शिरोधार्यः । ततो जयपुराधीश्वरः प्रतिष्ठासमानं महाराष्ट्रराजं सप्रेम सम्बोध्य प्रोक्तवान—"अस्तु, साम्प्रतं जिगमिषति भवांश्चेदस्माकीना भटा भवन्तमनुगच्छन्तः सिंहदुर्गपर्य्यन्तं कुशलेन प्रापयिष्यन्ति" । स तु—"आर्य ! परमुपकृतोऽस्मि सकरुण-भाषणेनानेन । रात्रावेकाकिभ्रमणमेवातितरां रोचते मह्यम । त्वरितगाम्याजानेयो बहिरस्तिक्षणेन मां नेष्यति"—इति सप्रश्रयमुक्तवान् ।

तत उत्थाय, ससादरसम्भाषणं प्रचलिते शिवराजे, अम्बरेश्वरोऽपि द्वारपर्य्यन्तमागत्य, आश्लिष्य विसृज्य च स्वयमन्तः प्रविवेश ।

महाराष्ट्रेश्वरोऽपि निजमाजानेयमारुह्य निवृत्तः, गूढवेषैरनेकैरात्मीयैरनुगम्यमानश्च, क्षणेन सिंहदुर्गमागत्य, जनन्या सह विविधैरालापैश्चिरं विहितजागरः, मन्थरैरङ्गैश्चिन्तासन्तानैकतान एव सुष्वाप ।

सकरप्रदता=सबलिविश्राणनता । **प्रतिष्ठासमानम्**=प्रस्थातुकामम् । **सप्रेम**=सानुरागम् । **एकाकिभ्रमणम्**=एकलचरणम् । **त्वरितगामी**=शीघ्रगतिः । **गूढवेषैः**=गुप्तनेपथ्यैः । **जनन्या**=मात्रा । **विहितजागरः**=अलब्धनिद्रः । **मन्थरैः**=सालस्यैः । **चिन्तासन्तानैकतान एव**=चिन्तनततिनिमग्नान्तरङ्ग एव । **सुष्वाप**=निद्रां भेजे ।

अथान्येद्युः प्रातरेव तोरणदुर्गं प्रविश्य, रसनारीमकथयद्द्–

"भद्रे ! कष्टमुपस्थितं महाराष्ट्र देशे, यदेष जयपुराधीश्वरो भवत्याः पित्रा प्रेषितः कटकानां कोटिभिर्योद्धुमायातोऽस्ति । न जाने भवत्यास्तातचरणः किमित्येवं युद्धलोलुपोऽस्ति। वीराणां बहूनि लक्षाणि, अस्मत्कोपकृशानुषु दग्धानि । इतोऽपि च न शाम्यति भवत्याः पितुर्युयुत्सा। मया निगृहीताऽपि भवती केवलं सत्कृता। मया वशे कृतोऽपि च भवत्या भ्राता केवलमादृतः। तातचरणश्च भवत्या एवं मैत्रीमपि दर्शयति मयि शत्रुतयैव च व्यवहरति। नेदं भद्रोचितं कार्यम्"।

तदाकर्ण्य, सनिश्वासं सचकितञ्च प्राह रसनारी--तर्किं भ्राता मे भवत्कारागारे निगडबद्धः ?

महाराजः---भद्रे ! नास्माभिरीदृशा निगडैः, किन्तु प्रेम्णा बद्ध्यन्ते। मया स्वपुत्र इव सोऽपि महाप्रासादे स्थापितोऽस्ति।

रस०—कतमोऽसौ भ्राता ?

महा०—कुमार-मायाजिह्वः।

अन्येद्युः=परस्मिन् दिवसे।

कष्टम्=खेदः। **कटकानाम्**=सेनानाम्। **कोटिभिः**=अनेककोटिभिः। अत एव बहुवचनम्। **युद्धलोलुपः**=सङ्ग्रामलुब्धः। अस्माकं कोपा एव कृशानवस्तेषु। रूपकम्। **दग्धानि**=भस्मीभूतानि। **युयुत्सा**=योद्धुमिच्छा। **आदृतः**=सत्कृतः। **दर्शयति**=प्रकटयति। शत्रुतम्। **भद्रोचितम्**=श्रेष्ठयोग्यम्।

भवत्कारागारे=भवच्चारके। **निगडबद्धः**=शृङ्खलायन्त्रितः।

ईदृशाः=महोदयाः। **बद्ध्यन्ते**=यन्त्र्यन्ते, स्वायत्तीक्रियन्त इति यावत्।

रस०—कथमत्राऽऽयातः ?

महा०—सोऽस्माभिर्योद्धुमायात आसीत्।

रस०—अथ ?

महा०—अथ सुन्दरस्य यूनः कुमारस्य हत्यामनिच्छद्भिरस्माकीनैः कथमपि स्वहस्तगत एव कृतः।

रस०—अथ तस्य स्वच्छन्दं प्रचारो रुद्धो वा ?

महा०—न किमपि। स्वच्छन्दं सोऽस्मासु विचरति।

रस०—[सास्रम्] चिराय नापश्यमहं तातमायाजिह्मम्, तद् दर्शयतु भवान् सपदि मे भ्रातरम्।

महा०—मुहूर्त्तेन द्रक्ष्यति भवती। [इत्युत्थाय दुर्गाध्यक्षं तमानाययितुमादिश्य, पुनरुपविश्य] गतदिवसेऽहं जयपुराधीशस्य शिविरं गत्वा बहुशः सन्धिवार्त्तां कृतवानस्मि किन्तु—

रस०—किं सन्धिं नाङ्गीकरोति ?

महा०—अङ्गीकरोति, किन्तु,—

रस०—आम्, कथ्यतां किमीहते सेनापतिः ?

महा०—सेनापतिर्भवत्या एवाधीनं मनुते।

रस०—उच्यतामुच्यताम्। अद्यवाहं गत्वा तं युद्धाद् वारयिष्यामि, प्रतिनिवर्तितुञ्च वक्ष्यामि। कथ्यतां किं तेनोक्तम् ?

महा०—राजकुमारि ! स वक्ति यद्—"महाराजाधिराजो

स्वच्छन्दम्=सस्वातन्त्र्यम्। प्रचारः=भ्रमणम्।

अधीनम्=आयत्तम्। मनुते=जानाति।

प्रतिनिवर्त्तितुम्=दिशं गन्तुम्। वक्ष्यामि=कथयिष्यामि।

दिल्लीश्वरः, कुमार्याः कुमारस्य च पदवीमलभमानोऽत्यन्तं चेखिद्यते। यदवधि स भवतोः प्रनष्टतामश्रौषीत्; तदारभ्य मित्रैर्न हसति, राजसभां नाधितिष्ठति, कलाकौशलानि नावधत्ते, आलाप-मूर्च्छना न शृणोति, उद्यानेष्वपि च न पर्य्यटति, 'हा वत्स! मायाजिह्म !! हा वत्से ! रसनारि !!'—इति समाक्रन्द-विलपितोद्भूतैर्बाष्पैरेव श्मश्रुं कूर्चञ्च स्नपयति। तत्र भवती महिषी, अन्या भोगिन्यश्च, हाहाकारैरेव समयं गमयन्ति"।

रस०—[साश्रुपातम्] हा तात ! हा मातः !! [इति रोदिति]

महा०—समाश्वसितु समाश्वसितु भवती शीघ्रं द्रक्ष्यति भवती पितरौ।

ततश्चिरं यावत् सान्त्वनामयं नीतिगर्भं दर्शित-पितृस्नेह-वर्षञ्चाऽऽलपन्, कुमार्या सह महाराष्ट्राध्यक्षः।

तावत् प्रतीहार्य्या प्रविश्योक्तम्,—'भगवन ! दिल्लीश्वरकुमारः समायाति,—इति। स तु श्रुत्वैवोत्थाय बहिर्निर्गत्य तं प्रणमन्तमालिङ्ग्य, एकाकिनमन्तः प्रावेशयत्।

पदवीम्=पन्थानम्। **चेखिद्यते**=अतितरां क्लिश्नाति। **प्रनष्टताम्**=अदृश्यताम्। **नाधितिष्ठति**=नाश्रयति। **नावधत्ते**=न विवेचयति। **समाक्रन्दात्**=रोदनात्, **विलपितात्**=सशब्दरोदनाच्च, **उद्भूतैः**=सञ्जातैः। **बाष्पैः**=अश्रुभिः। **महिषी**=पट्टराज्ञी। **भोगिन्यः**=इन्द्रियतृप्तिमात्रार्थमङ्गीकृताः।

द्रक्ष्यति=अवलोकयिष्यति। माता च पिता च पितरौ। "पिता मात्रा"।

सान्त्वनामयम्=सामयुक्तम्।

प्रतीहार्य्या=दौवारिकया। **निर्गत्य**=निःसृत्य। **एकाकिनम्**, स्वयमप्यप्रविश्येति चातुर्यपरा काष्ठा।

तत्र स भगिनीमवलोक्य कथं चमच्चकार, कथं वा ताभ्यां परस्परं प्रेमभारा विभराम्बभूविरे, काभिर्वा कथाभिः कतिचन क्षणा अतिवाहयाञ्चक्रिरे—इति नायं लेखनीविषयः।

कियत्क्षणानन्तरं स्व स्वागमन-गाथामुदीर्य, तौ द्वावपि महाराष्ट्रराज-प्रशंसा-परवशौ बभूवतुः। उभाभ्यां निरचायि च यद्-गत्वैव दिल्लीनगरीं दृढं तातचरणोऽभ्यर्थनीयो महाराष्ट्रराजेन सह सन्धातुम्। कुमारेणोक्तं—"भगिनि! तातः शत्रु-सम्बन्धिनो निगृह्य पशुमारं मारयति। महाराष्ट्रमेघवाहनश्चास्मादृक्षान् प्राप्यापि प्रेम-पूर-प्रवाहैरेव परिपोषयति—इति स्पष्टं कथयिष्यामि तातमेतेन युद्धं शमयितुम्"। तत उक्तं कुमार्य्या यद्—"भद्र! श्रूयते महत्या सेनया जयपुरेश्वरो महाराष्ट्राञ्छलभनाशं प्रणाशयितुं प्रेषितोऽस्ति।

माया०—आः! अधुनैव गत्वा निवारयामि जयपुरेश्वरम्।

चमच्चकार=चमत्कृतोऽभूत्। **प्रेमभाराः**=स्नेहभेदाः। **विभराम्बभूविरे**=दधिरे। **अतिवाहयाञ्चक्रिरे**=व्यतियापयाञ्चक्रिरे। **लेखन्या विषयो न**=वक्तुमनर्ह इति तत्त्वम्-केवलानुभवैकमात्रवेदितव्य इति यावत्।

स्वस्वागमनस्य **गाथाम्**=कथाम्। **उदीर्य**=निगद्य। **निरचायि**=निश्चयः कृतः। **सन्धातुम्**=मैत्रीं विधातुम्। **शत्रुसम्बन्धिनः**=रिपुसम्पर्किणः। **पशुमारं मारयति**=यथा पशवो मार्यन्ते तथा हन्ति। **महाराष्ट्रमेघवाहनः**=महाराष्ट्रेन्द्रः। "तुराषाण्मेघवाहन" इत्यमरः। **प्रेमपूरप्रवाहैः**=अनुरागधाराभिः। **शलभनाशं प्रणाशयितुम्**=शलभमिव नाशयितुम्। यथा पतङ्गा दीपमाश्रित्य स्वयं नश्यन्ति तद्वत्। "उपमाने कर्मणि चे"ति णमुल्।

रस०—भद्र ! श्रूयते युद्धमधुनाऽपि नाऽऽरब्धवान्, सन्धिश्च प्रस्तूयते।

ततः पित्रोर्दुःखविषयेऽपि सास्रं कथितवती कुमारी। कुमारोऽपि सबाष्पमाकर्ण्य, बहिरागत्य महाराजं प्रणम्य, सगद्गदमुवाच—

महाराज ! श्रीमतः स्नेहस्य चिराय ऋणी संवृत्तोऽस्मि, कुशलिनीं भगिनीमालोक्य चोपकारभाराक्रान्तः, शिरोप्युन्नमितुं न शक्नोमि। न जाने कैर्व्यवहारैरानृण्यं प्राप्स्यामि ?"

महा०—आयुष्मन् ! कथं न कथयेः, महतां कुमारोऽसि। किन्तु साम्प्रतं जयपुरपुरन्दरो योद्धुमायातोऽस्ति। विहितसन्धिप्रस्तावे च मयि, कथितवान्—यद् "यदि कुमारी, कुमारश्च, सुखेन दिल्लीश्वरान्तिकं व्रजेताम्; तदवश्यं सन्धास्यति महाराजाधिराज इति।" स च शिबिरस्थः कुमारं प्रतीक्षते।

माया०—एष प्रतिष्ठे यद्यनुमन्ये। अवश्यं सन्धानीयं तातेन। अन्यथा नाहं तस्य, न स मम।

ततो महाराष्ट्रपतिस्तं प्रतिपूज्य, सादरं स्वकीयैः सह विसृज्य, रसनारीसमीपे पुनरगच्छत्। रसनारी त्वनुभविष्यमाणेन शिव-

प्रस्तूयते=प्रस्तावविषयतां नीयते।

सगद्गदम्=अविस्पष्टाक्षरम्।

उपकार-भारेण=उपकृतिभरेण, **आक्रान्तः**=निम्नीकृतः। **उन्नमितुम्**=ऊर्ध्वयितुम्। **आनृण्यम्**=ऋणराहित्यम्।

प्रतिष्ठे=प्रस्थानं करोमि। **सन्धानीयम्**=सन्धयितव्यम्।

विरहेण ग्लाना, मुहुर्मुहुस्तातसेनाप्रेषणश्रवणेन कुपिता, मातापितृ-स्नेह-स्मरणेन च विकला, प्रस्थातुं नोमिति, न वा नेति, वक्तुं पारितवती ।

महाराष्ट्रेश्वरश्च तां चलप्रकृतिमगम्भीरस्वभावाञ्चावगत्य, "भद्रे ! अलं विषादैः ! दिल्लीं गत्वा पित्रोर्दुःखं शमय, मां स्नेहेन सनाथयसीत्यपि कयाचन मुद्रया प्रकटय । तेनानुमन्यमाना च मामप्यनुगृहाण । अन्यथा तु युद्धे संवृत्ते त्वत्पितरं जिघांसति मयि; श्व एव वा, परश्व एव वा, तव स्नेहः कार्श्यमासादयेत् । उत्तिष्ठ, वीरतनयाऽसि, राजकुमार्यसि, न शोभते त्वय्येतादृक्षश्चिन्ता-वितानः"-इति प्राबोधयत् ।

सा च चलप्रकृतितया यथा बोधिता; तथैव वर्द्धितोत्साहा, सन्धिं विहितमिव, पित्रनुमतिमासादितामिव, पाणिग्रहण-विधिं प्रबध्यमानमिव, आत्मानञ्च महाराष्ट्रराजेन स्निह्यमानमिव, मन्यमाना, सपद्युत्थाय, सप्रेम समालिङ्ग्य, तन्निर्दिष्ट-शिबिका-

---

अनुभविष्यमाणेन=कियत्कालानन्तरमेव भविष्यता । ग्लाना=क्षीण-हर्षा । विकला=खिन्ना । पारितवती=अशकत् ।

चलप्रकृतिम्=चञ्चलस्वभावाम् । शमय=शान्तिं नय । सनाथयसि=कृतार्थयसि । मुद्रया=भङ्गया । प्रकटय=विशकलय । अनुमन्यमाना=अनुमतिवचसा सम्भाव्यमाना । अनुगृहाण=अनुग्रहविषयं कुरु । शिववीरस्य दिल्लीगमने कारणमिदमेवेति कथनभङ्ग्याऽत्रत्यया विवेचयन्तु पण्डिताः । जिघांसति=हन्तुमिच्छति । कार्श्यम्=दौर्बल्यम् ।

पित्रनुमतिम्=जनकानुज्ञाम् । आसादितामिव=लब्धामिव । पाणि-

मारुह्य, बहुभिः सखीभिः परिवृता, अनेकैः सादिभिः पादातिकैश्चानुगम्यमाना, श्रीजयसिंहाध्युषित-शिविराभिमुखं प्रतस्थे।

अथ कालान्तरे महाराष्ट्रराजोऽपि, अम्बराधीश्वरस्य निकटे गतः। स चैनमवलोक्य, आलिङ्ग्य, अतिप्रेम्णाऽवादीत्—

"वीर! कुमारौ दिल्लीं प्रेषितवानस्मि। अनेनोपकारेणात्यन्तं मोदिष्यते दिल्लीवल्लभः। गृह्यतामिदं सन्धिपत्रम्, यानि दुर्गाणि भवता दिल्लीश्वरेण सह युद्धा बलाद् गृहीतानि, तानि निवर्तनीयानि, यथोल्लेखञ्च किञ्चन प्रतिवर्षं देयम्"।

महाराष्ट्रमुकुटस्तु, ओमित्युक्त्वा, सन्धिपत्रं गृहीत्वा, किञ्चिन् मलिनमुख इव संवृत्तः।

जयपुरेश्वरस्तु-"वीर! वर्द्धस्व, अलं शोकेन! समय एष ईदृश एव, साम्प्रतमुत्तिष्ठ, महाराजसाहाय्यं युद्धेषु विधेहि। विजयपुरेश्वर एष दिल्लीश्वरस्याऽऽज्ञां न पालयति-इत्येतेन सह बहूनि समराणि भूतानि भवन्ति च। तदत्र कौशलं दर्शयित्वा दिल्लीश्वरस्य दक्षिणो बाहुः संवर्तस्व"—इत्युवाच।

महाराष्ट्रराजस्तु, अनयाऽपि मुद्रया चिरन्तनसपत्नस्य विज-

ग्रहणविधिम्=विवाहविधानम्। **प्रबध्यमानम्**=समारभ्यमाणम्। **बहुभिः**=बहुभिः। **स्त्रीप्रत्ययस्य** वैकल्पिकत्वम्। **पादातिकैः**=पदगैः सैनिकैः।

मलिनमुखः=धूमिलाननः।

भूतानि=जातानि। **कौशलम्**=नैपुणीम्। **दक्षिणो बाहुः**=वामेतरो भुजः। परमस्नेहभाजनमिति यावत्।

अनयाऽपि मुद्रया=अनेनापि प्रकारेण। **चिरन्तन-सपत्नस्य**=पुरातन-

यपुरेश्वरस्य दमनाऽऽदेशश्रवणेन स्फुरितबाहुः सेना आयोजयितुं तत्क्षणादादिदेश।

आसीदासन्नमेव विजयपुराधीशस्य गिरिशिखरस्थमेकं रुद्रमण्डलाभिधं महद् दुर्गम्। तदेव हस्तगतं विधातुं कौशलमाचचार शिवराजः। एकान्ते गौरसिंहमाकार्य रात्रौ रुद्रमण्डलस्य पूर्वतः सेना आयोज्य, प्रस्थातुं परभटेषु सम्मुखमायातेषु च, पृष्ठतः शनै शनैरपसरणच्छलेन तान् पुरतो नेतुमादिशत्, स्वयञ्च महान्धतमसे, अन्यजीव-माल्यश्रीक-स्तन्यजीव-रघुवीरादिसहितः सहस्रं वीरान सह नीत्वा, रुद्रमण्डलस्य पृष्ठतो निभृतं प्रचलितः।

महानेष उच्चो गिरिः, अन्धतमसं व्याप्तम्, अविदितचरः पन्थाः, तथाऽपि क्वचिदुत्प्लुत्य क्वचिच्छाखा आलम्ब्य, क्वचिदुपविश्य, क्वचिन्निर्झरजलान्तः प्रविश्य, क्वचिल्लताजालान्यपसार्य, क्वचिद्विद्धान् कण्टकानपनीय, कथं कथमपि दुर्गस्य नेदीयस्याम-

शत्रोः। **दमनादेशश्रवणेन**=निग्रहाज्ञाश्रुत्या। **स्फुरितबाहुः**=चपलितभुजः। **आयोजयितुम्**=सन्नद्धयितुम्।

आसन्नम्=समीपवर्त्ति। **गिरिशिखरस्थम्**=पर्वतकोटिस्थम्। **हस्तगतम्**=स्वायत्तम्। **कौशलम्**=नैपुण्यम्। **आयोज्य**=एकत्रीकृत्य। **परभटेषु**=शत्रुसैनिकेषु। **अपसरणच्छलेन**=पलायनव्याजेन। **नेतुम्**=प्रापयितुम्। **महान्धतमसे**=गाढेऽन्धकारे। **निभृतम्**=गूढम्।

उच्चः=उन्नतः। **अविदितचरः**=अविज्ञातप्रायः। **लताजालानि**=व्रततिव्रातान्। **विद्धान्**=चरणादिषु प्रविष्टान्। **नेदीयस्याम्**=अन्तिकस्थायाम्।

धित्यकायामायातः। तावदपश्यद्–यद् दुर्गप्राचीर एका सदीपा काच–मञ्जूषा, अपराऽपराऽपि च स्थापितेति। ततो 'वयमाशङ्किताः' इति निश्चित्य सर्वे तरुच्छायासु विलीनाः। मुहूर्तानन्तरं पुनस्तूष्णीमुपगच्छन्तो ददृशुर्यत् पञ्चषा यवन–वीराः प्राचीरे पर्य्यटन्तः सतर्कमधो वीक्षन्ते–इति। पुनस्तेषु तरूणामधो विलीनेषु; अन्धतमस–वशादनीक्षमाणाः, मर्मरकारणमलभमाना दौर्गिकाः पुनर्निवृत्ताः। ततः किञ्चिज्जाते पादाघातशब्दे, अकस्माद् दुर्ग–प्राचीरस्योपरि, एकः, द्वौ, दश, शतं बहवश्च सशस्त्राः पुरुषा दृष्टाः। तेऽपि नेदिष्ठान् दृष्टवन्तः—इति वृक्षतलेषु लीयमानानपि प्रत्यर्थिनः शक्ति शराघातैस्ताडयितुमारेभिरे।

ततः पुरतः समागत्य, प्रत्यक्षं योद्धुमारब्धवता शिववीरेण निर्दिष्टाः, 'दृष्टा वयमिति किं व्यर्थाघातसहनैरात्माच्छादनैश्च' –इति स्वयं बोबुध्यमानाः, सक्ष्वेडं सर्वे शिवसहचराः–"हर हर महादेव" इत्युदीर्य, प्रत्यक्षीभूय च, शाखि–शाखान्तरोदर–सुप्त–पक्षि–पटलान्युन्निद्रयन्तः, चन्द्र–चन्द्रिका–साक्षिकं घोरं युद्धं

काचमञ्जूषा=रक्तवर्त्तिका। आशङ्किताः=आशङ्काविषयीकृताः, दौर्गिकैः। विलीनाः=क्षुपिताः। प्राचीरे=प्राकारे। सतर्कम्=सावधानम्। मर्मरकारणम्=पत्रध्वनिहेतुम्। दौर्गिकाः=दुर्गरक्षापरायणाः। सशस्त्राः=सायुधाः। नेदिष्ठान्=अतिशयान्तिकस्थान्। प्रत्यर्थिनः=शत्रून्।

व्यर्थाघातसहनैः=निष्प्रयोजनताडनानुभवैः। आत्माच्छादनैः=स्वगोपनैः। बोबुद्ध्यमानाः=अतितरां जानन्तः। प्रत्यक्षीभूय=साक्षादेव पुरत आगत्य। शाखिशाखान्तरोदरसुप्तपक्षिपटलानि=द्रुमावयवमध्यगृहीतनिद्रवि-

विधातुमुपक्रान्तवन्तः । यवनशरभल्लाहता बहवो महाराष्ट्र-वीराः, चन्द्र-मरीचि-चाकचक्य-चमत्कृतामधित्यकां कोष्णरुधिर-पातैः स्नपयन्तः, शिवविजय-कुङ्कुमेनेव चर्चयन्तः, ससूर्य-भेदं स्वर्गं प्रतिष्ठमानाः शिवं प्रणमन्त इव च पेतुः । महाराष्ट्र-शरासन-मुक्तैः शिलीमुखैराहताः यवनवीरा अपि च बहुशः प्राचीरमुभयतः पेतुः ।

अथ यावन्महाराष्ट्राधीशश्चिन्तयति यत्-"किमेतेनेदृशेन क्रीडनकेनेव युद्धेन ? मध्ये मध्ये विहता वीरा उभयतः पतन्ति । अस्माकं चक्षुप्रवेशश्च दुर्ग्गेऽस्मिन्न भवति । होराद्वयानन्तरं मार्तण्ड-मण्डलमुदेष्यति । ततस्तु कथमपि न पारयिष्यामोऽधिकबलानेतान् विजेतुम्, तन् सपदि केनापि कौशलेन प्राचीरमारुह्य दुर्ग्गस्यान्तः प्रवेष्टव्यम्"—इति ।

तावद् दृष्टवान् यदेको नववयस्को महाराष्ट्र-वीरो घोर

हगसमूहान् । **उन्निद्रयन्तः**=जागरयन्तः । **चन्द्रचन्द्रिकासाक्षिकम्**=हिमदीधिति-किरण-प्रत्यक्षदर्शकम् । चन्द्रस्य **मरीचीनाम्**=किरणानां चाकचक्येन चमत्कृताम् । **कोष्णरुधिरपातैः**=कदुष्णरक्तपतनैः । शिवविजयस्य **कुङ्कुमेन**=केसरेण । **चर्चयन्तः**=लिम्पन्तः । **ससूर्यभेदम्**=तिग्मदीधितिमण्डलभेदनपुरस्सरम् । **स्वर्गम्**=अपुनरावृत्तिस्थलम् । महाराष्ट्राणाम्, **शरासनेभ्यः**=धनुर्भ्यः, **मुक्तैः**=निःसृतैः । **शिलीमुखैः**=बाणैः । **प्राचीरमुभयतः**, तसिलान्तयोगे द्वितीया, "ततोऽन्यत्रापि दृश्यत" इति ।

क्रीडनकेनेव=खेलेनेव । **चक्षुप्रवेशः**=लघुरपि प्रवेशः । **होराद्वयानन्तरम्**="घण्टा"-द्वयस्य पश्चात् ।

युद्धमगणयन , उपर्य्यधः कतिपयान् शिला-खण्डान् चित्वा भित्ति-कार्पित-भल्ल-समाश्रयो लाघवेनोत्प्लुत्य, प्राचीरमारुह्य, "विजयते महाराष्ट्र राजः"—इत्युच्चैरवदत्।

तञ्च तथाऽऽरूढमालोक्य, यवनाः सदन्तघर्षं सन्दष्टदशनच्छदं निस्त्रिंशान् कोशादाकर्षन्तः शक्तिमुत्तोलयन्तः शरासनानि टङ्कुर्वन्तश्च परितः समापतिताः। तांश्च भूमिष्ठा अपि महाराष्ट्रवीराः शरघातैरविध्यन्, प्राचीरारूढमात्मसहचरञ्च समरक्षन्। तदालोक्य गौरव-गरिष्ठोऽपि लाघवेनोत्पत्य, सहचरैरप्यवितर्कितोत्पतनो वीरशिवः स्वयमपि प्राचीरमारुह्य परितः समापतितान्प्रत्यर्थिनः कदर्थीकृत्योभयतः समपातयत्।

ततः सक्वेडम्-"आरुह्यतामारुह्यताम्"-इत्युक्त्वा धाविता महाराष्ट्राध्यक्षोत्साहिता बहवो महाराष्ट्रवीराः सोत्फालं प्राचीरमारोहन्, हस्तावलम्बेन चान्यान् बहून् क्षणेनोदतूतुलन्।

नववयस्कः=नूतनावस्थाकः। **चित्वा**=एकत्रीकृत्य। **भित्तिकार्पितः**=कुड्यमंस्थापितः, **भल्लः**=कुन्तः, **समाश्रयः**=आधारो यस्य सः।

सदन्तघर्षम्=सदशनघट्टनम्। **सन्दष्टदशनच्छदम्**=ओष्ठखण्डनपुरस्सरम्। **निस्त्रिंशान्**=असीन्। **टङ्कुर्वन्तः**=टङ्कारशब्दभरितान् कुर्वन्तः। **भूमिष्ठाः**=भूतले तिष्ठन्तः। **अविध्यन्**=अताडयन्। **आत्मसहचरम्**=निजसहगामिनम्। **गौरवेण गरिष्ठः**=अतिशयगुरुः। **लाघवेन**=लघुशरीरतया। **अवितर्कितोत्पतनः**=अविचिन्तितोर्ध्वगमनः। **कदर्थीकृत्य**=विनाश्य। **समपातयत्**=समपोथयत्।

सक्वेडम्=सतिरस्कारम्। **महाराष्ट्राध्यक्षेण**=शिववीरेण, **उत्सा-**

क्षणं तत्र घोरं युद्धमभूत् । तावदकस्माद् दृष्टम्–यत् कश्चन "हर हर महादेव"–इति तारस्वरेणोच्चारयन् खड्गं चालयन् सोत्फालं दुर्ग्गान्तः पतितोऽस्ति । सोऽयं रघुवीरसिंहः, यः सर्वेभ्यः प्रथममेव प्राचीरमारूढः, प्रथममेव च दुर्ग्गान्तः प्रविश्य, साहसमप्यकार्षीत् । तेन सहैव वीरराजशिवोऽपि शार्दूल इव जघन्य–वन्य–मण्डले समापपत्त् । तन्निरीक्ष्य, शतशो महाराष्ट्र–वीरास्तथैव सकूर्दनं दुर्ग्गान्तः प्रविष्टाः । तत्र च मुहूर्त्तं तुमुलं युद्धमभूत् ।

दण्डद्वयेनैव शतशो यवना हताः, अपरे च जीवन्त एव निगृहीताः, शान्तमिव च युद्धम् । ततो महाराष्ट्र–वीराः स्थूल–दीपान सञ्ज्वाल्य दुर्ग–मध्यस्थ–प्रासादाभिमुखं चलिताः, दृष्टवन्तश्च यद् दुर्ग्गाध्यक्षो गृहान्तः प्रविष्टः, द्वारञ्च लौह–शृङ्खल–कीलैर्दृढ–तरैः कवाटैरमुद्रदिति । निरीक्ष्यैतत् क्षणं विचार्य महाराष्ट्र–राजः सगर्जनमुवाच— "दुर्ग्गाध्यक्ष ! स्वामिभक्तिं दर्शितवानसि, यथाशक्ति दुर्गं रक्षितवानसि, व्यर्थोऽधुना लज्जया गृहप्रवेशः,

---

हिताः=वर्धितसाहसाः । **सोत्फालम्**=सकूर्दनम् । **हस्तावलम्बनेन**=करावलम्बनेन । **उदत्तुलन्**=ऊर्ध्वयन् । **शार्दूलः**=सिंहः । **जघन्यानाम्**=क्षुद्राणाम्, **वन्यानाम्**=आरण्यकानाम्–शृगालादीनाम्, **मण्डले**=समूहे । **समापपत्त्**=समागच्छत् । **सकूर्दनम्**=सोत्फालम । **तुमुलम्**=भयानकम् ।

दण्डद्वयेन=घटिकाद्वयेन । **निगृहीताः**=वशीकृताः । **स्थूलदीपान्**="मशाल"इति ख्यातान् । **दुर्गमध्यस्थस्य**=दुर्गान्तरालविद्यमानस्य, **प्रासादस्य**=हर्म्यस्य, **अभिमुखम्**=सम्मुखम् । **लौहशृङ्खलकीलैः**=आयसनिगडकण्टकैः । **दृढतरैः**=कठोरतरैः । **कपाटैः**=अररैः । **अमुमुद्रत्** =प्यधात् । सग-

तत् स्वयं बहिर्निर्गच्छसि चेद् जीवन्तं त्यक्ष्यामः, इतरथा तु प्रासादेन सह त्वां क्षणेन धक्ष्यामः"—इति

दुर्गाध्यक्षो रहोमत्तखानस्तु क्रियासमभिहारेण शृण्वन्नपि न बहिर्निरगात्। अथ महाराष्ट्रराजस्याऽऽज्ञामवाप्य, तदीया इन्धनैरावृत्य प्रासादममुं ज्वालयितुमारेभिरे। ततः समन्ततो विहायसं लिहन्तीषु देदीप्यमानासु शिखासु, 'अवीरयोग्यं मृत्युं प्राप्नोऽहम्' इत्याशङ्क्य खड्गहस्तो गवाक्षिकात उत्प्लुत्य, भूमौ पतितो रहोमत्तखान उवाच—

किमिति ममैकस्य प्राणार्थं महामूल्यं महार्घ-वस्तुजात-पूरितं महाप्रासादं दहथ? एषोऽस्मि। यथेच्छं प्रहरत। स्वाम्यर्थेऽहं प्राणानुत्सृजामि—

तदाकलय्य, परितः परिपतितेषु महाराष्ट्रवीरेषु, महाराष्ट्रपतिरगादीत्—

"वीरोऽसौ, वीरोऽसौ, न हन्तव्यः, न हन्तव्यः। किन्तु

र्जनम्=सञ्चेडम्। धक्ष्यामः=ज्वालयिष्यामः।

रहोमत्तखानः="रहमत खां"इति लोके प्रसिद्धः। **निरगात्**=निष्क्रान्तः। **इन्धनैः**=काष्ठैः। **आवृत्य**=आच्छाद्य। **आरेभिरे**=आरब्धवन्तः। **विहायसम्**=गगनम्। **लिहन्तीषु**=स्पृशन्तीषु। **देदीप्यमानासु**=अतितरां ज्वलन्तीषु। **अवीरयोग्यम्**=शूरानुपयुक्तम्। **गवाक्षिकातः**=वातायनिकातः। **उत्प्लुत्य**=सङ्कूर्द्य।

दहथ=ज्वालयथ। **यथेच्छम्**=यथाभिलाषम्। **प्रहरत**=मारयत। **उत्सृजामि**, "वर्त्तमानसामीप्ये वर्त्तमानवद्वा"।

जीवन्नेव गृहीतव्यः"-इति। तत एकाकिन्यपि, सुसज्ज-निस्त्रिंशानां महाराष्ट्र-वीराणां मण्डले, सखड्गचालनं दक्षान् वामांश्च मार्गांश्चरति तस्मिन् यवनवीरे, अकस्माद् विद्युच्चमत्कार इव सोत्फालमापत्य रघुवीरः सत्सरुं तस्य मुष्टिं जग्राह। यावच्चैषको यतत आच्छेत्तुं स्वहस्तम्; तावद् अपरे वीरा दृढं गृहीत्वा, तत्करान्चन्द्रहासमाच्छिद्य, उष्णीषिकापटेन बाह्वोः स्कन्धे च समबध्नन्। महाराजाऽऽज्ञया चानेक-शत-निगृहीत-जनाधिष्ठिते कोण-गृहे तमपि निक्षिप्य, कवाटे सममुमुद्रन्।

ततः प्रासाद-दाहं शमयित्वा, कथं कथमप्यन्तः प्रविश्य, अट्टालिकामारुह्य, महाराष्ट्रराजो दृष्टवान्—यत् पूर्वतः सञ्जात एवारुणोदयः। तत्प्रभया किञ्चित् किञ्चिद् भासमाने भूभागे सुदूरमवलोकितवान्—यत् परिपन्थि-पदातिनां षट् सप्त वा शतानि, स्वाभिमुखमेव धावमानानि समायान्तीति। अतर्कयच्च यदवश्यमेते गौरसिंह-सेना-कोलाहलाऽऽकृष्टाः सुदूरं पूर्वतो गता

एकाकिनि=असहाये। **सुसज्जनिस्त्रिंशानाम्**=सन्नद्धीकृतासीनाम्। **सखड्गचालनम्**=सचन्द्रहासमारणम्। **विद्युच्चमत्कार इव**=चपलाचमत्कृतिरिव। **सत्सरुम्**=सखड्गमुष्टिम्। एष एव, एषकः। "अव्ययसर्वनाम्नामकच्प्राक्टेः"। **यतते**=श्रमते। **आच्छेत्तुम्**=खण्डयितुम्। **उष्णीषिकापटेन**=शिरोवसनवाससा। **अनेकशतनिगृहीतजनाधिष्ठिते**=अत्यधिकचारकीकृतमानवविराजिते। **निक्षिप्य**=बलात्प्रवेश्य। **सममुमुद्रन्**=अप्यधुः।

अरुणोदयः=भास्करोद्भूतिपूर्वकालिकलौहित्याविर्भावः। **भासमाने**=द्योतमाने। **परिपन्थिपदातिनाम्**=शत्रुपदगानाम्। **धावमानानि**=त्वरया चलन्ति।

आसन्; तत एव च प्रासाद-दाह-ज्वाला-माला अवलोक्येतो निवृत्ताः कोप-कषायिताः समायान्ति, तन् सपत्नैवैतैः सह युद्धस्य कश्चन सकौशलं प्रबन्धो विधेयः, अन्यथा तु निःशेषमेवैतेऽस्मान् समुच्छेत्स्यन्ति ।

अथ महाराष्ट्रराजः क्षणं स्वमित्रैः सह सम्मन्त्र्य, दुर्ग्गाध्यक्ष-प्रासादमेव प्रविश्य, यथास्थानं सेना आयोज्य, दुर्ग्ग-युद्धार्थमवावातिष्ठत। क्षणं विमृश्य च, स्वप्रधानवीरानाहूय पुनरुवाच-

"मित्राणि! यद्यप्यायस्तमस्मन्मण्डलम्, सत्रणा बहवः पदातयः, साम्मुख्यं द्विगुणैः परिपन्थिभिः, तथाऽपि सकाशमागच्छन्तीं शत्रु-सेनामालोकयतोऽपि तूष्णीं स्थातुं नोत्सहते मे चेतः। सदैव प्रसह्याऽऽक्रम्य युद्धवानस्मीति गृह आत्मानमाच्छाद्य वर्त्तितुं नोररीकरोत्युरः। अप्यस्ति कश्चिद्वीरः; यः शतद्वयं भटान्सह नीत्वा, अग्रत एव गत्वा, शस्त्रक्रीडया वराकैरेतैः सपत्नैः क्रीडेत्? विश्वसिमि, एतेषां पृष्ठलग्न एव गौरसिंहोऽपि ससेन आयातीति,

गौरसिंहस्य सेनायाः **कोलाहलेन**=कलकलेन, **आकृष्टाः**=आहूताः। **प्रासाद-दाहेन**=हर्म्यज्वलनेन, **ज्वालामालाः**। **कोपकषायिताः**=क्रोधकलुषिताः। **सकौशलम्**=सनैपुण्यम्। **निःशेषम्**=अनवशिष्टम्, यथा स्यात्तथा।

संमन्त्र्य=विचार्य।

आयस्तम्=स्थगितम्। **अस्मन्मण्डलम्**=अस्मत्सैन्यम्। **सत्रणाः**=साघाताः। **साम्मुख्यम्**=आभिमुख्यम्। "सामना" इति हिन्दी। **सकाशम्**=समीपम्। **प्रसह्य**=बलात्। **गृहे**=दुर्ग्गे। **वर्त्तितुम्**=स्थातुम्। **नोररीकरोति**=न स्वीकरोति। **उरः**=चेतः। **वराकैः**=क्षुद्रैः। **सपत्नैः**=शत्रुभिः। **पृष्ठलग्नः**=प-

यावदितोऽस्मत्सेना होरार्द्धमिव समर-दुरोदरेण यापयिष्यति; तावद् गौरोऽपि तत आगत्य, कृपाण-धाराभिरेतान् म्लपयिष्यति—इति कथ्यताम्, कः समुत्सहते द्वे शते वीराणां सह नीत्वाऽग्रत एव सपत्नान् शक्ति-पातैः सत्कर्तुम् ?"—इति।

तदाकर्ण्य, "सज्जा वयं शिरसा वोढुमादेशम्"—इति सर्वे प्रोचुः। ततः परितो विलोकयन् महाराष्ट्रराजः, रघुवीरसिंहमपि बद्धाञ्जलिं सम्मुखस्थमालोक्य, व्याजहार—"रघुवीर! अद्य त्वमेव युद्धमारब्धवानसि, त्वमेव च मध्येऽपि पराक्रमं दर्शितवानसि, त्वमेव चाधुना युद्धं समापय, पूर्ण-पारितोषिक-भाक् च भव"।

तदवधार्य, प्रणम्योमित्युक्त्वा, रघुवीरः शतद्वयं साहसिकान् पत्तीन् सह नीत्वा, समापत्य, उच्छलितकोपैर्यवनवीरैः सह युद्धमन्वतिष्ठत्। सपत्नापेक्षया त्रिगुणितेष्वपि, विस्मितप्रायेषु च तेषु ससिंहनादं प्रासासि-रिष्टि-तोमर-क्षेप-तत्परेषु; अकस्मात् पृष्ठतो "हर हर महादेव"—इति व्याहरन्ती, गौरसिंह-सेनाऽपि

श्चात्पदः। **होरार्द्धम्**=घण्टार्द्धम्। समरमेव **दुरोदरम्**=द्यूतम्, तेन। **कृपाण-धाराभिः**=चन्द्रहासप्रवाहैः। **म्लपयिष्यन्ति**=म्लानं कारयिष्यन्ति। मारयिष्यन्तीति यावत्। शक्तीनां **पातैः**=मारणैः। **सत्कर्त्तुम्**=आदर्तुम्। हन्तुमिति यावत्।

सज्जाः=सन्नद्धाः। **पूर्णस्य**=समग्रस्य, **पारितोषिकस्य**=कृते कार्ये प्रसन्नतया दीयमानस्य, **भाक्**=गृहीता।

पत्तीन्=पदातिसैनिकान्। **उच्छलितकोपैः**=विवृद्धक्रोधैः। प्रासासिरिष्टि-तोमराणां **क्षेपे**=पातने, **तत्परेषु**=निरतेषु। **व्याहरन्ती**=कथयन्ती। प्रत्या-

समापपन्न। ततः क्षणेनैव बहुषु विनिष्टेषु परेषु निगृहीतेषु च शत्रु-वर्गेषु, जयध्वनिं प्रख्यापयन्तः सर्वेऽपि समागत्य महाराष्ट्रराजं प्रणम्य विजयदुर्ग-विजय-वैजयन्ती-रुड्डीय भेरीराहत्य जय-नादैर्गगनं व्यलोडयन्।

तावदरुण-पीत-प्रकाशेन दरीदृश्यमानासु सकल-भित्तिकासु, वनस्थलीषु, उपत्यकासु, अधित्यकासु, अट्टालिकासु च, महाराष्ट्र-राजः, ससाधुवादमखिलान् सम्मान्य, नित्य-क्रियाभिरात्मानं सुख-यितुं विससर्ज, उक्तवांश्च गौरसिंहं यत्—

"स्वयं गत्वा महाराजमम्बरेश्वरं रुद्रमण्डल-विजय-वृत्तान्तम-वगमय, ब्रूहि च, यदपराह्णेऽद्य रुद्रमण्डल-प्रासादे, साधुवाद-पारितोषिकादि-वितरणैः प्रदर्शित-युद्ध-कौशलान् भटानधिकमु-त्साहयितुं सभा भवित्री, तत्रोपस्थाय महाराजेन द्विगुणं सनाथनी-या समितिः"—इति।

तस्मिंस्तथा प्रस्थिते दुर्ग-प्राचीर-द्वारादिस्थानेषु यथोचितं विश्वस्त-चिरन्तन-स्वामिभक्त-भटानायोज्य, सभा-स्थानं परि-

पयन्तः=प्रकटयन्तः। **व्यलोडयन्**=ममन्थुः। जयध्वनिभिरपूरयन्निति यावत्।

अरुणस्य=भुवनभास्करस्य, पीतेन प्रकाशेन। **दरीदृश्यमानासु**=अव-लुलोक्यमानासु।

अवगमय=बोधय। **ब्रूहि**=कथय। **अपराह्णे**=अह्नो द्वितीये भागे। द्वाद-शवादनादूर्ध्वमिति यावत्। **उत्साहयितुम्**=ससाहसयितुम्। **उपस्थाय**=उपस्थि-तीभूय। **सनाथनीया**=सस्वामिकीकरणीया। **समितिः**=सभा।

विश्वस्तान्=विश्वासार्हान्, **चिरन्तनस्वामिभक्तान्**=प्राचीनाधिपतिसे-

कर्तुं कांश्चिदादिश्य, स्वमनसि स्वास्थ्यमाससाद ।

अथ तथाऽनुष्ठितवत्स्वखिलेषु, विहित-भोजनादि-क्रिये परतः किञ्चिन्निद्रा-मुद्रयेव विद्रावित-मान्थर्ये जयपुराधीश्वरे, पश्चिमायामवनमति मार्तण्ड-मण्डले, चण्ड-मरीचि-प्रचयेपत्प्रतप्त-वाताऽऽघात-प्रताप-शुष्यत्फल-पत्र-शाखा-प्रशाखेषु वृक्ष-क्षुप-व्रततीव्रजेषु, होराद्वयात् परत एव सम्पत्स्यमाने सायङ्काले, रुद्रमण्डलस्थ-महाप्रासाद-सम्मुखे प्रवितभूभागे सुवर्ण-सूत्र-प्रचय-रचित-लता-कुसुम-चित्र-विचित्रस्य, विविध-वर्ण-वर्णनीय-स्तम्भ-शतोच्छ्रितस्य, पुष्कल-दाम-शताकृष्ट-बद्धस्य, कौशेयोल्लोचन्या-

---

वकान्। **आयोज्य**=संलग्य । **परिष्कर्तुम्**=स्वच्छयितुम् । **स्वास्थ्यम्**=कृतकृत्यताऽऽनन्दम् । **आससाद**=प्राप ।

अनुष्ठितवत्सु=कृतवत्सु । **निद्रामुद्रया**=स्वापभङ्ग्या । **विद्रावितमान्थर्ये**=दूरीकृतालस्ये । **अवनमति**=नम्रीभवति । **चण्डमरीचीनाम्**=खरतरदीधितीनाम्, **प्रचयेन**=समूहेन, **ईषत्प्रतप्तस्य**=उष्णप्रायस्य, **वातस्य**=वायोः, **आघातप्रतापेन**=ताडनतेजसा, **शुष्यन्त्यः**=शोषमुपगच्छन्त्यः, फलपत्रशाखाप्रशाखा येषां तेषु । **वृक्षाः**=अनोकहाः, **क्षुपाः**=ह्रस्वशाखाः, **व्रतत्यः**=लताः, एतासां **व्रजेषु**=समूहेषु । **सम्पत्स्यमाने**=भाविनि । **प्रविततेः**=अतिविस्तीर्णे, **भूभागे**=भूप्रदेशे । **सुवर्णसूत्रप्रचयेन**=हैरण्यतन्तुसमूहेन, **रचितैः**=निर्मितैः, लतानां कुसुमानाञ्च, **चित्रैः**=आलेख्यैः, **विचित्रितस्य**=विभूषितस्य । **विविधैः**=अनेकप्रकारैः, **वर्णैः**=रङ्गैः, **वर्णनीयानि**=रञ्जनीयानि, यानि **स्तम्भशतानि**=अनेकान्याधारभूतानि, तैः, **उच्छ्रितस्य**=उन्नतस्य । **पुष्कलानाम्**=पुष्टानाम्, **दाम्नाम्**=रज्जूनाम् शतैः, आकृष्टस्य, बद्धस्य च । **कौशेयोल्लोचस्य**=पट्टसूत्री-

धस्ताद्, आस्तीर्णेषु कौशेयाऽऽस्तरणेषु, महासभा समतिष्ठत।

तत्र हि कनकसूत्र-गुम्फित-प्रान्तासनाच्छादितायामेकस्यां वितस्त्युच्च्रय-तूलिकायां महोपबर्ह-लग्न-पृष्ठो जयपुराधीश्वर उपविष्टः। तत्रैव च तद्वामतो महाराष्ट्र-राष्ट्र-त्रिविष्टपेष्टोऽपि समवर्तिष्ट। परितो यथाधिकारं क्रमतो द्वयोरपि राज्ञोः कृपा-पात्राण्युपविष्टानि। वितानं परितश्च बद्धपङ्क्त्यो योद्धारः सुसज्जाः समतिष्ठन्त। प्रभाकर-प्रभा-प्रचय-प्रपात-प्रहतानाम्, तत्कटिबद्ध-महारजत-रजतादि-पट्टिकानाम्, स्कन्धोन्नमित-शक्ति-भल्लानाम्, कटि-विलम्बित-कृपाण-सौवर्ण-त्सरूणाम्, वेष्टित-गण्ड-युगल-चिबुकानाम्, राजत-लेप-लिप्त-लौह-शृङ्खलोष्णीषिका-बन्धना-

---

यवितानस्य। आस्तीर्णेषु=विस्तीर्णेषु। कौशेयास्तरणेषु=पट्टसूत्रनिर्मितवसनेषु। महासभा=विशाला समितिः।

कनकसूत्रैः=हैरण्यतन्तुभिः, गुम्फितः=ग्रथितः, प्रान्तो यस्य तादृशेन, आसनेन=प्रावरणविष्टरेण, आच्छादितायाम्=गोपितायाम्। वितस्त्युच्छ्रायायाम्=चतुर्विंशत्यङ्गुल्यौन्नत्यायाम्, तूलिकायाम्=तूलवत्याम्। महोपबर्ह=महोपधाने, लग्नं पृष्ठं यस्य सः। महाराष्ट्रराष्ट्रमेव त्रिविष्टपम्=स्वर्गम्, तस्य, इष्टः=अभिमतः। समवर्तिष्ट=समस्थित। कृपापात्राणि=दयाभाजनानि। वितानं परितः=उल्लोचस्य चतुर्दिक्षु। "अभितः परित" इत्यादिना द्वितीया। प्रभाकर-प्रभाप्रचयस्य=भास्करभासमूहस्य, प्रपातैः=प्रपतनैः, प्रहतानाम्=ताडितानाम्। भासितानामिति यावत्। तत्कटिषु=वीराणां मध्यभागेषु, बद्धानाम्, महारजतस्य=सुवर्णस्य, रजतस्य=दुर्वर्णस्य, आदिना, रीत्यादेश्च, पट्टिकानाम्। स्कन्धेषु, उन्नमितानाम्=उन्नमय्य स्थापितानाम्, शक्तीनां भल्लानाञ्च। कटि-

नाञ्च चाकचक्यम्, अवलोचकलोचनमतीतडत्। कलित-महाध्वजाः परितः प्रसर्पिणो वीराश्च, सभेरीनादं श्रीशिवराजस्य महाराज-जयसिंहस्य च जयमजूघुषन्।

ततो महाराष्ट्रराजः संक्षेपेण रुद्रमण्डल-विजय-वृत्तान्तमश्रावयज्जयसिंहम्, स च ससाधुवादमखिलानुत्साहयाम्बभूव। ततो महाराष्ट्रराजो गौरसिंह-श्यामसिंह-क्रूरसिंह-माल्यश्रीकादीन् प्रत्येकमङ्गुल्या निर्दिश्योक्तवान्—"एत एव प्राधान्येन विहितसाहाय्या मम—इति। जयसिंहश्च तान् प्रशशंस, स्वहस्तेन चैकैकमसिधेनुकादानेन पर्यतोषयत्।

अथ रघुवीरं निर्दिश्य शिवराजः कथितवान्-"महाराज! एष एव वीरबालो रुद्र-मण्डल-जयस्य प्रधान-कारणम्, अयमेव प्रथमं युद्धमारब्धवान्, अयमेव शर-प्रपातमगणयित्वा प्रथमं प्राचीरमारूढः, अयमेव रिपु-निकर-व्याप्ते दुर्ग्गे प्रथमं सोत्फालमन्तः प्रविष्टः, अयमेव दुर्ग्गाध्यक्षं निगृहीतवान्, अयमेव च

विलम्बितानाम्, कृपाणानाम्, सौवर्णानां त्सरूणाञ्च। **राजतलेपेन** लिप्तानाम्, लौहश्रृङ्खलाभिन्नानाम्, उष्णीषिकाबन्धनानाम्। **चाकचक्यम्**=चमत्कृतिः। **अवलोचकलोचनम्**=द्रष्टृनयनम्। **अतीतडत्**=अजीघातत्। **कलितमहाध्वजाः**=धारितविजयवैजयन्तीकाः। **प्रसर्पिणः**=गच्छन्तः। **अजूघुषन्**=घोषितवन्तः।

अङ्गुल्या=करजेन। **प्राधान्येन**=वैशिष्ट्येन। **एकैकम्**=प्रत्येकम्। **असिधेनुकायाः**=छुरिकायाः, **दानेन**=समर्पणेन।

शराणाम्=इषूणाम्, **प्रपातम्**=घोरपतनम्। **रिपुनिकरव्याप्ते**=शत्रु-

परस्तात् समापतन्तीं यवनसेनां त्रिगुणामत्यल्पीयस्या सेनया पराजेष्ट"।

तदाकर्ण्य सर्वे प्रासीदन्, ऋते दन्दह्यमानहृदयात् क्रूरसिंहात्। अम्बराधीशस्तूत्थाय, तस्मै स्वहस्तस्थं महासिमयच्छत्, साधुवादेन च समतूतुषत्। सोऽपि राजद्वयं प्रणम्य, असिं कटिदेशे लम्बयित्वा, निर्दिष्टस्थान उपाविक्षत्। महाराष्ट्रेश्वरश्च "अयं पाञ्चसाहस्रिकता-योग्यः"-इति शनैरम्बरेशकर्णं आलपत्, सोऽपि चान्वमूमुदत्। किञ्चित किञ्चिदिदमनेकैरेव श्रुतम्। क्रूरसिंहस्तु तदाकलय्य, शूलेनेव कर्णयोस्तोद्यमानो भ्रुवावाकुञ्च्य, मुखमवनमय्य, तथैवास्थात्।

ततो महाराष्ट्रेश्वराज्ञया सर्वेऽपि निगृहीता वीरा आनायितास्त्यक्ताश्च। ततो दुर्गाध्यक्षो रहोमत्तखानोऽपि तत्र समानीतो निर्मुक्तबन्धनस्सम्मुखमवनतशिराः स्थितः। तमालोक्य महाराष्ट्रराज उवाच।

"वीर! साधु दर्शितवानसि युद्ध-कौशलम्। उचितमाचरितवानसि स्वामि-पिण्डस्य। जयः पराजयश्च न स्वाधीनः। यदि वि-

---

समूहालङ्कृते। **अत्यल्पया**=अतितरां न्यूनया।

प्रासीदन्=प्रसन्ना अभूवन्। **समतूतुषत्**=सन्तोषितवान्। **पाञ्चसाहस्रिकतायाः**=पञ्चसहस्रसैनिकाध्यक्षतायाः, **योग्यः**=अर्हः। **अन्वमूमुदत्**=अनुमोदितवान्। **तोद्यमानः**=सङ्कर्त्यमानः। **आकुञ्च्य**=संयोज्य।

निगृहीताः=चारकीकृताः। **निर्मुक्तबन्धनः**=विगतनिगडः। **अवनतशिराः**=नम्रमस्तकः।

जितोऽसि, गृहीतोऽसि, बद्धोऽसि, ततो व्रीडा नोचिता। पलायनं वा रक्ष रक्षेति रोदनं वा व्रीडास्पदम्; न तु वीरता-पुरस्सरं बन्धो वा प्राण-त्यागो वा। तदधुना मुक्तोऽसि। रोचते चेदस्माननुसर, अथवा स्वच्छदं विजयपुरेश्वरमेवानुसर"।

स तु "वीरराज! अत्यन्तमुपकृतोऽस्म्यौदार्य्येणानेन; किन्तु यस्मिन् हस्ते विजयपुर-रक्षार्थं खड्गं वहन्, जीवनं यापितवानस्मि; नास्मिन्नेव दग्धहस्ते, विजयपुर-विरोधिनां साहाय्याय निस्त्रिंशमाकलयितुमुत्सहते मे चेतः"—इत्युक्तवान्। ततः शिवराजेन यथोचितं विधेहीत्युक्तः, गच्छन् कतिभिश्चिदेव पदैः परावृत्य पुनः प्रोक्तवान्—

"महाराज! वृद्धोऽसौ बहुभिर्युद्धवान्, किन्तु न भवादृशो वीरराज एव दृष्टः, न वा भावत्का इव योद्धार एव दृष्टाः। तथाऽपि निविवेदयिषामि-यद् भवत्सेनासु न सर्व एव राजभक्ताः सन्ति। केचन विद्रोहिणोऽपि कपटेन स्वं राजभक्तं प्रदर्श्य, भवत्कृपा-पात्रतामपि वहन्तो गूढं विद्रोहमाचरन्ति। तादृशेनैव केनचित् प्रथममेव सतर्कीकृता वयम्, अन्यथा अल्पेनैवाऽऽयासेन जय्यमासीद् भवा-

स्वामिनः, **पिण्डस्य**=अन्नादेः। **व्रीडा**=त्रपा। व्रीडायाः, **आस्पदम्**=स्थानम्। **मुक्तः**=परित्यक्तः। **अनुसर**=अनुव्रज। **स्वच्छन्दम्**=स्वतन्त्रम्।

दग्धहस्ते=भागधेयरहितकरे। **आकलयितुम्**=धारयितुम्। **विधेहि**=कुरु। **पदैः**=चरणैः। **परावृत्य**=परावृत्ति विधाय।

निविवेदयिषामि=निवेदयितुमिच्छामि। **विद्रोहिणः**=शत्रवः। **भवत्कृपापात्रताम्**=भवदीयदयाभाजनताम्। **सतर्कीकृताः**=सविवेकीकृताः।

दृशेन दुर्गमास्माकीनम्। तत्सानुसन्धानं शोधनीया स्वसेना, व्रजाम्यहम्"—इति, उक्त्वा प्रचलितः।

महाराष्ट्रराजस्तु कोपारुणीकृतनयनः परितः पश्यन्, सर्वान् सेनापतीन् सम्मुखमेक-लेखायामुत्थाय स्थातुमाज्ञप्तवान्। सर्वेषु तथा कृतवत्सु चोक्तवान्-"हन्त भो! महाराष्ट्र-मण्डलेऽपि स्वामि-विद्रोहः? अपीदं रोचते युष्मभ्यम्?"।

सर्वे—विद्रोहाचरणं महापापम्, न रोचतेऽस्मभ्यम्।

महा०—न रोचते चेद् यदि ज्ञायते सपदि कथ्यतां को विद्रोहीति?

सर्वे—न जानीमहे। न जानीमहे।

ततः क्षणं सम्पूर्णा सभा निर्मक्षिकसञ्चारा संवृत्ता। सर्वेऽपि "कस्य प्राणा अवसन्नाः? कस्य जीवनं समाप्तम्? को मृत्युना वीक्षितः? को वा कृतान्तेन पाशितः?"—इति चिन्तयन्तस्तूष्णीका जडीकृता इव चित्र-लिखिता इव चावर्तन्त।

अथ पुनरेवं निर्णेतुमारब्धवान् महाराष्ट्रपतिः।

महा०—अथ ज्ञायते ह्यः कश्चिद् अनुपस्थितो वा, बिलम्ब्य

आयासेन=श्रमेण। जय्यम्=जेतुं शक्यम्। "क्षय्यजय्यौ शक्यार्थे"। सानुसन्धानम्=सगुप्तविचारम्। शोधनीया=अवेक्षणीया।

कोपारुणीकृतनयनः = क्रोधलोहितीकृतनेत्रः। एकलेखायाम् = एकस्यां पङ्क्तौ।

निर्मक्षिकसञ्चारा=ध्वनिशून्या। अवसन्नाः=समाप्तप्रायाः। पाशितः= बद्धः। जडीकृता इव=स्तब्धीकृता इव।

समायातो वा ?

क्रूरसिंहः—महाराज ! कश्चन श्रीचरणानामनुग्रह-पात्रमेव विलम्ब्य समागतः, प्राणदान-प्रतिज्ञया सनाथ्येय चेन् कथयेयं नामापि ।

महा०—न भयं ते । कथय केन विलम्बितम् ?

क्रू०—रघुवीरसिंहोऽत्यन्तविलम्बेनाऽऽगतः ।

[ततः सर्वेषु क्षणं चकितेषु निभृतच्छावस्थितेषु]

महा०—मूर्ख ! सत्यं कथय । दृष्टवानस्मि रघुवीरस्य पौरुषं भक्तिञ्च, न तव मिथ्या-कलङ्केनाङ्कितं भवेद् रघोर्यशः । रघुवीरस्योन्नतिमाकलय्य खिद्यसे-इति प्रलपसि । तत्सत्यं वद, अन्यथाऽधुनैव न भवसि ।

[इति शक्तिमुदतूतुलत्]

रघुवीरः—[सपद्यञ्जलिं बद्ध्वा] महाराज ! क्रूरसिंहो मिथ्या नाभिधत्ते । सत्यमहं किञ्चिद् विलम्ब्य समायातः । क्रूरो न हन्तव्यः ।

तदाकर्ण्य, सकलाऽपि सभा जडीकृतेव मोहितेव समाहितेव च संवृत्ता । अथ पटान्तेन स्वेदमपहृत्य शिवराजः, क्रूरेण चक्षुषा रघुवीरं दिधक्षन्निव समगादीत् ।

शिव०—मूढ ! तर्हि किमिति विलम्ब्य समायातोऽसि ?

प्राणदानप्रतिज्ञया=असुरक्षणसन्धया । **सनाथ्येय**=सनाथितः स्याम् । **पौरुषम्**=पुरुषार्थम् । **भक्तिम्**=एकतानसेवाम् । **प्रलपसि**=असत्यप्रलापं करोषि । **न भवसि**=मृतोऽसि ।

समाहिता=समनस्का । किमग्रे भावीति समवलोकयितुम् ।

क्रू०—[रघुवीराभिमुखम्] कथय, कारणं कथय।

शिव०—क्षिप्रं कथय! किं न वेत्सि मदाज्ञा-समुल्लङ्घनस्योल्बणं फलम्? यद्विलम्बितवानसि,

[ततो भुवमालोकयन्, बद्धकर-सम्पुटो रघुवीरः, किमपि न प्रावोचत्। तदाकलय्याधिकं शङ्कितो महाराष्ट्रराजः पुनरवादीत्]

महा०—मूढ! विद्रोहिन्! मिथ्यैव स्वामिभक्तिं प्रकटयसि?

रघु०—प्रभो! विद्रोहो मिथ्याऽऽचारो वा नास्मत्कुल-धर्मः।

महा०—तत्किमिति विलम्बितवानसि?

रघु०—[मनसैव "सौवर्णि! तव साक्षात्कार एव विलम्ब-कारणम्, तदत्र किं कथयामि"—इति विभावयन्, भुवमालोकयन्, पाद-नखेन धरा-तलमुल्लिखन्, निःशब्द एव समस्थित]

महा०—[अत्यन्तं खिन्नः, स्विन्नश्च, पटान्तेन स्वेदं परिहृत्य] आः! कथं स्वप्नमिव पश्यामि। यस्यैवं मधुरा गीः; यस्यैवं पराक्रमः; स एव छली!!

रघु०—महाराज! अनीहमानस्यापि मे विलम्बो जातः, किन्तु छलं वा स्वामि-विद्रोहं वा न जानामि।

महा०—मूढ! ईदृशैः कथनैः प्राण-रक्षा-यत्नो व्यर्थः।

उल्बणम्=कठिनम्।

मिथ्याचारः=असदाचरणम्। कुलधर्मः=अन्वयकर्त्तव्यम्।

निःशब्दः=मौनम्।

स्विन्नः=घर्मबिन्दुव्याप्तः।

अनीहमानस्य=अनिच्छतः।

रघु०—प्रभो ! स्वामिनोऽन्नेन पुष्टमिदं शरीरं; स्वामिन एव कृपाणेन विलीढं भवतु। यस्य तोषश्चिरमजीवयत्; तस्यैव रोषो व्यापादयतु। नाहं प्राणरक्षार्थं यते, न वाऽपराध-क्षमां याचे। किन्तु यत् सत्यं तद् ब्रवीमि, नाहं स्वामि-विद्रोहापराधी, न वा छलं जाने, किन्तु न जाने केषां दुरदृष्टानां फल-स्वरूपो मे विलम्बः समभूत्। सत्यमिति कथयामि। विलम्बापराधस्य जीविकाछेदो वा, शिरश्छेदो वा, यथा रोचेत; तथा दण्डो विधेयः। विद्रोहाचरणन्तु न कृतवानस्मि।

महा०—वाचाल ! कपटिन् ! तिष्ठ ! पश्यन्तु सर्वे विद्रोहिणो दण्डम्। [इति शक्तिमुदतिष्टिपत्]

रघु०—महाराज ! अत्र भवतो भ्रमापनोदनाय तत्त्वं कथितवानस्मि। वाचालो नास्मि। अस्मत्कुलं कपटस्य कथामपि न जानाति। जननीमपि न स्मरामि। बालस्यैव तातोऽपि सागरे मग्नः। प्रभुरेव जननी, जनकः, ईश्वरश्च। मयि मृतेऽपि वृद्धो गुरुर्वा नववयस्कैकाऽपरा व्यक्तिर्वा रोदिष्यति, नाऽन्यः। श्रीमतश्चरणं ध्यायन् सुखेन प्राणांस्त्यक्ष्यामि। किन्तु यथा भवानेव पश्चाद् दुःखेन न तप्येत, तथा विचार्य हन्तव्योऽयं बालः।

विलीढम्=विनष्टम्। तोषः=प्रसन्नता। व्यापादयतु=मारयतु। दुरदृष्टानाम्=दुर्भाग्यानाम्।

वाचाल !=मिथ्याबहुभाषिन् !।

भ्रमापनोदाय=भ्रान्तिदूरीकरणाय।

नववयस्का-एका-अपरा-व्यक्तिः, एतेन गूढतया विलम्बकारणं प्रद-

महा०—नाहमधिकं शुश्रूषे तव व्यर्थप्रलपितम्।

[इति कथयित्वा शक्तिं सज्जीकृतवान्]

[ततो जयपुराधीश्वरेण बहुशः सन्त्वितोऽपि, शक्तिं संस्थाप्यापि, क्रोधेनास्थिरः प्रोक्तवान्] न त्वादृशानां निकटे जयपुराधीशानां खड्गः शोभते, तत् प्रतियच्छ।

रघु०—[खड्गं सम्मुखेऽस्थापयत्।]

महा०—दूरतो भव, नाहं त्वादृशानां मुखमवलुलोकयिषामि।

रघु०—[साष्टाङ्गं प्रणम्य निर्गतः]

अथ मुहूर्त्तानन्तरं किञ्चिन् प्रकृतिमापन्ने महाराष्ट्रेश्वरे, महाराज-जयसिंहेन मन्दमुक्तम्—वीर! एकदा निर्दोषं स्वबन्धुं वीरेन्द्रसिंहं कलङ्कितवानस्मि। स तु वैभवं त्यक्त्वा न जाने क्व गतः—इत्यद्यापि स्मारं स्मारं खिद्ये। ततः कथयामि, दण्डे त्वरा न विधेया। मन्ये, अस्मिन् विषये बह्ववशिष्यते। तद् अङ्गीकरोषि चेत् प्रातरहमपि वास्तविक-विद्रोहिणं निश्चेतुं यते।

महा०—नात्र मम विमतिः।

जय०—कथ्यतां प्रातः सर्वेऽप्येते मच्छिबिरमायान्त्विति।

शितम्, किन्तु दौर्भाग्यात्सौभाग्याद्वा तदानीं न शिवेनावधारितम्।

शुश्रूषे=श्रोतुमिच्छामि।

अवलुलोकयिषामि=अवलोकयितुमिच्छामि।

प्रकृतिम्=स्वभावम्। **आपन्ने**=प्राप्ते। **कलङ्कितवान्**=मिथ्याक्षेपैराक्षिप्तवान्। **वैभवम्**=सम्पत्तिम्। **त्वरा**=शैघ्र्यम्।


विमतिः=विभिन्ना मतिः। विपरीतो विचार इति यावत्।

महा०--क्रूरसिंह ! प्रियमाल्यश्रीक ! भवन्तः सर्वेऽपि प्रधान-वीराः प्रातरेव महाराज-जयपुराधीश्वरस्य शिबिरं गच्छन्तु, पृष्ट्वाश्च सत्यं वदन्तु ।

जय०--सादिनः सत्वरं प्रेष्याः; ये रहोमत्तखानमपि सत्वरं परावर्त्त्य, अत्रैव स्थापयेयुः, रघुवीरं चाऽऽनयेयुः ।


महा०--माल्य ! तथा विधेहि । माल्यश्रीकस्तथा विधातुं सादिनो धावितवान् । सायं समयमासन्नमवगत्य च सर्वे समुत्तस्थुः ।

** इति नवमो निश्वासः **



एवम्भूता क्षिप्रकारिताऽपि शिवराजपतनस्य कारणेष्वेकेत्यवधारणीयम् । या शैली पश्चादाश्रितैतद्विषयविवेचनाय जयसिंहेन स्वीकृता; सैव राजनीतिकयोग्यता-पूर्णेति को नाङ्गीकुर्यात् । स्याच्छत्रुपक्षीयेन रहोमत्तखानेन कस्यचन सेनापते-र्व्यर्थहिंसायै कथितं भवेदित्यपि नावधारितं तदानीं यत्तदपि त्वराविलसित-मित्यास्तां तावत् ।

इति श्रीशिवराजविजयवैजयन्त्यां नवमनिश्वास-
विवरणं समाप्तम् ।



"मानो हि महतां धनम् !"

"गङ्गा-तीरमपि त्यजन्ति मलिनम्, ते राजहंसा वयम् !"

—स्फुटकम्

अथ प्रातरेव महाराज-जयसिंहो विसृज्य पर्य्यङ्कम्, 'रघुवीरो निर्दोषः' इत्येव स्वप्नेषु पश्यन्, प्रातर्विधेय-कर्मणो निवृत्य, सभामधिष्ठाय, चिरं निरणैषीत्। तेनाऽऽहूय, "सत्यं वद केन सूचितोऽसि, न ते भयम्, यथा निर्दोषो न भवेद्दण्डितस्तथा विधेहि"-इति पृष्टो रहोमत्तखान उवाच-"महाराज ! अस्त्येकः क्रूरसिंहाख्यः सेनापतिः। तस्यैव साहाय्येन शास्तिखानेन पुण्यनगरं गृहीतमासीत्। तेनैव वयमपि सूचिताः"।

ततः कोप-कषायितेन महाराजेन क्रूरमानाययितुं सादिनः प्रेषिताः। स तु रात्रावेव गृहं त्यक्त्वा क्वापि पलायित इत्याकलय्य, निश्चितस्तस्य दोष इति निरचायि। ततो रघुवीरमानाययितुं हयारोहान् विसृज्य संवादमाप्तवान्-यत् सभातो निर्वासितो रघु-

---

क्रूरेण क्रूरसिंहेन मिथ्याभिशप्तः; कियतः क्षणस्य कृते स्वाभाविकत्वरया स्वीकृतवति च शिववीरे, स्वीयं मानं पालयितुं तथा दूरीभूतो रघुवीरसिंहो यथा तदनिच्छयाऽन्वेषितोऽपि न लब्ध इत्युपक्षिपति-"मानो हि महतां धनम्" इति "गङ्गातीरमि"ति च।

विसृज्य=परित्यज्य। **पर्य्यङ्कम्**=शोभनां खट्वाम्। **प्रातर्विधेयकर्मणः**=उषःकार्यकर्त्तव्यात्। **निरणैषीत्**=निरचैषीत्। **आहूय**=आकार्य।

कोपकषायितेन=रोषताम्रेण। **आनाययितुम्**=प्रापयितुम्। **पलायित-इत्याकलय्य**=न केवलं रहोमत्तखानकथनेनैव दोषो निर्धारितो राजनीतिक-

वीर आवासं गत्वा, गुरुं गणेशशास्त्रिणं साष्टाङ्गं प्रणम्य, "अद्य निर्दोषोऽपि प्रभुणा विद्रोहीति कोप-विषयीकृतोऽस्मि। धिङ् मे दुरदृष्टम्" इति मुक्तकण्ठं रुदित्वा, वृद्धं गणेशशास्त्रिणञ्च रोदयन्, गृहान्निर्गतो न परावर्तते-इति।

इत्याकलय्य सर्वैः समं यावत् खिद्यते महाराजस्तावदकस्मात् प्रविवेश, दुःखेन कोपेन च विह्वलो गणेशशास्त्री। उक्तवांश्च—

"महाराज! महाराज! अपि भवादृशानां सम्मुख उचितोऽयमन्याय-प्रचारः? किं रघुवीर-सदृशानि कुलीनानामपत्यानि विद्रोहमाचरन्ति?

"अहह! 'हा! हा! हा! मिथ्यैव कलङ्कितोऽस्मि'-इति भूमौ विलुठ्य, रुदतो बालस्य मूर्तिः खचितेव मद्धृदये। महाकुलस्य मानधनो बालो न जाने क्व गतः? न च जाने, असौ मान-हानि-खिन्नो व्याघ्र-वदने वा, वाहिनी-प्रवाहे वा पतिष्यति, गरलं भक्षयिष्यति, तपोभिर्वा शरीरं जर्जरयिष्यति! हन्त! हतोऽस्मि! को मां वृद्ध तात-तातेति-मधुर-भाषण-पुरस्सरं सेविष्यते"।

तदाकर्ण्य गणेशशास्त्रिणा सहैव सर्वेऽपि वाष्प-धाराभिः कपोलावस्नपयन्।

ज्ञानवता जयसिंहेन: अपितु पलायनरूपात्प्रत्यक्षाद्धेतोरिति बोधयति। **आवासम्**=निवासभूमिम्। **दुरदृष्टम्**=दुर्भाग्यम्। **मुक्तकण्ठम्**=विदारितगलम्। सुस्पष्टमिति यावत्।

अन्यायप्रचारः=अनीतिव्यवहारः। **कुलीनानाम्**=सत्कुलजानाम्।

खचिता=आलिखिता। **मानधनः**=अभिमानवित्तः। **वाहिनीप्रवाहे**=तरङ्गिणीतरङ्गे। **गरलम्**=विषम्।

ततो रघुवीरान्वेषणाय बहूनश्वारोहान् विसृज्य गणेशशास्त्रिणं पुनरुवाच महाराजः—

वृद्ध ! ह्यो रघुवीरोऽपि कुल-गौरवमशंसत्, भवानपि चाऽऽम्रेड्य तत्कुलजतां स्मरति। तस्य वीरताव्यवहारः, गम्भीरं भाषणम्, औदार्य-पूरितं हृदयम्, तेजस्विन्याकृतिश्च, कुलमेव परिचाययन्ति। किन्तु विशिष्य विज्ञातुमेतस्य भवतश्च वृत्तान्तं चपलं मे चेतः। मन्ये, भवन्तमपि कदाचन दृष्टवानस्मि, भवतो भाषण-भङ्गी चानुकरोत्यस्मद्देशीयानां परिपाटीम्। तद्विशकलय्य प्रोच्यताम्: कुत्रत्यो भवान्? किमितिहासश्च रघुवीरः?-इति।

तदाकर्ण्य वृद्ध उवाच-"महाराज ! इतिहासममुं श्रुत्वाऽधिकं खेदमावक्ष्यति भवान्, तदलं शोक-समुद्र-मन्थनैः"। ततः पुनः पुनराग्रहेण पृच्छ्यमानो वृद्धः शृण्वत्सु माल्यश्रीकगौरसिंहादिषु समवादीत्—

देव ! किं न स्मर्यते भवता जितवार-भू-स्वामी, भवद्बन्धुः? यो भवता विनैवापराधमवहेलितः सर्वस्वं त्यक्त्वा, राजपुत्र-देशमेव

अशंसत्=अकथयत्। आम्रेड्य=द्विस्निरुद्धुष्य। वीरताव्यवहारः=शूरताकर्तव्यम्। औदार्यपूरितम्=उदारताभरितम्। तेजस्विनी=प्रतापमयी। आकृतिः=रूपम्। परिचाययन्ति=बोधयन्ति। भाषणभङ्गी=कथनशैली। परिपाटीम्=शैलीम्। कः, इतिहासो यस्य सः, किमितिहासः=किमितिवृत्तः।

आवक्ष्यति=प्राप्स्यति। शोकसमुद्रस्य=खेदपारावारस्य, मन्थनैः=आलोडनैः।

जितवारनाम्नो ग्रामस्य भूस्वामी=ग्रामपतिः। अवहेलितः=तिर-

त्यक्तवान्" ।

कथं न स्मर्यते ? आजन्म स्मरिष्यामि, पश्चात्तापैश्च हृदयं धक्ष्यामि । [पटान्तेन बाष्पं परिमृजन्] ततः—

गणेशशास्त्री—तस्यैवाहं पुरोहितोऽस्मि, तत्रैव मां भवान् बहुशोऽद्राक्षीत् ।

जय०—आः ! स भवान् ! [इत्युत्थाय प्रणनाम]

गणेश०—[आशिष उक्त्वा] तेनैव सहाहमपि प्रचलितः ।

जय०—किं तेनैव सह ? वीरेन्द्रेणैव सह ? किं वीरेन्द्रसिंहोऽधुनाऽपि भवदाश्रमे सहास्ति? अपि तमालिङ्ग्य चिरताप–व्यथां पर्यवसाययिष्यामि ?

गणेश०—महाराज ! प्रभुणा वीरेन्द्रेणैव सह निर्यातोऽस्मि । वयं सर्वेऽपि प्रथमं द्वारकाधीशं द्रष्टुं प्रचलिताः, ततो महता पोतेन मुम्बापुरीं निवर्तमाना अकस्माद् झञ्झावाताऽऽघातात् पोतपातमन्वभवाम । ततः सपदि मया वीरेन्द्रकुमारो रामसिंह उत्तरीय–वाससा स्कन्धे बद्धः। दैवाच्चाऽऽवाभ्यामुभाभ्यां पुरोहितयजमानाभ्यां कार्पास–भार–द्वयं लब्धम्, तदवलम्ब्य यावत् पुरोऽव-

---

स्कृतः । **सर्वस्वम्**=सर्वं धनम् ।

पश्चात्तापैः=अनुतापैः । **धक्ष्यामि**=ज्वालयिष्यामि ।

भवदाश्रमे=भवत्कुटीरे । **चिरतापव्यथाम्**=दीर्घविरहपीडाम् । **पर्यवसाययिष्यामि**=परितः समापयिष्यामि ।

निर्यातः=निष्क्रान्तः। **महता, पोतेन**=जलयानेन । **मुम्बापुरीम्**=मोहमयीम् । **झञ्झावाताघातात्**=सवृष्टिकमहावायुताडनात् । **पोतपातम्**=जलया

लोक्य, सांयात्रिक-क्रन्दन-श्रवण-सञ्जातं रोमोत्कम्पमन्वभवाव; तावन्मन्दर-गण्ड-शैल इव पारावारतलमगात् पोतः।

क्षणं तरङ्गैरान्दोल्यमानो वीरेन्द्रसिंहो दरीदृश्यमानोऽपि, ऊर्मि-राशिभिर्न जाने कुतो नीतः। अहञ्च रामसिंह-सहितो मूर्छितप्रायः समस्तां रात्रिं वीचि-प्रचयैर्दोदुल्यमानः, अरुणोदयसमये समप-श्यम्—यत् केचन सांयात्रिका आवां स्वपोत उत्थाप्य, पयोधि-पयः-क्षार-क्षरित-प्रायां त्वचं तैलैर्मर्दयन्तीति। अथ कालेनोल्लाघावावा-मितः पुण्यनगरमायातौ। रामसिंहो दुरवस्थासमये स्वनामापि व्यापयितुं लज्जमानो रघुवीरनाम्नाऽऽत्मानं परिचाययन् महाराष्ट्र-राजस्य चरेषु प्राप्तजीविकः संवृत्तः। इतः परमवगत एव वृत्तान्त एतस्य भवताम्। हा! रामसिंहो मां वार्द्धक्ये विहाय न जाने क्व गतः?। [ततः क्षणं सर्वेऽपि सचिन्ताः समवर्तन्त। गौरसिंहादयोऽपि च

नब्रुडनम्। सांयात्रिकाणाम्=पोतवणिजाम्, संयात्रा=समुदितयात्रा द्वीपान्तर-यात्रा वा प्रयोजनमस्येति प्रयोजने ठक्। क्रन्दनश्रवणेन=रोदनश्रुत्या, सञ्जातम्=सम्भूतम्। रोमोत्कम्पम्=पुलकम्। मन्दरस्य=तन्नाम्नोऽ-चलस्य, गण्डशैल इव=पर्वतखण्ड इव। पारावारतलम्=समुद्रगर्भम्। अगात्=अगमत्।

आन्दोल्यमानः=हिल्लोल्यमानः। ऊर्म्मिराशिभिः=लहरिततिभिः। नीतः=प्रापितः। वीचिप्रचयैः=तरङ्गभङ्गैः। दोदुल्यमानः=उत्क्षिप्यमाणः। पयोधिपयसः=अम्भोधिवारिणः, क्षारेण=लावणभागेन, क्षरितप्रायाम्=जर्जरिताम्। उल्लाघौ=नीरोगौ। दुरवस्था-समये=अशोभनकाले। प्राप्त-जीविकः=लब्धवृत्तिः। वार्द्धक्ये=वृद्धावस्थायाम्।

परस्परमवलोक्य, किमपि व्याजिहीर्षव इव महाराजं विवक्षुमाकलय्य, पुनस्तत एव दत्तकर्णाः समतिष्ठन्त]

जय०—[सजलनयनः समुच्छ्वस्य] शाम्बिन् ! रामसिंहो जीवति। मत्प्रेषिताः सादिनस्तमन्विष्य सपद्यानेष्यन्तीति विशिष्य सम्बोभवीति। अन्यथाऽपि स नाऽऽत्मानं व्यापादयिष्यति। यतो नाम्मत्कुले जाता मूढयोषित इवाऽऽत्मानं घ्नन्ति। सोऽपि निश्चयेन गूढपौरुषं प्रदर्श्य, समये पुनरात्मानं परिचाययिष्यतीति प्रमाणीकरोति मे हृदयम्।

गणेश०-महाराज ! तथाऽस्तु, चिरञ्जीवतु कुमार-रामसिंहः, स एव मेऽवलम्बः। न जाने तत्पिता प्रभुर्वीरेन्द्रो नक्रैर्भक्षितो वा, नरङ्गैरेव कथाऽवशेषीकृतो वा, तटं प्राप्यापि कृतान्तेन वीक्षितो वा, कापि पुत्र-शोकाकुलो जीवति वेति।

गौरसिंहः-शाम्बिन् ! महाराज ! जीवति वीरेन्द्रसिंहो वीरवरः। नेदीयस्येव ब्रह्मचारि-कुटीरे जटिल-वेषेण वसति। स्वपुत्रं

व्याजिहीर्षवः=व्याहर्त्तुमिच्छवः। आकलय्य=विज्ञाय। दत्तकर्णाः=अवहितश्रोत्राः।

विशिष्य=विशेषतः। सम्बोभवीति=अतितरां सम्भवति। अन्यथाऽपि=अप्राप्तावपि। व्यापादयिष्यति=मारयिष्यति। मरिष्यतीति यावत्। मूढयोषित इव=मूर्खस्त्रिय इव। गूढपौरुषम्=गुप्तं पुरुषकारम्। प्रमाणीकरोति=निश्चाययति।

अवलम्बः=आधारस्तम्भः। नक्रैः=मकरैः। यादोभिरिति यावत्। कथावशेषीकृतः=शरीरेण समाप्तितः। कृतान्तेन=यमेन। वीक्षितः=दृष्टः।

रामसिंहमेव प्राप्तुं देवमाराधयति। वयमपि चिरं कुमार-रामसिंहममार्गयामः, परन्तु रघुवीर एवायमिति परिचयो न लब्धः। हा दैव! विचित्रा ते घटना! यदर्थं तातो देवशर्म्मा वयञ्च चिराय रुदिमः; स एव कण्ठ-गतो मणिरिव न ज्ञातः।

ततः सर्वे चिरं बहुविधं वीरेन्द्रादि-विषय आलेपुः। परतः सर्वैः सह जयपुर-पुरन्दरः स्वयं कुटीरं गत्वा ब्रह्मचारि-वेषं वीरेन्द्रमालिलिङ्ग। उक्तवांश्च यद्-"मयि क्षमां विधाय, द्विगुणं राज्यमङ्गीकृत्य सनाथ्यतां राजपुत्रदेशः"-इति। सोऽवोचत्-"महाराज! न भवतो दोषः। भवत्येव भाव्यम्। अहन्तु कुमार-रामसिंहस्य मुखं दृष्ट्वा, काशीं गत्वा, वयो निःशेषयिष्यामि। महाराजेन रामसिंह एवान्विष्यताम्, तस्मा एव राज्यं दीयताम्। अन्धोऽहं यत् प्रत्यहं पश्यन्नपि नाज्ञासिषं-यद् रघुवीरो मे रामसिंहः" इति।

अथ गणेशशास्त्रिणाऽपि वीरेन्द्रः समालिङ्गितः। परतश्च खेदमया बहव आलापा अभूवन्।

परम्परया वृत्तान्तमिमं शृण्वन्नेव महाराष्ट्रराजोऽपि कुटीरमायातो बाष्पैः कपोलौ क्षालयन्, "ममैवाविचार्यकारितायाः

नेदीयसि=निकटस्थे। जटिलवेषेण=साधुनेपथ्येन। आराधयति=सेवते। अमार्गयामः=अन्वेषयामः। रुदिमः=क्रन्दामः।

आलेपुः=आलापं चक्रुः। ब्रह्मचारिवेषम्=वर्णिलिङ्गिनम्। सनाथ्यताम्=स्वीक्रियताम्। भाव्यम्=भवितव्यम्। निःशेषयिष्यामि=समापयिष्यामि। नाज्ञासिषम्=नावेदिषम्।

फलमेतत्"-इत्यसकृदुवाच। तावत्प्रविश्य, भृत्येनैकेन कथितं "जयतु जयतु जयपुराधीश्वरः! तत्रभवतः सम्राजः पत्रमादाय दिल्लीतः सादिन आयाताः, शिबिरद्वारि च तिष्ठन्ति। अत्र प्रभवः प्रमाणम्"।

ततो वीरेन्द्रं गणेशञ्च बहुशः सान्त्वयित्वा, सर्वेऽपि समुत्थाय स्वहयानारूढा वायुवेगेन निर्दिष्ट-शिबिरमायाताः। अन्तः प्रविश्य, पत्रं पठित्वा, जयपुरेश्वरः सर्वान् विसृष्टवान्, रहसि च महाराष्ट्रेश्वरेण समालपत्।

जय०—राजन्! पत्रमिदं दिल्लीश्वरस्य।

महा०—आम्! अवगच्छामि।

जय०—भवतो मेलनेन प्रसीदति सम्राड् इति प्रकटयति।

महा०—प्रसादोऽयमत्रभवतः।

जय०-भवन्तं साक्षात्कर्तुं महाराजस्य महानभिलाषः।

महा०-[क्षणं तूष्णीं स्थित्वा] तत्किं सम्राडित आजिगमिषति?

जय०-नहि नहि। तत्रैव भवन्तं सत्कीर्षति।

महा०-महाराज! भवद्वचने सर्वथा विहितविश्वासोऽस्मि, किन्तु न भवति मे प्रत्ययलेशोऽपि यवनेषु। तत् स्वगृहमागतं चिरविरोधिनं चेन्निगृह्णीयात्!!

अविचार्यकारितायाः=अनवधार्य कर्त्तव्यतायाः। असकृत्=अनेकवारम्।

मेलनेन=सन्धिना।

सत्कीर्षति=सत्कर्तुमिच्छति।

प्रत्ययलेशः=मात्रयाऽपि विश्वासः।

जय०–मैवम्, मैवम्, अहं तस्य पितुस्समीपे चिरं युद्धकार्यमकरवम्। तन्मामत्यन्तं सम्मानयत्येषोऽपि–इति निश्चिनोमि। अस्मासु मध्यस्थेषु न प्रतीपमाचरिष्यति सम्राट्।

महा०–[चिरं चिन्तयित्वा] महाराज! चिरं यवनैर्युद्धवानस्मि–इति स्मरन् मे शत्रुतां निश्चितं निग्रहीष्यति मां सम्राड्–इति न जाने कः कथयतीव मम कर्णे, लिखतीव च हृदये।

जय०–शत्रुरपि संहितो मित्रं भवति। ततोऽपि भवान्, कुशलिनं त्यक्तवान् कुमारं मायाजिह्मम्, समर्य्यादां यापितवान् कुमारीं रसनारीम्, सपराक्रमं विजितवान् रुद्रमण्डलमहादुर्गम्–इति किं तेन न स्मरिष्यते?

महा०–आर्य! ये काशी–मथुरादि–तीर्थ–स्थानानि निरर्थं भ्रंशयन्ति, मन्दिराणि निपातयन्ति, प्रतिमाश्च चूर्णयन्ति, तेषां न सम्भाव्यते सौजन्य–लेशोऽपि। तन् क्षम्यतां, युद्धे मर्त्तुमुपदिशति, न च मेऽन्तरात्माऽङ्गीकरोति दिल्ली–यात्राम्।

जय०–[क्षणं विचिन्त्य] अथ मन्यताम्, मया लिखितं भवदस्वीकारं श्रुत्वा पुनर्भवता सह युद्धमारभेत?

प्रतीपम्=विरुद्धम्, शत्रुकृत्यम्।

कथयतीव=श्रावयतीव।

संहितः=सन्धितसितः। कुशलिनम्=शुभमयम्। समर्य्यादाम्=धर्मरक्षणपुरस्कृताम्। यापितवान्=प्रापितवान्। सपराक्रमम्=सबलप्रदर्शनम्।

निरर्थम्=निष्प्रयोजनम्। चूर्णयन्ति=पेषयन्ति। ध्वंसयन्तीति यावत्। उपदिशति=कथयति। अन्तरात्मा=अन्तःकरणम्। तदुक्तम्महाकविना—

महा०–तद् योत्स्ये !

जय०–एतस्मिन् विषये सत्वरता नोचिता। निरीक्ष्यताम्, ससेनोऽहमेव समीपे निवसामि। यदि भवता सह योद्धुमहमेवाऽऽदिश्ये ?

महा०–[विचिन्त्य] महाराज ! मम कृपाणः स्वदेशीयानां शोणितं न पिपासति—इति पूर्वमेवोक्तवानस्मि। परं दिल्लीगमने निग्रहमाशङ्कते मे हृदयम्।

जय०–निग्रहो नाऽऽशङ्कनीयः। कुशलेन भवन्तं पुनरत्र परावर्तयितुमहं प्रतिजानामि। मम पुत्रो रामसिंहः स्वसहकारेण भवन्तं सभायां नेष्यति, सत्करिष्यति च। कुमार-मायाजिह्ममपि पत्रं लिखामि। सोऽपि ससम्मानं प्रतियापयिष्यति।

महा०–श्रुतं श्रीमता गोवध-प्रतीकार-विषये सम्राट्-समीपे पत्रमेकं प्रेषितमासीत्, किन्तु तन्नाङ्गीकृतं तेन ; एवमेव पुनर्भवदीय-मन्त्रणाश्रवणे बधिरीभूय, यदीतोऽपि स मयि पापमाचरेत् ?

"सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः"

सत्वरता=शैघ्र्यम्। **ससेनः**=सवाहिनीकः। **आदिश्ये**=समाज्ञप्तः स्याम्।

निग्रहम्=बन्धनम्। **कुशलेन**=कल्याणेन। **प्रतिजानामि**=प्रतिज्ञां करोमि। **स्वसहकारेण**=निजसहायकत्वेन। **सत्करिष्यति**=आदरिष्यति। **प्रतियापयिष्यति**=प्रत्यावर्त्तयिष्यति।

गोवधप्रतीकारविषये=गोहिंसानिवारणार्थम्। भवदीयायाः, **मन्त्रणायाः**=विचारणायाः, **श्रवणे**=श्रोत्रगोचरीकरणे। **बधिरीभूय**=अदत्तकर्णो भूत्वा। **पापम्**=निग्रहम्।

जय०–तर्ह्यहमपि स्वदेह–त्यागेन प्रायश्चित्तमाचरिष्यामि।

महा०–शान्तं पापम्, शान्तं पापम्। यथाऽऽज्ञाप्यते तथा करिष्यामि।

जय०–अथाधुना मध्याह्न–क्रिया निर्वर्तनीयाः। सपद्येव च दिल्ली–यात्रा विधेया! तद्विषयेऽपरसमय आलपिष्यामः।

ततो महाराष्ट्रपतिः स्वालयमायातः। जयपुरेश्वरश्च स्वशिबिर एव भोजनादि–क्रिया निरवर्तयत्, ततः किञ्चिच्छयनेन किञ्चित् पर्य्यटनादिना च दिनमयापयत्।

❀ ❀ ❀ ❀

अथास्तङ्गते मरीचिमालिनि, सर्वतो व्याप्ते महान्धकारे, चपलित–चञ्चु–पुटासु प्राचीमवलोकमानासु चकोरीषु, शनैरुदगान्निशानाथः।

समयोऽयं शरदन्तस्य, ऋतुरेष हिमः, शीतलः समीरः सरति,

प्रायश्चित्तम्=पापशोधनम्।

मध्याह्नक्रियाः=सन्ध्यादिकाः। निर्वर्त्तनीयाः=समापयितव्याः। अपरसमये=अन्यस्मिन् काले।

स्वालयम्=स्वसदनम्। अयापयत्=अक्षपयत्।

× × × ×

चपलितचञ्चुपुटासु=चञ्चलितत्रोटिपक्षासु। प्राचीम्=ऐन्द्रीम्। अवलोकमानासु=पश्यन्तीषु। शशिन उदयमानस्य निरीक्षणार्थम्। उदगात्=ऊर्ध्वमायात्, उदित इति यावत्।

शरदः, अन्तः, तस्य। हिमः=हेमन्तः। शीतलः=हिमानीमिश्रः।

द्विगुणीकृतं वस्त्रं रोचते, चिरमरुणा सन्ध्या रात्रीभूता। ईदृशे समये तोरण-दुर्ग-समीपे हनुमन्मन्दिरात् पूर्वतः पुष्प-वाटिकायामासन्दीपूपविष्टास्तिस्रो बालाः परस्परमेवमालपन्ति स्म।

प्रथमा–सौवर्णि! समाश्वसिहि, समाश्वसिहि, कदाचिदलीको भवेदेष वृत्तान्तः! चारुहासिनि! सान्त्वय सान्त्वय सहचरीम्।

चारुहासिनी–प्रियसखि! सत्यं वदति विलासिनी। यावन्निश्चित्य न ज्ञायते; यावच्च प्रामाणिकैर्न कथ्यते; तावन्मुधा शोकैरात्मनो ग्लपनं व्यर्थम्।

सौवर्णी–[अञ्चलेन बाष्पमपहृत्य] विलासिनि! चारुहासिनि! गतदिवसमारभ्यैव विमनायमानं मे चेतः। रात्रौ निद्रामपि न लब्धवती, किञ्चिल्लग्ननिमेषा च भयङ्करान् स्वप्नान् दृष्टवत्यस्मि, मध्याह्ने च भोजन-शालायाः पृष्ठतो गच्छतोर्न जाने कयोरालापमिमं भयानकमश्रौषम्, सत्यताञ्चैतस्य विह्वलीभवद् हृदयमेव मे प्रमाणीकरोति। भगिन्यौ! क्षत्रियकन्याऽहम्, दृढा मे प्रतिज्ञा। तमेव वरयिष्यामि, ब्रह्मचर्येणैव वा शरीरहतकं शोषयिष्यामि।

चिरमरुणा=अतिलोहिता। **रात्रीभूता**=रात्रितामता। सन्ध्याकाल एव रात्रिभासनमिति यावत्। **आसन्दीषु**=वेत्रासनिकासु।

अलीकः=असत्यः।

प्रामाणिकैः=सत्यवादिभिः। **व्यर्थम्**=अनावश्यकम्।

विमनायमानम्=अत्युत्कम्। **किञ्चिल्लग्ननिमेषा**=ईषन्मुद्रितनयना। **भयङ्करान्**=भीतिजनकान्। **भोजनशालायाः**=रसवत्याः। **विह्वलीभवत्**=खेदमिश्रमौत्सुक्यमाश्रयत्। **प्रमाणीकरोति**=निश्चाययति। **वरयिष्यामि**=विवाहयिष्यामि। **शरीरहतकम्**=व्यर्थीभूतं देहं।

चारु०–प्रियसखि ! सिद्ध्यन्तु ते मनोरथाः। तमेव प्राप्स्यसि, तमेव वरयिष्यसि। अञ्जनीसूनुस्साधयतु ते कार्यम्।

सौ०–[निःश्वस्य] आः ! किं तादृशा आकृतिविशेषा अपि विद्रुह्यन्ति ? कथमेष मिथ्या–कलङ्कस्थानं लब्धवान् ?

विला०–प्रिये ! यदि मिथ्यैष कलङ्कः, तदचिरादेव स्वयं महाराष्ट्रराजः पश्चात्तापैस्तप्यमानः पुनस्तमन्विष्य, अभ्यर्हिततरे पदे नियोक्ष्यति। दैव–घटनायामलं शोकेन।

सौ०–शोको हि कलङ्क-विषये ! यद्यहं युद्धे तस्य क्षत्रियधर्मेण प्राणत्यागमप्यश्रोष्यम्, तन् सुखेन तन्नाम संस्मृत्य, स्वयमपि प्राणान् व्यस्रक्ष्यम् ; परं कलङ्को न सह्यते क्षत्रियैः।

[तावद् दूरतः]–अत्तिके ! अत्तिके ! इति समश्रावि बालस्येवाऽऽह्वानम्। ततः सपदि समत्थाय चारुहासिनी ततोऽभिमुखीभूय, "गोपाल ! एते समागच्छावः"—इत्युच्चैरुच्चार्य, सौवर्णीं बहुशः सान्त्वयित्वा, "भ्रातृजाये ! उत्तिष्ठ, यावः"—इति विलासिनीमपि सह नीत्वा, मन्दिराभिमुखं प्रययौ।]

अञ्जनीसूनुः=वायुतनयः।

आकृतिविशेषाः=विशिष्टस्वरूपाः। स्थानम्=पदम्।

अचिरात्=शीघ्रम्। तप्यमानः=क्लिश्यमानः। अभ्यर्हिततरे=अतिपूजनीये। नियोक्ष्यति=नियोजयिष्यति। दैवघटनायाम्=भागधेयव्यापारे।

क्षत्रियधर्मेण="युद्धे चाप्यपलायनम्" इत्येवंरूपेण। व्यस्रक्ष्यम्=अत्यक्ष्यम्।

यावः=गच्छावः।

सौवर्णी तु व्यामूढेवोत्थाय क्षुपात् क्षुपं कुटात् कुटं प्रति पर्य्यटन्ती, कदली-दल-खण्डमाच्छिद्य, तेनैवाऽऽत्मानं वीजयन्ती, आत्मानमपि विस्मरन्ती, पूर्वतो बहुदूरं निर्गता तडाग-पर्यन्तमायाता, विकचानां भ्रमद्-भ्रमर-झङ्कृतानां कैरवाणां शोभामवलोकयन्ती, सोपानैरवतर्तुमारब्धवती चाकस्माच्छुश्राव निःश्रेणि-प्रान्तस्थ-शिला-वेदिकास्थस्य कस्यापि "उल्लङ्घ्य सिन्धोः सलिलम्" इति हनूमत्स्तोत्र-पाठम्। झटिति तत उन्मुखीभूय पश्यन्ती चावालोकयद्-यत् कश्चिदंस-द्वय-लम्बमान-धूसरित-जटाजूटः, दीप-शिखा-दीप्रि-द्योतमान-विशाल-कुङ्कुम-तिलकः, भगवच्चरण-चिह्नाङ्कित-ललाटः,

व्यामूढेव=विक्षिप्तेव। क्षुपात्=ह्रस्वशाखिनः। कुटात्=शालात्। "अनोकहः कुटः शाल" इत्यमरः। पर्य्यटन्ती=भ्रमन्ती। कदलीदलखण्डम्=रम्भापत्रभागम्। वीजयन्ती=व्यजनयन्ती। भ्रमद्भिः=चलद्भिः, भ्रमरैः=द्विरेफैः, झङ्कृतानाम्=सशब्दानाम्। कैरवाणाम्=अम्भोजानाम्। सोपानैः=निःश्रेणीभिः। निःश्रेणिप्रान्तस्थायाम्=अधिरोहिणीकोणस्थायाम्, शिला-वेदिकायाम्=प्रस्तरवितर्दिकायाम्, तिष्ठतः। सलिलमिति—

सलीलम्
यः शोकवह्निं जनकात्मजायाः।
आदाय तेनैव ददाह लङ्काम्
नमामि तं प्राञ्जलिराञ्जनेयम्॥

इति सम्पूर्णम्। अंसद्वये=स्कन्धद्वये, लम्बमानः, धूसरितः=धूलि-भरितः, जटाजूटो यस्य सः। दीपशिखादीप्तिरिव=आलोकसाधन-ज्वाला-द्युतिवत्, द्योतमानम्=प्रकाशमानम्, विशालम्=विपुलम्, कुङ्कुमतिलकं

पीत-मृत्तिका-चूर्ण-च्छुरित-वदन-वक्षो-बाहु-दण्डः, तुलसी-कमलाक्ष-माला-विलम्बित-गलः, रामनामाङ्कित-वसन-वेष्टित-मूर्द्धा, पीत-वसन-परीधानः, मृगचर्म्मासनस्थः, समीपस्थिततुम्बीपात्रः, तेजःपुञ्ज-मिवोद्वमन्, अल्पवया ब्रह्मचार्यस्तीति।

तं यथा यथा नेदीयांसं प्रदेशमासाद्य गम्भीरमवलोकितवती; तथा तथा गाम्भीर्यमौदार्यं तेजःप्रचयञ्चाधिकमधिकमुपलभमाना स्तव-समाप्तौ तेनापि वीक्षिता, शिरसाऽञ्जलिं बद्ध्वा प्रणनाम। तेन च "जयति श्रीरामचन्द्रः"-इत्युक्ता बद्धकरसम्पुटा समपृच्छत्-"स्वामिन्! किमपि निविवेदयिषत्येषा दीनदीनाऽबला"।

स्वामी०—[किञ्चिद् गणयित्वेव] जाने, कस्यापि क्षत्रिययूनो विषये प्रश्नः।

यस्य सः। भगवच्चरणचिह्नेन, **अङ्कितम्**=मुद्रितम्, ललाटं यस्य सः। **पीत-मृत्तिकायाः**=रामरजसः, **चूर्णेन**, **छुरितम्**=रूषितम्, वदनवक्षोबाहुदण्डं यस्य सः। तुलसीकमलाक्षमालया विलम्बितः गलो यस्य सः। **रामनामाङ्कितेन**=रामाभिधानचिह्नितेन, **वसनेन**=वाससा, वेष्टितः, **मूर्धा**=शिरो यस्य सः। पीतं वसनं परीधानं यस्य सः। **तेजःपुञ्जम्**=प्रकाशसमूहम्। **उद्वमन्**=उद्गिरन्। **अल्पवयाः**=न्यूनावस्थाकः।

नेदीयांसम्=अतिनिकटम्। **गम्भीरम्**=गाढम्। **गाम्भीर्यम्**=गूढ-प्रकृतित्वम्। **तेजःप्रचयम्**=प्रतापव्रातम्। **उपलभमाना**=प्राप्नुवती। **स्तवस्य**=स्तुतेः, **समाप्तौ**=अन्ते। **बद्धकरसम्पुटा**=कृताञ्जलिका। **निविवेदयिषति**=निवेदयितुमिच्छति। **दीनदीना**=अतिकृपणा। **अबला**=नारी।

क्षत्रियस्य, **यूनः**=युवकस्य, नववयसः।

सौ०—[चकितेव] भगवन्! धन्यं भवतस्तपोबलम्! न कमप्यज्ञातं स्वामिनः। परतः कथ्यताम।

स्वा०—स तु प्रभुणा विद्रोहीत्यवहेलितः!

सौ०—अपि सत्यमेतत्? हा कष्टम्!

स्वा०—[पुनर्विचिन्त्य] तथ्योऽयं वृत्तान्तः।

सौ०—ततः?

स्वा०—ततः स नाहमपराधीति प्रभुमसकृदुक्त्वा प्रणम्य गृहादिकमखिलं विसृज्य कापि निर्गतः।

सौ०—धिक्! नाहं तादृशमुदारस्वभावं कुलीनं युवानं विद्रोहीति विश्वसिमि, सूर्यो यदि प्रत्यगुदियात्, गगनतलं वा प्रफुल्लकमल-मण्डल-मण्डितमवलोक्येत, ततोऽपि न भवेन्मे विश्वासस्तदीयकपटस्य।

स्वा०—[मुखमन्यतः कृत्वा, मन्दं मन्दम्] भाग्यमिदं तस्य—यद् भवत्येवं दृढं तं धार्मिकं प्रत्येति।

सौ०—स्वामिन्! भक्ति-बलेन परोक्षमपि प्रत्यक्षं भवतः। कथयतु भवानेव—किं सत्यं वीरोऽसौ प्रभुं गुप्तं व्यरुणत्?

अवहेलितः=तिरस्कृतः।

तथ्यः=सत्यतामिश्रः।

प्रत्यक=पश्चिमायाम्। उदियात्=उदयं प्राप्नुयात्। प्रफुल्लकमलमण्डल-मण्डितम्=विकसितपद्मनिचयनिचितम्। तदीयस्य, कपटस्य=प्रवञ्चनस्य।

भक्तिबलेन=देवसेवाबलेन। परोक्षमपि=क्षुपितमपि। प्रत्यक्षम्=साक्षात्। व्यरुणत्=व्यरुद्धयत्।

स्वा०—तस्य वंशे प्रभुद्रोही कोऽपि नाभूत्, सोऽपि विनैव दोषं मात्सर्य्य-पूरितेनेर्ष्या-परवशेन पिशुनेन निन्दितः, विनैव विचारं प्रभुणा कोपविषयीकृतः।

सौ०—अथ कुशलेन जीवति ?

स्वा०—जीवति।

सौ०—अपि पृच्छामि को निर्बन्धस्तस्य ?

स्वा०—[अङ्गुलिषु गणयित्वा ध्यात्वा च] स प्रकाशेनेव पौरुष-प्रचय-सम्पादितेन यशसा धरातलं धवलीकृत्य कलानिधिरिव परस्तादात्मानं प्रकटयितुमिच्छति। अन्यथा मिथ्याकलङ्क एव च वर्द्धमाने प्राणानपि परिजिहासति।

सौ०—[आकाशे चक्षुषी स्थिरयित्वा] प्राणनाथ ! वरं प्राण-त्यागः, न च कलङ्क-मलीमसं जीवनम्। किन्वेषा हतभाग्या ! [इति निःशब्दमरोदीत्]

स्वा०—[मुखमन्यतः परावृत्य कानिचिदश्रूणि विमुच्य] भद्रे !

मात्सर्यपूरितेन=पक्षपातभरितेन। ईर्ष्यापरवशेन=गुणेषु दोषाविष्करण-परायणेन। पिशुनेन=सूचकेन।

निर्बन्धः=विचारः

प्रकाशेनेव=आलोकेनेवेत्युपमा। पौरुषप्रचयसम्पादितेन=पुरुषकार-समूहप्राप्तेन। यशसा=कीर्त्या। धवलीकृत्य=श्वेतीकृत्य। कलानिधिरिव=प्रालेयदीधितिरिव। परस्तात्=अनन्तरम्। मिथ्याकलङ्के=अनृतापवादे। वर्द्धमाने=एधमाने। परिजिहासति=परित्यक्तुमिच्छति।

कलङ्कमलीमसम्=अपवादमलिनम्।

वेद्मि-निष्कपट-प्रणयिनी भवती! पतिव्रतानां पुण्येन किं न भवति? इति भवत्या एव निश्चलानुरागेण पुण्यबलेन च कदाचित् स कृतकार्यो भवेत्!

सौ०—महामान्ये! यद्यपि स निगूढ एव चरिष्यति, तथाऽपि किमहं तं द्रष्टुं शक्ष्यामि?

स्वामी—अहं स्वच्छन्दं विचरामि। कदाचित् तेन सह क्वचिन् मेलनं भवेत्; तदहं निखिलं तव दुःख-वृत्तान्तं कथयिष्यामि, समये समये त्वामात्मानं दर्शयितुञ्चानुरोत्स्यामि।

यावदेष समाप्रोत्यालापः, तावदकस्मात्सोपानोपान्तस्थ-वट-कुट-कुटीरादश्रावि—"तिष्ठ रे तिष्ठ सौवर्णि! चिररात्राय त्वं रघुवीराभिमानिन्यासीः। इदानीं त्वां बलाद् वशंवदां करोमि"—इति कोपेनेवोदीरितः क्रूरः शब्दः। तदाकर्ण्यैव सौवर्णी कुल-मर्य्यादा-भङ्ग-भीरुः, झटिति "रक्ष रक्षेति" व्याहरन्ती, स्वामिनमाश्लिषत्। सोऽपि "बाले! मा भैषीः" इत्याभाष्य कथयन्नुत्थाप्य तां

अश्रूणि=अस्राणि। अयं रघुवीर एव साधुवेष इति नाविज्ञातप्रायं स्यात्पाठकानां विवेकिनाम्।

निष्कपटप्रणयिनी=निर्व्याजप्रेमिका। वस्तुतस्तु सकपटः प्रणयो भवत्येव नेति विदुषां सम्मतिः। निश्चलेन=अचञ्चलेन, अनुरागेण=प्रेम्णा।

निगूढः=नितान्तं गुप्तः।

अनुरोत्स्यामि=अनुरोधं करिष्यामि।

वशंवदाम्=स्वाधीनाम्। कुलमर्य्यादायाः=पातिव्रत्यरक्षणरूपान्वय-सीमायाः, भङ्गे=खण्डने, भीरुः=भीता। आश्लिषत्=आश्रयत्। स्वास-

स्वासनादन्यतः संस्थाप्य, सम्मुखं सोपान-परम्परातोऽवतरन्तं खडखडायित-पादत्राणं कृष्ण-वसनं मुण्डितश्मश्रु-कूर्चं कर-कलित-च्छुरिकमस्पष्टाकृतिं कञ्चन युवानमपश्यत् । तथा दृष्ट्वैव स्वामी बद्धपरिकरः समाकुञ्चितजटः स्व-तुम्बी-पात्रादेकां छुरिकामादाय, हस्ते धृत्वा, किञ्चिदग्रत उपसृत्य, योद्धुं सज्जः समतिष्ठत । स त्वागत्य स्वामि-द्वितीयां सौवर्णीमाकलय्य, कोप-स्फुरिताधर उवाच—"कुटिले ! रघुवीरं चुम्बसि, भिक्षुकांश्चैतादृक्षान रहसि भाषसे, न च मया बहुशः प्रार्थ्यमानाऽपि पूर्णतया वीक्षसे, तदद्य त्वां बलादश्वस्य पृष्ठे बद्ध्वा नेष्यामि" ।

स्वामी०—कस्त्वं रे ! सतीं कुमारीं कुलटां वदसि ! कस्य सामर्थ्यमस्मिन हनूमत उद्यान-प्रान्त एवं बलात्कारं मनसाऽपि चिन्तयितुम् !

ततः स आह—भिक्षुक ! त्वमपि च्छुरिकां वहसि । [विहस्य] त्वयि भिक्षा-पात्रं शोभते ; न तु शस्त्रम् ।

नात्=स्वविष्टरतः । खडखडायिते=खडखडशब्दकारिणी, पादत्राणे=उपानहौ यस्य तम् । कृष्णवसनम्=कालवाससम् । करे कलिता=धारिता, छुरिका=असिधेनुका, येन तम् । समाकुञ्चितजटः=बद्धकेशः । स्वतुम्बीपात्रात्=निजालाबुभाजनात् । उपसृत्य=गत्वा । सज्जः=सन्नद्धः । कोपस्फुरिताधरः=क्रोधचञ्चलोष्ठः । भिक्षुकान्=याचकान् । रहसि=एकान्ते ।

सतीम्=सच्चरिताम् । कुमारीम्=अविवाहिताम् । कुलटाम्=व्यभिचारिणीम् । सामर्थ्यम्=शक्तिः । उद्यानप्रान्ते=वाटिकैकदेशे । बलात्कारम्=साहसकर्म ।

स्वा०-मूढ ! ब्रह्मचर्य-व्रत-रक्षायै भिक्षापात्रं वहामः । किन्तु क्रूरस्य तव हत्यायै शस्त्रमपि धारयामः ।

सः-[किञ्चित् स्तब्धीभूय] किं कथयसि ? क्रूरसिंहं परिचितवानसि ? ततोऽपि किम् ? तवोपवीतं पश्यन् ब्रह्म-हत्याया बिभेमि ।

स्वा०-नास्मि ब्राह्मणः । अहं क्षत्रिय-ब्रह्मचारी । जाने त्वाम् , त्वमेव क्रूरसिंहोऽसि ! त्वमेव रघुवीर-निर्वासन-पिशुनोऽसि, त्वमेव च कुल-कन्या-बलात्कार-पातक-पतयालुरसि । पश्यत्वेषाऽपि क्षत्रिय-कुमारी रघुवीर-प्रत्यर्थिनः प्राण-दण्डम् । ततः सक्ष्वेडमुभौ दक्षान् वामांश्च मार्गांश्चरन्तौ विकोशच्छुरिकाहस्तौ परस्परं जिघांसया समवर्तिषाताम् । तावदकस्मात् क्रूरसिंहः स्वामिनो वामं भुज-मूलं लक्ष्यीकृत्य छुरिकां प्रहितवान् । स्वामी तु बाहु-स्पृष्टाग्रच्छुरिकमेव हस्तं वामहस्तेन दृढं गृहीत्वा, दक्षहस्तेन तस्य वक्षसि छुरिकया दृढं प्राहरत् , अपातयच्च । स तु

ब्रह्मचर्यव्रतस्य, **रक्षायै**=पालनाय । **भिक्षापात्रम्**=याच्ञामत्रम् । **क्रूरस्य**=क्रूरनाम्नः, कठोरकृत्यनिरतस्य च । **हत्यायै**=मारणाय ।

स्तब्धीभूय=स्थागतीभूय । नामश्रवणतः । **परिचितवान्**=विज्ञातवान् ।

रघुवीरस्य **निर्वासने**=निष्कासने, **पिशुनः**=क्षुद्रः, निन्दाकारी । **कुल-कन्यायाः**=कुलीनबालिकायाः, बलात्काररूपे **पातके**=अघे, **पतयालुः**=पतनशीलः । रघुवीरस्य, **प्रत्यर्थिनः**=शत्रोः । **सक्ष्वेडम्**=ससिंहनादम् । **चरन्तौ**=भ्रमन्तौ । **विकोशच्छुरिकाहस्तौ**=नग्नासिधेनुकाकरौ । **जिघांसया**=मारणेच्छया । **समवर्तिषाताम्**=समस्थिषाताम् । **बाहौ स्पृष्टा**=संसक्ता, **अग्रच्छुरिका**=असिधेनुकाग्रं यस्मिन्नेवम्भूतम् । **वक्षसि**=उरसि । **प्राहरत्**=अताड-

पतितमात्रः समुवाच—"रे! रघुवीरस्यैव छुरिकया निहतोऽस्मि" स्वाम्युवाच—"मूढ! न जानीषे रघुवीर एव राघवः! माञ्च राघवाचार्य इति वदन्ति जनाः। व्यर्थमेव रघुवीरं कलङ्कितवानसि—इति भुङ्क्ष्व खलता-लतायाः फलम्"। क्रूरस्तु तत्क्षणादेवोर्द्ध्व-श्वास-प्रश्वास-पराधीनः, समुत्तम्भितनयनः, प्रस्खलद्रुधिर-धारा-क्षपितसोपानः, "हा रघुवीर! हा राघव! कृतघ्न फलमासादितवानस्मि। निर्दये सौवर्णि! त्वदर्थं नश्यामि"—इति घुरघुरायितेन कण्ठेनास्पष्टं मुहुराम्रेडयन् प्राणानत्याक्षीत्।

राघवाचार्यस्वामी च, क्रूर-कवोष्ण-रक्ताक्तां छुरिकां दक्ष-कराङ्गुलि-पृष्ठं करभम्, मणिबन्धम्, कूर्परञ्च, तडाग-जलेन प्रक्षाल्य, छुरिकां कोशेनाऽऽच्छाद्य, तुम्बी-पात्रे निधाय, जटा-जूटं पुनः प्रसार्य, उत्तरीयं स्कन्धे सन्धार्य, मृगचर्मासनमाकुञ्च्य कक्षे धृत्वा, सौवर्णीमुवाच—"सुन्दरि! मा स्म भैषीः। उत्तिष्ठ त्वदालय-पर्यन्तं

यत्। अपातयत्=अपोथयत्। निहतः=ताडितः। खलतालतायाः=दुष्टतावततेः। ऊर्ध्वश्वासप्रश्वासयोः=मरणकालिकाश्वासप्रश्वासयोः, पराधीनः=वशगः। समुत्तम्भितनयनः=समुद्भूर्णमाननेत्रः। प्रस्खलन्त्या=पतन्त्या, रुधिरधारया=लोहितप्रवाहेण, क्षपितानि=निर्णिक्तानि, सोपानानि=निःश्रेणयो येन सः। त्वदर्थम्=त्वत्कृते। नश्यामि=म्रिये। प्राणान्=असून्।

क्रूरस्य कवोष्णेन रक्तेन, अक्ताम्=छुरिताम्। करभम्=कराद्बहिः। "मणिबन्धादाकनिष्ठं करस्य करभो बहिरि"त्यमरः। मणिबन्धम्=हस्तान्तिकस्थमस्थिबन्धम्। कूर्परम्=कफोणिम्। "केहुनी" इति हिन्दी। तुम्बी-पात्रे=अलाबुभाजने। उत्तरीयम्=उत्तरासङ्गम्। आकुञ्च्य=सङ्कोच्य। कक्षे=

त्वामनुसरिष्यामि । कुशलेन तातभवन-पर्यन्तं यापयित्वा स्वच्छन्दं विचरिष्यामि" ।

सौवर्णी तु दृष्ट्वेमां रोम-हर्षिणीं घटनाम्, प्रत्यक्षीकृत्य च स्वामिनो विलक्षणं वीर्यम्, कोऽयं ? कुतोऽयम् ? इति विभावयन्ती, तूष्णीका, तेन सह स्वावासाभिमुखमुपससार । स्वालयस्य निकटे तेन विसृज्यमाना च, प्रणम्य "स्वामिन् ! पुनः कदा दर्शनं भवेदसाधारण-बन्धोः, जीवन-दीक्षा-गुरोः, श्रीचरणस्य ?" इति पृष्टवती । 'स्वच्छन्दा वयम्, यदा कदैव पुनरायास्यामः" इत्युक्तीर्णा, "नैषा दासी विस्मरणीया, प्रायशः समागमेन दर्शन-दानेन च कृतार्थनीया"-इति साम्रेडं निवेदयन्ती, पुनः प्रणम्य, सम्मुखमपश्यद्—यद् राघवाचार्यः स्वामी नास्ति । ततश्चायं स्वप्नो वा माया वा, व्यामोहो वा,—इति चिन्ता-चक्र-घूर्णित-चित्ता स्वावसथं प्रविवेश ।

× × × × ×

बाहुमूले । अनुसरिष्यामि=अनुव्रजिष्यामि ।

रोमहर्षिणीम्=पुलककारिणीम्, भीषणामिति यावत् । विभावयन्ती=विवेचयन्ती । तूष्णीका=वाग्यता । स्वावासाभिमुखम्=स्वनिवाससम्मुखम् । असाधारणबन्धोः=निष्कारणमित्रस्य । जीवनदीक्षागुरोः=प्राणनदानप्रशयणस्य । कृतार्थनीया=कृतकृत्यतां नेया । व्यामोहः=चित्तविभ्रान्तिः । चिन्ताचक्रेण=विचारसन्तानेन, घूर्णितम्, चित्तं यस्याः सा । स्वावसथम्=स्वसदनम् ।

× × ×

महाराष्ट्रराजस्तु कालेन सर्वाणि स्वमित्राण्याकार्य, सर्वेषां सम्मतिं दृष्ट्वा, कैश्चिद्दिल्ली–गमनायानुमोद्यमानः, परैर्वार्यमाणोऽपि, अन्ततो दिल्ली–यात्रामेव निश्चितवान।

एकदा तु रात्रौ भट–वेषेण स्व–प्रजा अवलोकयितुं पर्य्यटन् महाराष्ट्रराजोऽकस्माद् द्रुम–निचय–च्छायातो द्रुतमागच्छन्तं कञ्चन महात्मानमिवादर्शन्। स तु पीत–रेणु–रूषित–सर्वाङ्गः, रामनामाङ्कितोत्तरीयः, "जयजयेति" वदन् प्रणमन्तं गुप्राकारमेनं शनैरुवाच—

"वीर! राजपुत्र–देशीया राजानोऽप्येते कन्या–दानैर्यवनैरात्मानं सम्बध्नन्तोऽर्द्धयवना एव; ये स्वतन्त्रानार्यदेशान् विजित्य यवन–हस्ते समर्प्पयन्तो वीरम्मन्यतया श्मश्रु परिमृशन्ति। इयं धन्यता वा, जघन्यता वा, प्रमाणमत्र श्रीमद्धृदयमेव। कोऽयमासीन्मानसिंहस्य मानः; यद् यवनार्थमुदय–पुराधीश्वरं सकल–भारताभिजन–मान्यं. मेदःपाट–परिवृढमत्यन्तमचिक्लिशत्।

आकार्य=आहूय।

भटवेषेण=राजपुरुषनेपथ्येन। **द्रुमनिचयच्छायातः**=वृक्षव्रातच्छायायाः। **महात्मानम्**=साधुम्। **पीतरेणुरूषितसर्वाङ्गः**=रामरजश्छुरितसकलशरीरः। **गुप्राकारम्**=गूढाकृतिम्।

कन्यादानैः=बालिकार्पणैः। **यवनैः**, सहयोगे तृतीया। **आत्मानम्**=स्वम्। **सम्बध्नन्तः**=सम्मेलयन्तः। **अर्धयवनाः**=नेमम्लेच्छाः। **स्वतन्त्रान्**=स्वाधीनस्वदेशीयनरपतिरक्षितान्। **वीरम्मन्यतया**=भटम्मन्यतया। **श्मश्रु**=दाढिकाम्। **परिमृशन्ति**=स्पृशन्ति। **धन्यता**=श्रेष्ठता। **जघन्यता**=नीचता।

तस्यैवाद्वन्येषोद्वन्यो दुण्ढारवन्यवन्यध्यक्षो जयसिंहः। मा श्रीमानस्य मायामयीमुररीकरोतु मन्त्रणाम्। यत्येत चेद्, महाराष्ट्रैः सह विजयपुरेश्वरः, गोलखण्डेश्वरः, उदयपुरेश्वरः, योधपुरेश्वरः, अपरे च बहवो वीरवरा महाराजा दिल्ली-दलन-पक्षमवलम्बेरन्। तदलं वृद्धेन जयसिंहेन ज्यौतिष-पण्डितेन! भवत्वेष जर्जरो निर्जरसां राजा, भर्जयतु च भवान् स्वगर्जन-तर्जन-ज्वलनेन वर्ज्यानेतान् भारतद्रुहः।

तदाकर्ण्य, यावद् वीरशिवराजः किमपि विवक्षति; तावद् घनच्छाय-पलाशि-पटल एवालीयत स्वामी। महाराष्ट्रेश्वरश्च सचि-

---

सकलभारताभिजनमान्यम्=समस्तहैन्दवनिवासिमाननीयम्। **मेदःपाट-परिवृढम्**=मेवाराधीश्वरम्। "मेवाड" इत्यधुना प्रसिद्धः शब्दो 'मेदःपाट' शब्दापभ्रंश इति व्यासादीनामभिप्रायः। तर्करत्नमहोदयास्तु स्वीयेऽमरमङ्गले सव्युत्पत्तिकं मेवारशब्दमेव तद्वाचकत्वेन स्थिरयन्ति। उभयोरपि शक्तत्वं साधुत्वञ्चेति विवेचनापटवः। **अचिक्लिशत्**=क्लेशितवान्। **अध्वनि**=मार्गे। **अध्वन्यः**=पथिकः। **दुण्ढारवन्याः**=दुण्ढारारण्यान्याः, राजपुत्रदेशे जयपुरप्रान्तो "दुण्ढार" इत्युच्यते, या, **अवनी**=पृथिवी, तस्याः, **अध्यक्षः**=स्वामी। दुण्ढारशब्देन वनीशब्दं संयोज्य तद्वासिनां तदध्यक्षस्य चारण्यकत्वमुद्घोषितम्। **मायामयीम्**=प्रवञ्चनासमेताम्। **मन्त्रणाम्**=विचारधाराम्। **यत्येत**=यत्नः क्रियेत। **जर्जरः**=वृद्धः। **निर्जरसाम्**=देवानाम्। **राजा**=अधिपतिः। मृतः स्वर्गसिंहासनमलङ्करोतीति यावत्। **भर्जयतु**=दाहयतु। **स्वगर्जनतर्जनाभिन्नेन, ज्वलनेन**=दहनेन। रूपकम्। **वर्ज्यान्**=वर्जनीयान्, अस्पृश्यान्।

घनच्छायपलाशिपटले=सान्द्रच्छायवृक्षसमूहे। **अलीयत**=अदृश्यताङ्गतः।

न्तो निवृत्य तादृक्षानेव स्वप्नान् पश्यन् रात्रिं निनाय। पुनश्च यथासमयं मित्रैर्दिल्ली-यात्रामेव निर्णीय, स्वात्मीयस्य स्वर्णदेवस्य हस्ते निखिलं महाराष्ट्र-देश-राज्य-भारं समर्प्य, अश्वारोहिणां पञ्चशतीं सहस्रञ्च पदातिनां सह नीत्वा, मातरं प्रणम्य, जयपुराधीश्वरादेशानुसारेण तदीयैरपि शतसङ्ख्यैः सादिवीरैर्वृतो गौरेण, स्तन्यजीवेन· माल्यश्रीकेण, कविवर-भूषणशर्म्मणा च सहितोऽनिच्छन्नपि दिल्लीं प्रतस्थे। प्रथमेनैव दिनेन क्रोश-दशक·मतिवाह्य, शैलतटेपृपकारिका आयोज्य, सायं समये पर्वतस्यैकस्य शोभा-वीक्षण-व्याजेन मित्रैरेव महाधित्यकामारूढः, तत्रैव

स्वात्मीयस्य=अतितरां स्वीयस्य। अत एव स्वपदप्रक्षेपोऽपि, अन्यथाऽन्यतरेणैव गतार्थता स्यादित्यवधारणीयम्। जयपुराधीश्वरस्य, आदेशस्य=आज्ञायाः, अनुसारेण। तदीयैः=जयसिंहीयैः। सादिवीरैः=अश्वारोहिभटैः। अनिच्छन्नपि=अनभिलषन्नपि। पदमिदं प्रक्षिप्य दिल्लीगमनकारणेषु रसनारीकामात्मकं कारणमप्येकं निर्दिशति महाकविर्व्यासः।

अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः॥

इति मध्यमपाण्डवप्रश्ने—

काम एष क्रोध एष रजोगुणसमुद्भवः।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्॥

इति भगवदुत्तरोक्तकामपदस्य प्रत्यक्षमाद्यतया श्रुतस्योपस्थितय एव तत्पदस्य प्रक्षेपादिति सुधीजनसमवधारितः पन्थाः। शोभा-वीक्षण-व्याजेन=छटावलोकनच्छद्मना।

शिलासु स्थित्वा विमनायमानः पुनरात्मीयैरेवमालपत्।

महा०—न जाने, किमिति ग्लायतीव मे हृदयम्!

माल्य०—महाराज! शत्रु-गृह-प्रवेश एव ग्लानि-कारणम्।

भूषण०—महाराज! ग्लानिर्नाऽऽवहनीया, न रोचते चेदद्यापि प्रतिनिवृत्य, जयसिंह-सेनैवासनीया। प्रस्थीयते चेद्दिल्लीं गत्वा, अवरङ्गजीवोऽपि वीक्षणीयः, न भवतस्तथा ग्लानिः; यथा स ग्लायति भवत्स्मरणेन। दृष्ट्वैव भवन्तं हरिद्रा-द्रव-स्नापित-कपोल इव, निःशोणितवदनः, विस्मृततुरङ्गः, पारिप्लवकुरङ्ग इव कुरङ्गः, पर्यन्वेषितसुरङ्गः, सवेपथु-दुरङ्गः, संवर्त्स्यति समासादित-भयानक-नवरङ्गोऽवरङ्गः। येन भवानी-नामक-खड्गेन भवानीकिनी-विजय-लाभवता भवता विविधा आपद उत्तीर्णाः; हस्त एवास्ति स खड्गो भवतः।

ग्लायति=क्षीणहर्षतामापद्यते।

शत्रुगृहप्रवेशः=रिपुसदनगमनम्।

असनीया=क्षेप्तव्या, जेतव्येति यावत्। प्रस्थीयते=गम्यते। हरिद्राद्रवेण=महारजनरसेन, स्नापितौ=धौतौ, कपोलौ=गण्डस्थले यस्य सः। निःशोणितवदनः=निर्लोहिताननः। विस्मृततुरङ्गः=अनवधृताश्वः। पारिप्लवकुरङ्ग इव=त्रस्तहरिण इव। कुत्सितं रङ्गम्=वर्णः, यस्य सः। पर्यन्वेषितसुरङ्गः=गवेषितपलायनमार्गः। सवेपथूनि=सकम्पानि, दुरङ्गानि=दुरवयवाः, यस्य सः। समासादितः=लब्धः, भयानकः, नवः, रङ्गो येन सः। भवानीकिन्याः=संसारस्थितनिखिलशत्रुवाहिन्याः, विजयलाभवता=जयप्राप्तिकारणीभूतेन। आपदः=आपत्तयः।

तावदकस्मादेकतः समश्रावि-"महाराज ! विरम विरम, इतोऽपि प्रतिनिवर्तस्व, मा विश्वसिहि दिल्ली-कलङ्कम्, खड्गमाश्रय" इति गम्भीरः शब्दः। सर्वैस्ततः पातितदृष्टिभिश्च स एव धृत-तुम्बी-पात्रः, काञ्चन-चूर्ण-प्रचय-रुचिर-मृत्स्ना-मर्दित-सर्वाङ्गः, कृत-कुङ्कुम-तिलकः, तुलसी-माला-लसद्विशाल-वक्षःस्थलः, त्रिदण्डी, स्वामी राघवाचार्यो दृष्टः। स त्वागतमात्र एव दक्षिण-हस्तमुत्था-प्य गम्भीर-घोषेण पुनरगादीत्—

"वीर ! इतोऽपि विरम। चिर-प्रवृद्धं वैरम। अविश्वास्योऽव-

प्रतिनिवर्त्तस्व=परावृत्तिं स्वीकुरु। मा विश्वसिहि, दिल्लीकलङ्कमिति शेषः, मा विश्वासं विधेहि, अवरङ्गे। माशब्दो ननु माङ्, अत एव न लुङ्। खड्गमाश्रय=सङ्ग्रामय।

धृततुम्बीपात्रः=गृहीतालाबुभाजनः। काञ्चनचूर्णप्रचयवत्=हिरण्यक्षोद-व्रातवत्, रुचिरया=शोभनया, मृत्स्नया=मृदा, मर्दितं सर्वाङ्गं यस्य सः। त्रिदण्डी=दण्डत्रयवान्। अर्जुनेनापि त्रिदण्डधारणमेव कृतं सुभद्राहरणप्रकरणे। ब्राह्मणसन्यासिनां सदा दण्डत्रयधारणमेवोचितमिति स्पष्टं निरूपितं विहितक-ल्पतरुपरिमलखण्डनैः पण्डितस्वामिरामभिश्रशास्त्रिभिर्महामहोपाध्यायैरिति मूल-कृदनुमोदिता तच्छिष्यकृता टिप्पणी। सोऽयं सम्प्रदायवाद इति न विस्मर्त्तव्यम्। वैष्णवा हि त्रिदण्डिनः। वैष्णवपुराणेषु त्रिदण्डधारणमर्जुनादेः, शैवेषु चैकदण्ड-धारणं दरीदृश्यत इति नेदं किमपि। मिश्राणां खण्डनञ्च बालबुद्धिप्रतारणातिरिक्तं न किमपीति पुराणमतदीपिकायां विस्पष्टं प्रतिपादितमिति तत एवावेक्षणीयं वाद-रसिकैः। सिद्धान्तन्तु नीलसरस्वती जानातु।

इतोऽपि=अस्मादपि स्थानात्। चिरप्रवृद्धम्=दीर्घकालसञ्चलितम्।

रङ्गजीवः। दिल्लीतो दूरं महाराष्ट्र-सेना। स्फुरति च मे वामं नयनम्, तदितोऽपि निवृत्यताम्। यदि दिल्ली-वल्लभस्याऽऽज्ञया जयपुरेश्वरो युध्यते; तद् योत्स्यामहे, [विचार्य] युध्यन्ताम्। राजपुत्र-देशीया युद्धकुशलाश्चेन्महाराष्ट्रा अपि दुर्बलेन करेण न वहन्ति चन्द्रहासम्। युद्धे प्राणांस्त्यक्ष्यथ; ततोऽपि मार्तण्ड-मण्डलं भित्त्वा स्वर्गमार्गमाकुलयिष्यथ। यदि विजेष्यध्वे, ततोऽपि लोकद्वये कीर्त्यां कीर्तिम्, धर्मरक्षा-पुण्यञ्च लप्स्यध्वे। अलं कुक्कुटमेदो-मेदस्वि-तुन्द-तुन्दिलस्य, वारुणी-व्याघूर्णित-नयनस्य, अवरङ्गजीवस्य गृहावग्रहणी-घर्षणेन। आः! नावलोकयितुं शक्नोमि!! यो महाराष्ट्र-मण्डल-चक्रवर्ती; स एवाद्य दिल्लीकलङ्कस्य करप्रदः संवृत्तः!! धर्म-धारि-धौरेयः, पातकपुञ्जपतयालुं प्रेक्षितुं पथिकः! कर-कलित-भवानी-करवालोऽपि जाल्मस्य पाटच्चर-परिपन्थि-

---

वामम्=दक्षिणेतरम्। अशकुनमिदमिति लोकप्रसिद्धम्। **योत्स्यामहे**=सङ्ग्रामयिष्यामहे। स्वस्यापि कर्तृकोटौ निक्षेप इति शिवराजभृत्येष्वन्यतम इति विज्ञातं स्यात्, साधुताकपटत्व प्रकटितं स्यादिति-"**विचार्य**" आह, **युद्धयन्ताम्**, भवद्भिरिति कर्तृपदम्। **दुर्बलेन**=बलशून्येन। **आकुलयिष्यथ**=क्षोभयिष्यथ। **लोकद्वये**=इहामुत्र च। **कीर्त्यां**=कीर्त्तनीयाम्, गेयामिति यावत्। **कीर्त्तिम्**=यशः। **धर्मरक्षायाः**=वैदिकधर्मपालनस्य, **पुण्यम्**=धर्मम्। **कुक्कुटमेदोभिः**=चरणायुधमांसादिभिः, **मेदस्विना**=चिक्कणेनोन्नतेन च, **तुन्दिलस्य**=तुन्दिभस्य। **वारुण्या**=मदिरया, **व्याघूर्णिते**=चाञ्चल्यमुपयाते, नयने, यस्य तस्य। **गृहावग्रहण्याः**=देहल्याः, **घर्षणेन**=घट्टनेन। **करप्रदः**=राजस्वसमर्पकः। **पातकपुञ्जपतयालुम्**=अघौघपतनशीलम्। **प्रेक्षितुम्**=द्रष्टुम्। **पथिकः**=मार्गिकः। **जाल्मस्य**=धूर्तस्य। **पाटच्चरपरिपन्थिनः**=

नोऽग्रे विनयं दर्शयिष्यति !! हा दैव ! विचित्रा ते गतिः !"

तदाकर्ण्य क्षणं सर्वे चित्र-लिखिता इव नीरवाः संवृत्ताः। परतो महाराष्ट्रपतिरवादीत्—

"नवीन-संन्यासिन् ! हृदयग्राहि त्रपे। परन्तु कथय, यदि भारतीयानां वैदिक-धर्मावलम्बिनामेव मांसैर्मांसलीक्रियेत भारत-वसुमती, तत् किं न भवति पापम् ?"

राघवाचार्यः—"पापं कस्य ? यो विरोधिनां पक्षमवलम्ब्य स्वबन्धूञ्जिघांसति ; यत्कुलजा यवनानां श्यालत्वे श्वशुरत्वे च प्रतिष्ठां मन्वते ; तस्य। न त्वेतस्य ; यः स्वधर्मं रक्षितुं द्विषतो रुणद्धि। [ततः सर्वेषु क्षणं नीरवेषु पुनः] वीर ! गत-दिवसेऽपि भवन्तं कथितवानस्मि, तदेव चाद्याप्याम्रेडितवानस्मि। गच्छाम्यहमधुना तीर्थान्यटितुम्, स्वस्ति भवते, यथा रोचेत तथा विधेयम्"—

[इत्युक्त्वा सपदि शाल-जाले निलिल्ये]

महा०—[उच्चैर्निश्चस्य] गगन-गिरेवाऽऽलपितमिदम्। किं

लुण्ठकस्य शत्रोः। **विनयम्**=नम्रताम्।

नीरवाः=निःशब्दाः।

नवीनसंन्यासिन् !=अचिरगृहीतसंन्यास !। चिरान्न धर्मो विचारित इत्येवं त्रप इति हार्दम्। **मांसलीक्रियेत**=पुष्टीक्रियेत। **भारतवसुमती**=हैन्द-ववसुन्धरा।

जिघांसति=हन्तुमिच्छति। **श्यालत्वे**=पत्नीभ्रातृत्वे। **श्वशुरत्वे**=तत्पि-तृत्वे। **द्विषतः**=शत्रून्। **आम्रेडितवान्**=द्विरुक्तिः कथितवान्। **तीर्थानि**=पुण्यस्थलानि। **अटितुम्**=भ्रमितुम्। **शालजाले**=शालवृक्षसमूहे।

कुर्याम्? स्मारं स्मारमिमां गिरं स्व-बाल्य-स्वप्नानिव पुनश्चक्षुषोरग्रत इव पश्यामि-यद् यवन-दुर्गाणि वशीकृतवानस्मि, सुदूरपर्यन्तं देव-मन्दिरेषु ध्वजा उड्डीयन्ते, मथुरा-वृन्दावन-वाराणस्यादि-तीर्थेषु निर्भयं श्रीमद्भागवत-रामायणादि-कथा घोष्यन्ते, वयं दिल्लीमप्यावृतवन्तः, कम्बोज-पर्य्यन्तं यवनाः पराजिताः, भवानी च स्वयमिव प्रकटीभूय यवन-हतकैर्योद्धुं मामुत्साहयते। तत् किं व्यर्था एवैते स्वप्नाः? व्यर्थ एव भवानी-समुत्साहः? किमद्य दिल्ली-कलङ्को मां निग्रहीष्यति? न जाने किं भावि! दिल्लीं प्रस्थितोऽस्मि। स संन्यासी च निवारयति। अकारण-बन्धुरेष तथ्यं ब्रूते—इति निश्चिनोति मे हृदयम्।

भूषण०—[क्षणं सर्वेषु नीरवेषु] महाराष्ट्रराज! यस्य भवतो नामापि श्रुत्वा यवन-रमणीनां गर्भाः पतन्ति; अवरङ्गजीवस्य ज्वर इवाऽऽविशति; कस्तं निग्रहीष्यति? यदि गगन-विहारी विहङ्गराजः पिञ्जरे निगृह्येत; यदि शार्दूलो वशे क्रियेत; यदि वा नागनाथोऽनन्तो घटे मुद्र्येत; ततोऽपि को जानीते—सम्भाव्येत

गगनगिरा=नभोवाण्या। उड्डीयन्ते=दोधूयन्ते। घोष्यन्ते=कथ्यन्ते। आवृतवन्तः=अवरुद्धवन्तः। व्यर्थाः=निष्प्रयोजनाः। निग्रहीष्यति=स्वायत्तीकरिष्यति, दण्डयिष्यति। अकारणबन्धुः=निष्प्रयोजनमित्रम्। तथ्यम्=सत्यम्।

गर्भाः=औदरिका बालाः। ज्वरः=शरीरदाहः। गगनविहारी=आकाशचारी। विहङ्गराजः=गरुडः। पिञ्जरे=पक्षिस्थित्यर्थनिर्मिते लौहादियन्त्रे। शार्दूलः=मृगाधीशः। नागनाथः=सर्पराजः। अनन्तः, तन्नामा, शेष इति

भवतो निग्रहकथा न वा ? तच्चिन्ता-चक्रेणालम् ! यदि कोपकषायितो रणाङ्गणे बलेन जयसिंहस्यापि शिरस्यसिमसिष्यसि ; तन्मन्ये तस्योष्णीषं लौह-शिरस्त्रं सकवचमङ्गं महोपवेशनं दन्तावलञ्च द्विः कृत्वा, वसुधां विदार्य, कमठ-पृष्ठे रेखां विधास्यसि। यदि चावरङ्गजीवमरुणेनापाङ्गेनापि निरीक्षिष्यसे ; तत्तं मूर्छयिष्यसि। दिल्लीं गच्छ वा, परावर्तस्व वा, न भवति त आशङ्का-स्थानं किमपि। दिल्लीं प्रयात आपत्सु पतितोऽपि, कौशलेन प्राप्तोद्धारः, कुशलेन स्वदेशमायास्यसीति निश्चितं वदामि, मा स्म शङ्किष्ठा ब्राह्मण-वचने। यथा रोचेत तथा विधेहि !

माल्य०—[मुहूर्त्तं सर्वेषु स्तब्धेषु] भगवन् ! चिर-विचारेण निश्चिते विषयेऽलं चिन्तया ! जयपुरेश्वरेण सन्धिर्विहितः। भवतो दिल्लीतः कुशल-निवर्तनं वृद्धेन महाराजेन प्रतिज्ञातम्, सन्ति च रामसिंह-मायाजिह्म-प्रभृतयस्तत्रापि भवतः पक्षावलम्बिनः।

यावत्। घटे=गर्गरे। मुच्येत=नियन्त्र्येत। निग्रहकथा=नियन्त्रणवार्त्ता। चिन्ताचक्रेण=चिन्तनव्रातेन। कोपकषायितः=रोषकलुषः। असिम्=चन्द्रहासम्। असिष्यसि=क्षेप्स्यसि। उष्णीषम्=शिरोवेष्टनम्। लौहम्=आयसम्, शिरस्त्रम्=शीर्षत्राणम्। सकवचम्=सवारबाणम्। महोपवेशनम्=विशालासनम्। दन्तावलम्=करिणम्। वसुधाम्=धरिणीम्। विदार्य=विभिद्य। कमठपृष्ठे=कच्छपपृष्ठे। रेखाम्=चिह्नम्। अरुणेन=क्रोधरक्तेन। अपाङ्गेन=नेत्रप्रान्तेन। मूर्च्छयिष्यसि=मूर्च्छितं विधास्यसि। आपत्सु=विपत्सु। कौशलेन=नैपुण्येन। प्राप्तोद्धारः=लब्धनिष्क्रमणः। कुशलेन=शिवेन।

सशस्त्रा वयमपि । स भवतो विरुद्धमाचरिष्यति चेत् ; सर्वोऽप्येष देशो विद्रोहस्य ज्वालाभिरिव ज्वलिष्यतीति दिल्लीश्वरोऽपि वेवेत्ति । जयसिंहेन सह युद्धे पराजय इति स्पष्टमुक्तं दैवज्ञवर्येण देवशर्मणा । दिल्लीत आपदोऽप्युल्लङ्घ्य, हनूमानिव लङ्कातः कुशलेन निवर्तिष्यते— इति च क्रियासमभिहारेण कथ्यते दैवज्ञैर्ब्राह्मणैः । तद् यदि दिल्लीं प्रतिष्ठामहे : तदा तदापदोऽपि समुत्तीर्य परावर्तिष्यामहे— इतीष्टदेवं स्मृत्वाऽऽरब्धस्यैवान्तगमनं विधेयम् ।

एवमालपतामेव तेषां सगर्जनमेको व्याघ्रः सम्मुखं समापप्तत् । शिवर्वीरश्च सपदि समुत्थाय, दक्ष-कर-धृत-विकोश-च्छुरिको वामे चर्म च धृत्वा तमभिपतितः । यावत्स व्याघ्रः पूर्व-कराभ्यां तमाच्छन्दतिः तावत्स चर्मणि तदग्रकरौ प्रतिरुध्य, अन्तः प्रविश्य' छुरिकयोदरं विददार । तत्क्षणमेव च शिवसहचरा अपि स्व-स्व-खड्गैस्तमोत-प्रोतं चक्रुः । अथ सर्वैस्तमालिङ्ग्य "विजयस्व,

स्तब्धेषु=मौनप्रायेषु । **कुशलनिवर्त्तनम्**=कल्याणेन परावृत्तिम् । **सशस्त्राः**=सायुधाः । **वेवेत्ति**=अतितरां जानाति । **दैवज्ञवर्येण**=मौहूर्त्तिकशिरोमणिना । **क्रियासमभिहारेण**=वारं वारम् । **दैवज्ञैः**=अदृष्टज्ञैः । प्रतिष्ठामहे=गच्छामः । **इष्टदेवम्**=महाकालिकादिम् । **आरब्धस्य**=अनुवृत्तस्य ।

"प्रारब्धस्यान्तगमनं द्वितीयं बुद्धिलक्षम्"

इति हि प्रामाणिकाः ।

सगर्जनम् =सक्ष्वेडम् । **व्याघ्रः**=शार्दूलः । दक्षे करे धृता **विकोशा**=नग्ना, छुरिका येन सः । **चर्म**=असिरक्षणीम् । **पूर्वकराभ्याम्**=अग्रिमचरणाभ्याम् । पशूनामग्रिमौ द्वौ हस्तौ, पाश्चात्यौ च चरणाविति मतिः । **आच्छन्दति**=आवृणोति । **अन्तः**=उदरान्तिके । **विददार**=द्विधा चकार । **ओतप्रोतम्** =

विजयस्व, शुभ-सूचकमिदम्" इति व्याजहे। दिल्लीगमनञ्च पुनः स्थिरयित्वा स्वोपकार्यां विविशे।

❀ ❀ ❀ ❀

समयोऽयं महामहिम-हिमाच्छन्न-शिशिरस्य। ऋतुनैतेन दिनानां परिणाहः, तमीनां तनुता, पयोजानां प्रसन्नता, सलिलानां सुखावगाह्यता च, लुण्ठिता। भगवान् भास्करो दक्षिणस्यां निर्वासितः। गगन-तलञ्च प्रायिक-प्रालेय-पातैर्धूम-धूसरितमिव विहितम्। साम्प्रतं तैल-ताप-तूलिका-तरुणी-ताम्बूलादिष्वेव कृतादरा जनाः। जगत्प्राणो जगति प्राणिनो जडीकुर्वन्, जवेन वहति। आखण्डल-दिक्कुण्डलतामात्रमुपेयुषः, शुकतुण्ड-च्छवेः, मार्त्तण्ड-

विद्धानुविद्धम्। व्याजहे=कथितम्। स्वोपकार्याम्=स्वशिबिरम्।

× × × ×

महामहिम्ना=विपुलेन, हिमेन=प्रालेयेन, आच्छन्नस्य=आवृतस्य, शिशिरस्य। परिणाहः=विशालता। तमीनाम्=रात्रीणाम्। तनुता=लघुता। पयोजानाम्=कमलानाम्। प्रसन्नता=विकाशशीलता। सुखेन=आनन्देन, अवगाह्यता=स्नानयोग्यता। लुण्ठिता=चोरिता। निर्वासितः=निष्कालितः। प्रायिकैः=प्रायोभवैः, प्रालेयपातैः=हिमानीपतनैः। धूमधूसरितमिव=धूममलिनमिव। तैलम्=स्नेहः, तापः=अग्न्यातपादिजन्मा, तूलिका=तूलवती, तरुणी=युवती, ताम्बूलम्=नागवल्ली, इत्येतेषु। कृतादराः=विहितप्रणयाः। जगत्प्राणः=समीरणः। प्राणिनः=जनान्। जडीकुर्वन्=स्तब्धीकुर्वन्। जवेन=वेगेन। आखण्डलदिशः=ऐन्द्र्या हरितः, कुण्डलतामात्रम्=कर्णभूषणतामात्रम्। उपेयुषः=प्राप्तवतः। शुकतुण्डच्छवेः=कीराननकान्तेः।

मण्डलस्य, अचण्डानां मरीचीनां कोमलमुत्तापं सिषेवयिषूणां शाद्वलेन पथा प्रयातानां वन्यजन्तूनां पाद-क्षेप-विहता नैशीथ-मिहिका-प्रचय-भङ्गा एव, आखेटक्रीडा-कौतुकिनां पन्थानमुपदिशन्ति । सुन्दरी-संसर्गरहितमपि वीर-मण्डलमिदं प्रायिक-सीत्कारं व्रणिताधरं सरोमाञ्चं सवेपथु चास्ति । दिने सवेग-घोटक-धावनेन न लक्षितो हिम-पात-वात-घातः, निशीथिन्यान्तु वरूथिनीयं मन्थरिता ।

मात्तण्डमण्डलस्य=सूर्यमण्डलस्य । अचण्डानाम्=अकठोराणाम् । मरीचीनाम्=दीधितीनाम् । उत्तापम्=औष्ण्यम् । सिषेवयिषूणाम्=सेवयितुमिच्छूनाम् । शाद्वलेन=घासमयेन । प्रयातानाम्=गतानाम् । वन्यजन्तूनाम्=आरण्यकजीवानाम् । पादक्षेपविहताः=चरणपातदलिताः । नैशीथानाम्=रात्रिपतितानाम्, मिहिकाप्रचयानाम्=प्रालेयनिकराणाम्, भङ्गाः=छेदाः । आखेटक्रीडाकौतुकिनाम्=मृगयाव्यसनिनाम् । पन्थानम्=मार्गम् । उपदिशन्ति=प्रकटयन्ति । पथि पतितहिमानीषु चरणचङ्क्रमणचिह्नेन मृगयवः पशुगमनमार्गं निशीथे निश्चिन्वन्तीति तात्पर्यम् । सुन्दरीणाम्=वनितानाम्, संसर्गेण=सम्पर्केण, रहितम्=शून्यम् । वीरमण्डलम्=शूरव्रातम् । प्रायिकः=प्रायोभवः, सीत्कारः=अधरखण्डनादिकालिकः शब्दविशेषः, यस्मिन् । व्रणिताधरम्=दष्टोष्ठम् । सरोमाञ्चम्=सपुलकम् । सवेपथु=सकम्पम् । स्त्रीसंसर्गे भावि सर्वमिदं हिमानीसम्पर्कतोऽत्रेति विवेचनीयम् । सवेगघोटकधावनेन=सजवाश्वशीघ्रगत्या । हिमपातवातघातः=प्रालेयपतनखचितो वायुस्पर्शघातः । निशीथिन्याम्=तमस्विन्याम् । वरूथिनी=वाहिनी । मन्थरिता=क्षीणजवा ।

तदेवं स्थिरप्रतिज्ञास्ते प्रस्थिताः पथिषु प्रायो गोधूम-यवाऽऽढकी-मसूराऽतसी-सर्षप-हरिमन्थक-हरितानि परिपक्व-धान्य-कपिशानि निबिडेक्षु-दुर्गमाणि छिद्यमान-मुद्ग-माषव-त्राणि क्षेत्राणि निरीक्षणमाणाः, तत्क्षणच्योतितेक्षुरसं रसयन्तो नवीनान् सतीनान् स्वादमानाः कृत्त-कलम-पुष्कल-पटलेषु वृष-भावली-चालनेन धान्य-पवन-कार्यं सम्पादयतां खट्वाः परित्यज्य, सकौतुकं महाराष्ट्र-वीर-मण्डलमवलोकयतां खेट-खर्वट-वासिनां निरीक्षण-कौतुकमावहन्तः सूच्यग्रैरहिफेन-फलानि निर्यासार्थं

स्थिरप्रतिज्ञाः=निश्चितसन्धाः । **गोधूमः**="गेहूँ", **यवः**="जौ", आढकी="अरहर" **मसूरः**="मसूर" **अतसी**="तीसी", **सर्षपः**="सरसो", **हरिमन्थकम्**="चना", एभिः, **हरितानि**=हरिद्वर्णवन्ति । परिपक्वैः, धान्यैः, **कपिशानि**=कपिशवर्णानि । **निबिडेक्षुदुर्गमाणि**=सान्द्रेक्षुदुःखगम्यानि । **छिद्यमानानि**=कर्त्यमानानि, मुद्गमाषवत्राणि येषु तानि। "मूंग, उरदी, बाजरा," इति लौकिकाः शब्दाः । **तत्क्षणच्योतितेक्षुरसम्**=तत्कालनिस्सारितेक्षु-द्रवम् । **रसयन्तः**=आस्वादयन्तः, पिबन्त इति यावत् । **नवीनान्**=नूत्नान् । **सतीनान्**=निष्पावान् । "केराव" इति हिन्दी । **स्वादमानाः**=खादन्तः । **कृत्ता-नाम्**=खण्डितानाम्, **कलमानाम्**=धान्यानाम्, **पुष्कलपटलेषु**=पूलव्रजेषु । **वृषभावलीनाम्**=बलीवर्दपङ्क्तीनाम् , **चालनेन**=भ्रामणेन । **धान्यपवनकार्यम्**= धान्यपूतीकरणकर्तव्यम् । "दँवरी" इति लोके । **सम्पादयताम्**=कुर्वताम् । **खट्वाः**=पर्यङ्किकाः । **सकौतुकम्**=सकुतूहलम् । **अवलोकयताम्**=पश्यताम् । **खेटखर्वटवासिनाम्**=क्षेत्रान्तरालस्थरिक्तभूमिनिवासिनाम् । **निरीक्षणकौ-तुकम्**=अवलोकनकुतुकम । **आवहन्तः**=धारयन्तः । **सूच्यग्रैः**=स्यूतिकर-

घर्षयन्तीनां कलमान कृन्ततीनामारण्यक-शुष्क-गोमयराशींश्चिन्वतीनां ग्राम्य-चेटीनां शिवराज-यशोमयानि गीतानि शृण्वन्तश्च कतिपयैरेव सप्ताहैरहोमदनगरम्, विराट-देशम्, इन्द्रपुरम्, उज्जयिनीम्, गोपालपुरम्, मथुराञ्च, समुल्लङ्घ्य, अङ्कर्तु-रसेन्दु-मित-वैक्रमाब्दस्य [१६६६] वसन्तारम्भे दिल्लीनिकटं प्रापुः ।

दिल्लीतः कियद् दूरे यमुना-तटे शिबिर-सन्निवेशो गिरिग्रामसमीपे विहितः, जयसिंह-प्रेषिताः सादिनश्च, महाराष्ट्राधीश-समागम-संवाद-कथनाय यमुनामुत्तीर्य दिल्लीं प्रविविशुः ।

णाग्रैः । **अहिफेनफलानि**="पोस्ता" इति ख्यातानि फलानि । **निर्यासार्थम्**=तन्निःसृतदुग्धप्रायविषार्थम् । **निर्यासः**="गोदं, लासा"इति लोके । **अहिफेनम्**="अफीम"इति हिन्दी । **घर्षयन्तीनाम्**=घट्टयन्तीनाम् । **कलमान्**=धान्यानि । **कृन्ततीनाम्**=खण्डयन्तीनाम् । **आरण्यकानाम्**=वन्यानाम्, **शुष्कगोमयानाम्**="गोइठा"इति ख्यातानाम्, **राशीन्**=समूहान् । **चिन्वतीनाम्**=एकत्रयन्तीनाम् । **ग्राम्यचेटीनाम्**=ग्रामीणभृत्यानाम् । **गीतानि**=गीतीः । **अहोमदनगरम्**="अहमदाबाद"इति ख्यातम् । **विराटदेशम्**=विदर्भप्रान्तम् । "बरार" इति ख्यातम् । **इन्द्रपुरम्**="इन्दोर" इति ख्यातम्, "इन्द्रावती"ति तद्वाचकोऽपरः संस्कृतशब्दस्तत्रत्यैर्बहुधाऽङ्गीकृतः । **उज्जयिनीम्**=अवन्तीम् । **गोपालपुरम्**=वृन्दावनम् । अङ्कानि षड् वेदस्य, ऋतवः षट्, रसाः षट्, इन्दुः-एकः, "अङ्कानां वामतो गतिरि"ति-१६६६-संख्यया, **मितस्य**=परिमितस्य, **वैक्रमाब्दस्य**=विक्रमराज्यादतीतहायनस्य । **वसन्तारम्भे**=मधुप्रारम्भे । **प्रापुः**=प्राप्तवन्तः ।

गिरिग्रामस्य="गुडगांव"इति ख्यातस्य, **समीपे**=अन्तिके । **उत्तीर्य**=नावा सन्तीर्य, परतटं गत्वा ।

रात्रौ सर्वेषु सुप्तेषु, एकाकी महाराष्ट्र-महनीयो माल्यश्रीकसहायो बहिर्निर्गत्य यमुनातटे प्रालेयस्नाते पाषाण-खण्डे समुपविष्टः। कदाचित् श्याम-श्यामैस्तरङ्ग-पटलैर्वहन्तीं यमुनाम्, कदाचन गगन-महासागर-फेन-पटलायितं तारका-पटलम्, पश्यन्, कर्हिचिच्च दीप-प्रचय-सूचित-प्रासाद-मण्डलां यवनराजधानीं निभालयन्, मुहूर्त्तं निभृतमेवावतस्थे। परतः समवोचत्-"मित्र! इयमेव राजधानी युधिष्ठिरादीनां क्षत्रियकुल-भूषणानाम्। अत्रैव पृथ्वीराजोऽपि चरम-वीर उवास। एतस्या एव नाम श्रावं श्रावं हीरात-काम्बोज-गान्धार-समरकन्द-प्रभृति-देशवास्तव्याः स्वप्नेष्वपि "पलायध्वं! भोः पलायध्वम्"-इति विलेपुः। सैवेयमधुना तद्देश-वासिभिरेव कदर्य्यैर्भुज्यते। अहह! तत्रैवैष सनातधर्मस्य

महाराष्ट्रमहनीयः=महाराष्ट्रवर्णनीयः। माल्यश्रीकः **सहायः**=सहचरो यस्य सः। एवञ्चैकाकिताया नाद्वितीयतायां तात्पर्यम्, अपि तु समानद्वितीयशून्यतायामिति वेदितव्यम्। **प्रालेयस्नाते**=हिमभूषिते। **श्यामश्यामैः**=अतिश्यामैः। **तरङ्गपटलैः**=लहरिव्रातैः। **गगनमहासागरस्य**=नभोनीरनिधेः, **फेनपटलैः**=डिण्डीरचयैरिवाऽऽचरितम्। रूपकम्। **तारकापटलम्**=उडुगणम्। दीपप्रचयेन सूचितानि **प्रासादमण्डलानि**=हर्म्यसमूहाः, यस्यां ताम्। **निभालयन्**=पश्यन्। **क्षत्रियकुलभूषणानाम्**=क्षात्रान्वयालङ्काराणाम्। **चरमवीरः**=अन्तिमः शूरः। **हीरातः**="ईरान" इति ख्यातः, **काम्बोजः**="कावुल" इति प्रसिद्धः, **गान्धारः**="कन्धार"इत्यपभ्रंशीभूताभिधेयः, **समरकन्दः**, एवमेव प्रसिद्धः, एवंप्रभृतिदेशानां **वास्तव्याः**=निवासिनः। "वसेस्तव्यत् कर्त्तरि णिच्च"। **तद्देशवासिभिः**=हीरातादिदेशीयैः।

तिरस्कारः। अत्रैव मया प्रवेष्टव्यम्। भगवान् भव्यं विदधातु!

माल्य०—विदधातु भव्यं भगवान्! तावदकस्माद् यमुनातटादुद्भूता समश्रावि कस्याप्युदार-गम्भीरा वाणी-"सर्वथा भव्यं विदधातु भगवान्"—इति।

ततः 'कुतोऽयम्? कोऽयम्?' इति विजिज्ञासमानैः सावधानतया तत एव निपुणं निरीक्षमाणैरदर्शि-यत् कञ्चन हस्ते पुष्पं गृहीत्वा स्वाभिमुखमायातीति। समीपमागते च तस्मिन्नुभाभ्यां दृष्टं-यत्स एव स्वामी पूर्वावलोकितः—इति।

राघवाचार्यः—सर्वथा भव्यं विदधातु भगवान्! गृह्यतां मथुराधीशस्य प्रसादकुसुममेतद्।

महाराष्ट्रराजः—स्वामिन! कथमेवं वेगेन समायातो महाराष्ट्रदेशाद्दिल्लीं भवान्?

राघ०—राजन्! संन्यासिनो वयमलौकिकाभ्यास-परायणाः, तदस्मिन् विषये भवता किमपि न प्रष्टव्यम्!

महा०—[कराभ्यामाशीःकुसुमं गृहीत्वा, शिरसा संयोज्य] महानयमनुग्रहः!

माल्य०—[प्रणम्य] अलौकिक एषोऽनुग्रहः श्रैमत्कः।

कदर्य्यैः=नीचैः। **भुज्यते**=स्वायत्तीक्रियते। **भव्यम्**=कल्याणम्। **उद्भूता**=उत्थिता।

विजिज्ञासमानैः=विज्ञातुमिच्छद्भिः। **सावधानतया**=मनोनियोगपूर्वकम्।

अलौकिकाभ्यासे=आकाशगमनादिरूपे, **परायणाः**=संलग्नाः।

अनुग्रहः=कृपा। श्रीमतामयं **श्रैमत्कः**=भावत्कः।

राघ०—न बहु वचनीयम्। सम्राजा सह सतर्कैर्व्यवहर्तव्यमित्येव कथयामि। यवनराजेन भवदागमन-वृत्तान्त उपलब्धः। श्व एव साक्षात्कारो भविष्यति। इतोऽपि वदामि—साक्षात्कारानन्तरं बहु न स्थेयम्। निःशस्त्रेण कदाऽपि न भाव्यम्। न कोऽपि तदीयो विश्वसनीयः। शिबिरं प्रविशत। शेध्वम्। गच्छाम्यहम्। केवलमाशीःसम्भावनायैवाऽऽयातः। [इत्युक्त्वाऽन्धतमसे विलीनः]

महा०—माल्य! दिल्ली-प्रस्थान-वार्त्तारम्भ-समयमारभ्यैवैतेन सह परिचयो जातः। कोऽयं? किमित्यकारणमस्मान् स्निह्यति? न जाने।

माल्य०—दिनेष्वयं नावलोक्यते, रात्रावेव मिलति।

महा०—रात्रावपि च चिरं नावतिष्ठते। पञ्चषा एव वार्ता आलप्य, सपदि प्रयाति।

माल्य०—ईदृशो गम्भीरः स्वरः, उदारा च वाक्, न श्रुता कस्यापि।

महा०—न कस्यापि! [निःश्वस्य] ऋत एकस्मात् क्षत्रिययुवकात्। [ततो द्वावपि क्षणं तूष्णीकौ दीर्घमुष्णं निश्वस्य, पटान्तेन चक्षुषी अमार्ष्टाम्।]

अथ, उभौ शिबिराभिमुखं चलितौ पथः पार्श्वे परिवर्तमानस्यैकस्य पर्कटी-वृक्षस्य भिन्नाञ्जन-श्यामल-च्छायातः "महाराष्ट्र-

---

भवदागमनवृत्तान्तः=भवत्प्राप्तिसमाचारः। उपलब्धः=प्राप्तः।

स्थेयम्=स्थातव्यम्। शेध्वम्=शयनं कुरुत। स्निह्यति=प्रीणाति।

अमार्ष्टाम्=प्रौञ्छताम्।

पर्कटीवृक्षस्य=प्लक्षद्रुमस्य। भिन्नाञ्जनश्यामलच्छायातः=स्फुटिताञ्ज-

राज ! क्षणमित आयाहि, किमपि कस्याश्चिद् दुःखिन्या वचनं निवेदयामि"–इति कस्या अपि योषित इव वचनं श्रुतवन्तौ ।

महा०—माल्य ! केयम् ?

माल्य०—पुनः शृणुवः !

अन्धकारात् पुनः—"दयस्व, महाराज ! केवलं वक्तुं किमपि एतावत् कष्टं सोढ्वाऽऽयाताऽस्मि । तत्रैव क्षणमपेक्षस्व, आगत्य निवेदयामि ।

महा०—आगच्छ, तिष्ठावः ।

तावदुभाभ्यां दृष्टम्–यदेका नील–वसन-परिधानोत्तरीय-कञ्चुकिका, विरहित-पाद-भूषणा, अन्धतमस-वशादस्पष्ट-दृष्टरूपा, यवन-सुन्दरी समागत्य, एकेन हस्तेन सपूर्व-काय-नमनं प्रणम्य समुपस्थिता । तां तथाभूतामालोक्य, महाराष्ट्रपतिः समार्दवमगादीत् ।

महा०—सुन्दरि ! कथय, का त्वम् ? कुत आयाता ? किमिच्छसि ? किं कथयसि ? आः ! न ते भयं सर्पेभ्यो भूतेभ्यः पिशाचेभ्यो वा ? केन प्रहिताऽसि ? कथमस्मानत्रत्यान् ज्ञात-

---

नकृष्णच्छायायाः । **दुःखिन्याः**=खिन्नायाः ।

सोढ्वा=क्षान्त्वा । **अपेक्षस्व**=अपेक्षां कुरु, तिष्ठेति यावत् ।

नीलानि=कृष्णवर्णानि, वसनपरिधानोत्तरीयकञ्चुकानि यस्याः सा । **विरहितपादभूषणा**=नूपुरादिशून्या । **अस्पष्टदृष्टरूपा**=अपूर्णावलोकितवेषा । **एकेन हस्तेन**=अद्वितीयेन करेण । प्रणतिरीतिरियं यवनेषु प्रसिद्धा "सलाम" इति शब्देन । **सपूर्वकायनमनम्**=कायपूर्वभागशिरोनमनपुरस्सरम् । **समार्दवम्**=सकोमलतम् ।

वत्यसि ? कथं कृत-हिम-कण-पातं कालिन्दी-कूलाऽऽघातं वातं सहसे ? कथं वा घोरेऽन्धतमसे, कलिन्द-तनयोत्तुङ्ग-तरङ्ग-भङ्ग-भयङ्कर-तटे, सर्ज-खर्जूर-पर्कटी-गहने प्रदेशे समागच्छन्ती न भीताऽसि ?

यवनी—[अञ्जलिं बद्ध्वा] महाराज ! दिल्लीश्वर-दुहितुस्तत्र-भवत्या रसनाख्यां अन्तरङ्ग-सखीं मामवगच्छ !

महा०—अहो ! अपि प्रसीदति तत्र भवती ? अपि वा नन्दत्या-युष्मान कुमार-मायाजिह्मः ?

यवनी०—महाराज ! सर्वे कुशलिन इति कथनं व्यवहारः । तथाऽपि भगवती कुमारी रसनारी तु कथं कुशलिनी; यदि सदा हरिद्रा-द्रव-क्षालित-ताली-दल-प्रख्यां कपोल-पालीं वहति ।

महा०—स्फुटं वद, का चिन्ता ? किं वा दुरवापम ? दिल्ली-वल्लभ-क्रोड-क्रीडाऽतिवाहित-बाल्यानां महाराज-कुमारीणाम्, मादृश-जनाधीनं वा किमस्तिः यन्निशीथेऽपि त्वां प्रेषितवती ।

प्रहिता=प्रेषिता । **अत्रत्यान**=इह स्थितान् । **कृतहिमकणपातम्**=विहितप्रालेयखण्डपतनम् । **कालिन्दीकूलाघातम्**=यमुनातटताडनम् । **वातम्**=पवनम् । कलिन्दतनयायाः, **उत्तुङ्गैः**=अत्युन्नतैः, तरङ्गभङ्गैः, **भयङ्करे**=भीतिदायिनि, **तटे**=कूले । सर्जैः, खर्जूरैः, पर्कटीभिश्च **गहने**=दुरवगाहे ।

व्यवहारः=आचारपालनम् । **हरिद्राद्रवेण**=महारजनरसेन, **क्षालितस्य**=धौतस्य, तालीदलस्य, **प्रख्याम्**=समाम् ।

दुरवापम्=दुःखेन प्राप्तुं योग्यम् । **दिल्लीवल्लभक्रोडक्रीडया**=दिल्लीशा-ङ्कलीलया, **अतिवाहितम्**=यापितम्, बाल्यं याभिस्तासाम् । **निशीथे**=अर्धरात्रे ।

यवनी—महाराज ! महाराज-कुमार्य एव महाराजेषु रज्यन्ते। यस्मिन्ननुरागः; तदलाभ एव खेदस्य कारणम्।

महा०—ओः ! अवगच्छामि। माल्यश्रीक ! सम्राट्-कुमारी मामनुरागेणानुगृह्णाति।

माल्य०—सत्यमौदार्यमिदं कुमारीहृदयस्य !

महा०—सुन्दरि ! मद्वचनेन ब्रूहि तत्रभवतीं यद्—"महाभागे ! निवेदितवानस्मि तत्र भवत्याः परावर्तन-समये। तदद्यापि भवत्याः पिता चेदनुमन्येत; तत्प्रस्तुतोऽस्मि स्वहस्तेन श्रीमत्याः स्वेदानपनेतुम्, बाल-व्यजनेन च वीजयितुम्। दिल्ली-वल्लभस्याननुमतन्तु को नाम शक्तो मनसाऽपि चिन्तयितुम्"—इति। सुन्दरि ! सद्यो यथागतं निवर्तस्व। अहमपि स्वप्नेष्वपि राजकुमारीं पश्यामि, जागरितोऽपि च तद्गतचित्तस्तां पुरोगतामिव विलोकयामि। किन्तु किं करोमि ? दुर्घटो हि संयोगः। त्वमात्मानमाच्छाद्य, गूढसञ्चारा कृष्णाभिसारिकेव समायाताऽसि। यदि केनापि वीक्ष्येथाः; तत्सम्भाव्यते पक्षद्वयेऽपि विपत्तिरिति। वयमद्यैव समा-

महाभागे !=श्रेष्ठभागधेये !। **परावर्त्तनसमये**=परावृत्तिवेलायाम्। **अनुमन्येत**=स्वीकुर्यात्। **स्वेदान्**=रतिश्रमोद्भूतघर्मबिन्दून्। **अपनेतुम्**=दूरयितुम्। विवाहयितुमिति यावत्। **अननुमतम्**=अस्वीकृतम्। **यथागतम्**=आगमनानुकूलम्। एकाकिनीति यावत्। **पुरोगताम्**=अग्रे स्थिताम्। गूढसञ्चारा=गुप्तगतिः। **कृष्णाभिसारिका**=कृष्णवसनाद्युपहिता याऽभिसारिकाऽभिसरति सा कृष्णाभिसारिकेत्युच्यते। अभिसारिका च "कान्तार्थिनी तु या याति सङ्केतं साऽभिसारिके"ति कृतलक्षणा वेदितव्या। **पक्षद्वये**=रसनारीपक्षे मत्पक्षे

याताः, राज-साक्षात्कारोऽपि न कृतः। कियत्कालञ्च स्थास्यामः। ब्रूहि तत्र भवतीं धैर्यमवलम्बितुम्। प्रयाहि, प्रयाहि—

इत्युक्ता सा, पुनः क्षणं मन्द-स्वरेण किमपि समालप्य, साभिवादनं निवृत्ता। इमौ च शिबिरं प्रविश्य सुषुपतुः।

× × × × ×

परेद्युर्विहित-स्नान-भोजनादि-क्रियैर्मित्रगणैः सह समुल्लोचतले समुपविष्टे महाराष्ट्रराजे, प्रतीहारेण प्रविश्य, प्रणम्य, कथितम्—

"महाराज ! अम्बर-राजकुमारः समायाति"—इति। तदाकर्ण्य, स्वयमुत्थाय, प्रविशन्तमम्बर-पुरन्दर-पुत्रं रामसिंहं समालिङ्ग्य समानीय स्वपार्श्व उपवेश्य, स्वयमुपविष्टः। महाराष्ट्रराजो वीरोचितां तेजस्विनीमुदारां तदाकृतिं पश्यन्नतितरां मुमुदे। रामसिंहश्च चिरात् तस्य नाम यशः प्रतापञ्च श्रावं श्रावं बाल्यमयापयदिति विस्फारित-नयनं मुहूर्तं तमपश्यत्, परतश्च महाराष्ट्रराजेनाऽऽपृष्ट-कुशलः, साञ्जलि सादरवचनं यथाचारमुक्त्वा कथितवान् यद्—

च। **अवलम्बितुम्**=धारयितुम्। **साभिवादनम्**=सनमस्कृति।

× × × ×

समुल्लोचस्य=शोभनस्य वितानस्य, **तले**=निम्ने। **प्रतीहारेण**=दौवारिकेण।

अम्बरराजस्य=जयपुरेशस्य, **कुमारः**=तनयः। **तेजस्विनीम्**=प्रतापप्रदर्शिकाम्। **विस्फारितनयनम्**=सुविकासितनेत्रम्। आपृष्टं कुतूहलं यस्य सः।

आर्य ! तात-चरणानां पत्रं प्राप्तवानस्मि । यथा स मम मान्यस्तथैव भवान् इति मद्योग्येनाऽऽदेशेन सर्वथाऽनुकम्पनीयोऽहम् ।

महा०—एषा परमदया क्षत्रिय-कुलावतंसस्याम्बरेश्वरस्य । भवन्तञ्च बन्धुं प्राप्यातितरां प्रसीदामि ।

तदनन्तरं चिरमुभयोर्जात आलापः । परस्तान्मन्दमालपन्महाराष्ट्रराजो यद्—"दिल्लीश्वर-दर्शन-विषये भवतः का सम्मतिः ?" इति ।

स आह—सम्प्रति चण्डश्चण्डमरीचिरिति मुहूर्त्तं विलम्ब्य, गन्तव्यम् । दिल्लीश्वरो भवन्तमागतं ज्ञातवानस्ति ।

तदाकर्ण्य, किञ्चित् स्मयमाने महाराष्ट्रराजे पुनर्विचार्येव प्रावोचत्—

"भगवन् ! भवान् कुशलेन निवर्तनीयः—इति पित्रा लिखितमस्ति । तदत्र प्रतीपं नाऽऽशङ्कनीयम् । द्रष्टव्यः सम्राट्" ।

अत्र सन्धौ—अपृष्ट—आवृष्टयोः समानरूपता, तदिदं दोषावहमिति केषाञ्चिन्मतम् ।

मद्योग्येन=मदर्हेण । **अनुकम्पनीयः**=दयनीयः ।

चण्डः=प्रखरः । **चण्डमरीचिः**=भास्करः ।

स्मयमाने=ईषद्धसति । "दिल्लीश्वरसाक्षात्कारो विधेयो न वेति शिवराजस्य तात्पर्यमासीत्, तच्च नावगतं रामसिंहेनेति" स्थितवानिति मूलकृच्छिष्यकृता टिप्पणी । दिदृक्षयैव समागतस्य तदर्थमेव स्थितस्य प्रतीक्षमाणस्य च निगूढमिममभ्यन्तरिकमभिप्रायं कथं वेवेत्तु रामसिंह इति नावधारयितुं पारयामः ।

प्रतीपम्=विरुद्धम् ।

ततो माल्यश्रीक आह—प्रतीप आचरिते महाराष्ट्र-देशे तथा समर-ज्वलन-ज्वालाः प्रसरिष्यन्ति ; यथा भारते यवनसम्राङ्शं एव भस्मसाद् भविष्यति।

रामसिंहस्तु सान्त्वयन्नब्रवीत्—मैवम्, मम तात-चरणमत्यन्तमाद्रियते सम्राड्-इति तल्लेखं नान्यथा करिष्यतीति निश्चिनोमि।

ततो बहुभिर्वार्ताभिरेव प्रतियापिते मुहूर्त्ते, "राज-साक्षात्कार-समयः संवृत्तः" इत्युक्तवति रामसिंहे, नववस्त्राणि धारयन्, चन्द्रहासं समास्संसयन्, सम्मुखमुकुरे दत्तदृष्टिः रुष्णीष-बन्धनानि विन्यस्यन्, महाराष्ट्रपतिरगादीत्—"मध्ये प्रबलप्रवाहा यमुनेति कथं प्रवेक्ष्यामो दिल्लीम्?"। स आह—आर्य! नौका-परम्पराभिरायोजितो महान् सेतुरस्ति, तत एव निःशङ्कं घोटकाः, उष्ट्राः, वृषाः, शकटाः, रथाश्च, यातायातं कुर्वन्ति। तत एव यास्यामः।

महा०—अथ कत्यश्वारोहा अनुसरन्त्वस्मान्?

कुमाररामसिंहः—राजद्वार-पर्य्यन्तं शतं शक्नुवन्ति गन्तुम्, अन्तस्तु वयमेव यास्यामः।

महा०—अस्माभिः केन यानेन गन्तव्यम्?

कुमार०—पुष्परथमानीतवानस्मि।

समर एव ज्वलनः=दहनः, तज्ज्वालाः।

समास्संसयन्=अवलम्बयन्। सम्मुखमुकुरे=पुरः स्थितादर्शे।

दत्तदृष्टिः=प्रहितनयनः। प्रबलप्रवाहा=विशालधारा। यातायातम्=गामगमम्।

अनुसरन्तु=पश्चात्पदा भवन्तु।

महाराष्ट्रराजस्तु—"दिल्ली-कलङ्केनैतेन स्वपुत्रो न प्रेषित आनेतुम्, अपमान एषः"—इति मनसि चिन्तयन्, माल्यश्रीक-गौरसिंहादिभिः सज्जो भूत्वा, रामेण सहोत्थाय, शिबिराद् बहिरागत्य पुष्परथमारूढः । तस्मिन्नेव तत्सम्मुखे कुमार-रामसिंह उपविष्टः । गौरसिंह-माल्यश्रीकादयोऽपि भूषण-भूषितान् सौवर्ण-वल्गानश्वानारूढाः । कतिपये रामसिंह-सादिनोऽपरे च शतं महाराष्ट्र-सादिनोऽपि सज्जा इतश्चेतश्च, धावन-संवेग-महोत्साह-खुरखुरायित-खुराणां कथं कथमपि संयम्यमानानां कुसुमैरिव फेन-प्रपातैः परिपूजित-वसुन्धराणां धावन-धुरन्धराणां सैन्धवानां हेषाभिरध्वनीनान् बधिरानकार्षुः । तावत् सपदि भूषण-कविरागत्य, प्रलम्ब-कवितयाऽऽशीराशीनुदीर्य, राजहस्ते साक्षतानि कुसुमानि दत्त्वा,

---

पुष्परथम्=चक्रयानम्, असामरिकम् ।

स्वपुत्रः=मायाजिह्माद्यन्यतमः । तनयानुरागिणे हि तनयप्रेषणमावश्यकम् ; एतादृशीमेव काञ्चिद् घटनामक्षिलक्ष्यीकृत्य पण्डितराजोऽभाणीत्-

न वारयामो भवतीं विशन्तीं वर्षानदीस्रोतसि जह्नुजायें ।
न मुक्तमेतत्तु पुरो यदस्यास्तरङ्गभङ्गान् प्रकटीकरोपि ॥

तस्मिन्नेव=पुष्परथ एव । भूषणैः=हिरण्याभरणैः, भूषितान्=अलङ्कृतान् । अत्र शिवराजकृत्येऽस्मिन् भूषणोऽश्वभूषणताङ्गत इति समानशब्दैर्ध्वनयति । सौवर्णवल्गान्=हैरण्यकविकान् । धावनसंवेगेन यो महोत्साहः, तेन खरखुरायिताः, खुराः=शफाः, येषां तेषाम् । संयम्यमानानाम्=अवरुध्यमानानाम् । कुसुमैरिव=प्रसूनैरिवेत्युत्प्रेक्षा । परिपूजितवसुन्धराणाम्=सेवितवसुमतीकानाम् । धावनधुरन्धराणाम्=शीघ्रगतिपटूनाम् । अध्वनीनान्=

तदनुमत्या स्वयमपि मौक्तिक-माला-कलित-कण्ठं सौवर्ण-किरण-कलित-वर्णद्वय-मध्यं राजत-कुसुमावलि-शोभित-लाङ्गूलं श्यामभेकं प्रकाण्डं वाजिनमारूढवान्, समङ्गलशब्दश्च सर्वेऽपि प्रस्थिताः, क्षणेनैव च सर्वे सेतुं प्राप्ताः। ततो दृष्टवान्—महाराष्ट्रपतिर्यद्भास्वान् मृदुलमयूखः संवृत्य भुवमभिपतति। अभ्रंलिहानां कलितापर-मेघाडम्बराणां समुद्भूत-ध्वजानां दिल्ली-हर्म्याणां छाया कलिन्द-नन्दिन्याः श्यामतां द्विगुणयति। अभितः सेतुम्; तनवः, महत्यः, सपटलाः, अपटला, साट्टाः, निरट्टाः, हंस-मयूर-वर्त्तक-सारस-कारण्डवादि-विविधाकाराः, चित्र-विचित्रिताः, समञ्जीर-क्षेपण-झणत्काराकुलीकृत-कमठाः, सहस्रशो नौका इत

पथिकान्। **मौक्तिकमालया**=मणिस्रजा, **कलितः**=भूषितः, **कण्ठः**=गलो यस्य तम्। **सौवर्णकिरणैः**=हैरण्यमयूखैः, कलितं वर्णद्वयं मध्ये यस्य तम्। राजत-कुसुमावलिभिः, शोभितम्, **लाङ्गूलम्**=पुच्छं यस्य तम्। **प्रकाण्डम्**=विशालम्। **भास्वान्**=दीधितिपतिः। **मृदुलमयूखः**=कोमलकिरणः। **संवृत्य**=भूत्वा। **भुवम्**=धरणीम्। **अभिपतति**=समुपयाति। **अभ्रंलिहानाम्**=मेघस्पर्शिनाम्। **कलितापरमेघाडम्बराणाम्**=धारितद्वितीयवारिवाहानुकृतीनाम्। **श्यामताम्**=कार्ष्ण्यम्। **द्विगुणयति**=वर्द्धयति। **तनवः**=लघवः। **महत्यः**=श्रेष्ठाः। **सपटलाः**=सच्छदिकाः। "पटलं छदिरि"त्यमरः। "छप्पर" इति हिन्दी। **अपटलाः**=अच्छदिकाः। **साट्टाः**=साट्टालिकाः। सचन्द्रशालाका इति यावत्। **निरट्टाः**=निरट्टालिकाः। **हंसादिविविधाकाराः**=हंसाद्यनेकाकृतयः, मयूरपुच्छीप्रभृतिशब्दैः ख्याता अधिरामनगरं दृष्टिपथगाः। **चित्रैः**=आलेख्यैः, **विचित्रिताः**=चित्रीकृताः। **समञ्जीराणाम्**=सक्षुद्रघण्टिकानाम्, **क्षेपण**-

श्चेतश्च संसरन्ति, तटस्थाः, तरणिस्थाः, सेतावपि च यातायात-पराः, सहस्रशो नागराश्च, कन्धरं परिवर्त्य, चक्षुषी विस्फार्याऽऽत्मानं पश्यन्ति, साङ्गुलि-निर्देशञ्च स्वमित्राणि "सोऽयं सोऽयम्" इति दर्शयन्ति ।

ततः स यमुनां प्रणम्य, मनस्येव कथितवान् यद्—

"भगवति ! कृष्णप्रिये ! यथा कालिय-सदनं प्रविश्यापि भगवान् कृष्णः काकोदरं निर्मथ्य निरगात्, यथा च नन्दो ग्राहेण गृहीतस्त्वज्जले निमग्नोऽपि बक-विद्वेषिणोऽनुग्रहेण सकुशलं परावृत्तः, तथैव चेदहमपि दिल्लीतः कुशलेन स्वपुण्यपुरीं परावर्ते; तद् दुग्ध-धारा-सहस्रैः कमलानां लक्षेण लक्षेण च घृत-दीपानां त्वामभ्यर्चयिष्ये"—इति ।

तावत्ते सेतुमुल्लङ्घ्य, परं तटमायाता दिल्लीं प्रविविशुः । तत्र च प्रधाणस्थः परिवर्त्तित-ग्रीवैर्लोलोष्णीष-बन्धैर्भटैः, आपणोपविष्टैः

नाम्=नौकादण्डानाम्, झणत्कारेण, आकुलीकृताः, कमठा याभिस्ताः । शोभार्थं क्षेपणीषु मञ्जीरासञ्जनं कुर्वन्तीति वेदितव्यम् । **संसरन्ति**=प्रचलन्ति । **तरणिस्थाः**=नौकास्थिताः । **नागराः**=ऐन्द्रप्रस्थाः, प्रकृते ।

कालियस्य=तन्नाम्नो नागस्य, **सदनम्**=ह्रदम् । **काकोदरम्**=सर्पम् । **निर्मथ्य**=निर्मदीकृत्य । **नन्दः**=कृष्णपितृतया ख्यात आभीरः । **ग्राहेण**=नक्रेण । **बकविद्वेषिणः**=बकासुरमारकस्य । **अनुग्रहेण**=दयया । **स्वपुण्यपुरीम्** = स्वीयां पवित्रां नगरीम् । **अभ्यर्चयिष्ये**=पूजयिष्ये ।

प्रधाणस्थैः=बहिर्द्वारप्रकोष्ठस्थैः । "प्रधाणः प्रघणालिन्दा बहिर्द्वारप्रकोष्ठक" इत्यमरः । **परिवर्त्तितग्रीवैः**=वक्रीकृतकन्धरैः । **लोलोष्णीषबन्धैः**=चञ्चल-

स्तब्ध-शङ्कुलैः स्वर्ण-कारैः, कर्णार्पित-लेखनीकैश्चित्रकरैः; समुपेक्षित-तुला-दण्डैर्वणिग्भिः, विशिथिल-स्खलित-मानदण्डैः पट-विक्रयिभिः, रुद्ध-सीवनैः स्यूतिकारैः, विस्मृतहार-ग्रन्थनैर्मालाकारैः, घण्टापथे विचरद्भिः समाकृष्टवल्गैः सादिभिः, आसादित-प्रान्तैः पर्य्यटकैः; आशीर्वचन-स्फुरितोष्ठैर्ब्राह्मणैः, परिवर्जित-क्रीडैर्बालकैः, गवाक्षस्थैः शिथिलितव्रीडैरङ्गुल्यग्रापसारित-तिरस्करिणी-विच्छेद-प्रहित-कटाक्षावलोकनैः कुल-युवति-जनैश्च, सकौतुकं निरीक्ष्यमाणः;

शिरोवेष्टनैः । भटैः=राजपुरुषैः । आपणोपविष्टैः=विपणिसमुपस्थितिभिः । स्तब्धशङ्कुलैः=स्थागतकर्त्तिकैः । स्वर्णकारैः=पश्यतोहरैः । कर्णार्पिता=श्रोत्र-स्थापिता, लेखनी=कटिनी, यैस्तादृशैः । चित्रकरैः=आलेख्यकारैः । समुपेक्षिततुलादण्डैः=परित्यक्तमापिकादण्डैः । वणिग्भिः=व्यापारिकैः । विशिथिलाः=विश्रृङ्खलाः, स्खलिताः=पतिताः, मापदण्डाः="गज़" इति ख्याताः, येषां तैः । पटविक्रयिभिः=वस्त्रविक्रेतृभिः । रुद्धसीवनैः=परित्यक्तसूचीकृत्यैः । स्यूतिकारैः=सूचीकृद्भिः । विस्मृतहारग्रन्थनैः=अनवधृतमालानिष्पादनैः । मालाकारैः=मालिभिः । घण्टापथे=राजमार्गविशेषे । विचरद्भिः=गच्छद्भिः । समाकृष्टवल्गैः=दृढीकृतकविकैः । सादिभिः=अश्वारोहैः । आसादितप्रान्तैः=लब्धमार्गपार्श्वैः । पर्य्यटकैः=वायुसेवनार्थं भ्रमद्भिः । आशीर्वचनेभ्यः=आशीःकथनेभ्यः, स्फुरितौ=चपलितौ, ओष्ठौ येषां तैः । परिवर्जितक्रीडैः=परित्यक्तखेलैः । बालकैः=अर्भकैः । गवाक्षस्थैः=खडकिकास्थैः । शिथिलितव्रीडैः=अल्पीकृतलज्जैः । अङ्गुल्यग्रापसारिताया:=करजप्रान्तदूरीकृताया:, तिरस्करिण्याः=यवनिकायाः, विच्छेदेन=भङ्गेन, प्रहितानि=प्रेरितानि, कटाक्षावलोकनानि यैस्तैः । कुलयुवतिजनैः=सद्वंशतरुणीवृन्दैः ।

"कोऽयम् ?, कुतोऽयम् ?, सोऽयम्, स एवायम्, वीरोऽयम्, वीरवरोऽयम्, महाराष्ट्रराजोऽयम्, दुर्धर्षोऽयम्, चिरश्रुतोऽयम्, शास्तिखान-शास्ति-शास्त्रज्ञोऽयम्, विजयपुर-विजय-दीक्षितोऽयम्, गोलखण्ड-खण्डन-पण्डितोऽयम्, सुरत-वशीकरण-मन्त्र-मान्त्रिकोऽयम्, अम्बर-पुरन्दर-प्रीति-परवशोऽयम्, सम्राजमुपसर्पति, अम्बर-राजकुमारेण सह नीयते। कीदृशमेतस्योष्णीष-बन्धनम् ? कीदृशा अस्य सादिनः ? स भूषणकविरप्यश्वारूढः सहचरः" —इति परितः परिवर्तिनां बहूनां विविधालापान् मन्दमर्द्धोदीरितान् किञ्चित् किञ्चित् कर्णे कुर्वाणः।

कैश्चित् कुक्कुटाण्ड-गणनासक्तैः, अपरैर्वर्त्तिका-निचय-वशीकार-व्याकुल-मुष्टिभिः, इतरैर्मञ्चारूढैर्धूम-पान-परायणैः, अपरैरक्षक्रीडाऽऽसक्तैः, यवनैश्च "सोऽयं समागतोऽयं समासा-

सकौतुकम्=सकुतुकम्। निरीक्ष्यमाणः=अवलोक्यमानः।

शास्तिखानस्य, शास्तेः=शासनस्य, दण्डनस्य, शास्त्रम्=शासनविधानम्, जानातीति तथाभूतः। विजयपुरविजयस्य, दीक्षा सञ्जाताऽस्येति दीक्षितः। तारकादित्वादितच्। गोलखण्डस्य, खण्डने=ध्वंसने, पण्डितः=सञ्जातपण्डः, बुद्धिमान्। सुरतवशीकरणमन्त्रस्य, मान्त्रिकः=मन्त्रशास्त्रज्ञः। अम्बरपुरन्दरप्रीतेः=जयपुराधीशप्रेम्णः, परवशः=अधीनः। उपसर्पति=गच्छति। परिवर्त्तिनाम्=विद्यमानानाम्। अर्द्धोदीरितान्=नेमकथितान्। कर्णे कुर्वाणः=शृण्वन्।

कुक्कुटाण्डगणनायाम्=चरणायुधाण्डसङ्ख्याने, आसक्तैः=निरतैः। वर्त्तिकानिचयस्य, वशीकारे, व्याकुलाः, मुष्टयः=बद्धाङ्गुलिकाः, येषां तैः। मञ्चा-

दितोऽयम्, पर्वतोन्दुरुमेनमेवाऽऽचक्षते सम्राजः। दृश्यताम्; किं भवति, सम्राजः कथमेतेन व्यवहरन्ति?"—इति सक्रूर-कटाक्षं कथा-विषयीक्रियमाणः,

उभयतः कांश्चित् सञ्जणत्कारं स्वापणे समुज्झितानां दीनाराणां गणनाऽऽसक्तान्; अपरान् रत्ननिचय-परीक्षण-प्रहित-सूक्ष्मेक्षणान्; इतरान् अलङ्कार-क्रय-विक्रय-व्यवहार-संसक्तान्; अन्यांश्च गवाक्षस्थ-गणिका-गण-भ्रू-भङ्ग-निहित-दृष्टीन्; वीक्षमाणः सपरिजनो महाराष्ट्रराजो मार्गान्तरं प्राप्तः।

तत्र प्रोच्चं पस्त्यमेकमासाद्य पृष्टवान्—किमिदमिति। कुमाररामसिंह उवाच—आर्य! महामज्जितमिदम्, यत्र प्रतिशुक्रवारं यवना आगत्य इष्टमाराधयन्ति।

रूढैः=खट्वास्थैः। धूमपाने, परायणैः=निरतैः। अक्षक्रीडासक्तैः=द्यूतलीलानिरतैः। समासादितः=प्राप्तः। आचक्षते=कथयन्ति। कथाविषयीक्रियमाणः=कथ्यमानः।

समुज्झितानाम्=त्यक्तानाम्। दीनाराणाम्=सुवर्णमुद्राणाम्। गणनायाम्=सङ्ख्याने, आसक्तान्। रत्ननिचयस्य=हीरकादिव्रातस्य, परीक्षणे=युक्तायुक्तत्वविवेचने, प्रहितानि, सूक्ष्माणि=सूक्ष्मदर्शीनि, ईक्षणानि=नयनानि, यैस्तान्। अलङ्काराणाम्=आभरणानाम्, क्रयविक्रयव्यवहारे, संसक्तान्=निरतान्। गवाक्षस्थस्य, गणिकागणस्य=वारस्त्रीव्रजस्य, भ्रूभङ्गे, निहिताः, दृष्टयः=नेत्राणि, यैस्तान्। सपरिजनः=सपरिकरः। मार्गान्तरम्=द्वितीयं पन्थानम्।

प्रोच्चम्=प्रोन्नतम्। पस्त्यम्=सदनम्। महामज्जितम्="जुम्मा मस्जिद" इति ख्यातम्। आराधयन्ति=सेवन्ते।

परतश्च कियन्तमध्वानमतिक्रम्य, सुदूरस्थं कैलाशशिखरखण्डाऽऽभं महाहर्म्यमेकं दृष्ट्वा यावत् पृच्छति महाराष्ट्रराजः; तावत् स्वयमेव कुमार उवाच यद्—महाराज ! ज्यौतिषालयोऽयं मत्पित्रा प्रतिष्ठापितः । अस्मिन् बहूनि शास्त्रोक्तरीत्या निर्मितानि यन्त्राणि सन्ति; यैर्ग्रहाणां गतयोऽनायासेन निश्चीयन्ते । अथ स उवाच—"कथं न स्यादीदृश एव ज्यौतिष-शास्त्र-पारङ्गतो भारत—भूषणं तत्रभवान् जयपुराधीशः ?"

ततः पुरतो गच्छन्तः क्षणेन राजद्वारं प्राप्ताः । तत्र कोऽयमिति रोद्धुमुत्सुकाः प्रतीहाराः कुमाररामसिंहेन किमप्युक्ता एकेन हस्तेन प्रणम्य बद्धपङ्क्त्य एकतः स्थिताः । एते चान्तः प्रविश्यातिप्रशस्तं स्थानमेकं प्राप्ताः । कुमार-सम्मत्या तत्रैव यानमुन्मुच्य प्रचलिताः । गौरसिंहः, माल्यश्रीकः, भूषणश्च स्वस्वैन्यवांस्त्यक्त्वाऽनुसृताः, तदवलोक्य कुमाररामसिंहेनोक्तम्—

किम् भवन्तोऽपि ? अथवा, अस्तु, सुवर्ण-दण्ड-धारिणा निकटे स्थास्यते भवद्भिः ।

कैलासशिखरखण्डस्य, आभेव, आभा यस्य तम् । **महाहर्म्यम्**=महाप्रासादम् । **प्रतिष्ठापितः**=निर्मापितः । **ग्रहाणाम्**=खेचराणाम् । **निश्चीयन्ते**=निर्णीयन्ते ।

उत्सुकाः=उत्काः । **अतिप्रशस्तम्**=नितान्तशोभनम् । **उन्मुच्य**=परित्यज्य । **अनुसृताः**=पश्चाच्चलिताः ।

सुवर्णदण्डधारिणाम्=हैरण्यदण्डग्राहिणाम् । न केवलं दण्डधारिणामपितु सुवर्णदण्डधारिणामिति कथयता स्मारितं लौकिकं कथानकम्—"ताडितुम् परं लोहितोपनहा" ।

एवं तस्यां कक्षायां बहून् पुष्परथान् वाजिनो गजान् क्रमेलकांश्चावलोकयन्तो विविध-मण्डलेश्वर-यातायात-सङ्कुलं मार्गमाश्रित्य द्वितीयं द्वारमायाताः। तत्प्रतीहारा अपि कुमारेण किमपि दत्तेङ्गिता मार्गं ददुः। तदन्तः प्रविश्य, पुनरेकं प्रशस्तं प्राङ्गणं प्राप्य, महाराष्ट्रराजोऽवालोकयद्—

मध्ये विशालमजिरम्, परितश्च सार्द्ध-हस्त-द्वयोच्छ्राया वेदिका, ततश्च परं सकाच-पट्टिक-हरित-कपिश-श्यामलादि-रञ्जित-कपाटानि कोष्ठानि सन्ति। वेदिकाया उपरि चैकतः सौवर्ण्यो दन्तावलग्रैवेयक-घण्टा निर्मीयन्ते, परतः पाटीर-स्कन्ध-निर्मितेषु कवाटेषु रत्नकुसुमानि विरच्यन्ते, अन्यतः सैन्धव-शृङ्गाराय स्थूल-मौक्तिकानां हारा गुम्फ्यन्ते, इतरतः कौशेयास्तरणानां प्रान्तेषु सौव-

कक्षायाम्=प्रकोष्टे। पुष्परथान्=चक्रयानानि। क्रमेलकान्=उष्ट्रान्। विविधानाम्=अनेकेषाम्, मण्डलेश्वराणां यातायातैः, सङ्कुलम्=व्याप्तम्। दत्तेङ्गिताः=प्रहितचेष्टिताः। प्राङ्गणम्=अजिरम्।

विशालम्=सुविस्तृतम्। सार्धहस्तद्वयम्, उच्छ्रायः=औन्नत्यं यस्याः सा। वेदिका=वितर्दिका। सकाचपट्टिकाः=काचपट्टिकसहिताः, हरितकपिशश्यामलादिभिः,=वर्णैः, रञ्जिताः, कपाटाः, येषु तानि। सौवर्ण्यः=चामीकरनिर्मिताः। दन्तावलानाम्=करिणाम्, ग्रैवेयकघण्टाः=ग्रीवाभूषणभूता घण्टाः। निर्मीयन्ते=विरच्यन्ते। पाटीरस्य=चन्दनस्य, स्कन्धैः=अग्रोपाङ्गैः, निर्मितेषु। कवाटेषु=अररेषु। रत्नानाम्=हीरकादीनाम्, कुसुमानि=पुष्पप्रतिमाः। सैन्धवानाम्=घोटकानाम्, शृङ्गाराय=भूषितये। स्थूलानाम्=महताम्, मौक्तिकानाम्=मणीनाम्। हाराः=कण्ठाभरणानि। गुम्फ्य-

र्ग-सूत्र-व्रततयः सीव्यन्ते, ततो राजतच्छत्राणां परिधिषु हीरक-जालानि योज्यन्ते, इतश्च हाटकमञ्चानां दण्डेषु मरकत-कुसुमानि निर्मीयन्ते ।

एवं विचित्रं वैभवं विलोकयन्तः सर्वे तृतीयं राजद्वारमागताः । तत्प्रवेश-समये कुमारेण कथितम्—"कक्षायामस्यां सर्वैर्मौनेन गन्तव्यम् । पाद-क्षेपोऽपि निःशब्द एव विधेयः" । ततस्तथैव तदपि द्वारं प्रविश्यावलोकितम्—यत् पन्थानमुभयतः पदे पदे सौवर्ण-पात्राधाराः, सकुसुमाः, क्षुपाऽनन्तरं क्षुपाः, मध्ये मध्ये च सौवर्ण-राजतादि-पञ्जरस्थाः पुंस्कोकिलाः, कीराः, सारिकाः, कल-विङ्काः, लावाः, चकोराः, चातकाः, अन्ये च बहवो विविधवर्णाश्च-पलितचञ्चवः पक्षति-कण्डूयन-मनोहराः पुच्छ-प्रसारण-सङ्कोचन-चञ्चला वीणा-रणन-स्पर्द्धि-कूजिता दाडिम-द्राक्षाखण्ड-त्रोटन-

---

न्ते=ग्रथ्यन्ते । कौशेयास्तरणानाम्=पट्टसूत्रवासोविष्टराणाम् । प्रान्तेषु=कोणेषु, चरमांशेषु च । सौवर्णसूत्रव्रततयः=हैरण्यतन्तुलताः । सीव्यन्ते=सूच्या रच्यन्ते । राजतच्छत्राणाम्=रजतनिर्मितातपत्राणाम् । परिधिषु=गोलभागेषु । हीरकाणां जालानि=समूहाः । योज्यन्ते=सम्मेल्यन्ते । हाटक-मञ्चानाम्=चामीकरमञ्चानाम् । मरकतकुसुमानि=मरकतमणिसुमानि ।

वैभवम्=सम्पत्तिम् । पादक्षेपः=चरणपातः । सौवर्णपात्राधाराः=हैरण्यभाजनाश्रयाः । सकुसुमाः=ससुमाः । क्षुपानन्तरम्=ह्रस्वशाखिनः पश्चात् । पुंस्कोकिलाः=पिकाः । कलविङ्काः=चटकविशेषाः । लावाः=वर्तिकाभेदाः । चकोराः=चन्द्रिकाप्रियाः ख्याताः । चपलितचञ्चवः=चञ्चलितत्रोटनाः । पक्षतिकण्डूयनेन=पक्षमूलखर्जनेन, मनोहराः=चेतोहराः । पुच्छानां प्रसा-रणे=विस्तारणे, सङ्कोचने=आकुञ्चने, चञ्चलाः=चपलाः । वीणारणनस्य=

तत्पर-त्रोटय आरोहमारोहं शलाकोपवेशनिका आन्दोलमान्दोलञ्च पुनरधः प्रपतन्तः पक्षिणः समुल्लसन्तीति। पार्श्वद्वयेऽपि सौरभ-पटल-व्याप्त-दिगन्तरमुद्यानम्: तदन्तस्थ-कुञ्जेषु च क्वचित् क्वचिद् वीणावादः, सम्मुखमेव सुदूरं महान् प्रासादः, तत्संलग्नैव महती हस्त-त्रयोच्छ्राया वेदिका, तदुपरि तादृशमेव वेदिकान्तरम्, तस्यापि चोपरि सौवर्णं महासिंहासनम्· तदेवाध्युषितो भारतसम्राड् दृष्टः।

कुमारेङ्गितेन निपुणं निरीक्ष्य चावगतम्—यत् प्रथम-महावेदिकायां बहवः कलित-कनक-दण्डाः करवालाऽऽकलित-कटि-प्रदेशा अनुचरा बद्धाञ्जलयो बद्धपङ्क्त्य उत्थितास्तिष्ठन्ति।

द्वितीय-वेदिकायाञ्च सौवर्ण-दण्ड-भित्तिका-दत्त-हस्ता म-

वीणाध्वनेः, स्पर्धि, कूजितं येषां ते। दाडिमद्राक्षाखण्डानां **त्रोटने**=खण्डने, तत्पराः=निरताः, **त्रोट्यः**=चञ्चवो येषां ते। **आरोहमारोहम्**=आरुह्य, आरुह्य। **शलाकोपवेशनिकाः**=शलाकादण्डनिर्मितानि, उपवेशस्थानानि। **आन्दोल-मान्दोलम्**=हिल्लोल्य हिल्लोल्य। **समुल्लसन्ति**=शोभन्ते। **पार्श्वद्वये**=दक्षे वामे च भागे। **सौरभपटलेन**=सौगन्ध्यसमूहेन, व्याप्तम्, **दिगन्तरम्**=हरिदन्तरालं येन तत्। **उद्यानम्**=गृहवाटिका। **तदन्तस्थेषु**=तदन्तरालवर्त्तमानेषु, **कुञ्जेषु**=लतादिपिहितोदरेषु। **अध्युषितः**=अध्यारूढः।

निपुणम्=ससावधानतम्। **कलितकनकदण्डाः**=गृहीतसुवर्णदण्डाः। **करवालैः**=चन्द्रहासैः, **आकलितः**=व्याप्तः, कटिप्रदेशो येषां ते। **उत्थिताः**=ऊर्ध्वस्थाः।

सौवर्णदण्डभित्तिकासु=तिर्यग्भूतैः सौवर्णदण्डैरेव रचितासु भित्तिकासु,

मण्डलेश्वराः सेनापतयश्चोत्थिता एव तिष्ठन्ति । महाराष्ट्रपतिना कर्णे पृष्टम्—"किं सभायां केनापि नोपविश्यते ?"

कुमार उक्तवान्—राजकार्य-सम्बन्धिनीषु सभासु न केनाप्युपविश्यत ऋते सम्राजः, गान-वाद्यादि-समितिषु च कृपापात्राण्युपविशन्त्यपि ।

एवं मन्दमालपन्त एव ते वेदिसमीपमायाताः, राङ्कवास्तरणाच्छन्नानि सोपानान्याक्रम्य प्रथम-वेदिकामारूढाः, तत्रैव कुमारेणेङ्गितो माल्यश्रीको गौरसिंहो भूषणश्च बद्धाञ्जलीनामन्येषां पङ्क्तिं भेजिरे । महाराष्ट्रेश्वरस्तु कुमारेण सह द्वितीयां वेदिमारूढ एव दक्ष-हस्तेन सम्राजं प्रणनाम, कुमार-दर्शितेन पथा च समीपमागत्य महामूल्यां मुद्रिकामेकां निजाञ्जलौ संस्थाप्य, हस्तौ प्रसारितवान् । ततोऽन्यतः क्षिप्तेक्षणे सम्राजि, समीपवर्त्तिषु कञ्चन ममचकथत्—"जगत्पालकानां करुणाऽवलोकनं सभाजयति महा-

---

दत्तहस्ताः=स्थापितकराः । मण्डलेश्वराः=खण्डभूपतयः । उत्थिता एव, ननु स्थिताः ।

राजकार्यसम्बन्धिनीषु=राजनीतिकविचारार्थमाकारितासु । कृपापात्राणि=दयाभाजनानि, विटाः, गणिकाः, तादृशाश्चान्ये ।

मन्दम्=शनैः । राङ्कवास्तरणैः=रङ्कुमृगचर्मनिर्मितविष्टरैः, आच्छन्नानि=गोपितानि । बद्धाञ्जलीनाम्=कृतकरसम्पुटानाम् । पङ्क्तिम्=श्रेणीम् । भेजिरे=सिषेविरे । महामूल्याम्=महार्घाम् । मुद्रिकाम्=अङ्गुलीयकम् । निजाञ्जलौ=स्वीयकरसम्पुटे । क्षिप्तेक्षणे=प्रेरितनयने । समीपवर्त्तिषु=आसन्नेषु । जगत्पालकानाम्=संसाररक्षकाणाम् । "जहाँपनाह" इति तत्रत्यः शब्दः । करुणया=दयया, अवलोकनम्=दर्शनम् । सभाजयति=प्रार्थयते ।

राष्ट्र-देशीयः कश्चित्-शिववीरः"-इति।

अथ दृष्टिं परिवर्त्य वाचंयम एव, स्वहस्तेन मुद्रिकां जग्राह दिल्लीश्वरः, पञ्चसाहस्रिकैश्च सेनापतिभिः सहोपस्थातुं मन्दमुक्तवान्।

तदाकर्ण्य किरात-रसमिव पिबन् महाराष्ट्रराजः, सकष्टं ततो बभ्राम, कुमाराननदत्तदृष्टिश्च मन्दमुक्तवान्--किं शिवः पञ्चसाहस्रिकः? यदि सम्राट् कदाचन महाराष्ट्र-देशं यास्यति; तदा द्रक्ष्यति-कति पञ्चसाहस्रिकाः शिवं चामरैर्वीजयन्ति?-इति। तेन च चक्षुषैव वारितोऽरुणमुखस्तूष्णीमस्थात्। कियत्क्षणानन्तरमेव सभाभङ्गो जातः। दिल्लीश्वरः सिंहासनादुत्तीर्य, पृष्ठत एवावरोधं प्रविष्टः, जनसमूहश्च क्रमतो बहिर्निरगात्।

दिल्लीनगरस्य मध्य एव महाहर्म्यमेकं महाराष्ट्र-पतेर्निवासाय स्थिरीकृतमासीदिति तत्रैव स कुमारेण प्रापितः। प्रात्यहिकावश्यकवस्तुजातेन कैश्चिन्माल्यश्रीकादिभिर्वीरैश्च सह स तत्र स्थितः। पत्तयोऽश्वारोहाश्च तत्रैव शिबिरे स्थापिताः।

महाराष्ट्रराजावहेलनावलोकनेनेव ग्लानः, यवनाऽऽखण्डलस्य

परिवर्त्य=मोटयित्वा। वाचंयम एव=मौन एव। पञ्चसाहस्रिकैः=पञ्चसहस्रसेनारक्षकैः।

किरातरसमिव=तिक्तकरसमिव। तेन=रामसिंहेन। चक्षुषैव=नेत्रेणैव। वारितः=मौनीकृतः। अरुणमुखः=रक्ताननः। सभाभङ्गः=समितिविसर्जनम्। अवरोधम्=अन्तःपुरम्। निरगात्=निष्क्रान्तः।

प्रात्यहिकावश्यकानाम्=प्रतिदिनापेक्षितानाम्, वस्तूनाम्, जातेन=समूहेन।

दुरभिसन्धिं जानान इव पाण्डु-मुख-मण्डलः, राघवाचार्य-कथितं नाङ्गीचकार महाराष्ट्रराजः--इति च कोपेनेव शोणो भास्वानस्तं जगाम ।

कुमाररामसिंहोऽपि पुनर्द्रक्ष्याम्यार्यमित्युक्त्वा निवृत्तः । महाराष्ट्रराजोऽपि च तदागारस्यान्तः प्रविवेश ।

॥ इति दशमो निश्वासः ॥



महाराष्ट्रराजस्य, **अवहेलनस्य**=तिरस्करणस्य, **अवलोकनेन**=दर्शनेन । **ग्लान इव**=क्षीणहर्ष इव । **यवनाखण्डलस्य**=म्लेच्छेन्द्रस्य । **दुरभिसन्धिम्**=दुर्विचारम् । **जानान इव**=विदन्निव । **पाण्डुमुखमण्डलः**=पीताननखण्डः । **कोपेनेव**=क्रोधेनेव । **शोणः**=रक्तः । **अस्तं जगाम**=अस्ताचलं भेजे ।

इति श्रीशिवराजविजयवैजयन्त्यां दशमनिश्वास-
विवरणं समाप्तम् ।



"शेते करी मशक-पाद-विपादिकायाम्"

—स्फुटकम्

"उपकारिणि विस्रब्धे शुद्धमतौ यः समाचरति पापम् ।
तं जनमसत्यसन्धं भगवति वसुधे ! कथं वहसि ?" ॥

—हितोपदेशे ।

एकादशे शिववीरस्यावरुद्धजीव-कारागृहे बन्धनं विवर्णयिषुरिति तदुपक्षेपकं प्रतीकत्रयमुद्धरति । तत्राऽऽद्यम्-शेते करी मशकपादविपादिकायामिति । यशकस्य=अतिक्षुद्रतरस्य तन्नाम्नैव ख्यातस्य जीवस्य, **पादे**=चरणे, या **विपादिका**=स्फोटः, तस्याम् । यद्यपि "पादस्फोटो विपादिका"कथ्यते कोशकारैस्तथापि समस्यायितेऽत्र पद्ये पादपदस्य पृथगुच्चारणेन स्फोटपदार्थकत्वमेव, विशिष्टवाचकपदन्यायादित्यवधारणीयम् । मशकचरणे तादृशलघुतमे, ययोर्विपादिकोद्भूतेश्चर्चाया अप्यसम्भवः, किन्तु दैवाद्वाऽन्यस्माद्वा कस्माच्चिदेवम्भूतात्कारणव्रातात् सम्भूता विपादिका, तस्याश्च करिवरो महान् जीवः सुखेन निद्रातीत्यसम्भवपरम्परा यथा; तथा शिववीरस्य कारावासोऽपि दैवदुर्विपाकघटित एवेति हार्दम् ।

स चायं शिववीरः स एव; यः कियदेव पूर्वं दिल्लीकलङ्कस्य तनयां तनयञ्च समर्पयत् प्रादर्शयच्च महतीं वीरतां गोलखण्डीयदुर्गविजये । अयञ्चोपकारः शिववीरकृतस्तादृशोऽयं शिववीरादन्यस्तात्कालिकः कोपि कर्तुं न समर्थ आसीत्-किन्तु सर्वमिदमेकपदे व्यस्माषींदवरङ्ग इति हितोपदेशीयेन पद्येनोपक्षिपति-उपकारिणीति । **उपकारिणि**=कृतमहोपकृतौ । **विस्रब्धे**=विश्वस्ते । **शुद्धमतौ**=अकपटबुद्धौ । **यः**=दुर्विनीताग्रेसरः, निर्विवेकः, साधुसमाजगर्हितः । **पापम्**=

"पुरा सरसि मानसे विकच-सारसालि-स्खलत्-
पराग-सुरभीकृते पयसि यस्य यातं वयः।
स पल्वल-जलेऽधुना मिलदनेक-भेकाऽऽकुले
मराल-कुल-नायकः कथय रे! कथं वर्तताम्?" ॥

—भामिनीविलासे, पण्डितराजः।

घृणितमाचारम्। **समाचरति**=विदधाति। भगवति! **वसुधे**!=वसुन्धरे। **असत्यसन्धम्**=असत्प्रतिज्ञम्। **तम्**=पूर्वोक्तगुणगणालयम्। **जनम्**=मनुष्यमेव, ननु राक्षसम्। **कथम्**=केन प्रकारेण। **वहसि**=धारयसि। न हि गिरिनदनदीशादिभिः पृथिव्यास्तथा भारो यथा माननाकारैः परवञ्चनमात्रनिपुणैर्विश्वासघातिभिरिति स्मरन्ति धर्मशास्त्रकारा नीतिकाराश्च।

अथ दैवतन्त्रमिदमित्यवधार्य जयसिंहादिभिः सार्कं सोढव्यः शिवबारेणापि दुर्वारविपद्वात इति चेदत्र पण्डितराजीयया हंसान्योक्त्या कर्तव्यमुपक्षिपति-पुरेति। **पुरा**=कियदेव पूर्वम्। **मानसे सरसि**=प्रालेयाद्रेरुत्तरस्यां कैलाशाद्रेरन्तिके कौबेरैर्यक्षोभिरधिष्ठिते,पौराणिकैरनेकधा समुद्गीतगुणगणे मानसाख्ये सरोवरे। **विकचानाम्**=विकसितानाम्, **सारसानाम्**=सरोभवानाम्, सरसीरुहाणाम्, **आलेः**=राजेः, **स्खलद्भिः**=पतद्भिः, **परागैः**=धूलिभिः, **सुरभीकृते**=सुगन्धभरिते। **पयसि**=वारिणि। **यस्य**=भाग्यशालिनः। **वयः**=अवस्था। न दिनानि, मासाः, वर्षाणि वा-अपि तु वयः। **यातम्**=व्यतीतम्। स एषः। **मरालकुलस्य**=हंसान्वयस्य, **नायकः**=श्रेष्ठः। **अधुना**=साम्प्रतम्। **मिलद्भिः**=समुच्चयीभवद्भिः, **अनेकैः**=असङ्ख्यातैः, **भेकैः**=वर्षाभूभिः, **आकुले**=व्याप्ते। **पल्वलस्य**=अल्पोदकसरसः, **जले**=नीरे। **कथम्**=केन प्रकारेण। **वर्त्तताम्**=विद्य-

निशीथप्राया रजनी, उष्णः कालः, समीरो न सरति, गृहे गृहे बालानां रोदनस्याऽऽर्तनादो, व्यजन-चालनस्य च सणत्कारो, निद्रा-मन्थरानपि व्याकुलयति। जलं जलम्, हिमं हिमम्, वातो वातः, दाडिम्बरसो दाडिम्बरसः, उशीरमुशीरम्, पाटलोदकं

ताम्। रे ! = नीचसम्बोधनम्। कथय=प्रतिपादय। अप्रस्तुतस्य मरालस्य प्रशंसया प्रस्तुतस्य कस्यचन महाशयस्य पूर्वं समुत्वं क्वचनोपितस्य पश्चात् कैश्चित्कारणैस्तत्स्थानमपहाय गच्छतोऽन्यत्र स्थातुं कैश्चिन्नीचैरभिहितस्योदात्त-भावप्रशंसाप्रतिपादनादप्रस्तुतप्रशंसालङ्कारः। नीचाश्रयणे हेतुः प्राक्तनमहाशयाश्रयणमिति काव्यलिङ्गालङ्कारोऽपि। अवरङ्गजीवपितुः शहाजहाननृपतेरिच्छायायाम्-"दिल्लीश्वरो वा जगदीश्वरो वा" इति स्वार्थनिर्वाहार्थं भणतः पश्चात्ततो विरागः सञ्जातः पण्डितराजस्येति स्वीयमेवात्र घटनाचक्रं निबध्नातीति मर्मविदः। भवति चैतत्प्रमाणीकृतं तेन स्वयं वर्णिते स्वजीवनवृत्तान्ते—

"सम्प्रत्युज्झितमासनं मधुपुरीमध्ये हरिः सेव्यत" इति पद्यखण्डे। अन्यच्च—

> यस्मिन् वेल्लति सर्वतः परिचलत्कल्लोलकोलाहलै-
> र्मन्थाद्रिभ्रमणभ्रमं हृदि हरिद्दन्तावलाः पेदिरे।
> सोऽयं तुङ्गतिमिङ्गिलाङ्गकवलीकारक्रियाकोविदः
> क्रीडे क्रीडतु कस्य केलिकलहस्यक्कार्णवो राघवः॥

इत्यास्तां तावत्। प्राचीनेतिवृत्तान्वेषणपराणां ध्यानाकृष्टये तु यत्किञ्चिदिदमालपितमिति शम्।

निशीथप्राया=प्रायोऽर्धरात्रिरूपा। **उष्णः कालः**=ग्रैष्म्यमयः समयः। **समीरः**=वायुः। **न सरति**=न चलति। **व्यजनचालनस्य**=वृन्तवीजनस्य।

पाटलोदकम्, चन्दन-चूर्ण चन्दन-चूर्णम्—इति; मशका मशकाः, मत्कुणा मत्कुणाः, कण्डूः कण्डूः, स्वेदः स्वेदः,—इति च श्रूयतेऽट्टेभ्यो ध्वनिः। तावद् भेरी-नाद-सहचरितेन वंशी-नादेन समारब्धो मध्य-निशीथ-सूचको बिहागरागाऽऽलापः! कचिच्चाश्रूयत नवोढानां मञ्जीर-किङ्किणी-नूपुर-वलय-शिञ्जितम्! एतद्रस-भञ्जकश्चाऽऽकर्णि प्रहरिणां "जागृहि भो! जागृहि, गाढोऽयमन्धकारः"—इति कर्णकषायो नादः!!

महाराष्ट्रराजस्तु चिन्ता-सन्तापेनापि तप्यमानो नालभत निद्राम्। अथ, उशीर-व्यजनिकामादायाऽऽन्दोलयन्, पर्य्यङ्कं विहाय, दाडिम्ब-रस-सितोपल-मिश्रितं शीतं सलिलमास्वाद्य, स्वमातुः स्वदेशस्य स्वपुत्रस्य स्वपत्न्याश्च संस्मरन्; बहिरलिन्दमागत्य निर्वाणप्रायं दीपं पुनः सङ्कवाल्य, तत्रैवाऽऽसन्दीमेकामध्यु-

---

निद्रया **मन्थरान्**=सालस्यान्। **उशीरम्**=नलदम्। "खस" इति हिन्दी। **पाटलोदकम्**=झाटलावारि। "गुलाबजल" इति हिन्दी। **मत्कुणाः**=रक्तबीजाः। **कण्डूः**=खर्जूः। **अट्टेभ्यः**=अट्टालिकाभ्यः। भेरीनादेन, **सहचरितेन**=मिलितेन। **मध्यनिशीथसूचकः**=अर्धरात्रिबोधकः। **नवोढानाम्**=नूतनवधूनाम्। एतस्य **रसस्य**=शृङ्गारात्मनः, **भञ्जकः**=मर्दकः। **कर्णकषायः**=श्रोत्रकटुः।

चिन्तासन्तापेनापि=चिन्तनज्वालेनापि। **उशीरव्यजनिकाम्**=नलद-वातकरीम्। **आन्दोलयन्**=सञ्चालयन्। **दाडिम्बरसेन**=दाडिमद्रवेण, **सितोपलेन**=शर्करया, **मिश्रितम्**=मेलितम्। **शीतम्**=शिशिरम्। **स्वमातुः संस्मरन्**,"अधीगर्थदयेशां कर्मणी"ति षष्ठी। एवमग्रेऽपि। **बहिरलिन्दम्**=प्रघाणम्। **निर्वाणप्रायम्**=समाप्तिं गच्छन्तम्। **आसन्दीम्**=वेत्रासनिकाम्।

वास। मनस्येव च चिन्तयितुमारब्धवान्, यद्—

अहह! किं करोमि? क्व गच्छामि? कथं पुनः पुण्यनगरं प्राप्नोमि? कथं पुनः प्रताप-दुर्ग-शिखरमारुह्य सस्य-श्यामां महाराष्ट्र-भूमिमवलोकयामि? कथं पुनस्तोरणदुर्ग-साम्मुखीनां मारुति-मूर्तिं प्रणमामि? कथं पुना राज-दुर्गस्थ-राजसिंहासनमधिरोहामि? कथं पुनर्दैवज्ञ-वर्य्यस्य देवशर्मणश्चरणौ स्पृशामि? हन्त! तदाश्रमस्थाया गौरसिंह-भगिन्या विवाह-साहाय्यार्थं वरमन्वेष्टुञ्च प्रतिज्ञातवानस्मि। हा! श्रूयते तदर्थमभिमतो रामसिंह एव रघुवीर-नाम्ना मदनुचर आसीत्! अहह!! योऽन्वेष्टव्यः; स एव मया सभर्त्सनं निःसारितः। हा! कथं स्वपुत्र-वियोग-दुःखितं ब्रह्मचारि-वेषं महाराज-जयसिंहस्यान्यतमं बन्धुं वीरेन्द्रसिंहं सान्त्वयिष्यामि? नूनं निर्दोष-रघुवीर-निर्वासन-पापस्यैव फलमेतत्; यत्—स्वयमागत्य प्रत्यर्थिनां क्रोडे पतितोऽस्मि, प्रथम-साक्षात्कार एवानादरं समनुभूतवानस्मि, परेऽहन्येव च सन्देशं प्राप्तवानस्मि यद्—भूपतिसभायां यदुक्तं तत् सम्राजः कर्णशष्कुलिमस्पृशत्; तस्यायमेव दण्डो यन्न पुना राजसभायामागन्तव्यमिति। अल्पीयस्यपि मे सेना नगराद्बहिरेव शिबिरेऽस्ति। पञ्च-

---

सस्यैः=धान्यैः, **श्यामाम्**=हरिताम्। तोरणदुर्गस्य, **साम्मुखीनाम्**=पुरोभवाम्। **मारुतिमूर्त्तिम्**=आञ्जनेयप्रतिमाम्। **वरम्**=वैवाह्यम्। **तदर्थम्**=गौरवर्णीकृते। **अभिमतः**=इष्टः। **सभर्त्सनम्**=सभयप्रदर्शनम्, सन्यक्कारम्। **निर्दोषरघुवीरस्य, निर्वासनम्**=निष्कालनम्, एव पापम्, तस्य। **प्रत्यर्थिनाम्**=शत्रूणाम्। **प्रथमसाक्षात्कारे**=आदिमदर्शने। **अल्पीयसी**=अतिन्यूना।

परात्मीयैः कतिपयैरेव च भृत्यैः सहात्र निवसामि, अत्रत्यं वायु-जलं नानुकूलमिति छलेन महाराष्ट्रदेश-निवर्तनादेशाय प्रेषितेऽप्यावेदनपत्रे, दिल्ली-कलङ्केन विषयान्तरे बहु लिखितमप्याज्ञा-सम्बन्धे किमपि नालेखि । विनैवाऽऽज्ञां यदि पलायेय; अथ गृह्येय चेद्यवन-हस्तेन ध्रुवो मृत्युः । अहो ! म्लेच्छेषु विश्वस्य समायातोऽस्मीति न भद्रं कृतम् ! अहो ! दुरदृष्टम् !! यद् राघवाचार्य्य-मंन्यासिनोऽपि न स्वीकृतं वचनम्-इति विचारयन्नेव निष्कुटक-कुटान्तरालेष्वेवाम्पष्टाकृतिं कञ्चन पुरुषमद्राक्षीत् ।

"चौरोऽयं लुण्ठकोऽयं सपत्नोऽयमिति" विचारयन्, सपदि विकोशां छुरिकां हस्ते गृहीत्वोदस्थात् । तस्मिन् किञ्चित् समीप-मायाते च ददर्श—यदेको भस्मोद्धूलित-शरीरो विश्लथत्-कच-कुल-समाच्छन्नांस-पृष्ठ-वक्षःस्थलो लम्बकूर्चो नीलरस-रञ्जित-वसनो वामकर-गृहीत-मृत्तिका-मालो यवन-भिक्षुरायात इति । अथोच्चैः सप्रौढि तमपृच्छत्—"कस्त्वं रे ! निशीथे ?"-इति । स तु मन्दमाह—"जनोऽयं कश्चिच्छुभ-चिन्तको भवतः, शनैरालपनी-

---

विषयान्तरे=अन्यसम्बन्धे । पलायेय=गुप्तं गच्छेयम् । विष्कुटकेषु=गृहारामेषु, ये कुटाः=वृक्षाः, तेषामन्तरालेषु । अस्पष्टाकृतिम्=अपूर्णावलोक्याकारम् ।

सपत्नः=शत्रुः । विकोशाम्=नग्नाम् । भस्मोद्धूलितशरीरः=भूतिच्छुरित-गात्रः । विश्लथत्कचकुलेन=विगलद्वालसमूहेन, समाच्छन्नम्=व्याप्तम्, अंसपृष्ठवक्षःस्थलं यस्य सः । लम्बकूर्चः=दीर्घदाढिकः । नीलरसेन=नीली-द्रवेण, रञ्जितं वसनं यस्य सः । वामकरगृहीतमृत्तिकामालः=दक्षेतरहस्त-धारितमृत्स्नास्रक्कः । सप्रौढि=सगर्वम् । शुभचिन्तकः=कल्याणाभिलाषुकः ।

यमेतेन"। ततः स कञ्चिच्छुत-पूर्वं स्वरं कर्णे कुर्वन्नपि परिचेतुमक्षमः पुनरपृच्छत्-"नावगतं को भवान् ?"—इति। स आह—"शुभ-चिन्तकोऽयं राघवाचार्य्यः संन्यासी"। तदाकर्ण्य, महाराष्ट्रपतिः प्रकाशं प्रबलीकृत्य, निपुणं निरीक्ष्य, कृत्रिमां जटां कूर्चं श्मश्रुपुञ्जञ्च विलोकयन्, मन्दं स्मित्वा, उवाच—अवधूत ! धन्योऽसि, य एवमपि दयसे। किन्तु पिहितेषु द्वारेषु, कुत आयातोऽसि ? स उवाच—"प्राचीरमुल्लङ्घ्य, कष्टेनाऽऽयातोऽस्मि"। एष उवाच—"कथमद्य रूपान्तरम् ?" स उवाच—"नगरेऽस्मिन् वैष्णवेषु प्रपतति सर्वेषां दृष्टिः, न च म्लेच्छावधूतेषु—इति तद्वेषमेवावलम्बितवानस्मि"।

तत उपविष्टयोरुभयोर्मुहूर्तानन्तरमेवमभूवन्नालापाः—

महाराष्ट्रराजः—कुतः समागच्छत्याचार्य्यः ?

राघवाचार्य्यः—व्रत-साधनाय परितो भ्रमामि।

महा०—अपि जानाति कमपि कुशलवृत्तान्तं महाराष्ट्रदेशस्य भवान् ? अपि कुशलिनी मे जननी ? कुशलिनो वा जानपदाः ? अपि वा कुशली शम्भु-कुमारः ?

परिचेतुम्=परिचितीकर्तुम्। कृत्रिमाम्=प्रयत्नसम्पादिताम्। अवधूत !=संन्यासिन् ! पिहितेषु=बन्धितेषु। रूपान्तरम्=वेषान्तरम्। वैष्णवेषु=विष्णुभक्तेषु, ऊर्ध्वपुण्ड्रामनामित्रिदण्डादिभिः परिचीयमानेषु। म्लेच्छावधूतेषु=यवनसाधुषु। तद्वेषम्=यवनसाधुनेपथ्यम्।

व्रतसाधनाय=अङ्गीकृतनियमनिर्वाहाय।

जानपदाः=नागरिकाः। शम्भुकुमारः="सम्भाजी"ति ख्यातो राजकुमारः।

राघ०—दीनबन्धो! यादृशस्य महाशयस्य हस्ते महाराष्ट्र-भूमि-भरण-भारं निक्षिप्तवानसि; तादृशस्य शासने न सम्भवत्यकुशल-वार्ताऽपि। जननी च कुशलिनी, श्रीमत एव कुशलाय व्रतमाचरन्ती क्षामदेहा स्थण्डिलशायिनी हविष्याऽऽहारा च वर्त्तते।

महा०—हा मातः! [इति मुखं परावर्त्य कांश्चिदश्रु-बिन्दू-नमुमुचत्]

राघ०—महाराज! न चिन्तनीयं किमपि! कुशली कुमारः शम्भुवीरः, तुरगं चालयन् स्वदर्शनेन प्रजा रञ्जयति, ग्रामे ग्रामे गृहे गृहे मन्दिरे मन्दिरे च परमात्मा समाराध्यते।

महा०—अपि मम कुशलाय परमेश्वर आराध्यते?

राघ०—वीरवर! भवत्प्रजासु के न भवन्तं प्राणाधिकं मन्यन्ते? सम्प्रति कचन महारुद्र-मुद्रया रुद्रोऽभिषिच्यते, कचन सहस्रैर्गृहीत-ब्रह्मचर्य्याणां ब्राह्मणानां समन्त्र-सम्पुटचण्डीपाठैर्भगवती दुर्गाऽऽद्रियते, क्वचिच्च ग्रहमातृकादि-मण्डल-मण्डितस्य मण्ड-

---

इतिवृत्तेषु लिखितम्-"सोऽपि सहैव पित्रा कारागारे बद्ध" इति। अत्र तु वैपरीत्येनोल्लिखितं कथावैशिष्ट्यरक्षणायेति वेदितव्यम्।

महाराष्ट्रभूमेः, **भरणभारम्** =रक्षणधुरम्। **अकुशलवार्त्ताऽपि**=अमङ्गलकथाऽपि। **क्षामदेहा**=कृशकाया। **स्थण्डिलशायिनी**=भूमिस्वापिनी। **हविष्याहारा**=पायसभोजना।

महारुद्रमुद्रया=महारुद्रयागेन। **गृहीतब्रह्मचर्य्याणाम्**=धारिताष्टविध-मैथुनत्यागनियमानाम्। **समन्त्रसम्पुटं** यथा स्यात्तथा **चण्डीपाठैः**=सप्तशतीमन्त्रजपैः। प्रतिमन्त्रमाद्यन्तयोर्मन्त्रजपपूर्वकं मन्त्रजपः सम्पुटपाठः। **दुर्गा**=दुर्गतितारिणी महामाया। **ग्रहाणाम्**=सूर्यादीनाम्, **मातृकाणाम्**=गौर्यादिषोडशस-

पस्याधस्ताद्वेदमन्त्रैर्भगवान् बृहद्भानुर्हविषा हूयते। किं ब्रवीमि? यद्यल्पमपि भवदमङ्गलं श्रूयेत महाराष्ट्रैः; तन्मन्ये कोप-कृशानु-हेतिभिरखिलं भूमण्डलं भस्मसात् क्रियेत।

महा०—[किञ्चिदानन्दित इवाङ्गान्यान्दोल्य] भगवन्! का क्षमता वराकस्यैतस्य ममामङ्गलमाचरितुम्? परं भवतो वचनमनङ्गीकृत्य समायातोऽस्मीति तत्फलमेव भुञ्जे।

राघ०—तत्किम्? दिल्लीश्वरेण तु कृतसन्धिः श्रीमान्।

महा०—किमिव लज्जयते मां स्वामी! सर्वं विदितमार्य्याणाम्।

राघ०—अत्रावस्थानं न रोचेत चेदद्यैव प्रतिष्ठताम्। को नाम वागुरया समीरणमिव भवन्तं रोत्स्यति।

महा०—मन्ये कोऽप्युपाय उद्भावितः पलायनस्य!

राघ०—किमज्ञातमार्य्याणाम्?

महा०—किमिति?

ङ्ख्याकानाम्, घृतमातृका-चतुष्षष्टियोगिनी-वसोर्धाराणाम्, **आदिना**=पञ्चलोकलोकपाल-दशदिक्पाल-क्षेत्रपालादीनाञ्च, **मण्डलैः**=स्थानैः, **मण्डितस्य**=भूषितस्य। **मण्डपस्य**=तृणादिनिर्मित-परिमितहस्तद्वारादिसङ्ख्यासंवलितस्यान्तर्गृहस्य। **बृहद्भानुः**=दहनः। **हविषा**=हवनीयेन वस्तुना। **हूयते**=तर्प्यते। कोप एव **कृशानुः**=आश्रयाशः, तस्य, **हेतिभिः**=ज्वालाभिः। **भस्मसात्**=दग्धम्। **आन्दोल्य**=सञ्चाल्य। **क्षमता**=शक्तिः। **भुञ्जे**=लभामि।

प्रतिष्ठताम्=प्रस्थानं क्रियताम्। **वागुरया**=पाशेन। **समीरणमिव**=वायुमिवेत्युत्प्रेक्षा।

राघ०—भगवन् ! अनायासेनाद्यान्धतमसे गृहीत-यवन-भिक्षु-वेषो मया सह निःसरतु श्रीमान !

महा०—ततः ।

राघ०—यद्यपि नगरस्यास्य परित उच्चा भित्तिरस्ति ; तथाऽपि पूर्वत एकत्र महान् सशङ्कुग्रन्थि-वंश एकः स्थापितोऽस्ति, तदवलम्ब्य कुड्योल्लङ्घनमनायास-सिद्धं महाराष्ट्रवीराणाम् । परतश्च शृङ्खलैका संलम्बते, तदालम्ब्य त्रुटिमात्रेण भूमिं स्पक्ष्यति । तत्र वृक्ष-च्छायायां निलीन एकोऽश्वः । तेन क्षणेन किञ्चिद् गत्वैव द्रक्ष्यते यत्—कलिन्द-तनयायामेकाऽल्पीयसी नौकाऽस्ति, तस्यां क्षेपणी-हस्ता दश वाहकाः प्रभुमपेक्षन्ते । ते च त्वरया मथुरां प्रापयिष्यन्ति । ततस्तु येन केनापि पथा सुखेन भवान् महाराष्ट्र-देशं प्रयास्यति—इति ।

महा०—अत्यन्तं प्रशंसामि भवदुद्योगम्, किन्तु मन्यतां यदि कश्चन मार्गे प्रहरिषु परिचिनुयात् ?

राघ०-एतस्मिन् पथि पञ्चषा आस्माकीना महाराष्ट्रा एव कलित-यवन-वेषा प्रहरितां प्राप्ताः सन्ति । ते च श्रीमतः शुभं चिन्तयन्ति !

महा०—अथ कोऽपि प्राचीरोल्लङ्घन-समये परिचिनुयात् ?

उच्चा=उन्नता । भित्तिः=कुड्यम्, प्राचीरम् । शङ्कुग्रन्थिभिः सहितो वंशः=असमीकृतो वेणुः । स्थापितः=रक्षितः । कुड्यस्य, उल्लङ्घनम्=उत्प्लवनम् । शृङ्खला=दाम लौहम् । त्रुटिमात्रेण=निमेषपतनद्वयमात्रेण । कलिन्दतनयायाम्=यमुनायाम् । क्षेपणीहस्ताः=नौकादण्डकराः । वाहकाः=कर्णधाराः ।

प्रहरिषु=यामिकेषु । परिचिनुयात्=विजानीत ।

अन्तरायञ्च विदध्यात् ?

राघ०—महाराज ! तस्मिन्नेव स्थानेऽन्धकारे द्वादश महाराष्ट्र-भटाः खड्गहस्ताश्छद्म-वेषिणोऽन्धतमसाऽऽच्छन्नाश्च सन्ति । यदि कश्चिद् विघ्नमाचरेत् ; तस्य ध्रुवं मरणम् ।

महा०—अथ परतो यमुना-मार्गे चेदक्रम्ये कैश्चित् ?

राघ०—न भयम्, न भयम् ! अस्माभिः शास्तिखान-युद्धे बहूनां यवन-भटानां पट्टिका खड्गा वीरता-वस्त्राणि शिरोवेष्टनान्य-धोवसनानि कटि-बन्धनानि च बलाद् गृहीतानि, तैरेव कलितयवन-वेषाणां स्वाध्यक्ष-तदध्यक्षादिसहितानां गुप्तसेनैकाऽस्ति । तस्या एव शतशो भटाः पथि परितो गूढं भ्रमन्ति । सर्वे ते श्रीमद्रक्षकाः ।

महा०—नौकाऽऽरोहसमये चेदापत्तिः ?

राघ०—वाहका अपि योद्धारः । शस्त्रपूर्णा च नौका । यमुना-तटेऽपि कपट-भिक्षुका भावत्काः सजृम्भारम्भं स्वापमिवानुकुर्वन्ति ।

महा०—केचनाभिज्ञाय चेत् पथि तरणिगतिं रुन्ध्युः ?

छद्मवेषिणः=परिवर्त्तितनेपथ्याः । **ध्रुवम्**=अवश्यम् । **मरणम्**=मृत्युः ।

आक्रम्ये=आक्षिप्ये ।

कलितयवनवेषाणाम्=धारितम्लेच्छनेपथ्यानाम् । **गुप्ता**=क्षुपिता, **सेना**=वाहिनी ।

शस्त्रपूर्णा=आयुधभरिता । **कपटभिक्षुकाः**=छद्मगृहीतयाचकवेषाः । **सजृम्भारम्भम्**=सगात्रविनामप्रारम्भम् । **स्वापमिव**=शयनमिव । **अनुकुर्वन्ति**=विडम्बयन्ति ।

तरणिगतिम्=नौकामार्गम् ।

राघ०—तरणि-तनूजामभितस्तटेऽपि भावत्का पत्तयः सादिनश्च सतर्काः सन्ति। तरणि-रोधं कोऽपि विधातुं पारयेच्चेत्; तरणि-रोधमपि विधातुं पारयेत्!

महा०—मथुरायाश्छेदापत्तिः?

राघ०—मैवम्, मथुरायां सहस्रशो भावत्का वैष्णव-वेषेण सञ्चरन्ति।

महा०—[क्षणं विचार्य्य] अथ मामकानां शिबिरस्थानां दिल्ली-नगरे चेतस्ततोऽधिवासितानां का दशा भवेत्?

राघ०—महाराज! भवन्तमलभमानो दिल्लीश्वरस्तान् गृहीत्वाऽपि त्यजेत्!

महा०—नैवं सम्भाव्यते क्रूरतमेऽस्मिन्; यो भ्रातॄनप्यवधीत्, पितरञ्च न्यग्रहीत्।

राघ०—महाराज! किमप्यस्तु, परन्तु यदि नाद्य पलायते भवान्; तदा श्वो गृहाद्बहिर्गमनमपि भवतो निषिद्धं भवेत्।

महा०—अपि सत्यमिदम्?

राघ०-अतिसत्यम्!

तरणितनूजाम्=सूर्यतनयाम्, यमुनाम्। **भावत्काः**=भवदीयाः। **पत्तयः**=पदातयः। **तरणिरोधम्**=सूर्यावरोधम्। मिथ्याध्यवसितिरलङ्कार इति टिप्पणे।

मामकानाम्=मत्सम्बन्धिनाम्। **अधिवासितानाम्**=कारितनिवासानाम्। **भ्रातॄन्**=सहोदरान्। **अवधीत्**=अमारयत्। **पितरम्**=उत्पादयितारम्। **न्यग्रहीत्**=कारासदने स्थापितवान्।

महा०—आः ! केनेव योगबलेन ज्ञातवानसि ? [क्षणं विचिन्त्य] आचार्य्य ! भवादृशे शुभचिन्तके साहाय्यं विदधतिः कारागारस्थोऽपि स्वातन्त्र्यमासादयिष्यामि। किन्त्वाश्रितान् मृत्युकपोले कवलवन्निपात्य नहि जिजीविषामि। किञ्च, अधुनैवापसृतेष्वस्मासु कदाचनास्मद्दोषमेव दिल्लीश्वर-जयसिंहादयः प्रकटयेरन्—यत् "सम्माननयितुमुत्सुकमपि त्यक्त्वा, धार्ष्ट्येनैव पलायितः"—इति, तद्भवतु नाम कश्चन प्रकटोऽपराधो दिल्लीश्वरस्य, ततो यास्यामः। न हि महाराष्ट्रवीरा वराकैरेतैः सिंहा इव शशकैर्निग्रहीतुं शक्यन्ते। तावद्यदि क्लेशो न स्यात्: तत् सूच्यन्तामस्मत्पूजकपाचक-लेखक-पाठकादयः सपदि महाराष्ट्रदेशाभिमुखं प्रस्थातुम्।

राघव०— [उच्चैरुच्चैः] धन्यो महाराजः ! य एवं प्राणानप्यगणयन् करुणयाऽऽत्मीयानां कुशलं चिन्तयति। एवमेव धर्मो राज्ञां यत् स्वीयानां प्रतिपालनं सम्माननं सदा कुशलचिन्तनञ्च। भृत्या हि, रोदं रोदं वक्षो घ्नतीं मातरम्; विलुलितैः केशैर्भूमि-विलु-

शुभचिन्तके=कल्याणानुध्यायके। विदधति=कुर्वति। मृत्युकपोले=यमसुखे। कवलवत्=ग्रासवत्। जिजीविषामि=प्राणितुमिच्छामि। अपसृतेषु=पलायितेषु। सम्माननयितुम्=सत्कर्तुम्। विशेषतो रसनारोदानेन। उत्सुकम्=उत्कम्। धार्ष्ट्येन=धृष्टतया। सिंहा इव शशकैरित्युपमा। सूच्यन्ताम्=बोध्यन्ताम्।

अगणयन्=अचिन्तयन्। आत्मीयानाम्=स्वेषाम्। सम्माननम्=सत्करणम्। कुशलचिन्तनम्=शिवानुध्यानम्। रोदं रोदम्=रुदित्वा रुदित्वा। वक्षः= उरः। घ्नतीम्=ताडयन्तीम्। विलुलितैः=विश्लथैः। भूमिवि-

लुण्ठनैश्च रोदसी रोदयन्तीं पत्नीम्; तात-तातेति कलरवैर्मूर्च्छयतः पटान्तमाकर्षतः पृथुकांश्च; तृणवद्विहाय स्वामिकार्य्यं साधयितुं स्वदेहमर्पयन्ति । तत्कृतज्ञता-स्वीकारो हि राज्ञां प्रथमो धर्मः—इति धन्यो भवान् राजधर्म-परतन्त्रो दयानिधिः !!

महा०— [निश्वस्य पटान्तेनाश्रूणीवापसार्य्य] आचार्य्य ! बहूक्तम् ! मा स्म स्वयं खिन्नमधिकं खेदय, मादृशः कृतघ्नो दुरवापः ।

राघव०—किमिति ? किं कदाऽपि कोऽपि निष्कपट-दासस्तिरस्कृतो वा ?

महा०—धिङ्माम् ! तथा तिरस्कृतवानस्मि प्राणरक्षकमेकम्; यच्छ्रूयते स मम तिरस्कारग्लानः प्राणांस्यक्तवान्—इति । आधिरयं ममापि प्राणैः सहैव शान्तिमेष्यति ।

राघ०—[ग्रीवां परिवर्त्य, कानिचिदश्रूण्युन्मुच्य] अपि महाराजस्तस्य नाम कथयिष्यति ? यथा योग-बलेन चिन्तयेयं स जीवति न वेति ।

महा०—रघुवीरसिंहः ।

लुण्ठनैः=धरणीपरिवर्त्तनैः । **रोदसी**=द्यावापृथिव्यौ । **कलरवैः**=मधुरभाषणैः । **पटान्तम्**=वसनप्रान्तम् । **पृथुकान्**=बालान् । राजधर्मस्य, **परतन्त्रः**=अस्वाधीनः ।

कृतघ्नम्=कृतावेदिनम् ।

निष्कपटदासः=निश्छद्मभृत्यः ।

तिरस्कारेण, **ग्लानः**=क्षीणहर्षः । **आधिः**=मानसिकव्यथा । **शान्तिम्**=शमम्

राघ०—[आत्मनो रोमाञ्चं गद्गदस्वरञ्च गोपयन्, ध्यानच्छलेन क्षणं तूष्णीं संवृत्य, धैर्य्यमाधाय] दीनबन्धो ! जीवति रघुवीरसिंहः।

महा०—जीवतु, जीवतु, चिरं जीवतु, अथ किङ्करोति ? कास्ति ? स्मारं स्मारं मम तिरस्कारं मामपवदति वा ?

राघ०— [कर्णौ पिधाय] शान्तं पापम् ! नहि तादृशानि कुलीनानामपत्यानि प्रभुमपवदन्ति। तानि हि देहं पातयन्ति; न तु प्रभुभक्तिम्। प्राणांस्त्यजन्ति; न च स्वामिचरणेऽनुरागम्। स एव तिरस्कृतोऽपि निर्वासितोऽपि प्रभूणां कुशलायैव व्रतमाचरति। [इति कथयत एव राघवाचार्य्यस्य स्वरभङ्गो भाव-विकारश्च प्रकटो बभूव] ।

महा०—[सतर्कं तन्मुखमैक्षिष्ट]।

राघ०—[सधैर्यम्] महाराज ! तस्मिन्ननुरक्तायाः कस्याश्चन वीर-बालाया अवस्थां संस्मृत्य खिन्नं मे चेतः।

महा०—का सा ?

राघ०—प्रभोः सहचरस्य गौरसिंहस्य भगिनी !

महा०—अहह ! स्मरामि। किमवस्था सा बाला सौवर्णी ?

रोमाञ्चम्=पुलकम्। ध्यानच्छलेन=चिन्तनव्याजेन।

अपवदति=गर्हयति।

पातयन्ति=नाशयन्ति। अनुरागम्=प्रेम। स्वरभङ्गम्=कण्ठे बाष्पावरोधेन वैस्वर्यम्।

अनुरक्तायाः=कृतप्रणयायाः।

रहः=एकान्ते।

राघ०—आर्य ! आकर्ण्य रघुवीरं नष्टम्; सा रहस्तडागतटमासाद्य, मुक्तकण्ठञ्चिरं रुदित्वा, शुष्ककाष्ठान्यादाय, चितां ज्वलयित्वा, आत्मानं भस्मसात् कर्तुं प्रवृत्ता।

महा०—आः ! किमुच्यते ? ततः।

राघव०—ततो मन्दिर-पूजकस्य पुत्री, पुत्रवधूश्चाकस्मात्तत आगते, तां तथाभूतामालोक्य दृढं गृहीत्वा तारस्वरेण "धावत भोः धावत ! सौवर्ण्यात्मानं दहति"—इति करुण-कोलाहलमकुरुताम्।

महा०—ततः ?

राघ०—ततो झटिति मन्दिर-पूजको देवशर्मा, अपरे च, स्खलन्तो निपतन्तः श्लथद्वसनास्त्वरित-निश्वासास्तत्र समागताः।

महा०—ततः ?

राघ०—ततः समालिङ्ग्य, क्षणं रुदित्वा, देवशर्मणा कथितम्—"वत्से ! वेद्मि—यत् त्वं शून्यं जगत् पश्यसि। आत्मानञ्च भुवो भारभूतमाकलय्य विमानमिव भासमानं बृहद्भानुमारुह्य पत्या समं वैकुण्ठं जिगमिषसि। कथं न स्याः ? कन्यारत्नं हि भवती क्षत्रियाणाम् ! परमत्र ते भ्रमः ! सम्यग् ग्रह-दशामवलोक्य,रात्रावेव गणितवानस्मि। यं सुरलोकेष्वन्वेष्टव्यं मन्यसे; स वसुधामेवा-

---

स्खलन्तः=पतन्तः। श्लथद्वसनाः=गलद्वस्त्राः।

शून्यम्=अभावालीढम्। भारभूतम्=भारायमाणम्। विमानमिव=आकाशयानमिव। भासमानम्=प्रज्वलन्तम्। बृहद्भानुम्=वह्निम्। आरुह्य=उपरि स्थित्वा। वैकुण्ठम्=वैष्णवं धाम। जिगमिषसि=गन्तुमिच्छसि। भ्रमः=भ्रान्तिः। ग्रहदशाम्=खेचरस्थितिम्। सुरलोकेषु=स्वर्गादिषु। अन्वे-

लङ्करोति। अचिरेण स आत्मानं प्रकटयिष्यति, तदा स त्वां कथान्वेवावलोक्य, वाताऽऽहतो रम्भास्तम्भ इव निपत्य, क्षणेनाचिन्तनीयमाचरिष्यति। तद् विश्वसिहि, धारय देहम्, प्राप्स्यसि प्रेयांसम्"—इति।

महा०—[आकाशमवलोक्य, निश्वस्य] भद्रे! तवापि कष्टस्यायमेव कारणं निर्विचारः। [सम्मुखम्] आचार्य्य! ततः?

राघ०—देव! एवं बहुधा बहुभिः सान्त्व्यमाना, उन्मत्तेव गृहीत-सुदृढ-मौनव्रता मुक्त-केशी धूलि-धूसरित-देहा रुद्राक्ष-माला-कलित-वक्षाः स्थण्डिल-शायिनी तडाग-कोण एव शिवालयमेकमध्युष्य बिल्वपत्रैर्जलधाराभिर्धूर्तकुसुमैरक्षतैश्चानवरतं शिवं पूजयन्ती समयं यापयति।

महा०—हा! रघुवीर! कदा त्वां समालिङ्ग्य क्षमापयिष्यामि?

तावदकस्माद् दीपो मन्दप्रकाशः संवृत्तः। महाराष्ट्रराजस्तमुद्दीप्य, परिवृत्त्याद्राक्षीत्-यन्न तत्र राघवाचार्य्यः। अथ

द्रष्टव्यम्=अन्वेषणीयम्। अलङ्करोति=भूषयति। जीवतीति यावत्। कथासु=कथानकेषु। वाताहतः=वायुचालितः। रम्भास्तम्भ इव=कदलीस्तम्भ इव। अचिन्तनीयम्=अविचारणीयम्। मरणमिति यावत्। प्रेयांसम्=प्रियतमम्।

अयमेव=शिव एव। निर्विचारः=निर्विवेकः।

सान्त्व्यमाना=साम्यमाना। गृहीतसुदृढमौनव्रता=धारितातिकठोरवाचंयमता। धूलिधूसरितदेहा=रजोरूषितगात्री। शिवालयम्=शिवमन्दिरम्। अध्युष्य=अधिष्ठाय। बिल्वपत्रैः=श्रीफलदलैः। धूर्त्तकुसुमैः=धत्तूरपुष्पैः। "उन्मत्तः कितवो धूर्तो धत्तूर"इत्यमरः। अक्षतैः=तण्डुलकणैः।

द्विश्चिश्चाऽऽकार्य्य, अवतीर्य्य, उद्याने भ्रान्त्वाऽपि, क्वापि तत्पदवीं न लेभे। तत इदमखिलं स्वप्नमिव, इन्द्रजालमिव, मायादर्शनमिव च, चिरं चिन्तयन्, प्रघण एव पर्य्यङ्कमाकृष्य, तादृशानेव स्वप्नान् पश्यन सुष्वाप।

प्रातः किञ्चिदुदञ्चिते चण्डमरीचौ, द्वार-देशात् कोलाहलमिव शृण्वन् गौरसिंहो गवाक्षादवलोक्य व्यजिज्ञपत्—"पश्यतु पश्यतु देवो दुष्टतां दिल्ली-दर्प-दर्पितस्य"।

अथ सर्वे 'किमिति किमिति'—ससम्भ्रमास्तत आगत्य ददृशुर्यत् परतः सशस्त्रा द्वारपाला भ्रमन्ति, अन्तराजिगमिषतश्च जनान् निरुन्धन्ति—इति।

अथ महाराष्ट्रराजो दृष्ट्वैवैतत; लोहितवदनः कोपस्फुरदधरो जाज्वल्यमान-नयन-द्वयो जिघत्सन्निव ब्रह्माण्डमण्डलम्, भ्रुवोराकुञ्चनेन स्फोटयन्निव गगन-तलम्, स्तन्यजीवं माल्यश्रीकञ्चावादीत्—"पश्य, पश्य, यवनराजस्य हृदयम! नासौ जानीते यद् महाराष्ट्रा अन्यानपि चातुरीं शिक्षयन्ति। अहो! राघवाचार्य्यस्य

उद्दीप्य=विपुलप्रकाशीकृत्य।

उदञ्चिते=ऊर्ध्वमायाते, उदिते। चण्डमरीचौ=खरकरे। दिल्लीदर्पेण, दर्पितस्य=साभिमानस्य।

ससम्भ्रमाः=साश्चर्याः। अन्तः=मध्ये। आजिगमिषतः=आगन्तुमिच्छतः।

लोहितवदनः=अरुणमुखः। कोपस्फुरदधरः=क्रोधचलदोष्ठः। जाज्वल्यमाननयनद्वयः=दन्दह्यमानचक्षुर्द्वितयः। जिघत्सन्=अत्तुमिच्छन्। स्फो-

कथां नाऽऽहृतवानस्मि । रात्रावपि स स्पष्टमवादीदेतद्घटना-विषये। पलायितुञ्च सम्यगवसरं प्राप्यापि, आत्मीयांस्त्यक्त्वा निवर्त्तनमनुचितमिति मन्यमानो नास्मि पलायितः। इच्छामि चेदधुनैवैषां कदर्य्याणां चक्षुष्पु रेणुका-राशिं प्रक्षिप्य, अनवरुद्धगतिर्महाराष्ट्र-देशं गच्छेयम्। किन्तु, नोत्सहते मे मनस्त्यक्त्वा स्वाश्रितान् आत्मानं त्रातुम"।

तत आह माल्यश्रीकः—महाराज! अस्माकं महाराष्ट्रदेशगमनं सम्राजा नानुमतम; तर्हि स्वाश्रितानां महाराष्ट्रदेशगमनानुमत्यै, अपरमावेदनपत्रं प्रेषणीयम्। निश्चिनोमि यदसहायस्य देवस्य स्थितिरत्र रोचिष्यतेतरां यवनकुलनन्दनीय, समासादिताऽऽदेशपत्राश्च सुखेन निर्भयाः प्रयास्यन्त्यास्माकीना महाराष्ट्र-देशमिति।

ततः 'साधु साधु'-इति सर्वैरुक्तम्। सपद्यावेदनपत्रस्य लेखोऽपि प्रस्तुतः। निर्गन्तॄणां सङ्ख्याऽपि समुल्लिखिता। पत्रमिदं कुमार-रामसिंह-द्वारा प्रेषितं सम्राजा सप्रसादमङ्गीकृतम्। कतिपयैरेव दिवसैर्यथावाञ्छितं दिल्ली-निर्गमनपत्रिकाश्च लब्धाः।

टयन्=विदारयन्। अन्यान्=इतरान्। चातुरीम्=पाण्डित्यम्। निवर्त्तनम्=परावृत्तिः। कदर्य्याणाम्=नीचानाम्। रेणुकाराशिम्=धूलिनिकरम्। अनवरुद्धगतिः=अवारितगमनः। स्वाश्रितान्=स्ववशगान् भृत्यान्।

असहायस्य=एकाकिनः। देवस्य=भवतः। यवनकुलस्य, नन्दनाय=हर्षवर्द्धनाय। निर्भयाः=भीतिशून्याः।

निर्गन्तॄणाम्=निर्गच्छताम्। सप्रसादम्=सप्रसन्नतम्। यथावाञ्छितम्=यथाभिलषितम्।

अथ पत्रिका इमाः प्राप्य, महाराष्ट्रराजेन गगने दृष्टिं बद्ध्वा प्रोक्तम्–"अरे रे दिल्ली–कलङ्क ! कियांस्ते चातुरी–गर्वः ! यद्यद्यैव स्वानुचर–वेषमाकलय्य, पत्रमेकं हस्ते गृहीत्वा निर्गच्छेयम्; तन् प्रपितामहोऽपि ते न शक्तः प्रतिरोद्धुम् । परं न शिवो मार्गेऽप्यात्मीयानामशिव–संभावना–पथमङ्गीचिकीर्षति"

ततो महाराष्ट्रेश्वर–संमत्या सर्वेऽपि तदीया अनिच्छन्तोऽपि दिल्ली–नगरान्महाराष्ट्र–देशं प्रतिनिवृत्ताः ।

× × × ×

अथ स्नानपूर्वाः क्रियाः समाप्य, यावन्महाराष्ट्रराजः सिष्णासति; तावत्प्राङ्गणे समुपातिष्ठतैका, अनवरोद्धव्येति प्रतीहारैरनवरुद्धा, "पूजार्थं कुसुमानि, मालाः, हारान्, कलिकाव्यजनानि, स्तबक–कन्दुकानि च, क्रीणीध्वं भो ! क्रीणीध्वम्"—इति वदन्ती, वामस्कन्ध–स्थापित–कुसुम–पूर्णपिटकिका, दक्ष–कराऽऽकलितातिः

चातुरीगर्वः=कौशलाभिमानः । **आत्मीयानाम्**=स्वीयानाम् । **अशिव-सम्भावनापथम्**=अमङ्गलागममार्गम् । **अङ्गीचिकीर्षति**=अङ्गीकर्तुमिच्छति । **अनिच्छन्तोऽपि**=अनभिलषमाणा अपि । **प्रतिनिवृत्ताः** परावृत्ताः ।

× × × ×

स्नानात्पूर्वाः=दन्तधावनाचमनाद्याः । **सिष्णासति**=स्नातुमिच्छति । **प्राङ्गणे**=अजिरे । **अनवरोद्धव्या**=वारयितुमनर्हा । **मालाः**=स्रजः । साधारणतया गुम्फिताः । **हारान्**=विशिष्टाः स्रजः । विशेषरूपेण ग्रथिताः । **कलिकानाम्**=कोरकाणाम्, व्यजनानि । **स्तबककन्दुकानि**=गुलुच्छगेन्दुकानि । वामस्कन्धे, स्थापितम्, कुसुमपूर्णम्, **पिटकः**=पेटा यया सा । दक्षकरेण, आक-

मुक्त-कलिका-रचितानेक-विक्रेय-व्यजना, नील-सूत्र-वल्ली-स्यूति-स्यूत-प्रान्त-धवल-वसना, कर्णान्त-लम्बमान-राजत-ताटङ्क-चोचुम्ब्यमान-गण्ड-युगला, आरक्त-कञ्चुकिकाऽऽच्छन्न-तालफल-स्तनी, काच-खण्ड-मण्डिताग्र-राजत-लवङ्गिकाऽऽभरण-भूषित-नासा, ताम्बूल-राग-रञ्जिताधरा, यौवन-भर-मन्थरा, मन्दस्मितेन मालती-मुकुलानीव वमन्ती, अपाङ्ग-वीक्षणैर्नीलोत्पलैरिव ताडयन्ती, विलुलितैर्लीलालकै रोलम्ब-कदम्बानिव वशयन्ती, क्षुद्र-घण्टिका-शिञ्जिताऽऽकृष्ट-निर्दिष्ट-जन-दृष्टिः, एका कस्तूरिकोद्वर्तनोद्वर्ति-

---

लितानि=धरितानि, **अतिमुक्तकलिकारचितानि**=माधवीकोरकनिर्मितानि, अनेकानि, विक्रेयाणि, व्यजनानि यया सा। नीलसूत्रैः, **या वल्लीस्यूतिः**=वततीसीवनम्, तया स्यूतं प्रान्तं यस्य तादृशं **धवलम्**=स्वच्छम्, **वसनम्**=वस्त्रं यस्याः सा। कर्णान्तयोः, लम्बमानेन, **राजतेन**=रजतनिर्मितेन, **ताटङ्केन**=आभरणविशेषेण, **चोचुम्ब्यमानम्**=स्पृश्यमानम्, गण्डयुगलं यस्याः सा। **आरक्तया**=ईषल्लोहितया, कञ्चुकिकया, **आच्छन्नौ**=गुप्तौ, तालफलवत् स्तनौ यस्याः सा। काचखण्डमण्डिताग्रेण, राजतेन, **लवङ्गिकाभरणेन**=देवसुमसमाननासाभूषणेन, भूषिता नासा यस्याः सा। **ताम्बूलरागरञ्जिताधरा**=नागवल्लीदललौहित्यभूषितोष्ठा। यौवनभरेण, **मन्थरा**=सालस्या। **मन्दस्मितेन**=ईषद्धास्येन। **मालतीमुकुलानि**=माधवीकोरकान्। **वमन्तीव**=उद्गिरन्तीव। **अपाङ्गवीक्षणैः**=सकटाक्षनिरीक्षणैः। **नीलोत्पलैः**=कृष्णसरसीरुहैः। **ताडयन्तीव**=घ्नतीव। **रोलम्बकदम्बान्**=भ्रमरौघान्। **वशयन्ती**=स्वायत्तीकुर्वन्ती। क्षुद्रघण्टिकाशिञ्जितेन, आकृष्टा निर्दिष्टजनानां दृष्टिर्यया सा। **कस्तूरिकोद्वर्त्तनेन**=मृगमदमिश्रानुलेपनेन, **उद्वर्त्तितेव**=कृताङ्गरागेव। **श्यामा**=कृष्णा

तेव शृङ्गार-रस-स्नातेव च श्यामा कुसुम-विक्रेत्री।

महाराष्ट्रराजस्तु, पराङ्गना-प्रतारणेषु न पटीयानिति भृत्यमेकं शिव-पूजायै कुसुमानि क्रेतुमिङ्गितवान्। सा तु तेन सह कुसुम-मूल्य-विषय आलपन्त्येवाकस्मात्--"आः! कथं मां क्ष्वेलयसि? इदमेव किं सौशील्यं महाराष्ट्रराजस्य समीपवर्तिनाम्? कीदृशीयं चञ्चलता चित्तस्य; यद् युवति-दर्शन-समकालमेव द्रवति मनः? नाहं वारवधूरिव विश्वेषां नर्मपात्रम्, किमिति मामेवं ब्रूषे?"-इत्युच्चैः सरोषमिवावदत्। ततः 'किमिति किमिति?'—तत आगतेषु गौरसिंहादिषु महाराष्ट्रराजे च, कर्णौ स्पृष्ट्वा भृत्योऽवोचत्--"न मया तादृशं किमप्युक्तम्"। ततस्त्वमेव कथय-किमेतेनोक्तमिति महाराष्ट्रराजेनोक्ता—"महाराज! रहसि कथयिष्यामि-यदुक्तमेतेन, त्रायस्व, त्रायस्व"—इत्यश्रूणीव पातयन्ती, सस्वरभङ्गमवोचत्। महाराष्ट्रराजस्तु स्वदासेरस्य दुर्वृत्तमसहमानः, सपदि तया सहोद्यानमविशत्। सा तु किञ्चिदन्तः प्रविश्याभिमुखी स्थिता स्मितवती, यावच्चैष क्षणं रुरुदिषन्तीं क्षणञ्च स्मयमानामवलोक्य

षोडशी च। **कुसुमविक्रेत्री**=पुष्पविक्रयिणी।

पराङ्गनाप्रतारणेषु=परस्त्रीवञ्चनेषु, **पटीयान्**=अतिशयेन पटुः। **इङ्गितवान्**=चेष्टया बोधितवान्। **कुसुममूल्यविषये**=पुष्पार्घसम्बन्धे। **आलपन्त्येव**=वार्त्ताः कुर्वन्त्येव। **क्ष्वेलयसि**=नर्मभाषणं करोषि। **सौशील्यम्**=सुजनता। **द्रवति**=स्खलति। **वारवधूरिव**=वेश्येव। **विश्वेषाम्**=समेषाम्। **नर्मपात्रम्**=हासभाजनम्। **सरोषमिव**=सक्रोधमिव। **रहसि**=एकान्ते। **स्वदासेरस्य**=स्वभृत्यस्य। **दुर्वृत्तम्**=दुराचारम्। **उद्यानम्**=गृहारामम्। **स्मितवती**=ईषद्धसिता। **रुरुदिषन्तीम्**=रोदितुमिच्छन्तीम्। **स्मयमानाम्**=हसन्तीम्।

विस्मयते ; तावत्सा प्रावोचत्-'महाराज ! यदि क्षम्येत तत्कथयामि' स उवाच-'मा भैषीः, कथय'—

ततः सा वृक्षस्यैकस्य तले कुसुम-पिटकिकां संस्थाप्य, तदुपरि कलिकाव्यजनानि च धृत्वा, करौ सम्पुटीकृत्य प्रोवाच—

"महाराज ! किमिदम् ? धर्म-ध्वजोद्धूनन-धुरीणेष्वपि न शोभन्त इम आचराः, श्रूयते राज-कन्यामपहृत्य भवांश्चिरं स्वावरोधेष्वस्थापयत्, तत्सहचरीभिरपि च मिष्टमालपन्, उपवनेषु पर्य्याटयत्। दिल्लीं समागतस्य च प्रथम एवाहनि निशीथे भवतः शिबिरान्निःसरन्ती काचन यवन-सुन्दरी कतिभिश्चिद्दर्शकैर्दृष्टा, साम्प्रतमपि च मां भवतो भृत्याः क्ष्वेलयन्ति, भवानपि चैकान्ते मामानीतवानस्ति, केन किं सम्भावयिष्यते—इति को जानीते"।

तदाकर्ण्य, क्षणं जडीभूत इव, महाराज उवाच--

'सुन्दरि ! स्फुटं कथय, का त्वम् ? किमीहसे ? कुत आगता ? कथमेवं सुगूढं वृत्तं वेत्सि ? किमिव मां मोहयसि ? स्वयमेव स्वकीयमुद्देश्यं विशकलय्य कथय'।

विस्मयते=आश्चर्यायते।

धर्मध्वजस्य, उद्धूनने=उच्चालने, **धुरीणेषु**=अग्रेसरेषु। **स्वावरोधेषु**=स्वान्तःपुरेषु। **मिष्टम्**=मधुरम्। **उपवनेषु**=उद्यानेषु। **पर्य्याटयत्**=अभ्रामयत्। **क्ष्वेलयन्ति**=हासयन्ति। **एकान्ते**=रहसि। **सम्भावयिष्यते**=कथयिष्यते।

जडीभूत इव=स्तब्धीभूत इव।

सुगूढम्=अतिगुप्तम्।

अथ सा महाराजं विक्षुब्धमेवाऽऽकलय्य; सप्रणाममुवाच—

"क्षम्यतां महाराजेन! न श्रीमतो भृत्येन किमप्युक्तम्, न किमपि वचनीयोऽसौ निर्दोषः। अहं श्रीमत्या दिल्लीश्वरकुमार्य्याः सहचरी। केवलं रहसि समानेतुमार्य्यं प्रपञ्चनमकार्षम्"।

ततः स उवाच—"आः! कठिनमाचरितमिदं त्वया, विनाऽपराधं वयमत्र निगृहीताः स्मः। त्वादृशीनां यातायातं केनचन ज्ञायेत चेत्सङ्कटेत महाननर्थः"।

सा—उवाच—"महाराज! राजकुमारी, अभिनव—चन्द्रकलेव तनुगात्रा, मृद्वीकेव शुष्का, प्रभातप्राया रजनीव मन्दतारका, योगिनीव विगताशनाया—पिपासा, अवधूतेव चोन्मत्ता, संवृत्ताऽस्ति—इति यदि भवतः प्रतिवचन—जीवातुं न गृह्णाति; तत एव महाननर्थः सङ्कटेत। दीनबन्धो! प्रणम्य ब्रूते राजकुमारी यद्—

निर्दोषः=दूषणरहितः। **प्रपञ्चनम्**=चातुर्यम्।

विनाऽपराधम्=निर्दोषम्। **त्वादृशीनाम्**=राजकुमारीभृत्यानाम्। **सङ्कटेत**=सम्भवेत्।

अभिनवचन्द्रलेखेव=नूतनशशिकलेव। **तनुगात्री**=सूक्ष्माङ्गी। **मृद्वीकेव**=द्राक्षेव। **शुष्का**=नीरसा। **मन्दाः, तारकाः**=उडवः, यस्यां सेति रजनीपक्षे, रजनारीपक्षे च **मन्दे**=अल्पावलोकनके, **तारके**=कनीनिके यस्याः सेत्यर्थः। **योगिनीव**=योगसाधनरतेव। **विगते**=दूरीभूते, **अशनायापिपासे**=बुभुक्षापानेच्छे, यस्याः सा। **अवधूतेव**=ब्रह्मज्ञानिनीव। **उन्मत्ता**=उन्मादाख्यस्मरदशां प्राप्ता। अवधूताऽपि कृत्याकृत्यविवेकविधुरतामुपगता लोकैरुन्मत्तैव घुष्यते। **संवृत्ता**=सञ्जाता। **प्रतिवचनजीवातुम्**=प्रत्युत्तरजीवनौषधम्। **अनर्थः**=

नूनं वधू-वध-बुधो भवान्। नाहं किञ्चन बहु वचनीयं मन्ये: यतो निर्दयानां भवादृशानां हृदये मुक्तकण्ठ-रोदन-पुरस्सरं सहस्रशो विनयै रोदनेनापि च दया न प्रचरति। किमरण्यरोदनेन? अथवा काननेष्वप्यनन्य-श्राव्यमपि रुद्यतेतरां दु:खितै:; यतो रोदनं स्वभावत एवातिकठिनमपि दु:खं किञ्चिन्मृदूकरोति। तथैवमद्यापि रोरुद्यते। जीवयतु वा, नाशयतु वा, तदत्र महाराज: प्रमाणमिति"।

स उवाच—"भद्रे! सर्वदा-इदमेव प्रावोचं—यद् जनकेन चेदङ्गीक्रियेत कुमारीं ममार्पयितुम्; तन्नास्ति मे नेति प्रतिद्वन्द्विनी वाक्। अन्यथा तु निवेदय कुमारीं कुमारञ्च, ममावस्थाम्, वेदय च; यद् एवं सम्राजा निरर्थकोप-विषयीकृतश्चेत् कुमारी-प्रणय-मलीमसोऽपि ज्ञायेय; तदवश्यं मम कुमार्य्याश्च प्राण-संशय:। भद्रे! स्मारं स्मारं कुमार्य्या मुख-मण्डलं निष्कपटमसाधारणञ्च प्रेमाणम्, खिद्येतमाम्। किं करोमि? दैवं नानुकूलम्! एवमाल-

---

दशामावस्थाप्राप्तिरूपः। **वधूवधबुध:**=नारीहननपण्डितः। **निर्दयानाम्**=कृपाकृपणानाम्। **विनयै:**=नम्रताप्रदर्शनैः। **अरण्यरोदनेन**=काननक्रन्दनेन। अरण्ये श्रोत्रभावेन रोदनं निष्फलमिति तादृशेषु शब्दस्यास्य प्रयोग इति ध्येयम्। **अनन्यश्राव्यम्**=अनितरश्रातव्यम्। **स्वभावत:**=प्रकृत्या। **मृदूकरोति**=कोमलतां नयति। **रोरुद्यते**=चङ्क्रन्द्यते। **जीवयतु**=प्राणयतु।

अर्पयितुम्=दातुम्। **प्रतिद्वन्द्विनी**=विरुद्धा। **अवस्थाम्**=परिस्थितिम्। **वेदय**=बोधय। **निरर्थकोपविषयीकृत:**=निष्प्रयोजनक्रोधाधारीकृतः। **कुमारीप्रणयमलीमस:**=रसनारीप्रेममलिनः। **प्राणसंशय:**=जीवनसन्देहः। **निष्कपटम्**=निर्व्याजम्। **असाधारणम्** = अनितरलभ्यम्। **प्रेमाणम्**=

पत्येव महाराजे गौरेणोच्चैराकार्य्य कथितम्—"कुमारमायाजिह्मः समुपस्थितोऽस्ति, अपेक्षते च महाराजम्"–इति । ततस्तां सपदि निवर्त्य, इत आयातो महाराजः । कुमारेण चाऽऽदरोचिताचारं विधाय, कथितम्–"महाराष्ट्र–चक्रवर्तिन् ! यो मां मम स्वसारञ्च तथा रक्षितवान्; तं तातो मे न सत्करोतीति किमत्र कारणं नावैमि ! आः ! प्रहरिणोऽप्यद्य पश्यामि । नूनं मिथ्याभिशंसिभिश्चाटुकारैरेवोपपादितं किमपि भवद्विषये । शास्तिखानादीनां वराकाणां सम्बन्धिनो द्रुह्यन्ति भवन्तम् । मन्ये, तात–निकटे त एव कथमपि निनिन्दुः । तत्क्षम्यताम्, अधुनैव गत्वा तातं भवतो महाराष्ट्र–देशं प्रति कुशलेन निवृत्त्यै निवेदयिष्यामि । मा म्म गृह्णीथा दोषमत्राऽऽस्माकीनम्, क्षमस्व, एतैरेव पदैः पितरं गत्वा भवतो माहात्म्यं बोधयिष्यामि"—इति कथयन् परावृत्तः । महाराष्ट्रराजस्तु "अस्य विपरीतं फलं न स्यात्" इति कथयन् तं विससर्ज ।

समयेऽस्मिन् यवनराजः कुसुम–वाटिका–मध्यस्थे मालतीकुञ्जे मारकत–दण्डायामासन्द्यामुपविष्टः । परितः सजलमणिमय–पात्रेषु

प्रणयम् । "प्रेमा ना प्रियता हार्दमि"त्यमरः । **दैवम्**=भाग्यम् । **आदरोचिताचारम्**=सत्कारानुकूलव्यवहारम् । **सत्करोति**=आदरति । **नावैमि**=न जानामि । **मिथ्याभिशंसिभिः**=असत्यकथयितृभिः । **उपपादितम्**=कथितम् । **निनिन्दुः**=जुगुप्साञ्चक्रुः । **माहात्म्यम्**=गौरवम् ।

मालतीकुञ्जे=माधवीमण्डपे । **मारकतदण्डायाम्**=मरकतमणिनिर्मितहस्तचरणायाम् । **आसन्द्याम्** = "कुर्सी"पदाभिधेयायाम् । **सजलमणिमय–**

विविध-कुसुम-गुच्छा आयोजिताः। पार्श्वपरिवर्तिन्येकस्मिन् जाल-भवने बहवः शुकाः, पिकाः, सारसाः, कलविङ्काः, लावाः, जीव-ञ्जीवाः, चातकाः, कुरराः, केकिनः, क्रौञ्चाः, कोयष्टिकाश्च; कूजनैः, उत्फालनैः, उड्डीयनैः, लूमदोलनैः, पक्षस्फुरणैः, चञ्चु-कोटिभिः पक्षति-कण्डूयनैः, प्रणयकलहैः, समञ्जीर-शिञ्जित-नर्त्तनैः, कपट-कलहैः, मृद्वीकादि-रसनैः, प्रेयसी-प्राप्त्यहम्पूर्विका-युद्धैश्च चिक्री-डिरे। साम्मुखीनायां ताम्बूल-दलाकारायामेकस्यां पुष्करिण्यां कारण्डवाकाराः पञ्चपाः परिष्कृतास्तरयः सर्पन्ति स्म। तत्प्रान्ते च बहवो हंसाः, कारण्डवाः बकाः सारसाश्च मोदन्ते स्म। तावदे-कत एकस्मात् कपोत-भवनान्निःसृत्य सहस्रशः कपोताः प्रडी-नोड्डीन-सण्डीनैरुड्डीयमाना गगन-तलं स्पृशन्तः, तारका इव संवव्रृतिरे।

पात्रेषु=सवारिरत्नखचितभाजनेषु। **विविधकुसुमगुच्छाः**=अनेकविधसुम-गुलुच्छाः। **जीवञ्जीवाः**=चकोराः। **कोयष्टिकाः**=टिट्टिभाः। **लूमदोलनैः**=लाङ्गूलचालनैः। "पुच्छोऽस्त्री लूमलाङ्गूले"इत्यमरः। **समञ्जीरशिञ्जितनर्तनैः**=सक्षुद्रघण्टिकाशब्दनृत्यैः। **मृद्वीकादीनाम्**=द्राक्षादीनाम्, **रसनैः**=आस्वा-दनैः। **प्रेयसीप्राप्तौ**=प्रियतमालब्धौ, या **अहम्पूर्विका**=अहं पूर्वमित्येवं भाषणात्मिका, तया **युद्धैः**=कलहैः। **साम्मुखीनायाम्**=पुरतो विद्यमानायाम्। **ताम्बूलदलाकारायाम्**=नागवल्लीपत्राकृतिकायाम्। **पुष्करिण्याम्**=दीर्घिका-यां। **कारण्डवाकाराः**=प्लवाकृतयः। **तरयः**=नौकाः। **सर्पन्ति स्म**=प्लवन्ते स्म। **एकतः**=एकस्यां दिशि। **उड्डीयमानाः**=ऊर्ध्वं चरन्तः। **तारका इव**=उडव इव। **संवव्रृतिरे**=सञ्छादितवन्तः।

अस्मिन् समये साम्मुखीन आस्तरणे, एक आरब्य-भाषायाः कविर्वृद्धो मोलिविः सम्राजः परम-कृपा-पात्रमुपविष्ट आसीत्। स बहुशः कथा आलपन्, कविताः पठन्, यवनराजं तोषयन्, प्रसङ्गतः समगादीत्—

महाराज! रात्रौ दिने च समप्रकाशः शुक्ले कृष्णेऽपि च पक्षे पूर्णः कन्दरिणां कन्दर-मन्दिरेष्वपि किरण-किरणो निर्गत-कलङ्क-पङ्कातङ्को भवतो यशश्चन्द्रश्चमकरोति। तस्मिन् कलङ्क-लेशस्यापि पङ्कमाशङ्क्य, क्षुभ्यति नो हृदयम्।

दिल्लीश्वरः—तात्पर्यं न बुद्धम्!

आरब्यकविः—वीरवर! न मम क्षमता विशिष्य वक्तुम्, किन्तु यदि कञ्चन चिरं भवता सह विहितसमरोऽपि परतोऽङ्गीकृत्य कर-प्रदताम्, स्वमपि भवत्प्रजास्वेवान्यतमं मन्यमानः शिरो नमयन् समागच्छेत्; तत् तस्मिन् महाराजस्यातिदयादर्श-

---

आस्तरणे=विष्टरे। **आरब्यभाषायाः**=अरबदेशीयभाषायाः, "अरबी" इति ख्यातायाः। **परमकृपापात्रम्**=अतिशयस्नेहभाजनम्। **प्रसङ्गतः**=अवसरतः। **समगादीत्**=समभाणीत्।

समप्रकाशः=तुल्यालोकः। **पूर्णः**=अखण्डः। **कन्दरिणाम्**=गिरीणाम्। **कन्दरमन्दिरेषु**=दरीसदनेषु। **किरणकिरणः**=दीधितिक्षेपकः। **निर्गत-कलङ्कपङ्कातङ्कः** = दूरीभूतदुर्यशःकर्दमाशङ्कः। **यशश्चन्द्रः**=कीर्तिराकेशः। **चमत्करोति**=प्रकाशते। **कलङ्कलेशस्यापि**=दुर्यशोमात्राया अपि। **पङ्कम्**=मालिन्यम्। **क्षुभ्यति**=खिद्यते।

क्षमता=शक्तता। **विशिष्य**=विशकलय्य। **परतः**=पश्चात्। **करप्रदताम्**=

नमतिमहत्त्व-सूचकम्।

दिल्लीश्वरः—मन्ये-शिवमधिकरोति गीरियम्।

आरण्यकविः—[हस्तौ बद्ध्वा] किमज्ञातं जगतीपतेः!

दिल्लीश्वरः—महामूर्खः शिवः। मयाऽऽदर्त्तमाकारितोऽपि प्रथम एव दिने राजसभायां किमपि प्राजल्पत्। ततोऽपि सुहर्म्ये स्थापितोऽपि सत्क्रियमाणोऽपि दिल्ली-नगर-वीथिकासु परितः पर्य्यटितुमारेभे। परस्सहस्रांश्च दिल्ली-वास्तव्यान् स्ववासगृहं आगन्तुमन्वमन्यत। ततो महाकलकल-रोधनाय कोटपाल-सूचनानुरूपं प्रहरिणः स्थापिताः। वन्या एते न विदन्ति राज-सभा-व्यवहारम्।

आरण्यकविः—महाराज! उचितमेव शासनं वन्यानाम्। परं साम्प्रतं दिल्लीनगरे गृहे गृहे विपणौ विपणौ सर्वैः शिवस्यैव कथा प्रस्तूयते—इति भविष्यति किं व्यवसितं महाराजैः?

राजदेयदानृताम्। **अतिदयादर्शनम्**=अतिशयकृपाप्रकटनम्। **अतिमहत्त्व-सूचकम्**=विपुलगौरवबोधकम्।

गीः=वाणी। "गीर्वाग् वाणी सरस्वती"त्यमरः।

आदर्तुम्=सत्कर्तुम्। **आकारितः**=आहूतः। **सुहर्म्ये**=शोभने प्रासादे। **आगन्तुम्**=आयातुम्। **अन्वमन्यत**=अनुमोदितवान्। महतः, **कलकलस्य**=कोलाहलस्य, **रोधनाय**=वारणाय। **कोटपालस्य**=नगरशान्तिरक्षकस्य, "कोतवाल"इति ख्यातस्य, **सूचनानुरूपम्**=बोधनानुकूलम्। **वन्याः**=आरण्यकाः।

शासनम्=दण्डनम्। **भविष्यति**=आगामिनि काले। **व्यवसितम्**=निश्चितीकृतम्।

दिल्लीश्वरः—यदि स मर्य्यादां प्रतिपालयेत्; तदितोऽपि सत्कृत्य निवर्त्तयितुमेव सज्जोऽस्मि ।

आर०—विजयतां महाराजः !

अथ कुमाररामसिंहं त्वरया समागच्छन्तमालोक्य, ऐकान्तिकं कार्य्यमाशङ्कमान आरब्य-कवित्रुदस्थात्, प्रणम्य च निवृत्तः । रामसिंहस्त्वागत्य हस्तमेकमुत्थाप्य प्रवणीभूय सादरमुवाच—महाराज ! सम्प्रत्येव तातस्य पत्रं प्राप्तवानस्मि, त्रायतां त्रायतां महाराजः !

दिल्लीश्वरः—उपविश, उपविश, किमिव क्षुब्धोऽसि ?

रामसिंहः—भारतराज ! महान् क्षोभस्य विषयः ।

दिल्लीश्वरः—विशकलय्य कथय ।

रामसिंहः—[उपविश्य, अञ्जलिं बद्ध्वा] दिल्लीश्वर ! तातो महाराष्ट्रराजं वशमानीय दिल्लीं प्रेष्य, स्वयं विजयपुराधीशेन युद्धमारभत ।

दिल्लीश्वरः—[आसन्दी-दण्डासक्त-कूर्परे वाम-हस्त-तले कपोलं संस्थाप्य भ्रुवौ किञ्चिदाकुञ्च्य विस्फारिताभ्यां नयनाभ्यां निपुणमीक्षमाणः] आम् ! ज्ञातम् !

रामसिंहः—तत्र च द्विगुणैस्त्रिगुणैश्च शत्रुभिराक्रान्तः—इति तस्य महासङ्कटमुपस्थितम् ।

मर्य्यादाम्=राजसभाप्रतिष्ठाम् ।

ऐकान्तिकम्=एकान्ते भवम्, रहस्यम् ।

प्रवणीभूय=नम्रीभूय । तातस्य=पितुः ।

आसन्दीदण्डे, आसक्तः कूर्परः=कफोणिः, यस्य तस्मिन् । वामहस्ततले=दक्षेतरकरनिम्नभागे । आकुञ्च्य=सङ्कोच्य ।

दिल्लीश्वरः—[स्वगतम्] अस्तु, जयसिंहो शिवश्च द्वावेव भारते दुर्दमनीयौ वीरौ; तदेकः कारागारे बद्धः, अपरश्च तत्र विनश्येच्चेत्; साधु भवेत् [प्रकटम्] तत्?

रामसिंहः—राजाधिराज! तातः सविनयं सेना-साहाय्यं वाञ्छति।

दिल्लीश्वरः—किमिति? तव पिता तस्मिंस्तु समये साभिमानं तावत्यैव सेनया प्रस्थितः, अधुना च सेनान्तरमपि वाञ्छति।

रामसिंहः—राजाधिराज! अवितर्कितमिदं सम्पन्नम्, त्रायतां महाराजः! [इति चक्षुषोर्जलं बभार]

अव०—कुमार! पत्रं लिख-यत् सम्प्रति सेना प्रेषयितुं न शक्यते।

राम०—विश्वम्भराधीश्वर! तातः सदा प्राणानगणयन श्रीमन्तमन्ववर्तत। देवादद्य प्राप्तसङ्कटश्चेद्रक्षणीयो महामान्यैः!

अव०—मम किं करणीयं तदहं वेवेद्मि!

राम०—[अधोमुखस्तूष्णीमवर्त्तत]

अव०—अप्यन्यदपि किञ्चित् तव पित्रा लिखितम्?

राम०—[अञ्जलिं बद्ध्वा] अस्ति किञ्चित्!

अव०—सपदि कथय! न मेऽवसरो बहु श्रोतुम्।

रामसिंहः—[अमुया भङ्ग्यैव हताशो मन्दमाह] आर्य्य! तातः

दुर्दमनीयौ=दुःखेन दमयितुं शक्यौ। अवशीकरणीयाविति यावत्। विनश्येत्=म्रियेत। साधु=शोभनम्।

अवितर्कितम्=अविचारितम्। बभार=दधार।

शिवं प्रत्यजानात्-यद् "दिल्लीं गतस्य भवतो न काऽपि विपद् भविष्यति, कुशलेन च निवर्त्तयिष्यते"—इति।

दिल्लीश्वरः—तत् ?

राम०—वीरवर ! राजपुत्राणां प्रतिज्ञा मिथ्या न भवति-इति पालनमेतस्याः श्रीचरणानामधीनम्।

अव०—मृढा राजपुत्राः; यत् पराधीनेऽपि विषय एवं प्रतिजानन्ति !

राम०—[कटु-वचनमिदं विषमिव पीत्वाऽधोमुखः]

अव०—चेदेवं न भवेत् ?

राम०—तत आत्म-विसर्ज्जनमपि पित्रा प्रतिज्ञातम्।

अव०—अहो ! प्रतिज्ञा ! अहो बलम् ! [विचार्य्य] कुमार ! तव पित्रा सेनापति-कार्यं सम्पादितम्, साम्राज्य-कार्य्यञ्च मया सम्पादयिष्यते, नात्र वचनीयं किमपि बालेन भवता, गम्यताम्, वयं कार्य्यान्तरे सक्ताः। तदाकर्ण्य हतोत्साहो विवर्णः कुमार-रामसिंहः सादराऽऽचारं प्रतस्थे।

तावदुपातिष्ठत तुरगं नर्त्तयन्, दूरादेवाङ्गीकृत-पादचारः कृत-प्रणामः कुमार-मायाजिह्मः।

मायाजिह्मः—तात ! यो मां मम भगिनीञ्चापहृत्यापि स्वब-

प्रत्यजानात्=प्रतिज्ञातवान्।

आत्मविसर्जनम्=जीवनसमापनम्।

सम्पादयिष्यते=विधास्यते।

अङ्गीकृतपादचारः=स्वीकृतपादगमनः।

न्धुमिव रक्षितवान्; सादरञ्च प्रतियापितवान्: स एव शिवराजः प्रहरि-संवृतोऽस्ति—इति क्षुभ्यता हृदयेन स्वयमायातोऽस्मि, दयनीय एषः।

अव०—[विहस्य] स वां गृहीत्वाऽपि भयेन सत्कृतवान्, न तु सौहार्देन, जयसिंहेन चाऽऽक्रान्तः भवन्तौ भयेन दिल्लीं प्रेषितवान्, न तु सौहार्देन; अहञ्च तस्मिन् सदैव दये, किन्तु मूढोऽयं वन्यः, 'केन किमालपेदिति' संवृतोऽस्ति। स मर्य्यादां न भङ्क्ष्यति चेद् महाराष्ट्र-देशं कुशलेन यास्यति।

माया०—तात! एतद्देशीय-वायु-जलादिकं नानुकूलमेतस्य—इति प्रत्यहं शीर्य्यति, वैवर्ण्यञ्चाऽऽसादयति, तदेतस्मै स्वदेशे प्रतिनिवर्त्तितुमेवाऽऽज्ञा-दानेन दयनीयम्।

अव०—तदपि जाने, आसन्नोऽयमापाढमासः, नव-जलद-जलपूर-पूरिताः सहस्रशो नद्योऽजगरा इव सर्प्पिष्यन्ति। एते चाश्वयानाः, इमे दिल्लीतः प्रस्थिता नदी-प्रवाहे पतिताः स्रोतोभि-

---

अपहृत्य=चौर्येण वशमानीय। **प्रतियापितवान्**=प्रत्यावर्तितवान्। **प्रहरिसंवृतः**=यामिकरक्षितः। **क्षुभ्यता**=खिद्यता। **दयनीयः**=कृपार्हः।

सौहार्देन=मैत्र्या। **आक्रान्तः**=आक्रमणोद्देश्यीकृतः। **दये**=कृपां करोमि। **संवृतः**=गुप्तः। **भङ्क्ष्यति**=विनाशयिष्यति। **कुशलेन**=कल्याणेन।

शीर्यति=क्षीयते। **वैवर्ण्यम्**=विरङ्गत्वम्।

आसन्नः=समीपवर्त्ती। **नवजलदानाम्**=नूतनवारिधराणाम्, **जलपूरैः**=वारिप्रवाहैः, **पूरिताः**=भरिताः। **अजगरा इव**=विशालकायाः सर्पा इव। **सर्प्पिष्यन्ति**=गमिष्यन्ति। **अश्वयानाः**=घोटकवाहनाः। **स्रोतोभिः**=

नीताश्चेन्नङ्क्ष्यन्ति, तीरेषूषिताश्चेज्जल-पात-पीडिता ज्वरग्रस्ताः शोचनीयां दशां यास्यन्ति । मार्गेषु वैद्यमलभमानाः पश्चात्ताप-तप्ताः को जानाति कां दशामापद्येरन् ! अत्र च मासेन वायु-जलमनुकूलमिव ज्ञास्यते, ज्वरादि-सम्भवे च राजवैद्याश्चिकित्सां विधास्यन्ति, चातुर्म्मास्यानन्तरञ्च सुखेन स्वदेशं यास्यन्ति ।

माया०—तात ! अथ किमित्येष प्रहरि-बन्धः ?

अव०—वत्स ! जानीषे-एष धूर्तो मूर्खश्च । मूर्खतया राजसभायां किमपि अजल्पः यथा तस्य राजदर्शनं निषिद्धम् । धूर्त्ततया चैष कैश्चित् कपट-संन्यासिभिरालपतीति श्रूयते । तत एष प्रहरि-बन्धः । त्वं मम बाह्यं जीवनमपि नीति-विरुद्धमाचरेः : तत् त्वां राजधर्ममासाद्यावश्यं दण्डयेयम्, कस्तत्र वराकः पार्वतोन्दुरुः ? योऽहं राजधर्म्मं पालयितुं सहोदरान् कथावशेषानकरवम् ; यान् स्मारं स्मारं रोदिमि; यश्चाहं लालक-पालकं पितरमपि राजधर्म्ममेवाङ्गीकृत्य निगड-बद्धमकार्षम् : यत्संवाद-श्रवणेन विदीर्य्यते हृदयम् : स एवाहं जघन्यस्य वन्यस्य शिवस्यार्थे राज-

---

धाराभिः । **नङ्क्ष्यन्ति**=विनाशं यास्यन्ति । **तीरेषु**=तटेषु । **उषिताः**=कृतवासाः । **पश्चात्तापतप्ताः**=अनुतापखिन्नाः । **आपद्येरन्**=प्राप्नुवीरन् ।

प्रहरिबन्धः=यामिकावरोधः ।

बाह्यम्=बहिर्भवम् । **जीवनम्**=प्राणनम् । द्वितीय आत्मेत्यर्थः । परमस्नेहीति यावत् । **नीतिविरुद्धम्**=राजनियमाननुकूलम् ॥

सहोदरान्=भ्रातॄन् । **कथावशेषान्**=कथामात्रेणावशिष्टान् । **लालकम्**=भ्रमव्यवहारकम्, **पालकम्**=रक्षितारम् । **निगडबद्धम्**=शृङ्खलायन्त्रितम् । **जघन्यस्य**=नीचस्य ।

धर्म्मन्न त्यक्ष्यामि। नैतेषु राजकार्य्येषु तव हस्त-क्षेपाधिकारः।

एवं कथयन्नेव मेष-महिषादि-युद्धं प्रस्तुतमिति संवादं प्राप्य, सजयध्वनि समुत्थाय, सौवर्ण-कौशेय-पटावृतं रत्ननिचय-चञ्च-च्चाकचक्यं नरयानमारुह्य, सत्वर-सत्वरं धावद्भिश्छत्र-चामर-कनक-दण्डादि-मण्डित-करैरात्रियमाणस्ततः प्रतस्थे।

इतो महाराष्ट्रराजोऽपि सर्वमेतदाकर्ण्य चिन्तया शोकेन तापेन कोपेन च वीचि-भङ्गैरिव विविध-भाव-भङ्गैः पारावार इव क्षुब्धः, भूषणेन बहुशः संवर्द्धितोत्साहः, गौरेण माल्यश्रीकेण च गुप्तं सम्मन्त्र्य, पूर्व-प्राप्तानामादेश-पत्राणामेवैकं दत्वा, "एवमिद-मेवमिदमिति" बहूक्त्वा मथुरां प्रति भूषणकविमपि प्रास्थापयत्।

दिल्ली-नगर-वास्तव्याः सर्वेऽपि सज्जना गृहे गृहे चत्वरे चत्वरे सरणौ सरणौ विपणौ विपणौ कर्ण कर्णे प्रतिकथं प्रतिप्रस्तावं प्रतिकिंवदन्ति प्रत्याभाणकञ्च महाराष्ट्रेश्वरदिल्लीश्वरयोराचारमे-वाऽऽलोचन्ते स्म।

संवादम्=समाचारम्। **सौवर्णकौशेयपटावृतम्**=सुवर्णतन्तुपट्टसूत्रनि-र्मितवसनाच्छन्नम। **प्रतस्थे**=चचाल।

वीचिभङ्गैरिव=लहरिभङ्गैरिव। **विविधैः**=अनेकप्रकारैः, **भावभङ्गैः**=विचारच्छेदैः। पारावार इवेत्युपमा। समुच्चयोऽप्यत्रालङ्कारो द्रष्टव्यः। **प्रास्थाप-यत्**=प्राचालयत्।

सरणौ=मार्गे। **विपणौ**=आपणमार्गे। **प्रतिकथम्**=कथां कथां प्रति। **प्रतिकिंवदन्ति**=प्रतिजनश्रुति। "किंवदन्ती जनश्रुतिरि"त्यमरः। **प्रत्याभा-णकम्**=प्रतिसदृष्टान्तकलघुवचनम्। **आलोचन्ते स्म**=विचारयन्ति स्म।

तत्र हि केचन-'आः ! कदर्यमाचरितं दिल्लीवल्लभेन' इति ; कतिचन, 'कष्टं भोः ! कष्टं यन्नामश्रवणेनापि गर्भानपीपतन् यवन-सीमन्तिन्यः; सोऽयं मुद्रा-पञ्चक-वेतनैः प्रहरि-हतकै रुद्धः' इति ; इतरे, 'जातोऽत्र नीति-निष्णातस्यापि भ्रमो यदेष ईदृशं प्रत्यगात्' इति; अपरे, 'इयमपि काचन ग्रह-दशा भुज्यते शिवराजेन, कथम-न्यथा शार्दूल-पराक्रमोऽपि निगृहीतः स्यात् शशकायितैः'इति; अन्ये च 'सत्यं ग्रह-दशा, क्षयते रुग्णोऽपि महाराष्ट्रराजः'-इति प्रोचुः ।

महाराष्ट्रराजाध्युषित-हर्म्यस्य द्वारे राजकीयाः प्रहरिणः, तदन्त-र्द्वितीय-द्वारे महाराष्ट्र-प्रहरिणः । प्रथम-द्वारं प्रविष्टा अपि द्वितीय-द्वारे रुध्यन्ते, ततोऽपि सूचित-स्वाभिप्रायाः प्राप्ततदाज्ञाः पारयन्ति प्रवेष्टुम् ।

नगरेऽद्य महान् कलकलः, मार्गे मार्गे शृङ्गाटके शृङ्गाटके भेरीनादः । गृहे गृहे शृङ्गारः । पथिषु यानानां पादचारिणाञ्च महासम्बाधः । किमिदं किमिदमिति निश्चित्य ज्ञातं, यद्—यव-नानां कश्चन वार्षिकः पर्वसमयः । स्थाने स्थाने कदलीस्तम्भ-रचना, स्थाने स्थाने च पिपासितेभ्यो हिमोपल-शीतलं सितोपल-जलं

कदर्य्यम्=नीचतापूर्णम् । अपीपतन्=अदीध्वंसन्। यवनसीमन्तिन्यः= म्लेच्छरमण्यः । अत्र=अस्मिन् विषये । नीतिनिष्णातस्यापि=राजनीतिपण्डि-तस्यापि । प्रत्यगात्=प्रत्यगच्छत् । शार्दूलपराक्रमः=सिंहबलः । शशका-यितैः=शशकतुल्यैः । क्षयते=क्षीणो भवति । रुग्णः=रोगाक्रान्तः ।

शृङ्गाटके शृङ्गाटके=प्रतिचतुष्पथम् । महासम्बाधः=महान् सम्मर्दः। पर्वसमयः=उत्सवसमयः । हिमोपलशीतलम्=दृढीकृतजलशीतलम् ।

प्राप्यते। महाराष्ट्रराजस्य हर्म्य-द्वारि प्रतिसायं बहवो भिक्षुकाः, सन्न्यासिनः, पङ्गवः, खञ्जाः, एडाः, कुब्जाः, अन्धाश्च, एकत्र भवन्ति। येभ्यः प्रत्यहमन्नं वितीर्य्यते महाराष्ट्रपतिना। किन्तु समयोऽयं दिल्ली-नगरे यवनानां महामहोत्सवस्येति न शक्यते निरवकाशे तस्मिन् घण्टापथे भिक्षुकमण्डली-निवेशः—इति कोटपालेन सूचितं यत्—"षड् दिनानि यावन्मार्गोपरोधो न विधेयः, भिक्षुकेभ्यः किमपि भोज्यादि देयञ्चेद् नगराद्बहिर्यमुनातटे भृत्यद्वारा प्रेष्यम्, तत्रैव च वितरणीयम्!"

आज्ञामेतामाप्यातितरां प्रासीदन् महाराष्ट्र-वीराः।

महाराष्ट्रराजो रोगग्रस्त इत्याकलय्य च मुमुदिरे द्विषः। भिक्षुकाश्च प्रत्यहं यमुनातट एव, शष्कुलीः, अपूपान्, मोदकान्, पेटाः, इण्डरिकाश्च, प्राप्य परःसहस्रैराशीराशिभिः समवर्द्धयन्। एकदा भृत्य-वेषेण गौरसिंहः स्वयमपि मध्यभागालम्बि-मिष्टान्न-पेटाव-लम्ब-दण्डाग्रमेकतः स्कन्धे कृत्वा, अपर-प्रान्त-लग्न-स्कन्धेन भृत्येन

हिमोपलः="बर्फ"इति लोके। सितोपलजलम्=शर्करामिश्रं वारि। पङ्गवः=जङ्घाहीनाः। "श्रोणः पङ्गाविति"त्यमरः। खञ्जाः=खोडाः। एडाः=बधिराः। कुब्जाः=गडुलाः। अन्धाः=नेत्रशून्याः। प्रत्यहम्=प्रतिदिनम्। निरवकाशे=जनसम्मर्दपूरिते। भिक्षुकमण्डलीनिवेशः=याचकसमूहस्थितिः। मार्गोपरोधः=सरणिप्रतिबन्धः। वितरणीयम्=विभजनीयम्।

शष्कुलीः=पूरिकाः। अपूपान्=पूपान्। "पूपोऽपूपः पिष्टकः स्यादि"त्यमरः। मोदकान्=लड्डुकान्। पेटाः="पेडा"इति ख्याताः। इण्डरिकाः="बड़ी"इति ख्याताः। मध्यभागालम्बिन्याः, मिष्टान्नपेटायाः, अवलम्बस्य=आधा-

मह कालिन्दी-तटमागत्य, पञ्जराद्बहिर्निर्गतः कीर इव निश्चम्य, भिक्षुकेभ्यो भोज्यमर्पयितुमारब्धवान् । तस्मिन्नन्धकार-मिश्रिते वारुणी-चुम्बनेन मत्तस्येव मार्त्तण्डस्य, कोमले प्रकाशे केनापि "राघवाचार्य्यस्याऽऽशीर्य्यत्र-वेष्टनमिदं पठित्वा राज्ञे देयम"—इत्युक्त्वा हस्ते समर्पितं चतुःपञ्चकृत्वश्च भुग्नितं रक्त-सूत्र-वेष्टितं भूर्जत्वक्-पत्रकं दृष्टम , केन दत्तमिति विचिन्वन्नपि तमपरिचिन्वन , तूष्णीं तत् कक्षि-गुटिकायां संस्थाप्य परावृत्तः । स्ववास-स्थानमागत्य, अतिरहस्यम , ऊर्द्ध्वतन-गृहमाश्रित्य, महाराजमाहूय, अनन्यश्रावं पत्रमेवमपठत—

"विजयोऽस्तु महाराजस्य ! महाराष्ट्र-देशाद् दिल्ली-पर्य्यन्तं सहस्रशो भावत्का वीरा विविध-वेषैः सञ्चरन्ति । दिल्ली-नगरमपि महस्रशः प्रविष्टाः सन्ति, यमुनायां शतशो नावो युष्मदीयैर्गुप्त-भटैः पूरिता मथुरातो दिल्ली-पर्य्यन्तं प्रत्यहं सर्पन्ति । चत्वारि दिनानि यावत् सुभगो दिल्ली-त्यागावसरः" ।

सर्वमेतदाकर्ण्य, राघवाचार्य्यं कञ्चन निजं परमहितैषिणं

रस्य, दण्डस्य, अग्रम् । **अपरप्रान्ते**=द्वितीयभागे, लग्नं स्कन्धं यस्य तेन । **अर्पयितुम्**=दातुम् । **वारुणीचुम्बनेन**=मदिरापानेन, सूर्यपक्षे पश्चिमासम्पर्केण । **मत्तस्य**=मदाघूर्णितस्य । **कोमले**=मृदुनि । **भुग्नितम्**=न्युब्जीकृतम् । भूर्जत्वचि लिखितं पत्रकम् । **अपरिचिन्वन्**=अनध्यवस्यन् । **अतिरहस्यम्**=नितान्तं गुप्तम् । **अनन्यश्राव्यम्**=अनितरश्रवणार्हम् ।

सञ्चरन्ति=भ्रमन्ति । युष्माकमेभिः, युष्मदीयैः । **सर्पन्ति**=गच्छन्ति । **सुभगः**=शोभनः ।

मन्यमानौ तौ माल्यश्रीकमप्याकार्य्य, एवमेवमिति बहुशः समालपितवन्तौ। परतो महाराष्ट्रराजेनोक्तम्—"परश्वस्तर्हि" ! ताभ्यामयुक्तम्—"आम्! परश्वः, भगवति भास्करे पश्चिम-समुद्रं स्पृशति"। एवं ते स्थिरयित्वा सोपान-परम्परयाऽवरुह्य भोजनादि-व्यापारं परिसमाप्य पर्य्यङ्कमारूढाः। यातयामा यामिनी, अस्मिन्नपि समये नगरे महानेव वादित्रध्वनिः। तावदकस्मादेकेन महाराष्ट्र-भृत्येन त्वरितैः पदैः सोपानमारुह्य, अस्मिन् गृहे प्रविश्य, अञ्जलिं बद्ध्वा कथितम्—महाराज ! प्रतिष्ठित इव कश्चन पञ्चाशद्वर्षदेशीयो यवनः शिबिकामारुह्य समायातोऽस्ति। भवनेऽस्मिन् प्रविशन्नस्माभिः पृष्टश्च—"सम्राट्-प्रेषितोऽस्मि चिकित्सितुं महाराष्ट्रराजम्, वैद्योऽहम्"—इति वदन्, सप्रौढि प्रविशति, तदत्र प्रभुचरणा एव प्रमाणम्। तदाकर्ण्य यावदुत्तरं चिन्तयति महाराष्ट्र-वसुधाधवस्तावदप्राप्तोत्तर एव पादत्राण-पटापटाभिः सोपानपङ्क्तीर्ध्वनयन् प्रविवेश यवन-चिकित्सकः।

ततः सर्वेऽपि तदभिमुखा ददृशुः; यदेकः पिचण्डिलः, दृढस्नायुः,

परश्वः="परसो"इति, लोकेऽपभ्रंशीभूतम्। पश्चिमसमुद्रम्=वारुणवारिधिम्। स्पृशति=चुम्बति। सूर्यास्तमनवेलयामिति यावत्। स्थिरयित्वा=निश्चित्य। अवरुह्य=नीचैरागत्य। पर्य्यङ्कमारूढाः, सुप्ताः। वादित्रध्वनिः=नृत्यवाद्यकोलाहलः। प्रतिष्ठितः=मर्य्यादाशाली। प्रविशन्=आगच्छन्। चिकित्सितुम्=नीरोगीकर्त्तुम्। सप्रौढि=सगर्वम्। महाराष्ट्रवसुधायाः, धवः=पतिः। अप्राप्तोत्तरः=अलब्धप्रतिवचनः। पादत्राणपटपटाभिः=उपानत्पटपटाशब्दैः। ध्वनयन्=शब्दयन्।

ज्वलन्नयन-युगारोपित-राजत-शलाकाऽधिक-चाकचक्य-चमत्कृतोपनेत्रः, हरित-कौशेयोष्णीष-शिरस्कः, आनाभिविलम्बमान-सित-कृष्ण-सान्द्र-कूर्चः, कर्णान्त-दीर्घ-श्मश्रु-द्वयः, हरितकञ्चुकः, सुदीर्घ-पाण्डुराधोवसनः, कर-कलित-पुष्ट-यष्टिकः, "कुत्र महाराष्ट्रराजः ? को रोगः ?" इत्याम्रेडयन् यवनचिकित्सकः प्रविष्टः । तत्पृष्ठलग्न एव चैको द्वाविंशति-वर्षकल्पो यवन-युवकोऽपि कक्ष-स्थापित-श्याम-मञ्जूषः प्रविष्टः-इति ।

अथोत्थाय माल्यश्रीक-गौरसिंहाभ्यां स चिकित्सको राजपल्यङ्क-समीप उपवेशितो राज्ञो मस्तकं स्पृशन पृष्टवान, 'को रोगः ?'—इति । ततस्तेषामेवमभूवन्नालापाः ।

महाराष्ट्रराजः—चिकित्सक ! प्रत्यक्षतो न ज्ञायते को रोगः ? किन्तु क्षुधा हसते, अङ्गानि च निर्बलानि भवन्ति ।

पिचण्डिलः=दीर्घोदरः । **दृढस्नायुः**=पुष्टवल्लसः । **ज्वलन्नयनयुगे**=प्रदीप्तनेत्रद्वितये, **आरोपितम्**, **राजतशलाकया**=रजतोपनेत्रदण्डेन, **अधिक-चाकचक्येन**, **चमत्कृतम्**, **उपनेत्रम्**="चश्मा"इति ख्यातम्, यस्य सः । हरितम्, **कौशेयम्**, **उष्णीषम्**, **शिरसि** यस्य सः । "शेषाद्विभाषा" । आनाभि विलम्बमानम्, सितकृष्णम्, सान्द्रम्, कूर्चं यस्य सः । मध्यमे वयसि वर्त्तमान इति दाढिका न पूर्णतया श्वैत्यमभजत । कर्णान्तदीर्घम्, श्मश्रुद्वयं यस्य सः । सुदीर्घम्, पाण्डुरम्, **अधोवसनम्**="लुंगी"इति ख्यातं यस्य सः । करे कलिता पुष्टा **यष्टिका**=लघुदण्डः, येन सः । कक्षे स्थापिता श्यामा **मञ्जूषा**=पेटा, येन सः । **राज्ञः पल्यङ्कस्य**=पर्य्यङ्कस्य, समीपे ।

क्षुधा=बुभुक्षा । "आपं चैव हलन्तानामि"ति भागुरिमतेनेदम् ।

चिकित्सकः—[चक्षुषी सम्मील्य द्वयोरपि करयोर्नाडीश्चतसृभिरङ्गुलिभिः परीक्ष्य] नाड्यः शुद्धाः, मन्ये स्वतन्त्रतामपहाय, परवान् संवृत्तः—इति चिन्तारोगोऽयम् ।

महाराष्ट्रराजः—[तस्य तेजस्विमुखमण्डलं निपुणं निरीक्षमाणः] सत्यमन्येऽपि चिकित्सका एवमेव वदन्ति । किन्तु न जाने कीदृशोऽयं रोगो यज्ज्वलयत्यङ्गानि ।

चिकित्सकः—औषधं ददामि ।

महा०—अलं क्लेशेन ! न वयं यवन-स्पृष्टमगदमङ्गीकुर्म्मः, भवानेवं कष्टमूरीकृत्य श्रान्तवानिति गृह्यतामेषः स्वल्प उपहारः, इत्युङ्गुलीयकमार्पयत् ।

माल्यश्रीकः—राजचिकित्सक ! तथ्यं ब्रूते महाराष्ट्रराजः, नैतस्य कुले केनापि यवनौषधं गृहीतम् । एतस्य समीपमायाताः सर्वेऽपि गुणिनो यथोचितैरुपहारैः सत्क्रियन्ते, तद् गृह्यतामेतत्समयानुरूपमुपायनम् ।

चिकित्सकः—[अङ्गुलीयकं हस्तेन संस्पृश्य] धन्या वदान्यता तत्रभवतः ! न वयं दिल्ली-वल्लभ-पाणि-पल्लव-तल्लज-लालिताः परदत्तं कारु-कोपमपीहामहे, न वा चिकित्सा-विषयेषु रोगिणां

द्वयोरपि करयोः, यवनचिकित्साशास्त्रे द्वयोरपि करयोर्नाडीपरीक्षा भवति, वातपित्तकफरक्ताख्याश्चत्वारो धातवश्च सन्ति । तन्नये चतसृभिरङ्गुलिभिः परीक्ष्यन्ते रोगिण इति वेदितव्यम् ।

अगदम्=औषधम् । उपहारः=उपायनम् । आर्पयत्=दत्तवान् ।

वदान्यता=दानप्रवणता । कारुकोषम्=कारुनिधिम् । कारुनामा कश्चन

सम्मतिमपेक्षामहे, तत्रापि भवतश्चिकित्सनाय प्रबला राज्ञामाज्ञा. तत्क्षम्यताम्, [इति वक्षः समस्पृशत्] [महाराजोऽन्तरेव कोपेन जाज्वल्यमानः स्वभावविकारं गोपयन् समतिष्ठत]

गौरः—किं निर्णीतं भवता ?

चिकित्सकः-यन्निर्णीतं तस्य प्रतीकारं विदधामि। आविद ! आविद !! मञ्जूषामुद्घाटय ! औषधं पाययित्वा क्षणेन नीरोगं विधास्यामि महाराजम्। [तदनुचरः पेटापिधानमुदतूतुलत्, चिकित्सकश्चैकस्मिन् काच-पात्रे निर्मल-जलमिव किञ्चन द्रवकमापूर्य्य तस्मिन् श्वेतं चूर्णमेकं मेलयितुमारेभे]

महाराजः—किमिदमौषधम् ?

चिकित्सकः—आम्, पीयूष-हालाहलं नामौषधम्।

माल्यश्रीकः—पीयूष-हालाहलम् ?

चिकित्सकः—आम् ! पीयूष-हालाहलम्, कफ-वात-पित्त-प्रकोपजो रोगश्चेदिदं पीयूषं क्षणेनोल्लाघं विदधाति। पलायितुकामानां प्रवञ्चनामात्रं चेद् 'हालाहलम्' क्षणेन विनाशयति।

ततो निश्चितं विषमिदमिति मन्यमानाः सर्वे परस्परमवालूलुकन्। तावदेष अङ्गुल्यग्रेण तोयमावर्त्त्य, चूर्णं मेलयित्वा समीपमा-

---

महाधनिका यवनदेशे जातो यन्नाम्ना "कारूं का खजाना" इति प्रसिद्धन्तेषु।

प्रतीकारम्=उपायम्। आविद ! =सहचरं नाम्ना सम्बोधयति। पेटायाः पिधानम्=मुखम्। "पिहान" इति हिन्दी। द्रवकम्=रसम्।

पीयूषहालाहलम्=अमृतविषम्। नतु विषामृतम्।

उल्लाघम्=नीरोगम्। प्रवञ्चनामात्रम्=प्रतारणामात्रम्।

नयत्। महाराजस्तु तस्य तादृश-वचन-भङ्गी-श्रवणे क्रमतो विवृद्ध-मन्युः साम्प्रतं यवन-स्पृष्ट-पानीय-पानमचिकीर्षुः प्रत्यक्षं गरल-जलं पाययति-इति ज्वालयेव ज्वलितो मुख-समीपमानीयमानं सपात्रं चिकित्सक-हस्तं तथा समताडयत् : यथा तत् काच-पात्रं समुच्छलितं कुड्याहतं शतधा समभूत्, तदाहति-विस्मितप्रायस्य च चिकित्सकस्य शिरसि दृढं चपेटमेकमाहत्य, "शास्तिरियं रोगिभिः सह क्ष्वेलायाः"-इति कथयन्, क्रूर्चं गृहीत्वा बलेन चकर्ष। ततश्च गौरसिंहोऽपि पृष्ठतो बाहुमूलं धृत्वा तं सुदूरं जघर्ष।

अथ महाराजस्तस्य कृत्रिम-क्रूर्चं स्वहस्तेनोत्पाटितम्, तञ्च घृष्य-माणमपि सखिलखिला-शब्दं हसन्तं दृष्ट्वा किमिदमिति सावधान-तया तमालुलोके, ददर्श च यत्—स्वस्य बाल्य-मित्रं प्रसिद्धो योद्धा श्रीमान् मुरेश्वरोऽस्तीति।

ततो महाराज उत्थाय तं गाढमालिलिङ्ग। ततस्तथैव माल्य-श्रीकः, गौरसिंहश्च परिषस्वजे। ततो महाराजाऽऽदेशेन सर्व उपविष्टाः।

ततो विहस्य मुरेश्वरेण कथितम्—प्रभो! शिरःशिरासु महती

विवृद्धमन्युः=प्रवृद्धकोपः। यवनस्पृष्टस्य, **पानीयस्य**=वारिणः, पानम्। **गरलजलम्**=विषमिश्रवारि। **समुच्छलितम्**=सम्पतितम्। **तदाहत्या**=तत्ता-डनेन, **विस्मितप्रायस्य**=साश्चर्यस्य। **चपेटम्**=प्रसृतं करतलम्। **शास्तिः**=दण्डनम्। **क्ष्वेलायाः**=नर्मक्रीडायाः। **चकर्ष**=कृष्टवान्। **जघर्ष**=घृष्टवान्।

आलुलोके=ददर्श। **बाल्यमित्रम्**=शैशवसहचरम्।

परिषस्वजे=आलिलिङ्ग। **महाराजादेशेन**=महाराजाज्ञया।

वेदना, तत्किं विश्वेभ्योऽपि चिकित्सकेभ्य ईदृश्येव चपेट-दक्षिणा दीयते ? माल्यश्रीक आह—'फलमिदं सिंहैः सह क्रीडायाः' । महाराष्ट्रराजोऽपि मन्दं विहस्य, किमपि नावोचत् । ततः सञ्जाते पारस्परिक-कुशल-प्रश्नादि-कलापे, मुरेश्वरः समवादीत्—

महाराज ! विद्मो वयं निखिलामत्रत्यां घटनाम्, न सा पुनर्वचनीया। महाराष्ट्र-देशाद् दिल्ली-पर्य्यन्तं प्रतिक्रोशान्तरालञ्चाऽऽस्माकीना निवसन्ति । धावित्वा परस्परं क्रमतः संवादं वदन्तः, पत्रं चाऽर्पयन्तः सत्वरं महाराष्ट्र-देशं भवद्विषये विदिततत्त्वं कुर्वन्ति !

आकर्ण्य भट्टारकस्य निग्रह-वृत्तान्तम् : पारावार इव वाडवेन, कोप-कृपीटयोनिना क्षुब्धो महाराष्ट्रदेशः । सर्वोऽपि दिल्लीं दिधक्षन्निव, चिचर्वयिषन्निव चुचूर्णयिषन्निव लुलुण्ठयिषन्निव च क्रोध-जरा-जर्जरीभूतो भावत्कः । न जाने-किमिति भवतः स्वदेशं प्रतिनिवर्त्तितुमिच्छैव न भवति ? अन्यथा गरुडस्येव, समीरणस्येव,

---

शिरःशिरासु=मस्तकनाडीषु । **वेदना**=पीडा । **विश्वेभ्यः**=समस्तेभ्यः । **चपेटदक्षिणा**=करतलदक्षिणा । **पारस्परिकाणाम्**=आन्योन्यानाम्, कुशल-प्रश्नादीनाम, **कलापे**=समूहे ।

अत्रत्याम्=इह भवाम् । **प्रतिक्रोशान्तराले**=क्रोशात्क्रोशादूर्द्धम् । **धावित्वा**=त्वरया गत्वा । **विदिततत्त्वम्**=अवगतार्थम् ।

भट्टारकस्य=स्वामिनः । **पारावार इव**=सागर इव । **वाडवेन**=वडवामुखोत्थेनानलेन । **कोप एव कृपीटयोनिः**=ज्वलनः, तेन । **दिधक्षन्निव**=दग्धुमिच्छन्निव । **चिचर्वयिषन्**=चर्वयितुमिच्छन्। **चुचूर्णयिषन्**=चूर्णयितुमभिलषन्। **लुलुण्ठयिषन्**=लुण्ठयितुमिच्छन्। **क्रोध एव जरा**=वृद्धता, तया **जर्जरीभूतः**=निस्तत्वीभूतः । **गरुडस्येव**=वैनतेयस्येव । **समीरणस्येव**=वायो-

मनस इव च, को नाम शक्तः श्रीमतो गतिमवरोद्धुम् ? तत्साम्प्रतं यवनानां कश्चनोत्सवसमयः—इत्यवसरोऽयं प्रस्थानस्य। यद्यपि दिल्लीश्वरः शून्यमतावलम्बीति न तादृशोऽत्राऽऽडम्बरो मोहरमोत्सवस्य, तथाऽपि पर्य्याप्तोऽस्मत्कार्य्य-सम्पादनायेति न विलम्ब्यताम्।

ततो महाराजेन यत्स्थिरीकृतमासीत् ; तदखिलं कर्णे प्रोक्तम्। तेनापि बहुशः कथयित्वा श्रुत्वा च किञ्चिद् विचार्य्येव कथितम्—

"वरम्, यमुनाया अनुतीरं गच्छत एव पथः पार्श्वे पर्कटिपलाशिनस्तले सत्त्वर-गामिनः पञ्चषा हया द्रक्ष्यन्ते। तेषां नियन्ता पृष्टो दक्षं कर्णं संस्पृश्य, किमपि वदेच्चेत्स्वार्थं ते बोद्धव्या आरोढव्याश्च, मथुरां प्रति धावयितव्याः। मार्गेऽपि च ये सदक्ष-कर्णस्पर्शं श्रीमत्सान्मुखीना भवेयुः; तेऽपि स्वकीया एव निश्चेतव्याः। घोटकानां कशाश्च प्रायो दण्डरूपा एव लक्ष्यन्ते। तेषामग्रं सञ्चाल्याऽऽकृष्येत चेच्छुरिका वहिर्भवेयुः। परिवर्त्त्य ता एव पुनर्दण्डाग्रेषु योज्येरंश्चेद् भद्राः सम्पद्येरन्-इति। को जानीते कीदृशी घटना घटेत पथि।"

रिव। **मनस इव**=चेतस इव। **शून्यमतालम्बी**="सुन्नी" इति ख्यातः। बौद्धीयं शून्यमतमेव यावनक्षत्रियेषु "सुन्न" इति ख्यातमिति हार्दम्। **मोहरमोत्सवस्य**="मुहर्रम"इति ख्यातस्योद्धवस्य।

अनुतीरम्=अनुतटम्। **पर्कटिपलाशिनः**=प्लक्षवृक्षस्य। **सत्वरगामिनः**=शीघ्रगतयः। **नियन्ता**=सारथिः, सूतः, प्रकृते रक्षकः। **स्वार्थम्**=स्वस्मै प्रयोजनाय। **बोद्धव्याः**=ज्ञातव्याः। **श्रीमत्सान्मुखीनाः**=भवत्पुरः स्थिताः। **निश्चेतव्याः**=निर्णेतव्याः। **कशाः**=अश्वताडिन्यः। **अग्रम्**=प्रान्तम्।

तदाकर्णयन्तो मध्य एव सर्वे "साधु साधु"-इति प्रोचुः, गुप्तं किमपि सम्मन्त्र्य च, "परश्वः सायम, परश्वः"-इति सहर्षं जगदुः।

अथोद्घाटितं कूर्चञ्च पुनः संयोज्य, उपनेत्रमासज्य, चिकित्सकेनोक्तम्-महाराज! ममौषधमङ्गीक्रियताम्! क्षणेन शान्तिर्भवित्री, चिकित्सा-प्रकरणे त्वार्य्यशास्त्रेऽपि स्पर्शदोषो नास्त्यूरीकृतः, पुनः पेयं रचयामि, किञ्चित् पीयताम्।

शिव०—प्राप्तोदयो महाराष्ट्रराजः! चिकित्सक! सत्यं सुधाकरोऽसि, तव कर-स्पर्शेन हीयते मे व्याधिः, प्रस्तूयताम्, अवश्यं पास्यामि!

तेन विहस्य मन्दमुक्तम्-"कथं न सुधाकरः, चन्द्रकान्तस्पर्शेऽपि रसं रचयेत्?" क्षणानन्तरं च पुनर्मन्दं सोत्प्रासेन गदितम्-"सुदुर्लभमिदमौषधम्। जलमिदं कलिन्द-गिरि-निर्झरस्य, चूर्णञ्चेदं शोषितस्य मधु-वंश-निर्य्यासस्य"।

सञ्चाल्य="घुमा कर" इति हिन्दी। **योज्येरन्**=मेल्येरन्। **घटेत**=सम्भवेत्।

आर्यशास्त्रे=हिन्दूधर्मग्रन्थे। **पेयम्**=पातव्यम्।

सुधाकरः=पीयूषपाणिः। पक्षे चन्द्रः। **करस्पर्शेन**=हस्तस्पर्शेन, किरणसंसर्गेण च। **हीयते**=नश्यति, प्रेर्यते।

सुधाकरः=शशी। चन्द्रवत्कान्तस्य=शशितुल्यकान्तेः, **स्पर्शे**=संसर्गे। चन्द्रकान्तमणेः संसर्गे च। **रसम्**=द्रवात्मकमौषधम्-वारि च। **कलिन्दगिरिनिर्झरस्य**=कलिन्दोद्भूतप्रवाहस्य, यमुनाया इति वाच्योऽर्थः। **शोषितस्य**=शुष्कतां नीतस्य। **मधुवंशनिर्यासस्य**, मधुवंशः=इक्षुदण्डः, तन्निर्यासस्य=तद्रसस्य। मधुनः वंशनिर्यासस्य=वंशलोचनस्येति चार्थः।

ततः स्मित्वा माल्यश्रीकेणोक्तम्–"स्पष्टं किन्नोच्यते––यदिदं यमुना–जलम् , इयञ्च सिता"–इति।

ततः सर्वे मन्दं जहसुः।

महाराष्ट्रराजस्तु सिता–मधुरं कलिन्द–नन्दिनी–नीरं पीत्वा मुमुदेतमाम्।

अथोत्थाय चिकित्सकः प्रोवाच—"गच्छाम्यहम् , पर्य्याप्तं ममौषधं वारमेकमेव सेवनेन गद–नदमपि शोषयितुम् , तदल्ला–कृपया परश्व एव भवांस्तथा प्रबलो नीरोगश्च संवत्स्यति; यथा शक्ष्यति क्षणेन क्रोशानाजानेयेन धावितुम्"। ततः सर्वे–'तथाऽस्तु, तथाऽस्तु'–इति स्वीचक्रुः।

महाराजः स्वकीयं हीरक–हारं तस्य कण्ठे प्राक्षिपत्। सोऽपि प्रणमन् , सोपानमुत्तीर्णः, शिबिकामारोहन् , प्रहरिभिः पृष्टः—"का दशा महाराजस्य?" स उक्तवान्—"रोगः कठिन आसीत् , किन्तु तथा प्रतिकृतवानस्मि, यथा परश्व एव न लप्स्यते भवता रुग्णो महाराजः"।

मुमुदेतमाम्=अतितरां जहर्ष।

गदनदम्=रोगनिर्झरम्। अल्लायाः=महामायायाः कृपया। यवना ईश्वरं मन्यन्ते तत्पदार्थमिति प्रागेव विनिवेदितम्। क्रोशान्=बहुसङ्ख्याकान्। धावितुम्=त्वरितं गन्तुम्। लोकप्रसिद्धेन वैद्यानां कथनप्रकारेणानेन गूढेङ्गितमकार्षीत्।

हीरकहारम्=मौक्तिकमालाम्। प्रतिकृतवान्=चिकित्सितवान्। रुग्णो न लप्स्यते=नरोगो न प्राप्स्यते। नीरोग एव लप्स्यत इति शब्दार्थः। योऽसौ रुग्णः सेऽयं न लप्स्यते–न मिलिष्यति, पलायितत्वादिति यावत्।

ततो जन-प्रवाहे मिलिते तस्मिन्; प्रहरिणः परस्परमेव मालपन्—

एकः—गहनो रोग आसीत्, कथं क्षणेन शिथिलीकृत एतेन ?

द्वितीयः—अरे ! न जानीषे, सम्राजां चिकित्सकोऽयम् ।

तृतीयः—मन्ये, एतच्चिकित्सा-तुष्टेन महाराजेनैव हीरकहारोऽयमर्पितः । यः कन्धरेऽसौ लोल-लोलोऽवलोकितः ।

चतुर्थः—न वेत्सि रे ! महाराष्ट्रराजस्यौदार्य्यम्, यः प्रतिमज्जितस्थानं प्रत्यहं पकान्नानि प्रेषयति; यश्चास्मादृक्षाञ्छत्रुसेवकाननपि कूर्चिका-स्निग्ध-कूर्चान् इण्डरिका-पिचण्डिलांश्च विदधातिः किमाश्चर्य्यम् ? यदि स उपकारिणे चिकित्सकाय हारं दद्यात् ।

सर्वे—[शनैः] वर्द्धतां वर्द्धतां महाराजः !

परेऽहनि महाराष्ट्रराजस्योल्लाघतामाकलय्य, ऋते केभ्यश्चिन् सर्वेऽपि प्रसादमेवाऽऽकलयन् । महाराष्ट्रराजेन चाऽऽपणस्थानि

गहनः=कठिनः । **शिथिलीकृतः**=दुर्बलीकृतः ।

लोललोलः=अतिचञ्चलः ।

पकान्नानि=पूरिकापूपादीनि । "पकवान"इति हिन्दीप्रसिद्धोऽपभ्रंशतया ।

कूर्चिकया=क्षीरविकृत्या,

"दध्ना सह पयः पक्वं यत्तत्स्याद्दधिकूर्चिका ।
तक्रेण पक्वं यत्क्षीरं तन्नवेत्तक्रकूर्चिका ॥"

स्निग्धाः=चिक्कणीकृताः, कूर्चा येषां तान् । इण्डरिकाभिः, **पिचण्डिलान्**=तुन्दिलान् ।

सर्वाण्यपि पक्वान्नानि द्विगुण-मूल्यैः क्रीतानि, स्वाऽऽवसथमानाय्य च, महतीषु पेटास्वायोज्य, दिल्लीनगर-वास्तव्यानां भद्राणां गृहेषु प्रेषितानि। अद्य महाराष्ट्रराजस्योल्लाघतासूचिकेयं वृष्टिरिव पक्वान्नानां सञ्जाता। मज्जित-स्थानेषु च दधिकूर्चिका-नवनीत-सितापाक-प्रपातैः पङ्किलानि समभूवन् भूतलानि। यमुना-तटे चैकमन्यीयो यवसोटजं निर्म्मापितम्। तत्रैव शतशः पक्वान्न-पेटाः संस्थाप्य, सहस्रशो भिक्षुभ्यो मोदकशष्कुल्यपूप-यवागू-पिटकाऽऽमिक्षेण्डरिकादीनि वितीर्णानि। तेषु यथाशक्ति पक्वान्नभारानुत्थाप्य नीतवत्सु, परेषु पङ्क्तिन्धादिषु च तत्रैवोपविश्यानायासं भुक्तवत्सु; परिशिष्टं यमुनाजले मत्स्य-कच्छपादिभ्योऽपि वितीर्णम्। सायङ्काले भिक्षुभिरागन्तव्यम्, यथेष्टं दास्यते, उपवेश्य च भोजयिष्यते—इति-अवलोक्येमामुदारतां महाराष्ट्रराजस्य सर्वेऽपि यवना अयवनाश्च; मित्राणि शत्रवश्च, तं प्रशशंसुः।

अद्य रात्रौ दिल्ली-वास्तव्य-पक्वान्न-पाचकाः परेऽहन्यधिकं

उल्लाघताम्=नीरोगताम्। केभ्यश्चित्=दग्धहृदयेभ्यः। आपणस्थानि=विपणौ विक्रय्यानि। स्वावसथम्=स्वसदनम्। भद्राणाम्=श्रेष्ठानाम्। दधिकूर्चिकानाम्, नवनीतानाम्=हैयङ्गवीनानाम्, सितापाकानाम्=शर्करापाकितानाम्, कूष्माण्डादीनाञ्च पातैः=अत्यधिकपतनैः। पङ्किलानि=पिच्छिलानि। यवसोटजम्=यवसकुटीरम्। यवागूः=पिष्टमिश्रं जले पक्वम्। "लपसी" इति हिन्दी। पिटकम्="पेड़ा" इति ख्यातम्। आमिक्षा=तप्ते पयसि दध्यादिसंसर्गेण यद्विदीर्णं दुग्धं तत्। लोके "छेना" इति कथ्यते, वङ्गीयमिष्टान्नमूलभूतम्। इतरत्पूर्वव्याख्यातम्।

पक्तुमादिष्टाः, ते च, महति विक्रये महांल्लाभः-इति समस्तां रजनीं पक्वान्नानि प्रस्तुतवन्तः, चुल्हीं ज्वलयन्तः, कटाहेषु पौनःपुन्येन घृतमाश्यन्तः, पिष्टातक-द्रवैरपूपानि पाचयन्तः, दर्वीश्चालयन्तः, हस्ताभ्यां मोदकान् वर्त्तुलीकुर्वन्तः, रामठ-शृङ्गवेर-लवङ्गैला-लवण-मरिचाऽऽमोदित-सुस्वादु-चूर्ण-गर्भान् शृङ्गाटकान् सम्पादयन्तः, शष्कुलीनां घृतं च्योतयन्तः, यवागूश्चालयन्तः, हिङ्गूजीरक-लवण-राजिकामोदित-तक्रे वटकान् मज्जयन्तः, कूर्चिकासु शर्करा-सितोपल-मृद्वीका आलोडयन्तः, प्रातरेव पर्वतानिव पक्वान्नानां प्रस्तुतवन्तः । महासम्भारममुं स्वच्छानां भोजन-सामग्रीणामालोक्य मोहरमोत्सवानन्दिताः सहस्रशो नागरा अपि यथेष्टं चिक्रीयिरे । परिशिष्टञ्चाखिलं सामग्री-जातं महाराजाऽध्युषितप्रासादस्य चतसृष्वपि शालासु व्यापृतम् । पक्वान्न-समारोहमुमालो-

---

कटाहेषु=पूरिकानिर्माणभाजनेषु । घृतम्=सर्पिः । आश्यन्तः=क्षिपन्तः । पिष्टातकद्रवैः=अपूपनिर्माणार्थं पूर्वत एव रक्षितैः-मिष्टपिष्टमिश्रणैः । दर्वीः=पूरिकानिकालनभाजनानि । प्रकृते "छमौटा"इति हिन्दी । वर्त्तुलीकुर्वन्तः=गोलतां नयन्तः । रामठ शृङ्गवेर लवणैला-लवण मरिचैः, आमोदितम्=सुगन्धि कृतम्, सुस्वादु, चूर्णम्, गर्भे येषां तान् । रामठादयः पूर्वं व्याख्याताः । शृङ्गाटकान्= "सिघाटा, समोसा"इति लोके ख्यातान् । च्योतयन्तः=पातयन्तः । हिङ्गुजीरकलवणराजिकाभिः, आमोदिते=सुरभिते, तक्रे=आम्लदधि । राजिका="राई" इति लोके ख्याता । वटकान्="वड़ा,बारा"इति हिन्दी । मज्जयन्तः=बुडयन्तः । कूर्चिकासु=क्षीरविकृतिषु । आलोडयन्तः=सम्पात्य मथ्नन्तः । पर्वतानिव= गिरीनिव । उच्चतायामुपमिनोति । महासम्भारम्=विपुलैकत्रीकरणम् । चिक्रीयिरे=क्रीतवन्तः । सामग्रीजातम्=वस्तुव्रातम् । व्यापृतम्=संलग्नम् ।

क्य प्रहरिणः परस्परमेवमालापमकार्षुः ।

एकः--महामद ! उद्विग्नोऽस्मि; आलोकमालोकं प्रत्यहमेतमाडम्बरम् , कदाऽयं समाप्स्यति वितरण-कोलाहलः ?

महामदः--हसन ! विक्षिप्तोऽसि, एतस्यैव कोलाहलस्य प्रसादात् वयमपि यवागू-सर्पिःसिक्तं करतलं श्मश्रुषु प्रोञ्छामः, तत्कोऽयं हर्ष-समय उद्वेगः ! कसीम ! किञ्चिन्तयसि ?

कसीमः--अद्य चरमं दिनं वितरणस्येति श्रूयते ।

महा०--आः कष्टम् !! तन्मधुर-भाषणैस्तोषणीयो महाराजः, निर्गमन-प्रवेशेषु प्रायश्च नावरोद्धव्यो जनः; यथा तुष्टोऽत्रभवानधिकं प्रयच्छेत् ।

हसन०--अहो ! कोष्णानां कचौरीणां गन्धोऽसौ चपलयति मे रसनाम् ।

आडम्बरम्=सम्मर्दम् । वितरणकोलाहलः=दानकलकलः ।

विक्षिप्तोऽसि=मत्तोऽसि ।

प्रसादात्=कृपायाः । यवागूसर्पिषा, सिक्तम्=मिश्रम् । एवम्भूतप्रयोगेण यवागूशब्दस्य "हलुवा, मोहनभोग"इति प्रसिद्धेऽपि प्रवृत्तिनिमित्तं दर्शयति । उद्वेगः=विरागात्मकं शैथ्यम् । महामद-हसन-कसीमाः, नामानि भृत्यानाम् ।

तोषणीयः=प्रसन्नयितव्यः । निर्गमनप्रवेशेषु=गमनागमनेषु । प्रयच्छेत्=दद्यात् ।

कचौरीणाम्=घृतचौरीणाम् । प्रयोगोऽस्यान्यत्रापि मिलति-तद् यथा—

माणोदरी सुभगहिङ्गुसुवासयुक्ता धान्याम्बशुण्ठिमरिचादिभिरर्चिता च ।
कोष्णाऽमृतोपमरसा रसनाभिरामा हे हे कचौरि ! घृतचौरि ! नमो नमस्ते ॥

कसीमः--महामद ! हसन ! सतर्को भव, कोटपालोऽसौ समायाति।

अथ सर्वे भल्लमुद्यम्य स्तब्धग्रीवा इतश्चेतश्च पर्य्यटितुमारब्धवन्तः; यावद्रेचितकेनाश्वं चालयन् कोटपालो निवृत्तः।

दिनमिदं प्रधानं मोहरमोत्सवस्य, गृहे गृहे शोक-समाजः स्थाने स्थाने विलाप-गीति-गानम्, न कस्याप्यवसरोऽद्य विषयान्तरं सन्धातुम्, मोहरमोत्सवानुषङ्गिणां हरितैर्वस्त्रैर्दिल्ली हरितेवाभूत्। ज्वलयन्निवाखिलं भूवलयं ख-स्वस्तिकमासासाद भगवान्

इति मूलकारानुमोदिता टिप्पणी। घृतचौरीशब्दापभ्रंश एव लोके "कचौरी" इति प्रसिद्धः, प्रदर्शितं पश्यन्तु हास्यरसाश्रयत्वाच्छब्दानां पूर्णविचारमविधायैव निर्मितम्। अत एव कचौरि इति, घृतचौरि ! इति चोभयं सम्बोध्यमानं दृश्यत इति वेदितव्यम्। वस्तुतस्तु हिन्दीप्रभृतिषु प्रसिद्धा ये केचनापि शब्दा व्याकरणप्रक्रियया शुद्धाः सन्तः प्रयोज्याः। एवमेव सर्वासु भाषासु भवति। तथा च कचौरीशब्दस्य प्राक्रियिकस्य प्रयोज्यत्वे साधुत्वे च न लेशतोऽपि संशय इति प्रयोगादिप्रदर्शनं मन्दप्रयोजनमिति विवेचनापटवः।

रेचितकेन=अश्वगतिविशेषेण।

शोकसमाजः=शोकप्रदर्शनार्थमेकत्रीभवनम्। तद्दिने मोहमदनामा यवनधर्मप्रवर्त्तको मारित इति शोकाभिनयमयापि कुर्वन्ति। **विलापगीतेः**="मर्सिया" इति प्रसिद्धायाः, **गानम्**=गीतिः। **विषयान्तरम्**=कार्यान्तरम्। **सन्धातुम्**=विचारयितुम्। **मोहरमोत्सवस्य, अनुषङ्गिणाम्**=संसर्गिणाम्। **हरिता**=हरिद्वर्णवती। **ज्वलयन्निव**=दाहयन्निव। **खस्वस्तिकम्**=ज्यौतिषप्रसिद्धम्, स्थानविशेषम्। "स्वस्तिन इन्द्रो वृद्धश्रवा" इति मन्त्रवर्णे इन्द्रः पूषा तार्क्ष्यः बृह-

भास्वान्। होरा-चतुष्टयेन च गेहान् भ्राष्ट्रानिव सन्ताप्य, दिल्ली-नगर-वास्तव्यांश्च तल-गृहेषु प्रवेश्य, स्वयमपि ग्रीष्मात्तापितः सिष्णासुरिव, नास्य मम तेजसा क्षीयते किमपीति सरस्वन्तं शुशोषयिषुरिव, स्वतेजसा वाडवं विजिगीषुरिव, शेष-फणावली-ज्वाला-जाल-प्रचण्डतामालोकयितुं पातालं प्रविविक्षुरिव, पाश्चात्यान् पार-स्यारब्यादि-म्लेच्छदेशान् दिधक्षुरिव, अस्ताचल-निर्झर-शीतल-जलानि पिपासुरिव, वरुणदिशो नेदीयान् संवृत्तः।

अथ शनैः शनैरभूवन् छत्रमया दिल्ली-मार्गाः। सहस्रशः सेचकाः पृष्ठाऽऽरोपितैर्भस्त्रा-पूरितैर्जलभारैः 'अपसरापसरेति'

स्पतिः-इति चत्वारो देवाः श्रुताः। एतेषां प्रत्येकं मण्डलमाश्रित्य रेखासु कृतासु स्वस्तिकचिह्नं निष्पद्यते, यत्सर्वेषु माङ्गलिककृत्येषु बहोः कालादार्येर्व्यवहियते। अधुना शार्मण्यो जगद्विजयी हिटलरोऽपि स्वस्याऽऽर्यताप्रदर्शनाय स्वस्तिकं व्यवहरतीति शम्। **आससाद**=प्राप। **भ्राष्ट्रानिव**=अम्बरीषाणीव। **सन्ताप्य**=प्रज्वाल्य। **तलगृहेषु**=अन्तरालसदनेषु। **सिष्णासुरिव**=स्नातुमिच्छुरिव। **तेजसा**=प्रतापेन। घर्मेणेति यावत्। **सरस्वन्तम्**=सागरम्। "सरस्वान् सागरोऽर्णव"इत्यमरः। **शुशोषयिषुरिव**=शोषयितुमिच्छुरिव। **वाडवम्**=सामुद्रं दहनम्। **विजिगीषुरिव**=विजेतुमिच्छुरिव। **शेषफणावलीनाम्**=अनन्तस्फटामण्डलीनाम्, ज्वालाजालस्य, **प्रचण्डताम्**=तीक्ष्णताम्। **प्रविविक्षुरिव**=प्रवेष्टुमिच्छुरिव। **पाश्चात्त्यान्**=पश्चिमभवान्। **दिधक्षुरिव**=दग्धुमिच्छुरिव। **अस्ताचलनिर्झराणाम्**=चरमगिरिवारिप्रवाहाणाम्, **शीतलजलानि**=शिशिरवारीणि। **पिपासुरिव**=पातुमिच्छुरिव। सर्वत्रोत्प्रेक्षा। अनेकस्यैवानेकधोल्लेखादुल्लेखालङ्कारोऽपि। **वरुणदिशः**=पश्चिमायाः। **नेदीयान्**=निकटस्थितः।

पान्थानपसारमपसारं पथः सेक्तुमारब्धवन्तः। क्षणेनाऽऽपणिकैरापणाः सज्जीकृताः, विपणयश्च जन-प्रवाह-पूरिताः सञ्जाताः। महाराष्ट्रराजस्य गृहात् क्षणे क्षणे पकान्न-पूर-पूरितानि विशालानि वंश-पात्राणि बहिर्नीयन्ते स्म। तावद्भौरेणाऽऽगत्य प्रहरिभ्यः प्रत्येकं मधुरान्नानां महासम्भारः प्रदत्तः। साम्मुखीनाः पार्श्व-परिवर्त्तिन आपणिकाश्च मोदकादि-राशि-दानैरतितरां तोषिताः। पेटानां परतः पेटाः, विहङ्गिकानां परतो विहङ्गिकाः, सर्वा एव पकान्नानां महासम्भारैः पूरिताः, सर्वा एव चोपरितः पटैरावृताः, वह्वयश्च तत्र द्विभिस्त्रिभिश्चतुर्भिश्चवाहकैर्वाह्या आसन्। सर्वोऽयं पकान्न-पात्रसमुदायः कालिन्दीकूल-कुटीरमाप्तः। सहस्रशस्तत्र भिक्षुकाः पकान्न-वितरणैस्तोषिताः, अपर उपवेश्य भोजिताः, सर्वे च परितृप्ता निवर्त्तितुमारेभिरे।

अथ संवृत्तोऽन्धकारः। कुटीरान्तरे चैकस्याः पेटायाः पकान्ननिचयमपसार्य्य तन्मध्यान्निःसृत एकस्तेजस्वी संन्यासी। एष

छत्रमयाः=आतपत्रमयाः। छत्रिजनसञ्चारात्। सेचकाः=दार्तिकाः। "भिस्ती"इति ख्याताः। भस्रापूरितैः=दृतिभरितैः। अपसारमपसारम्=अपसार्यापसार्य। सेक्तुम्=आर्द्रीकर्त्तुम्। आपणिकैः=आपणाध्यक्षैः। वंशपात्राणि=वेणुनिर्मिताः पेटकाः। साम्मुखीनाः=पुरः स्थिताः। विहङ्गिकानाम्=बीवधानाम्, भारयष्टीनाम्। "बहंगी"इति हिन्दी। उपरितः=उपरिष्टात्। आवृताः=आच्छन्नाः। वाहकैः=प्रापकैः, वैहङ्गिकैः। वाह्याः=प्रापयितव्याः। कालिन्दीकूलकुटीरम्=यमुनातटहस्वकुटीम्। परितृप्ताः=अतितरां भोजनेन तोषिताः।

संवृत्तः=समभूत्। पकान्ननिचयम्-पूरिकादिसमूहम्। अपसार्य=

धूलि-विमर्द-धूसरित-देहः, काषाय-वसन-वेष्टित-कच-कलापः, काषाय-वस्त्र-परिधानोत्तरीयः, वक्र-दण्डहस्तः, भस्मोल्लिखित-ललाटः, कुटीरान्तःस्थान् द्विजान् आलिङ्ग्य, "को विलम्बः" इत्यवोचत्।

एष महाराष्ट्रराजः, ते च गौरसिंहादयो वीराः, तेऽपि पकान्नवाहक-वेषं परित्यज्य, संन्यासि-वेषमाकलय्य, मनसैव भगवतीं भवानीं प्रणम्य, पृष्ठतः कुटीराद् निःसृत्य, अनुकालिन्दीतीरमेव प्रचलिताः। समयेऽस्मिन् लोह-पञ्जरान्निःसृतः पञ्चास्य इव, जाल-बन्धन-विमुक्तो विहङ्ग इव, कुवेणीतो नद्यां परिभ्रष्टो मत्स्य इव, अहितुण्डिक-पिटकापसृतः पन्नग इव, चिराननुभूतं स्वातन्त्र्य-सुखमनुभवन्, महाराष्ट्रराजः परितोऽवलोक्य सुदीर्घमश्वसत्।

दूरयित्वा। **निःसृतः**=बहिर्भूतः। **धूलिविमर्दधूसरितगात्रः**=रजोव्यूहच्छुरितदेहः। **काषायवसनेन**=गैरिकवस्त्रेण, **वेष्टितः**=वलयितः, कचकलापो येन सः। काषायम्, वस्त्रम्, परिधानं, उत्तरीयञ्च यस्य सः। **वक्रः**=कुटिलः, दण्डः, हस्ते यस्य सः। **भस्मोल्लिखितललाटः**=विभूतिच्छुरितकपालः।

पकान्नवाहकानाम्=मिष्टान्नवैवधिकानाम्, **वेषम्**=नेपथ्यम्। **भवानीम्**=शिवसहचरीम्। **अनुकालिन्दीतीरम्**=यमुनातटसमीपतः। **लोहपञ्जरात्**=आयससिंहबन्धनागारात्। **पञ्चास्य इव**=केशरीव। जालबन्धनात्-**विमुक्तः**=दूरीभूतः। **विहङ्ग इव**=पक्षीव। **कुवेणीतः**=मत्स्याधानीतः। **परिभ्रष्टः**=चलितः। **अहितुण्डिकस्य**=सर्पग्राहिणः, **पिटकात्**=पेटकात्, **अपसृतः**=पलायितः। **पन्नग इव**=नाग इव। **चिराननुभूतम्**=दीर्घकालालब्धम्। **अश्वसत्**=निश्वासमगृह्णात्।

अवालोकयच्च–यद् गगन–तलं किञ्चित् किञ्चित् श्यामतां धत्ते । अस्पष्टाकृतिरपि सम्मुखं दक्षिण-दिशि सुदूरं विततः, विनिवर्तमान-परःशत-भिक्षुक–व्रात–व्याप्तः, यातायात–परैरनेकैः पान्थैश्च परिपूरितो घण्टापथः । वामतः, चाल्यमानाभिः, मयूर–कारण्डवादि–विविधाऽऽकाराभिः, दीर्घाभिः, आयताभिः, अल्पाभिः, महतीभिः, साट्टाभिः, निरट्टाभिः, सोल्लोचाभिः, अनुल्लोचाभिः, सनूपुर–क्षेपणी–क्षेपण–झणत्कार–विस्मायित–मीनाभिः, पथिकैः, व्यापार–वस्तुजातैः, क्रीडामात्र–व्यसनिभिर्नागरैश्च परिपूरिताभिः, परःसहस्राभिः, तरणिभिः, विलोडित–नील–नीरा, परःशत–कमठ–पृष्ठ–बिम्ब–प्रतिबिम्बैरिव, प्रतिसायं निविशमानावगाहमान–नीलगिरि–गण्डशैलायमान–सिन्धुर–घटा–क्षालनैरिव, सकल–कलङ्काङ्कित–दिल्ली–वल्लभसम्पर्कैरिव

धत्ते=दधाति । **अस्पष्टाकृतिः**=अविभाव्यमानाकारः । **विततः**=विस्तीर्णः । **विनिवर्त्तमानानाम्**=परावृत्तिं लभमानानाम्, परःशतानाम्, भिक्षुकाणाम्, व्रातेन, व्याप्तः । **घण्टापथः**=राजमार्गः । **चाल्यमानाभिः**=सार्यमाणाभिः । **दीर्घाभिः**=लम्बमानाभिः । **आयताभिः**=विशालाभिः । **अल्पाभिः**=लघ्वीभिः । **सोल्लोचाभिः**=सच्छदिभिः । **अनुल्लोचाभिः**=निश्छदिभिः । **क्रीडामात्रव्यसनिभिः**=खेलनमात्रनिरतैः । भ्रमणार्थमायातैरिति यावत् । **नागरैः**=जानपदैः । **तरणिभिः**=नौकाभिः । **विलोडितम्**=हिल्लोलितम्, नीलं नरं यस्याः सा । **परःशतानाम्**=अगणितानाम्, **कमठानाम्**=कूर्मीनाम्, पृष्ठस्य, बिम्बप्रतिबिम्बैरिव । **निविशमानानाम्**=प्रविशताम्, **अवगाहमानानाम्**=निमज्जताम्, **नीलगिरिगण्डशैलायमानानाम्**=नीलाचलप्रत्यन्तपर्वतायमानानाम् । **सिन्धुराणाम्**=गजानाम्, **घटानाम्**=मण्डलानाम्, **क्षालनैरिव**=

च श्याम-श्यामा, सन्तरणाऽऽसक्तैरनेकैर्यवनयुवकैर्विक्षोभ्यमाणा, क्वचित्सन्ध्योपासन-परायणैर्जल-युद्धाऽऽसक्त-यवन-बालक-कर-यन्त्र-च्युताम्बु—बिन्दु-स्पर्श—भीतैरपसारमपसारमुपविशद्भिर्ब्रा-ह्मणैः सेव्यमाना, क्वचित्प्रक्षिप्र-मांसाग्र-बडिश-बद्ध-रज्जु-हस्तैर्जल-चर-तालु-वेधं प्रतीक्षमाणैर्यवनैर्नान्तिकेष्वभीक्ष्यमाणा, तरङ्ग-भङ्गैर्हस्तैरिव स्वं वक्षो व्रती, सकज्जलाश्रु-प्रवाहमयीव, स्व-भ्रातरं यमं दिल्लीकलङ्क-वृत्तान्तं निविवेदयिषन्तीव ततः प्रवहन्ती, यमुना। दक्षतश्च, समस्तं दिनमितस्ततोऽतिवाह्य, सायं स्वावासमायातैर्वि-हितकलकलैर्विहङ्ग-कुलैर्व्याप्तान्युद्यानानि।

धावनैरिव। **सकलकलङ्कैः**=सर्वविधपापैः, दुर्यशोभिश्च, **अङ्कितस्य**=लाञ्छित-स्य, दिल्लीवल्लभस्य, **सम्पर्कैरिव**=सान्निध्यैरिव। **श्यामश्यामा**=अतिकृष्णा। **सन्तरणासक्तैः**=प्लवननिरतैः। **विक्षोभ्यमाणा**=आकुलीक्रियमाणा। **सन्ध्योपासनपरायणैः**=सन्ध्यार्चननिरतैः, **जलयुद्धासक्तानाम्**=वारिक्रीडा-संलग्नानाम्, यवनबालकानाम्, **करयन्त्रेभ्यः**, **च्युतानाम्**=पतितानाम्, **अम्बुबिन्दूनाम्**=जलपृषताम्, **स्पर्शाद्**, **भीतैः**=भयत्रस्तैः। **ब्राह्मणैः**=विप्रैः। **सेव्यमाना**=आश्रीयमाणा। **प्रक्षिप्रे**=प्रेरिते, **मांसाग्रे**, **बडिशे**=मीनवेधिन्याम्, **बद्धा**=यन्त्रिता, **रज्जुः**=दाम, **करे येषां तैः**। **जलचराणाम्**=मीनादीनाम्, **तालुवेधम्**=काकुदच्छेदम्। **अन्तिकेषु**=समीपेषु। **नाभीक्ष्यमाणा**=न सञ्चार्यमाणा। **तरङ्गभङ्गैः**=लहरिच्छेदैः। **वक्षः**=उरः। **व्रतती**=ताडयन्ती। **सकज्जलाश्रुप्रवाहमयीव**=साञ्जनाम्लपूरयुतेव। **यमम्**=धर्मराजम्। याममिति पाठे स्वार्थेऽण्। **निविवेदयिषन्तीव**=निवेदयितुमिच्छन्तीव। **यमुना**=शमन-स्वसा। वामतः प्रवहन्तीति पूर्वान्वयि। **दक्षतः**=दक्षिणस्यां दिशि। **इतस्ततः**=

सर्वे शनैः शनैस्तेनैव पथा दक्षिणामुखं प्रचलिताः । क्रमतोऽयं मार्गो यमुना-प्रवाहाद् दूरतः संवृत्तः । बहवो भिक्षुकाश्च महाराष्ट्र-राजस्यौदार्य्यं प्रशंसन्तो ग्रामटिकानां पद्या अन्वसरन् । तावत्क-श्चिदभिमुखमागच्छन् भव्यमिमं वीरसंन्यासिनं पश्यन्नपृच्छत्-'कोभवान् ?'

एष आह—नारायण ! नारायण ! संन्यासिनो वयम् !!

स आह—कुत्र गम्यते ?

एष आह—नारायणस्य करुणया वृन्दावनमुद्दिश्य गम्यते । स आह—कियद्दूरंदिल्ली ? एष आह—इयमासन्ना दिल्ली, सपदि गम्य-तामन्यथा गोपुरावरोधः स्यात् । गोविन्द ! गोविन्द ! हरे ! कृष्ण ! विष्णो !

एवमालप्य तस्मिन् नगराभिमुखं त्वरितं प्रचलिते, पुनरेते किञ्चिदग्रतो गत्वा द्विमुखं पन्थानमवालुलुकन् ।

अथ केन पथा गन्तव्यम् ? कुतो यातव्यम् ?—इति विचार-यन्नेव माल्यश्रीकोऽद्राक्षीद्वामे पथि किञ्चिदेव दूरे विशालमेकं प्लक्ष-वृक्षम्, तदधस्ताच्च पञ्चषांश्छाखा-बद्धान् खुराग्रोन्मथित-भूभागा-

---

यत्र तत्र । अतिवाह्य=समाप्य । स्वावासम्=स्वसदनम् । विहङ्गकुलैः=पक्षिनिवहैः । व्याप्तानि=भूषितानि ।

यमुनाप्रवाहात्=कालिन्दीपूरात् । ग्रामटिकानाम्=क्षुद्रग्रामाणाम् । पद्याः=वर्त्तनीः । अन्वसरन्=आश्रयन् । भव्यम्=सुन्दरम् ।

गोपुरावरोधः=प्रधानद्वारपिधानम् ।

द्विमुखम्=उभयतो गच्छन्तम् ।

प्लक्षवृक्षम्=पर्कटीद्रुमम् । शाखासु=द्रुमावयवेषु, बद्धान्=यन्त्रितान् ।

नश्वान्। "इत आगम्यताम्, मन्ये त एतेऽश्वाः"–इत्युक्त्वा चाखिलांस्तत एव नीतवान्।

अथ महाराष्ट्रराजोऽपि तान् खलीन-लेहन-लीला-लीनान् अतिमुक्त-कुसुम-स्तबकैरिव फेन-निचयैः परिपूजित-वसुन्धरान्, सज्जोपवेशनिकान् उभयतो लम्बित-लौह-पादाधारान् स्वागमन-पादाहति-श्रवणेनैवोर्द्ध्वकर्णान् श्यामान् रक्तांश्च हयान आलोक्य, पार्श्वस्थमेकं हयनियामकञ्च वीक्ष्य, मन्दमगादीत्-"कस्यैते हयाः?" स च दक्षं कर्णं संस्पृशन्नुदतीतरत्-"दिल्लीनिवासिनः कस्यचिन्महाभाग्यस्य!"

अथ 'इम एव, इम एव, तेऽश्वाः'—इति सर्वैरुक्तम्। ततो विशालमेकमाजानेयं महाराष्ट्रराज आरूढः, अपरं गौरसिंहः, अन्यञ्च माल्यश्रीकः। त्रयोऽपि च नियामक-दत्तांस्तादृशान् कशा-दण्डान् गृहीत्वा त्वरितं दक्षिणाऽभिमुखं धाविताः।

अथ गव्यूतिं यावन्निर्विघ्नं धावद्भिरकस्मात् पुरतः समागच्छन्तः

खुराग्रैः=शफप्रान्तैः, उन्मथिताः, भूभागाः, यैस्तान्। अखिलान्=सकलान्।

खलीनस्य=कविकायाः, लेहनलीलायाम्=चर्वणक्रीडायाम्, लीनान्=लग्नान्। अतिमुक्तकुसुमस्तबकैरिव=माधवीसुमगुलुच्छैरिव। फेननिचयैः=डिण्डीरव्रातैः। परिपूजितवसुन्धरान्=परिसेवितधरणीन्। सज्जोपवेशनिकान्=सन्नद्धाश्वपृष्ठासनान्। उपवेशनिका="काढी"इति हिन्दी। लम्बितः=दोलायितः, लौहः=आयसः, पादाधारः="रिकाब"इति प्रसिद्धः, येषां तान्। हयनियामकम्=अश्वरक्षकम्। उदतीतरत्=उत्तरमदात्। कशादण्डान्=अश्वताडनयष्टीः। धाविताः=जवाच्चलिताः।

सप्रसादिनो दृष्टाः । ते च समागतमात्राः 'तिष्ठत तिष्ठत' इत्येतेषां गतिं रुरुधुः, अचकथंश्च यत्–"कुत आगच्छथ ?"—इति । एतैरुक्तम्–"संन्यासिनो वयम् , दिल्लीत आगच्छामः" । तैरुदितम्—"वरम ! वयमपि दिल्लीमेव गच्छामः, किन्तु विस्मृतमार्गाः स्मः, तत्परावृत्य दिल्ली–पर्य्यन्तमस्माभिः सह गच्छत" । ततो गौरेणोक्तम्—"दयध्वम् संन्यासिपु, सरलोऽयं मार्गः, सम्मुखमेव दिल्ली, उत्तराऽभिमुखा इव प्रयात, सपदि प्राप्स्यथ राजधानीम्"—इति ।

अथ तेषां प्रधान इवैकः प्रांशुर्निपुणं निरीक्षमाण उवाच—"इयमुदारा वाग् , एषा भव्या मूर्तिः, एते राजयोग्या आजानेयाश्च न पुष्णन्ति युष्माकं साधारण-संन्यासि–भिक्षुताम् । तन स्पष्टं कथ्यतां के यूयम् ?" ततो माल्यश्रीक उवाच—"सत्यं ! कुलमास्माकीनमुच्चम् , किन्तु गृहीत–संन्यासा वयं सदा पर्य्यटनकौतुकिनो भाग्यवतां केषाञ्चिदौदार्य्येण लब्ध–सुन्दर–घोटकाः सांप्रतं मथुरां यामः"

ते तु सप्रापि निपुणं निरीक्षमाणास्तूष्णीमतिष्ठन् ।

गव्यूतिम्=क्रोशद्वयम् । **सादिनः**=अश्वारोहाः । **उदितम्**=कथितम् । **विस्मृतमार्गाः**=अनवधारितपदवीकाः । **दयध्वम्**=दयां कुरुत । **प्रयात**=गच्छत ।

प्रधान इव=श्रेष्ठ इव । **प्रांशुः**=उन्नतः । **पुष्णन्ति**=पुष्टयन्ति ।

उच्चम्=श्रेष्ठम् । **गृहीतसंन्यासाः**=धारितभिक्षुकव्रताः । **पर्यटनकौतुकिनः**=भ्रमणकौतूहलाः । **भाग्यवताम्**=शोभनभागधेयानाम् । **लब्धसुन्दरघोटकाः**=प्राप्ताजानेयाः ।

ततस्तेष्वेकेन मन्दमुक्तम्—"अहं शास्तिखानेन सह चिरं महाराष्ट्र-युद्ध आसमिति परिचिनोमि शिवम्। तादृश एवास्य स्वरः सन्नाहश्च"। अपरेणोदितम्—"भाषणभङ्गी च स्पृशति महाराष्ट्र-भाषाम्"। अन्येन शनैरालपितम्, "शान्तं पापम! स तु दिल्लीनगरे निगृहीतोऽस्ति"। अपरेणोट्टङ्कितम्—"धूर्त्ता महाराष्ट्राः, तथा निगृहीतानामप्येषां पलायनं नाऽऽश्चर्य्यप्रदम्"।

अथ महाराष्ट्रराजेन मनस्येव 'महतीयमापदेति' चिन्ता-निमग्नेन कथितम्—सरलोऽयं मार्गः, गम्यताम्। ततस्तेषां प्रधानेन गदितम्-"मैवम्, भवतामेकेनापि गन्तव्यं सहास्माभिः"।

ततो यावदेते परस्परमालोक्य किमपि विमृशन्ति; तावत्तेषामेकेन सन्दिहानेन शनैः पृष्ठतोऽश्वं सञ्चाल्य, महाराजस्य निकट आगत्य, अकस्माद् भल्लाग्रेण शिरो-वेष्टनमुत्तोलितम्, दृष्ट्वञ्च सर्वैर्यदेतस्य शिरसि लौहं शिरस्त्रमस्तीति। महाराष्ट्रराजः सचकितमुत्फालितवाह एकतः स्थितवान्, माल्यश्रीकगौरसिंहाभ्याञ्च झटिति कशादण्डाग्रं सञ्चाल्य, छुरिकामाकृष्य, परिवर्त्य, पुनस्तथैव संयोज्य भल्ला विहिताः। महाराष्ट्रराजस्तु यावत्तथाकरोतिः

स्वरः=कण्ठः, भाषणमिति यावत्। सन्नाहः=शरीरबन्धः। भाषणभङ्गी=कथनशैली। निगृहीतानाम्=कारागृहे कृतानाम्।

आपदा=आपत्तिः। भागुरीयमते।

विमृशन्ति=विचारयन्ति। सन्दिहानेन=सन्देहं कुर्वता। भल्लाग्रेण=कुन्तप्रान्तेन। शिरोवेष्टनम्=उष्णीषम्। उत्तोलितम्=उत्क्षिप्तम्। लौहम्=आयसम्। शिरस्त्रम्=शीर्षत्राणम्। उत्फालितवाहः=उत्कूर्दिताश्वः। एकतः=

तावत्—"सोऽयम्, सोऽयम्, चोरोऽयम, पलायितकोऽयम, कश्योऽयम्, मुसल्योऽयम्, घात्योऽयम्, पात्योऽयम्" इति सकोलाहलं ते—"छिन्धि छिन्धि, भिन्धि भिन्धि" इत्यपतन्।

योऽयं महाराष्ट्रराजं प्रथमं परिचिकाय; सोऽकस्मात् क्रूरं खड्गमस्योपर्य्युदतूतुलत्, अन्ये चान्यौ व्यग्रावकार्षुः। महाराजस्तु सज्जभल्लो नासीदिति किङ्कर्त्तव्यविमूढोऽभूत्, अपश्यच्च हृदये प्रबलबाणेनाऽऽहतोऽसौ प्रहर्त्ता सचीत्कारं हयपृष्ठाद् भूमौ पतितः—इति।

अथ द्वितीयोऽपि सक्ष्वेडं खड्गं कोशादाकृष्य तस्मिन्नापतितस्तथैव बाणविद्धो भूमौ पतितः। तृतीयोऽप्युत्पतित एवमेव भूमौ समशयिष्ट। तावन्महाराजोऽपि भल्लतल्लजं करपल्लवेन दृढं गृहीत्वा सिंह इव वस्तानेतानाचक्राम। ते चत्वारोऽपि त्रिभिरेतैराक्रान्ताः कौशल-युद्धेनैषां चकिता बभूवुः। तेषामेकः शिवेनाऽऽहतः, द्विती-

---

एकस्यां दिशि। **सञ्चाल्य**=संभ्राम्य। **पलायितकः**=अपसृतः। **कश्यः**=कशाभिस्ताडनीयः। **मुसल्यः**=मुसलेन हन्तुं योग्यः। **घात्यः**=मारयितव्यः। **पात्यः**=पातनीयः।

परिचिकाय=परिचिच्ये। **क्रूरम्**=कठोरम्। **उदतूतुलत्**=उदक्षिपत्। **व्यग्रौ**=उद्विग्नौ। **सज्जभल्लः**=सन्नद्धकुन्तः। **किङ्कर्त्तव्ये**=किं विधेयमिति विचारणे, **विमूढः**=विक्षिप्तः। **प्रबलेन**=दुर्धर्षेण, **बाणेन**=शरेण। **प्रहर्त्ता**=मारयिता। **सचीत्कारम्**=सक्रन्दनम्।

सक्ष्वेडम्=सगर्जनम्। **तस्मिन्**=शिवे। **समशयिष्ट**=अस्वाप्सीत्। **भल्लतल्लजम्**=प्रशस्तं कुन्तम्। **करपल्लवेन**=करकिसलयेन। अत्र पल्लवशब्दोऽनुप्रासातिरिक्तं कमर्थमुपढौकयतीति मनीषिनिवहैरवधारणीयम्। **सिंह इव**=पद्मास्य इवेत्युपमा। **वस्तान्**=अजान्, बर्करान्। **कौशलयुद्धेन**=सङ्ग्रामनैपु-

योऽपि, तृतीयश्च गौरेण भल्लेनाऽऽहतः, चतुर्थश्च माल्यश्रीकेणाऽऽहतवाहः सहयं तेनापथेनैव नीयमानो गर्त्ते पातितः। एवमापदमापाढ-घन-घटामिव क्षणेनापसृतामालोक्य सर्वेऽप्यक्षत-विग्रहाः सपदि सैन्धवेभ्य उत्तीर्य्य, गतप्राणानामेषां केषाञ्चन क्रन्दतां चन्द्रहासान् गृहीत्वा, यावत्पुनरश्वानारुह्य जिगमिषन्ति; तावन्महाराष्ट्रराजेनोक्तम्--"स्थीयताम्, न भयम्। दृश्यतां कोऽस्मत्प्राण-रक्षकः; यो बाणैः प्रत्यर्थिनः प्राहरत्। नाहं कथमप्यानृण्यमुपयास्यामि, यो मत्कण्ठे खड्गमप्येवं प्राहरत्: शिताग्रेण शरेण यथा स झञ्झावात-पात-घाताहतः शुष्कच्छद इव परतः पपात।"

ततः सर्वेऽपि पृष्ठतो विचिन्वन्तस्तमेवाश्व-नियामकमल्पीयांसमेकमश्वमारूढमिष्वास-पाणिं कटि-बद्ध-तूणीरमायान्तमपश्यन्।

ण्या। चकिताः=साश्चर्याः। आहतवाहः=मारिताश्वः। सहयम्=सघोटकम्। अपथेन=अमार्गेण। गर्त्ते=खन्त्रे। आपाढघनघटामिव=वर्षारम्भमेघमालामिव। अपसृताम्=दूरीभूताम्। अक्षतविग्रहाः=अनाहतदेहाः। गतप्राणानाम्=गतासूनाम्। जिगमिषन्ति=गन्तुमिच्छन्ति। दृश्यताम्=ज्ञायताम्। अस्मत्प्राणरक्षकः=अस्मज्जीवनदाता। प्रत्यर्थिनः=शत्रून्। एवम्=अमुना प्रकारेण। प्राहरत्=प्राताडयत्। शिताग्रेण=तीक्ष्णप्रान्तेन। झञ्झावात-पात-घाताहतः=सवृष्टिकवायु-पतनताडितः। शुष्कच्छद इव=नीरसदलमिव।

विचिन्वन्तः=अन्विष्यन्तः। अल्पीयांसम्=अतिलघुम्। इष्वासपाणिम्=धनुर्हस्तम्। कटिबद्धतूणीरम्=मध्यलम्बितेषुधिम्। आयान्तम्=आगच्छन्तम्।

अथ तमवलोक्य विहित-बहुल-साधुवादे समासादितप्रसादे महाराष्ट्रराजे, सोऽपि वाहादुत्तीर्णः । ततः समीपमागतं तं—कलितहय-नियामक-वेषोऽसौ राघवाचार्य्यगोस्वामी—इति परिचिच्ये महाराजः ।

अहो !! दया स्वामिनः ! इति सगद्गदस्वरं साष्टाङ्गं प्रणतुकामं महाराजमालोक्य, अञ्जलिं बद्ध्वा स उवाच—"महाराज ! महाराज ! दासोऽयं श्रैमत्कः । अस्य गोस्वामिता हय-नियामकता च व्याजमात्रम् , जनोऽयं तोष-रोष-भाजनं महाराजस्य" । तदाकर्ण्य चकितः क्षणं तूष्णीको महाराजोऽवादीत्—किमिव मोहयसि ? स्पष्टं कथय, कस्त्वमस्माकमसाधारणो बन्धुः ?

स तु जानुभ्यामवनीं गत्वा, अञ्जलिं बद्ध्वा, शिरो नमयित्वा, सप्रश्रयमगादीत्—

देव ! दासोऽयं श्रीमच्चरणैर्लालितोऽपि पालितोऽपि वासितोऽपि निर्वासितोऽपि रघुवीरसिंहः !

तदाकर्ण्य चकितो महाराजः, रघुवीर-प्राप्तेः स्वप्नमिव, इन्द्रजालमिव, गन्धर्व-पुरमिव च, पश्यन् ; विस्मृतात्मा, कण्टकितः,

---

विहित-बहुल-साधुवादे=कथितानेकसत्कथने। समासादितप्रसादे=लब्धप्रसन्नताके ।

प्रणतुकामम्=नमस्कर्त्तुमिच्छन्तम् । अञ्जलिम्=करसम्पुटम् । श्रैमत्कः=भावत्कः । तोषस्य=प्रसन्नतायाः, रोषस्य=कोधस्य च । भाजनम्=पात्रम् ।

असाधारणः=अनितरः । बन्धुः=मित्रम् ।

वासितः=दत्तस्थानः । निर्वासितः=निकालितः ।

स्विन्नः, वेपितश्च, तमुत्थाप्य, गाढमालिङ्ग्य, स्मारं स्मारं स्वकृत्यम्, तत्कृत्यञ्च, मुग्ध-माणवक इव, मुक्तकण्ठं रुरोद।

चिरात्तस्मिन्नुपशान्ते गौरोऽपि भगिनी-जीव-जीवनं बाष्प-स्नातं रघुवीरं तथैवाऽऽलिलिङ्ग, अश्रूणि च मुमोच। परतः प्रेम-बाष्प-पूर-पूरितो माल्यश्रीकोऽप्याशिश्लेष। ततो महाराज उवाच-

रघुवीर! क्षमस्व, यद्विनाऽपराधमुपकार्य्यपि तथाऽनादृतोऽसि; त्वत्पिता जटिल-वेपो वीरेन्द्रसिंहः, त्वां विना कण्ठेन प्राणान् धारयति, तव पुरोहितो गणेशशास्त्री, अस्थि-चर्म्मावशेषः। श्रूयते त्वां प्राणनाथं मन्यमाना सौवर्णी, आशामात्रेण जीवति, आगच्छ, सपदि महाराष्ट्र-देशं गत्वा सर्वानुज्जीवय!

इति कथयित्वा महाराष्ट्र-पतिर्नैजमश्वमारूढः, माल्यश्रीको गौरश्च निजाश्वमारूढौ, भूमौ पातितानामेषैपामेकं प्रांशुमश्वं रघुवीरोऽप्यारूढः। यावदेते दक्षिणाभिमुखाः पुनः पथः कञ्चिदंशमतिवाहयन्ति; तावदकस्मादेव प्रतीचीतः कदम्ब-कदम्ब-संवलितेन पथा सखडखडा-शब्दं समागच्छतो दिल्लीश-सङ्केताङ्कित-पट्टिका-

---

गन्धर्वपुरमिव=मायानगरमिव। कण्टकितः=पुलकितः। आलिङ्ग्य=आश्लिष्य। मुग्धमाणवक इव=मूढबाल इव।

भगिनीजीवजीवनम्=सहोदराप्राणप्राणनम्।

अनादृतः=तिरस्कृतः। कण्ठेन=गलेन। न सर्वेण शरीरेण। गतप्राणानां हि प्राणाः कियन्ति दिनानि प्रायः कण्ठे तिष्ठन्ति-इति तथा कथनेन गतासुप्रायता लक्ष्या। उज्जीवय=उत्प्राणय।

प्रतीचीतः=पश्चिमतः। कदम्बानाम्=नीपानाम्, कदम्बेन=समूहेन,

कलित-कटि-बन्धान् श्याम-वसनान् रक्त-शिरोवेष्टनान् भुशुण्डी-मण्डित-बाहु-दण्डान् शतमिवाश्वारोहानपश्यन् ।

ते च 'सोऽयं सोऽयमिति' सपदि सपरिकरं शिवं पर्य्यवेष्टयन् । किमिति ? किमिति ?—इति पृष्टाश्च सकर्ण-स्पर्शं मन्दं किमपि प्रोचुः । अथ सर्वेऽपि हृष्टा मथुराऽभिमुखमन्धकारमये पथि विलीनाः ।

इत्येकादशो निश्वासः ।

संवलितेन=वलयितेन । **दिल्लीशसङ्केतेन**=अवरङ्गजीवनाम्ना, **अङ्किताभिः**=भूषिताभिः, पट्टिकाभिः, **कलिताः**=युताः, कटिबन्धाः, येषां तान् ।

इमे सर्वे कलितयवनवेषा महाराष्ट्रवीरा इति राघवोक्तौ गुप्तसेनावर्णनादिभ्यः, मुरेश्वरोक्तेश्च स्पष्टीकृतप्रायमिति शम् ।

इति श्रीशिवराजविजयवैजयन्त्यामेकादशनिश्वासविवरणं समाप्तम् ।

"तासामाविरभूच्छौरिः स्मयमानमुखाम्बुजः।
पीताम्बरधरः स्रग्वी साक्षान्मन्मथ-मन्मथः"॥

—भागवते,

द्वादशे शिवराजस्य दिल्लीयात्राकालमारभ्यैव समुन्मुकानां तदर्थं महान्तं यत्नमनुष्ठानादिकञ्चानुतिष्ठतां महाराष्ट्राणां पुरतः पुनरागमनं शिवस्येत्येका कथा, रघुवीरविरहेण जाज्वल्यमानानां तज्जनक-तत्पुरोहित-सौवर्ण्यादीनाञ्च पुरतः श्रीरघुवीरसमागमनमिति द्वितीया, अनयोरेव प्रधानीभूतयोः परिपूर्त्यर्थं ग्रन्थसमाप्तौ सन्मङ्गलायमानमानसत्वञ्च प्रसारयितुं श्रोतृप्रभृतिषु सौवर्णीपरिणयादिलक्षणा अपि कथाभागाः प्रदर्शयितव्याः। तदेतस्य कथाव्रातस्य समुपक्षेपकं भागवतीयं रासपञ्चाध्यायीगृहीतं पद्यमुपस्थापयति। वंशीनिनादेन समाहूय व्रजबालाः कालिन्दीतटे रममाणस्तासां साभिमानत्वं निरीक्ष्य लुकायितो भगवान् श्रीकृष्णः। पश्चात्ताभिः पश्चात्तापपरम्परातप्यमानाभिः कृतगोपीगीतादिरूपाक्रन्दाभिश्चिराभिलषितश्चिरप्रार्थितश्च प्रकटीभूतः। तदेतत्कामविजयप्रदर्शनं रासपञ्चाध्याय्यां कृतं वेदविदा व्यासेन। तदुपपादकश्चायं श्लोकः।

शूरस्य=शूरसेनस्यापत्यं पुमान्-शौरिः। **तासाम्**=चिरहरिविरहखिन्नचेतस्कानाम्, गोपीनाम्। **आविरभूत्**=प्रकटीभूतः। शौरि विशिनष्टि—**स्मयमानम्**=ईषद्धास्यमयम्, **मुखाम्बुजम्**=आननपद्मं यस्य सः। भगवतः स्मयश्च मायेति न विस्मर्त्तव्यम्। तथा च

"हासो जनोन्मादकरी च माया, दुरन्तसर्गो यदपाङ्गमोक्ष"-इति तत्रैव। **पीताम्बरधरः**=पीतकौशेयवासाः। **स्रग्वी**=मालाधरः। **साक्षात्**=प्रत्यक्षीभूतः। **मन्मथस्य**=कामस्य, **मन्मथः**=मथनः। पदैरेभिः स्पष्टतां नीतो रासाभिधेयभाव

"यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम" ॥

—श्रीभगवद्गीतायाम्,

जातोऽयमरुणोदयः, कलविङ्कैरारब्धः कलरवः, तनूभूतं तमः, धीरः समीरः, इरंमदो मदयति मयूरान, मतङ्ग-मोहनं गन्धमु-

इति नाविदितं पण्डितेषु। रासपञ्चाध्याय्या विकृतमर्थं विकृतमनीषया समुपस्थाप्य कृष्णचरित्रे कलङ्कव्रातमालोकयतां प्रतारणायापि व्यासेनायं श्लोक उपरचितः, उपनिबद्धश्चायं स्वग्रन्थे व्यासेनेति बहुतरं विवित्सुभिः पुराणमतदीपिका निभालयितव्या।

उपक्रमे विष्णोर्माया भगवतीत्यभिधाय सकलजगन्मोहयित्र्यास्तस्याः प्राबल्यं प्रदर्शितम्, उपसंहारे तस्या विजयकरणोपायं भगवदेकतानत्वं प्रदिदर्शयिषुः, शिववीरस्य दिल्लीकलङ्ककरतलगतस्य ततो निःसृत्य पुनरपि स्वराज्यपरिप्राप्तेः कारणञ्च भगवच्छरणीकरणमेवेति विवेदयिषुः, "श्रीकृष्णः शरणं मम"इति महामन्त्रमुपदिदिक्षुः, गीताश्लोकमुपक्षिपति यत्र योगेश्वर इति।

योगानां योगिनाञ्चेश्वरः। महामायापतिरिति यावत्। इदमपि पदं भगवच्चरित्रशुद्धतायाः प्रबलं प्रमाणमिति वेदितव्यम्। **धनुर्धरः**=सर्वश्रेष्ठधनुर्धारी। **पृथाया** अपत्यं पुमान् **पार्थः**। **तत्र**=तत्रैव। **श्रीः**=शोभा, लक्ष्मीः। **विजयः**=उत्कर्षः। **भूतिः**=सम्पत्तिः। **नीतिः**=नयः। **ध्रुवा**=अवश्यम्भाविनी। इति **मम मतिः**=सम्मतिः, मनीषा च।

अरुणोदयवर्णनपूर्वकं ग्रन्थारम्भ इत्युपक्रमोपसंहारयोरैक्यं दिदर्शयिषुरुणोदयवर्णनं प्रारभते—**जातोऽयमिति। कलविङ्कैः**=चटकैः। **कलरवः**=मधुरालापः। **तनूभूतम्**=क्षीणतां गतम्। **इरंमदः**=मेघज्योतिः। मूलपर्याययोर्वैपरी-

द्विरति नव-वारिद-वारि-सरसिता रसा, बलाहका मन्दं गर्ज्जन्ति। समयेऽस्मिन् तोरण-दुर्ग-समीपस्थ-सरोवर-प्रान्ते शिवमन्दिरे चारुहासिनी सौवर्ण्याऽऽलपति स्म।

चारुहासिनी—भद्रे! दिष्ट्या वर्द्धसे, फलितं तव मनोरथैः, गुप्तवेषो रघुवीरसिंहस्तत्रभवतो दिल्लीं गतस्य महाराजस्य रक्षाम-करोत्-इति सन्तुष्टेन महाराजेन सादरमानीयते। अद्यैव सर्व आयास्यन्ति, ह्यो गव्यूति-चतुष्टयान्तराले कृताधिवासाः सन्ति, आनन्दमयः समयोऽसौ महाराष्ट्र-देशस्य! त्यज विषादम्! सम-नुभव महादेव-सेवाया नमस्यायास्तपस्यायाश्चापूर्वं परिणामम्! समाप्ता सा ग्रह-दशा! अवसन्नानि दुरदृष्टानि! सम्पूर्णा दुष्कृत-विपाकाः! सम्प्रति-उत्तिष्ठ! सन्ताप-तप्त-श्वास-शुष्कमधरं हास-रसै रञ्जय! चिर-विहित-न्यासं वाग्विलासं पुनरासादय। अञ्जन-

---

त्येनोक्तावमरः। **मदयति**=हर्षयति। **मतङ्गमोहनम्**=करिवशीकरणम्। **उद्भि-रति**=उद्गमति। **नववारिदवारिभिः**=नूतनजलधरपाथोभिः, **सरसिता**=सर सतामापादिता। **रसा**=विश्वम्भरा। **बलाहकाः**=मेघाः। तोरणदुर्गसमीपस्थस्य, **सरोवरस्य**=जलाशयस्य, **प्रान्ते**=तटे। **सौवर्ण्या**, सहार्थकत्वभासनात्तृतीया।

दिष्ट्या=भागधेयेन। **फलितम्**=पूर्णताङ्गतम्। **ह्यः**=पूर्वदिने। **कृताधि-वासाः**=विहितवसतयः। **आनन्दमयः**=सुखमयः। **महादेवस्य**=भगवतः शम्भोः, **सेवायाः**=सपर्यायाः। **नमस्यायाः**=नमस्कृतेः। **तपस्यायाः**=शरीर-तापनरूपतपसः। **परिणामम्**=फलम्। **अवसन्नानि**=समाप्तानि। **दुरदृष्टानि**=दुर्भाग्यानि। **दुष्कृतानाम्**=पापानाम्, **विपाकः**=परिणामः। सन्तापेन, तप्तैः, श्वासैः **शुष्कम्**=नीरसम्। **रञ्जय**=मोदय। हासेन हि स्वास्थ्यमेधते सौन्दर्यमेति

रञ्जन-रहिते क्रन्दन-वारि-बिन्दु-व्रज-दुर्दिन-दुःखस्थे नयने आमोदामृताऽऽसारैः क्षपय ! दिष्ट्या वर्द्धसे !

सौवर्णी—किं कथयसि ? अपि सत्यमिदम् ?

चारुहासिनी—[सहर्षम्] भगिनि ! कथमसत्यं वच्मि, ततः पश्य तोरणदुर्गेषु सतोरणा ध्वजा आरोप्यन्ते । अधुनैव दुर्गाध्यक्षो मन्दिरमागत्य मारुति-मूर्त्तिं प्रणम्य वृत्तान्तमिमं सर्वान् संश्राव्य गतः ।

सौवर्णी—महादेवं परिक्रम्य, प्रणम्य, पुलकावरुद्धकण्ठा, गाढं चारुहासिनीमालिलिङ्ग । ततश्चिरं चारुहासिनो सौवर्णी चोपविश्य व्यतीता दुर्घटनाः स्मारं स्मारं रोदं रोदं मङ्गल-वृत्तान्तं चामुमवधारमवधारं मोदं मोदं बहुभिः समालापैर्घटिकार्द्धं यापितवत्यौ ।

चारु०—भद्रे ! समूलतपस्या संवृत्ताऽसि, तत्त्यज साम्प्रतं तपस्विनी-वेषम् ।

वैज्ञानिकाः । रक्तीकरणार्थकत्वं नातीव मनोहारि । चिरं विहितः, **न्यासः**=परत्र स्थापनं यस्य तादृशम् । **आसादय**=प्राप्नुहि । **अञ्जनरञ्जनरहिते**=कज्जलाक्तताशून्ये । **क्रन्दनवारिबिन्दुव्रजैः**=रोदनाम्बुपृषत्समूहैः, यद् **दुर्दिनम्** = सवृष्टिकमेघच्छन्नम् दिनम् , तदेव दुःखम् , तत्स्थे । **आमोदामृतासारैः**= प्रसादपीयूषवर्षैः । **क्षपय**=धावय ।

सतोरणाः=सबहिर्द्वाराः । "तोरणोऽस्त्री बहिर्द्वारमि" त्यमरः ।

पुलकावरुद्धकण्ठा=गद्गदविस्खलज्जला । **अवधारमवधारम्**=निश्चित्य निश्चित्य ।

समूला तपस्या यस्याः सा । परिपूर्णतपश्चरणेति यावत् । **तपस्विनीवेषम्**=

सौवर्णी—भगिनि! मैवम्, पत्युः कुशलेनाऽऽत्मप्रकटन-वृत्तान्तमवाप्याऽऽलपिष्यामि, तं दृष्ट्वा च तपस्विनीवेषं त्यक्ष्यामीति सुदृढे मम प्रतिज्ञे। तत्रैका पूर्णा, परस्यामपि गङ्गाधरस्यानुग्रहेण पूर्णायामूरीकरिष्यामि ते वचनम्।

ततः-"अहो! कुसुमानि चेयानि, मुहूर्त्तेन पुनस्त्वां द्रक्ष्यामि"-इत्युक्त्वा तामालिङ्ग्य वाटिकां प्रविष्टायां तस्याम्; परमानन्द-सन्दोह-मद-मन्थरा सौवर्णी पौनःपुन्येन महादेवमूर्तिं परिक्रम्य, बिल्वपत्रैः सम्पूज्य, बं बं बं, हर हर हर, इति व्याहृत्य, आनन्दाश्रु-कलाऽऽकुलित-कपोला चिरमस्तोष्ट। ततो महादेवं ध्यायन्ती, निमीलित-चक्षुरेव मनोरथमये जगति समपश्यत्—यन्महादेवः स्वयं प्रकटीभूय, "मा स्म भैः" इत्यसकृदाभाष्य, वाटिका-कुट-जालान्तर्निविश्य भस्मोद्धूलितेन वलित-व्याल-बाल-वलयेन करेण रघु-

---

योगिनीनेपथ्यम्।

सुदृढे=निश्चितप्राये। गङ्गाधरस्य=भूतेशस्य।

चेयानि=एकत्रयितव्यानि।

परमानन्दसन्दोहस्य=प्रगाढहर्षसमूहस्य, मदेन, मन्थरा=मालस्या। व्याहृत्य=निगद्य। आनन्दाश्रुकलाभिः=हर्षास्रबिन्दुकणिकाभिः, आकुलितकपोला=विच्छुरितगण्डस्थला। अस्तोष्ट=स्तुतिमकार्षीत्। निमीलितचक्षुरेव=अस्खलितनयनैव। मनोरथमये=स्वाप्निके। मा स्म भैः=भयं मा कार्षीः। "स्मोत्तरेलङ् च"। यत्तु 'मा भैरिति' पाठं स्वीकृत्य पण्डितानामाह्वानं विचारकरणार्थम्; तत्तु बुद्धिवैशद्यवैभवविलसितमिति सन्तोष्टव्यम्। वाटिकाकुटजालान्तः=उद्यानलोकहसमूहान्तराले। भस्मोद्धूलितेन=भूतिच्छुरितेन। वलितः=वेष्टि-

वीरं बाहु-मूले गृहीत्वा समानाय्य "एष ते पतिर्गृह्णीष्वेति" कथयित्वा, तत्परिपूजित-मूर्त्तावेव निलीनः । स्वयञ्च बद्ध-सौवर्णोष्णीषम्, महार्ह-कञ्चुकम्, लोलचन्द्रहासम्, पुलकांशु-परिपूर्ण-लोल-लोचनम्, दृशा लिहन्तमिव, आलिङ्गन्तमिव, परिपिबन्तमिव च, वीक्षमाणाऽऽत्मानं विस्मृत्य चित्रार्पितेव जडीकृतेव पुत्तलिकायितेव, गत-चेतनेव मोहन-मन्त्र-मोहितेव च स्विन्ना, कण्टकिता, पुलकिता, वेपिता च, तथैव समस्थित ।

किञ्चित्क्षणानन्तरञ्च-"भद्रे ! क्षमस्व वारमेकमवलोकयैतं त्वदर्पित-जीवनम्"-इति मधुर-मधुरं कर्ण-रसायनं वचनमाकर्ण्य नयने उन्मील्य, तमेव जीवनाऽऽधारम्, ध्यान-विहित-साक्षात्कारम्, विलुलिताश्रु-धारम्, संसार-सारम्, प्रापित-परम-पीडा-पारावारम्, अभिहित-वचन-पीयूषाऽऽसारम्, रघुवीरसिंहमदर्शन ।

तः, व्यालबाल एव वलयो यस्मिन् तेन । पूर्वनिपातप्रकरणानित्यताप्रदर्शनार्थमेवं पाठः । षष्ठीतत्पुरुषो वा । बालव्याल इत्येवं पाठ इति बिभीषितवुद्धयः ।

परिपूजितमूर्त्तौ=सेवितप्रतिमायाम् । **बद्धसौवर्णोष्णीषम्**=धारितमहारजतशिरोवेष्टनम् । **महार्हकञ्चुकम्**=अतिशोभनाङ्गरक्षम् । **लोलचन्द्रहासम्**=चलदसिम् । पुलकांशुभिः परिपूर्णे लोले लोचने यस्य तम् । **लिहन्तमिव**=आस्वादयन्तमिवेत्युत्प्रेक्षा । एवमग्रेऽपि । **चित्रार्पितेव**=आलेख्यलिखितेव । **पुत्तलिकायितेव**=कृत्रिमकाष्ठस्त्रीत्वमापादितेव । **मोहनमन्त्रमोहितेव**=वशीकरणमन्त्रायत्तीकृतेव ।

कर्णरसायनम्=श्रोत्रानन्दजनकम् । **ध्यानविहितसाक्षात्कारम्**=चिन्तनानुभूतप्रत्यक्षम् । **विलुलिताश्रुधारम्**=प्रचलितास्रप्रवाहम् । **प्रापितपरमपीडापारावारम्**=लम्भितविपुलयन्त्रणासागरम् । **अभिहितवचनपीयू-**

दृष्ट्वैव चोत्थाय तस्य पादयोः पतित्वा, अनपेक्षित-व्रीडा, समनुभूत-चिर-विरह-पीडा-कलित-विक्षिप्त-क्रीडा, मुक्तकण्ठं रुरोद। सोऽपि च समानोद्गारोऽपि कथं कथमपि धैर्य्यमाधाय, भज्यमानेन स्वरेण सान्त्वयन्, कम्पमानैरङ्गैरुत्थाप्य, आलिङ्ग्य, कण्टकित-कराकलित-पटखण्डेन कपोल-तल-गलदश्रु-धारां प्रोञ्छितवान्, उपवेश्योपविश्य च कथितवान्-प्रिये! मामुद्दिश्य बहु कष्टं सोढवत्यसीति स्मारं स्मारं विदीर्यति हृदयम्। अहह!! कतिवारं नाहं निवेदितवान्-यद् मुधैव मादृशेऽकिञ्चित्करेऽव्यवस्थेऽनुरक्ताऽसि, अस्तु, व्यतीता सा दुरदृष्ट-दशा, तवैव पुण्यैरहमपि जीवामि, दुष्कीर्ति-वेदनां विधूय महाराजस्य परम-पुरस्कार-भाजनञ्च संवृत्तोऽस्मि। महाराजः स्वयमधुना तव पाणिं मां ग्राहयिष्यति, अधुना त्यजेमं संन्यासि-वेषम्, यदवलोकनेनापि खिद्यते चेतः।

पासारम्=कथितवचोऽमृतधारासम्पातम्। **अनेपक्षितव्रीडा**=अगृहीतलज्जा। समनुभूतया, चिरविरहपीडया, कलिता **विक्षिप्तक्रीडा**=उन्मत्तलीला यया सा। **मुक्तकण्ठम्**=स्फोटितगलम्। अतितारमिति यावत्। समानः, **उद्गारः**=दुःखोद्गमः, यस्य सः। **भज्यमानेन**=त्रुट्यता। विश्रङ्खलितेनेति यावत्। **कण्टकिते**=सरोमाञ्चे, करे, आकलितेन, **पटखण्डेन**=मुखप्रोञ्छनिकया। कपोलतलाद्, गलन्तीम्=पतन्तीम्, अश्रुधाराम्। **उपवेश्य**=सौवर्णीं प्रतिष्ठाप्य। **उपविश्य**=स्वयमास्थित्य। **विदीर्यति**=द्विधा भवति। **अकिञ्चित्करे**=कार्यासाधके, कर्तुमशक्ते। अव्यवस्थे=स्थित्यादिव्यवस्थारहिते। **दुष्कीर्त्तिवेदनाम्**=दुर्यशोयन्त्रणाम्। **विधूय**=तिरस्कृत्य।

अहह ! क्व ते नवनीत-कोमलान्यङ्गानि ? क्व चैतद् ब्रह्मचर्यम् ! न तव प्रकृति-कुञ्चिताः कचा जटा-जूटतामर्हन्ति. नेयं त्वग् भसित-सङ्घर्षमर्हति, नायं मौक्तिक-माला-गौरवमपि सग्लानि सहमानः कन्धरो रुद्राक्ष-राशि-भार-कष्टमर्हति, न वेयं कुसुम-शयन-सनाथन-प्रार्थना-भाजनं गात्र-यष्टिः स्थण्डिल-शय्यामर्हति । तदुत्तिष्ठ, सनाथय स्व-वास-भवनम् , समुज्जीवय वृद्धं देवशर्म्माणं पुरोहितम् , समासादय च चिरत्यक्त-प्रकृति-सिद्धं निज-वेषम् ! गच्छाम्यहमधुना, मदर्थमेव चिराङ्गीकृत-ब्रह्मचर्य्यं स्वपितरं प्रशान्तुम् । ततश्च राजमाताऽपि कुशलमावेदनीया, क्षम्यताम् , क्षम्यताम् , साम्प्रतं नास्ति मेऽवकाशः । कदाचिद् वेत्ति भवती यद्-अद्यैवापराह्णे महाराष्ट्रराजस्य प्रताप-दुर्ग-प्रवेशः—इति । नास्त्यद्यास्माकमवसरः क्षणमप्यन्यथाऽतिवाहयितुम—इत्यनुमन्यसे चेत्साधयामि ।

नवनीतवत्=हैयङ्गवीनवत्, **कोमलानि**=मृदूनि । क्व चैतद्ब्रह्मचर्यमिति विषमालङ्कारः । **प्रकृतिकुञ्चिताः**=स्वभाववक्राः । **जटाजूटताम्**=जटात्मना बन्धनताम् । **इयम्**=ईदृशी । विशिष्टेति यावत् । **भसितसङ्घर्षम्**=भूतिमर्दनम् । **मौक्तिकमालागौरवम्**=मणिस्रग्गुरुताम् । **सग्लानि**=सखेदानुभवम् । रुद्राक्षराशीनां भार एव कष्टम् । **कुसुमशयनसनाथनस्य**=पुष्पशय्यास्वीकरणस्य, प्रार्थनायाः, **भाजनम्**=आधारीभूतम् । **स्थण्डिलशय्याम्**=अपरिष्कृतभूशयनम् । **सनाथय**=शोभय । **चिराङ्गीकृतब्रह्मचर्यम्**=दीर्घकालगृहीतमैथुनत्यागव्रतम् । **आवेदनीया**=बोधनीया । **अवकाशः**=अवसरः । **अतिवाहयितुम्**=समापयितुम् । **साधयामि**=गच्छामि । नाटकीयभाषेयमिति साहित्यदर्पणादिषु स्फुटीकृतम् ।

सा त्वानन्द-परवशा जडीकृतेव चित्रार्पितेव मन्त्र-कीलितेव माया-मोहितेव विक्रीत-चित्तेव हारित-हृदयेव मथित-मानसेव च विविध-भाव-भङ्ग-तरङ्गिताभ्यां नयनाभ्यां निपुणमीक्षमाणा, अविरल-गलन्नयन-जल-धारया भसित-सम्मर्दमिव क्षालयन्ती, मन्दं मन्दं मुहूर्त्तमालप्य तं विससर्ज्ज। स च ततः प्रचलितो बहुभिः साश्चर्य्यं सानन्दञ्च दरीदृश्यमानो मोमोद्यमानः सत्करीक्रियमाणश्च यथोचितं तांस्तान्प्रणमन्, आलिङ्गंश्च, मारुति-मन्दिरमासाद्य सरोमाञ्चं सगद्गदं सानन्दञ्च हनूमन्मूर्त्तिं दृशं दृशं स्तावं स्तावं पातं पातं नामं नामञ्च परमं मोद-सन्दोहमवाप। तत्पूजकेन साशीराशि समाश्लिष्टः, प्राप्त-प्रसाद-मालः, सम्पादित-सिन्दूर-तिलक-भालः, क्रियासमाभिहारेण प्रणम्य, किञ्चित समालप्य, देवशर्म्मणो मठञ्च प्रविश्य, 'दासोऽयं रघुवीरसिंहः प्रणम-

---

आनन्दपरवशा=हर्षाधीना। मन्त्रैः, कीलितेव=यन्त्रितेव। मायामोहितेव=इन्द्रजालमूढेव। हारितहृदयेव=चोरितमानसेव। मथितमानसेव=विलोडितस्वान्तेव। अविरलम्=सततम्, गलन्त्या नयनजलधारया। भसितसम्मर्दम्=भूतिसम्मिश्रणम्। क्षालयन्ती=धावयन्ती। विससर्ज=तत्याज। गन्तुमादिदेशेति यावत्। मोमोद्यमानः=प्रसासद्यमानः। सत्करीक्रियमाणः=सत्कारगोचरतामानीयमानः। दृशं दृशम्=दृष्ट्वा दृष्ट्वा। स्तावं स्तावम्=स्तुत्वा स्तुत्वा। पातं पातम्=पतित्वा पतित्वा। नामं नामम्=नमस्कृत्य नमस्कृत्य। मोदसन्दोहम्=प्रसन्नतासमूहम्। साशीराशि=सानेकाशीर्वादम्। समाश्लिष्टः=समालिङ्गितः। प्राप्तप्रसादमालः=लब्धहनूमदर्पितस्रक्कः। सम्पादितसिन्दूरतिलकभालः=भूषितनागकेशरतिलकमस्तकः। मठम्=छात्रादिनि-

तीति'साष्टाङ्गं प्रणनाम ।

देवशर्म्मा तु चिर-समयानन्तरं तादृशं स्वरं वचनञ्चाऽऽकर्ण्य, पादयोः पतितां तादृशीं मूर्त्तिञ्चावलोक्य चकितः, क्षणं जड इव स्तब्धः परस्ताच्चोत्थाय, उपनेत्रं श्मश्रु-कूर्चञ्च प्रक्षाल्य, पतन्ती-भिर्बाष्प-धाराभिस्तमासिच्य, आनन्दाक्षतैरिव वात्सल्य-रजता-ङ्कुरैरिव प्रेम-पीयूष-धारोद्गारैरिव निःसरद्भिः कष्ट-कण्टकैरिव च समुदञ्चितैः श्वेत-रोमभिर्व्याप्तः, कलित-द्विगुण-कम्पाभ्यां कराभ्यां कथमपि तमुत्थाप्य, वलित-वली-पलितेऽस्थि-चर्म्ममात्रे वक्षसि गाढमालिलिङ्ग । सोऽपि च देवशर्म्म-प्रेम-पूर-द्विगुणो-द्वेल्लित-बाष्पो निःशब्दमेव क्षणं रुदित्वा, शनैः शनैर्भग्नेन स्वरेण स्वीयमितिवृत्तं सूचयित्वा, ततस्ततः 'मपदि गन्तव्यमिति महा-राष्ट्र-चक्रवर्त्ती, अद्यैवाऽऽयास्यति' इति च निवेद्य, तदनुमतिमा-मात्र, नत्वा, निवृत्य, तुरग-निगालमारस्फाल्य, मोत्फालमारुह्य, लयम् । प्रथमान्त एवम्भूतोऽमरः । साष्टाङ्गम्=समस्तशरीरपातम् ।

स्तब्धः=स्थगितः । बाष्पधाराभिः=अश्रुप्रवाहैः । तम्=रघुवीरम् । श्वेत-रोमाण्युत्प्रेक्षते-आनन्दाक्षतैरिव=हर्षतण्डुलकणैरिव । वात्सल्यम्=लघं प्रेम, एव रजतं तदङ्कुरैरिव=तत्प्ररोहैरिव । प्रेमपीयूषधारोद्गमैरिव=अनुरागामृत-प्रवाहोद्भूतिभिरिव । निःसरद्भिः=बहिर्भवद्भिः । कष्टानि=दुखानि, एव कण्ट-कानि तैः । समुदञ्चितैः=रोमाञ्चितैः । व्याप्तः=वलयितः । कलितः=धारितः, द्विगुणः, कम्पः=वेपनं यस्यां ताभ्याम् । वलितवलीपलिते=प्राप्तवार्धक्यश्वेतकेशे । अस्थिचर्ममात्रे=कीकसकृत्तिमात्रावशिष्टे । वक्षसि=उरसि । देवशर्मप्रेमपूरेण, द्विगुणोद्वेल्लितम्=द्विगुणोच्छलितम् , बाष्पं यस्य सः । भग्नेन=त्रुटितेन । इति-वृत्तम्=पूर्वतनमितिहासम् । अनुमतिम्=आदेशम् । तुरगनिगालम्=अश्व-

अभीपूनाक्षिप्य रेचितकेनाश्वं चालयन, पलाशिनां मण्डलेषु निलीनः।

तत्र कुटीरे ब्रह्मचारि-गुरु-रूपो जटिलो वीरेन्द्रसिंहस्तु, अद्य रजन्यां स्वप्ने 'कस्मिंश्चिद् युद्धे रघुवीरसिंहो वीरगतिं गतः;—इत्यपश्यदिति सचीत्कारमुत्थितः पार्श्वस्थैर्दृष्टो रुदन यथावृत्तमकथयत। यः स्वापेष्वेवं दृश्यते; स दीर्घायुर्भवति पुरुषायुषं जीवतीति क्रियासमभिहारेण तैः सान्त्व्यमानोऽपि शोकविमोकं नाकार्षीद्।

अथ वीर-क्षत्रियोऽपि वृद्धः—इति, चिरानुभूत-सुत-वियोग-दुःख इति च खिद्यतेतमां वीरेन्द्रसिंहः—इति सर्वथा सान्त्वयितव्यः सुखयितव्यश्चायमिति, सर्व ऊर्जस्वलैरुदारैर्वागासारैस्तच्छोकाग्निं मन्दं चक्रुः।

तावत्प्रविश्यैकेन ब्रह्मचारि-बटुना स्वसमान-वयसमपरमेकं बटुमिङ्गितेनाऽऽहूय बहिर्नीत्वा निर्दिश्य कथितम्—"पश्य पश्य,

---

गलोद्देशम्। **सोत्फालम्**=सकूर्दनम्। **अभीपून्**=रश्मीन्। अश्वाकर्षणरज्जुमिति यावत्। **पलाशिनाम्**=द्रुमाणाम्। **निलीनः**=अदृश्यतामागतः।

जटिलः=जटावान्, ब्रह्मचारी। **वीरगतिम्**=सम्मुखमरणम्। **यथावृत्तम्**=यथाजातम्। **स्वापेषु**=शयनेषु। **पुरुषायुषम्**=शतं वर्षाणि, पञ्चविंशत्युत्तराणीति चापरे। शोकस्य **विमोकम्**=त्यागम्।

चिरानुभूतसुतवियोगदुःखः=दीर्घकालाभ्यस्तपुत्रविरहखेदः। **सान्त्वयितव्यः**=साम लम्भयितव्यः। **ऊर्जस्वलैः**=बलशालिभिः। **वागासारैः**=वाणीधारासम्पातैः। तस्य शोक एवाग्निस्तम्। रूपकम्। **मन्दम्**=शमितम्।

स्वसमानवयसम्=स्वतुल्यावस्थाकम्। **इङ्गितेन** = चेष्टया।

कृष्ण-कर्णम्, चञ्चच्चन्द्र-वर्चसम्, उन्नत-ग्रीवम्, मेचक-कच-प्रचय-वीजित-निगालम्, धूम्र-लाङ्गूलोद्धूनन-विहित-चामर-चालन-चातुर्य्यम्, चर्वणावशिष्टैः प्रत्यर्थि-यशोभिरिव फेनैरालिप्त-सृक्किणीकम्, तुरगममुं चालयन्, कोऽसौ धन्यः कुटीरमिवोद्दिश्योपत्यकां परिक्रम्य, इत आयाति ? अनुकरोत्येतस्याऽऽकृतीरघुवीरसिंहम्, हयाऽऽरोह-भङ्गी चैषा नान्यस्य सम्भोभवीति"।

अथ सोऽपि गाढं निरीक्ष्य प्रावोचत्—"यद्यपि चिरात् प्रनष्टो रघुवीरः कथमकस्मादेवामुना वेषेण समागच्छेदिति संशेते हृदयम्; तथाऽपि चक्षुषी कथं न विश्वसेयम्? ध्रुवं रघुवीर एवासौ! अथान्यमपि दर्शयामि—इत्युक्त्वा, अन्तः प्रविश्य, द्वित्रानिङ्गितैराकार्य्य दर्शयाम्बभूव।

निर्दिश्य = प्रदर्श्य। **चञ्चच्चन्द्रवर्चसम्** = चमत्कुर्वद्रात्रिपतितेजस्कम्। **उन्नतग्रीवम्** = उत्कन्धरम्। **मेचकेन** = कृष्णवर्णेन, **कचप्रचयेन** = केशव्रातेन, वीजितः, **निगालः** = गलोद्देशो यस्य तम्। **धूम्रलाङ्गूलस्य** = कृष्णपुच्छस्य, **उद्धूननेन** = सञ्चालनेन, **विहितम्** = प्रकटीकृतम्, चामरचालनचातुर्यं येन तम्। **चर्वणावशिष्टैः** = निगरणशेषभूतैः। **प्रत्यर्थियशोभिरिव** = शत्रुकीर्त्तिभिरिव। **फेनैः**=डिण्डीरैः। **आलिप्तसृक्किणीकम्**= व्याप्तोष्ठप्रान्तभागम्। **उद्दिश्येव**=लक्ष्यीकृत्येव। **उपत्यकाम्**=पर्वतासन्नभूमिम्। **अनुकरोति**=विडम्बयति। **हयारोहभङ्गी**=अश्वारोहणशैली। **सम्भोभवीति**=अतितरां सम्भवति।

प्रनष्टः=अदृष्टिपथगः। **संशेते**=सन्देहं करोति। **चक्षुषी**=नेत्रे। कर्म। **अन्यम्**=इतरम्। **आकार्य्य**=आहूय।

तावद् विद्युद्वेगेन नेदीयान् संवृत्तोऽयमश्वः, सर्वे च 'निश्चितमसौ रघुवीरसिंहः'—इति स्पष्टं व्याजहुः।

ततः केचिन् "सोऽयं सोऽयम्" केचिद्—"दिष्ट्या जीवति"; केचिद्—"अहो! आनन्दः"; केचिद्–"कथं न स्यादीदृशी प्रसूतिः क्षत्रिय-धौरेयाणाम्"! केचिद्—"समाकर्णि मया पूर्वमेव यत्तोषितप्रभुः समायाति रघुवीरः"—इतिः केचिद्—"सत्यं खलु भविष्यद्वचनं देवशर्म्मणः;" केचिद्—"फलमिदं वीरेन्द्रसिंह-महाव्रतस्य"; केचिद्–"विजृम्भित एष सौवर्ण्यास्तपसां परिणामः"; केचिच्च—"उच्यतामुच्यतां वीरो वीरेन्द्रसिंहः"–इति परस्परमूचुः।

तावज्झटिति प्रविश्य "जीवति रघुवीरसिंहः, समायातो रघुवीरसिंहः, एष बहिरुपस्थितो रघुवीरसिंहः, दृश्यतां रघुवीरसिंहः, लभ्यतां रघुवीरसिंहः"—इति क्रियासमभिहारेण वदतां बटूनां मुखमवलोकयन्, परिवृत्त-दृष्टिः, विस्मृतात्मा, व्यामुग्ध इव क्षणं स्तब्ध एव समतिष्ठत वीरेन्द्रसिंहः। अथ तैरुत्थाप्यमानः किञ्चिद्विश्वस्य बहिरायातः। तावद् रघुवीरसिंहागमन-कोलाहलेन व्याप्तमभूत् कुटीर-द्वारम्।

विद्युद्वेगेन=चपलाजवेन। नेदीयान=अतिनिकटस्थितः। व्याजहुः=कथयाञ्चक्रुः।

प्रसूतिः=सन्ततिः। क्षत्रियधौरेयाणाम्=बाहुजश्रेष्ठानाम्। समाकर्णि=श्रुतम्। विजृम्भितः=प्रकटीभूतः। परिणामः=फलम्।

झटिति=त्वरितम्। परिवृत्तदृष्टिः=अन्यतः प्रहितचक्षुः। व्यामुग्ध इव=व्यामूढ इव। विश्वस्य=विश्वासमाधाय।

रघुवीरोऽपि, दूरादेव हस्तमुद्यम्य, अङ्गुल्या स्वं दर्शयतो वेगेन निविशमानान् पुनर्बहिरागच्छतः स्वात्मीयान् कथं कथमपि बहिरुपयान्तं बाष्प-धाराऽऽसारैः स्नातं पितरञ्च पश्यन्; अश्रु-कलाऽऽकुलित-लोचनः क्षणेन तुरङ्गमं कुटीरद्वारमानयत्। कदाऽसावत्र समायातः? कदाऽश्वपृष्ठादुत्प्लुतः? कदा वा तातस्य चरणयोः साष्टाङ्गं पतितः?—इति न लक्षितः केनापि। तयोर्म्मलनावलोकन-चकित इव महापरिणाहो गतसन्नाहो विगलत्स्वेदप्रवाहो बाहोऽपि दीर्घं निश्वसन् स्वतन्त्रोऽपि परतन्त्र इवैकतस्तस्थौ। वीरसिंहस्तु स्व-रोदनेन तमपि स्फुटं रोदयन्, उत्थाप्य गाढमालिलिङ्ग। योऽयमस्मिन् समये परितः समभूत् प्रेम-पूर-प्रवाहः; स कथमिव वर्णयितुं शक्यः स्यादस्मादृक्षैः? यतो यैरनुभूतस्तैरप्यात्मा विस्मृत इति तैरप्यशक्य एव व्याख्यातुम्।

अथ मुहूर्त्तानन्तरं सर्वेऽपि कुटीरान्तः प्रविष्टाः, कटेषु चोप-

---

उद्यम्य=अवरुध्य। निविशमानान्=प्रविशतः। स्वात्मीयान्=स्वसम्बन्धिनः। उपयान्तम्=समागच्छन्तम्। बाष्पधारासारैः=अश्रुवेगवर्षैः। स्नातम्=निर्णिक्तम्। तुरङ्गमम्=हयम्। उत्प्लुतः=उत्कूर्दितः। पतितः=प्रणतः। न लक्षितः=नावलोकितः। महापरिणाहः=अतिविशालः। गतसन्नाहः=दूरीभूतखेदः। विगलत्स्वेदप्रवाहः=निष्कमद्धर्मबिन्दुपूरः। बाहुः=अश्वः। स्वतन्त्रोऽपि=अयन्त्रितोऽपि। परतन्त्र इव=अस्वाधीन इव। तमपि=रघुवीरमपि। स्फुटम्=प्रत्यक्षम्। प्रेमपूरप्रवाहः=अनुरागवारिनिर्झरणम्। अनुभूतः=अनुभवगोचरीकृतः। आत्मा=स्वः। विस्मृतः=अनवधारितः। अशक्यः=अनर्हः। व्याख्यातुम्=कथयितुम।

विष्टाः। वटुकेनैकेन निरभीपृकृत्य घोटको द्रुमशाखायां बद्धः, अपरेण च सरोवरस्यापरतटे निकुञ्जे स्थितो गणेशशास्त्री सूचितः। सोऽपि च हर्ष-वर्ष-परवशः, क्वचिन् कुशान् क्वचित्पात्रं क्वचिदुत्तरीयं क्वचिच्च मालां पातयन्; स्वयमपि निपतन्निव धावमानः कुटीरं प्रविष्टः।

रघुवीरस्तु दृष्ट्वैनमुत्थाय साष्टाङ्गं चरणयोः पतितः। सोऽपि च बाष्प-पूर-प्लावित-नयनः, वैक्लव्य-द्विगुणीकृत-सहज-कम्पः, कथं कथमप्युत्थाप्य वीर-बालकमेनं पौनःपुन्येन दक्षतो वामतश्च गाढमालिलिङ्ग। मुहूर्तं यावत् पारस्परिक-प्रेम-पूर-प्रवाहाऽऽवर्त्त-गर्त्त-परीपतन-भीतेव न कुतोऽपि प्रचचार वाणी।

ततो रघुवीर एव धैर्य्यमवलम्ब्य, पटान्तेन चक्षुषी परिमृज्य, वीराऽऽसनेन पातित-जानुद्वयमुपविश्य, उदारया वाचैवमाललाप-

---

कटेषु=कुशासनेषु। **निरभीपृकृत्य**=निष्प्रग्रहीकृत्य। **द्रुमशाखायाम्**=वृक्षावयवे। **निकुञ्जे**=वाटिकायाम्। **हर्षवर्षपरवशः**=आनन्दवृष्ट्यधीनः। **निपतन्निव**=स्खलन्निव। **धावमानः**=त्वरया चलन्।

एनम्=गणेशशास्त्रिणम्। अन्वादेशत्वादेनादेशः। **बाष्पपूरेण प्लाविते**=द्रुते, नयने यस्य सः। **वैक्लव्येन**=विकलतया, **द्विगुणीकृतः, सहजः**=स्वाभाविकः, कम्पो यस्य सः। **पारस्परिकप्रेमपूरप्रवाहस्य**=आन्योन्यानुरागोच्छलज्जलधारायाः, **आवर्त्ताः**=अम्भसां भ्रमा एव, **गर्त्ताः**=गम्भीरस्थानानि, तेषु, **परीपतनभीतेव**=ब्रुडनभयाक्रान्तेव। **प्रचचार**=निश्चक्राम। **वाणी**=भारती। कियत्कालं मौनिनौ स्थिताविति यावत्।

पटान्तेन=वसनप्रान्तेन। **परिमृज्य**=प्रोञ्छ्य।

"तात ! न वचनीयं किमप्यावयोर्व्यतीत-व्याकुलता-विषये, सोढमस्माभिः प्राक्तन-कर्म्मणां फलम्। कर्ण-परम्परया सर्वं श्रुतवानस्मि भवतस्तत्रभवतः पुरोहितस्य च वृत्तान्तम्। चिरायात्रैव वसतामप्यस्माकं नाभूत् पारस्परिक-साक्षात्कारः। नेदिष्ठानामपि परस्पर-दिदृक्षा-क्षाम-हृदयानामप्यपरिचिन्वतां चित्तानि चिरमाक्रान्त-चिन्तान्यासन्। सुखमेधतां परस्मिन्नपि लोके क्रूरसिंहः; यस्य पौरुषेण मिलिता वयम् !

नूनं भोक्तव्यं भोगेनैव समाप्नोति तदुःखमिदं घनीभूय प्रकटित-परिचयानां युष्माकम्, तिरोहित-परिचयस्य च मम शिरस्यापतितमनुभूतं चासहायेन हृदय-हृतकेन। परमधुना गतास्ता विद्रावित-निद्रास्तन्द्रा-दरिद्रा महायाम-यामिन्यो यामिन्यः। मम भाग्यैः कुशलिनो भवन्तः। भवतां तपोबलेनाहमपि पुनर्म्म-

---

सोढम् =समनुभूतम्। कर्णपरम्परया=कर्णाकर्णिकया। पारस्परिक-साक्षात्कारः=आन्योन्यप्रत्यक्षीभवनम्। नेदिष्ठानाम्=अतिनिकटे स्थितानाम्। परस्परम्=इतरेतरम्, दिदृक्षया=द्रष्टुमिच्छया, क्षामम्=दुर्बलम्, हृदयं येषां तेषाम्। अपरिचिन्वताम् =परिचयमप्राप्नुवताम्। आक्रान्त-चिन्तानि=चिन्तनानुस्यूतानि। सुखम्=सानन्दम्। क्रियाविशेषणम्। एधताम्=वर्द्धताम्। परस्मिन्=स्वर्गादिके। पौरुषेण=पुरुषार्थेन।

नूनम्=निश्चितम्। भोक्तव्यम्=सहनीयम्। भोगेनैव=सुखदुःखसाक्षात्कारेणैव। घनीभूय=सान्द्रीभूय। प्रकटितपरिचयानाम्=विशकलितपरिचितीनाम्। असहायेन=एकाकिना। विद्रावितः=दवयिताः, निद्राः,याभिस्ताः। तन्द्रादरिद्राः=निद्रापूर्वावस्थयाऽपि शून्याः। महायामयामिन्यः=दीर्घप्रहर-

हाराजस्य तोष-भाजनं संवृत्तोऽस्मीति किमतः परं स्यान्मे कुशलम्?

यवनराज-निगृहीतोऽपि भारतस्य भाग्येन कुशलेन प्रतिनिवृत्तो महाराष्ट्र-मेदिनी-मण्डलाऽऽखण्डलः। तन्मङ्गलमयेऽस्मिन समये नोदासितव्यं भवद्भिः।

सार-गर्भामुपदेश-पूर्णां व्याकुलता-विरहितां धैर्य्य-धुरीणां कोमलाममलां वाचममुमाकर्ण्य सर्वेऽपि साधुवाद-पराधीनाः परमानन्द-सन्दोह-समुद्वेल्लद्बाष्प-बिन्दु-व्रजेनाऽऽत्मानं क्षालयाम्बभूवुः। ततो मुहूर्त्तमभूवन तेषामालापा बहुविधाः। येषु पदे पदे कण्ठरोधः, पदे पदे बाष्प-धाराः, पदे पदे रोमाञ्चः, पदे पदे स्वरभङ्गः, पदे पदे दीर्घनिश्वासः, पदे पदे वेपथुः, पदे पदे च वैकल्यम्। कस्तानालापान् अनुवदितुं पारयेत्? को वा तान कलित-कम्पयाऽविरल-गलन-साञ्जन-वारि-धारया चटुलित-चञ्चु-पुटया लेखन्या लिखितुमभिमन्येत?

अथ वीरेन्द्रसिंहं सम्बोध्य, गणेशशास्त्रिणा कथितम्—

वीरवर! फलितं भवतस्तपोभिः, तदधुना यथाविधि व्रतं समाप्य, ब्रह्मचारि-वेषं विहाय पुना राजवेषमासादयतु भवान्।

युताः। यामिन्यः=निशीथिन्यः। तोषभाजनम्=प्रसन्नतापात्रम्।

नोदासितव्यम्=नोदासीनैर्भाव्यम्।

सारगर्भाम्=सतत्त्वाम्। धैर्यधुरीणाम्=धीरताभारधारिणीम्। कोमलाम्=मृद्वीम्। अमलाम्=निर्दूषणाम्। परमानन्दसन्दोहेन=अत्युत्कटहर्षसमूहेन, समुद्वेल्लता=समुच्छलता, बाष्पबिन्दुव्रजेन=अश्रुकणगणेन। क्षालयाम्बभूवुः=धावयामासुः।

तावत्तत्कुटीरनिवासिभिः सर्वैरपि बटुभिरेवमेवमिति यौगपद्येनोक्त्वा "साध्यतां साध्यताम्" इति गणेशशास्त्रिणा समाज्ञप्तैरुत्थाप्य, तदुक्त-प्रकारेण सामग्री-साधनमारब्धम् ।

तावद्वायु-वेगेन समुपातिष्ठत तत्र कश्चनाश्वारोहः । तञ्च खेद-स्वेद-दुर्दिन-स्नातं त्वरित-श्वास-प्रश्वासं तादृशेनैव सैन्धवेन प्रापितमालोक्य यावत्किमिति-किमित्यापृष्टमखिलैस्तावत् स समुवाच, श्रुतं वीर-रघुवीरसिंहः समायातः-इति ।

तदाकर्ण्य सपदि रघुवीरसिंहेनोक्तम्-आम्, एषोऽस्मि, कः कुशल-वृत्तान्तः ?

स उवाच-भगवती महाराष्ट्र-राजमाता भवन्तमत्राऽऽगतं श्रुतवतीति गलज्जलाभ्यां नयनाभ्यां भवतः पन्थानमीक्षते ।

श्रुत्वैवैतत्प्रणम्य पितरं पुरोहितञ्च रघुवीरः समुत्थाय निजमश्वमारूढः ।

स च सादी स्वेङ्गितमनुसृत्य, केनापि बटुना समानीतमपरमश्वमारुह्य, एनमार्द्रपृष्ठीकरणाय तान समर्प्य, रघुवीरमनुचचाल ।

यौगपद्येन=ऐककालिकेन । साध्यताम्=सम्पाद्यताम् । समाज्ञप्तैः=समादिष्टैः । सामग्रीसाधनम्=वस्तुव्रजैकत्रीकरणम् ।

तादृशेनैव=स्वेदस्नातेन त्वरितश्वासेन च । प्रापितम्=लम्भितम् । अखिलैः=सकलैः ।

गलज्जलाभ्याम्=निपतद्वारिभ्याम् ।

स्वेङ्गितम्=स्वचेष्टितम् । अनुसृत्य=विज्ञाय स्वीकृत्य च । एनम्=आगमनं येन कृतं तमश्वम् । आर्द्रपृष्ठीकरणाय=क्लिन्नपृष्ठतासम्पादनाय ।

पश्यत्स्वेव च सर्वेषु, तौ खुराग्रेण शारद-घन-पटलमिव रेणुका-राशिमुद्गिरन्तौ, प्रलम्ब-पुच्छौ, आयत-ग्रीवौ, समीरण-संसरण-संस्तब्ध-कण्ठकेशौ, सप्तसप्ति-सप्तिदर्पं दूरीकर्त्तुमिव विद्रुतौ, अङ्गार-परिपूर्णामिव भुवमुत्फालमुत्फालं पलमेकं स्पृशन्तौ, वाजिनौ चाल-यन्तौ, सर्जार्जुन-भूर्ज-खर्जूर-वने निलिल्याते।

गणेशशास्त्री तु सहर्षवर्षं वीरमाशीराशिभिरभिनन्द्य, विधि-पूर्वं व्रतोत्सर्गं कर्म निर्वर्त्य, चिर-प्रवृद्धान् रूक्षान् केशान् वाप-यित्वा, उद्वर्त्य, अभ्यङ्ग्य, स्नापयित्वा, नवाम्बराणि परिधाप्य, देवान् ब्राह्मणान् प्रणमय्य, महोत्सवमकारयत्।

तावदवितर्कितसमागमः समुपातिष्ठतैको जयपुरनगरात् सादी। स च जयपुराधीश्वर-श्रीजयसिंहमहाराजार्पितं पत्रमेकं वीरेन्द्रसिंहायार्पयत्। स च सुवर्ण-वर्णाङ्कितं विविध-वर्ण-वर्ण-

---

अनुचचाल=अनुससार। शारदघनपटलमिव=घनान्तमेघसमूहमिव। रेणुकाराशिम्=धूलिनिकरम्। उद्गिरन्तौ=उद्वमन्तौ। समीरवत्=वायुवत् संसरणेन=तीव्रगमनेन, संस्तब्धाः, कण्ठकेशाः, ययोस्तौ। सप्तसप्तिः=सूर्यः, तस्य सप्तीनाम्=अश्वानाम्, दर्पम्=अभिमानम्। विद्रुतौ=पलायितौ। अङ्गारेण=वह्निखण्डेन, परिपूर्णामिव=परितो व्याप्तामिव। उत्फालमुत्फालम्=कूर्दित्वा कूर्दित्वा। पलम्=दण्डषष्टिभागम्। निलिल्याते=लीनौ बभूवतुः।

व्रतोत्सर्गम्=व्रतसमाप्तौ क्रियमाणं कर्म। निर्वर्त्य=कारयित्वा। रूक्षान्, तैलाद्यसंसर्गित्वात्। वापयित्वा=कर्त्तयित्वा। उद्वर्त्य=उद्वर्त्तनमनुलिप्य। अभ्य-ङ्ग्य=तैलं संमर्द्य। नवाम्बराणि=नूतनवासांसि।

अवितर्कितसमागमः=अचिन्तितागमनः। समुपातिष्ठत=समुपावि-

र्नीय-कुसुम-माला-चित्र-विचित्रितं प्रावरणमपसार्य्य, तादृक्षैरेव जाम्बूनदाक्षरैर्व्याप्तं पत्रं निस्सार्य्य, पठनाय गणेश-हस्त आर्पयत। स तु निपुणमवलोक्यैवमपठत्—

"स्वस्तिश्रीदिगन्त-दन्त-दन्तुरित-कीर्त्ति-कौमुदी-धवलित-वसुधातल-राजपुत्रदेश-चूडामणीभूत-जयपुरप्रदेश-सामन्त-मण्डली-मस्तक-मण्डन-मण्डित-पादारविन्दो जयपुराधीशः साशीराशि सूचयति श्रीवीरेन्द्रसिंहं यद्—

भवाननुक्त्वैवास्मान् कुतोऽपि प्रस्थितः, अन्वेषणैरपि च न लब्धः-इति चिरमन्वभूम चिन्ता-कलापम्। इतस्तु भवतः कुशलमवगत्य प्रसीदामः। मन्महे कुशली कुमाररामसिंहोऽप्युपलब्धः।

शत्। **सुवर्णवर्णाङ्कितम्**=हैरण्यवर्णभूषितम्। **विविधवर्णवर्णनीयेन**=अनेकरङ्गरञ्जितेन, कुसुममालाचित्रेण, **विचित्रितम्**=आलिखितम्। **प्रावरणम्**=पत्राच्छादनकम्। "लिफाफा"इति हिन्दी। **जाम्बूनदाक्षरैः**=सुवर्णवर्णैः। **व्याप्तम्**=युक्तम्। **आर्पयत्**=अदात्।

स्वस्ति=कल्याणम्। स्वस्तिश्रीत्यारभ्य पत्रलेखनशैली प्राक्तनी। **दिगन्तानाम्**=हरिदन्तरालानाम्, **दन्तैः**=दशनैः, तदुपलक्षितैर्मुखैरिति यावत्, **दन्तुरितया**=गर्भीकृतया, **कीर्त्तिकौमुद्या**=यशश्चन्द्रिकया, **धवलितम्**=श्वेतितम्, वसुधातलं यस्य, तादृशो यो **राजपुत्रदेशः**=राजपुत्रायतप्रदेशः, **तच्चूडामणीभूतः**=तच्छेखररत्नीभूतः, यो जयपुरप्रदेशः, तस्य **सामन्तमण्डलीनाम्**=माण्डलिकौघानाम्, **मस्तकमण्डनैः**=शिरोभूषणैः, **मण्डितम्**=भूषितम्, पादारविन्दं यस्यैवम्भूतः। **साशीराशि**=अनेकाशीर्वादपुरस्सरम्। **सूचयति**=बोधयति।

अनुक्त्वैव=अकथयित्वैव। **चिन्ताकलापम्**=चिन्तनव्रातम्। **अवगत्य**=

इतस्त्वखिलाऽपि भवतः सम्पत् सुरक्षिताऽस्ति, नियत-व्यय-माहात्म्यात् कोषोऽपि सुप्रवृद्धोऽस्ति। शीर्णानि जीर्णान्यपि च भवतो निवास-भवनानि नूतनीकृतानि सन्ति। तत् समागम्यताम्। चिर-प्रवृद्ध-तृष्णा-सुखा क्रियतां स्व-प्रजा। सपद्यस्माभिरश्वमेध-यज्ञ-महोत्सवः करिष्यते।

सर्वेऽप्यस्मद्बन्धुजनाः समयेऽस्मिन् समुपस्थास्यन्ते। आशास्महे सकुमारो भवानप्यागत्य सर्वान् बन्धूनानन्दयिष्यति, स्वयञ्च महोत्सव-साक्षात्कारेणातुलं मोदमासादयिष्यति।

कुमार-रामसिंहस्य सुक्षत्रियोचितं पराक्रमं सौशील्यञ्चावलोक्य तुष्यामस्तमाम्। एतस्मै सुबहुल-भूभाग-वितरण-पुरस्सरं मण्डलेश्वरता-पर्य्यवसायि राजपदमर्पयामः, तत्सूचकमिदं सविचरणमपरमाज्ञापत्रमेतेन सहचरितमस्ति। एनदपि स्वीकृत्य सकुमारस्याऽऽगमनेन भूषणीयोऽयं देशः"—इति।

तदाकर्ण्य सर्वेऽप्यत्यन्तं जहृषुः। तदपरमपि राजमुद्राङ्कितं प्रसार्य्य 'एवमेवमिति' श्रावितम्। तदाकलय्य चाखिलाः—"अहो!

विज्ञाय। उपलब्धः=मिलितः। नियतस्य=निश्चितस्य, व्ययस्य, माहात्म्यात्=गौरवात्। कोषः=निधिः। शीर्णानि=विश्लथशिथिलितावयवानि। जीर्णानि=पुरातनानि।

पराक्रमम्=बलम्। सौशील्यम्=सुशीलताम्। तुष्यामस्तमाम्=अतितरां प्रसीदामः। मण्डलेश्वरतायाम्=माण्डलिकतायाम्, पर्यवसायि=समाप्तिमत्। राजपदम्=राजात्मिकां पदवीम्। सविवरणम्=सविशदकलनम्। एनत्=आज्ञापत्रम्। भूषणीयः=मण्डयितव्यः।

औदार्य्यं महाराजजयसिंहस्य ! अहो ! वैचित्री दैव-घटनायाः !! युक्तमिदं यथोचितमिदं रामसिंहाचारस्य !! प्रत्यक्षाण्येतानि फलानि वीरेन्द्रसिंहस्य नैष्ठिक-तपसाम् !!"—इति सामोदं व्याजह्रुः।

गणेशशास्त्री तु-"अश्वमुन्मोचय, अत्रैव निवस दिनमेकम्, श्वः प्राप्तपत्रोत्तरः स्वदेशं प्रस्थास्यसे"-इति सादिनमुदीर्य्य प्रस्तुताभिर्व्यञ्जन-सामग्रीभिर्ब्राह्मणान् भोजयितुमुदस्थात्।

अथापराह्णे प्रताप-दुर्गाद् गव्यूति-द्वयं यावत् सुगन्धित-सलिलैरासिक्तो मार्गः। अभितः पन्थानं रम्भा-स्तम्भाः सम्भाविताः। कुङ्कुम-चर्चिता अम्भःपूर्णाः कुम्भाः स्थापिताः। अशोक-किसलय-माला आलम्बिताः। काश्मीर-राग-रञ्जिता ध्वजा आरोपिताः।

इतः पश्चाच्च सन्तस्थे शोणित-शीर्षण्य-शीर्षाणां सधनुर्बाणानां कलित-वारबाणानां कावचिकानां पङ्क्तिः।

ततः पश्चाच्चापरोऽवतस्थे व्यूढ-कङ्कटानामास्फोटितघोटक-सटानां मौर्वी-घात-सङ्घट्टकिण-विकट-मणिबन्ध-संसर्पि-

---

औदार्यम्=विशालहृदयता। वैचित्री=विचित्रता।

सम्भाविताः=स्थापिताः। कुङ्कुमचर्चिताः=नागकेशरसम्मर्दिताः। काश्मीररागेण=केसररङ्गेण, रञ्जिताः। शोणितशीर्षण्यशीर्षाणाम्=लोहितशिरोभवशिरस्त्राणानाम्। कलितवारबाणानाम्=धारितकवचानाम्। कावचिकानाम्=सैनिकानाम्। पङ्क्तिः=श्रेणी।

व्यूढकङ्कटानाम्=धारितकवचनाम्। "उरश्छदः कङ्कटकोऽजगरः कवचोऽस्त्रियामि"त्यमरः। आस्फोटित-घोटक-सटानाम्=विपोथित-हय-केसराणाम्। मौर्व्याः=ज्यायाः, घातसङ्घट्टेन=ताडनघातेन, यः किणः=व्रणः, तेन

हाटक-कटकानां घोर-घन-विपाटकानां प्रत्यर्थिकूर्चोत्पाटकानां सादि-भटानां श्रेणी। प्रतिघोटक-विंशतिकान्तराले च विविध-मण्डन-मण्डित-शुण्डादण्डा मौक्तिक-स्तबक-चोचुम्ब्यमान-दान-वारिधाराऽऽसार-क्षालित-कपोला वमथु-परिषिक्त-पार्श्व-परिवर्त्ति तुरङ्गाऽऽरोहाङ्गनिचोला नीलाद्रि-सानु-मञ्जुलाः कुञ्जरा उपस्थापिताः, यान् कुसुम-निचयाऽऽकीर्ण-पात्र-हस्ता बहवो ब्राह्मण-बटवः समारूढाः। प्रतिगज-द्वयानन्तरञ्च दौन्दुभिक-वैणविक-वैणिक-मार्दङ्गिक-मौरजिक-पाणिघैरारूढा भेरी-भाराक्रान्ता अपरे द्विरदा विन्यस्ताः।

विकटे=निम्नोन्नते, मणिबन्धे=करभे, संसर्पाणि, हाटककटकानि=सुवर्णवलयानि येषां तेषाम्। घोरघनविपाटकानाम्=सान्द्रमेघभेदकानाम्। विविध-मण्डनैः, मण्डिताः, शुण्डादण्डा येषां ते। मौक्तिकस्तबकैः=मणिगुच्छैः, चोचुम्ब्यमानायाः=स्पृश्यमानायाः, दानवारिधारायाः = मदजलप्रवाहस्य. आसारैः, क्षालिताः कपोला येषां ते। वमथुपरिषिक्ताः=करशीकरसिञ्चिताः, "वमथुः करशीकर"इत्यमरः। पार्श्वपरिवर्त्तिनाम्=समीपस्थानाम्, तुरङ्गारोहाणाम्=सादिनाम्, अङ्गनिचोलाः=शरीरकञ्चुकानि यैस्ते। नीलाद्रिसानुमञ्जुलाः=नीलगिरिशृङ्गसुन्दराः। कुञ्जराः=करिणः। कुसुमनिचयैः, आकीर्णानि=व्याप्तानि, पात्राणि, हस्ते येषां तादृशाः। ब्राह्मणबटवः=विप्रब्रह्मचारिणः। दौन्दुभिकाः=दुन्दुभिवादनशीलाः, वैणविकाः=वेणुवादनशीलाः, वैणिकाः=वीणावादनशीलाः, मार्दङ्गिकाः=मृदङ्गवादनशीलाः, मौरजिकाः=मुरजवादनशीलाः, पाणिं घ्नन्तीति पाणिघाः=पाणिताडकाः, परस्परद्वन्द्वः, तैः। भेरीभारेण=दुन्दुभीभरेण, आक्रान्ताः=नम्रतामिव गताः। द्विरदाः=हस्तिनः।

अथ वारुणी-संसर्गाधिक-शोणे लज्जयेव पाश्चात्त्य-पर्वतपङ्क्ति-जवनिकाऽन्तर्निलीने चण्डमरीचिमण्डले; चिर-कर-स्पर्शोदीर्ण-स्वेद-स्नात-वदनेषु पटान्त-सङ्घर्षाधिक-ताम्र-कान्तिषु वीरेषु, पर:-शत-वादित्र-वादनोद्भूत-महाध्वनि-बधिरीकृतेषु दिगन्तरालेषु, सकलैरुद्भीवैर्विस्मृतात्मभिर्निर्निमेषनयनैर्निपीयमानः, सहस्रं गुण-यन महाराष्ट्र-वीराणामुत्साहम्, पुनरुज्जीवयन् चिर-विरहवि-धुरामात्ममात्र-शरण-जन-गात्र-यष्टिम्, दुर्दिन-संशोषित-भारत-सौभाग्यस्य पुनरभिवर्षणेन हर्षमयमपरं दुर्दिनं विरचयन्, दिशोऽपि हासयन, पृथिवीमपि पुलकयन, आकाशमपि विकाशयन्, जग-

वारुणीसंसर्गेण=पश्चिमासम्पर्केण, **अधिकशोणे**=अतिरक्ते। **लज्जयेव**=त्रपयेवेत्युत्प्रेक्षा। वारुणी-(सुरा·) संसर्गजा त्रपा। **पाश्चात्त्यपर्वतपङ्क्तिरेव**=पश्चिमस्थितगिरिश्रेण्येव, **यवनिका**=प्रतिसीरा, तस्याः, **अन्तः**=अन्तराले। **निलीने**=क्षुपिते। **चण्डमरीचिमण्डले**=भास्करगोले। **चिरकरस्पर्शेन**=दीर्घकालकिरणसंसर्गेण, **उद्दीर्णैः**=उद्गतैः, **स्वेदैः**=घर्मजलकणैः, **स्नातवदनेषु**=क्षालितानेषु। **पटान्तसङ्घर्षेण**=वसनकोणसम्बन्धेन, **अधिकताम्रकान्तिषु**=अतितरां शोणच्छविषु। **वीरेषु**=भटेषु। **परशशतानाम्**=असङ्ख्यातानाम्, **वा-दित्राणाम्**=वाद्यानाम्, वादनात्, **उद्भूतैः**=सञ्जातैः, महाध्वनिभिः, बधिरी-कृतेषु। **दिगन्तरालेषु**=हरित्प्रान्तेषु। **उद्भीवैः**=उत्कन्धरैः। **निपीयमानः**=चक्षुर्गोचरीक्रियमाणः **पुनरुज्जीवयन्**=मुहुरुत्प्राणयन्। **आत्ममात्रशरणा-नाम्**=स्वैकाश्रितानाम्, जनानाम्, **गात्रयष्टिम्**=देहभारम्। **दुर्दिनेन**=दुरव-स्थया, संशोषितस्य, **भारतसौभाग्यस्य**=हैन्दवैश्वर्यस्य। **पुनः**=मुहुः। **अभिवर्षणेन**=वृष्ट्या। **दुर्दिनम्**=मेघच्छन्नदिनम्। **विरचयन्**=सम्पादयन्। **हासयन्**=निर्मलीकुर्वन्। **पुलकयन्**=रोमाञ्चयन्। **विकाशयन्**=दीपयन्।

त्प्राणमपि प्राणयन्, द्रुम-सन्दोहमप्यानन्दयन्, ब्रह्मानन्द-सोदर्य्यस्येव, सुषुप्ति-स्वादन-स्पर्द्धिन इव, साहित्य-रस-रसन-समुत्थितस्येव, कस्यचिल्लोकोत्तरमहानन्दस्य, निरुपम-परम-परम-प्रवाह-पूर-परम्पराभिः प्रजाः प्लावयन्, अशीर्भिरभिनन्द्यमानः, कुसुमैराकीर्य्यमाणः; जयध्वनिभिरुन्मुखीक्रियमाणः, स्तूयमानः, गीयमानः, वर्ण्यमानश्च, सत्पथेऽस्मिन् न्यविशत महाराष्ट्र-चक्रवर्ती

अग्रतोऽस्याश्वं नर्त्तयन्तः प्रचलिताः शतशोऽश्वारोहा वीराः। ततश्च विकोश-कृपाण-पाणयः सहस्रशः पादातिकाः। ततोऽपि भुशुण्डी-कराणां वीर-वराणां पङ्क्ति-परम्परा, ततोऽपि बाहुमूलाऽऽरोपित-भल्लिका-मतल्लिकानां मल्ल-तल्लजानामवलि-पटलम्। ततः

जगत्प्राणम्=समीरणम्। **प्राणयन्**=समीरयन्। **द्रुमसन्दोहम्**=वृक्षव्रजम्। **आनन्दयन्**=हर्षयन्। ब्रह्मानन्दस्य, **सोदर्यस्येव**=समस्येव, अभिन्नस्येवेति यावत्। एवमादिषूत्प्रेक्षा। **सुषुप्तेः**=तृतीयावस्थायाः, प्रपञ्चावबोधशून्यतात्मिकायाः, **स्वादनेन**=रसनेन, **स्पर्धिन इव**=प्रतिद्वन्द्विन इव। साहित्यरसस्य, **रसनेन**=आस्वादनेन, **समुत्थितस्येव**=समुद्भूतस्येव। **लोकोत्तरस्य**=लौकिकानन्दव्यतिरेकिणः, **महानन्दस्य**=निरुपमहर्षस्य। **निरुपमः**=उपमारहितः, परा, मा=शोभा यस्मिन्नेवम्भूतः, **परमप्रवाहपूरः**=अत्युत्कृष्टधारापूरः, **तत्परम्पराभिः**=तच्छ्रेणीभिः। **प्लावयन्**=द्रुडयन्। **स्तूयमानः**=स्तुतिगोचरीक्रियमाणः। **न्यविशत**=प्रविष्टः।

अग्रतः=पुरतः. **विकोशकृपाणपाणयः**=नग्नासिहस्ताः। **पादातिकाः**=पदातिसैनिकाः। **भुशुण्डीकराणाम्**="बन्दूक"हस्तानाम्। **बाहुमूले**, आरा-

पश्चाच्च भूषण-मुरेश्वर-माल्यश्रीक-स्तन्यजीव-आन्यजीव-गौर-सिंह-श्यामसिंह-रघुवीरसिंहादिभिः परिवृतः, भारत-भूमण्डल-भागधेयम्, दाक्षिणात्य-वसुमती-वासवः, वनीपकीकृतावनी-यवनीसमुदायः, धर्म-धुरीणः, योध-बोध-पारीणः, महाराष्ट्र-मेदिनी-परिवृढो महाराजः शिवराजः।

दृष्ट्वैनं तारस्वरेण 'विजयतां महाराजः!' इत्याम्रेडयन्तो गगनं विलोडयामासुरखिलाः। अभितः पन्थानं गजानारूढा विप्र-वटवश्च मकरन्द-बिन्दु-सन्दोह-तुन्दिलानि महासौरभ-समाकृष्ट-परःकोटि-रोलम्ब-कदम्बानि मोदित-सकल-जन-मनांसि सुमानि संववर्षुः। वाद्य-नाद-प्रतिध्वनि-व्याजेन विबुधा अपि वसुधाधिपमेनं दिव्य-वाद्य-वादनैरिवाभिननन्दुः। महासन्नाह-विविध-वाह-प्रवाहैः सञ्चङ्क्रम्यमाणा मोदेनेव चकम्पे वसुन्धरा।

पिताः, भल्लिकामतल्लिकाः=प्रशस्ताः कुन्ताः, यैस्तेषाम्। अवलिपटलम्=पङ्क्तिसमूहः। परिवृतः=परिलसितः। दाक्षिणात्यवसुमत्याः, वासवः=इन्द्रः। वनीपकीकृतः=याचकीकृतः, "वनीपको याचनको मार्गण" इत्यमरः, अवन्याः=पृथिव्याः, यवनीसमुदायः, येन सः। धर्मधुरीणः=सनातनधर्मभारधारी। योधानाम्=वीराणाम्, बोधे=ज्ञाने, परायणः।

मकरन्दबिन्दूनाम्=पुष्परसपृषताम्, सन्दोहेन, तुन्दिलानि=भरितानि। महासौरभेण=अतिसौगन्ध्येन, समाकृष्टानि, परःकोटीनि, रोलम्बकदम्बानि=द्विरेफव्राताः, यैस्तानि। मोदितसकलजनमनांसि=प्रसन्नीकृतनिखिलमानवस्वान्तानि। सुमानि=प्रसूनानि। वाद्यनादानाम्, प्रतिध्वनेः=प्रतिनादस्य, व्याजेन=छद्मना। विबुधाः=देवाः। दिव्यवाद्यवादनैरिव=स्वर्गीयमृदङ्गादि-प्रतिनादनैरिव। उत्प्रेक्षा। महासन्नाहानाम्, विविधानाम्, वाहानाम्=घोटका-

कुसुम-मरन्द-बिन्दुभिः स्नातः पुलकमिव समाससाद समीरणः। जयध्वनि-सन्तान-वितानैरोत-प्रोतः स्वयं जयशब्द-कोटिभिरिवाऽऽजुहाव सविकास आकाशः।

एवं क्रमेण सर्वानानन्दयन्, कुसुम-निचय-भराक्रान्तमात्मानं मुहुर्मुहुरङ्ग-स्फुरणैः सुमनःपातनैर्लघूकुर्वन्, अखर्व-गन्धर्व-खुराघातैर्धूलीभूयोद्गतया भुवाऽप्यालिङ्ग्यमानः, स्वदृग्द्रयोद्गतयाऽऽनन्द-सन्दोह-वाष्प-धारयाऽभिषिच्यमानः, सादी प्रतापदुर्गमाससाद देवः।

तत्र च परितः सर्वान् गण्ड-शैलान् तरु-स्कन्धान् उन्नत-भू-भागान् दुर्ग-प्रान्त-परिवर्त्युपत्यका दुर्गभित्तीश्च स्वावलोकनामोद-परवज्जन-समाकीर्णानेव समद्राक्षीत्।

नाम्, प्रवाहैः=यूथैः। सञ्चङ्क्रम्यमाणा=अतितरां गम्यमाना। मोदेनेव=हर्षेणेव। कुसुममरन्दबिन्दुभिः=पुष्पसौरभपृषद्भिः। स्नातः=मिश्रः। पुलकम्=रोमाञ्चम्। ओतप्रोतः=विद्धानुविद्धः। आजुहाव=आकारयामास। सविकासः=समोदः। आकाशः=नभः। "पुंस्याकाशविहायसी" इत्यमरः।

कुसुमनिचयभराक्रान्तम्=पुष्पसमूहभाराच्छन्नम्। अङ्गस्फुरणैः=शरीरचालनैः। लघूकुर्वन्=निर्भारीकुर्वन्। अखर्वाणाम्=अत्युन्नतानाम्, गन्धर्वाणाम्=हयानाम्, खुराघातैः=शफसम्मर्दैः। धूलीभूय=पांसूभूय। उद्गतया=उत्थितया। भुवाऽपि=पृथिव्याऽपि। आलिङ्ग्यमानः=आश्लिष्यमाणः। अभिषिच्यमानः=स्नाप्यमानः। सादी=अश्वारोहः, सन्।

गण्डशैलान्=लघुशैलावयवान्। स्वावलोकनामोदेन=स्वदर्शनप्रसन्नतया, परवन्तः=पराधीनाः, ये जनाः, तैः समाकीर्णान्=सञ्छन्नान्।

अथ तांस्तान् स्वदृक्पातेनैव सम्मान्य, सपल्लव-कलश-हस्तान् आशी-राशीन् गिरतो विप्रवरान् प्रणमन्नश्वादुदतीतरन्महाराजः। तत्रोपस्थितेष्वात्मीयेषु कांश्चिदालिङ्ग्य, कांश्चित् प्रणम्य, कांश्चिद् यथायोग्यमाशिष उक्त्वा, कांश्चिच्च कराग्रेण कराग्र एव गृहीत्वा, अपरान कुशल-प्रश्नैः सोत्साहनिरीक्षणैः स्नेह-वचनैश्च सन्तर्प्य, जननी-स्मरणोद्भूतोद्भूत-बाष्प-धारा-व्याकुल-लोचन-द्वयः पदे पदे प्रस्खलतेव प्रेमपरवता वपुषा सपदि दुर्गान्तः प्रविवेश।

× × × ×

अन्येद्युः प्रातरेव कृत-सन्ध्यावन्दनादि-नित्यक्रियः, महाराजाऽऽगमन-महोत्सव-पराधीनानेक-सहस्र-सोपायन-प्रजा-परिवृत-प्रघाणस्य महाप्रासादस्य चन्द्रशालायामुपविष्टः, गौरसिंह-

सम्मान्य=सत्कृत्य। **सपल्लवाः**=सकिसलयाः, **कलशाः**=जलभरिता घटाः, हस्ते येषां तान्। **गिरतः**=कथयतः। **प्रणमन्**=नमस्कुर्वन्। **उदतीतरत्**=निम्नदेशे समागतः। **यथायोग्यम्**=यथानुरूपम्। कराग्रेण कराग्रं गृहीत्वेति साम्प्रतिकपश्चात्त्यदेशीयनमनप्रकारः। **जननीस्मरणात्**=मात्राध्यानात्, **उद्भूता**=उद्गता, **उद्भूता** = उन्नतीभूता, विपुलीभूतेति यावत्, या **बाष्पधारा** = अस्रप्रवाहः, तया, व्याकुलं लोचनद्वयं यस्य सः। **प्रस्खलतेव**=निपततेव। **प्रेमपरवता**=अनुरागाधीनेन।

× × × × × ×

अन्येद्युः=परस्मिन् दिवसे। **महाराजागमनपराधीनाभिः**=महाराजप्राप्तिपरवशाभिः, **अनेकसहस्राभिः**=असङ्ख्याताभिः, **सोपायनाभिः**=देयवस्तुहस्ताभिः, **परिवृतः**=समाच्छन्नः, **प्रघाणः**=अलिन्दः, यस्य तादृशस्य। **चन्द्र-**

ञ्चाऽऽहूय, मुरेश्वर-माल्यश्रीकादिभिः परिवृतः, स्वेङ्गितानुसारं स्तन्यजीवेनाऽऽनीतं पटखण्ड-परिवेष्टितं किञ्चन पत्रपटलं स्वनिकटे संस्थाप्यैवमालपत्।

शिवराजः—प्रिय! गौरसिंह! चिरान्मां तोषयसि, प्राणानगणयन् मां प्राणयसि, सांसारिक-सुखान्यसंस्मरन् सङ्गरकष्टानि सहसे-इत्यसाधारणबन्धुं त्वां महाराष्ट्र-मण्डले मण्डलेश्वरपद-दानेन सत्कर्तुं मे महानुत्साहः। तद् गृहाणेदमधिकारपत्रम्, भुङ्क्ष्व भागमेकं महाराष्ट्र-भुवः।

गौरसिंहः—[तत्पत्रं स्पृष्ट्वा, प्रणम्य] महाराज! श्रीमान् यवनोद्दण्ड-शुण्डादण्ड-गण्डि-मण्डलं प्रविश्यापि केसरीव कुशलेन निर्गत्य महाराष्ट्र-राजसिंहासनमाक्रम्य भारताभिजन-प्रजाः प्रजा इव पातुमारब्धवानिति किमतोऽप्यधिकं विश्वरिमन्नपि विश्वस्मिन् अस्मानानन्दयितुमुपलभ्येत। क्षम्यताम्! अनुचरतां

शालायाम्=शिरोगृहे। उपविष्टः=उपस्थितः। स्वेङ्गितानुसारम्=स्वचेष्टितानुकूलम्। पत्रपटलम्=पत्रसमूहम्।

तोषयसि=प्रसन्नयसि। प्राणयसि=जीवयसि। असंस्मरन्=अचिन्तयन्। सङ्गरकष्टानि=सङ्ग्रामदुःखानि। भागम्=अंशम्।

यवना एव, उद्दण्डाः=उच्छृङ्खलाः, शुण्डादण्डगण्डिनः=करिणः, तेषां मण्डलम्=समूहम्। शुण्डादण्डिपदेनापि हस्तिरूपार्थप्रतीतौ गण्डिपर्यन्तानुधावनं समदकपोलस्थलस्मारकत्वेन सार्थक्यमाश्रयतीति विदुषां सम्मतिः। केसरीव=मृगेन्द्र इव। भारताभिजनप्रजाः=हैन्दवमूलनिवासिप्रजाः। पातुम्=रक्षितुम्। विश्वस्मिन्=समस्ते। विश्वस्मिन्=संसारे। संसारवाचिविश्व-

विहाय सामन्त-सिंहासनमधिरोढुं लज्जते मे हृदयम् !!

शिवराजः—गौरसिंह ! सुविस्तीर्णमधुना महाराष्ट्र-राज्यम्, तन्महाभारोऽयं विभज्य युष्माभिरपि बिभ्रियेत चेच्छासनं सुकरं संवृत्येत । कथं भवादृशेषु नीति-कुशलेषूपकारिषु सहचरेषु वर्त्तमानेष्वप्यहमेव दक्षिण-भारताभिजन-भरण-भाराकुलो वर्त्तेय? तन् सर्वथा भवतः स्वीकरणीयमिदम्, नात्र नकारोपन्यासो भवतो युक्तः-इति तद्धस्त आज्ञापत्रमार्पयत् ।

गौरसिंहः—[पत्रं गृहीत्वा प्रणम्य] महाराज ! निदेशः सर्वथा वहनीयः ।

शिवराजः—[सौवर्णमुष्णीषं कृपाणञ्चार्पयित्वा] धारयेमं मण्डलेश्वर-मात्र-धार्य्यमुष्णीषम्, रक्ष चानेन वैरि-व्रात-विमर्दनेन चन्द्रहासेन प्रकृतीः ।

गौरसिंहः—[उष्णीषं शिरसि धारयित्वा, कृपाणं कटि-प्रदेशे बद्ध्वा प्रणनाम] ।

शिवराजः—[रघुवीरमभिमुखीभूय] वत्स रघुवीर ! स्मारं स्मारं तव परं पराक्रमम्, परां भक्तिम्; परं सौजन्यम्, परां स्वच्छ-

---

शब्दस्यापि सर्वार्थकत्वेन सर्वनामत्वमिति समाश्रित्येदम् । **अनुचरताम्**=भृत्यताम् । **सामन्तसिंहासनम्**=मण्डलेश्वरासनम् ।

बिभ्रियेत=धार्येत । **शासनम्**=रक्षणम् । **नीतिकुशलेषु**=राजनीतिपण्डितेषु । दक्षिणभारताभिजनानाम्, **भरणभारेण**=रक्षणभरेण, **आकुलः**=व्यग्रः । **नकारोपन्यासः**=निषेधोक्तिः ।

वैरिव्रातविमर्दनेन=शत्रुसमूहकर्त्तनेन । **प्रकृतीः**=प्रजाः ।

ताम्, परमुत्साहम्, परां वीरताम्, परं सौहार्दम्, पराञ्च दृढप्रतिज्ञताम्, महापरिणाहमिव सम्पद्यते मे हृदयम्। बहुवारमहं प्रत्यर्थि-खड्गालीढप्रायो भवता रक्षितोऽस्मि, भवान् मां नाऽरक्षिष्यत् चेच्छास्तिखानं नाजेष्यम्। भवानेव साहाय्यं न व्यधास्यच्चेद् यवन-कारागारान्धकूपान्न निरयास्यम्। रुद्र-मण्डल-विजयस्य च भवानेव···[इत्यर्धोक्तौ निश्वस्य भग्नेन स्वरेण पुनर्वक्तुमारभत!] आः! परस्ताद् यदाचरितं विलुप्तमतिना मया तत्संस्मृत्यापि विदीर्य्यति मे हृदयम्।

रघुवीरसिंहः—भगवन्! शान्तं पापम्, आसीत् तन्मम जन्मान्तरीण-पाप्मनां फलम्।

शिवराजः—यो हि बहुवारं प्राणानरक्षत्; तस्य प्रत्युपकारः प्राणैरपि विधातुमशक्यः। यतः प्राणा वारमेकमेव पार्य्यन्ते त्यक्तुम्, न तु पौनःपुन्येन। तत् सर्वथा तव ऋणी संवृत्तोऽस्मि। तथाऽपि यथा मम निखिला आज्ञाः समपालयः; तथाऽनुपेक्षणीयमदोऽपि वचः—यदूरीकुरु महाराष्ट्रराजस्य मण्डलेश्वरताम्। दुर्लभो हि त्वादृशो महाराष्ट्रदेशबन्धुः।

परम्=उत्कृष्टम्। **दृढप्रतिज्ञताम्**=सत्यसन्धताम्। **महापरिणाहमिव**=अतिविशालमिव। **प्रत्यर्थिनाम्**=शत्रूणाम्, **खड्गैः, आलीढप्रायः**=आघ्रातप्रायः। **अरक्षिष्यत्**=रक्षां व्यधास्यत्। **अजेष्यम्**=जयं प्राप्स्यम्। भविष्यति हेतुहेतुमद्भावे गम्ये लृङ्। यवनकारागार एव, **अन्धकूपः**=शुष्ककूपः, तस्मात्। **विलुप्तमतिना**=विगतबुद्धिना। **जन्मान्तरीणपाप्मनाम्**=इतरजन्मसञ्चिताघानाम्। **आज्ञाः**=आदेशान्। **समपालयः**=पालितवानसि। **अदः**=इदम्।

रघुवीरसिंहः—[प्रणम्य] महाराज ! विनष्ट-मातृकोऽहमत्र भवत एवाऽऽश्रयेण वर्द्धितो भवच्चरण-सेवन-पुण्यैरेव च चिर-प्रनष्टं तात-चरणमप्यलभम्—इति ममैव न लक्ष्यते कश्चनाऽऽनृण्योपायः ।

शिवराजः—वीर ! ऋतेऽनुचरेभ्यो राजकार्य्यं न सिद्ध्यतीति न तद्रक्षा राज्ञां निरभिसन्धिरनुग्रहः, अनुचरश्च चेत्स्वसमर्पित-कार्य्यातिरेकेण स्वामिनमनुचरेत् ; तत् स एवाधमर्णं विदधाति धनिनम् । अथवा किमप्यस्तु गृहाणेदमधिकारपत्रम् , यथा न स्यान्मम रिक्तं वचः ।

रघुवीरसिंहः—[करौ सम्पुटीकृत्योत्थाय] देव ! साधारणोऽय-मनुचरः, राजसिंहासनाक्रमणञ्च महतां कार्य्यम् . तत्क्षम्यताम् , अपरः कश्चन निर्धार्य्यताम् !

शिवराजः—आः ! किमुक्तम् ? असाधारण-पौरुषं दर्शयन् असाधारण-कृतज्ञतां प्रकाशयन्नपि साधारण इति ब्रूषे ! जयपुरा-धीशानामसाधारणे वंशे तव जन्म, वचनधनः पौरुष-भूषणो

विनष्टमातृकः=मृतजननीकः । **आश्रयेण**=आधारेण । **चिरप्रनष्टम्**=दीर्घकालादृश्यतामृतम् । **आनृण्यस्य**=ऋणराहित्यस्य, **उपायः**=यत्नः ।

निरभिसन्धिः=निष्कारणकः । **अनुग्रहः**=कृपा । स्वसमर्पितकार्यस्य, **अतिरेकेण**=गौरवेण । **अधमर्णम्**=ऋणगृहीतारम् । **धनिनम्**=वित्तवन्तम् । उत्तमर्णमिति यावत् । **रिक्तम्**=शून्यम् ।

राजसिंहासनस्य, **आक्रमणम्**=अधिरोहणम् । **निर्धार्य्यताम्**=निश्चीयताम् । **असाधारणम्**=अनितरम्, **पौरुषम्**=पुरुषार्थम् । **असाधारणे**=श्रेष्ठ ।

राजर्षिरिवापरः श्रीमानसाधारणो वीरो वीरेन्द्रसिंहस्ते पिता, तन्न ततोऽप्यधिक-गुणः को नामोपलभ्येत सामन्तसिंहासन-योग्यः ?- इति सपदि गृहाणेदमधिकारपत्रम् ! [इत्युत्थाय सम्पुटीभूतं तस्य कराग्रं स्वहस्तेन प्रसार्य्याधिकारपत्रमर्प्पयामास]

रघुवीरसिंहः—[प्रणमन्] सर्वथाऽप्यादेश-वशंवदोऽयं जनः ! [इत्यगृह्णात्]

शिवराजः—[सौवर्णमुष्णीषं कृपाणञ्चार्पयित्वा] उष्णीषमिदं मण्डलेश्वरता-परिचायकं धार्यताम् ! असिना चानेन सशत्रुशातनं प्रजाः पाल्यताम् !!

रघुवीरसिंहः—[उष्णीषं शिरसि, खड्गञ्च कटिप्रदेशे विन्यस्य, प्रणतिमकार्षीत्]

तावत्प्रतीहारेण प्रविश्य, "देव ! देवशर्म्मा पण्डितो द्वारि तिष्ठतीति"—न्यवेदि। 'आम् ! प्रवेशय प्रवेशय' इत्युक्तश्च देव-शर्म्माणं सपञ्चप-शिष्यं प्रावेशयत्। तमालोक्यैवोत्थाय सपादस्पर्शं प्रणनाम महाराष्ट्रराजः। स च गलदानन्द-सलिलाऽऽप्लुताभ्यां नयनाभ्यां लिहन्निव कम्पमानेन करेण पृष्ठे स्पृशन्, भग्नेन स्वरे-णाऽऽशिषोऽवादीत्। यथानिर्दिष्टमासनञ्चाध्युवास।

महाराष्ट्रराजस्तु करौ सम्पुटीकृत्य, प्रावोचत्—विद्वद्वर !

सम्पुटीभूतम्=साञ्जलिम्।

सशत्रुशातनम्=सरिपुध्वंसनम्।

गलता=निष्पतता, आनन्दसलिलेन=हर्षवारिणा, आप्लुताभ्याम्=व्याप्ताभ्याम्। लिहन्निव=आस्वादयन्निव। अध्युवास=अधितस्थौ।

अगाध-सम्बाधे पतितो यदेष जनः कुशलेन परावृत्तः; स एष केवलं भवत एवाऽऽशीराशीनां परिणामः। भवतैव दैवज्ञवानेष देशः—इति गृह्यतां काचिदेषाऽल्पिष्ठा सेवा—इति दीनार-सहस्र-परिपूरितं सुवर्ण-पात्रं समार्पयत्।

देवशर्म्मा तु बहुश आशीराशिभिरभियोज्य प्राब्रूत यद्—"देव! नहि युष्मादृशा धर्म्म-धूर्वहाः कदर्य्यैरवरोद्धुं शक्यन्ते। भगवता चक्रपाणिनाऽनवरतं रक्ष्यमाणस्य जयलाभवतो भवतो विघ्नानामेव भवन्ति विघ्नाः, आपदामेव भवन्त्यापदः।

महाराज! चिराय वेद-प्रतिपाद्यमाद्यं भारताभिजन-धर्म्मं रक्ष, प्रजाः पालय, महाराष्ट्रञ्च महाराष्ट्र-देशस्य सनाथय।"

महाराष्ट्रराजः—भवादृशानां तपोधनानामाशिष एव सकल-मङ्गल-मूलम्! सर्वदा सनाथनीयोऽयं जन आज्ञादानैः।

अगाधे=गाहयितुमनर्हे, **सम्बाधे**=पीडने। **दैवज्ञवान्**=दिष्टवेदितृयुतः, गाणितिकसहितः। **अल्पिष्ठा**=न्यूनतमा। **दीनाराणाम्**=सुवर्णमुद्राणाम्, सहस्रेण, **परिपूरितम्**=भरितम्। **सुवर्णपात्रम्**=चामीकरभाजनम्।

धर्मधूर्वहाः=सनातनभारवोढारः। **कदर्य्यैः**=नीचैः। **चक्रपाणिना**=वासुदेवेन। **अनवरतम्**=सततम्। **जयलाभवतः**=विजयप्राप्तियुतस्य। **विघ्नानाम्**=प्रत्यूहानाम्। **आपदाम्**=विपत्तीनाम्। **वेदप्रतिपाद्यम्**=श्रुतिमात्रनिवेद्यमानम्। "चोदनालक्षणोऽर्थो धर्म"इति हि सिद्धान्तः। चोदना च विधिः। तथा च भवति वेदैकप्रतिपाद्यत्वं धर्मस्य। **आद्यम्**=सनातनम्। भारताभिजनानाम्, धर्मम्। अयमेव धर्मः सकलस्य भूवलयस्येति तत्त्वम्। **महाराष्ट्रम्**=महाराज्यम्।

देवशर्म्मा—देव ! इमा एवाऽऽशिषः, इमा एव चाऽऽज्ञाः, न मे काचन चिन्ता ऋत एकस्याः ।

महाराष्ट्रराजः—का सा ?

देवशर्म्मा—देव ! बाल्यात्परं वयो जुषते सौवर्णी। भाग्यैरेव तस्यास्तत्पितृ-सम्मतो वीरेन्द्रसिंह-पुत्रः कुमाररामसिंहो विविधा आपदः सोढ्वा समुपलब्धः। भाग्यैरेव चापरिचिन्वती, अजानानाऽपि, चैनमेव सा वृतवती। व्यत्येति चैष समय उद्वाहस्य तनू-

महाराष्ट्रराजः—[अर्द्धोक्तावेव] आम् ! स्मर्य्यते, ममैव व्यामूढस्यापराधात् साऽपि भगवती चिरं सोढवती दुःखानि। एष आयुष्मान् कुमाररामसिंहः, एष च सौवर्णी-भ्राता गौरसिंहः, उभावप्येतावद्यावधि महाराष्ट्र-देशस्य मण्डलेश्वरौ राजानौ, आशीर्भिर्भावनीयावेतौ।

देवशर्म्मा—[प्रणमन्तौ तौ, सशिरःस्पर्शमाशीभिरभ्ययोजयत्]

महाराष्ट्रराजः—तत् सर्वेऽपि सोत्कण्ठा वयं परिणय-महोत्सवमेतं सम्पादयितुम्, तद् निश्रीयतां स्थिरीक्रियताञ्च कश्चन सकल-मङ्गलमयः समयः।

देवशर्म्मा—[श्वेतोष्णीष-वेष्टनान्तः स्थितं तिथिपत्रं निस्सार्य्य,

---

जुषते=सेवते। तत्पितुः, सम्मतः=इष्टः। समुपलब्धः=सम्प्राप्तः। अपरिचिन्वती=अनिश्चिन्वाना। अजानाना=अविदन्ती। वृतवती=स्वीकृतवती। व्यत्येति=अतिक्रामति।

व्यामूढस्य=विक्षिप्तचित्तस्य।

कक्षिगुटिकात उपनयनं बहिष्कृत्य, चक्षुषोः सन्धाय, आलोच्य च] कुमाररामसिंह ! किन्ते जन्म-नाम ?

रघुवीरसिंहः—आर्य ! मोहनसिंहः—इति ।

महाराष्ट्रराजः—इति ! [स्मित्वा] अत एव गुणैरखिलान् मोहयसि ।

देवशर्म्मा—अस्ति ते सिंहराशिः !

सर्वे—कथं न स्यात् सिंहविक्रमस्य सिंहराशिः ?

देवशर्म्मा—महाराज ! इतः पञ्चमेऽहनि सुदिनं सुलग्नञ्चास्ति । इतः परमावर्षसमाप्ति न लक्ष्यत ईदृशोऽभ्यर्हितः समयः ।

महाराजः—साधु, साधु, स्वीकृतमस्माभिः ! स्वयमहमुपस्थास्ये विवाह एतस्मिन् ।

प्रतीहारः—[झटिति प्रविश्य, करौ सम्पुटीकृत्य] महाराज ! उदयपुरात्पत्रमानीय द्वित्राः सादिनः समुपस्थिताः ।

महा०—[माल्यश्रीकमवलोक्य] साध्यताम् !

माल्य०—यदाज्ञाप्यते ! [इति निष्क्रम्य, सुवर्ण-मुद्राङ्कित-पत्र-

---

तिथिपत्रम्=पञ्चाङ्गम् । उपनयनम्=उपनेत्रम् । सन्धाय=धारयित्वा । आलोच्य=विचार्य ।

सिंहविक्रमस्य=मृगेन्द्रपराक्रमस्य ।

आवर्षसमाप्ति=हायनावसानपर्यन्तम् । लक्ष्यते=दृश्यते । अभ्यर्हितः=श्रेष्ठः ।

उपस्थास्ये=उपस्थितो भविष्यामि ।

साध्यताम्=गम्यताम् । गत्वा पत्रमानीयतामिति तात्पर्यम् ।

हस्तः पुनः प्रविश्य च] पत्रमिदमुदयपुराधीशस्य।

महा०—अहो ! आनन्दः ! पठ्यतां पठ्यताम् !!

माल्य०—[प्रसार्य्य वारमेकं मनस्येव पठित्वा] महाराज ! परम-प्रीति-पूर-पूर्णो भर्ता भारताभिजनानाम्, भाग्यं भारतस्य, तत्रभवानुदयपुराधीश्वरो देवं सम्बोध्यैवं लिखति—

महा०—आम् ! अवदधामि, पठ्यतां पठ्यताम् !

माल्य०—देव ! श्रूयताम्—

"स्वस्ति श्रीसकल-वसुमती-वलय-देदीप्यमान-धैर्य्य-वीर्य्य-गाम्भीर्य्य-प्रभावेषु, स्वच्छन्दोच्छृङ्खलोच्छलन्म्लेच्छ-मण्डल-मूर्च्छा-दीक्षा-दक्षेषु, रणाङ्गणागणित-प्राणेषु, वैरि-व्रात-घात-कृपा-कृपण-कृपाण-धारावलीढ-भारत-प्रत्न-सपत्न-व्यग्र-ग्रीवाग्र-विगलत्-कवोष्ण-शोण-शोणित-शोण-चन्दन-द्रव-चर्चित-भूभागेषु,

परमेण, प्रीतिपूरेण, **पूर्णः**=समग्रकलः। भर्त्ता। **भाग्यम्**=मूर्त्तिमद्भागधेयम्। **देवम्**=भवन्तम्।

श्रिया=लक्ष्म्या शोभया च सहितायाः, **सकलायाः**=समग्रायाः, **वसुमत्याः**=वसुन्धरायाः, वलये, **देदीप्यमानः**=जाज्वल्यमानः, धैर्यवीर्यगाम्भीर्यप्रभावाः, येषां तेषु। **स्वच्छन्दानाम्**=स्वतन्त्राणाम्, **उच्छृङ्खलानाम्**=उद्दण्डानाम्, **उच्छलताम्**=उत्कूर्दताम्, **म्लेच्छानाम्**=यवनानाम्, **मण्डलस्य**=समूहस्य, **मूर्च्छादीक्षायाम्**=विक्षिप्तताकरणपाटवे, **दक्षेषु**=निपुणेषु। **रणाङ्गणे**, अगणिताः, **प्राणाः**=असवो यैस्ते। **वैरिव्रातघाते**=शत्रुसमूहहनने, **कृपाकृपणः**=दयादरिद्रः, यः **कृपाणः**=महासिः, तस्य धारया, **अवलीढानाम्**=आघ्रातानाम्, भारतस्य, **प्रत्नसपत्नानाम्**=पुरातनशत्रूणाम्, **व्यग्रेभ्यः**=

स्वातन्त्र्य-पीयूष-प्रवाह-रञ्जित-महाराष्ट्रदेश-प्रदेशेषु, क्षत्रिय-भूपानुरूपाऽऽचार-प्रचार-प्रचुरीकृताऽऽस्माकीनाभिमानेषु, परमस्नेह-भाजनेषु, महाराष्ट्रचक्र-चक्रवर्त्तिषु, श्रीशिवराज—वीरवरेषु; यथोचिताचारपुरस्सरं स्वाभिप्रायं प्रकटयति यवन-वन-दाव-दहनः, करप्रदता-कलङ्क-पङ्कानङ्कित-वंशावतंसः, वीर-मित्रम्, वीर-पुत्रः, वीर-बन्धुः, वीरता-सिन्धुः, वीरता-धनः, वीरतामात्र-विश्रान्त-कुलाभिमानः, मानोन्नतः, नत-शरणः, रण-यज्ञ-दीक्षा-दीक्षितः, मेदःपाट-क्षितीश्वरो देवः।

विकटेभ्यः, ग्रीवाग्रेभ्यः=कन्धराग्रेभ्यः, **विगलन्**=निस्सरत्, **कवोष्णम्**=ईषदुष्णम्, **शोणम्**=लोहितम्, **शोणितम्**=रुधिरम्, एव **शोणचन्दनद्रवः**=रक्तपाटीररसः, तेन **चर्चिताः**=अनुलिप्ताः, भूभागाः, यैस्तेषु। **स्वातन्त्र्यम्**=स्वाच्छद्यमेव **पीयूषम्**= सुधा, तस्य प्रवाहेण, रञ्जिताः, महाराष्ट्रदेशप्रदेशाः, यैस्तेषु। **क्षत्रियभूपानुरूपाणाम्**=बाहुजनरेशयोग्यानाम्, **आचाराणाम्**=व्यवहाराणाम्, प्रचारणेन, **प्रचुरीकृतः**=वृद्धिं नीतः, आस्माकीनः, अभिमानः, यैस्तेषु। **परमस्नेहभाजनेषु**=विपुलप्रेमपात्रेषु। महाराष्ट्रमेव चक्रम्=राज्यम्, **तच्चक्रवर्त्तिषु**=स्वतन्त्रनरेशेषु। **स्वाभिप्रायम्**=स्वविचारम्। यवना एव **वनानि**=काननानि, तेषु **दावदहनः**=वनाग्निः। **करप्रदताकलङ्कपङ्केन**=राजस्वार्पणदुर्यशःकर्दमेन, **अनङ्कितस्य**=अलाञ्छितस्य, **वंशस्य**=अन्वयस्य, **अवतंसः**=भूषणीभूतः। वीरतामात्रे विश्रान्तः कुलाभिमानो यस्य सः। **मानेन, उन्नतः**=श्रेष्ठः। **नतानाम्**=नम्राणाम्, **शरणः**=रक्षकः। **रणयज्ञदीक्षया, दीक्षितः**=सञ्जातदीक्षः। सर्वदा रणपरायण इत्यर्थः। **मेदःपाटस्य**=मेवारस्य, **क्षितीश्वरः**=भूमीपतिः।

"तत्रभवतो म्लेच्छोच्छेदन-महाव्रत-श्रवण-रोमाञ्चित-गात्रा अपि, जयपुरेश्वर-जयसिंह-वाक्-प्रलोभ-क्षोभित-हृदयस्य दिल्ली-करप्रदता-स्वीकाराऽऽकर्णनेनातितरां क्षुब्धहृदया वयमास्म। तत्रापि च "शत्रु-नगरीं प्राविशद् भवानिति" वृत्तान्तश्चिरमखेदय-दस्मान्। ततोऽपि चाश्रावि करालः कर्णशूल इव रोधोदन्तः।

ह्यस्तु भवतः कुशलाय भगवतीं बहुशो निवेद्य सुप्ते मयि, स्वप्ने प्रत्यक्षीभूता सिंह-वाहिनी बाहु-सहस्रेण गगनं व्याप्य पुरतः समु-पतस्थे। ततश्चाहं प्रलम्ब-सावर्त्त-लाङ्गूलम्, विद्युद्विनिन्दक-च्छटा-पटल-परिव्याप्त-सटा-घटाऽऽलिङ्गित-कण्ठम्, खर-नखराग्र-सम्पात-सावटीकृत-भूभागम्, जाज्वल्यमान-लौह-गोलक-युग-लावगूरण-गरिम-गुरु-नयन-गोलकम्, शूलि-शूलाग्र-महिमोन्मृ-

म्लेच्छोच्छेदनमेव=यवनहननमेव महाव्रतम्, तस्य श्रवणेन=श्रोत्र-गोचरीकरणेन, रोमाञ्चितगात्राः=पुलकितशरीराः। जयपुरेश्वरस्य, जयसिंहस्य वाक्प्रलोभेन, क्षोभितं हृदयं यस्य तादृशस्य भवतः। दिल्लीकरप्रदतास्वीकारस्य, आकर्णनेन=श्रवणेन। अतितराम्=अत्यन्तम्। प्राविशद्=गतवान्। कराल:=कठिनः। कर्णशूल इव=श्रोत्रपीडेव। रोधोदन्तः=बन्धनवृत्तान्तः।

ह्यः=विगतेऽव्यवहितपूर्वदिने। सिंहवाहिनी=मृगेन्द्रगमना, दुर्गा। प्रलम्बम्=दीर्घम्, सावर्तम्=वलयितम्, लाङ्गूलम्=पुच्छं यस्य तम्। विद्युद्विनिन्दकेन=चपलातिरस्कारिणा, छटापटलेन=प्रभासमूहेन, परिव्या-प्तानाम्=समलङ्कृतानाम्, सटानाम्=केसराणाम्, घटया=तत्या, आलिङ्गितः, कण्ठो यस्य तम्। खराणाम्=तीक्ष्णानाम्, नखराग्राणाम्, सम्पातेन, सावटी-कृतः=सगर्तीकृतः, भूभागो येन तम्। जाज्वल्यमानस्य=देदीप्यमानस्य, लौहगोलकयुगलस्य, अवगूरणगरिम्ना=आघूर्णनगौरवेण, गुरु=महत्, नय-

लन-दशन-दीप्ति-दूरीकृतान्धकार-प्रचारम् , पृष्ठ-संस्पृष्ट-देवी-दिव्य-दुकूलम् , परिपन्थि-प्रतिकूलं शार्दूलम् , तलाग्र-विलसन्माणिक्य-मणि-मर्दन-शोणित-सङ्घात-शोणीकृत-पञ्चानन-पृष्ठ-देशं पाद-युगलम् , बाल-भास्कर-कर-निकरैरेव ग्रथितमिव स्वप्रभा-प्रवाह-व्याप्ताम्बरमम्बरम् ; हरित-शोणितार्जुन-हारिद्राद्यनेकविध-चाकचक्याऽऽक्षिप्ताक्षि-मणिमयालङ्कार-निचयम् , असि-शक्त्यृष्टि-शूल-चाप-रोप-द्रुघण-परिघ-सर्वौघ-तोमर-कुठार-पर-

---

नगोलकं यस्य तम् । शूलिशूलाग्रस्य=शिवत्रिशूलप्रान्तस्य, महिम्नाम्=प्रभावाणाम्, उन्मूलनानि=ध्वंसकाः, ये दशनाः=दन्ताः, तेषां दीप्त्या, दूरीकृतः, अन्धकारप्रचारो येन तम् । पृष्ठे, संस्पृष्टम्=संसक्तम्, देव्याः, दिव्यं दुकूलं यस्य तम् । परिपन्थिप्रतिकूलम्=शत्रुविरुद्धम् । शार्दूलम्=मृगेन्द्रम् । तलाग्रे विलसताम्=चरणनिम्नांशे शोभमानानाम्, माणिक्यमणीनाम्=रक्तमणीनाम्, मर्दनेन=सङ्घर्षणेन, यः शोणितसङ्घातः=रुधिरसमूहः, तेन शोणीकृतः=रक्तीकृतः, पञ्चाननस्य पृष्ठदेशो येन तादृशम् । पादयुगलम्=चरणद्वयम् । देवीमापादमामस्तकञ्च वर्णयति दृष्टिपथगाम् । बालभास्करकरनिकरैरेव=नवोदितप्रभाकरदीधितिव्रातैरेव । ग्रथितमिव=अनुस्यूतमिव । स्वप्रभाप्रवाहेण, व्याप्तम्=लसितम्, अम्बरम्=गगनतलम्, येन तादृशम् । अम्बरम्=वसनम् । हरितम्=पालाशवर्णम्, शोणितम्=लोहितम्, अर्जुनः=श्वेतः, हारिद्रम्=पीतवर्णः, इत्यादि, अनेकविधम्=विविधप्रकारम्, यद् चाकचक्यम्=चमत्कृतिः, तेन, आक्षिप्तानि, अक्षीणि, यैरेवम्भूतानाम्, मणिमयानाम्, अलङ्काराणाम्=आभूषणानाम्, निचयो यस्मिन् तादृशम् । भुजमण्डलविशेषणम् । अस्त्रादीनाम्, विविधानाम्, आयुधानाम्

श्वधादि-विविधाऽऽयुध-मुष्टिपीडन-पराधीन-मुष्टिकं भुज-मण्डलम् ; ताम्बूल-राग-रक्तोष्ठं शोणापाङ्ग-लोचन-युगलं पूर्वाचल-चूडा-चुम्बि-चन्द्र-चन्द्रिका-चयेनेव रचितं मुनिजन-मनोमन्दिरं मन्मथ-मथन-नयन-मिलिन्द-विश्रामैक-कोकनदं वदन-मण्डलञ्च पश्यन् , विस्मृतात्मा क्षणं बद्ध-करसम्पुटस्तूष्णीक एव तस्थिवान् ।

किञ्चित्क्षणानन्तरञ्च-"अहो ! यस्याश्चरण-रेणु-निकरेणैव

मुष्टिपीडने=अग्रभागग्रहणे, मुष्टिः="मूंठ"इति हिन्दी, पराधीनानि, मुष्टिकानि, यस्य तादृशम्। **भुजानाम्**=अष्टादशसङ्ख्याकानाम्, बाहूनाम्, **मण्डलम्**=समूहम्। "अष्टादशभूजा पूज्या सा सहस्रभुजा सती"ति रहस्यवचनेन महालक्ष्म्या अष्टादशभुजत्वोक्तेः, तस्या एव राज्ञां पूजाविषयत्वात्। अत एव चालङ्काराणामायुधानाञ्चानेकविधत्वं प्रदर्शितमिति यत्किञ्चिदेतत्। ताम्बूलरागेण रक्तौ, ओष्ठौ यस्मिन् तादृशम्। वदनमण्डलविशेषणमिदमग्रेतनानि च। **शोणापाङ्गम्**=रक्तप्रान्तम्, लोचनयुगलं यस्मिन् तत्। **पूर्वाचलचूडाचुम्बिनः**=उदयगिरिशृङ्गसम्पर्किणः, **चन्द्रिकाणाम्**=कौमुदीनाम्, **चयेन**। **रचितम्**=निर्मितम्। मुनिजनमनसाम्, **मन्दिरम्**=देवायतनम्। **मन्मथमथनस्य**=काममर्दनस्य, **नयनमिलिन्दानाम्**=नेत्रभ्रमराणाम्, **विश्रामस्य**=विश्रान्तेः, **एकम्**=अद्वितीयम्, **कोकनदम्**=रक्तकमलम्। **वदनमण्डलम्**=मुखमण्डलम्। पाणिनीयव्याकरणानुसारं 'विश्रम' इत्येव युक्तः प्रयोग इति "विश्राम इति त्वपाणिनीयमि"ति वदतां दीक्षितादीनाम्मतम्। तन्मते प्रयोगाणामीदृशानां पाणिनिबोधाविषयाणां माहेश्वरव्याकरणेन साधुत्वमिति पूर्वमेव निवेदितम्। वस्तुतस्तु पाणिनिव्याकरणेनाप्यस्य साधुत्वमिति कौमुदीटीकासु विवृतम्।

चरणरेणुनिकरेण=अङ्घ्रिधूलिव्रजेन। "समादाय स्रष्टा सृजति पदपांसून्

शेषस्यापि शिरोधार्य्यं गृहीत-वराहावतारस्य विष्णोरप्युद्धरणीयं गङ्गाधरस्यापि भस्मच्छुरण-च्छद्मना सर्वाङ्गसंश्लेषणीयं ब्रह्माण्ड-मण्डलं रचितमस्ति ; सेयं भगवती जगदम्बिका समुपस्थिता"—इति सञ्चिन्त्य साष्टाङ्गं प्रणम्य बहुशः स्तुत्वा च समचकथम्—

'मातः ! काऽतः परं प्रतीक्ष्यते दुर्दशा भारतवर्षस्य ? यदा सफलीकरिष्यसीमं बाहु-सहस्र-भारम्। आः ! पश्यतोः पित्रोर्बालाः करपत्रैः कर्त्यन्ते ; रुदतः पत्युः पत्न्यः पात्यन्ते ; हाहाकारैर्गगन-तलमपि विदारयतां भक्तानां भगवन्मन्दिराणि चूर्ण्यन्ते; सोढ-विविध-बाधानां निरपराधानां हीनानां दीनानां रक्तै रक्ताक्रियते भगवती वसुन्धरा। देवि ! निजतनयेषु समापादिता इमा

निजकरैरि"ति देवीस्तवे भगवच्छंकराचार्यैरुक्तम्। शेषस्य=अनन्तस्य। शिरसा धार्यम्=वाह्यम्। गृहीतवराहावतारस्य=धारितसूकराकृतेः। विष्णोः=वासुदेवस्य। उद्धरणीयम्=उत्खातयितव्यम्। गङ्गाधरस्यापि=भूतेशस्यापि। भस्मच्छुरणच्छद्मना=भूतिरूषणव्याजेन। सर्वेषु, अङ्गेषु, संश्लेषणीयम्=समालिङ्गनीयम्। जगदम्बिका=विधिहरीशादीनामप्युत्पादयित्री शिवादिन्निा तुरीया काचिच्छक्तिः। तथा चाऽऽचार्यचरणाः—

गिरामाहुर्देवीं द्रुहिणगृहिणीमागमविदो
हरेः पत्नीं पद्मां हरसहचरीमद्रितनयाम्।
तुरीया कापि त्वं त्रिभुवनमहामाये ! विहरं
महामाये ! विश्वं भ्रमयसि परब्रह्ममहिषी ॥

करपत्रैः=करकचैः। कर्त्यन्ते=छिद्यन्ते। पात्यन्ते=भ्रश्यन्ते, पातित्र-स्यात्। चूर्ण्यन्ते=धूलिसात्क्रियन्ते। सोढविविधबाधानाम्=अङ्गीकृतनेक-पीडानाम्। रक्ताक्रियते=लोहिता सम्पाद्यते। समापादिताः=सम्प्रापिताः।

दुर्दशाः पश्यन्त्यपि न पश्यसि। रोदसी रोदयद्रोदनमदः शृण्वन्त्यपि न शृणोषि। मातैव समुपेक्षेत चेत् कोऽन्यो रक्षितुमपेक्षेत बालान्।

योऽसौ दिल्ली-दौर्भाग्य-परिणाम-स्वरूपोऽवरङ्गो मया युद्धे विजितो गृहीत्वाऽपि च शरणं वाञ्छन् जीवन्नेव परित्यक्तः; स एवासौ मैत्रीं प्रतिज्ञाय, अस्मद्बन्धुष्वन्यतमं महाराष्ट्रराजं जयपुरेश्वर-द्वारा स्वालयमानाय्य विश्वास्यापि कारागारनिरुद्धमकरोत्। सहसे चेदीदृशान् करालानत्याचारान्; मुधैव जगज्जननीपदेन विडम्ब्यसे। यदि नाहं सत्वरं शृणोमि-"शिवराजः कुशलेन महाराष्ट्रदेशं न्यवर्तत"—इति; ततस्तु भवत्याः सत्ता-विषयेऽपि शैथिल्यमासादयिष्यति मे विश्वासः"—

इति कथयति मयि; गम्भीरेण स्वरेण दुर्गा समगादीत्-"मुक्तो महाराष्ट्रराजश्चतुर्थेऽहनि प्रतापदुर्गं प्रवेक्ष्यति। मा स्म खिद्यथाः! दुराचारा एते न चिरमधिकरिष्यन्ति। कियतैव कालेन करटैः सरटैरेव च व्याप्ता द्रक्ष्यन्त एतेषां प्रासादाः" इत्युक्त्वैवान्तरधाद् देवी।

रोदसी=द्यावापृथिव्यौ। रोदयत्=क्रन्दयत्। अपेक्षेत=अपेक्षां कुर्यात्।

दिल्ल्याः, दौर्भाग्यस्य=दुरदृष्टस्य, परिणामस्वरूपः=परिपाकावभासः। शरणम्, वाञ्छन्=अभिलषन्। मैत्रीम्=सौहार्दम्। आनाय्य=प्रापयित्वा। विश्वास्य=विश्वासमुत्पाद्य। विडम्ब्यसे=अनुक्रियसे। सत्तायाः=विद्यमानतायाः, विषये।

खिद्येथाः=खेदं भजेथाः। करटैः=काकैः। सरटैः=कृकलासैः। अन्तरधात्=अन्तर्धानीभूता।

प्रबुद्ध एव च पत्रमेतत् प्रहिणोमि, यतः प्रायशो न भवन्ति वितथानि स्वप्न-कथानकानीदृक्षाणि ।

इतस्तु साम्रेडमिदमेव कथ्यते—यन्न कदाऽपि कथमपि दिल्ली-कलङ्का इमे विश्वसनीयाः । दृश्यताम , योऽसौ जयसिंहो भारते स्तम्भभूतो यवनराज्यस्य; यश्च भवादृशानपि यवन-कुल-करि-कदम्ब-केशरिणो हस्तयित्वा दिल्लीमानिन्ये; तस्मिन्नेव दक्षिणदेशे युद्ध-महाम्बुधि-निमग्ने, वारं वारं सक्रन्दनं कुमाररामसिंहेन प्रार्थ्यमानोऽपि सेना-प्रेषणेन सम्राट्पद-विडम्बनोऽसौ रक्षा-भिक्षां न प्रादात्; जयपुराधीश्वरस्य विपत्तिमाकलय्य च प्रासीदत्; सोऽसौ स्वप्नेऽपि न सन्धेयः । पुनरेतेन सह योद्धव्यम् । अवहेलितो जयपुरेश्वरो नाधुनैतस्य साहाय्यं विधास्यति । मरुधराधीशश्च यवनराजस्यैवाविश्वास्यः । यदितोऽप्येतौ यवनसेनां निजभटैर्द्विगुणयन्तौ प्रचलेताम्; तदितोऽहमेतयो राज्यं भस्मसात् करिष्यामि, अस्माकमपि चिरवैरं जयपुरेण सहेति को न वेत्ति ? भवता स्वप्रान्तस्थैरपरैरपि विजयपुराधीश्वरादिभिः सह योक्तव्यम् । भारतवर्षे न कोऽपि शुद्धेन हृदा समाद्रियत एतान् मन्दिर-मर्दनान् यवनहतकान् । अस्मासु भेरीराहत्य ध्वजानुद्धूय युद्धं विदधत्सु च;

प्रहिणोमि=प्रेषयामि । वितथानि=असत्यानि । स्तम्भभूतः=आधारभूतः । यवनकुलमेव करिकदम्बं तस्य केशरिणः=मृगेन्द्रान् । हस्तयित्वा=वशमानीय । आकलय्य=निर्धार्य्य । प्रासीदत्=प्रसन्नतां गतः । सन्धेयः=सन्धातुमर्हः । अवहेलितः=तिरस्कृतः । अविश्वास्यः=विश्वासाभाजनम् । यवनसेनाम्=म्लेच्छवाहिनीम् । द्विगुणयन्तौ=वर्धयन्तौ । चिरवैरम्=प्राचीनं

स्मारं स्मारमेषामत्याचारान् सर्वेऽप्यस्माकमेव वलक्षं पक्षमवलम्बिष्यन्ते। न चैषां शरणागत-घातकानां विहित-महापातकानां कुक्कुट-कूट-कवलीकाराऽऽकलित-कलुष-कुटिल-कर्कशाऽऽकार-विकार-प्रकाराणामकीर्ति-सवनानां दुराचार-यवनानाम्! तच्छीघ्रं निष्कृप-कृपाण-धारा-प्रवाह एव प्रवाहयन्तु भवन्त एतान्।

एतावन्मात्रं पठितवत्येव माल्यश्रीके; परितो "हन्यन्तां हन्यन्तां म्लेच्छाः"—इति महान् समुदस्थात् प्रतिध्वनि-ध्वनन-शतगुणितो ध्वनिः। महाराष्ट्रचक्र-चक्रवर्त्ती च दक्षिण-करपल्लवाग्रेण श्मश्रु-प्रान्तं परिमृशन्, गगने दृष्टिं बद्ध्वा प्रोवाच—"अरे! अरे यवनाः! सपदि विलयं याथ!!"

अथ माल्यश्रीक उवाच—देव! अपरमपि किञ्चिदवशिष्यते पठितुम्।

ततः "पठ्यतां पठ्यताम्"—इत्याज्ञापयति महाराजे, पुनरारब्धवान् पठितुं यद्—

"इति भवतः प्रत्यावर्त्तनस्य हर्ष-वर्ष-पुरस्सरं साशीराशि

शत्रुत्वम्। युद्धम्=सङ्ग्रामम्। विदधत्सु=कुर्वत्सु। वलक्षम्=शुद्धम्। अवलम्बिष्यन्ते=धारयिष्यन्ति। कुक्कुटकूटकवलीकारेण=चरणायुधौघभक्षणेन, आकलितम्=सञ्चितम्, यत् कलुषम्=पाप्मा, तेन, कुटिलाः=वक्राः, कर्कशाः=कठोराः, आकारविकारप्रकाराः, येषां तेषाम्। अकीर्त्तिसवनानाम्=अयशोयज्ञानाम्।

प्रतिध्वनीनाम्, ध्वननेन=रणनेन, शतगुणितः=अतितरां वृद्धिं नीतः। परिमृशन्=परिमार्जयन्। विलयम्=विनाशम्।

समापयामि विषयममुम् ।

द्वितीयश्चासौ निवेदनीयो वृत्तान्तो यद्—आसीदस्मद्बन्धुः खड्गसिंहः ।

इति स्वपितृनामधेय-श्रवणेन सावष्टम्भं सगात्र-स्फुरणं चैकाग्रयोर्गौरसिंह-श्यामसिंहयोः पुनरग्रतोऽपठत् —तस्य पुत्रौ गौरसिंह-श्यामसिंहौ, आख्याऽनुकूलाकारौ, आखेट-परिभ्रष्टौ, चिरान्वेषणैरप्यस्माभिरलब्धौ, श्रीमद्दत्तहस्तावलम्बनौ स्त इति श्रूयते । सत्येयं वार्त्ता चेत्; तौ सपद्यस्मन्निकटे प्रेषणीयौ, तदीया सर्वाऽपि स्थावर-जङ्गम-सम्पत्तिरस्माभिः सम्यग् रक्षिता वर्द्धिता चास्ति । तावागत्य स्व-सम्पदं स्वायत्तां कुर्य्यातां चेद् ; गतैतच्चिन्तश्च सुखेन समुच्छ्वसेयम् । तद्भगिनी कोशला तत्पुरोहितो देवशर्म्मा च क स्त इति नाधुनाऽपि मम ज्ञान-गोचरतामापन्नम् । परन्तु तत्सत्ता-सम्बन्धेऽपि भवद्राज्य एव पक्षपातो मे हृदयस्य ।

समाप्तप्रायेऽप्यस्मिन् पत्रे पुनरेतत्सूचयामि—यद् भाग्यैरेषां भारत-परिपन्थिनां यवनानां न भवति पारस्परिक-प्रीतिरस्माकं

सावष्टम्भम्=सस्थगनम् । **सगात्रस्फुरणम्**=सकम्पम् । **एकाग्रयोः**=यतचित्तयोः । **आख्यानुकूलाकारौ**=नामधेयसदृशाकृतिकौ । **आखेटे**=मृगयायाम् , **परिभ्रष्टौ**=दूरीभूतौ । **स्थावरा**=स्थितिशीला भूवृक्षादिरूपा, **जङ्गमा**=गमनशीला गजाश्वादिलक्षणा, **सम्पत्तिः**=लक्ष्मीः । **रक्षिता**=पालिता । **वर्द्धिता**=वृद्धिं नीता । **स्वायत्ताम्**=स्वाधीनाम् । **समुच्छ्वसेयम्**=श्वासं गृह्णीयाम् । सुखी स्यामिति यावत् । **ज्ञानगोचरताम्**=ज्ञानविषयताम् । **आपन्नम्**=आयातम् । तयोः, **सत्तायाः**=स्थितेः, **सम्बन्धे**=विषये ।

भारतीय-क्षत्रियाणाम् । तद् भारताभिजन-भूरि-भाग्य-भवनं भारताभिभावक-भाग्य-पराभवनञ्च सर्वथैक्यमेवाऽऽसादनीयमस्माभिः । पारस्परिक-विरोध-ज्वरावलीढानि दुर्बलानि भवन्ति बलानि, प्रेम-पीयूष-धाराऽभ्युक्षितानि च महामहांसि सम्पद्यन्ते तेजांसि—इति किमधिकं वचनीयं स्यान्नीति-निष्णातेषु भवत्सु"—इति ।

तदाकर्ण्य महाराष्ट्रराजः प्रावोचत्—

सत्यं दुग्धदग्धो जनस्तक्रमपि व्यजनैर्वीजयित्वा पिबति, व्याविद्धकण्टको न कण्टकाऽऽकुलेन पथा पौनःपुन्येन प्रचलति, तद् यवनैः सह सन्धेर्ज्ञाताऽऽस्वादैः कथं मुहुर्मुहुः संमुह्य सन्धास्यते ? धन्य उदयपुराधीश्वरः ! यः स्वयमेव खड्गमात्र-सहायस्य मम सहायः संवृत्तः । "एकमेकञ्चैकादश भवन्तीति" प्रसिद्धमाभाणकम् । तदावामधुना द्वौ महासमुद्रौ स्वाङ्कस्थितैस्तिमिङ्गिल-

---

पारस्परिकप्रीतिः=आन्योन्यप्रेमा। भारताभिजनानाम्, भूरिभाग्यस्य=महतो भागधेयस्य, भवनम्=सदनम् । भारताभिभावकानाम्=भारतशासकत्वेन ख्यातिं गतानाम्, यवनानाम्, भाग्यस्य, पराभवनम्=तिरस्करणम् । दुर्बलानि=बलशून्यानि । बलानि=सैन्यानि । नीतिनिष्णातेषु=नीतिनिपुणेषु ।

दुग्धदग्धः=तप्तेन पयसा ज्वलितमुखः । तक्रम्=उदश्वित् । व्याविद्धकण्टकः=शङ्कयन्त्रितः । ज्ञातास्वादैः=अनुभूतरसैः । संमुह्य=मूढो भूत्वा । सन्धास्यते=सन्धिर्विधास्यते । खड्गमात्रम्, सहायः=साहाय्यकारी यस्य सः । असहायस्येत्यर्थः । एकसङ्ख्यामुल्लिख्य तद्वामे दक्षे वा पुनस्तस्या एवोल्लेखे भवत्येकादशसङ्ख्या । तिमिङ्गिलप्रायैः=महामत्स्यतुल्यैः, इतरमत्स्यकवलीकारकोविदा

प्रायैर्वीरैर्भरितौ प्रत्यर्थिन एतान् व्यामोह-प्रवाह-पतितान् गण्डू-पद-वृन्दानिवादयिष्यावः।

तावदकस्मात् प्रविश्य प्रतीहारः प्रणम्य प्रावोचत्—देव! "सेनापतिर्विजयध्वजः समुपतिष्ठते"-इति। 'आम्! प्रवेशय प्रवेशय' इत्युक्तश्च तं प्रावेशयत्।

स च सौवर्ण-प्रान्तारुण-वस्त्राऽऽलिङ्गिताङ्गः कटि-विलम्बि-महाचन्द्रहासः शिरसा भुवं स्पृशन् करौ सम्पुटीकृत्य न्यवेदयद्—

विजयतां विजयतां महाराष्ट्र-चक्र-चक्रवर्त्ती, मण्डलेश्वर-मण्डल-चूडामणि-चोचुम्ब्यमान-चरणतलो महाराजाधिराजः!

देव! सन्धि-बन्धनाय यान्यस्मद्विजित-दुर्गाणि दिल्लीदूषणाय प्रतिनिवर्त्तितान्यासन्; तानि ह्य एव श्रीचरणानामाज्ञयाऽस्माभी रञ्जितानि। प्रातरेव चाद्य सर्वाण्यपि देवस्य वशंवदानि संवृत्तानि।

महान्तो मत्स्यास्तिमिङ्गिलाः पूर्वं प्रदर्शिताः। व्यामोहस्य=मूर्खतायाः, प्रवाहे=धारायाम्, पतितान्=आगतान्। गण्डूपदवृन्दानिव=किञ्चुलकव्रातानिव। "गण्डूपदः किञ्चुलक"इत्यमरः। "केंचुवा"इति हिन्दी। आदयिष्यावः=खादयिष्यावः।

सौवर्णप्रान्तेन=चामीकरतन्तुखचिताग्रेण, अरुणेन=ईषद्रक्तेन, वस्त्रेण, आलिङ्गिताङ्गः=भूषितशरीरः।

मण्डलेश्वरमण्डलस्य, चूडामणिभिः=शिरोमौक्तिकैः, चुम्ब्यमानम्=स्पृश्यमानम्, चरणतलं यस्य सः।

सन्धिबन्धनाय=मित्रतास्वीकृतये। प्रतिनिवर्त्तितानि=प्रतिदत्तानि। रञ्जितानि=आक्रान्तानि। वशंवदानि=स्वायत्तीकृतानि।

शत्रुभटाः केचन हताः, केचन पलायिताः, केचन गृहीताः, केचन च "त्रायध्वं त्रायध्वमिति" वदन्तः शरणागताः संवृत्ताः।"

ततः सर्वे जयध्वनि-प्रतिध्वनिभिः प्रासादमेवाध्वनयन्। महाराजश्च सौवर्ण-कङ्कण-युगलमस्मै प्रादात्।

ततः क्षणं परस्परं विविधानालापान् विधाय, बहुविध-वीररस-कलित-कविताः पठते कविकुल-भूषणाय भूषणाय भूस्वामिता-सूचकमधिकारपत्रं प्रायच्छत्। स च गृहीत्वा पत्रमेनत् साशीराशि पुनरन्या धन्य-धन्या मान्य-मान्या ओजस्वि-पदविन्यासास्तत्क्षण-रचिताः कविता अपठत्; याः श्रुत्वा तत्रत्य-वीराणां दक्षिण-बाहवः प्रास्फुरन्, कृपाणाः स्वयं कोशात् किञ्चिद् बहिर्निरगच्छन्, लोचनानि च माञ्जिष्ठ-मञ्जिमानमकलयन्।

ततः क्षणं निभृतं स्थित्वा भूषणं प्रशस्य गौरसिंहाभिमुखीभूय महाराज उक्तवान्—

गौर! श्रुतं भवता—यद् उदयपुराधीश्वरेण क्षत्रिय-कुल-कमल-

सौवर्णकङ्कणयुगलम्=हैरण्यवलयद्वयम्।

बहुविधाः=अनेकप्रकाराः, **वीररसाकलिताः**=ओजःपूर्णाः, **कविताः**=काव्यानि। **एनत्**=अधिकारताबोधकं पत्रम्। **अन्याः**=इतराः। **ओजस्विनाम्**=ओजोगुणपूर्णानाम्, पदानाम्, विन्यासो यासु ताः। **प्रास्फुरन्**=समचलन्। **कृपाणाः**=असयः। **स्वयम्**=आत्मनैव। अनिष्कासिता एवेति यावत्। **बहिर्निरगच्छन्**=बहिर्निष्क्रान्ताः। अतिशयोक्तिः। **लोचनानि**=नयनानि। **माञ्जिष्ठमञ्जिमानम्**=मञ्जिष्ठवर्णताम्। **अकलयन्**=अधारयन्।

निभृतम्=मौनम्।

दिवाकरेण भवन्तमुद्दिश्य लिखितम्! धन्यो भवान्! य एवं मत्प्रीति-प्रवाह-पात्रमपि पूर्ण-प्रताप-पटल-पाटलीकृत-मेदःपाटेन दुष्ट-गण-दुर्घट-घटना-विघाटनेन प्रत्यर्थि-प्राचीर-कपाट-विपाटनेन तत्रभवता श्रीमदुदयपुर-परिवृढेनापि सततं स्मर्य्यते। भाग्यवानसि, सम्प्रति सम्पाद्य भगिन्या उद्वाहमहोत्सवं वारमेकं गत्वा महाराजमानन्दय, स्वसम्पत्तिमवलोकय। सानुजस्त्वं चिरात् कौमार-महाव्रतमेवाङ्गीकृत्य कुलोचितां वीरता-धुरं वहसि, तदधुना ससोदर्य्यः पदमाधेहि गार्हस्थ्याश्रमे।

श्रुत्वैतच्छिरो नमयित्वा यावत्किमपि विवक्षते गौरसिंहः; तावत् प्रविश्य विप्र-बटुनैकेन साशीर्वचनं निवेदितं यत्—"सम्पन्नो भगवत्प्रसादीकृतास्वाद्यास्वादन-समयः"—इति।

ततः "पुनरालपिष्यामः"—इत्युक्त्वा महाराज उदस्थात्। सर्वे च यथोचिताऽऽचारपुरस्सरं निवृत्ताः।

× × × × ×

मत्प्रीतेः, प्रवाहस्य, **पात्रम्**=आधारः। **पूर्ण-प्रताप-पटलेन**=अत्यधिकतेजःसमूहेन, **पाटलीकृतः**=श्वेतरक्तीकृतः, **मेदःपाटः**=मेवारः, येन सः। दुष्टगणस्य, **दुर्घटघटनायाः**=अनिष्टकारिकर्त्तव्यस्य, **विघाटकेन**=विनाशकेन। **उदयपुरपरिवृढेन**=उदयपुराधीश्वरेण। **आनन्दय**=हर्षय। **कौमारम्**=अविवाहित्वम्, एव **महाव्रतम्**=कठोरं नियमम्। **ससोदर्यः**=सानुजः।

भगवत्प्रसादीकृतस्य=भगवदर्पितस्य, **आस्वाद्यस्य**=खाद्यस्य, **आस्वादनसमयः**=रसग्रहणसमयः। भोजनकाल इति यावत्।

उदस्थात्=उत्थितोऽभूत्।

महामङ्गलमयं दिनमिदं सौवर्णी-विवाहस्य। केन वा वर्णनीया स्याद् नवाधिकृत-राज्यस्य राज्ञो गौरसिंहस्य नवाऽऽसादित-प्रासाद-परिष्कार-शोभा ? प्रासादेऽस्मिन् प्रतिद्वारं प्रत्यङ्गणं प्रतिशालं प्रत्यट्टं प्रतिप्रघणञ्च रम्भा-स्तम्भाः, मङ्गल-कलशाः, अशोक-पल्लव-तल्लजावली, प्रतिस्तम्भं परिवेष्टयत्कुसुमित-वल्ली-मतल्लिकाः, प्रतिकलशं कुङ्कुम-कस्तूरी-चन्दन-चर्चा-मचर्चिकाः, प्रतिगवाक्षं यक्षकर्दम-वृकधूप-घनसारधूप-धूमोद्भूत-घन-घना-घनोद्घाः, प्रतिकुड्यं माङ्गलिक-मण्डन-प्रकाराः, प्रतिचन्द्रशालञ्च

वर्णनीया=कथनीया। नवम्, अधिकृतम्=अधिष्ठितम्, राज्यं येन तस्य। नवासादितप्रासादस्य=त्वरितप्राप्तहर्म्यस्य, परिष्कारशोभा=भूषितीकरणच्छविः। द्वारं द्वारं प्रतिद्वारम्। प्रत्यङ्गणम्=प्रत्यजिरम्। प्रतिप्रघणम्=प्रत्यलिन्दम्। अशोकपल्लवतल्लजानाम्=अशोकप्रशस्तकिसलयानाम्, आवली=पङ्क्तिः। प्रतिस्तम्भम्, स्तम्भं स्तम्भम्। परिवेष्टयन्त्यः=वलयिताः, कुसुमिताः=विकसिताः, वल्लीमतल्लिकाः=प्रशस्ता व्रततयः। कुङ्कुम-कस्तूरी-चन्दनानाम्=काश्मीरकेसर-मृगमद-पाटीराणाम्, चर्चामचर्चिकाः=मनोहराणि रूपणानि। प्रतिगवाक्षम्=प्रतिवातायनम्। यक्षकर्दमः=एकीकृतं कर्पूरादि। तदुक्तं व्याडिना—

कर्पूरागुरुकस्तूरीकक्कोलघुसृणानि च।
एकीकृतमिदं सर्वं यक्षकर्दम इष्यते॥

वृकधूपः=दशाङ्गधूपः, घनसारधूपः=कर्पूरधूपः, एतेषां धूमैः, उद्भूताः=उत्थिताः, घनाः=सान्द्राः, ये घनाघनोद्घाः=प्रशस्ता वर्षुकवारिदाः। प्रतिकुड्यम्=प्रतिलतादिपिहितद्वारम्। माङ्गलिकानाम्=मङ्गलप्रयोजनानाम्, मण्ड-

दोधूयमाना ध्वजाः परितो मङ्गलमिव वर्षन्ति स्म। परितः सुदूरपर्य्यन्तं केतक-सौरभ-सुरभीकृतैरम्भोभिः परिषिक्ताः पन्थानः खेचराणामपि घ्राणांस्तर्पयन्ति स्म।

अभितो मार्गञ्च रम्भा-स्रक्-पल्लव-तोरण-पताका-कलशादीनां श्रेणी श्रेयांसि विश्राणयति। दुन्दुभि-पणवाऽऽनक-मर्दल-झर्झर-डिण्डिम-पटहादि-वाद्यानां सप्रसादा नादाश्च दिवं स्पृशन्ति। सुहासिनीनां सुवासिनीनां कलित-ललित-काकलीभिरुन्नीतानि गीतानि पुंस्कोकिलानपि कल-कूजनं शिक्षयन्ति। पीतारुण-कौसुम्भ-पट्टोष्णीषोत्तरीय-कञ्चुकाः कुङ्कुमतिलकाः क्रमुक-कुसुम-कुङ्कुमाऽक्षताम्बर-नारिकेलादि-महामाङ्गलिकोपायन-हस्ताः

नानाम्=सन्नद्धीकरणानाम्, प्रकाराः=भेदाः। प्रतिचन्द्रशालम्=प्रतिशिरोगृहम्। दोधूयमानाः=हिल्लोल्यमानाः। वर्षन्ति स्मेवेति क्रियोत्प्रेक्षा। केतकसौरभेण=केतकसुगन्धिना, "केवड़े के जल से" इति हिन्दी, सुरभीकृतैः=सुगन्धितामापादितैः। परिषिक्ताः=सर्वत आर्द्रीकृताः। खेचराणामपि=आकाशगामिनामपि। भूचारिणां तु कथैव का। घ्राणान्=नासिकाः।

अभितः=उभयतः। श्रेयांसि। विश्राणयति=ददाति। सप्रसादाः=मनोहर्षकाः। नादाः=ध्वनयः। दिवम्=नभः। स्पृशन्ति=व्याप्नुवन्ति। सुहासिनीनाम्=शोभनहासवतीनाम्। सुवासिनीनाम्=वनितानाम्। कलितललितकाकलीभिः = धारितशोभनसूक्ष्मकलैः। उन्नीतानि=उत्थापितानि। पुंस्कोकिलान्=पिकान्। कलकूजनम्=सूक्ष्मभाषणम्। शिक्षयन्ति=पाठयन्ति। आसां गीतध्वनिः कोकिलध्वनेरपि मधुर इति तात्पर्यम्। पीतारुणकौसुम्भानि, पट्टानि=कौशेयानि, उष्णीषोत्तरीयकञ्चुकानि येषां ते। क्रमुकम्=पूगी, कुसुमम्=पुष्पम्, कुङ्कुमम्=केसरम्, अक्षताः=तण्डुलाः, अम्बरम्=

सहस्रशो नागरिका यातायातैः पदवीराकुलयन्ति।

समयेऽस्मिन् महाराष्ट्रराजः स्वयमुपतिष्ठते गौरसिंहप्रासादे। प्राप्त-राज्यस्य सोदर्य्या-पाणिपीडन-महोत्सव-पीयूष-पूर-प्रवाह-स्नातस्य दक्षिण-क्षितिचक्र-चक्रवर्तिनाऽपि च सनाथ्यमानस्य केन वा वर्णनीयः स्यादानन्दो गौरसिंहस्य श्यामसिंहस्य च।

अद्य वृद्धोऽपि देवशर्म्मा महोत्सव-रस-रसायनैस्तरुणीकृत-इव क्षणमुद्वाह-मण्डपे क्षणं जन-समाजे च प्रविशति, क्षणमेष रजत-पात्र-स्थापिता औद्वाहिकीः सामग्रीर्गणयति, 'क्षणं हरिद्रा हरिद्रा, लाजा लाजाः, शमी शमी, दूर्वा दूर्वति, सामग्रीरानेतुं छात्रान् त्वरयति, क्षणं तिथिपत्रं प्रसार्य्य ग्रहगतीरालोकयति, क्षणञ्चाऽऽयस्त इव भित्तिकाश्रितः पृष्ठदेश उपविश्य कण्ठावलम्बिनीं तुलसी-मालिकां

एतैर्नैव प्रसिद्धं सुगन्धद्रव्यं बहुमूल्यम्, **नारिकेलम्**=लाङ्गलीफलम्, इत्यादीनि, **महामाङ्गलिकानि**=अतिशयमङ्गलबोधकानि, **उपायनानि**=उपहाराः, हस्ते येषां ते। **पदवीः**=सरणीः।

सोदर्य्यायाः=समानगर्भजातायाः, भगिन्याः, **पाणिपीडनमहोत्सव एव**=विवाहमहोद्धव एव, **पीयूषपूरप्रवाहः**=अमृतमहाधारा, तेन **स्नातस्य**=निर्णिक्तस्य। दक्षिणक्षितिचक्रस्य, **चक्रवर्त्तिना**=सम्राजा। **सनाथ्यमानस्य**=सगौरवीक्रियमाणस्य, सभाजितस्य।

महोत्सवरस एव **रसायनानि**=जीवनौषधानि, तैः। **तरुणीकृत इव**=युवकीकृत इव। **औद्वाहिकीः**=उपयमसम्बन्धिनीः। **गणयति**=सङ्ख्यायते। **सामग्रीः**=उपकरणानि। **त्वरयति**=शीघ्रयति। **तिथिपत्रम्**=पञ्चाङ्गम्। **आयस्त इव**=श्रान्त इव। भित्तिकां श्रितः, **भित्तिकाश्रितः**। "द्वितीया श्रिता-

करे कृत्वा चक्षुषी सम्मील्य भगवन्नामानि जपति।

तावदश्रूयत भेरी-पटह-शङ्ख-झर्झरादीनां दविष्ठो ध्वनिः, क्रमेण चायं नेदिष्ठतां प्रतिपेदे। "वरयात्रा वरयात्रेति" परितः समुदस्थाद् महोत्साहमयः कलकलः। सत्पथाभिमुख-चन्द्रशालासु गवाक्षेषु च सपदि प्रविश्य शतशो गायन्त्यश्चिरण्ट्य उपतस्थिरे। अभितो मार्गं जनानां महान् सम्बाधः। द्वार-समीपवर्त्तिनि, रम्भा-स्तम्भ-सहस्र-हरिते, आरक्त-पताका-पटलारुणिते, जाम्बूनद-वितान-प्रभा-पुञ्ज-पीते, अनेक-शत-मञ्चाधिष्ठिते, महाकुट्टिमे गौर-प्राघुणकाः प्राविशन्। मञ्च-मण्डल-मध्यवर्त्ति-महत्सौवर्ण-सिंहासनं महाराष्ट्रराजोऽलञ्चकार। क्रमतश्च यथाधिकारमन्येऽपि मञ्चानध्यवसन्। ततोऽपि च पृष्ठतः सतारा-पुरी-वास्तव्या बहवः

तीतपतितगतात्यस्तप्राप्तापन्नैरि"ति समासः। 'पृष्ठदेशे' इति सप्तम्यन्तं भित्तिकान्वयि द्रष्टव्यम्।

दविष्ठः=अतिशयदूरस्थितः। **नेदिष्ठताम्**=अतिशयनिकटताम्। **प्रतिपेदे**=प्राप। **सत्पथस्य**=शोभनमार्गस्य, **अभिमुखासु**=सम्मुखासु, **चन्द्रशालासु**=शिरोगृहेषु। **गवाक्षेषु**=वातायनेषु। **सम्बाधः**=सम्मर्दः। **आरक्तानाम्**=ईषद्रक्तानाम्, पताकानाम्, पटलेन, **अरुणिते**=लौहित्यमापादिते। **जाम्बूनदवितानानाम्**=हैरण्योल्लोचानाम्, **प्रभापुञ्जैः**=कान्तिपटलैः, **पीते**=हारिद्रे। **अनेकशतैः**, **मञ्चैः**, **अधिष्ठिते**=शोभिते। **महाकुट्टिमे**=महत्यां निबद्धभूमौ। **गौरस्य**, **प्राघुणिकाः**=अतिथयः। "पहुना" इत्यपभ्रंशीभूय लोके ख्यातः। **मञ्चानाम्**=आसन्दीनाम्, मण्डलस्य, **मध्यवर्त्ति**, **महत्**=श्रेष्ठम्, **सौवर्णम्**=जाम्बूनदखचितम्, **सिंहासनम्**=राजासनम्। **यथाधिकारम्**=योग्यतानुकूलम्। **अध्यवसन्**=आरुरुहुः। **सतारायाः**="सातारा" इति ख्यातायाः, पुर्याः **वास्त-**

प्राप्तप्रतिष्ठा विप्राः सुक्षत्रिया वणिजश्च सोपायन-राजत-भाजन-सभाजित-कर-कोकनद-कुड्मलाः स्वोचितमञ्चानध्यतिष्ठन्।

"विचित्रेयं दैव-घटना! क मेदःपाट-वाट-वास्तव्यो गौर-सिंहः श्यामसिंहश्च? क जयपुर-प्रान्त-निवासी वीरेन्द्रसिंहो रामसिंहश्च? केयं सतारा-नगरी? क चैष महामहो महाराष्ट्र-मही-महेश्वरस्य?

गौरोऽपि श्यामोऽपि कोशलाऽपि रामोऽपि वीरोऽपि महाराजोऽपि च सर्व एवैते प्राण-संशयाऽऽपादिकाः कष्टपरम्पराः सोढं सोढमेव प्रतिनिवृत्ताः। दयतामखिलेषु दीन-दयार्द्र-हृदयो दयोदन्वान् दामोदरः; यथैतेषु दयितवान्। नूनं रामं विना कोऽन्यः कोशलायाः सौभाग्य-भवनं भवेत्?

व्याः=वासिनः। प्राप्तप्रतिष्ठाः=लब्धमानाः। सोपायनैः=सोपहारैः, राजतभाजनैः=रौप्यपात्रैः, सभाजिताः=सनाथिताः, कराः, एव, कोकनदस्य=रक्तकमलस्य, कुड्मलानि=कलिकाः, येषां ते। स्वोचितमञ्चान्=स्वयोग्यमञ्चान्।

मेदःपाटस्य, वाटे=मार्गे, वास्तव्यः=निवासी। महामहः=महोत्सवः। "महः उद्धव उत्सव" इत्यमरः।

प्राणसंशयापादिकाः=जीवनसन्देहदायिन्यः। कष्टपरम्पराः=दुःखश्रेणीः। सोढं सोढम्=सहित्वा सहित्वा। प्रतिनिवृत्ताः=प्रत्यागताः। दयताम्=दयां करोतु। अखिलेषु=समस्तेषु भूमण्डलप्राणिषु। दीनेषु=खिन्नेषु, दयार्द्रम्=कृपाकोमलम्, हृदयं यस्य सः। दयायाः, उदन्वान्=सागरः। दाम=रज्जुर्यशोदार्पिता, उदरे यस्य सः, दामोदरः=वासुदेवः। दयितवान्=कृपां कृतवान्।

श्रूयते राम एव क्रूरं हतवान्, राम एव च संन्यासिवेषमाकलय्य प्रच्छन्नरूपो महाराजेन सहैव दिल्लीमगमत्, सैन्धवनियामक-वेषश्च महाराजस्य प्राणानप्यरक्षत्, ईदृशानामेवोदाराणामाचाराणां फलमेतद्-यद् आदौ सन्देश-हरश्चरोऽप्यधुना कोङ्कण-देशस्यान्यतमो मण्डलेश्वरो राजा संवृत्तः । राजपुत्र-देशेऽपि च लब्ध-पारम्परीण-स्थावर-जङ्गम-सम्पत्को जयपुराधीश्वराणां परम-प्रीति-पात्रं समपद्यत ।

धन्योऽसौ गौरसिंहोऽपि यो रसनारीमाहृतवान्, महासेना-समुद्र-वीचि-सहस्रैः कोङ्कण-देशं प्लावयितुकामं मायाजिह्ममपि पक्षिराज इव सुप्तसर्पं निभृतं हृत्वा, आनीय माया-भवने निरुद्धवान् ! अत एव महाराज इममसाधारणं बन्धुं मन्वानो मण्डलेश्वर-पदेनामण्डयत्, अनुजं चैतस्यान्यन्तमं सेनापतिमकार्षीत् ।

अहह !! धन्या भगवती कोशला ! या मनोमात्रेण वृतस्य रामसिं·

क्रूरम्=क्रूरकर्माणम्, क्रूरसिंहम् । **प्रच्छन्नरूपः**=गुप्तवेषः । **सैन्धवनियामकवेषः**=अश्ववाहकनेपथ्यः । **अरक्षत्**=अपालयत् । **सन्देशहरः**=वार्ताहारी । **चरः**=भृत्यः । **लब्धा**=अधिगता, **पारम्परीणा**=पितृपितामहादिपरम्पराप्राप्ता, स्थावरा जङ्गमा च सम्पत्, येन सः । **परमप्रीतिपात्रम्**=अत्युत्कृष्टस्नेहाधारः ।

महासेनैव समुद्रस्तस्य वीचिसहस्रैः । **प्लावयितुम्**=ब्रुडयितुम् । नाशयितुमिति यावत् । **पक्षिराज इव**=वैनतेय इव । **सुप्तसर्पम्**=शयितं सर्पम् । **हृत्वा**=चोरयित्वा ।

अहह = हर्षे । अपिर्भिन्नक्रमः । मनोमात्रेणेत्येतदग्रे द्रष्टव्यः । एवकारार्थे

हस्यापि प्रनष्टता-श्रवणेन जीवनं तृणाय मन्यमाना, समिद्धतमेऽग्नौ प्रवेष्टुं प्रक्रान्तवती, कथं कथमपि वारिता च, मौनमुररीकृत्यावधूत-वेषेण विधूतेतर-वासना-पूतेन हृदा भगवन्तं भूतनाथं चिरमाराधयाम्बभूव। तस्या एव तपसामेष पूरित-सकल-कामः परिणामः।

सत्यम्, कलित-दुर्घट-घटना-नैपुण्यानां पुण्यानामेव फलमिदम्-यद् बाल्ये देवशर्म्म-भिक्षा-भाग-भोग-भागधेयाऽप्यधुना महाराजाधिराजेन निजकन्येव सोत्साहं रामसिंहस्य राज्ञी क्रियते। काऽन्या स्यादितोऽपि धन्य-धन्या" !—

इत्येवं परस्परमालपन्तः सहस्रशो जनाः परितः समुपतस्थिरे।

तावत्समीपमायातो वरयात्रा-समारोहः। एकतान-श्रुतिशतैः सुखेनाऽऽस्वाद्यानां वाद्यानां परतो वाद्यानि, रञ्जित-विविधरङ्ग-भङ्गानां मतङ्गानां परतो मतङ्गाः, अनवरत-पातित-फेन-राजीनां

च। वृतस्य=स्वीकृतस्य। **समिद्धतमे**=अतिप्रज्वलिते। **प्रक्रान्तवती**=प्रारब्धवती। **अवधूतवेषेण**=तपस्विनेपथ्येन। **विधूताभिः**=तिरस्कृताभिः, **इतरवासनाभिः**=अन्यकामनाभिः, **पूतीकृतेन**=पूतेन। **आराधयाम्बभूव**=सेवयामास। **पूरिताः**=पूर्णतां नीताः, सकलाः, **कामाः**=अभिलाषाः, येन सः। **परिणामः**=परीपाकः।

कलितम्=प्राप्तम्, **दुर्घटघटनानाम्**=असम्भाव्यकर्त्तव्यानाम्, नैपुण्यं यैस्तेषाम्। देवशर्मणः, **भिक्षाभागस्य**=याचनांशस्य, **भोगे**=भोजनादिनोपभोगे, **भागधेयम्**=भाग्यं यस्याः सा। **धन्यधन्या**=अतिप्रशस्या।

एकतानश्रुतिशतैः=एकाग्रीकृतानेकश्रोत्रैः। **आस्वाद्यमानानाम्**=गृह्यमाणानाम्। **रञ्जिताः**=रक्तीकृताः, रञ्जिताः, विविधैः, **रङ्गैः**=वर्णैः, **भङ्गाः**=

खर-खुराग्र-समुद्धृत-धूलि-महान्धकारान्धीकृत-महाजीनां वाजिनां परतो वाजिनः, पीतारुणाऽऽद्यनेक-वर्ण-वर्णनीयाम्बराणां मणि-गण-प्रभा-प्रभासिताम्बराणां वीरवराणां परतो वीरवराः, नाना-चित्र-चय-चकितीकृताऽवलोचक-लोचन-व्रजानां ध्वजानां परतो ध्वजाः, तुण्ड-सौष्ठव-परिस्पद्धर्यग्र-व्यग्रीकृत-शकुन्तानां कुन्तानाञ्च परतः कुन्ताः,—इति स्मरण-मात्रेणापि पराधीना अलौकिक-सामर्थ्य-विहीना नवीनाः कथमिव वर्णयेयुः कवि-कोविदम्मन्याः ?

पत्रभङ्गाः, नामैकदेशे नामग्रहणात्, येषां तेषाम् । **मतङ्गानाम्**=करिणाम् । **अनवरतम्**=सततम् , पातिताः फेनराजयः, यैस्तेषाम् । खरैः, खुराग्रैः, **समुद्धृतानाम्**=उत्थापितानाम् , **धूलीनाम्**=रजसाम् , महान्धकारेण, अन्धीकृताः, **महाजयः**=महासङ्ग्रामाः, यैस्तेषाम् । **वाजिनाम्**=घोटकानाम् । पीतारुणाद्यनेकवर्णैः, **वर्णनीयानि**=रञ्जनीयानि, **अम्बराणि**=वसनानि येषां तेषाम् । मणिगणप्रभाभिः, **प्रभासितम्**=प्रकाशितम् , **अम्बरम्**=नभो यैस्तेषाम् । **वीरवराणाम्**=श्रेष्ठभटानाम् । नानाचित्रचयैः, **चकितीकृताः**=साश्चर्यीकृताः, अवलोचकानां लोचनव्रजा यैस्तेषाम् । **तुण्डसौष्ठवपरिस्पर्धिना**=त्रोटि-सौन्दर्यप्रतिद्वन्द्विना, अग्रेण, व्यग्रीकृताः, शकुन्ताः, यैस्तेषाम् । **कुन्तानाम्**=भल्लानाम् । नवीनाः कविकोविदम्मन्याः कथं वर्णयेयुरिति सम्बन्धः । नवीनत्वादननुभूतत्वात्स्मरणासम्भवात्सुतरां वर्णनासम्भवः-तदुक्तम्-स्मरणमात्रेण **पराधीनाः**=अस्वाधीनाः । स्मर्त्तुमप्यशक्नुवन्त इत्यर्थः । अथास्ति कश्चिदन्यो वर्णनोपायो न वा ?-तत्राऽऽह-अस्ति परं सोऽपि नवीनेषु नास्ति, एतदेवाह-**अलौकिकेन**=वैदिकेन, योगादिमाहात्म्यजन्येन, **सामर्थ्येन**=शक्त्या, **विहीनाः**=रहिताः ।

वरयात्रा-महासमारोहस्यैतस्य शेषभागे परिहित-महाकञ्चुकैः, आवद्ध-पीतारुणोष्णीषैः, आमुक्त-मुक्ता-माणिक्य-वैदूर्य्य-हीरक-मरकत-पद्मरागाद्यगणित-मणिगण-प्रभा-पुञ्ज-पिञ्जरीकृत-निज-मण्डलैः, कमल-मुकुल-कुलाऽऽकलित-हार-सौरभ-भार-प्रचाराऽऽकृष्ट-भ्रमद्-भ्रमर-निकर-झङ्कार-स्तूयमानैः, क्षत्रिय-वंशावतंसैः, आवृतः, परस्सहस्र-मौक्तिक-जालावृत-सर्वाङ्गाऽऽ-कलिताऽऽलोचक-लोकन-लोभावह-शोभां नूपुर-शिञ्जितैर-खिलानां मनो हरन्तीं लोल-लाङ्गूलेन चामर-दोलनमनुकुर्वती-मुन्नतग्रीवां स्तब्धकर्णां हरितवर्णां वडवामेकामारूढः सौवर्ण-

---

परिहितमहाकञ्चुकैः=धारितमहाचोलकैः । **आवद्धानि**=वेष्टितानि, पीतारुणानि, उष्णीषाणि यैस्तैः । **आमुक्तानाम्**=बहुमूल्यानाम्, मुक्तामाणिक्य-वैदूर्य्य हीरक मरकत पद्मरागादीनाम्, **अगणितानाम्**=असङ्ख्यातानाम्, मणी-नाम्, गणस्य, प्रभापुञ्जैः, पिञ्जरीकृतानि, निजमण्डलानि यैस्तैः । **कमलमुकु-लकुलैः**=सरसिजकोरकव्रातैः, **आकलितानाम्**=व्याप्तानाम्, हाराणाम्, **सौरभभारप्रचारेण**=सौगन्ध्यभरप्रसरणेन, **आकृष्टानाम्**, भ्रमताम्, भ्रमरा-णाम्, निकरस्य, झङ्कारैः, **स्तूयमानैः**=स्तुतिगोचरीक्रियमाणैः । लुप्तोत्प्रेक्षा । **क्षत्रियवंशावतंसैः**=क्षात्रान्वयभूषणैः, **परिवृतः**=परिलसितः । श्रीमान् राम-सिंह इति विशेष्यम् । परस्सहस्राणाम्, मौक्तिकानाम्, **जालैः**=समूहैः, **आवृतैः**=सञ्छन्नैः, सर्वैः, अङ्गैः, **आकलिता**=धारिता, **आलोचकानाम्**=द्रष्टृणाम्, **लोकनलोभावहा**=दर्शनलालसोत्पादयित्री, **शोभा**=छविः, यया ताम् । **लोल-लाङ्गूलेन**=चञ्चलपुच्छेन । **चामरदोलनम्**=चामरचालनम् । **अनुकुर्वतीम्**=विडम्बयन्तीम् । **उन्नतग्रीवाम्**=उत्कन्धराम् । **स्तब्धकर्णाम्**=शङ्कुश्रोत्राम् ।

शिल्प-सौष्ठवासादितारुण-सर्वाङ्गीण-वासाः, कुसुम-कोरक-रचित-हार-माला-कङ्कण-केयूरावतंस-ललामः, विविधालङ्कारालङ्कृतः, ताम्बूल-रसारुणिताधरः, प्रतिरूपमिव भगवतः कुसुमधन्वनः, अवतार इव माधुर्य्यस्य, विश्वेषां नयनानि सर्वेषाञ्च मनो मोदयन्, जितवार--धराधीशस्य श्रीवीरेन्द्रसिंहस्य कुमारः श्रीमान् रामसिंहो दृष्टः।

दृष्ट्वैव महाराष्ट्रराजं यावत कुमार-रामसिंहस्योपरि प्रसारितं मौक्तिक-जालावली-ललित-प्रान्तं महापुण्डरीक-मञ्जिमामत्रं छत्रं वाहकोऽस्याऽऽकुञ्चयितुं यतते ; तावद् नैवं मैवमुद्वाह-महोत्सवे, अलमेतेनाऽऽचारेण—इति देवेन वारितः पुनस्तथैवावतस्थे। सर्वे

वडवाम्=अश्वाम्। राजपुत्रायतें तदन्तिकेषु च वरो वडवामारुह्य गच्छति। आरूढः=अधिष्ठितः। सौवर्णशिल्पस्य=चामीकरतन्तुकारकृत्यस्य, सौष्ठवेन, आसादितानि=युक्तानि, अरुणानि=रक्तानि, सर्वाङ्गीणानि=सकलशरीरधारणीयानि, वासांसि, यस्य सः। कुसुमकोरकरचितैः=सुमकलिकानिर्मितैः, हारमालाकङ्कणकेयूरावतंसैः, ललामः=शोभनः। विविधैः, अलङ्कारैः, अलङ्कृतः भूषितः। ताम्बूलरसारुणिताधरः=नागवल्लीदलद्रवरक्तौष्ठः। प्रतिरूपमिव= प्रतिकृतिरिव। कुसुमधन्वनः=कामस्य। अवतार इव= देहग्रहणमिव। माधुर्यस्य=सौन्दर्यस्य।

मौक्तिकजालावलीभिः, ललितः=लसितः, रम्यः, प्रान्तः=गोलः, यस्य तादृशम्। महापुण्डरीकस्य=विशालकमलस्य, मञ्जिम्नः=सौन्दर्यस्य, अमत्रम्= पात्रम्, तम्। छत्रम्=आतपत्रम्। आकुञ्चयितुम्=मीलयितुम्। चक्रवर्त्तिनोऽग्रे छत्रचामरादि नान्यैर्धारणीयमिति मर्यादारक्षणार्थम्। अलमेतेनाऽऽचारेण= नाऽऽचरणीयोऽयं व्यवहारः। वारितः=निषेधितः।

च वीरेन्द्रसिंहादयोऽवलोक्यैवमुदारहृदयं सहर्षमहाराजं "विजयतां विजयतां महाराजाधिराजः!"—इत्युच्चैर्जगदुः।

अथ द्वार-समीपमायाते वरे, अट्टस्था माङ्गलिक-गीति-गान-पराः सुन्दर्यः सुमनसो ववर्षुः।

ततो बहुभिराचार-व्यवहारैः सह द्वारपूजायां संवृत्तायां वरेण सह वीरेन्द्रसिंहादयो महाराष्ट्र-देश-दिवस्पतिश्चान्तः प्रविविशुः। श्यामसिंहस्य परमादरेण सन्तर्पिताः सर्व आत्मानमपि विसस्मरुः।

अनुरागिणो हृदयमनुरागी वेत्ति, नापरः। चिरवियोग-ज्वाला-जालावलीढं हृदयं संयोगायातिलोलं भवति। प्रेयः-प्राप्तिः साकल्येन धैर्य्यं धुनोति। तत् को नाम साकल्येन वक्तुं

अट्टस्थाः=अट्टालिकायां विद्यमानाः। माङ्गलिकीनाम्, गीतीनाम्, गाने, **पराः**=लग्नाः। **सुमनसः**=पुष्पाणि। "स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमम्"त्यमरः।

द्वारपूजायाम्=द्वारे स्थापितानां गणेशगौर्यादीनाम्, स्थितस्य वरस्य च सपर्यायाम्। द्वारशब्दस्य तात्स्थ्याल्लक्षणामाश्रित्य षष्ठ्यन्तेन विगृह्य समास इति सिद्धान्तः। एतेन द्वारशब्दस्य जडवाचकत्वेन पूजायाश्च चेतनधर्मत्वेन षष्ठ्यन्त-समासानुपपत्तिमाश्रित्य सप्तम्यन्तसमासोपपत्तिचिन्तार्थं मनीषां क्षपयन्तः परास्ता इति वेदितव्यम्। **संवृत्तायाम्**=समाप्तायाम्, महाराष्ट्रदेशस्य, **दिवस्पतिः**=इन्द्रः। **सन्तर्पिताः**=तृप्तिं नीताः। **विसस्मरुः**=विस्मृतवन्तः।

अनुरागिणः=प्रेमवतः। **हृदयम्**=अन्तः। चिरवियोगज्वालाजालेन, **अवलीढम्**=व्याप्तम्। **संयोगाय**=मिलनाय। **अतिलोलम्**=अतिचपलम्।

पारयति पारस्परिकावलोकन-विकसित-विविधभाव-भङ्ग-तुङ्ग-तरङ्गाऽऽकुलस्य हृदयस्य दशाम् ? ।

एतैर्हि लज्जया बलादाकृष्येतस्ततः क्षिप्ताऽपि दृष्टिः शिथिलित-जाल-बन्धना शफरीव तडाग-तलमज्ञात-प्रचारा स्वयं परस्परम-भिमुखीभवति। धैर्य्येण गृह्यमाणाऽपि गात्रयष्टिः पुनः पुनः कम्पते । ताल-दल-व्यजन-वीजनैः कौशेय-पट्टाम्बरसम्मर्दैश्चामरोद्धूननै-श्चापह्नियमाणोऽपि मुहुर्मुहुर्न्निर्झरवारां प्रसार इव प्रस्रवति स्वेद-बिन्दु-व्रजः । अरुण-वसन-महामाणिक्य-पद्मराग-निचय-प्रभा-सहस्रैररुणीक्रियमाणाऽपि भूयो भूयस्ताली-दल-द्युतिमासाद-यति कपोल-पाली । उभयोः पितृवन्मान्यौ नेदीयांसौ देवशर्म्म-

---

प्रेयःप्राप्तिः=प्रियतमलब्धिः। **साकल्येन**=सर्वतो भावेन। **धुनोति**=चालयति । **पारस्परिकावलोकनेन**=आन्योन्यसाक्षात्कारेण, **विकसितानाम्**, **विविधभाव-भङ्गानाम्**, **तुङ्गैः**=उन्नतैः, **तरङ्गैः**, **आकुलस्य**=विक्षिप्तप्रायस्य ।

एतैः=अनुरागिभिः । **आकृष्य**=आकृष्य । **इतस्ततः**=विषयान्तरे । **क्षिप्ता**=प्रेरिता । **शिथिलितजालबन्धना**=विश्लथ्वलितानायबन्धा। **शफरीव**=मत्स्यस्त्रीव । **तडागतलम्**=सरोवराधोभागम् । **अज्ञातप्रचारा**=अविदितच-लना । **अभिमुखीभवति**=सम्मुखीभवति । **गृह्यमाणाऽपि**=धार्यमाणाऽपि । **तालदलस्य**, **व्यजनानाम्**=पवनसाधनानाम्, **वीजनैः**=सञ्चालनैः । **चामरा-णाम्**, **उद्धूननैः**=हिल्लोलनैः । **निर्झरवारां प्रसार इव**=वारिप्रवाहजलानां प्रसरणमिव । **प्रस्रवति**=प्रवहति । **स्वेद-बिन्दु-व्रजः**=घर्मोदकपृषद्गणः । **अरु-णवसनानाम्**, **महामाणिक्यानाम्**, **पद्मरागाणाञ्च निचयस्य**, **प्रभासहस्रैः**=अग-णितच्छटाभिः । **अरुणीकृयमाणाऽपि**=लोहिततामापाद्यमानाऽपि । **तालीदल-द्युतिम्**=पीतिमानम् । **आसादयति**=प्राप्नोति । **कपोलपाली**=गण्डस्थलम् ।

गणेशशास्त्रिणौ। वीरेन्द्र-गौर-श्यामादयोऽभ्यर्णस्था बान्धवाः। सर्वथा रक्षणीय एव विनयो महाराजाधिराजस्य सम्मुखे। तथाऽप्येनयोरावेगः, जडता, स्तम्भः, रोमोद्गमश्च, क्रियासमभिहारेण सधैर्य्यं रोरुध्यमाना अपि प्रकटीभवन्त्येव। पाणिग्रहण-समये कैर्भावैरालीढमेनयोर्हृदयमिति तावेव वित्तः।

उद्वर्तन-शालासु सुवासिन्यो मङ्गल-गीतानि गायन्ति। उद्वाह-समये ब्राह्मणा ब्रह्मघोषैः पारिषदानां कर्णौ पावयन्ति। प्रासादस्य द्वारे वादका वाद्यानि वादयन्ति। क्षणे क्षणे कुमार्य्यः कुसुमानि वर्षन्ति—इति घनानन्दानुभव-पुरस्सरं समाप्तोऽसौ कोशलापरिणय-महोत्सवः। रामविरहेण चिरग्लाना कोशला पुना रामेण सनाथिता-इति राम-प्राप्ति-सकल-सौभाग्य-भवनभूतां कोशलां दृशं दृशं मोमुद्यन्तेतमां पौराः।

नेदीयांसौ=निकटस्थितौ। अभ्यर्णस्थाः=समीपस्थाः। विनयः=नम्रता। सधैर्यम्=सधीरतम्, रोरुध्यमाना अपि=वारं वारं गोप्यमाना अपि। प्रकटीभवन्ति=विशकलितीभवन्ति। वित्तः=जानीतः।

उद्वर्त्तनशालासु=चन्द्रशालासु। ब्रह्मघोषैः=वेदध्वनिभिः। पारिषदानाम्=परिषदि भवानाम्, मण्डपे तिष्ठताम्। पावयन्ति=पवित्रयन्ति। घनस्य सान्द्रस्य, आनन्दस्य, अनुभवपुरस्सरम्। कोशलायाः, परिणयस्य, महोत्सवः=महामहः। चिरग्लाना=दीर्घकालखिन्ना। सनाथिता=सभाजिता। राम-प्राप्त्या=रामसिलनेन, सकलसौभाग्यानाम्, भवनभूताम्=आधारतामुपगताम्। मोमुद्यन्तेतमाम्=अतितरां प्रसीदन्तितमाम्। पौराः=नागरिका ग्रामीणाश्च। श्रीरामभद्रायोध्यावृत्तान्तोऽपि व्यक्तीकृतोऽनेन प्रकारेणेति वेदितव्यम्।

शान्तोऽधुना देवशर्म्मणो गौर-श्यामयोश्च चिन्ता-चक्रस्य महाज्वरः। सुखेन निरश्वसद् वीरो वीरेन्द्रसिंहश्च विलोक्य राजपदालङ्कृतं गृहीत-सुकुल-कन्या-पाणिपद्मं निजतनयम्। कृतकृत्यतामन्वभूद् यजमानानन्दानन्दितो गणेशशास्त्री। भ्रमेण रामसिंह-तिरस्कारस्य राज्य-दानादि-च्छलेन विहितप्रायश्चित्त इव च सन्तोषमाससाद महाराजः। कोशलारामयोः शुद्धोऽनुरागो निर्बाधो निष्प्रतिबन्धोऽधुना क्रमतो यथासमयमासादितैरतिदुर्लभैस्तैस्तैर्विलासैः साफल्यमापेदे।

× × × ×

अधुना पुण्यनगरोपकण्ठस्थायाम्, तारा-मण्डल-चुम्बि-सौधाग्र-शत-विहितामरावती-विडम्बनायाम्, नीलगिरि-प्रतिम-महामत्त-मतङ्गज-प्रकाण्ड-गण्ड-मण्डल-सोस्रूयमाण-मदधाराऽ-

गृहीतम्, **सुकुलस्य**=शोभनान्वयस्य, कन्यायाः, पाणिपद्मं येन तम्। **कृतकृत्यताम्**=विहितविधेयताम्। यजमानानन्देन, **आनन्दितः**=प्रसन्नीकृतः। न हि ब्राह्मणानां पृथक् स्वार्थमिति विदन्ति सर्वे। विहितम्, **प्रायश्चित्तम्**=पापविशोधनं येन सः। **निष्प्रतिबन्धः**=नीरोधः। **विलासैः**=हावभावादिभिः। **साफल्यम्**=सफलताम्।

× × × ×

पुण्यनगरस्य, **उपकण्ठस्थायाम्**=समीपस्थायाम्। तारामण्डलचुम्बिभिः, सौधाग्रशतैः, विहिता, **अमरावत्याः**=आखण्डलनगर्याः, **विडम्बना**=अनुकृतिर्यया तस्याम्। **नीलगिरिप्रतिमानाम्**=नीलाचलतुल्यानाम्, महामत्तानाम्, **मतङ्गजप्रकाण्डानाम्**=प्रशस्तकरिणाम्, गण्डमण्डलेभ्यः, **सोस्रूयमाणया**=

भ्युक्षित-घण्टापथायाम्, अनवरत-सरीस्रियमाणाजानेय-सहस्र-खुर-खराग्र-खननोद्धूत-रेणुका-पटल-घटाऽऽलिङ्गित-प्राचीर-परिवेष्टितायाम्, निरन्तर-महाराष्ट्रराज-जयध्वनि-समाकर्णन-सञ्जात-संस्कार-भार-तदानुपूर्वी-रटन-पटु-कीर-सारिकादि-चङ्क्रम्यमाण-विटपावृतोद्यान-कदम्बायाम्, सतारा-नगर्य्यां महोद्यान-वर्त्तिन्येकस्मिन् महाप्रासादे सकुटुम्बो महाराष्ट्रपतिर्वसति।

कदाचन पाणिगृहीत्या विहरन्, कदाचन कुमारं लालयन्, कर्हिचित् सैनिकानां व्यूह-रचना-कौशलं शस्त्रक्षेप-लाघव-कौशलञ्च परीक्षमाणः, कर्हिचिच्च सैन्धवैर्धावं धावं कन्दुकादि-क्रीडा-कुतूहलानि रचयन विलसति। उत्तरस्यां मथुरापर्य्यन्तमेतस्यैव

अतिशयेन निपतन्त्या, मदधारया, **अभ्युक्षिताः**=सिक्ताः, घण्टापथाः, यस्यां तस्याम्। **अनवरतम्**=सततम्, **सरीस्रियमाणानाम्**=अतिशयेन सरताम्, आजानेयानाम्, सहस्रस्य, खुराणाम्, खुराग्रैः, खननात्, **उद्धूतानाम्**=उद्गतानाम्, रेणूनाम्, पटलस्य, घटया, **आलिङ्गितेन**=मिलितेन, प्राचीरेण, परितः, वेष्टितायाम्। निरन्तरम्, महाराष्ट्रराजस्य, जयध्वनेः, समाकर्णनेन, सञ्जातेन, **संस्कारभारेण**=भावनातिशयेन, **तदानुपूर्वीरटने**=तत्क्रमानुसन्धानपूर्वकभाषणाभ्यासे, पटुभिः, कीरसारिकादिभिः, **चङ्क्रम्यमाणैः**=जङ्गम्यमानैः, विटपैः, **आवृतानि**=आच्छन्नानि, उद्यानकदम्बानि, यस्यां तस्याम्। **महोद्यानवर्त्तिनि**=विस्तीर्णनिष्कुटान्तर्गते।

पाणिगृहीत्या=भार्यया। **व्यूहरचनायाः**=सैनिकस्थितिप्रकारनिर्माणस्य, **कौशलम्**=नैपुणम्। **सैन्धवैः**=घोटकैः। **कन्दुकादिक्रीडायाः**='पोलो' इत्याङ्गदेशे ख्यातायाः, **कुतूहलानि**=कुतुकानि। महाभिमान एव मतङ्गज इति

राज्यम्। एतद्राज्यवर्त्तिनो यवना अप्येतस्य सौजन्येन, औदार्य्येण, गाम्भीर्येण, सदाचारेण, सौहार्देन, करुणया, प्रेम्णा च, वशंवदा इव, सर्वेऽप्येतस्यैव प्रशंसाभिः समयं गमयन्ति। दिल्लीश्वरस्य महाभिमान-मतङ्गजोऽपि महाराजस्य कीर्ति-देवधुन्याः कृपाण-धारा-स्फालनैर्गम्भीरतरे प्रवाहे ग्राव-शकलवन्निमग्नः। ज्वाला-माला-जटालस्यास्य प्रताप-तपनस्य प्रकाशेन भारत-गौरवं विश्वेपामन्तराकाशे प्रचकाशे। धूमेनैव चास्य ध्वान्तैरिवान्धीकृतं दिल्लीश्वरस्य स्वान्तम्। एतद्भुजोद्भ्रननैरिव विधूनितं प्रत्यर्थिनां धैर्य्यम्, एतच्चामरास्ऽहत-समीर-प्रसारैरिव शोषिता निस्साराः पर-मनोरथ-कासाराः।

एकदा केतकी-सौरभ-वासित-पानीय-पूरित-पात्रस्थ-मरन्द-तुन्दिल-कुसुम-वृन्दामोदान्ध-मधुप-झङ्कृतायां नागदन्तिकाऽव-

---

रूपकम्। महाभिमानस्य सविशेषणत्वेऽपि नित्यसापेक्षत्वात्समासः। कीर्त्तिरेव, **देवधुनी**=स्वर्धुनी, जाह्नवी, तस्याः। **ग्रावशकलवत्**=अश्मखण्डवत्। **निमग्नः**=वुडितः। ज्वालामालया, **जटालस्य**=वृद्धिं गतस्य। प्रताप एव **तपनः**=दहनः, तस्य। **ध्वान्तैः**=अन्धकारैः। **स्वान्तम्**=मानसम्। **विधूनितम्**=समुच्चालितम्। **निःसाराः**=निस्तत्त्वाः, निर्जलाः, **परमनोरथाः**=शत्रुकामा एव **कासाराः**=महासरांसि। "कासारः सरसी सरः"।

एकदाऽट्टालिकायां शयानो महाराजः स्वप्नममुमपश्यदिति सम्बन्धः। अट्टालिकां विशिनष्टि—केतक्याः, सौरभेण, वासितेन, पानीयेन, पूरितेषु, पात्रेषु, तिष्ठताम्, मरन्दतुन्दिलानाम्, कुसुमानाम्, वृन्दस्य, **आमोदेन**=गन्धेन, **अन्धैः**=मत्तैः, मधुपैः, **झङ्कृतायाम्**=नादितायाम्। **नागदन्तिकावलम्बिषु**=

लम्बि-कराल-करवाल-निपतद्दीपावली - प्रतियातना-प्रभूत-प्रभूत-प्रभा - प्रभासितायामत्युच्चतया पदार्पित-चित्रगतस्येव समस्तसतारा-गृहोद्यान-वापी-तडाग-शाला - मन्दिर-चत्वरादेः ससौष्ठवावलोकन-सौकर्य्य-प्रदायां परितो गवाक्ष-मण्डलावृतायां तारा-ग्रह-मण्डलं स्पृशन्त्यामिवाट्टालिकायां गजदन्त-पर्य्यङ्के पयःफेन-निभायां तूलिकायां शयानो महाराजः स्वप्नममुमपश्यत्,

यत्-'सौवर्ण-पर्य्यङ्के महोपधानावलम्बित-पृष्ठदेशेऽवरङ्गजीव उपविष्टोऽस्ति। कदाचित् पादौ प्रसारयति, कदाचिदाकुञ्चयति, कदाचिदक्षतः कदाचिद्वामतश्च परिवर्तते, कदाचिदुष्णीषिकां क्षिपति, कदाचिद् व्यजनेन सम्यग् वीजयन्तमपि दासेरं 'बलेन वीजय बलेन'-इत्याकुश्यति, कदाचित्स्वेदाऽऽक्लिन्नं कञ्चुकं दूरतः क्षिपति, मुहुर्मुहुः पानीय-पूरितं जाम्बूनद-भाजनं विशिथिलेन

शङ्कुदोलायमानेषु, **करालेषु**=खरेषु, करवालेषु, निपतन्त्या, **दीपावलीप्रतियातनया**=आलोकनिचयप्रतिकृत्या, **प्रभूताभिः**=समुत्पन्नाभिः, **प्रभूतप्रभाभिः**= विपुलकान्तिभिः,**प्रभासितायाम्**=भ्राजमानायाम्। ससौष्ठवम्, यदवलोकनसौकर्यम्, **तत्प्रदायाम्**=तद्दायिन्याम्। ताराग्रहाणां, **मण्डलम्**। **स्पृशन्त्याम्**=चुम्बन्त्याम्। अत्युच्चायामिति यावत्। **गजदन्तपर्यङ्के**=हस्तिदशननिर्मिते पल्यङ्के। **पयःफेननिभायाम्**=वारिडिण्डीरसमायाम्। **तूलिकायाम्**=तूलवत्याम्। **अमुम्**=वक्ष्यमाणम्।

सौवर्णपर्यङ्के=चामीकरखचितपल्यङ्के। **महोपधाने**=महोपबर्हे, **अवलम्बितः**=आश्रितः, पृष्ठदेशो यस्य सः। **उष्णीषिकाम्**=लघूष्णीषम्। "टोपी" इति हिन्दी। **दासेरम्**=भृत्यम्। **आकुश्यति**=भर्त्सयति। **जाम्बूनदभा-**

करेणोत्थाप्य मुखे योजयति, मुहुरुष्णं निश्वसिति, मुहुर्वक्षसि करं विन्यस्य मन्त्र-कीलितो जीर्णाजगर इव स्तब्धनयनोऽवतिष्ठते, कदाचिच्च ललाट-तले पिच्छिलीभवत्स्वेद-राशिं करेणापहृत्य, श्वास-प्रश्वास-च्छलेन लशुन-प्रियाल-पलल-विश्र-पूतिगन्धोद्गारैर्म्मशकानपि मूर्च्छयन् मन्दं मन्दमेवं रटति यद्—

"हा ! हतोऽस्मि महाराष्ट्र-वञ्चकेन !! एष मम नासामिव छित्वा कूर्चमिव समूलमुल्लूय, श्मश्रु-युगलमिवोत्पाट्य पादत्राणेनेवाऽऽहत्य निष्ठीवनेनेवाभिपिच्य धूलिभिरिव चान्धीकृत्य कारागारान्निष्क्रान्तः। आः ! कथमेव मया प्रथम-साक्षात्कार एव खड्गेन खण्डशः कृतः। संन्यासिभिरालपन् पलायितुकामोऽवगतोऽपि कथन्न सवास-भवनो दग्धः ? एतस्य भोज्येषु गरलं मेलयित्वा

जनम्=हिरण्यामत्रम्। विशिथिलेन=दुर्बलेन। योजयति=मेलयति। ननु पिबति। मन्त्रैः, कीलितः=यन्त्रितः। निर्विषीकृत इति यावत्। जीर्णाजगर इव=वृद्धमहासर्प इव। स्तब्धनयनः=स्थगितनेत्रः। पिच्छलीभवत्स्वेद-राशिम्=अधिकीभवद्धर्मव्रजम्। लशुनस्य=रसोनस्य, प्रियालस्य=ग्रन्थकस्य, "प्याज" इति ख्यातस्य, पललस्य= मांसस्य, च, य:, विश्रः=दीर्घकालरक्षित-विकृतमांसगन्धावभासः, पूतिगन्धः=दुर्गन्धः, तस्य, उद्गारैः=उद्गीर्णिभिः। मूर्च्छयन्=मोहयन्। दुर्गन्धस्यात्युत्कटत्वादुर्गन्धप्रियानपि खेदयन्निति यावत्।

नासाम्=घोणाम्। छित्वेव=सङ्कर्त्येव। उल्लूय=उच्छिद्य। उत्पाट्य=उन्मूल्य। पादत्राणेन=उपानहा। निष्ठीवनेन=थूत्कारेण। अन्धीकृत्य=निर्लोचनीकृत्य। अवगतः=बुद्धः। वासभवनेन सहितः, सवासभवनः।

भवने सर्पान् क्षिप्त्वा वा कथञ्चैव कालाजगर-जठर-ज्वलन-ज्वाला-पतङ्गः कृतः।

'अहह! निर्गतोऽसौ महाशत्रुरत्रुटित-केशाग्रः। किङ्करोमि, न मे चिन्ता शाम्यति, पश्चात्ताप-तपनोऽयं तापयतितमाम्। प्रसिद्धिं गता मम निष्फल-यत्नता, निखिला अपि मे प्रजाः शत्रुभूताः। पथि मामवलोक्य बालोऽपि हसति, धिङ्माम्! धिक् च मम क्लीबं जीवनम्!! अत्राऽऽगत्य शिवेन स्वाचारेण स्व-पौरुषेण च दिल्ली-वास्तव्या अपि बहवो वशंवदा विहिताः। किमन्यत् तनयोऽपि मम मायाजिह्मस्तमेव समये समये प्रशंसति। दुहिता रसनारी च तद्गतप्राणाऽपक्षीयते। हा हतोऽस्मि! अस्तं प्रयातो मे प्रताप-तपनः!!"

जागरे हि, "एक-सम्बन्धि-ज्ञानमपर-सम्बन्धि-स्मारकं भवति" स्वापे तु, "एकसम्बन्धि-साक्षात्कारोऽपर-सम्बन्धि-साक्षात्कार-कारको जायते"—इति रसनारी-शब्द-साक्षात्कारात्परं प्रत्यक्षीकृतमिव यद्—

क्षिप्त्वा=सम्प्रेर्य। कालाजगरस्य, जठरज्वलनज्वालायाम्, पतङ्गः।

अत्रुटितकेशाग्रः=अच्छिन्नकेशभागः। क्लीबम्=नपुंसकम्। अनावश्यकं पुरुषाणां स्त्रीणाञ्च कृते। अपक्षीयते=दुर्बलीभवति। प्रतापतपनः=प्रतापभानुः।

जागरे=जागृदवस्थायाम्। एकस्य, सम्बन्धिनः=संसर्गिणः, ज्ञानम्=बोधः। यथा "पूर्वत्रासिद्धमि"त्यत्र पूर्वशब्दबोधे परशब्दस्मरणम्, यथा वा मातरि पितरि च ज्ञाते पुत्रस्य स्मरणम्। स्वापे=स्वप्नावस्थायाम्। एकस्य सम्बन्धिनः, साक्षात्कारः=स्वाग्रिकं प्रत्यक्षम्।

एकतो द्वारमुद्घाट्य निःशब्दं रुदती, बाष्प-धारा-स्नपित-स्तन-द्वया, अस्थि-चर्म्म-मात्र-शेषा, सामर्थ्य-विहीनतयाऽयथोचित-पाद-विन्यासा, कटि-पर्य्यन्तावलम्बि-केशपाशा, धैर्य्य-विरहात् स्खलदवगुण्ठन-वसना सवेगं स्वपितुः सम्मुखमागता रसनारी।

दृष्ट्वैनां कोपाऽऽकुलः समवादीदवरङ्गजीवो यत्—"कर्कशे! मम शत्रुं स्मरन्ती, उन्मादावस्थां नाटयन्ती, मुहुर्मुहुर्मां पीडयसि। तदौषधमेतस्य समुचितो दण्डः। अस्मिन्नपि क्षणे प्रकृतिं न यासि चेत्ताड्यसे"।

श्रुत्वैतद् विस्फार्य्य नयने निरीक्ष्य तम्, तादृशमरुणैरपाङ्गैर्दहन्तीव प्रस्फुरितेनाधरेण शपन्तीव, उच्चस्वरेण रसनारी—'नोन्मादः, प्रकृतिं यामि, स्वयमात्मानं दण्डयामि, शाम्यतु शत्रु-शातनस्य भवतः पीडा'—इति व्याहृत्य स्व-तेजसा सदासेरं दिल्लीश्वरमपि धर्षयन्ती, नागदन्तिकावलम्बितामेकां छुरिकां त्सरौ गृहीत्वा, झटिति कोशादाकृष्य, 'ईदृशजीवनान्मरणं श्रेयः'—इति कथयन्ती,

---

सामर्थ्यविहीनतया=शक्तिरहित्येन। अयथोचितपादविन्यासा=अयथायोग्याङ्घ्रिस्थापना। स्खलदवगुण्ठनवसना=निपतदवगुण्ठनवस्त्रा। सवेगम्=सजवम्।

कर्कशे!=कठोरे!। उन्मादावस्थाम्=कामकृतामुन्मत्तताम्। नाटयन्ती=अभिनयन्ती। दण्डः=शासनम्। प्रकृतिम्=स्वाभाविकावस्थाम्।

अपाङ्गैः=नेत्रप्रान्तैः। दहन्तीव=ज्वालयन्तीव। प्रस्फुरितेन=चपलितेन। शपन्तीव=अनिष्टं कथयन्तीव। शत्रुशातनस्य=रिपुनाशनस्य। धर्षयन्ती=भीषयन्ती। त्सरौ=मुष्टौ। श्रेयः=कल्याणम्, शोभनम्। आहृत्य=

बलेनाऽऽहत्य स्ववक्षो विददार, रुधिर-धाराभिश्च समं भूमौ निपपात।

दशामेतां स्वप्ने पश्यन्, स्वयं केनापि बलेनाऽऽहत इव, हा हा! हन्त हन्त! कष्टं कष्टं! विरम विरम!-इति विलपन् झटित्युत्थाय करौ प्रसार्य्य, "उत्तिष्ठ, एषोऽस्मि"—इति कथयन्, सपदि पर्य्यङ्कादवतीर्य्य, प्रस्खलन्निव कोणात् कोणे समधावद् महाराजः। तावद् व्यजन-चालकेन—"महाराज! महाराज!! अवधीयताम्, स्वप्नोऽसौ, स्वप्नोऽसौ"—इति साम्रेडनमुक्तश्चक्षुषी सम्मृज्य समद्राक्षीत्—यद् न तत्र रसनारी, न वाऽवरङ्गजीवः।

ततः स्वप्नोऽयमिति जानानोऽपि वञ्चित इव, मुग्ध इव, दीर्घमुष्णं निश्वसन्, तेनैव सघडत्कृतिना वक्षसा धमद्धमद्धमन्तीभिर्धमनीभिर्लोल-लोलाभ्यां लोचनाभ्यां, शुष्कतरेण च कण्ठेन निर्वृत्यै पुनः शयनीयमधिष्ठितः। करयोरङ्गुलीः सङ्गृह्य, हस्तौ सप्रसारमुत्तानीकृत्य, वदनं व्यादाय, नाडीः संस्तभ्य, जृम्भयाऽऽलस्यमिवोद्गीर्य्य, किञ्चिज्जलं पीत्वा, शुष्कप्रायां गल-नलिकामार्द्रयित्वा, दुःस्वप्न-जनितारिष्ट-शङ्का निवर्त्य भगवन्तं नारा-

---

प्रहारं कृत्वा। विददार=द्विधा नीतवती। रुधिरधाराभिः=लोहितप्रवाहैः।

बलेन=बलात्कारेण। आहत इव=ताडित इव। प्रस्खलन्निव=निपतन्निव। सम्मृज्य=सम्मर्ध।

जानानोऽपि=निश्चिन्वानोऽपि। धमनीभिः=शिराभिः। लोललोलाभ्याम्=अतिचपलाभ्याम्। निर्वृत्यै=सुखाय। शयनीयम्=विष्टरम्। सप्रसारम्=प्रसारणपूर्वकम्। व्यादाय=विकासीकृत्य। गलनलिकाम्=कण्ठ-

यणम्, मातरं दुर्गाम्, कुक्कुटञ्च स्मृत्वा पुनः शिश्ये। सान्द्र-तन्द्रा-मुद्रित-नयनस्यास्य सपदि पुनरङ्गान्यालिलिङ्ग निद्रा।

स्वप्न-जर्जरीकृत-निद्रस्य सुप्तोत्थितस्य पुनः शयनेऽपि न भवत्येव सुषुप्तिरिति कथमपि सुप्तोऽप्येष पुनरपश्यद् यद्—ज्वर-जर्जरितो जराजीर्णो जयपुर-ज्या-जानिर्महाराजो जयसिंहः काञ्चन-पर्य्यङ्कमधिष्ठितः, महोपबर्हाश्रितः, अर्द्धोपविष्टः, किञ्चिदुच्छ्वसन्, बाल-व्यजनेन वीज्यमानः, भव-रोग-भेषज-भूतानि भगवन्नामानि भज्यमानेन स्वरेण जपन्, स्वाभिमुख एव स्थितोऽस्तीति। दृष्टवांश्च यज्जयपुरेश्वरः किञ्चित् स्वाभिमुखं परिवृत्य निजेन सहैवमालपितवान्।

जय०—वीर! दिष्ट्या मम चरम-निश्वास-विमोक्षणात्

स्रोतः। दुःस्वप्नजनितस्य, अरिष्टस्य=दुर्योगस्य, शङ्कः। कुक्कुटम्=एतन्नामकं ब्राह्मणविशेषम्।

वाराणस्या दक्षिणेऽस्ति कुक्कुटो नाम वै द्विजः।
तस्य स्मरणमात्रेण दुःस्वप्नः सुखदो भवेत्॥

इति स्कान्देऽभिहितत्वात्। गजेन्द्रमोक्षणपाठोऽपि दुःस्वप्नफलनाशक इति स्मर्यते। सान्द्रया=घनीभूतया, तन्द्रया, मुद्रिते, नयने यस्य तस्य। आलिलिङ्ग=आशिश्लेष।

स्वप्नेन, जर्जरीकृता, निद्रा, यस्य तस्य। सुषुप्तिः=स्वप्नविरहितस्वापः। जयपुरस्य, ज्या=भूमिः, जाया, यस्य सः, जयपुरज्याजानिः। "जायाया निङ्"। भवरोगस्य, भेषजभूतानि=औषधायमानानि।

दिष्ट्या=भाग्येन। चरम-निश्वास-विमोक्षणात्=अन्तिमश्वासत्या-

प्रागेव समुपस्थितोऽसि ! त्वां दृष्ट्वा भारतभुवं पुत्रवतीं मन्वानः सुखेन प्राणानुत्सृक्ष्यामि। न मे सामर्थ्यमुत्थायाऽऽश्लेष्टुमिति न गृह्यतां मम दोषः।

स्वयम्—महाराज ! एवमल्पीयसा समयेनेदृशीं दशामापत्स्यते देवः—इति स्वप्नेष्वपि नाभूदनुभवः।

जय०—देहः क्षणभङ्गुरः, तत्रापि च समयेऽस्मिन् देहत्याग एव मे हर्षदः।

स्व०—देव ! किमिति ?

जय०—तथैव प्रतिज्ञातवानस्मि—यद् दिल्लीं गतो भवानवहेल्येत चेत् प्राणांस्त्यक्ष्यामि, बहुशश्च साभिमानमुक्तवानस्मि यद्—न भवत्यस्मादृक्षाणां क्षत्रियाणां भग्ना प्रतिज्ञा। तद्भवन्तं मैत्र्या विश्वास्य दिल्लीं प्रेष्य, महायन्त्रणामनुभावितवानस्मि। तदेवं कल्मष-मलीमसेन देहेन नाहमात्मानं कलुषयितुमुत्सहे।

स्वयम्—[कर्णौ पिधाय] देव ! शान्तं पापम् ! शान्तं पापम् !! [अञ्जलिं बद्ध्वा] महाराज ! नास्य विश्वास-घातस्या-

---

गात्। समुपस्थितः=समुपायातः। उत्सृक्ष्यामि=त्यक्ष्यामि। न गृह्यताम्=नावधार्यताम्।

आपत्स्यते=प्राप्स्यति। अनुभवः=अपूर्वबोधः।

क्षणभङ्गुरः=अत्यल्पसमयनाश्यः।

अवहेल्येत=तिरस्क्रियेत। भग्ना=त्रुटिता। महायन्त्रणाम्=विपुलं मानसिकं खेदम्। कल्मषमलीमसेन=पापमलिनेन। कलुषयितुम्=दूषयितुम्। उत्सहे=समर्थो भवामि।

लिप्तमपि कारणं देवः। दिल्ली-कलङ्को वा मम दुरदृष्टानि वा कारणम्। अत्रभवतस्त्वाशिषामेष परिणामो यज्जीवन्निवृत्तोऽस्मि-इत्यस्थाने ग्लानिः! त्रायतां त्रायतां क्षत्रियराजः!! मादृशान् हेतूकृत्य क्षत्रिय-वंशावतंसानां युष्मादृक्षाणामस्मत्परम-पूज्यानां लेशमात्रेणापि क्लेशः शुभोदर्क-विघटक एव स्यात्। मा मां ग्लपय! न मे जीवनं मलिनय!! अवरङ्गेऽप्रीतिङ्गतश्चेत् तत्सम्बन्ध-सूत्रं त्रोटयित्वा, स्वतन्त्रो राजपुत्र-राज्यसिंहासनमलङ्करोतु देवः। ससेनः सकोशः सप्रजोऽहं सन्नद्धोऽस्मि चरणौ सेवितुम्। श्रीमति, अवरङ्गेन युयुत्सौ संवृत्ते, मरुधराधीशोऽपि ततो दिल्ली-कलङ्कशोणित-पङ्क-चर्चा-व्याकुल-कृपाणादुदयपुराधीश-श्रीराज-सिंहाद्, इतश्च दिल्ली-दुरित-दर्प-दलन-दीर्घ-भुजदण्डोद्यत्प्रचण्ड-दण्डादत्रभवतो बिभ्यदगत्या मैत्रीमेव रक्षिष्यति। मयि च प्रपन्ने सर्वोऽपि दक्षिण-देशोऽत्रभवतः स्वेदेन सह स्व-शोणितं पातयितुं सज्जोऽस्ति, एवमस्माकं महामण्डले परस्परमैक्ये सञ्जाते के नाम वराका मौद्गलाः? का वाऽल्पीयस्येषां शक्तिः? स्मृत्वाऽपीदृशमैक्यमस्माकं स्फुरति मे बाहुरुत्साहैः, धमन्ति च धमन्यः, व्रज्यतां

अलिप्तम्=न्यूनतमम्। **जीवन्**=प्राणान् धारयन्। **निवृत्तः**=प्रत्यागतः। **अस्थाने**=अनवसरे। **हेतूकृत्य**=कारणीकृत्य। **शुभोदर्कस्य**=शुभपरिणामस्य, **विघटकः**=नाशकः। **स्वतन्त्रः**=अकरदः। **सकोशः**=सनिधिः। **युयुत्सौ**=योद्धुमिच्छौ। **दिल्लीकलङ्कशोणितपङ्कस्य, चर्चया**=सम्मर्देन, व्याकुलः, कृपाणः, यस्य तस्मात्। **दिल्लीदुरितस्य**=दिल्लीपापस्य, **अवरङ्गजीवस्य, दर्पदलनाभ्याम्, दीर्घाभ्याम्, भुजदण्डाभ्याम्, उद्यन्**=उदयं प्राप्नुवन्, **प्रचण्डः, दण्डः**=दमनं यस्मात्तस्मात्। **बिभ्यत्**=भयं कुर्वाणः। **प्रपन्ने**=शरणागते। **धमन्यः**=नाड्यः।

विश्वास-घातकस्य खरतरस्यास्यावरङ्ग-हतकस्य सङ्गः ! पुनर्भारताभिजन-प्रताप-पताका दोधूयन्तां हिम-सानुषु ! अकूपार-कूलेषु च। स्पृशतु च भारतीय-भेरी-नादः पारसीकानाम्, आरब्याणाम्, काम्बोजीयानाम्, त्रिवृत्तानाम्, चीनानाम्, वर्मणाम्, सिंहलानाञ्च कर्णम् !!

जय०—वीर ! तथैवाचिरात्सर्वं सम्पत्स्यते, किन्तु वृद्धस्य मे सत्यप्रतिज्ञता-महाव्रतं मा जर्जरय !

स्वयम्—[किञ्चिदुच्छ्वस्य] महाराज ! जाज्वल्यमाने यवन-प्रताप-तपने कथं सर्वं तथैव सम्पत्स्यते ?

जय०—वीर ! यवनानां प्रताप-तपनोऽसौ तथा विलयं यास्यति; यथैतस्याऽऽख्यानकमपि न श्रोष्यते परतः।

स्वयम्—महाराज ! भवादृशे गृहीत-सेनापति-कार्ये कथं यवन-राज्यस्य विपच्छङ्का ?

जय०—एषोऽहमपि परलोकं प्रस्थितप्रायः।

स्वयम्—देव ! तथाऽपि वीरसू राजपुत्र-भूमिः। अत्रभवति भारतं विरहय्य लोकान्तरं सनाथितवत्यपि कुमाररामसिंहस्तथैव मर्य्यादया सेनापति-कार्य्यं निर्वक्ष्यति—इति कथं सम्भाव्यते

हिमसानुषु=प्रालेयाद्रिश्यङ्गेषु। अकूपाराणाम्=वारिधीनाम्, कूलेषु=तटेषु च। त्रिवृत्तानाम्="त्रितानिया" इति ख्यातानाम्। अन्ये स्फुटाः, व्याख्याताश्च प्राक्।

आख्यानकम्=कथानकम्।

निर्वक्ष्यति=सञ्चालयिष्यति।

भवत्कुल-कृपाणावलम्बस्य प्रलम्बस्य यवन-राज्यस्य शैथिल्यम् ?

जय०—[उच्छ्वस्य] वीर ! सत्यं वक्षि, मयि महाध्वन्य-द्वन्ये संवृत्तेऽपि न वीर-विरहिता भवेद् भारत-भूमिः, राज-पुत्र-देशे गृहे गृहे मादृशा मत्तोऽप्यधिकाश्च रण-धीरा वीराः समुल्लसन्ति। परन्तु राज्यमाभ्यन्तर-बलमवलम्ब्य स्थिरं भवति; न तु बाह्यम्। स्नेह-पाश-बद्धाः सुहृदः प्रजा भृत्याश्च राजार्थं प्राणानपि तृणाय मन्यन्ते, क्रौर्य्य-कण्टकोत्सारिताश्च त एव राजानं हन्तुमवसरं प्रतीक्षन्ते। प्रत्यक्षमेव दृश्यताम् ! यदि भवता सह मैत्रीं स्वच्छेन निश्छद्मना च हृदा समरक्षिष्यद् दिल्लीपतिः; तदखण्डस्तस्य प्रतापो दक्षिण-देशेऽपि बद्धमूलः प्राज्वलिष्यत्। भवत्खड्गमाश्रित्य स विजयपुरादि-महाराजानपि व्यजेष्यत, प्रासारयिष्यच्च स्वप्रतापं सिंहल-द्वीपेऽपि। एवं मत्प्रतिज्ञा-रक्षण-सक्षणञ्चावलोक्याहमपि द्विगुणतरोत्साहेन मैत्र्युचित-कार्य्याणि निरवक्ष्यम्। मयि भवति च तथाऽनुगते; शेषाः सर्वेऽपि महाराजास्तं सममानयिष्यन्। आवयोर्म्मन्त्रणामुररीकृत्य यदि स वैदिक-धर्म्म-विरोधमत्यक्ष्यत्; तत् सर्वा अपि प्रकृतयः पितरमिवैनमपूज-यिष्यन्। एवं स्ववशीकृताखिल-भारतवर्षस्य वर्षीयसोऽप्यस्य प्राज्यं राज्यं वर्षाणां सहस्रेणाप्यभेद्यं समपत्स्यत। परमधुना दुरा-

---

वक्षि=कथयसि। क्रौर्यमेव कण्टकम्, तस्मात्, उत्सारिताः=उत्खाताः। सिंहलद्वीपे=रामेश्वरादनतिदूरे समुद्रगर्भस्थे द्वीपविशेषे। भ्रमादनेके तमेव लङ्कात्मना जानन्ति, किन्तु भूमध्यरेखायां तदसत्त्वाद्वाल्मीकिप्रदर्शित-शतयोज-नात्मकान्तरालतायाश्चाविद्यमानत्वान्नासौ लङ्केति निर्धारितमिति वेदितव्यम्। वर्षी-

चारैरेतस्य न कोऽपि भारतीय एवं स्निह्यति—इति सत्स्वपि वीर-सहस्रेषु; अचिराद्विलयं यास्यति यवन-राज्यम्, विजयपुर-गोल-खण्ड-नगराद्यधीशाः प्रसिद्धाः शत्रवोऽस्य। चिरशत्रुरुदयपुराधीशः, नन्दक-सम्प्रदायाऽऽचार्य्य-तिरस्कारिणोऽस्य पाञ्चाल-वीराः सर्वेऽपि शिक्ष्या विपक्षाः। भारतचन्द्रादि-महामान्य-जनावहेलनेन वङ्गदेशे न कोऽप्यस्य मित्रम्! भवान् जगद्विदित एतस्य सपत्नः। मामकाश्च रामसिंहादयोऽप्येतस्य विश्वास-घातकतां स्मारं स्मारं सन्धि-बन्धं शिथिलीकृतवन्तः—इति न चिरमवतिष्ठते यवन-राज्यम्।

स्वयम्—[रोष-ज्वलित-नयनः] देवोऽश्वमेध-यज्ञे शाकल्यैः साकं यवन-राज्य-प्रतापमपि हुतवान्। यद्गीतानि गायं गायं योषितो बालान् शाययन्ति—इति कथन्न स्यान्नाश एषां कदाचाराणां प्रजा-मृग-वृकाणाम्!!

जयः—[प्रवृद्धोच्छ्वासवेगः] वीर! प्रत्यक्षमिव पश्यामि-यत् कोप-ज्वलन-ज्वालाः परितः प्रवृद्धाः। अत्यन्तं यतमानोऽपि न पारयत्यवरङ्गजीवः प्रशमयितुम्। एष रोदिति, विलपति,

---

यसः=अतिवृद्धस्य। प्राज्यम्=घनिकम्। शिक्ष्याः="सिक्ख" इति ख्याताः। भारतचन्द्रादीनाम्, महामान्यानाम्, जनानाम्, अवहेलनेन=तिरस्करणेन। अन्नदामङ्गलादिकाव्यरचयिता वङ्गभाषाया महाकविः श्रीभारतचन्द्रोऽवरङ्गजीवेन दिल्लीमाहूतस्तिरस्कृतश्चेति तेनैवालेखीति टिप्पणी।

शाकल्यैः=हविष्यैः। प्रजा एव मृगाः, तेषाम्, वृकाणाम्=दीर्घोदराणाम्, "हुंडार" इति ख्यातानाम्।

अतिपश्चात्तापैस्तप्यते, सर्वोऽपि चास्य पराक्रमो घृतधारेव ज्वाला-जालमेतद्विगुणयति, न तु शमयति। सोदर्य्याणां शिरश्छित्वा जरा-जर्जरं जनकञ्च कारागारे निगृह्य, हत्या-काण्ड-सहस्रैः परलोकं यन्त्रणामयं विधाय, धूम-ध्वान्तेनेव दुर्य्यशःसङ्घातेनाऽऽत्मानमावृत्य च, समासादितमस्य राज्यं स्वयं हस्तात् स्खलति। एतस्य नैजा अप्यमात्या बान्धवाः सैनिकाः प्रकृतयश्च प्रत्यर्थिनः संवृत्ताः, सर्वेऽपि भारतीया एनं हस्तावुद्यम्य शपन्ति, कोप-ज्वलन-ज्वाला-धूम्याभिर्मशका इव परितो यवन-वराकाः प्रनष्टाः।

महाराष्ट्र-वीरा दिल्लीं विलुण्ठन्ति। भग्नोऽसौ दिल्लीश्वर-प्रासादः। क्वासौ वराकः कदर्य्योऽवरङ्गजीवः—इत्यस्य देहोऽपि नोपलभ्यते।

आः! किं स्वप्नमिव पश्यामि? [दीर्घं निश्वस्य] विश्वम्भर! विलक्षणस्ते महिमा। भगवन्! चिरमुद्भ्रान्तोऽस्मि जालेष्वेतेषु। सम्प्रति दर्शयाऽऽत्मानम्! [उच्चैस्य] दिष्ट्या दृष्टोऽसि! अहो शोभा!! स्मृत एव सपदि समायातोऽसि, शारदाऽऽकाश-श्यामेषु तवाङ्गेषु तारका इव स्वेद-बिन्दवो भासन्ते। गलित-कुसुम-बन्धनाः कुञ्चित-मेचक-कचाः स्वेदार्क्तौ कपोलौ चुम्बन्ति। सौदामिनी-वृन्द-विनिन्दकमिदं वसनमंसात् स्खलति। मौक्तिक-

घृतधारेव=सर्पिःप्रवाह इव। यन्त्रणामयम्=मानसिकव्यथासमेतम्। कोपज्वलनज्वालानाम्, धूम्याभिः=धूमसमूहैः।

जालेषु=इन्द्रजालायमानेषु जगत्सु। शारदाकाशवत्, श्यामेषु=विगतश्यामत्वेष्वपि तदवभासमात्रावशेषेषु। सौदामिनीवृन्दस्य=तडिद्गणस्य। विनि-

हाराः कुसुममालिकाश्च परस्परं सङ्ग्रथिताः। [सगद्गदम्] कन्दरान् प्रविश्य, कर्णौ सम्मुद्रय, चक्षुषी सम्मील्य, श्वासमवरुध्य, मनो नियम्य, योगिराजैरपि कथं कथमपि ध्येयं देहि ते पादाम्बुजम्!

[दीर्घमुच्छ्वस्य] मन्देन स्वरेण, नारायण! दामोदर! विश्वम्भर! जगदीश्वर! हरे! हरे! [ततो दौर्बल्यमस्य वाचमरुणत्] विलोक्यैवमुपरतप्रायं राजपुत्र-रणधीरता-धुरन्धरम्; आत्मानं नियन्तुमपारयन् बालक इव महाराष्ट्रराज उच्चै रुरोद, निद्रा चास्य समभज्यत। चिरं विचार-मग्न इव चोत्थाय भगवन्तं सूर्यं प्रणनाम।

× × × ×

अद्य महाराष्ट्रदेशे गृहे गृहे जयध्वनिः, गृहे गृहे भेरीनादः, गृहे गृहे च शस्त्र-परिष्कारः। गुञ्जा-तोलनेन खिन्नमिव हिरण्यगर्भस्य हरेरेकं रूपमिव हिरण्यमानन्दयितुमष्टोत्तरं शतं यावदात्मना

न्दकम्=विजेतृ। योगिराजैरपि कथं कथम्, अविजितहृषीकाणामात्मात्मीयगणनिपतितमनसान्तु का कथा।

सूर्यं प्रणनाम=प्रत्यूहवारणार्थं दुःस्वप्नफलनिवारणार्थञ्च भास्करं नमश्चक्रे। प्रातरभवदित्यपि व्यङ्ग्यम्। प्रातःकालदृष्टश्च स्वप्नो नानर्थको भवतीति बोधयन् सत्यघटनया साम्यं प्रस्तौति। अत एव स्वाप्निकानीमानि वास्तविकविजयघटनायां सम्मिश्रितानीति वेदितव्यम्।

× × × × × ×

गुञ्जाभिः=रक्तिकाभिः, "रत्ती" इति हिन्दी, तोलनेन। खिन्नमिव=दुःखितमिव। खेदकारणं दर्शयति-हरेरेकं रूपं हिरण्यमिति। परमपुरुषस्व-

सन्तोल्य, ब्राह्मणेभ्यो व्यतरन्महाराष्ट्रपतिः; तावदागत्य विजयध्वजेनोक्तम्—देवानां प्रताप-तपन-प्रभा-वेण मथुरापर्य्यन्तं सपत्ना यवना अपसारिताः। अकस्माच्च मोहावर्त्तखानो दिल्लीश्वरस्यान्यतमः सेनानीर्महत्या सेनया समायातः, किन्तु "हन्यतां हन्यतां जितं जितम्"—इति सक्ष्वेडं सेनासमुद्रे सोत्फालं पतितेषु महाराष्ट्र-केसरिषु; ते प्रहरमात्र-युद्धेनैव विमुखा अभूवन्। रिपूणां रक्त-चन्दन-क्षोदेनेव गाढ-रक्तेन समर्च्य, अलि-कुलाऽऽकुलैः कमलैरिव चैषां सश्मश्रुवदनैः समपूज्यत भगवती वसुन्धरा, हतशेषा भटम्मन्याश्च पलायिताः। विलक्षणोऽयमत्र भवतः प्रभावो यद्—"विजयतां महाराष्ट्रराजः"—इति गर्जनं श्रुत्वैव पश्चादनवलोकयन् सर्वोऽपि यवन-भटः पलायते।

रूपसुवर्णस्य नीचतमगुञ्जासाम्यप्रदर्शनात्खेदः। एतच्च प्राचीनेन कविना केनचिदित्थं प्रदर्शितम्—

"उचितज्ञाऽसि तुले! किं तुलयसि गुञ्जाफलैः कनकम्"

हिरण्यस्य भगवद्रूपत्वञ्च—

तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्।
तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः॥

इति मानवादिषु सर्वकारणीभूतस्य हैमत्वोक्त्या स्फुटमेव। विस्पष्टञ्चैतच्छतपथब्राह्मणे प्रतिपादितमिति वेदितव्यम्। **अष्टोत्तरशतं यावत्**=अष्टोत्तरशतवारम्। **आत्मना सन्तोल्य**=तुलादानमिति कथ्यते लोकैः, सर्वेभ्यो वस्तुदानेभ्यः प्रशस्यञ्चेदम्।

मोहावर्त्तखानः="मोहब्बत खां" इति ख्यातः।

इत्याकर्ण्य सर्वेऽपि सभास्थाः खणखणित-खड्गा वीरास्तारतरेण स्वरेण "जयति सनातनो धर्म्मः, विजयतां महाराष्ट्रपतिः"-इत्यादि सहर्षमवोचन्।

समस्तेऽपि महाराष्ट्र-देशे सर्वतः समुत्थितं भेरी-झर्झर-पणवादि-नाद-सहकृतं प्रतिध्वनि-निवह-सहस्र-गुणितं जयध्वनिध्वानममुं कन्दरि-कन्दरेष्वपि प्रविष्टं गृहीत-ब्रह्मचारि-गुरुवेषेण वीर-वीरेन्द्रसिंहेन कुटीरे पूजितः स एव योगिराजोऽपि कथं कथमपि समाधि-सन्धावश्रौषीत्।

श्रुत्वैव च कन्दराद् बहिरागत्य, शैलसानुं समारुह्य, त्राटकी-त्रुटितावरोधया दृष्ट्या सुदूरं पश्यन, आपूर्वसमुद्रमापश्चिमसमुद्रमालङ्कमाविन्ध्यञ्च कुसुमितमिवोद्यानम, प्रफुल्ल-

स एव योगिराजः=य आदिमनिश्वासे कथादौ स्मृतः। योगिराजचरितेनैव समारभ्य तेनैव समापयन्, उपक्रमोपसंहारयोरैक्यं प्रदर्शयति। **समाधि-सन्धौ**=चित्तनिरोधविरामकाले। ध्वनिरयं समाधिभङ्गश्च दैवाद्वा योगिना तत्कालस्य पूर्वत एव ज्ञातत्वाद्वा समकालमेव समभूदिति तत्त्वम्।

त्राटक्या=योगमुद्राविशेषेण, त्रुटितः, अवरोधो यस्या एवम्भूतया। चक्षुषोर्भ्रुवोरन्तरे संस्थापनं त्राटको। तया चक्षुषोर्नियता शक्तिरप्रतिहता भवति। अत एव योगी सर्वं द्रष्टुं शक्नोतीति तात्पर्यम्। **आलङ्कम्**=आसिंहलमिति तात्पर्यम्। वस्तुतस्तु लङ्कासिंहलयोर्भेद इति पूर्वं प्रतिपादितम्। राक्षसराजनगरी भूमध्यरेखायां विद्यमाना रामेश्वरकूलाच्छतयोजनदूरे स्थिता लङ्का रामरावणयुद्धसमाप्तावेव समुद्रेण जलप्लाविता, अधुनाऽपि जलमग्नैव तिष्ठति, तस्याश्च कियानंशो दृष्टिगोचरीभवतीति वेदितव्यम्।

कमलमिव तडागम्, विध्वस्त-दानव-वृन्दमिव चेन्द्रपुरम्, महाराष्ट्र-राज्यं पश्यन्, बहुश आशिषो वदन्, पुनः समाधिमाकलयितुं तमेव कन्दरं प्रविष्टः ।

भवति चात्रेतिहासवचनम् ।

"सप्तमेऽहनि तां लङ्कां समुद्रः प्लावयिष्यति ।"इति ।

पुराणमतदीपिकायां सुविशदं निरूपितमिदम् ॥

यतो धर्मस्ततो जय इति पद्यखण्डं विशदयन् धर्मपदस्य वास्तविकं तत्त्वञ्च प्रदर्शयन् तमेव पद्यखण्डं विवृद्धर्य पठति—यतो धर्मस्ततः कृष्णो यतः कृष्ण-स्ततो जय इति ।

शेषाशेषवचोविमन्थनविधौ मन्थानदण्डायितां
वाणीं यस्य निपीय पाणिनिगवीचिन्तापराः शाब्दिकाः ।
सोऽयं पण्डितपण्डितार्चितपदो नारायणान्तो हरः
ख्यातो भूवलयेऽधिकाशि निवसन् यस्य त्रिपाठी गुरुः ॥ १ ॥

तर्के कर्कशतामुपागतवती यद्भारती भारते
गङ्गात्मत्वमुपागता विदलयत्यान्वीक्षिकीदूषणम् ।
सोऽयं श्रीशिवदत्तमिश्रविबुधो गौडाब्जिनीवल्लभो
यं प्राबोधयदञ्जसा मतिमताम्मोदावहं दर्शनम् ॥ २ ॥

वैयासे गणितो ग्रहीयगणिते पारङ्गतः पण्डितः
श्रीमान् भागवतो बभूव जनको यस्यातिपौराणिकः ।
यं प्रासूत सतीशिरोमणिरनल्पैराजिता सद्गुणै-
र्देवी दिव्यशरीरिणी भगवती कीर्त्या स्थिता भूतले ॥ ३ ॥

पाण्डेयोत्तररामजीत्यभिहितः सोऽयं सिपाहोद्भवो
व्यासोक्ते शिवराजवीरविजये विद्वज्जनाङ्गीकृते ।

प्रविशंश्च मन्दमन्दमेवमपठत्—

यद्—"यतो धर्मस्ततः कृष्णो यतः कृष्णस्ततो जयः ।"

"हिंस्रः स्वपापेन विहिंसितः खलः
साधुः समत्वेन भयाद् विमुच्यते"

इति द्वादशो निश्वासः ।

इति तृतीयो विरामः

समाप्तोऽयं ग्रन्थः ।

सह्यङ्काङ्कवसुन्धरापरिमिते श्रीवैक्रमाब्दे वरे
पूर्णायामथ माधवेऽन्वगमयच्छ्रीवैजयन्तीमिमाम् ॥ ४

इति श्रीशिवराजविजयवैजयन्त्यां द्वादशनिश्वासविवरणं समाप्तम् ।
इति तृतीयो विरामः ।

संस्कृत-साहित्य-भाण्डागारे चतुर्थं गद्य-महाकाव्यम्

महाकवि-व्यास-प्रणीतः ।

शिवराज-विजयः

ललित-मधुरः, सरस-सरलः, संस्कृतोपन्यास-सन्दर्भः । पुस्तकमेतत् सर्वैरपि संस्कृतज्ञैरवश्यं सङ्ग्रहणीयम्, पठनीयम्, पाठनीयम् ।

युक्तप्रान्त-बिहार-पंजाब-प्रभृति-परीक्षासु पाठ्यत्वेन निर्धारितम् । सुन्दर-विशुद्ध-सटीक-पञ्चम-संस्करणम् ।

परीक्षोपयोगीनि स्वल्पमूल्यानि संस्करणानि—

शिवराज-विजयः (निश्वासचतुष्टयात्मकः) अष्टाणकाः

शिवराज-विजयः (निश्वासाष्टकात्मकः) एकं रूप्यकम्

शिवराज-विजयः (द्वादशनिश्वासात्मकः, सम्पूर्णः) रूप्यकद्वयम्

स्व-स्व-नगरस्य पुस्तक-विक्रेतृणां समीपे गवेषणीयम् ।

प्राप्तिस्थानम्—

व्यासपुस्तकालयः,

मानमन्दिरम्, काशी ।

महाकवि-व्यास-प्रणीतम्

शुद्धाशुद्धि-प्रदर्शनम्

पुस्तकमिदं विदग्ध-जन-वेद्यं प्रतिभा-विकास-साधनं
व्युत्पत्ति-वर्धनैक-लक्ष्यं संस्कृत-वाक्य-कदम्बकम्

यथा—

१ वाङ्मनोऽतीताय ब्रह्मणे नमः

२ वाक्स्तम्भनमश्रोऽस्माभिर्जाप्यः

३ स्त्रीपुंसोः स्नेह एव सर्वसुखेभ्यो विशिष्यते

४ सकुटुम्बाय ते स्वस्ति

स्वनगरस्य पुस्तकालयतः पणकद्वयमात्रेण क्रीणन्तु, अथवा
एकाणकस्य चिटिका प्रेष्यताम् ।

प्राप्तिस्थानम्—
व्यासपुस्तकालयः,
मानमन्दिरम्, काशी

लाल बहादुर शास्त्री राष्ट्रीय प्रशासन अकादमी, पुस्तकालय
L.B.S. National Academy of Administration, Library
मसूरी
MUSSOORIE
यह पुस्तक निम्नाँकित तारीख तक वापिस करनी है।
This book is to be returned on the date last stamped

दिनांक Date	उधारकर्त्ता की संख्या Borrower's No.	दिनांक Date	उधारकर्त्ता की संख्या Borrower's No.

GL SANS 891.21
VYA


Sans
891.21
व्यास

~~4621~~

अवाप्ति सं०
ACC. No.....
वर्ग सं. पुस्तक सं.
Class No..... Book No.....
लेखक व्यास, अम्बिकादत्त
Author.....
शीर्षक शिवराज-विजय ।
Title.....
.....

निर्गम दिनाँक | उधारकर्ता की सं. | हस्ताक्षर

Sans
891.21 LIBRARY
व्यास LAL BAHADUR SHASTRI
National Academy of Administration
MUSSOORIE

~~4621~~

Accession No. 125543

1. **Books are issued for 15 days only but may have to be recalled earlier if urgently required.**
2. **An over-due charge of 25 Paise per day per volume will be charged.**
3. **Books may be renewed on request, at the discretion of the Librarian.**
4. **Periodicals, Rare and Reference books may not be issued and may be consulted only in the Library.**
5. **Books lost, defaced or injured in any way shall have to be replaced or its double price shall be paid by the borrower.**

Help to keep this book fresh, clean & moving